आनन्दाश्रमसंस्कृतग्रन्थावलिः
ग्रन्थाङ्कः
(८८)

दुर्गाचार्यकृतवृत्तिसमेतम्

निरुक्तम् ।

पूर्वषट्कात्मकः प्रथमो भागः [भा० १]

आनन्दाश्रमसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ८८

दुर्गाचार्यकृतवृत्तिसमेतम् ।

निरुक्तम् ।

पूर्वषट्कात्मकः प्रथमो भागः ।

एतत्पुस्तकम्

मास्टर् ऑफ् आर्ट्स् इत्युपपदधारिभिः वैजनाथ काशीनाथ राजवाडे इत्येतैः संशोधितम् ।

तच्च

बी. ए. इत्युपपदधारिभिः

विनायक गणेश आपटे

इत्येतैः

पुण्याख्यपत्तने

आनन्दाश्रममुद्रणालये

आयसाक्षरैर्मुद्रयित्वा

प्रकाशितम् ।

शालिवाहनशकाब्दाः १८४३

खिस्ताब्दाः १९२१

(अस्य सर्वेऽधिकारा राजशासनानुसारेण स्वायत्तीकृताः ।)

विषयानुक्रमणी ।

	पत्रं.
संस्करणायोपयुक्तानां पुस्तकानां वर्णनम्	१–१४
संक्षिप्तानामर्थाः	१४–१६
निरुक्तम्	
षडङ्गानि तेषां प्रयोजनं च	१
शिक्षा	,,
छन्दः	२
कल्पः	,,
ज्योतिषं	,,
व्याकरणं	,,
निरुक्तं	,,
निरुक्तशास्त्रविषयः	३–४
निघण्टुः	४
समाम्नायः	५
निघण्टुशब्दव्युत्पत्तिः	६
निगमनात्	७
आहननात्	८
समाहरणात्	८–९
ईदृशव्युत्पत्तिप्रयासस्य प्रयोजनम्	९
चत्वारि पदजातानि तेषां पौर्वापर्यं च	१०–११
लक्षणानां हेतुः	११–१२
आख्यातलक्षणम्	१२–१४
नामलक्षणम्	१५–१६
वाक्यं कतरत्प्रधानम्	१६
आख्यातं भा[illegible] कथमाचष्टे	१७

	पत्रं
नाम मूर्तं भावमाचष्टे	१८
नाम्नां सामान्योपदेशो	,,
विशेषोपदेशश्च....	१९
आख्यातस्यापि तथा	,,
पदचतुष्टयमन्तरेणाक्षेपाः	२०–२१
तेषां परिहारश्च....	२२–२४
भाषाया उपयोगो लोके वेदे च	२४–२५
मन्त्राणामुपयोगः	२५–२६
कारणात्मा भावः	२७–२८
भावविकाराः षट्	२९–३१
उपसर्गाणामर्थवत्त्वमन्तरेण शाकटायनमतं गार्ग्यमतं च	३३–३४
उपसर्गाणामर्थाः	३४–३५
निपातलक्षणम्....	३६
निपातानामर्थाः	३७
इव उपमार्थे	,,
आर्षेयमन्तरेण विचारः	३८
'न' प्रतिषेधार्थे उपमार्थे च	४०
चित् नु ननु	४१
नु उपमार्थे :	,,
कर्मोपसंग्रहः	४२
च कर्मोपसंग्रहार्थे	,,
आ तथैव	४३
वा विचारणार्थे....	,,
समुच्चयार्थे च	४४
अह ह विनिग्रहार्थे	४५
विनिग्रहः	,,

पत्रं

उ विनिग्रहार्थे पदपूरणश्च ४५
हि अनेकार्थे ४६
किल विद्याप्रकर्षे ... ,,
न किल ननु किल ४७
मा प्रतिषेधे खलु तथैव ,,
पदपूरणश्च ,,
शश्वत् विचिकित्सार्थे नूनं ,,
च पदपूरणश्च .... ,,
सीं परिग्रहार्थे पदपूरणश्च.... ५१
त्वः निपातः सर्वनाम च
अर्धनाम च ... ५३
तस्य दृष्टव्ययत्वेऽपि निपात-
त्वम् ५६
व्ययस्योदाहरणम् ५८
वत् समुच्चयार्थे ... ५९–६०
पदपूरणलक्षणम् ६०
कम् ईम् उत् उ पदपूरणाः ,,
सर्वे निपाताः प्रायशोऽर्थवन्तः ६१
पदपूरणानां वाक्ये स्थानम् ६२
कम् ईम् उत् उ इत्ये-
तेषामुदाहरणानि ... ६२–६५
इवोऽपि पदपूरणः ६६
नेत् परिभये ६६–६७
न चेत् अनुपृष्टे ६७
नामान्याख्यातजानि इति
शाकटायनो नैरुक्ताश्च ६८
न सर्वाणीति गार्ग्यः ,,
नामाख्यातजत्वे आक्षेपाः ६९–७६
शब्दस्य व्युत्पत्तिः ७५
क्षेपपरिहारः ७७–८४

यः शास्त्रविरुद्धं व्युत्पादयति
स गर्ह्यो न शास्त्रम्
निरुक्तशास्त्रादृते नार्थप्रतीतिः
न च स्वरसंस्कारज्ञानम्
निरुक्तं विद्यास्थानम् ....
तेन व्याकरणशास्त्रं
संपूर्णं भवति
यस्मान्मन्त्रा अनर्थकाः
तस्मान्निरुक्तशास्त्रस्य
न प्रयोजनम् ....
मन्त्राणामानर्थक्ये कारणानि
नियतवाचोयुक्तित्वं नियता-
नुपूर्व्यत्वं च
ब्राह्मणकृतो विनियोगः
अर्थानुपपत्तिः ....
विरुद्धार्थत्वम् ....
प्रैषाणां प्रयोगः । असंबद्ध-
त्वम् । अविस्पष्टार्थत्वम्
आक्षेपपरिहारः ....
मन्त्रा अर्थवन्तः शब्दसा-
मान्यात् ...
ऋग्यजुर्भिरभ्युदितं कर्मैव
समृद्धम् ....
लौकिकेष्वपि प्रयोगेषु
नियतवाचोयुक्तित्वं
नियतानुपूर्व्यत्वं च ...
ब्राह्मणेन मन्त्रोक्तमनूद्यते ....
आम्नायवचनान्नानुपपत्तिः
नापि विरुद्धार्थत्वम्.... ....
लौकिकेष्वपि प्रयोगेषु

	पत्रं
अतिशयोक्तिः ...	९६
गुणप्रवादः केवलं रूपकम्	,,
जानन्तमभिवादयते स्वगोत्रमभिवदन्....	९७
लौकिकेष्वपि प्रयोगेषु गुणवादः	,,
मन्त्रा अविस्पष्टार्था इति अज्ञा वदन्ति	,,
भूयोविद्यः प्रशस्यो भवति	९८
निरुक्तशास्त्रादेव पदज्ञानम्	१००
पदज्ञानमर्थावलम्बि	,,
संहितालक्षणम् ...	१०३
दैवतज्ञानं निरुक्तादेव	१०५
लिङ्गज्ञानमकिंचित्करम्	१०५–१०७
ज्ञानप्रशंसा अज्ञानानिन्दाच	१०७–११३
साक्षात्कृतधर्मभिरसाक्षात्कृतधर्मभ्यो मन्त्रदानम्	११४
सौकर्येणोपदेशग्रहणाय असाक्षात्कृतधर्मभिः वेदानां वेदाङ्गानां च समाम्नानम्	११५
निघण्टुसमाम्नायस्य प्रकरणत्रयम् ...	११५–११६
नैघण्टुकम् ...	११६
ऐकपदिकम् ...	,,
दैवतम् ...	,,
नैघण्टुकं देवतानाम ...	११६–११८
दैवतसंज्ञाया अर्थः ...	११९
निघण्टुनैघण्टुकशब्दयोरर्थः	,,

द्वितीयोऽध्यायः ।

	पत्रं
सरलं निर्वचनम्	१२१
अर्थमवलम्ब्य कदा कदा निर्वचनं कर्तव्यम्	१२२
निर्वचनाय कदा कदा अक्षरसामान्यमपि आश्रयणीयम्	,,
सर्वथा निर्वचनं कर्तव्यमेव	१२३
नामोत्पत्तेः प्राक् धातुषु नानाविधः अकल्पनीयश्च विपरिणामो भवति	१२४
धातूनामादेः उपधाया अन्त्यस्य च लोपः	१२५
उपधाविकारः	१२५–१२६
वर्णलोपः	१२६–१२७
आदिविपर्ययः	१२७
आद्यन्तविपर्ययः ...	,,
अन्तव्यापत्तिः ...	१२८
वर्णोपजनः ...	,,
संप्रसारणम्	१२९–१३०
भाषिकेभ्यो धातुभ्यो नैगमशब्दव्युत्पत्तिः ...	१३०
नैगमेभ्यश्च भाषिकशब्दव्युत्पत्तिः	१३१
केषुचिद्देशेषु कानिचिदाख्यातानि प्रयुज्यन्ते केषुचित् तज्जातानि नामानि...	१३१–१३२
तद्धितानां निर्वचनम्	१३३–१३५
सामासिकपदानां च ...	१३६–१३८
निर्वचनं कदा न कर्तव्यं	१३८
कस्मै च न कर्तव्यम् ...	१३९
कस्मै कर्तव्यम्	१४०
कुशिष्याः } सुशिष्याः }	१४१–१४३

पत्रं

गौः १४४
गोशब्दस्य पयोऽर्थे प्रयोगः १४४–१४५
अधिषवणचर्मार्थे ... १४५
चर्मश्लेष्मार्थे १४६
स्नावश्लेष्मार्थे .... ,,
ज्यार्थे १४७
आदित्यार्थे १४८–१४९
आदित्यस्य सुषुम्णनामा र-
श्मिः चन्द्रमसं दीपयति १४९–१५०
सोऽपि गौरुच्यते ... १५०
सर्वेऽपि रश्मयो गाव उच्यन्ते १५१
संदेहपदानि एकार्थानि चेत्
सामान्यक्रियया निर्वि-
कल्प्यानि नानार्थानि
चेत् नानाक्रियाभिः १५२
निर्ऋतिः कृच्छ्रापत्तिः पृथिवी च १५२-१५५
मन्त्रेषु वर्तमानाः शब्दा
नानार्थख्यापने समर्थाः १५५
देवताज्ञाने शाकपूणेरभिमानः १५६
अस्यामृचि वर्तमानाहं का-
देवतेति देवतायाः प्रश्नः १५६-१५८
समुद्रशब्दस्य द्वावर्थौ ... १६१
देवापिशंतनुकथा १६१–१६५
आदित्यस्य आदित्य इति
सूक्तभाक् नाम अल्पप्रयोगम् १६७
अन्या अपि देवता आदित्य
इत्यभिधीयन्ते १६८–१७०
काष्ठाः = आपः १७६
वृत्रो मेघ इति नैरुक्तः ...
त्वाष्ट्रोऽसुर इत्यैतिहासिकाः १७७

पत्रं

इन्द्रस्य न कोऽपि शत्रुः १७७
मन्त्रेषु ब्राह्मणेषु च मेघः
अहिरित्यभिधीयते १७९
उषा रात्रेरपरः कालः १८२–१८४
कृष्णम् अहः = रात्रिः... १८६
शुक्रम् = दिवसः .... ,,
उपरः = मेघः १८८
सरस्वती नदी १९१
अस्यामृचि सरस्वत्या नद्या
मैत्रायणीसंहितया विरोधः १९२
सूक्तेषु नद्यः प्रायशो मेघ-
ण्डुकवृत्तिं भजन्ते ।
प्राधान्येन कविप्रयोगः १९३
प्राधान्य उदाहरणम् १९४–१९५
नदीविश्वामित्रसंवादः १९५-१९८
दधिक्रा देवता अश्वश्च ... १९८
अश्ववाची दधिकाशब्दः १९९-२००

तृतीयोऽध्यायः ।

प्रजा जनयितुरेव २०४–२०५
अन्यजातोदरसंभूतं नैव स्वापत्यम् २०६
दुहिता दायादमर्हति ... २०८–२१०
अङ्गादङ्गादित्यनेन अविशेषेण
पुत्राणामिति मनुवचनेन
च दुहितरोऽपि पुत्राः २०९-२१०
नैयकं : यस्मात्स्त्रीणां दानवि-
क्रयातिसर्गा विद्यन्ते २१०–२११
पुंसोऽपीत्येके... .... २११–२१२
शासद्वह्निरित्यमूक् अभ्रातृमतीपरा २१२
अभ्रातृकाया विवाहनिषेधः २१४–२१७
अङ्गादङ्गादित्यत्र दुहितुः
पुत्रत्वं गौणम् २१९

	पत्रं
मनुवचनं भ्रातृमतीपरम्	२१९
न जामये तान्व इत्यनेन स्त्रिया रिक्थप्रतिषेधः	२१९–२२०
ज्येष्ठं पुत्रिकायै इत्येके	२१२
के पञ्चजनाः	२२३–२२४
खळः सस्यखलसंग्रामखलयोः	२३२
तडित् अन्तिकाभिधायि वधाभिधायि च	२३५
कुत्सो वज्र ऋषिश्च	२३८
गार्ग्यकृतम् उपमालक्षणं यास्ककृतं च	२४६
यथेति कर्मोपमा	२५०
उपमार्थे 'न'	२५२
'चित्'	२५४
'आ'	२५५
आदित्यो जारः	२५६–२५७
मेष इति भूतोपमा	२५८
अग्निरिति रूपोपमा	२५९
उपमार्थे था	२६०
'तं प्रत्नथा' इत्य . का देवता	२६०–२६१
वत् इति सिद्धोपमा	२६२
लुप्तोपमा अर्थोपमा ...	२६४–२६५
काकादिनामानि शब्दानुकृतिमूलानि	२६५
न शब्दानुकृतिरित्यौपमन्यवः	२६५–२६६
द्विश उत्तराणि नामानि....	२७२
प्रपित्वे....	२७२–२७३
अभीके	२७३
दभ्रम् । अर्भकम् ...	२७४
तिरः सतः.... ...	२७५
त्वः	२७६
नेमे	२७७
ऋक्षाः	,,
स्तृभिः	२७८
वम्रः उपजिह्विका	२७८–२७९
ऊर्दरम्	२७९
कृदरम्	२७९–२८०
रम्भः	२८१
पिनाकः	२८१–२८२
मेनाः	२८२
ग्नाः	२८२–२८३
शेपः वैतसः	२८४
अया एना	२८५–२८६
सिषक्तु...	२८६
सचते....	२८७
भ्यसते रेजते	,,

चतुर्थोऽध्यायः।

ऐकपदिप्रकरणविषयः	२९३
जहा	२९४–२९५
निधा ...	२९६–२९७
शिताम ...	२९८–३०१
अनवगमस्य दश कारणानि	३०१
अनवगमप्रकाराः ...	३०१–३०२
मेहना	३०३
दमूनाः	३०४–३०५
मूषः	३०६–३०८
अत्रेतिहासमिश्रम् ऋङ्मिश्रं गाथामिश्रं च भवति	३०८
इरिरः	३०९–३१०

	पत्रं		पत्रं
कर्तन	३१०	च्यवानः	३४६
हन्तन यातन.... ...	३११	रजः	३४७
जठरम्	३१२	हरः	३४८
तितउ	३१३-३१४	जुहुरे	,,
शिप्रे	३१५	व्यन्तः	३४८-३५१
मध्या	३१६	क्राणा	३५१
वासस्तनुते इत्यत्रोपमा	,,	वाशीभिः	३५२
ईदृशोपमार्थेऽन्यो निगमः	३१७	विषुणस्य	३५३-३५४
मन्दू	३१८	जामिः	३५५
ईर्मान्तासः ...	३१९	पिता	३५७-३५८
आदित्यादश्वो निरतष्टः	३२१	शंयोः	३५८-३६०
कायमानः	३२२	अदितिः	३६१
लोधम्	,,	एरिरे	३६२
शीरम्	३२३	जसुरिः	३६३
विद्रधे द्रुपदे	३२३-३२५	जरते	३६४
तुग्वनि	३२५-३२६	मन्दिने	३६५
नंसन्ते	३२६-३२७	गौः	३६६-३६७
आहनसः	३२७	गातुः	३६७
अभ्रसत्	३२९-३३०	दंसयः	,,
इष्मिणः	३३०	नृताव	३६८
वाहः	३३१	चयसे	३६८-३६९
परितक्म्या	३३२	वियुते	३६९
सुविते	३३३	ऋधक्	३७०-३७२
दयति	३३४-३३६	अस्याः	३७३-३७४
नू चित् नू च....	३३७-३३८	अस्य	३७५-३७६
दावने अकूपारस्य	३३९-३४१	आदित्यः सप्तरश्मिः	३७८
शिशीते	३४१	संवत्सरस्य सर्वमात्राभिः स्तवः	३८०-३८३
सुतुकः	३४२	**पञ्चमोऽध्यायः ।**	
सुप्रायणाः	३४३	अनवगमस्यार्थः	३८५
अप्रायुवः	३४५	सस्निम्	३८६-३८७

	पत्रं
वाहिष्ठः	३८७
दूतः	,,
वावशानः	३८८
वार्यम्	३८८–३८९
अन्धः	३८९–३९०
असश्चती	३९२
वनुष्यति	३९२–३९४
तरुष्यति	३९४
भन्दते	,,
भन्दना	३९५
अर्हना:	३९६–३९७
नदः	३९७–३९८
सोमो अक्षाः	३९८–४०१
श्वात्रम्	४०१–४०२
ऊतिः	४०२
हासमाने	,,
पड्भिः	४०२–४०३
ससम्	४०३–४०४
द्विता	४०४–४०५
व्राः	४०५
वराहः	४०६–४०९
वराहवः	४०९–४१०
स्वसराणि	४१०
शर्याः	४११
अर्कः	४१२–४१३
पविः	४१४
वक्षः	४१५
सिनम्	४१५–४१६
सचा	४१६
चित्	४१७
आ	४१७–४१८
द्युम्नम्	४१९
पवित्रम्	४२०–४२२
तोदः	४२३–४२४
स्वञ्जाः	४२४–४२५
शिपिविष्टः	४२५–४२७
आघृणिः	४२८
पृथुज्रयाः	४२९
अथर्युम्	४३०
काणुका	४३१–४३२
सरांसि त्रिंशतम्	४३२–४३४
अध्रिगुः	४३४–४३८
आङ्गूषः	४३८–४३९
आपान्तमन्युः	४४०–४४१
इन्द्रस्य ऋजीषित्वम्	४४१–४४२
ऋजीषं धानाश्च हर्यो-रिन्द्रस्य च भागः	४४३
श्मशा	४४४
उर्वशी	४४५–४४८
अप्सरा अप्सः	४४५–४४७
वयुनम्	४५०–४५१
वाजपस्त्यम् वाजगन्ध्यम्	४५१
गध्यम्	४५२
गध्यतिः	४५२–४५३
कौरयाणः	४५३
तौरयाणः	४५३–४५४
अह्रयाणः	४५४
हरयाणः	४५४–४५५
आरितः	४५५
वन्दी	४५६–४५७

	पत्रं		पत्रं
म्रदतिः	४५८	विस्रुहः	४९८–४९९
निष्षपी	४५९	वीरुधः	४९९
तूर्णाशम्	४५९–४६०	नक्षद्दाभम्	४९९–५००
क्षुम्पम्	४६१	अस्कृधोयुः	५००–५०१
निचुम्पुणः	४६२–४६३	निशृम्भाः	५०१–५०२
पदिः	४६३–४६४	बृबदुक्थः	५०२
पादुः	४६५–४६६	ऋदूदरः	५०३
वृकः	४६६–४७१	ऋदूपे	५०४
जोषवाकम्	४७२	पुलुकामः	,,
कृत्तिः	४७२–४७३	असिन्वती	५०४–५०५
श्वघ्नी	४७३–४७४	कपनाः	५०५–५०६
ससम्	४७५–४७७	भाऋजीकः	५०६
कुटस्य चर्षणिः	४७७–४७८	ऋजानाः	५०७
शम्बः	४७८	जूर्णिः	५०७–५०८
केपयः	४७८–४८०	ओमना	५०८–५०९
तूतुमाकृषे	४८०–४८१	उपलप्रक्षिणी	५१०–५११
अंसत्रम्	४८२	उपसि	५१२
काकुदम्	४८३–४८५	प्रकलवित्	५१३
बीरिटम्	४८६–४८७	अभ्यर्धयज्वा	५१३–५१४
अच्छ पारी ईम् सीम् एनम्		ईक्षे	५१४
एनाम्	४८७	क्षोणस्य	५१५
सृणिः	४८८	अस्मे	५१६–५२०
षष्ठोऽध्यायः ।		पाथः	५२०–५२२
आशुशुक्षणिः	४९०–४९२	सबीमनि	५२२
आशाम्यः	४९२	सप्रथाः	५२२–५२३
काशिः	४९३	विदथानि	५२३
कुणारुम्	४९३–४९४	श्रायन्तः	५२३–५२५
अलातृणः	४९५	आशीः	५२५–५२६
सललूकम्	४९६–४९७	अजीगः	५२६
कत्पयम्	४९७	अमूरः	५२७

	पत्रं
शशमानः	५२७–५२८
कृपा	५२८–५२९
विजामातुः	५२९–५३०
ओमासः	५३१
सोमानम्	५३१–५३२
अनवायम्, किनीदिने	५३२–५३३
अमवान्	५३३–५३५
अमीवा	५३५
दुरितम्	५३५–५३६
अव्या	५३६
अमतिः	५३६–५३७
श्रुष्टी, पुरन्धिः	५३७–५३९
रुशत्	५३९–५४०
रिशादसः	५४ –५४१
सुदत्रः	५४१
सुविदत्रः	५४१–५४२
अनुषक्	५४२
तुर्वणिः	५४३
गिर्वणसे	५४३–५४४
अनूर्ते सूर्ते	५४४–५४५
अभ्यक्	५४५–५४६
यादृश्मिन्	५४६–५४७
जारयायि	५४७
अध्रिया	५४८–५४९
चनः, पचता	५ ९–५५१
शुरुधः	५५१
अमिनः	५५१–५५२
जज्झतीः	५५२
अप्रतिष्कुतः	५५२–५५३
शाशदानः	५५३
सृप्र	५५४
सुशिप्रः, शिप्रे	५५५
रंसु, द्विबर्हाः	५५६
अक्रः	५५६–५५७
उराणः	५५७
स्तियाः	५५८
स्तिपाः	५५८–५५९
जबारु	५५९–५६०
जरूथम्	५६०
कुलिशम्	५६०–५६१
तुञ्जे	५६१
बर्हणा	५६२
ततनुष्टिः	५६२–५६३
इलीबिशः	५६४–५६५
कियेधाः	५६५–५६६
भृमिः	५६६
विष्पितः	५६७
तुरीपम्	५६७–५६८
रास्पी	५६८–५६९
ऋञ्जतिः	५६९
ऋजुः	५७०
प्रतद्वसू	”
हिनोत	५७०–५७२
चोष्कूयमाणः, चोष्कूयते	५७२–५७४
सुमत्	५७४–५७५

			पत्रं				पत्रं
दिविष्टिषु	...	...	५७५	पराशरः	...	...	५९६
दूतः } जिन्वतिः }	...	....	५७६	क्रिविर्दती	...	....	५९६–५९७
अमत्रः	....	...	५७७	करूळती	....	...	५९७–५९८
ऋचीषमः	....	....	५७७–५७८	दनः	...	...	५९८
अनर्शरातिम्	....	....	५७८	शरारुः	....	...	५९९
अनर्वा	....	....	५७८–५७९	इदंयुः	....	...	५९९–६००
असामि	....	....	५७९–५८०	कीकटेषु	...	...	६००–६०२
गल्दया	....	...	५८०–५८२	बुन्दः	....	....	६०२–६०४
जल्हवः	....	...	५८२	बृन्दम्	....	...	६०४
बकुरः	...	....	५८३–५८४	किः	...	....	६०४–६०५
बेकनाटान्	...	....	५८४	उल्बम्	....	...	६०५–६०६
अभिधेतन	...	...	५८५–५८६	ऋबीसम्	....	....	६०६–६०७
अंहूरणम्	....	....	५८६	टिप्पणी			१–२२८
अंहुरः	...	...	५८६–५८७	मुद्रणानन्तरं येषां मूलमुपलब्धं तानि स्थलानि			२२९
बत	...	...	५८७–५८८	अद्यापि येषां मूलमनुपलब्धं तानि			२३०
वाताप्यम्	...	...	५८८–५८९	निरुक्ताध्यायखण्डानां स्थाने आदेष्टव्यानां पत्राणां पङ्क्तीनां चाङ्काः			२३०–२३१
चाकन्	....	....	५८९–५९०	शुद्धिपत्रकम्			१–१८
वायः	....	...	५९०–५९१				
रथर्यति	...	...	५९१				
असक्राम्	....	....	५९२				
आधवः	....	....	५९२–५९३				
अनवब्रवः	...	....	५९३				
सदान्वे	...	....	५९३–५९५				
शिरिम्बिठः	...	....	५९५–५९६				

संस्करणायोपयुक्तानां पुस्तकानां वर्णनम्।

अस्य ग्रन्थस्य संस्करणेऽधोवर्णितानि पुस्तकान्युपायुज्यन्त । निरुक्तमूलसंशोधनार्थमुपयुक्तानां पुस्तकानां क. ख. छ. त. द. ङ. थ. घ. ठ. ड. इति चिह्नानि । क. ख. इति वङ्गवर्गः । छ. त. द. इति गुर्जरदेशीयः । ङ. थ. घ. ठ. ड. इति महाराष्ट्रीयः ।

ख. पण्डितसत्यव्रतसामाश्रमिभट्टाचार्यैः ' बिब्लिओथेका इंडिका '-ग्रन्थावल्यां संशोधितं कलिकातानगर्यां येशूक्रिस्त १८८२–१८९१ वर्षेषु भागशो मुद्रितं प्रकाशितं च ।

क. पण्डितकुलपतिना बी. ए. उपाधिधारिणा श्रीजीवानन्दविद्यासागरभट्टाचार्येण संस्कृतं प्रकाशितं च । द्वितीयसंस्करणं खिस्ताब्दे १८९१ । इदं ख. पुस्तकस्य सर्वशोऽनुकरणम् । अस्मिन्वर्गे गुर्जरमहाराष्ट्रीययोर्मिश्रणं दृश्यते ।

छ. हस्तलिखितम् । पूर्वषट्कं ७८ पत्रात्मकम् । संवत् १७८८ नामायशुदि ६ गुरौ नागरज्ञातिय आचार्यश्रीपजीभाईतत्सुतसांमलेन लिखितं । श्रीनवानगरमधे लिखु छे । संवत् १८४१ केनाप्यन्येन लिखितम् । उत्तरषट्कं ९७ पत्रात्मकम् । संवत् साध्विवसुभवर्षे शुक्रमासे सित दले राकायां जीववारेषु लिखितमिदं पुस्तकम् । संवत् १८४६ ज्येष्ठवदि वैजनाथेन भूषितम् । हस्ताक्षरं स्पष्टम् । पुस्तकमानन्दाश्रमस्थम् । क्रमाङ्कः ६५८० ।

त. हस्तलिखितम् । पूर्वषट्कं ८३ पत्रात्मकम् । शिवप्रसादेन लिखितम् । संवत् १७४० वर्षे आषाढवद ॥ दने लख्यतम् । उत्तरषट्कं ९३ पत्रात्मकम् । अपूर्णम् । लेखनपद्धतिः प्राचीना प्राङ्मात्रका यथा मेधावी = मेधावी । स्पष्टं स्थूलाक्षरं च । डेक्कनकालेजस्थम् । अधुना भाण्डारकरसंशोधनसंस्थायां वर्तमानम् । क्रमाङ्कः $\frac{८५}{१८८१-८२}$ ।

द. हस्तलिखितम् । १५७ पत्रात्मकम् । अतिस्तुत्यध्यायमारभ्य ग्रन्थान्तं यावत् पत्रसंख्या २१ । अनन्तसुतशिवासुतगोपालकस्य पुस्तकम् । त्रिवेदि गिरिजाशंकरसुतलक्ष्मीशंकरपुस्तकम् । दवे कल्याणशंकरजेशंकर ।

अतीव जीर्णम् । प्राङ्मात्रकम् । डेक्कनकालेजस्थम् । अधुना भाण्डारकर-संशोधनसंस्थायां वर्तमानम् । क्रमाङ्कः १८८६ ९२ ।

ङ. हस्तलिखितम् । पूर्वषट्कं ७९ पत्रात्मकम् । महादेवभटात्मज-गोविंदभट फणशेन लिखितम् । उत्तरषट्कं ८१ पत्रात्मकम् । तेनैव लिखितम् । शके १७३९. ईश्वरनामसंवत्सरे माघशुद्धद्वितीयायां संपूर्णम् । आनन्दाश्रमस्थम् । क्रमाङ्कः ४१९५–९६ ।

थ. हस्तलिखितम् । पूर्वषट्क ८० पत्रात्मकम् । शके १७०७ विश्वावसुनामसंवत्सरे चैत्रशुक्लाष्टम्यां पटवर्धनोपनामककेशवभट्टात्मज-महादेवेन लिखितम् । उत्तरषट्कं ९१ पत्रात्मकम् । शके १७०७ विश्वावसुनामसंवत्सरे अधिकचैत्रशुद्धचतुर्थ्यां तेनैव लिखितम् । नाशिक-नगरस्थात्तद्वंशजान्मया संपादितम् ।

ध. मुम्बापुर्यां निर्णयसागरयन्त्रालये मुद्रितं शके १८१३ ।

गुर्जरपाठो महाराष्ट्रपाठाद्विश्वसनीयो दुर्गाचार्येण प्रायः स्वीकृतश्च । गुर्जरपाठस्य खण्डविभागो महाराष्ट्रपाठस्य खण्डविभागाद्भिन्नः । ग. घ. पुस्तकयोः पादे पादे प्रथमो द्वितीय [illegible] तथा छ. पुस्तके पादविभागो वर्तमानोऽपि । तत्राध्यायारम्भ समाप्ति यावत्प्रथमो द्वितीय इति खण्डगणना । क. ख. पुस्तकयोः पादविभागः खण्डाश्च गुर्जरपाठसदृशाः । किंतु तयोः छ.पुस्तकस्य खण्डगणना (   ) एतादृशचिह्नमध्ये लिख्यते । छ. त. द. पुस्तकेषु खण्डशृ-ङ्खला न दीयते । सा क. ख. ङ. थ. ध. ठ. ड. पुस्तकेषु अध्यायानां पठनसाहाय्यार्थं दीयते । ङ. थ. ध. ठ. ड. पुस्तकेषु पादविभागो नास्ति ।

निरुक्तवृत्तिसंशोधनार्थमुपयुक्तानि पुस्तकान्यधो वर्ण्यन्ते ।

क. ख. एतयोर्मुद्रणादिवर्णनं प्राग्दत्तमेव । एते नैव विश्वसनीये प्रमादप्राचुर्याद्यत्रतत्रानवधानतादोषाच्च । अनवधानतादोषा असंख्याताः कदा कदोपहास्याश्च । तेषामुदाहरणानि ।

शुद्धं	प्रामादिकं		पङ्क्तिः
साकल्यं	साफल्यं	(निरु० पृ० ६ । २३) ।	
अव्यविवक्षिते	अर्थविवक्षिते		(९ । २)

दर्शयन्ति	बर्षयन्ति	(९ । ११)
व्यापि	अथापि	(१२ । १)
वसन्ती	च सन्ती	(१४ । ३)
निर्देष्टुं	निर्दिष्टुं	(१४ । ३)
स कृत्प्रत्ययोपजनितेन	सकृत्प्रयोजयति तेन	(१५ । २४)
कथं	वार्यं	(२१ । ८)
बुद्धितत्त्वे	बुद्धित्वे	(२३ । ११)
देवेषु	वेदेषु	(२५ । ६)
आप्यायते	अर्थायते	(३२ । १३)
यामी	अभी	(४३ । ९)
ब्राह्मगं	बाह्यं	(९८ । १७)
उणादि	गुणादि	(८६ । ८)
दध्यादिद्रव्यं	द्रष्टव्यं	(१३५ । २)
गौरन्यद्रव्यमयी	गौरन्यद्रव्यमपि	(१४७ । २)
न पति	नयति	(२१३ । १३)
मह ते	अर्थ्यते	(२४७ । १९)
एतद्द्वयः	एतद्द्वयः	(३५: । ४)
भक्षणार्थी	लक्षणार्थी	(४४७ । १)

एतादृशा दोषाः शतश उपलभ्यन्ते । ते न केवलमनवधानतामूलाः । अज्ञानमपि यत्र तत्राविष्क्रियते । कदा कदा पङ्क्त्योऽपि गलिता दृश्यन्ते । यथा

पत्रं	पङ्क्तयः
३९	१८–२०
८७	१४–१६
८७	२५
१०४	२२–२५
१५४	२२- २६
१५५	१–५
१५७	११–१२
१७७	२१–२२

	१
१७८	१२-१३
२१९	३-५
२८८	२०-२१
२९३	२-४
४१६	१-३
५९१	

एतादृंशि गलितोदाहरणान्यन्यान्यपि सन्ति ।

कदा कदा मूलवृत्तावविद्यमाना अपि शब्दा वृत्तावन्तर्भवन्ते ।

यथा

पत्रं	पङ्क्तिः	
२७४	१	इत्यत्र ' अधि धन्वसु ' इत्यनन्तरं ' पनु भविरोधिताः नमन्तां हिंस्यन्ताम् ' ।
४८०	३–८	अत्र ' प्रथमा० वा प्रायन् ' इत्यस्य स्थाने सायणभाष्यं दीयते ।
४४	१६–१८	' वायुर्वा त्वा मनुर्वा त्वा ' इत्यस्य मूलं य० वा० सं० ९ । ७ दीयते । तत्र तु ' वातो वा मनो वा ' इति ऋच आरम्भः ।
१५८	१७–१८	' वक्ष्यति हि ' इत्यादेर्निरुक्तमूलं ७ । २८ । क. ख. पुस्तकयोस्तु १२ । २ । ८ अथवा १२ । १९ । अस्मिन् खण्डे १२ । १९ इत्यत्र ' नमस्कुर्वन् ' इति नास्ति । तस्मात्तत् अत्र क. ख. पुस्तकयोर्न पठितम् ।
२७८	२१–२२	' यदश्यु० ' इत्यस्य मूलं तैत्तिरीयसंहिता न तु ऋक्संहिता यस्मात्तत्र ' तज्जुषस्व यविष्ठ्य ' इति नास्ति (ऋ० सं० ८ । १०२ । २१) । क. ख. पुस्तकयोः ' तज्जुषस्व यविष्ठ्य ' इति त्यक्तं तथा ' तैत्तिरीयके पठ्यते ' इति दुर्गवृत्तिस्थाः शब्दा अपि ।
४२०	२१–२३	' वाचस्पतये पवस्व वृष्णो अंशुभ्यां गभस्तिपूतः । देवो देवेभ्यः पवस्व येषां भागोऽसि ' (य० वा० सं० ७ । १) ॥ एतत् ' रश्मयः पवित्रमुच्यन्ते ' इत्यस्योदाहरणं दीयते । अत्र पवित्रशब्दः क वर्तते । संस्करणकारैर्मैत्रा-

		यर्णीसंहिताया नामापि न श्रुतमिति स्पष्टम् । अहो श्चाश्चर्यम् ।
४४५	२०–२४	'यदेनः०' इत्यस्य य० वा० सं० ३ । ४५ (३० । १७ इति प्रमादः) इति मूलं दीयते । किंतु तत्र 'अप्सः' शब्दो नास्ति ।
४५३	२०–२२	'जातं यत्त्वा०' इत्यस्य मूलं नोपलभ्यते । क. ख. पुस्तकयोः 'ऋ० सं० ३ । ५१ । ८' इति दीयते । किंतु तौरयाणशब्दो न केवलं तस्यामृचि सर्वस्यामपि ऋक्संहितायां न वर्तते । अहो सत्यव्रतानां सत्यप्रियता । 'जातं यत्त्वा०' इति ऋगर्धेनैव ३ । ५१ । ८ इत्यत्र ।
५१९	१४	'आ नो भर०' इति ऋच्यपि तैर्थाश्चर्थं कृतं यत् 'धीमहि' इति पदं 'दधीमहि' इति विपरिणमितम् ।
९८	२१–२२	'इति प्रभिन्नेषु०' इति श्लोका दुर्गाचार्यैः प्रतिपक्षहेतुनिराकरणजनितया अभिमानस्फूर्त्या रचिताः विद्वद्भिः सत्यव्रतैर्गद्यवाक्यमिति लिखितः ।
११६	१६	'अथ पुनर्यत्र० प्रायेण चिन्त्यते' इदं दैवतप्रकरणसंबद्धं वाक्यं 'अनुषङ्गोऽन्यत् किंचित्' (पङ्क्तिः १४) इत्यस्यानन्तरं 'तदेतदेवं०' (पङ्क्तिः १४) इत्यस्य नैगमप्रकरणसंबद्धप्रकरणमिति कृत्वा स्थाप्यते । किमिदमज्ञानमनवधानता वा ।

• कृमिपूर्णं बदरमिव दोषपूर्णमिदं संस्करणं सर्वथैव त्याज्यं नैवानुकरणीयम् । क. पुस्तकं ख. पुस्तकं दासवदनुकरोति । ख.दोषान्गुणत्वेन गृह्णाति । कदा कदा 'दृष्टव्ययत्वात्' इत्यत्र 'दृष्टाव्ययत्वात्' (५७ । ३) इति लिखित्वा स्वबुद्धिं प्रकाशयति । हस्तलिखितं न किंचनापि निरुक्तवृत्तिपुस्तकमयं दोषरूपं भवेत् । अहो व्यर्थः प्रयासः सत्यव्रतजीवानन्दभट्टाचार्याणाम् ।

•• ग. च. ज. पुस्तकानि गुर्जरवर्णीयानि ।

ग. हस्तलिखितम् । आनन्दाश्रमस्थम् । क्रमाङ्कः ६५८१ । अष्टमाध्यायस्यानन्तरं 'सं । १८७४ ना वैशाख शुद्ध ८ बुधे लि०' नव-

माध्यायस्यानन्तरं ' सं । १८७४ ना ज्येष्ठ शुद्ध १४ बुधे श्रीभुज-नगरबीवाहमध्ये लि० ॥ नैरुक्तस्य भाष्यम् । वोरा श्रीकण्याजीकस्य पुस्तकोपरि पं । गोपीनाथ । ' पञ्चदशाध्यायस्यानन्तरं ' सं । १८७४ ना चैत्रवदि १ भौमवासरे लिं । त्रवाडि कचरासुत गोविन्दजीयेन श्रीहाटकेश्वरसंनिधौ ' । सप्तदशाध्यायस्यानन्तरं ' समाप्ता इयं निरुक्तभाष्यवृत्तिः । सं । १८७४ फाल्गुन शुद ५ प्रारंभ चैत्र शुद्ध समाप्तिः । वोरा कल्याणजीना पुस्तकोपरि लि० ' इति लेखनकालो दीयते । अध्यायस्याध्यायस्यान्ते खण्डपादमन्त्रग्रन्थसंख्या लिख्यन्ते । पूर्वषट्कस्यान्ते एकस्मिन्पत्रे सर्वा एताः संख्याः पुनर्लिखिताः । खण्डविभागः त. द. पुस्तकयोर्वर्तमानखण्डविभागानुसारी । अध्यायस्याध्यायस्य पत्राणि पृथक्संख्यायन्ते । पूर्वषट्कपत्रसंख्या ४३९ । उत्तरषट्कपत्रसंख्या २४६ । द्वयोः षट्कयोः ६८५ । अकारः 'अ' इत्येवं लिख्यते । लेखनपद्धतिः क्वचिदाधुनिकगुर्जरलेखनसदृशी । स्पष्टाक्षरा परिशिष्टाध्यायपंक्तिर्निर्वर्तते ।

ज. हस्तलिखितम् । डेक्कनकालेजस्थमधुना भाण्डारकरसंशोधनसंस्थायां वर्तमानम् । क्रमाङ्कः १८७९–८० । सर्वं ४६४ पत्रात्मकम् । अध्यायस्याध्यायस्य भिन्नं संख्यानं नास्ति नापि षट्कस्य षट्कस्य । क्वचिदध्यायान्ते मन्त्रसंख्या दीयते । ' अष्टमोऽध्यायः ' इत्यस्यानन्तरं ' ग्रन्थसंख्याऽस्मिन्नध्याये ' इति लिख्यते किंतु संख्या न दीयते । नवमाध्यायस्यानन्तरं ' अस्मिन्नध्याये व्याख्यात ऋच ७० ग्रन्थसंख्या ' इति । ' अस्मिन्नध्याये ' (दशमाध्याये) ऋक्संख्या ९८ ग्रन्थसंख्या १२०० ' । ' एकादशोऽध्यायः । ग्रन्थसंख्या १५१६ । व्याख्याता ऋचः १७० एवं अध्यायषट्के ४६० । संवत् । १८०२ ना पोषिवदि १० रवौ लखीतं ' । उत्तरषट्कान्ते ' संवत् १८०२ वर्षे मावबद ११ रवौ लखीतं ।

ग. ज. पुस्तकयोर्वर्तमानाः प्रमादाः प्रायशः समानाः । यथा ।

शुद्धं	अशुद्धं	
वक्ष्यति	लक्ष्यते	(११ । २१)
लक्ष्यते	वाक्यते	(२० । १३)
शेवधिः	सेवधि°	(१४२ । १४)
आह्वयते	आह्वयते	(२४३ । १८)

कुह्यतः	कुहयतः	(३५२ । १५)
°रथ्यनवगमः	°रथनवगमः	(३८५ । १९)
श्वस्तनं	दस्तनं	
सिषाधयिषितत्वात्	सिष धयिष्टितत्वात्	
पुनः सूत्र°	पुनः स्तत्र°	

किंतु एकमपरस्यानुकरणमिति वक्तुं न शक्यते यस्मात् ज. पुस्तके वर्तमानाः केचित्प्रमादाः ग. पुस्तके न दृश्यन्ते ग. पुस्तके च वर्तमानाः केचित् ज. पुस्तके । पत्रं ८ पाठभेदः ४ अयं प्रामादिकः पाठो ज. पुस्तके एव वर्तते ।

च. हस्तलिखितम् । आनन्दाश्रमस्थम् । क्रमाङ्कः ३५७९ । अतीव जीर्णम् । अध्यायस्याध्यायस्य प्रायशः पृथक्पत्रसंख्यानम् । सर्वग्रन्थस्य पृष्ठसंख्या ४०४ । अष्टमाध्यायस्यान्ते ‘ गङ्गाधरोऽस्मिँल्लिखिते तु भाष्ये व्यासस्य पूजां महतीं चकार । देशान्तरागस्य विवृत्य नेत्रे पारुष्यमुक्त्वा स्वगृहं जगाम ’ । नवमाध्यायस्यान्ते ‘ अस्मिन्नध्याये व्याख्याता ऋचः ७० । संवत् षोडशशतसप्ताधिकत्रिंशत्तमे (१६३७) संवत्सरे वैशाखस्य सिते पक्षे त्रयोदश्यां रविवासरे । जगन्नाथेनायं निरुक्ताध्यायो स्वहस्तेन धर्मार्थं लिखित्वा प्रदत्ता ’ । कलात्तमायालवकान्तमूर्तिः कलक्कणद्वेणुनिनादरम्यः । श्रितो हृदि व्याकुलयंस्त्रिलोकीं श्रियेऽस्तु गोपीजनवल्लभो वः ॥ १ नूनमच्युतकटाक्षपातने कारणं भवति भक्तिरञ्जसा । तच्चतुष्टयफलाप्तये ततो भक्तिमानधिकृतो हरौ गुरौ ’ । एकादशाध्यायान्ते ग्रन्थसंख्या १५५६ अस्मिन्नध्याये व्याख्याता ऋचः १७० अध्यायषट्के ऋच ४६० पूर्वार्धे ऋक्संख्या इति । संवत्-१६३७ वर्षे कार्तिकवदि ४ बुधे श्रीवृद्धनगरे भटश्रीगङ्गाधरेण लिखितम् ’ । चतुर्दशाध्यायान्ते ‘ अमुमध्यायं द्विवेदि श्रीढक्कीकासूनुर्दीक्षिणालभट्टश्रीगंगाधरस्यावलोकनार्थं श्रीविश्वात्मनः प्रीत्यर्थं च महादेवोऽलेखीत्’ । अष्टादशाध्यायान्ते ‘ स्वस्तिश्रीनृपविक्रमसमयातीतसंवत् १६३७ वर्षे कार्तिकवदि २ दिने । यादिसं पुस्तकं दृष्ट्वा तादिशं लिखितं मया । यदशुद्धमशुद्धं वा मम दोषो न विद्यते ’ । अन्त्यपत्रस्य पश्चाद्भागे ‘ यज्ञेश्वरदीक्षितवडलीकरस्येदं पुस्तकं । मोडक नारायणभट्टस्येदं ’ । लेखनपद्धतिर्गुजरी । पश्चान्मात्रा । ‘ उपसर्गः ‘ निर्गमनं ’ ‘ मार्गाणां ’ एते शब्दाः ‘ उप-

सर्गः ' निर्गमनं ' ' मार्गाणां ' एवं लिख्यन्ते । 'ख' 'स्थाने' 'ष' ष-स्थाने 'ख' च क्वचित् । सर्वं पुस्तकं नैकेन लिखितम् । त्रिचतुराणि हस्ताक्षराणि दृश्यन्ते । ग. च. ज. पुस्तकानि गुर्जरवर्गीयाणीत्युक्तमेव । तेषु केचित्साधारणाः प्रमादाः । यथा ' निर्गमणद्वारं ' ' पुनर्णवा ' ' पुन आत्मा ' ' उपमीयेतेऽश्विनौ ' ' पुरैवोपधि ' । सर्वेषु पुस्तकेष्विदं विश्वसनीयतमम् । कदा कदा भिन्नपाठा अपि वृत्तिमध्ये लिख्यन्ते तेन लेखकः प्राज्ञ आसीदिति भाति । अस्य शुद्धीकरणे द्वौ यत्नावास्ताम् । प्रथमो यत्न आवश्यकः समीचीनश्च । द्वितीयः केनचिदज्ञेन ट. सदृशपुस्तकानुरोधेन कृतः । सोऽनावश्यकः । शुद्धीकरणं कदा कदा प्रान्तेषु पङ्क्तीनामङ्कान् दत्त्वा क्रियते । कदा कदा मूलाक्षराणि मस्या दूष्यन्ते तेन मूलपाठोऽदर्शनीयो भवति । महती हानिश्च जायते । इदमशुद्धीकरणमेव । च. पुस्तकं प्रायः शुद्धम् । किंतु तत्रापि केचिद्विस्मयकारका दोषा दृश्यन्ते । माहाभाग्यशब्दः महाभाग्य इति प्रायो लिख्यते । ' प्रतिग्रहीतृ ' 'प्रतिगृहीतृ' एवम् । ' मैत्रायणी ' इति विशिष्टाया यजुःसंहिताया नाम । तदज्ञानात् ' मैत्रायणीये ' इतिशब्दो ' मैत्रावरुणीयके ' इति परिणम्यते । ट. सदृशपुस्तकानुरोधेन प्रान्ते कदा कदा सायणभाष्यं लिख्यते ।

मूलवृत्तिः कीदृश्यासीदित्यस्मात् पुस्तकाज्ज्ञायते । अज्ञानाशुद्धीकरणात्प्राक् दुर्गवृत्तिः किंस्वरूपासीदिति जिज्ञासातृप्त्यर्थं च.सदृशपुस्तकमवश्यमन्वेषणीयम् । तेन महत्कार्यं संपादितं स्यात् । ग. च. ज. पुस्तकेषु विद्यमानं निरुक्तमूलं छ. त. द. सदृशं खण्डविभागोऽपि तादृश एव ।

च. पुस्तकस्य पूर्वषट्कं प्रायः शुद्धं न तथोत्तरषट्कम् । इदमुत्तरषट्कं प्रचुरप्रमाददूषितम् केनचिदसंस्कृतज्ञेन लिखितम् । ते प्रमादा उत्तरषट्कप्रस्तावनायां दर्शयिष्यन्ते ।

पूर्वषट्के यत्र तत्र ट. सदृशपुस्तकानुरोधेन शोधाः कृताः । ते प्रायशोऽज्ञानमूलाः । कदा कदा च. पुस्तकानुरोधेन ट. पुस्तके पाठशुद्धिः ट. पुस्तकानुरोधेन च च. पुस्तके । यथा ।

२९३ । ८ ट. °मानैत्रैव° न् त । च.° मान् तत्रैव° अ ।

३११ । २६ ट. प्रयात° आ । च. आयात° प्र ।

३१३ । ५ ट. ब्रवीषि° मि । च. ब्रवीमि° षि ।

ॐ तत्सद्ब्रह्मणे नमः ।

दुर्गाचार्यकृतटीकासमेतं

निरुक्तम् ।

तत्र पूर्वषट्कम् ।

अथ प्रथमोऽध्यायः ।

"ॐ समाम्नायः समाम्नातः । स व्याख्यातव्यः" । अथ किमर्थं वेदो वेदाङ्गानि च प्रवृत्तानि । सर्वकामप्राप्त्यादिर्मोक्षान्तः पुरुषार्थो वक्तव्य इति वेदः प्रवृत्तः । तत्परिज्ञानाय वेदाङ्गानि प्रवृत्तानि । तानि पुनरमूनि प्रतिनियतार्थविषयवृत्त्या वेदमास्कन्दन्ति । तद्यथा । शिक्षा तावत् "आत्मा बुद्ध्या समेत्यार्थान्" (पा० शि० ६) इत्येवमादिना क्रमेण स्वरव्यञ्जनाभिव्यक्तिलक्षणं पूर्वाह्णमध्यंदिनापराह्णेषु यथाध्येयमधीतस्य च स्वरसौष्ठवयुक्तस्य यज्ञकर्मणि प्रयोग इत्येवमाद्यर्थजातं निरुवाच । तथा ह्यधीतः प्रयुज्यमानश्चापूर्वाङ्गभावाय नान्यथेत्येवमर्थवत्ता शिक्षायाः । एवं ह्याह । "मन्त्रो हीनः स्वरतो वर्णतो वा मिथ्या प्रयुक्तो न तमर्थमाह । स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुः स्वरतोऽपराधात्" (पा० शि० ५२) इति । वेदाध्ययनानुषङ्गतश्चेतिहासपुराणशास्त्राणां लौकिकानां ग्रन्थविस्तररचनानामतएवाध्ययनपरिज्ञानम् ।

वेदवेदाङ्गप्रयोजनं

शिक्षा

शिक्षाधिगताध्ययनविधेर्वेदस्याक्षरकोशपादव्यवस्थालक्षणपरिज्ञाने छन्दो-

---

१ क. ख. ग. ज. घ. ट. श्रीगणेशायनमः । आदितः पाणिनीयं तु (ग. च) शिक्षा ज्योतिस्तत (ग. ज्योतिः कल्पः) श्छन्दः । पञ्चाध्यायी निघण्टोश्च निरुक्तमुपरि स्थितम् ॥ १ ॥ प्रणम्य तत्प्रवक्ष्यामि रुद्रायामिततेजसे । स मे दिशतु सुप्रीतो वाग्वियोः शिष्टसंमतिम् ॥ २ ॥ समाम्ना°; च. पुस्तके इदं श्लोकद्वयं पत्रस्योपरितनभागे लिखितं क्षेपकमिव भाति°; ठ. पुस्तके इमौ श्लोकौ व्यत्यस्तौ. २.व. झ. 'च प्रवृत्तानि' नास्ति; ट. °ङ्गानि ~ सर्व° च प्रवृत्तानि. ३ क. ख. ठ. समेत्यार्थान्. ४ व. °सौष्ठवाद्युक्तस्य°; झ. °सौष्ठयुक्तस्य°; ट. °सौष्ठव.युक्तस्य° वयु°; ठ. सौष्ठवाद्युक्तस्य. ५ च. यज्ञे कर्माणि°. ६ ग. ज. व्यवस्थापरिज्ञाने°.

विचितिराद्रियते । इयत्ताक्षरकोशेनेयद्भिः पादैर्गायत्रीयद्भिस्त्रिष्टुबिति । न ह्यविज्ञातच्छन्दसा प्रयुज्यमानो मन्त्रः कर्मण्यर्धुकः स्यात्[1] । एवं ह्याह । "यो ह वा अविदितार्षेयच्छन्दोदैवतब्राह्मणेन मन्त्रेण याजयति वाऽध्यापयति वा स्थाणुं वर्च्छति गर्ते वा पद्यति[3] प्र वा मीयते पापीयान्भवति यातयामान्यस्य च्छन्दांसि भवन्ति" (आर्षेयब्राह्मणम्[2]) इति । अतोऽनुषङ्गतो[4] वक्त्रादिलक्षणपरिज्ञानं लोकेऽत्र लौकिकमिति ह्याह ।

छन्दः

सम्यगधीतस्य परिज्ञातच्छन्दसोऽमुष्मिन्कर्मणि विनियोग इति कल्प आद्रियते । तद्यथा । इषे त्वेति च्छिनत्ति । ऊर्जे त्वेत्यनुमार्ष्टीति । न हि कल्पानभिज्ञः प्रयोगान्विजानीयादिति ।

कल्पः

श्रुतिचोदितकर्माङ्गभूतकालपरिज्ञानाय ज्योतिषम् । अनुषङ्गतश्चातोऽपि प्राणिनां शुभाशुभकर्मफलविपाककालपरिज्ञानम् ।

ज्योतिषं

व्याकरणाद्विभक्त्यादिपरिज्ञानम् । एवं ह्याह "प्रयाजाः सविभक्तिकाः कर्तव्याः" । तथा चोहं दर्शयति "संख्यादयो न विवर्धन्ते" इति । न च व्याकरणानभिज्ञो[5] विभक्तीर्जानीयादूहितुं वा मन्त्रान् । तत एव चानुषङ्गतो लोके लौकिकलक्षणपरिज्ञानम् । एवं छन्दस्येवं भाषायामिति प्रविभागो नान्तरीयकोऽनन्तरेण व्यवस्थितः ।

व्याकरणं

अत उक्ताध्ययनविधेरुक्तच्छन्दःप्रविभागस्योक्तविनियोगस्योपलक्षितकर्माङ्गभूतकालस्योपदर्शितलक्षणस्यैतैरङ्गैर्वेदस्यार्थपरिज्ञानविषये निरुक्तं नामेदमङ्गमारभ्यते । प्रधानं चेदमितरेभ्योऽङ्गेभ्यः सर्वशास्त्रेभ्यश्चार्थपरिज्ञानाभिनिवेशात् । अर्थो हि प्रधानम् । तद्गुणः शब्दः । स चेतरेषु व्याकरणादिषु चिन्त्यते । कल्पे खल्वपि विनियोगश्चिन्त्यते स च पुनरर्थाभिधानवशेन मन्त्राणाम् । यो यमर्थमभिधानेन संस्कर्तुं समर्थो मन्त्रः स तत्र विनियुज्यते । तदुक्तं "अर्था-

निरुक्तं

---

१ क. ख. ण्यार्द्धकः; ग. घ. झ. ट. ठ. °ण्यार्द्धु; ज. ण्यालहुकः°. २ ग. ज. स्नाता°. ३ घ. पद्यते; च. पताति प्रमीयते°; ट. गर्ते वा पद्यते प्र वा मीयते° गर्ते वा पताति प्रमीयते वा° पाठान्तरं; ठ. पात्यते प्रमीयते वा. ४ ठ. °षङ्गतोऽनुष्टुब्वक्त्रादि.° ५ ग. ज. °रणायानभि°.

भिधानसंयोगान्मन्त्रेषु शेषभावः स्यात् ” [जै० सू० ९—१—३६] इति । न च निरुक्तादृतेऽन्यदङ्गमन्यद्वा बाह्यं शास्त्रमस्ति तात्पर्येण यदशेषा[1]ञ्शब्दान्निर्ब्रूयात् । यदपि च क्वचित्क्वचिदन्यशास्त्रे शब्दनिर्वचनमत एव तदित्युपलक्ष्यम् । यथा शब्दलक्षणपरिज्ञानं सर्वशास्त्रेषु व्याकरणादेवं शब्दार्थनिर्वचनपरिज्ञानं निरुक्तात् । वस्तुमात्रमेव हीतरेषु शास्त्रेषु स्वाभिमतबुद्धिविषयमेव किंचिच्चिन्त्यते । ब्राह्मणमपि च विध्यर्थवादरूपमशेषं[3] मन्त्रार्थशेषभूतमेव । मन्त्रब्राह्मणार्थपरिज्ञानबद्धश्चाध्यात्माधिदैवाधिभूतपरिज्ञानद्वारेण धर्मार्थकाममोक्षाख्याऽखिलपुरुषार्थः । न चानिरुक्तो मन्त्रार्थो व्याख्यातव्य इति । तस्मादर्थपरिज्ञानाभिनिवेशादिदमेव प्रधानमित्युपपन्नम् ।

अथास्यैवमखिलपुरुषार्थोपकारवृत्तिसमर्थस्य संग्रहः । तद्यथा । नामाख्यातोपसर्गनिपातलक्षणम् । भावविकारलक्षणम् ।

निरुक्तविषयसंग्रहः

नामान्याख्यातजानि न सर्वाणि च यथोपन्यस्य पक्षप्रतिपक्षतो विचार्यावधारणं सर्वाण्याख्यातजानि कानिचिदेवानेकधातुजान्यपीति । मन्त्राणामर्थवत्त्वानर्थवत्त्वे विचार्य शास्त्रारम्भप्रयोजनद्वारेणार्थवत्तावधारणम् । पदविभागपरिज्ञानप्रतिज्ञा[6]वबोधावलम्बित्वप्रदर्शनाय । आदिमध्यान्तानेकदैवतलिङ्गसंकटेषु मन्त्रेषु याज्ञिका[7]परिज्ञानद्वारेण देवतापरिज्ञानप्रतिज्ञा । अर्थज्ञ[8]प्रशंसा । अनर्था[9]वधारणम् । वेदवेदाङ्गव्यूहः । सप्रयोजननिघण्टु[10]समाम्नायविरचनं प्रकरणत्रयविभागेन । नैघण्टुकप्रधानदेवताभिधानप्रविभागलक्षणम् । निर्वचनलक्षणद्वारेण शब्दवृत्तिविषयोपदेशोऽर्थप्राधान्यात् । लोपोपधाविकारवर्णलोपविपर्ययोपदेशेन सामर्थ्योपप्रदर्शनायादिमध्यान्तलोपोपधाविकारवर्णलोपाद्विवर्णलोपाद्यन्तविपर्ययाद्यन्तवर्णव्यापत्तिवर्णोपजनोदाहरणचिन्ता । अन्तस्थान्तर्धातुनिमित्तेन संप्रसार्यासंप्रसार्योभयप्रकृतिधातुनिर्वचनोपदेशः । भाषिकप्रायोवृत्तिभ्यो नैगमशब्दार्थप्रसिद्धिः । नैगमप्रायोवृत्तिभ्यो भाषिकशब्दार्थप्रसिद्धिः । देश-

---

१ घ. झ. ट. अशेषात् . २ घ. झ. ट. °लक्षणया परिज्ञानं. ३ क. ख. अशेषमन्त्रा°; ग. ज. घ. षमन्त्रार्थे शेष°. ४ घ. झ. ट. ठ. °कारकवृत्ति°. ५ ग. च. ज. ख्यातजातानि. ६ क. ख. ग. ज. प्रतिज्ञावबोधावलंबिप्रद°; घ. झ. ठ. प्रतिज्ञा तदवबोधाविलंबित्वप्रद; ट. प्रतिज्ञा तदवबोधावि(व)लंबित्वप्रद°. ७ ठ. याज्ञिकोप. ८ ग. ज. °ज्ञशंसा. ९ क. ख. अनर्थज्ञाव°; च. ज. अनर्थाव° र्थज्ञा; ठ. अनर्थज्ञावधीरणं. १० ग. ज. निघण्ट.

व्यवस्थया शब्दरूढ्युपदेशः । तद्धितसमासनामनिर्वचनलक्षणम् । शिष्यलक्षणम् । विशेष[1]व्याख्यया तत्त्वपर्यायभेदसंख्यासंदिग्धोदाहरणनिर्वचनव्यवस्थया नामाख्यातोपसर्गनिपातानां विभागेन नैघण्टुकप्रकरणानुक्रमणम् । अनेकार्थानवगतसंस्कारानुक्रमणम् । परोक्षकृतप्रत्यक्षकृताध्यात्मिकमन्त्रलक्षणम् । स्तुत्याशीःशपथाभिशापाचिख्यासापरिदेवनानिन्दाप्रशंसादिभिर्मन्त्राभिव्य[2]क्तिहेतूपदेशो निदानपरिज्ञान[3]ख्यापनाय । अनादिष्टदेवतोपपरीक्षणायाध्यात्मोपदेशप्रकृतिभूमत्वम् । इतरेतरजन्मत्वम् । स्थानत्रयभेदशास्ति[4]सृणामेकैकस्या [5]महाभाग्यकृतोऽनेकनामधेय[6]प्रतिलम्भः । पृथगभिधानं [7]स्तुतिसंबन्धाद्वा । देवतानामाकारचिन्तनभक्तिसाहचर्यसंस्तव[8]कर्मसूक्तभाक्त्वहविर्भाक्त्वव्यञ्जनभाक्त्वानि । पृथिव्यन्तरिक्षद्युस्थानदेवतानामभिधेयाभिधानव्युत्पत्तिप्राधान्यस्तुत्यु[9]दाहरणं तन्निर्वचनविचारोपपत्त्यवधारणानुक्रमेण व्याख्याय दैवतप्रकरणनिर्णयः । विद्यापारप्राप्त्युपायोपदेशो मन्त्रार्थनिर्वचनद्वारेण । देवताभिधाननिर्वचनफलं देवताताद्भाव्यमित्येष समासतो निरुक्तशास्त्रचिन्ताविषयः ।

तस्यैषा गवाद्या देवपत्न्यन्ता पञ्चाध्यायी सूत्रसंग्रहः । सा च पुनरियं साक्षात्कृतधर्मभ्यो महर्षिभ्य उपदेशेन मन्त्रार्थमुपश्रुत्य श्रुतर्षिभिरवरशक्तिदौर्बल्यमवेक्ष्य तदनुजिघृक्षया वाक्यार्थसामर्थ्यादभिधेयानु[10]नीयोन्नीय मन्त्रार्थावबोधाय छन्दोभ्यः समाहृत्य समाहृत्य समाम्नाता । सैषा छन्दोवयवभूता छन्दोधर्मिण्येव यथा यूपाप[11]त्रस्तो हि गौर्गोधर्मा ।

निघण्टुः

ॐ समाम्नायः समाम्नातः स व्याख्यातव्यस्तमिमं समाम्नायं निघण्टव इत्याचक्षते निघण्टवः कस्मान्निगमा इमे भवन्ति छन्दोभ्यः समाहृत्य समाहृत्य समाम्नातास्ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्त इत्यौ-

---

१ घ. झ. ट. °विशेषणव्या°. २ ग. ज. °भिव्यक्तहे°. ३ क. ख. घ. झ. ट. ठ. °ज्ञानव्याख्यापनाय. ४ ग. ज. ठ. तिसृणा°. ५ ग. च. ज. महाभाग्य°. ६ ग. च. ज. नामप्रति°. ७ क. ख. ग. ज. घ. झ. °धानं तूत्पत्तिसंब°; ट. °धानं तूत्पत्तिसंब° स्तुति. ८ क. ख. घ. झ. ट. ठ. °स्तवम् । भक्ति°. ९ ग. ज. °न्यस्तुतीत्युदा°. १० क. ख. ज. °नुनीय मन्त्रा°. ११ क. ख. °त्रस्ता गौ°; घ. °त्रस्ता हि°; ट. °त्रस्तो हि° स्तो; ठ. पवित्रस्तो हि.

पमन्यवोऽपि वाहननादेव स्युः समाहृता भवन्ति यद्वा समाहृता भवन्ति तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति तत्रै-तन्नामाख्यातयोर्लक्षणं प्रदिशन्ति भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि तद्यत्रोभे भावप्रधाने भवतः पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तं मूर्तं सत्त्वभूतं सत्त्वनामभिर्व्रज्या पक्तिरित्यद इति सत्त्वानामुपदेशो[1] गौरश्वः पुरुषो हस्तीति भवतीति भावस्यास्ते शेते व्रजति तिष्ठतीतीन्द्रियनित्यं वचनमौदुम्बरायणः ॥ १[2] ॥

इयं च तस्या द्वादशाध्यायी भाष्यविस्तरः । तस्या इदमादिवाक्यं "समाम्नायः समाम्नातः" इति । गवादिदेवपत्न्यन्तः शब्दसमुदाय[3] उच्यते । समाङ्पूर्वस्य म्नातेरभ्यासार्थस्य कर्मणि कारके समाम्नायः । समभ्यस्यते मर्यादयाऽयमिति समाम्नायः । स च ऋषिभिर्मन्त्रार्थपरिज्ञानायोदाहरणभूतः पञ्चाध्यायीशास्त्रसंग्रहभावेनैकस्मिन्नाम्नाये ग्रन्थीकृत इत्यर्थः । तस्य किमिति । स[4] व्याख्यातव्यः । स च योऽसमाम्नातश्छन्दस्येवावस्थितोऽगवादिरन्यैर्वा निरुक्तैर्यः समाम्नातोऽयं चैतस्मिन्निरुक्ते स एष उभयलक्षणोऽपि व्याख्यातव्यः । आह । कथमेतद्गम्यतेऽसमाम्नातव्याख्यानमप्यत्राभिमेतामिति[5] । समाम्नानार्हाणां वा किमर्थमसमाम्नानमिति । उच्यते । निर्वचनलक्षणोपदेशात् । निर्वचनप्रसक्तानां च मृगकर्णदक्षिणालक्ष्मीनिघण्टुभद्रांधः[6]शब्दप्रभृतीनामेवसाद्यानां निर्वचनोपदेशा[7]ज्ज्ञायतेऽसमाम्नातव्याख्यानमप्यत्राभिमतामिति । यत्पुनरेतदुक्तं समाम्नानार्हाणां वा किमर्थमसमाम्नानमिति । अत्र ब्रूमः । न हि समाम्नानार्हाणामन्तोऽस्ति । तेषां सर्वेषां समाम्नाने शास्त्रान्त एव न स्यात् । अतश्चाध्ययनश्रवणज्ञानशक्तिहान[8]दोषः प्रसज्येत । शक्यश्चैतावल्लक्षणोद्देशोदाहरणभूतानिघण्टुश-

१ क. ख. छ. त. द. न. °देशः ॥ १ ॥ गौ°. २ क. ख. छ. त. द. न. '१' नास्ति. ३ क. ख. घ. (झ. पत्रं गलितं) ट. ठ. °दाय: समाम्नाय उच्यते. ४ च. 'सः' नास्ति. ५ घ. °भिप्रेत°; ट. °भिप्रेत° म. ६ घ. (झ. पत्रं गलितं) ट ठ. भद्रांधःप्र°. ७ ग. ज. °चनप्रदेशात् ; च. °चनप्रदर्शनात् ; ट. °चनोपदेशा° न प्रदर्शना. ८ व. ट. ठ. (झ. पत्रं गलितं) °शक्तिहीनदोषः.

ब्दसमुदायेनाधीतवेदेन मेधाविना तपस्विना लक्षणविनियोगार्षच्छन्दोदैवतनिदानविदाभियुक्तेनागमवता मन्त्रार्थोऽभ्यूहितुमित्येतावानेव निघण्टुषु शब्दसमुदायः समाम्नातः । तस्मादुपपन्नमसमाम्नातव्याख्यानमप्यत्र[1]ाभिमतमित्यसमाम्नानं[2] सर्वेषां शास्त्रातिगौरवभयादिति । व्याख्यातव्यो विभज्येमान्यत्र नामानीमान्याख्यातान्युपसर्गा इमे निपाता इम इदं सामान्यलक्षणमिदं विशेषलक्षणमिमान्येकार्थानीमान्यनेकार्थानीमान्यनवगतसंस्काराणीदमभिधानमिदमभिधेयमिदमभिधानस्य निर्वचनमित्येवंविधया मर्यादया परिपाट्या यथासमाम्नात आख्यातव्यो[3] निर्वक्तव्य इत्यर्थः ।

निघण्टुशब्दव्युत्पत्तिः

"तमिमं समाम्नायं निघण्टव इत्याचक्षते" । तं च योऽसमाम्नातश्छन्दस्येवावस्थितोऽगवादिरन्यैर्वा[4] निरुक्तैः समाम्नातस्तमिमं च निघण्टव इत्याचक्षतेऽन्येऽप्याचार्या इति वाक्यशेषः । निरूढा हीयमेतस्मिञ्छब्दसमुदाये संज्ञेत्यभिप्रायः ।

" निघण्टवः कस्मात् " इति निघण्टुशब्दव्युत्पिपादयिषया प्रश्नः । निर्विवक्षयेदमाह " निगमा इमे भवन्ति " । येष्वभिधाननिर्वचनप्रारम्भकेष्वाचार्यः[5] कस्माच्छब्दमुत्तरत्र न कुर्यात्तेष्वपि व्याख्याकालेऽयं[6] समुत्पाद्यः । तथा हि व्याख्यासाकल्यं भवति । "निगमा इमे भवन्ति" । निश्चयेनाधिकं वा निष्कृष्य निगूढार्था[7] एते परिज्ञाताः सन्तो मन्त्रार्थान् गमयन्ति ज्ञापयन्ति[8] । ततो निगमसंज्ञा[9] इमे भवन्ति ।

आह । कः पुनरेतेषु विशेषो येनैत एव ज्ञापयन्तीति । उच्यते[10] । यस्मादेते " छन्दोभ्यः समाहृत्य[11] समाहृत्य समाम्नाताः " । छन्दांसि मन्त्रास्तेभ्य उपलक्षितसामर्थ्याः समाहृत्य ग्रन्थीकृता इत्यर्थः । आह । कस्मात्पुनरेतावन्त एव ग्रन्थीकृता इति । उच्यते । इतो यस्मादेतैरेव

---

१ च. 'अपि' न विद्यते. २ घ. (झ. पत्रे गलितं) ट. ठ. °माम्नानं च सर्वे°. ३ च. °म्नातव्याख्यातव्यः. ४ ग. ज. 'वा' नास्ति. ५ क. घ. (झ. पत्रं गलितं) °चार्योऽयं यास्को निरुक्तकारः कस्मा°; ट. °चार्यः । अयं यास्को निरुक्तकारः । कस्मा°. ६ क. घ. (झ. पत्रे गलितं) ठ. काले कस्मादिति शब्दः स°; ट. °काले कस्मादिति शब्दः स°. ७ च. निरूढार्था°. ८ क. ख. ग. ज. ठ. 'ज्ञापयन्ति' नास्ति. ९ क. ख. °संज्ञा निघण्टव एव इमे; घ. (झ. पत्रे गलितं) °संज्ञा निघण्टव इमे; ट. °संज्ञा निघण्टव इमे.° १० घ. उच्यते । छन्दो;° (झ. पत्रं गलितं); ट. उच्यते । ^छन्दो° यस्मादेते; च. उच्यते । कस्मा.° ११ ठ. समाहृत्येति च्छन्दांसि.°

छन्दस्यवस्थितैराभिनिविष्टधियामपि मेधाविनां तपस्विनां लक्षणविनियोगार्षच्छन्दोदैवतनिदानविदामपि सतां मन्त्रार्थपरिज्ञानोद्यमभङ्गः क्रियते दुष्परिज्ञानत्वात्तेषाम् । एतेषु परिज्ञातेष्वप्रतिबन्धेन शक्यते मन्त्रार्थः परिज्ञातुमित्यत उच्यते त एव ज्ञापका भवन्तीति । अतश्चैत एवोन्नीतसामर्थ्याः समाहृत्य समाहृत्य समाम्नाता इति । समाम्नानमात्रमेव दर्शयति । प्रकरणगताश्च नित्या एवैत इति गम्यते ।

"ते निगन्तव एव सन्तो निगमनान्निघण्टव उच्यन्त इत्यौपमन्यवः" ।

उदाहृतास्समाम्नाता निर्वचनप्रसङ्गतो ये निरुच्यन्ते य एते समाम्नाता गवादयस्त एते मन्त्रार्थनिगमयितृत्वादुभयेऽपि निगन्तवः निगमनात् सन्तो निगमनाद्धेतोर्निघण्टव उच्यन्त इत्यौपमन्यवः । इत्येवमर्थनिगमयितृत्वान्निगन्तव एते संपन्नाः सन्तोऽतिपरोक्षवृत्तिना शब्देन गकारस्थाने घकारं कृत्वा तकारस्थाने च टकारं कृत्वा । वर्णव्यापत्त्यादिलक्षणं " अथाप्यादिविपर्ययः " (निरु० २–१) इत्येवमादि । तदेतत्परोक्षातिपरोक्षवृत्तिषु यथासंभवं द्रष्टव्यम् । त्रिविधा हि शब्दव्यवस्था प्रत्यक्षवृत्तयः परोक्षवृत्तयोऽतिपरोक्षवृत्तयश्च । तत्रोत्कटक्रियाः प्रत्यक्षवृत्तयः । अन्तर्लीनक्रियाः परोक्षवृत्तयः । अतिपरोक्षवृत्तिषु शब्देष्वेष निर्वचनाभ्युपायः । तस्मात्परोक्षवृत्तितामापाद्य प्रत्यक्षवृत्तिना शब्देन निर्वक्तव्याः । तद्यथा । निघण्टव इत्यतिपरोक्षवृत्तिः । निगन्तव इति परोक्षवृत्तिः । निगमयितार इति प्रत्यक्षवृत्तिः । यस्मान्निगमयितार एते निगन्तव इति निघण्टव उच्यन्ते । उक्तं च । " वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ । धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् " ॥ वक्ष्यति चायमपि वर्णविपर्ययवर्णव्यापत्तिलक्षणम् (निरु० २ । १) । त एते निगन्तवः सन्तो निघण्टव उच्यन्ते । इत्येवमतिपरोक्षवृत्तयो निर्वक्तव्याः । प्रायेण चोणादिषु परोक्षवृत्तयः शब्दाश्चिन्त्यन्ते ।

---

१ क. ख. घ. (झ. पत्रं गलितं) ट. ठ. °ज्ञानायोद्यमभङ्गः. २ घ. ट. ठ. दुः परि°. ३ क. ख. ग. ज. 'समाहृत्य' पदं सकृदेव. ४ ग. ज. समाम्नातमा°. ५ ठ. एवेति उदा°. ६ क. ख. °हृताः स; च. °हृतास° ताः. ७ च. °म्नाता° ये. ८ क. ख. ग. ज. घ. ट. ठ. 'ये' नास्ति; च. °ङ्गतो ता नि° ये. ९ व. झ. अत्रो; °ट. अत्रो° त. १० च. अन्तर्णीतक्रियाः; ट. अन्तर्लीन° णीत. ११ च. अविद्यमानक्रिया अतिपरोक्षवृत्तयः । अतिप°. १२ व. झ. ट. ठ. इत्युच्यन्ते.

तत्र तेषां लक्षणमुपेक्षितव्यम् । येषामपि लक्षणं नास्ति तेषामपि तत्र कल्प्यम् । अपरिसमाप्ता ह्युणादय इति लक्षणविदः प्रतिजानते । सर्वथाऽपि लक्षणासंभवे पृषोदरादिपाठसिद्धेरेव द्रष्टव्याः । तत्र हि सर्वे यथाध्ययनमेव शब्दाः साधीयांसो भवन्त्यभिव्याहारानभिवातायेति हि लक्षणविदो मन्यन्ते । इत्यौपमन्यव एवमौपमन्यव आचार्यो मन्यत इति वाक्यशेषः । उपरतमन्युरुपमन्युस्तस्यापत्यमौपमन्यवः । कीर्तिप्रथनार्थमौपमन्यवग्रहणम् ।

"अपि वाहननादेव स्युः समाहता भवन्ति" । अपि वैवं यथोक्तम् ।

अपि वैवमन्यथा निघण्टवः स्युः । कथमिति । आहनना-

आहननात् देव । न निगमनादित्यभिप्रायः । विद्यमानमपि हि निगम-

नमविवक्षितमेतस्मिन्पक्षे । अनेकक्रियायोगेऽपि हि सति कांचिदेव क्रियामङ्गीकृत्य नामधेयप्रतिलम्भो भवति । तदुत्तरत्र वक्ष्यामः (निरु० १—१४) । आह किमेतेष्वाहतमिति । उच्यते । समाहता भवन्ति । समः स्थाने नीत्येष नियुक्तः । दर्शयिष्यति चायमुपसर्गव्यत्ययं "निरित्येष समित्येतस्य स्थाने" (निरु० १२—७) इति । आङ्विद्यमान एवाध्याहृतो मर्यादार्थप्रकाशनाय हन्तेः पाठार्थे वर्तमानस्या-नेकार्थत्वाद्धातूनाम् । वर्णव्यापत्त्यौघशब्दवद्धकारस्य स्थाने घकारस्तकारस्य टकारः । अथ कोऽर्थः । एतस्मिन्पञ्चाध्यायीसंग्रहे मर्यादया पठिता ह्येते भवन्ति तस्मात्समाहताः । समाहन्तव एते सन्त उपसर्गव्यत्ययोपसर्गा-ध्याहारवर्णव्यापत्तिभिर्निघण्टव इत्युच्यन्ते । प्रसिद्धश्च पाठार्थे हन्तेः प्रयोगः । एवं हि वक्तारो भवन्ति ब्राह्मण इदमाहतं सूत्र इदमाहतमिति । अर्थप्राधान्यादर्थनिर्वचनवशेन शब्दविपरिणामोऽयं प्रदर्शितः ।

"यद्वा समाहृता भवन्ति" । पूर्ववदेवोपसर्गव्यत्यय उपसर्गाध्याहारोऽत्रापि ।

घातुस्तु हरतिरत्र । यद्यस्मादित्यर्थः । यस्माद्धैते समाहृता

समाहरणात् भवन्ति छन्दोभ्यस्तस्मात्समाहरणक्रियायोगात्समाहर्तव एते

समाहृताः सन्तः पूर्ववदेवोपसर्गव्यत्ययादिक्रमेण निघण्टव

---

१ घ. झ. अत्र; ट. अत्र° त°. २ ग. ज. परिसमाप्ताः; च. असमाम्नाताः. ३ क. ख. घ. झ. ट. ठ. सिद्धिरेव द्रष्टव्या । तत्र. ४ ज. यथा विभक्त्युत्पत्तये योग्यः शास्त्रीयः शब्द इष्यते । रूढयौगिकतन्मिश्रैः प्रभेदैः स पुनस्त्रिधा । अव्यक्तयोगनिर्योगयोगाभासैस्त्रिधाग्रिमः । ते च वृक्षादिभूवादिमण्डपाद्या यथाक्रमम् । शुद्धतन्मूलसंभिन्नप्रभेदैर्यौगिकस्त्रिधा । ते च भ्रान्तिस्फुरत्कान्तिके । ध्ययन°. ५ ग. ज. 'एवमौप' नास्ति. ६ क. ख. घ. झ. ट. ठ. चैवं. ७ क. ख. ग. ज. ठ. चैव°. ८ ग. ज. एवाहृतो°. ९ घ. झ. ट. °पत्त्याऽऽघश°. १० ग. ज. समाहन्त एव एते°. ११ ग. ज. °निर्वचनेन वशेन. १२ च. व्यत्ययोपस°.

इत्युच्यन्ते । एतस्मिन्नपि निगमन[1]समाहननक्रिये निघण्टुषु विद्यमाने अप्य[2]-विवक्षिते कृत्वा समाहरणक्रियायोगहेतुको नामधेयप्रतिलम्भ उक्तः । एवमेष निघण्टुशब्दो गमेरेकोपसर्गाद्धन्तिहरतिभ्यां वा द्व्युपसर्गाभ्यां निरुक्तः ।

आह किमयं पुनरतिमहान्यत्न एकस्मिन्नभिधानेऽनेकधात्वर्थनिर्वचन[3]कृत इति । उच्यते । इह तावत्सर्वाण्याख्यातजानि नामानीति सिद्धान्तः । सत्याख्यातजत्वेऽभिधेयस्था या[4] क्रिया लक्ष्यते तदभिधानसमर्थ[5]परोक्षवृत्तौ[6] वा[7] तदभिधायिनि रूढिशब्दे धातुरुत्प्रेक्ष्यते । स च पुनः स्वरवर्ण-क्रियासामान्येन । तत्रैवं सति रूढिशब्दे यावन्तो धातवः स्वं स्वं लिङ्गं[8] रूढिगतं दर्शयन्ति तावतः संगृह्य स रूढिशब्दो निर्वाच्यः । किं कारणम् । विशेषलक्षणव्यवस्थाभावात् । न हि तत्र विशेषलक्षणव्यवस्था काचिदस्ति ययैको[9]ऽवतिष्ठेतान्ये व्यावर्तेरन् । अपि चोक्तं वार्तिककारेण— "यावतामेव धातूनां लिङ्गं रूढिगतं भवेत् । अर्थश्चाप्यभिधेयस्थस्तावद्भि-र्गुणविग्रहः" (बृहद्देवता २ । १०४) इति ॥ रूढिशब्दगतानां च धातूनां रूढिशब्दवाच्येऽर्थे क्रियायोगे सत्येतत्[10] । अभावे तु क्रियाया रूढिशब्दे वर्तमानमपि धातुलिङ्गमकिंचित्करम् । स एव क्रियाभावस्तदाश्रयनि-र्वचनव्यावर्तको भवति । ता[11] एतास्तिस्रः क्रिया निगमनसमाहननसमा[12]-हरणाख्या निघण्टुषु विद्यन्ते । तदभिधायिन्यपि च रूढिशब्दे निरुच्यमाने गमिर्हन्तिर्हरतिश्चाहंपूर्विकया संनिपत्य वदन्ति ममानुरूपं मयैतं[13] निर्ब्रूहि मयैतं निर्ब्रूहीति । गमिस्तावदत्र गकारमात्मीयं व्यापन्नं मन्यते घकारम् । तथा हन्तिहरती हकारं व्यापन्नं घकारं मन्येते । तस्मादयमनेकैर्धात्वर्थैर्नि-घण्टुशब्दो निरुक्त एवंजातीयाभिधाननिर्वचनप्रदर्शनाय ।

---

१ घ. झ. ट. °न्नपि गम.° २ ग. ज. मानेऽप्यवि°. ३ ग. ज. °निर्वचने कृत°. ४ घ. झ. ट. ठ. 'या' नास्ति. ५ क. ख. ग. ज. समर्थे परोक्ष°. ६ ग. °वृत्तौ तावदभिधा°. ७ क. ख. ग ज. 'वा' नास्ति. ८ क. ख. झ. ठ. स्वलिङ्गं; ग. ज. घ. ट. 'स्वं' सकृदेव. ९ च. ठ. यथैको°. १० क. ख. घ. झ. सति । एतदभावे°; ट. सति । एतदभावे° त्वेतत् । अ. ११ ग. ज. 'ताः' न विद्यते. १२ च. °समाहरणानि निघ.° १३ ठ. 'मयैतं निर्ब्रूहि' सकृदेव.

" तद्यान्येतानि चत्वारि पदजातानि नामाख्याते चोपसर्गनिपाताश्च तानीमानि भवन्ति " । इहैतावदेवोक्तं समाम्नायो निघण्टव इति । समाम्नायशब्दपर्यायप्रसक्तस्य च निघण्टुशब्दस्य व्युत्पत्तिरुक्ता न तु निघण्टुशब्दस्यार्थतत्त्वमवधारितम् । तदवधार्यत इति पर्युपयुक्तस्तच्छब्दः । किं पुनस्तदिति । यान्येतानि चत्वारि पदजातानि या एताश्चतस्रः पदजातयः । क्व । लोके वेदे च । कतमानि तानि । नामाख्याते चोपसर्गनिपाताश्च । किं तेषामिति । इमानि चत्वार्यपि पदजातानि सन्त्येतस्मिञ्शास्त्रे । किमिति । निघण्टुसंज्ञानि भवन्ति । नित्यमेवानुविधीयमानानि भवन्तीत्याह । न कदाचिदपि न भवन्ति नित्यं भवन्त्येवेत्यभिप्रायः । [1]चत्वारि पदजातानि । [2]चतुर्ग्रहणमवधारणार्थम् । नैकं पदजातं यथाऽर्थः पदमैन्द्राणामिति । नापि द्वे यथा सुबन्तं तिङन्तं च । नापि त्रीणि निपातोपसर्गावेकतः कृत्वा । नापि पञ्च षड्वा यथा गतिकर्म[3]प्रवचनीयभेदेनेति । पदजातानीति पदगणा इत्यर्थः । जातशब्दो हि गणे प्रसिद्धः । तद्यथा गोजातमश्वजातमिति । तद्वदिहापि । तत्र नामपदगणः स्त्रीपुंनपुंसकलिङ्गप्रविभागेन । तथाख्यातपदगणः [4]कर्तृवचनभाववचनकर्मवचनप्रविभागेन । तथोपसर्गपद[5]गण आङादिः । तथा निपातपदगण इवादिः । एवमभिप्रेत्योक्तं चत्वारि पदजातानीति ।

तेषां पौर्वापर्यं

अत्र नामाख्यातयोः पूर्वमभिधानं प्राधान्यादप्राधान्यादुपसर्ग निपातानां पश्चात् । उभे अपि नामाख्याते निपातोपसर्गनिरपेक्षे अपि सती स्वमर्थं ब्रूतो न तूपसर्गनिपातानां नामाख्यातनिरपेक्षाणामर्थोऽस्ति । वक्ष्यति हि " न निर्बद्धा उपसर्गा अर्थान्निराहुरिति शाकटायनः " (निरु० १ । ३) इति । वाच्येन चैते अर्थेनार्थवत्तां द्योत्येनोपसर्गनिपाता इति वा प्राधान्यं नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्ति (निरु० १।३) इति । तस्मादुपपन्नं भवति प्राधान्यान्नामाख्यातयोः पूर्वमभिधानमप्राधान्याच्च पश्चादुपसर्गनिपातानामिति । नामाख्याते

---

१ क. ख. ग. ज. ' चत्वारि पदजातानि ' नास्ति. २ क. ख. ग. ज. घ. झ. ट. चत्वारीति चतु°. ३ च. प्रवचनार्थभेदे°. ४ क ख. ग. ज. कर्तृवचनभाववचनकर्मवचनप्रविभागेन. ५ क. ख. ग. ज. ' पद ' नास्ति.

नामाख्याते इति समासस्य प्रयोजनम्

[1]इतीतरेतराकाङ्क्षित्वमुभयोर्नामाख्यातयोः समासेनाभिधानम् । कथमि[2]तीतरेतराकाङ्क्षित्वमिति । यज्ञदत्त इति हि नामशब्दस्तावदेव साकाङ्क्षो भवति यावत्पचति पठती[3]त्याख्यातश[4]ब्दैर्न निराका[5]ङ्क्षी क्रियत इति । तथा [6]च पचतीत्याख्यातशब्दस्तावदेव साका[7]ङ्क्षो भवति यावन्न यज्ञदत्तशब्दः । [8]पचति यज्ञदत्त ओदनमितीतरेतराकाङ्क्षित्वमुभयोर्नामाख्यातयोः । समानकार्यत्वं चैतयोर्ल[9]क्ष्यन्ते । वाच्येनार्थेनार्थवत्त्वमित्यतः समस्येते नामाख्याते इति । नाम्नः पूर्वनिपातोऽल्पाच्तरत्वात् । नामपदवाच्यार्थाश्रयक्रियोपलक्ष्यत्वाच्चा[10]ख्यातार्थस्य पश्चान्निपातः ।

उपसर्गनिपाता इत्यस्य च

उपसर्गनिपाता इत्युभयेषामुपसर्गनिपातानां नामाख्यातयोरर्थविशेषद्योतकत्वात्समानकार्यत्वमित्यतः समस्यन्ते । आख्यातसहयोगित्वादुपसर्गाणामाख्यातानन्तरं पाठः परिशेषाणां निपातानां पश्चादपरिमिताश्च निपाता इति ।

तत्रैतन्नामाख्यातयोर्लक्षणं प्रदिशन्ति । तत्र तस्मिँल्लोकवेदप्रसिद्धे पदचतुष्टये निघण्टुश[11]ब्दैःसामान्यसंज्ञोपलक्षिते ये तावन्नामाख्याते तयोस्तावदेतल्लक्षणं [12]प्रदिशन्ति । कतमत् । यदेतद्वक्ष्यमाणमित्यभिप्रायः । प्रदिशन्ति प्रविभज्येदं नाम्नां लक्षणमिदमाख्यातस्येत्येवं दिशन्त्युपदिशन्त्याचार्या इति वाक्यशेषः ।

लक्षणप्रयोजनम्

आह लक्षणोपदेशः कस्मादनुक्रमणेनैव सिद्धत्वात् । अनुक्रमणेनैव हि [13]वक्ष्यति " इमानि पृथिवीनामधेयान्येकविंशतिः (१–७) हिरण्यनामान्युत्तराणि पञ्चदश (२–१०) कान्तिकर्माण उत्तरे धातवोऽष्टादश (३–९) गतिकर्माण उत्तरे धातवो द्वाविंशं शतम् (३–९)" इति । तत एव विज्ञास्याम इमानि नामानीमान्याख्यातानीति । तस्मादयम-

---

१ ग. ज. ' इति ' नास्ति. २ ग. ज. कथमितीतराका°. ३ क. ख. ग. ज. इत्याद्याख्यात°. ४ च. ठ. शब्देन°; ट. शब्दैर्न° ब्देन. ५ च. °ङ्क्षीकृत इति; ट. °ङ्क्षीक्रियत° कृ. ६ क. ख. ग. ज. ' च ' नास्ति. ७ ट. काङ्क्षीभवति. ८ ग. ज. 'पचति' नास्ति. ९ ग. ज. वक्ष्यते. १० क. ख. ग. ज. 'आख्यातार्थस्य ' नास्ति. ११ क. ख. ग. घ. ज. झ. ठ. °शब्दसमानसंज्ञो°; ठ. °शब्दसमानसंज्ञो° सामान्य. १२ च. प्रतिदिशंति. १३ ग. ज. लक्ष्यति.

नर्थको लक्षणोपदेशः । नानर्थकः । कस्मात् । व्यापि हि लक्षणं समाम्नातान्यसमाम्नातानि च व्याप्य वर्तते । यत्पुनरेतदुक्तमनुक्रमणादेव विज्ञास्याम इति । अत्र ब्रूमः । निर्देशोऽसौ न हि लक्षणम् । निर्देशश्च परिच्छिन्नविषयः । स तर्हि किमर्थ इति । शास्त्रे रूपस्वभावोपप्रदर्शनार्थः । तस्मादसमाम्नातार्थोऽयमादितो लक्षणोपदेशो युक्त इत्युपपन्नम् । आह । तात्पर्येणैवेदमन्तरेण समाम्नातवदसमाम्नातानि कस्मान्नोपदिश्यन्ते । अपि च तथा सूपदिष्टानि भवन्तीति । उच्यते । तथा ह्युपदेशगौरवं प्रसज्येत ग्रहणशक्तिहानं चापि । तथाचोक्तं “ ऋषयोऽप्युपदेशस्य नान्तं यान्ति पृथक्त्वशः । लक्षणेन तु सिद्धानामन्तं यान्ति विपश्चितः ” इति ॥ तस्मादुपदेशगौरवभयाद्ग्रहणशक्तिहानदोषाच्च सामान्यलक्षणोपदेशः क्रियत इति ।

आह । किं पुनस्तल्लक्षणमिति । उच्यते । “भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानि” । नामपदवाच्यार्थाश्रयक्रियाव्यङ्ग्यो भावः पाकरागत्यागाख्यः । स यत्र प्रधानं गुणभूता क्रिया तदिदं भावप्रधानम् । किं पुनस्तदिति । आख्यातम् । आख्यायतेऽनेन गुणभावेन वर्तमानानेककारकप्रविभक्ता स्फुरमाणप्रधानद्रव्यभावाभिव्यक्त्युन्मुखीभूता क्रिया तस्याश्च प्राधान्येन वर्तमानो भावः स्वात्मलाभप्रधान इत्याख्यातम् । आह । कथं पुनर्गुणभूता क्रियेति ।

नामाख्यातयोर्लक्षणम्

क्रिया गुणभूता

उच्यते । तदर्थत्वात् । तदर्था हि सा भावार्था । भावसिद्ध्यर्थमात्मलाभमनुभूय कारकेषु तण्डुलादौ पाकाख्यं भावमभिनिष्पाद्यावसितप्रयोजनैकपद एव तिरोभवति । यस्य च यदर्थ आत्मलाभस्तत्तद्गुणभूतं भवति । भावसिद्ध्यर्थश्च क्रियाया आत्मलाभस्तस्माद्गुणभूतेति गम्यते । भावसिद्ध्यैव चानुमीयते क्रिया परोक्षापि सती । आह । कथं पुनः परोक्षा क्रियेति । उच्यते । न हि सेन्द्रियाणामन्यतमेन स्वरूपस्था सती कदाचिदपि संनिकृष्यते । किं तर्हि तदवसाने

क्रिया परोक्षा

१ च. °वोपदर्श°. २ क. ख. घ. झ. भवति; ट. भवति° प्रसज्येत. ३ क ख. व. झ. ट. ठ. ह्युपदे°. ४ क. ख. ग. ज. व. झ. समानल;° ट. समानल° सामान्य. ५ च. गुणभावे वर्त. ६ क. ख. ज. ठ स्फुरमाणेव प्रधा°; ग. स्फुरमाणे च प्रधा°. ७ ग. ज. लाभः. ८ क. ख. व. च. झ. ट. ठ. कदेश एव°.

योऽभिनिष्पद्यते भावस्तेन लिङ्ग्यते । नूनमभिनिर्वृत्ता क्रिया यया भावोऽयमभिनिष्पादित इति । नाभिनिर्वृत्ता चेदभविष्यद्यथैव प्राक्क्रियानिर्वृत्तेर्नाभवदयं भाव एवं सांप्रतमपि नाभविष्यत् । अस्ति चायम् । तस्मादभिनिर्वृत्ता क्रियेत्येवमनुमीयते ।

तदेतदाख्यातं क्रियावाचकमपि सद्भावार्थत्वात्क्रियाया भावप्रधानमुच्यत इत्येवमेके मन्यन्ते । अपरे[1] पुनर्भावप्रधानमाख्यातमिति प्रकृत्यर्थप्रधानमिति मन्यन्ते । प्रकृत्यर्थविशेषणं हि प्रत्ययार्थोदय इति । भावः कर्म क्रिया धात्वर्थ इत्यनर्थान्तरम् । स यत्र प्रधानं गुणभूतानि साधनानि तदिदं भावप्रधानम् । किं पुनस्तत् । आख्यातम् । आख्यायन्ते स्त्रीपुंनपुंसकानि क्रियागुणभावेन वर्तमानान्यनेन क्रिया च[2] तेषामुपरि प्राधान्येन[3] वर्तमानेत्याख्यातम् । आह । कथं पुनरत्र क्रियायाः प्राधान्यमिति । उच्यते । सा ह्यत्र शब्दवाच्याऽर्थगृहीतानि तत्साधनानीत्यतः प्राधान्यमत्र क्रियायाः । इतश्च प्राधान्यम् । कुतः । विशेषप्रत्ययाधानात्[4] । पचतीति प्रथमपुरुषैकवचनपरस्मैपदान्त आख्यातशब्दो वर्तमानकालकर्तृविषयो यत्किंचिदविवक्षितविशेषमेव पक्त्रादिसाधनमात्मन आश्रयभावेनोपलक्षयन्ननेकक्रियाशक्तिमत्यपि पक्त्रादौ साधने पचिक्रियायामेव विशेषप्रत्ययमादधाति नान्यासु क्रियासु नापि विशिष्टे पक्त्रादौ साधने । यश्च यस्मिन्नर्थे विशेषेण वर्तते शब्दः स एव तस्य[5] प्रधानम् । विशेषेण च क्रियायामाख्यातशब्दो वर्तते गुणभावेन कारकेषु । तस्माद्विशेषप्रत्ययाधानाद्भावप्रधानमाख्यातमित्युपपन्नम् । अपि च क्रियाव्यापारविज्ञानपरतया पृष्टः किं करोति देवदत्तः क्रियाख्यापनपरतयैव[6] प्रत्याचष्टे पचतीति ।

भावप्रधानमाख्यातम्

क्रियायाः प्राधान्यम्

नन्वोदनमिति[7] पूर्वमुक्त्वा ततः पचतीति अब्रवीदथ[8] कथमुच्यते भावप्रधान-

१ क. ख. घ. झ. एके; ट. एके पु° अपरे. २ च. वा. ३ ङ. च. ज. प्राधान्ये वर्त. ४ घ. ज. ट. ठ विशेषेण प्रत्यय°. ५ घ. ज. ट. ठ. 'तस्य' नास्ति. ६ घ. झ. ट. ठ. °ख्यापन°. ७ क. ख. ग. ज. घ. झ. ट. ठ. त्वोदन°. ८ क. ख. ग. ज. घ. झ. ट. ठ. अब्रवीति । अथ°.

भावप्रधानमाख्यातम्

माख्यातमिति । शृणु । अमूर्ता हि क्रिया निरुपाख्या । सा हि कारकैरभिव्यज्यमाना कारकशरीरे वसन्ती[1] शक्यते निर्देष्टुम्[2] । इतरथा ह्यशरीरा सती सा न गृह्येत । तथा[3]ग्रहणे च सति कथमिव निर्दिश्येत । तत्रैवं सति कारकसमूहेनाभिव्यज्यमाना क्रिया यस्मिन्साधने विशिष्टमात्मीयं कार्यमारभते पाकाख्यं तदभिधानशब्दोपपदैव साक्षाद्ग्रहणासंभवान्निर्दिश्यते । न ह्यनाश्रिता कदाचिदपि गृहीतपूर्वाकृतिरिति साक्षाद्ग्रहणासंभवः । तस्मादोदनकर्मिका[4] या देवदत्तकर्तृकौदनशब्दोपपदैव निर्दिश्यत ओदनं पचति देवदत्त इति तत्राविवक्षितस्वार्थ ओदनशब्दः । अपि च क्रियाव्यापारं[5]पिपृच्छिषयैव पृष्टः किं करोतीति क्रियाव्यापारमात्रमेव प्रत्याचष्टे पचतीति । ततः किमिति पर्यनुयुक्ते शब्दान्तरेणापाकरोति देवदत्त ओदनमिति । तस्माच्छब्दान्तरवाच्यत्वात्साधनस्य पचतीत्यत्र क्रियैव प्रधानमित्युपपन्नम् । य[6]त्पुनरेतदुक्तमोदनमिति पूर्वमुक्त्वेति तत्र ब्रूमः । स हि पर्यनुयुयुक्षां साधनगतां भाविनीमाशङ्कमानः पर्यनुयोगमात्मनो बुद्ध्यवस्थं कृत्वा तदपाकरणार्थमोदनमिति पूर्वं ब्रवीति । एवं तत्रापि द्रव्यविशेषपरिज्ञानार्थो द्वितीयः पर्यनुयोगोऽनुक्तो[7] द्रष्टव्यः । तस्मात्पचतीति शब्दवाच्यत्वादत्र[8] क्रियायाः शब्दान्तरवाच्यत्वात्त[9]द्रव्यस्य क्रियैव प्रधानमिति ।

इतश्च भा[10]वप्रधानमाख्यातम् । एकस्मिन्वाक्ये द्वयोराख्यातयोरसमवायात्पचति पठतीत्युभयोः प्राधान्यादितरेतरेण समवायो नास्ति । न हीतरः शब्द इतरत्र गुणी भवति । द्रव्यशब्दे च समवायात् । समवैति हि[11] द्रव्यशब्देनाऽऽख्यातशब्दः । पचति देवदत्त इत्युक्ते पचिक्रियागुणभूतो लक्ष्यते देवदत्तः । तस्मादुपपन्नं भावप्रधानमाख्यातमिति । अपि चोक्तं "क्रियावाचकमाख्यातं लिङ्गतो न विशिष्यते । त्रीनत्र पुरुषान्विद्यात्कालतस्तु विशिष्यते" [12]इति ॥

तदेव

---

१ घ. झ. ट वसती; ठ. वसति इति श°. २ क. ख. घ. झ. ट. निर्दिष्टुं. ३ क. ख. ग. ज. 'तथा' नास्ति. ४ क. ख. ग. च. ज. कर्मका या. ५ ग. च. ज. व्यापर°. ६ झ. यदुक्त° ट. यदुक्त° देतत्पुनरु. ७ ग. ज. अनुक्तोऽपि. ८ ग. ज. वाच्यशब्दत्वात्. ९ क. ख. ग. ज. 'तत्तत्' नास्ति; घ. झ. ट. ठ. तत्तद्द्रव्य°. १० क. ख. ग. ज. इतश्च न द्रव्यप्रधान°. ११ क. ख. ग. ज 'हि' नास्ति. १२ च. 'इति' नास्ति.

तत्पुनरेतच्चतुष्प्रभेदमाख्यातं भवति । कर्तरि भावे कर्मणि कर्मकर्तरि चेति । पचतीति कर्तरि । भूयते पच्यत इति भावकर्मणोः । पच्यते स्वयमेवेति कर्मकर्तरि । चतुर्ष्वप्यविवक्षितार्थानि[1] द्रव्याण्यप्रधानानि[2] क्रियैव प्रधानम् । तामभिदधत्तयैव लक्ष्यमाण आख्यात-संज्ञो भवतीत्युक्तम् ।

चतुष्प्रभेदमाख्यातम्

आख्यातजत्वान्नाम्नां प्रतिज्ञाक्रमं भित्त्वा पूर्वमाख्यातलक्षणमुक्तम् । पश्चान्नामलक्षणमुच्यते । किं पुनस्तत् । सत्त्वप्रधानानि नामानि । लिङ्गसंख्ययोरत्र सद्भाव इति सत्त्वम् । तथा लक्षणोपपत्तेः । तद्येषु प्रधानं गुणभूता क्रिया नामान्येव तानि । नमन्त्याख्यातशब्दे गुणभावेन नमयन्ति[3] वा स्वमर्थमाख्यातशब्दवाच्ये गुणभावेनेति नामानि । यथैव ह्याख्याते विद्यमानमपि द्रव्यमविवक्षितमेवमिहापि विद्यमाना[4] क्रियाविवक्षिता द्रव्यपरत्वात्सत्त्वशब्दस्य । तद्धि[5] क्रियाजनितमुत्तरकालं क्रियाशेषभूतमभिधाय धात्वर्थोऽसौ[6] व्यावर्तते ।

नामलक्षणम्

आह । कथं पुनर्नाम्नि क्रिया विद्यत इति विद्यमानापि चाविवक्षितेति[6]। प्रकृतिः प्रत्ययो विभक्तिरिति त्रिधा[7] विभज्यमानमेतावदेवैतन्नाम । तत्र प्रकृतिर्धातुरित्यकोऽर्थः । धातुश्च पुनः क्रियावचनः । स च नाम्नि विद्यत इति तदभिधेयभूतया क्रियया भवितव्यम् । तथावश्यं[8] यत्रार्थस्तत्र तदभिधायकशब्दो यत्र शब्दस्तत्र तद्वाच्योऽर्थ इति । संबद्धौ हि शब्दार्थौ वाच्यवाचकत्वेन नित्यमिति । एवं तावत्क्रिया विद्यते । यत्पुनरेतदुक्तं विद्यमाना[9] क्रिया कथमविवक्षितेति । अत्र ब्रूमः । नाम्नि यो धातुः स कृत्प्रत्ययोपजनितेन प्रातिपदिकेनाभिभूतक्रियाभिधान-

नाम्नि क्रिया किमर्थमविवक्षिता

---

१ क. ख. ग. ज. ॰प्यत्रयवार्थानि. घ. झ. ठ. ॰प्यविवक्षितावयवार्थानि; ट. ॰प्यविवक्षितावयवार्थानि॰ र्थानि. २ क. ख. ग. ज. घ. झ. ट. ॰नानीति क्रि॰. ३ घ. झ. ट. ठ. नामयन्ति. ४ क. ख. घ. झ. ट. ठ. ॰मानापि क्रि॰. ५ क. ख. ग. ज. तद्दिक्रि॰. ६ च. ठ. कृतार्थो॰; ट. धात्वर्थो॰ कृता. ६ क. ख. वा वित्र॰. ७ क. ख. घ. झ. ट, ठ. त्रेधा. ८ क. ख. यथावश्यं; घ. ट. यतथावश्यं. ९ क. ख. ॰मानापि.

शक्तिः प्रातिपदिकान्तर्लीनवृत्तिरेव स्वमर्थमुद्भावयितुमशक्नुवन्प्रातिपदिकार्थमेवानुवर्तमानो द्रव्यप्रधान एव भवतीत्येवं न विवक्षिता क्रिया । सा तु विद्यमानापि विगृह्यमाणे नाम्नि प्रातिपदिकनिबन्धनादुन्मुच्यमाना द्रव्यगतमर्थं प्रकाशयति न प्राग्विग्रहादिति द्रव्यपरता सत्त्वशब्दस्य गम्यते । तथाचोक्तं " शब्देनोच्चारितेनेह येन द्रव्यं प्र[1]तीयते । तदक्षरविधौ युक्तं नामेत्याहुर्मनीषिणः " (बृहद्देवता १–४२) इति । पुनश्चोक्तं " अष्टौ यत्र प्रयुज्यन्ते नानार्थेषु विभक्तयः । तन्नाम कवयः प्राहुर्भेदे वचनलिङ्गयोः " (बृ० १–४३) ॥ " निर्देशः कर्म करणं प्रदानमपकर्षणम् । स्वाम्य[2]र्थोऽथाधिकरणं विभक्त्यर्थाः प्रकीर्तिताः " इति ॥ स्त्रीपुंनपुंसक[3]भेदं निपातोपसर्गाणामपि वा क्वचिन्नामत्वमपेक्ष्य बहुवचनेनोक्तं नामानीति ।

अपरे पुनः । भावकालकारकसंख्याश्चत्वार एतेऽर्था आख्यातस्य ।

नामाख्यातलक्षणयोरपरा व्याख्या

तेषां भा[4]वः प्रधानं भवति । अतो भावप्रधानमाख्यातमित्यु[5]क्तम् । नाम्नोऽपि सत्ता द्रव्यं संख्या लिङ्गमित्येतेऽर्थाः । तेषां द्रव्यं प्रधानमित्यतः सत्त्वप्रधानानि नामानीत्युक्तमेवमेके मन्यन्ते ।

" तद्यत्रोभे भावप्रधाने भवतः " । एवं तावदनयोर्नामाख्यातयोः

नामाख्यातयोः कतरत्प्रधानं

परस्पर[6]विनाभूतयोः स्वपदार्थोक्तावेकस्य भावप्राधान्यमेकस्य सत्त्वप्राधान्यम् । अथ पुनर्य[7]त्र ते उभे भवतः । क्व च पुनरु[8]भे एते भवतः । वाक्ये । तत्र कस्य प्रधानमर्थः कस्य गुणभूत इति । शृणु । भावप्रधाने भवतस्तस्य चिकीर्षितत्वात् । वाक्ये ह्याख्यातं प्रधानं तदर्थत्वाद्गुणभूतं नाम तदर्थस्य भावनिष्पत्तावङ्गभूतत्वात् । एवं तावदाख्यातं वाक्ये प्रधानम् ।

---

१ ग. ज. प्रदीयते. २ ग. ज. स्वाम्यार्थोऽधिक °. ३ व. ट. °सकनेटं; झ. °सकभेटं. ४ क. ख. ठ. भावप्रधानता भवति; ग. ज. भावप्रधानं. ५ व. झ. 'इति' नास्ति; ट. ख्यातमुक्तम्° मित्यु. ६ क. ख. व. ज. झ. ट. °स्पराविना; च. परस्पराविना°रा; °ठ. परस्परं विना°. ७ क. ख. व. झ. ट. °र्यत्रैते. ८ क. ख. व. झ. ट. पुनरेते उभे.

अथ पुनः कथमभिनिर्वर्त्यमानो भाव आख्यातेनोच्यते किं वा तदाख्यातमिति । यतो लोकप्रसिद्ध्यैवोदाहरति तत्प्रसिद्धत्वाच्छब्दार्थसंबन्धस्य । " पूर्वापरीभूतं[1] भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तम् " । अपूर्वमनपरं सन्तमेकत्वात्पूर्वापरीभूतं पूर्वापरमिव पौर्वापर्येणावस्थितमेकमनेकासु

आख्यातेन भावः कथमुच्यते । आख्यातोदाहरणं च

क्रियास्वाश्रितमुपानद्[2]दंविनहनपूर्वोत्तरपादविहरणपथिभोजनशयनासनोदकपानाद्यास्वाश्रितं तदं[3]भिनिर्वृत्ति[4]वशेनाभिनिर्वर्त्यमानं[5] कस्मैचित्पृच्छते किं करोतीत्यन्य आचष्टे व्रजतीति । अविभक्तकर्तृकं द्वितीय[6]मित्युदाहरणद्वयं भावद्वयोपप्रदर्शनार्थम् । उपक्रमप्रभृतीति । उपक्रम आरम्भस्तस्मादारभ्यापवर्गपर्यन्तं यावदन्त्या क्रियेत्यर्थः । आह । अन्त्यासंनिधौ भावनिर्वृत्तिदर्शनादन्त्ययैव निर्वर्त्येत[7] इति । शृणु । पूर्वासामभावेऽन्त्यैव न स्यात्पूर्वापेक्षं हि तस्या अन्त्यत्वम्[8] । अपि च । प्राप्तिफलो हि व्रजिः । न चैकया क्रिययाभिमतदेशान्तरप्राप्तिरस्ति । तस्मादुपक्रमाद्याभिः क्रियाभिरीषदीषदभिनिष्पाद्यमानो भावोऽन्त्यायामभिसंतिष्ठते । अतस्तत्सांनिकर्षे[9] गृह्यते । न त्वसावन्त्ययैवाभिनिर्वर्त्येत इत्यन्ते गृह्यते[10] । अपि च प्रसिद्धमेतदुपक्रमा[11]दारभ्य यच्च व्रजितं[12] यच्च व्रज्यते यच्च व्रजिष्यमाणं तत्सर्वमेकीकृत्य वक्तारो भवन्ति व्रजति देवदत्त इति । न प्रसिद्धिरुपरोद्धुं न्याय्या । यथावस्थितानां हि शब्दानामन्वाख्यानमात्रमेव शास्त्रेण क्रियते नोत्पाद्यन्ते शब्दा नाप्यर्थेषु विधीयन्ते । तस्मात्प्रसिद्धशास्त्रसमयोऽपि लौकिकप्रसिद्ध्यैव पूर्वापरीभूतं भावमाख्यातेनाचष्टे व्रजति पचतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तम् । तस्मादुपपन्नमनेकक्रियाभिर्निर्व-

भावोऽनेकक्रियाभिर्निर्वर्त्यते

---

१ ठ. °भूतमिति । अपूर्व°. २ घ. झ. ट. क्रियासु स्वा आश्रि°. ३ घ. झ. ट. °दृभिनहन°. ४ घ. ट. तद्वक्षिभिनिर्वृत्ति°. ५ क. ख. ग. ज. °निर्वर्तमानं. ६ घ. झ. ट. पचि द्वितीयामिति । उदा०. ७ च. निर्वृत्यत°. ८ क. ख. घ. झ. ट. ठ. व्रजातिः. ९ क. ख. ग. ज. ततः संनि°; घ. अत तत्सांनि°; झ. अतंतत्सं; ट. °ष्टतंतः तंत्सं° ततः सं. १० क. ख. घ. झ. ट. गृहीतः. ११ ग. ज. °क्रमसार°. १२ ग. ज. व्राजित°.

र्त्तमानो भाव आख्यातेनोच्यत इति । आह च । " क्रियासु बह्वीष्व-भिसंश्रितो[1] यः पूर्वापरीभूत इवैक एव । क्रियाभिनिर्वृत्तिवशेन सिद्ध आख्यातशब्देन तमर्थमाहुः " [बृह० १४-४] इति ।

सत्त्वभूतो भावः कथमुच्यते

" मूर्तं सत्त्वभूतं सत्त्वनामभिः " । कदाचित्तमेव भावं तथैवोपक्र-मप्रभृत्यभिनिर्वर्तमानमपवर्गपर्यन्तं[2] मूर्तं सन्तं[3] सत्त्व-भूतं सत्त्वरूपिणं लिङ्गसंख्यायुक्तैः सत्त्वनामभि-राचष्टे । कथम् । "व्रज्या पक्तिरिति" । तत्रोक्तो विशेषः । कृदभिहितो भावो द्रव्यवद्भवति । सोऽयं प्रयुक्तस्य लक्षणस्य प्रयोगमपेक्ष्य क्वचिदपवादः । आह च । " क्रिया-भिनिर्वृत्तिवशोपजातः कृदन्तशब्दाभिहितो यदा स्यात् । संख्याविभक्ति-व्ययलिङ्गयुक्तो भावस्तदा द्रव्यमिवोपलक्ष्यः । " [बृ० १-४] इति । आह । कस्मात्पुनरेक एव भावस्तिङन्तेन कृदन्तेन[4] चान्यथोच्यत

भावस्य द्विरूपत्वे कारणम्

इति । उच्यते । शब्दस्वाभाव्यादृते नान्यदत्र प्रयोजकमस्ति । अपि चोक्तमस्माभिरवस्थितानामेव शब्दानामभिधानाभिधेयसंबन्धेनाभिसंबद्धानामेव नित्यमन्वाख्यानमात्रमेव क्रियते नोत्पाद्यन्तेऽर्थेषु वा विधीयन्ते शब्दा इति । व्रज्या पक्तिरित्युदाहरणद्वयमुक्तप्रयोजनम् ।

सत्त्वानां सामान्योपदेशः

" अद इति सत्त्वानामुपदेश " इति । भावोऽधिकृतः । स च पुनः सत्त्वभूतो नेतरः । यतस्तत्संबन्धेनैव नाम्नो यदवशिष्यते तदुच्यते । किं पुनस्तत् । सामान्यविशेषवाचित्वम् । तत्राद इति सत्त्वाना-मुपदेशः सामान्यत इति वाक्यशेषः । सर्वेषा-मपि सत्त्वानामध्ययने प्राप्ते लिङ्गाविशिष्टत्वादिदमेवैकमुदाहृतमुपप्रदर्श-नार्थम् ।

आह । विशेषोपदेशः कथमिति । उच्यते[5] । " गौरश्वः पुरुषो हस्तीति "

---

१ च. संशृतो. २ ठ. °निर्वर्त्यमान°. ३ क. ख. ग. ज. ' सन्तं ' न विद्यते. ४ च. ' कृदन्तेनं ' न विद्यते. ५ क. ख. °च्यते । खण्डसूत्रम् । गौ° ; ग. °च्यते । प्रथमः खण्डः ॥ १ ॥ गौ°; ज. °च्यते । खण्डः । गौ°; घ. ङ. ट. °च्यते । सूत्रं । गौ°.

सत्त्वानां विशेषोपदेश इति वाक्यशेषः । सोपाधिकनिरुपाधिकोपप्रदर्शनार्थमनेकोदाहरणम् । सामान्यवृत्त्या

विशेषोपदेशश्च

विशेषवृत्त्या चोभयथा शब्दः प्रवर्तत इत्युभयमुपदर्शितम् ।

" भवतीति भावस्य " सामान्येनोपदेशः । अत्र हि सर्वेषां सत्तावाचिनामध्ययने[1] प्राप्ते भवतिरेवैक उदाहरणार्थः परिगृहीतः । विद्यमानतामेवानुभवन्तः सर्वे

भावस्य सामान्योपदेशः

भवतिशब्दवाच्या अन्याभिर्विशेषक्रियाभिरभिसंबध्यन्ते । तस्माद्भवतीति सर्वक्रियाप्रसवबीजभूतमस्तित्वमात्रमेव निरुपपदेन भवतिशब्देनोच्यत इत्युपपन्नं भवति सामान्यवाचित्वम् । विशेषनिर्देशः कथमिति । उच्यते ।

विशेषोपदेशश्च

" आस्ते शेते व्रजति तिष्ठतीति " । सकर्मकाकर्मकोपदर्शनार्थमुभयेषामुदाहरणम् ।

" इन्द्रियनित्यं वचनमौदुम्बरायणः[2] " ॥ १ ॥

तत्र चतुष्ट्वं नोपपद्यते युगपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः शास्त्रकृतो योगश्च व्याप्तिमत्त्वात्तु शब्दस्याणीयस्त्वाच्च शब्देन संज्ञाकरणं व्यवहारार्थं लोके तेषां मनुष्य[3]वद्देवताभिधानं पुरुषविद्यानित्यत्वात्कर्मसंपत्तिर्मन्त्रो वेदे । षड् भावविकारा भवन्तीति वार्ष्यायणिर्जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति जायत इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधत्यस्तीत्युत्पन्नस्य सत्त्वस्यावधारणं विपरिणमत इत्यप्रच्यवमानस्य तत्त्वाद्विकारं वर्धत इति स्वाङ्गाभ्युच्चयं सांयौगिकानां वार्थानां वर्धते विजयेनेति वा वर्धते शरीरेणेति वापक्षीयत इत्येतेनैव व्याख्यातः प्रातिलोम्यं विनश्यतीत्यपरभाव[4]स्यादिमाचष्टे न पूर्वभावमाचष्टे न प्रतिषेधति ॥ २ ॥

---

१ ग. ज. °ध्ययनगप्तो भ°. २ क. ख. ग. च. ज. घ. झ. °रायणस्तत्र; ट. °रायणंस्तत्र; ठ. °रायण इति । इति निरुक्तटीकायां प्रथमाध्याये प्रथमः खण्डः। तत्र. ३ क. ख. छ. त. द. °वेदे ॥२॥ षड°. ४ क. ख. छ. त. द. ३.

“ तत्र चतुष्ट्वं नोपपद्यते ” । आह[1] । इदं[2] तावदुक्तं पदचतुष्टयं

पदचतुष्टयानुपपत्तिः

भाववचनता द्रव्यवचनता गुणभावः प्रधानभावः पूर्वापरीभावः सामान्यवाचित्वं विशेषवाचित्वमिति नोपपद्यते । कस्मात् । वचनानित्यत्वात् । कः पुनरेवमाहानित्यं वचनमिति । उच्यते । इन्द्रियनित्यं वचनमित्यौ[3]दुम्बरायणः । इन्द्र आत्मा स येन ईयते लिङ्ग्यतेऽनुमीयते वास्त्यसावात्मा कर्ता यस्येदं करणं नाकर्तृकं करणमस्तीति तदिन्द्रियम् । तस्मिन्नित्यमिन्द्रियनित्यम् । किं पुनस्तत् । वचनम् । उच्यतेऽनेनेति वचनं वाक्यमित्यर्थः । कतमत् । यदेतन्नामाख्यातोपसर्गनिपातात्मकम् । औदुम्बरायण आचार्यो मन्यत इति वाक्यशेषः । उदुम्बरस्यापत्यमौदुम्बरिः । तस्यापत्यमौदुम्बरायणः । आह । ततः किमिति । उच्यते । तत्र तस्मिन्वाक्य एवमिन्द्रियनित्ये सति यदेतत्पदचतु[4]ष्टयमुक्तमेतन्नोपपद्यते । कस्मात् । शृणु । यावदेव वक्तुर्वागिन्द्रिये श्रोतुश्च श्रोत्रेन्द्रिये वचनं तावदेव तदस्तीति शक्यते[5] वक्तुं प्रच्युतं च नास्ति । अपि च । वाक्यमपि[6] समस्तमुद्भूतं तदिन्द्रिये नावतिष्ठते यदवयवभूतानि पदान्यवस्थितानि परिसंख्यातुम् । न च विनष्टाविनष्टयोः पदयोः सह परिसंख्यानमस्ति । तस्माद्वचनानित्यत्वात्पदचतुष्टयानुपपत्तिरित्युपपन्नम् ।

किं चान्यत् । “ अयु[7]गपदुत्पन्नानां वा शब्दानामितरेतरोपदेशः ”[8] ।

इतरेतरोपदेशश्च

वाशब्दः समुच्चयार्थः । “ वा विकल्पोपमानद्वंद्वसमुच्चयार्थेष्विति ” हि निपातविदः पठन्ति । वक्ष्यति चायमपि “ वेति विचारणार्थे ” इत्युपक्रम्य “ अथापि समुच्चयार्थे[9] भवति” (निरु० १-४) इति । एवं चैतेषामयुगपदुत्पन्नानां शब्दानां वाक्यावयवभूतानां योऽयमितरेतरोपदेश इतरेतरगुणप्रधानभावो नाम्न आख्यातं प्रति गुणभावेनोपदेश आख्यातस्य च नाम प्रति प्रधानभावेनोपदेशः । अयं च नोपपद्यत इत्यनुवर्तते । किं कारणम् । न हि

१ क. ज. ‘ आह ’ नास्ति. २ क. ख. इह ताव;° ग. ज. इह तावदुत्तरं । पद°. ३ क. ख. ग. ज. घ. झ. ट ढ. °मिति । इन्द्र;° ञ. °मिति । इन्द्र° त्यौदुम्बरायणः. ४ ढ. °चतुष्टयमु° ५ ग. ज. वाक्यते. ६ क. ख. ग. ज. घ. झ. ट. वाक्यमपि वाक्यं सम°. ७ ग. ज. युगपदु°. ८ च. °च्चयापेक्षया इति°. ९ घ. च. झ. ट. °यार्थे वाशब्दो भव.

विनष्टं नाम गुणभावमियादाख्याते। नापि विनष्टमाख्यातं प्रधानभावमियाञ्चाम्नि। न हि विनष्टाविनष्टयोरितरेतरगुणप्रधानभावोऽस्ति।

शास्त्रकृतो योगश्च

किं चान्यत्। "शास्त्रकृतो योगश्च"। यश्चायं शास्त्रकृतो योगः शास्त्रदृष्टः शब्दस्य शब्दान्तरेण योगः संयोगः[1] तद्यथा। उपसर्गस्य धातुना धातोः प्रत्ययेन प्रत्ययस्य लोपागमवर्णविकारैः। अयं च वचनानित्यत्वान्नोपपद्यते। किं कारणम्। अयुगपदुत्पत्तौ हि सत्यां धातुरुच्चारितो विनष्टः स कथमुपसर्गेण योक्ष्यते प्रत्ययेन वा। न हि विनष्टाविनष्टयोर्योगोऽस्ति। तस्माद्य एष नामाख्यातयोरितरेतरगुणप्रधानभाव उपसर्गनिपातानां नामाख्याताभ्यां योगो[2] यच्च पदचतुष्टमुक्तं सर्वमेतदसम्यगिति।

युगपदुत्पन्नानामित्यस्यान्यो व्याख्यामार्गः

युगपदुत्पन्नानामित्येवमारभ्यमाणयोर्वाक्ययोरनयोरन्यो[3] व्याख्यामार्गो भवति। नोपपद्यते युगपदुत्पन्नानामयुगपदुत्पन्नानामित्युभावपि[4] पाठौ व्यापारं प्राप्नुतः समानसंहितत्वात्। इन्द्रियनित्यत्वात्पदचतुष्टानुपपत्तिरित्युच्चार्यमेताशङ्काद्वारेणैतदवतार्यते[5][6] युगपदुत्पन्नानामिति। अथ मतम्। अविचालिन एवैते कूटस्था अविनाशिनः शब्दाः। ते तु कल्पान्ते तस्माद्व्यभिरूपाद्विशीर्णेष्वभिधेयेष्वभिधातृषु[7] कारणभावमापद्यमानेष्वाश्रयाभावादेवावस्थातुमशक्नुवन्तोऽभिधेयाभिधातृसहिता एव कारणात्मभावमधिकमनुभूयाभिसंभवकाले कल्पादावन्यकल्पविशिष्टकर्मनिर्जितकार्यकारणसर्वभूतसाधारणात्मभूते[8] हिरण्यगर्भे विवर्तमाने तद्बुद्धिमाश्रयं प्राप्य तेनैव सह युगपदेवाभिव्यज्यन्ते विशेषात्मलाभाय शब्दा इति। अत्र ब्रूमः। एवमप्येतेषां युगपदुत्पन्नानां युगपदुत्पत्तावपि सत्यां यद्यपि पदचतुष्टं[9] प्राप्नोत्येव सहावस्थितानां तथापीतरेतरोपदेश इतरेतरगुणप्रधानभावश्च न प्राप्नोति। न हि युगपदुत्पन्नयोर्गोविषाणयोरितरेतरगुणप्रधानभावोऽस्ति। किं चान्यत्। कूटस्थेषु चाविचालिषु नित्येषु शब्देषु य एष शास्त्रकृतो योग एषं[10] नोप-

---

१ क. ख. ग. ज. 'संयोगः' नास्ति. २ क. ख. च. योगे. ३ क. ख घ. झ. ट. °न्नानामयुगपदुत्पन्नानामित्ये°. ४ क. ख. ग. ज. °वपि व्याहारौ प्राप्नु°. ५ ग. ज. मताशङ्कयद्वा°; घ. ट. मनाशङ्काद्वा°. ६ ग. च. ज. °णैतत्प्रतार्यते. ७ घ. झ. ट. व्यामिरूपा°. ८ घ. झ. निर्मित; ट. निर्मित° र्जि. ९ क. ख. घ. झ. ट. ठ. चतुष्टयं. १० क. ख. घ. झ. ट. ठ. स एष.

पद्यते । किं कारणम् । अयुक्तो हि[1] युज्यते । नित्ययुक्तार्थे धातव उपसर्गैः प्रत्ययैश्च प्रत्ययाश्च लोपागमवर्णविकारैरिति । तस्मान्नित्यपक्षेऽपि वचनस्य यदेतदुपवर्णितं गुणप्रधानभा[2]वविषयं पदच[3]तुष्टयमधिकृत्य सर्वमेतदसम्यगिति ।

" व्याप्तिमत्त्वात्तु शब्दस्य " । उच्यते सर्वमेतदुपपद्यते । कस्मात् । व्याप्तिमत्त्वाच्छब्दस्य । तुशब्दः पक्षव्यावृत्तौ । व्यापनं व्याप्तिः । सा यस्मिन्नस्ति सोऽयं व्याप्तिमाञ्छब्दः । तद्भावो व्याप्तिमत्त्वम् । तस्माद् व्याप्तिमत्त्वाच्छब्दस्य सर्वमेतदुपपद्यत इति वाक्यशेषः । आह । कथं पुनर्व्याप्तिमाञ्छब्द इति । शृणु । शरीरे ह्यभिधानाभिधेयरूपा बुद्धिर्हृदयान्तर्गताका[4]शप्रतिष्ठिता । त[5]योरभिधानरूपाभि[6]धेयरूपयोर्बुद्ध्योर्मध्येऽभिधानरूपया शास्त्राभिमतप्रयोजनविजिज्ञापयिषया बुद्ध्या पुरुषेण तदभिव्यक्तिस[7]मर्थेन स्वगुणभूतेन प्रयत्नेनोदी[8]र्यमाणः शब्द उरःकण्ठा[9]दिवर्णस्थानेषु [10]निष्पद्यमानस्तथा पुरुषार्थाभिधानसमर्थवर्णादिभावमापद्यमानः पुरु[11]षप्रयत्नेन बहिर्वि[12]निक्षिप्तोऽविनाशिनि व्यक्तिभावमापन्नः श्रोत्रद्वारेणानुप्रविश्य प्रत्या[13]य्यस्य बुद्धिं सर्वार्थरूपां सर्वाभिधानरूपां व्याप्नोतीत्येवं व्याप्तिमाञ्छब्दः । आह । ततः किं यदि व्याप्तिमाञ्छब्दः । उच्यते । यदि नित्यो यद्यनित्यः पदचतुष्ट्वादि सर्वमुपपद्यत एव । किं कारणम् । न ह्यसंव्याप्य पुरुषस्य [14]बुद्धिं बुद्ध्यवस्थमर्थं प्रत्ययमादधीत । न चानवस्थितो व्याप्नुयात् । ततश्च किम् । स श[15]ब्दस्तं तमर्थमभिदधत्स्व-

परोद्भावितदोषनिराकरणम्

१ क. ख. हि; घ. झ. ट. हिश्च, ठ. °श्च हि धा°. २ क. ख. घ. झ. ठ. भावादि पद°; ट. भावादि पद° वविषय. ३ ग. ज. तुष्ट्वमधि°. ४ ठ. °काशे प्र°. ५ ग. ज तयोरभिधानरूपा हृदयान्तर्गताकाशप्रतिष्ठिता तयोरभिधानाभिधेयरूपयो°. ६ च. 'भिधेयरूपयोर्बुद्ध्योर्मध्येऽभिधानरूपया' नास्ति. ७ ग. ज. समर्थोन; च. सामर्थ्येन. ८ ग. °माणादिषु सत्युरःकण्ठा°; च. ज. माणा सत्युरःकण्ठा°; ट. °माणः शब्दः उरः उ° सत्यु. ९ ग. च. ज. °ण्ठादिषु वर्ण°. १० क. ख. झ. निष्पद्यमानस्तया; ग. ज. निष्पद्यमानस्ततया; च. निष्पद्यमानत्या. ११ घ. झ. ट. ठ. °षयत्नेन. १२ ग. ठ. बहिर्निक्षिप्तो°. १३ घ. झ. प्रत्याप्यस्य; ट प्रत्याप्यस्य° व्य. १४ क. ख. ग. ज. 'बुद्धिं' नास्ति. १५ क. ख. घ. झ. ट. °ब्दः स्वमर्थ°.

क्रियाप्रवेशो[1]पजनितेन तेनाभिधानेनाख्यातमित्येवमादिना स्वमात्मानमभिसंबध्य तिरोभवितुमुपक्रमते विनाशं वो[2]पैति । तस्य स्वदेशोपजनितैराख्यातादिभिः स्वप्रदेशविशेषानुस्मृतिपूर्वकं परिसंख्यानमुपपद्यत एव । तस्मात्सम्यगेवोक्तम् । यत्पुनरेतदुक्तं न हि विनष्टाविनष्टयोः परिसंख्यानमस्तीति । अत्र ब्रूमः । पुरुषप्रयत्नोपजनिता[3]द्वक्त्रोद्घातात्परस्यार्थप्रत्ययमाधाय शब्दव्यक्तय ए[4]ता ध्वंसन्ते न तु शब्दाकृतयः । तास्तु भूयो[5]ऽभिधानशक्त्या बुद्धिद्वारेणावस्थिताः स्वान[6]भिधेयान्प्रकाशयन्त्यः स्थिता एव भवन्ति । तासु साक्षात्परिसंख्यानं वर्तमानमितरासु विनाशिनीषु व्यक्तिषु लक्षणयोपचर्यते । तस्माद्व्याप्तिमत्त्वाच्छब्दस्य पदचतुष्ट्वादि सर्वमुपपद्यत एव । व्याप्तिमत्त्वादित्येतेनैवेतरेतरोपदेशः प्रत्युक्तः शास्त्रकृत[7]श्च यो योगः । नामाख्यातपदरूपे बुद्धितत्त्वे सत्त्व[8]क्रियाविषये गुणप्रधानभावेनावतिष्ठेते । तयोर्गुणप्रधानभावे सति व्यक्तिषु[9] लक्षणयोपचर्यन्ते[10] । तथा च धातुरूपा बुद्धिस्तदर्थया[11] संयुज्यते । बुद्धिरेव हि धात्वादिरूपेण विपरिणममाना शास्त्रेण[12] संस्क्रियते । तस्यां संस्क्रियमाणायां शब्दे संस्कारोपचारः क्रियते तदभिधायकत्वाच्छब्दस्य । तत्र यदुक्तं वचनानित्यत्वादितरेतरोपदेशः शास्त्रकृतश्च योगो नोपपद्यत इत्येतदयुक्तमिति । नित्यत्वपक्षेऽपि युगपदुत्पन्नानां गुणप्रधानभावो गोविषाणवन्नास्तीति यदुक्तमनैका[13]न्तिको दृष्टान्तः । दृष्टो हि युगपदुत्पन्नयोरेकका[14]ले राजपुत्रामात्यपुत्रयोर्गुणप्रधानभावः । तत्र यदुक्तं युगपदुत्पन्नानामितरेतरोपदेशो न प्राप्नोतीत्येतदयुक्तं व्याप्तिमत्त्वाच्छब्दस्य सर्वमुपपद्यत इति । तदेव स[15]म्यग्भवति ।

अपरो व्याख्यामार्गः । इन्द्रियनित्यत्वात्पदचतुष्ट्वानुपपत्तिस्तदाश्रयस्य च[16]

---

१ घ. झ. ट. ठ. °पजनितेनाभि°. २ क. ख. घ. झ. ट. ठ. चोपैति. ३ च. जनिता वक्त्रोद्घाताः. ४ क. ख. ग. घ. ज. झ. ठ. एव. ५ घ. झ. ठ. तयाभिधान; ट. तयाभि° भूयोऽ°. ६ घ. झ. स्वानर्थान्; ट. स्वानर्थान् °भिधेया. ७ क. ख. घ. झ. ट. °कृतो योगश्च. ८ च. ठ. सर्वक्रि; ° ट. सत्त्वे ऽवं. ९ क. ख. घ. झ. ठ. °सति तच्छब्दे लक्षण;° ग. ज. °सति तच्छब्दे (ग. °च्छब्द) लक्षणया व्यक्तिषूपचर्यन्ते; ट. तच्छब्दे ल° व्यक्तिषु. १० क. ख. घ. झ. ट. ठ. °चर्यते. ११ घ. ट. तदर्थतया. १२ ग. ज. शास्त्रे. १३ क. ख. घ. झ. ट. °कान्तिकोऽसौ दृ°. १४ ग. ज. °कालराज°. १५ क. ख. घ. झ. ट. ठ. सम्यगिति. १६ ग. च. ज. ‘च’ न विद्यते.

न मर्षयन्ति । विगुणमेतदिति विद्यानित्यत्वात्तदभावे नेयुः कर्मणि । ततश्च देवताहीनं कर्मफलं संपद्यते । न च केवलं फलासंपत्तिः । किं तर्हि । दुरिष्टहेतुको दोषोऽपि स्यात् । तस्मादेत एव नामाख्यातोपसर्गनिपाताः प्रयोगानुपरिपाटिविनियमार्थं मन्त्रत्वेन वेदे समाम्नाताः । न हि नामाख्यातोपसर्गनिपातान्परित्यज्य मन्त्राः सन्ति । एतदेव हि चतुर्विधं पदजातं प्रयोगानुपरिपाट्या कयाचिदवस्थितं मन्त्रा इत्युच्यन्ते ।

लौकिकज्ञानस्यानित्यत्वम्

आह । कथमनित्यत्वं विद्यायाः पुरुषेष्विति । उच्यते । इह येन वाक्यविरचनानुक्रमेणार्थवस्त्वनुक्रमेण वोक्त्वानुप्रेष्यते मनुष्य ' एवमेव ब्रूयास्त्वमेमुं देवदत्तमिति ' स तेनैव वाक्यविरचनानुक्रमेणैवावबद्धमपि सन्तमर्थं न शक्नोति प्रतिपादयितुम् । एवमनित्यत्वं विद्यायाः पुरुषेषु । तददोषं वा मनुष्यान्प्रति सर्वेषामेव मनुष्याणामनित्यत्वाद्विद्यायाः । अयमपि हि येन वाक्यानुक्रमेणाद्य वक्ति मनुष्यः कंचिदर्थं न तेनैव श्वः शक्नोति वक्तुम् । तत्र यदुक्तं किमर्थं मन्त्रो वेदे समाम्नात इतीदं न युक्तं पुरुषविद्यानित्यत्वात्कर्मफलसंपत्त्यर्थं मन्त्रो वेदे समाम्नात इति । न ह्यविचारितमेवं वेदे पठ्यत इत्यत इदमाह ।

पदचतुष्टमाक्षिप्य पक्षप्रतिपक्षशो विचार्यावधारितम् । विनयश्चास्य प्रसङ्गेनैवास्य परिक्लप्तो देवमनुष्यव्यवहारार्थमेतदिति । तदेतत्सर्वमपि चोदकवशेन प्रसक्तानुप्रसक्तमुक्तम् । भावस्तु प्रकृतो यतस्तच्छेषमधुना वर्णयिष्यामः । स च पुनरुभयात्मा भावः कार्यात्मा कारणात्मा च । अनयोर्यः कार्यात्मा तमधिकृत्योक्तं क्रियानिर्वर्त्यो योऽर्थः स भावः क्रियैव वा भाव इति । इदानीं कारणात्मा भावो निरूप्यते । कथम् । क्रियाद्रव्ययोः

---

१ ग. च. ज. ठ. कर्मफलं न. २ घ. झ. ट. ठ. °पाटिनियमार्थं . ३ ग. ज. कदाचिदव° . ४ क. ख. ब्रूयात्—त्वं गन्तुं देव°; ग. ब्रूयास्त्वंगंदेव°; ज. ब्रूयास्त्वं गंत देव° . ५ ज. ठ. किंचिदर्थं. ६ ठ. युक्तं अयुक्तमित्यर्थः पुरु° . ७ क. ख. घ. झ. ठ. °मेव विज्ञायते । अत°; ट. °मेव विज्ञायते अत° वेदे पठ्यत इति . ८ क. ख. ग. ज. परिक्लप्तः; च. परिक्लप्तः° क्लृ . ९ क. ख. घ. झ. ट. तयो° . १० च. भाव वा इति; ग. भाव इति ॥ २ ॥ इदा° .

कारणात्मा भावः

स्वात्मस्थो[1] विशेषः कार्यात्मप्रध्वस्तयोः पुरुषोपभोगसंतानोपक्षये कार्यात्मभावातीतो येनात्मभावेन भवन[2]मात्राभिसंबन्धिना[3] प्रलयकालेऽवतिष्ठते सोऽत्यन्ताविनाशधर्मा आत्मा भाव इत्युच्यते । आह । कथमयमिह प्रसक्तः । शृणु । तद्विकारा एव हि द्रव्यगुणकर्मभावेनावस्थिताः सन्तो नामाख्यातोपसर्गनिपातैरभिधीयन्ते स्थितिकाले । असावपि च प्रहीण[4]सर्वविशेषभवनमात्रक्रियाभिसंबन्धी सन् व्यावृत्तसर्वोपपदाभ्यां नामाख्यातशब्दाभ्यामुच्यते भवतीति भाव इति च । शब्दगति[5]विभुत्वादपोढसर्वविशेषामप्येतामवस्थामेतौ शब्दावास्कन्दतः । यत[6] एतयोरेव सत्त्वा[7]वधारणार्थमयमिह प्रसञ्जितः पदचतुष्टयाधिकरणे ।

अयं भावः प्रधानं पुरुषः शून्यं वा न भवति

आह । प्रधानमेतत्स्यात् । किं कारणम् । तद्भावेन ह्येतज्जगदवतिष्ठते प्रलय[8]काल इत्येके मन्यन्ते । तच्च नैव । किं कारणम् । भावविकार एव हि सोपपदशब्दवाच्यत्वात्प्रधानभाव इत्युच्यते[9] । पुरुषस्तर्हि । तत्राप्ययमेव हेतुरनुपक्षीणशक्तित्वात् । एतेनैवेश्वरपरमाण्वादिर्भाव[10]विकाराः प्रत्युक्ता[11] ईश्वरभावः परमाणुभाव इति सोपपदत्वात् । शून्यं तर्हि । तदपि न । यस्मा[12]च्छून्यशब्देऽपि भावशब्दासङ्गदर्शनम् । न ह्यसत्यर्थे शब्दः प्रयुज्यते । शब्दो हि शब्दस्यार्थेन संबद्धः । किंचित्तदस्ति यच्छून्यमिति । लोके हि प्रसिद्धं गृहं शून्यं ग्रामः शून्य[13] इति । तस्मान्न शून्यशब्देनेह[14] भाव उच्यते । किं तर्हि । प्रत्य[15]पेक्षाकृतं शून्यत्वमिति । भावशब्द एवालोप-

---

१ घ. ट. स्थोऽविशे°. २ क. ख. सद्नमात्रा°; च. ठ. 'भवन' नास्ति; ट. भवन° सद्. ३ घ. झ. ट. च. संबन्धिना तनुमात्रा प्रलय;° ग. ज. संबन्धिन प्रलय;° ठ. संबन्धिना तनुमात्रः प्रलय°. ४ क. ख. घ. झ. ट. प्रहीन. ५ क. ख. घ. झ. ट. ठ. °गतविभु;° ग. ज. °गतं विभु°. ६ झ. अतः. ७ क. ख. ग. ज. घ. झ. साधारण्यार्थ;° ट. साधारण्यार्थ° सत्त्वावधारणा°. ८ ग. ज. प्रलयकार इ°. ९ क. ख. घ. झ. ट. इति ह्युच्यते. १० क. ख. °भावाः प्रत्यु;° च. ज. भावविकारः. ११ च. प्रत्युक्तः. १२ घ. झ. ट. ठ. तस्मात्. १३ क. ख. घ. ट. शून्यः शून्ये शब्दमहत्वे इति. १४ क. ख. °ब्देनाभाव°; घ. °नेहो भाव एवोच्यते; ट. ठ. °नेहाभाव एवोच्यते. १५ क. ख. घ. झ. अपेक्षा° ; ट. अपेक्षा° प्रत्य.

पदत्वेन युक्त इति चेन्न प्रयोगाप्रसिद्धेः। न हि भावंभाव इति प्रसिद्धपूर्वः प्रयोगः। न च प्रयुज्यमानो [3]भावशब्दो भावशब्द एवोपपदत्वेन प्रधानशब्दवत्किंचिद्विशेषप्रत्ययमादधाति। तस्मात्सर्वोपपदहीनस्य भवतेर्घञन्तस्य भावः। तेनात्मभावेनेदं जगन्नित्यम्। इतरैस्तु भावविकारैः परमाण्वादिभिर्भावविकारात्मभिरनित्यम्। कस्मात्। विकारात्मकत्वादेव। विकारो ह्यनित्यः। तमेवं भवनमात्राभिसंबन्धेन प्रहीणसर्वभावविकारमेतत्सद्भाव[6]विदोऽवधृतवेदान्तरहस्यसंपदः परापरविदो वेदविदो मेधाविन आत्मसंप्रपातकातर्यहीना विशुद्धदर्शनप्रयोगा वेदविहितकर्मकृतस्तत्तत्कारितया मुक्ताधिकारबन्धना एतत्परिज्ञानादेवोपक्षीणकर्मोपभोगसंतानाः सन्त आत्मकामाः प्रतिपद्यन्ते। नेतरे। प्रधानादिविदो वेदानुशासनैकदेशानीश्वरपुरुषप्रधानादीननित्यान्भावविकारान्स्वमतिकल्पनाहेतुव्यवहितान्कृत्वा स्थिरीकृत्य चातो नित्यत्वेन प्रतिपद्यन्ते भवनमात्राभिसंबन्धेन तदेतस्मादात्मन उद्विजन्त आत्मप्रणाशकातर्यादिना [11]कर्मोपभोगसंतानं शिवमिव मन्यमानाः। केचिच्च शक्तिहानादसंबोधत्वादेव। स एष इह वेदाङ्गे वेदार्थनिर्वचनाभिनिवेशिनि शब्दानां सामान्यविशेषवृत्त्युपदेशप्रसङ्गे [12]वर्तमाने भवतेः कृदन्तीभूतस्य वा भवनमात्रमेव वक्तुं सामर्थ्यं नेतरान्भावविकारान्विद्यमानानपीत्येतेन [13]प्रसङ्गेन संसूचितः। वेदरहस्यब्राह्मणैस्तैस्तैस्तत्र विस्तरेणायं [16]निर्णीयते।

[17]उक्तं द्विविधो भावः कारणरूपः कार्यरूपश्च। तत्र कारणेऽविकृत-

---

१ ठ. भावाभाव°. २ घ. झ. ट. ठ. °सिद्धः पूर्वप्रयोगः. ३ क. ख. घ. झ. ट. °मानोऽपि भाव°; ठ. युज्यमानोऽपि भाव°. ४ क. ख. घ. झ. ट. °धानादिशब्द°. ५ घ. झ. ट. ठ. °वत्किंचि;° च. °वत्किंचित्कं°. ६ च. °विदो विवृतवेदा°. ७ घ. झ. ठ. °हस्यविदो वेद°; ट. °हस्यविदो वेद° परापर विदो. ८ क. ख. आत्मवेदविदो न कृत्स्नकारितया मुक्ता°; ग. आत्मसंप्रपातकातर्यादीनां विशुद्ध;° घ. झ. ट. ठ. आत्मकृत्स्नकारितया मुक्ता°. ९ च. स्वमिति° म; ज. स्वमिति°. १० क. ख. मत्वा; घ. झ. ट. ठ. मत्या. ११ घ. झ. ट. कर्मोपभोगसंमामाप्य तत्संतानं°. १२ क. ख. घ. झ. ट. ठ. प्रवर्तमाने. १३ क. ख. घ. झ. ट. °सङ्गेनात्र संसू°; ग. ज. °सङ्गेनायं सूचि°. १४ क. ख. °ह्मणैः ॥ २ ॥ तत्र वि; घ. झ. ट. °ह्मणैस्तत्र वि°; च. °ह्मणे सूत्रवि°. १५ ग. च. ज. ठ. विस्तारे°. १६ क. ख. घ. झ. विधीयते; ट. विधीयते° निर्णी. १७ क. ख. ग. ज. ' उक्तं द्विविध.........निर्वक्तुमाह ' इति नास्ति; ठ. उक्तो.

भावविकाराः

त्वादभिन्न एवेत्यवगतः । इदानीं कार्यरूपस्यानेकविकृतरूपत्वाद्दुर्विज्ञेयत्वेन निर्वक्तुमाह । " षड् भावविकारा भवन्तीति " । भाव उक्तलक्षणो नित्यं विकृतिकारणम् । तैर्विकारैर्विशिष्टः षट्प्रकारोऽभिधीयत उपचारतो यतोऽयं विद्यमानतामेव भवनशब्देनाभिधत्ते । तेन यो विद्यमानमात्रभवनात्मकः स एव भिन्नोऽभिधीयते । अपि च लक्षणविदो विगृह्णन्ति भावशब्दं "भवतेः स्वपदार्थभवनं भावः" इति । " सन्मात्रं भावलिङ्गं स्यात् " इति च पठन्ति । तस्य विकारा भावविकाराः । भवन्तीति सामान्यादात्मनः प्रस्कन्दा इव सन्तः स्वेन स्वेन वैशेषिकेण भावविकारात्मलाभाय भवन्ति । इतिपरः प्रयुज्यमानः शब्दः शब्दपदार्थकः । क एवमाह "षड् भावविकारा" इति । उच्यते । " वार्ष्यायणिः " इति । तिकादिपाठात्फिञ् [पा० ४ । १ । १५४] । आचार्य इति वाक्यशेषः । निर्देशत उपलब्धानां षडित्येवधारणं सुखार्थम् । वक्ष्यामः " अतोऽन्ये भावविकारा एतेषामेव विकारा भवन्ति " [निरु० १ । ३] इति । आह । कतमे त इति । उच्यते । " जायतेऽस्ति विपरिणमते वर्धतेऽपक्षीयते विनश्यतीति " । आह । एतेषां

तेषां विशेषाः

जन्यादीनां भावविकारशब्दानां कः कस्यां विकारावस्थायामवस्थितं भावमाचष्टे कं वा विद्यमानमपि नाचष्टे कं वा न प्रतिषेधतीति । उच्यते । " जायत इति पूर्वभावस्यादिमाचष्टे नापरभावमाचष्टे न प्रतिषेधति " । जनिः पूर्वो भावः । तस्य पूर्वभावस्य । षण्णां भावविकाराणां यदि वान्यो यः पूर्वो भावविकारस्तस्य जायत इत्यनेन शब्देनादिमाचष्टे । आह । किमादिमेव । नेत्युच्यते । उक्तं "उपक्रमप्रभृत्यपवर्गपर्यन्तं" (निरु० १।१) इति । स एव पूर्वापरीभूतो भावस्तावदेवजायत इत्युच्यते यावन्निष्ठाशब्दवाच्यः संवृत्तो जात इति । नापर-

---

१ ग. ज. ' षड्भावविकारा भवन्तीति ' नास्ति. २ क. ख. ग. ज. ' भाव उक्त........भिन्नोऽभिधीयते ' इति नास्ति. ३ ठ. °रो विधी°. ४ च. एवं. ५ क. ख. स्वपदार्थे भव°; घ. झ. ट. स्वः पदार्थभव°; ग. ज. ठ. स्वः पदार्थो भव°. ६ च. भावोऽलिङ्गः स्यादिति°, ७ ग. ज. °वधारणार्थो. ८ च. ' कः ' नास्ति. ९ ग. ज. भ्रिविद्यमानमपि; च. भ्रियमाणमपि. १० ग. च. ज. इत्येष भावः पूर्व°. ११ ठ. आचष्टे इति जनिः°.

लक्षणशास्त्रे । यत्पुनरेतदुक्तं वर्णवदित्यनभ्युपगमादयुक्तम् । न ह्यभ्युपगतमस्माभिरेतदनर्थका वर्णा इति । सामान्या हि वर्णेष्वभिधानशक्तिरस्त्येव यथा [१]मृदवयवेषु सर्वमृन्मयभाण्डारम्भशक्तिः । सा तु पदत्वेन समुदितानामर्थविशेषेऽवतिष्ठते यथा मृदवयवानां घटे घटारम्भशक्तिरभिव्यज्यत एवम् । तत्र यदुक्तं वर्णवदनर्थका उपसर्गा नामाख्यातवियोगादित्येतदयुक्तम् । अपि च । [२]ननु वर्णैरनर्थकैरारभ्यमाणं पदमप्यनर्थकमेव स्यात् । न ह्यशुक्लैस्तन्तुभिरारभ्यमाणः पटः शुक्लो भवति । ततश्च पदैरनर्थकैरारभ्यमाणं वाक्यमनर्थकमेव स्यात् । वाक्यैश्चानर्थकैरारब्धं शास्त्रमप्यनर्थकमेव स्यात् । ततश्चाभ्युदयनिःश्रेयसार्थो योऽयमभ्युद्यमः स्वप्रत्ययेन विदुषामयमनर्थक एव स्यात् । अनिष्टं चैतत् । तस्मादर्थवन्तो वर्णा इत्येत[३]दुपपन्नम् । यत्पुनरेतदुक्तं प्रदीपवदनर्थका उपसर्गा इति । तदयुक्तम् । प्रदीपो हि स्वेनार्थेन प्रकाशात्मकेनार्थवानेव । सत्यपि चार्थवत्त्वे प्रकाश्यमर्थमाधारभूतं प्रत्याययन् स्वां प्रकाशनशक्तिमभिव्यनक्ति । एवमुपसर्गा अर्थवन्तोऽपि सन्तः स्वार्थाभिधानशक्तिमनेकप्रकारां विद्यमानामपि स्वार्थाभिधानशक्त्याधारभूते नामाख्याते प्रत्याय्याभिव्यञ्जयेयुः । तत्र यदुक्तं प्रदीपवदनर्थका उपसर्गा इत्येतदयुक्तम् । नामाख्यातयोरेवासावर्थ उपसर्गसंयोगे सत्युपजायत इति ब्रूमः । न हि लोके यो यत्र समर्थो भवति स तत्रान्यमपेक्षते । नामाख्याते चार्थविशेषं प्रत्युपसर्गसंयोगम[६]पेक्षेते । तस्मादुपपन्नमुपसर्गस्य क्रियाविशेषोऽर्थः क्रियासामान्यमात्रमाख्यातस्येति । तत्र यदुक्तमनर्थकाः पृथगवस्थिता उपसर्गा इत्येतदयुक्तम् । कुतः । "तद्य एषु पदार्थः प्राहुरिमे तम्" । तदेतदुपपन्नं भवति । य एषूपसर्गेषु स्वोऽनेकप्रकारोऽर्थ इति प्राहुरेव तमिमे उपसर्गाः पदविशेषाः पृथगपि सन्तः । कः पुनरसाविति । उच्यते । "नामाख्यातयोरर्थविकरणम्" । अर्थविक्रियामित्यर्थः । तस्मादर्थवन्त एवेति । उच्यतां तर्हि क एषां कस्मिन्नर्थविशेषे वर्तते । उच्यते । अयं तावत् ।

"आ इत्यर्वागर्थे" । तद्यथा । आ पर्वतादिति । अर्वागिति गम्यते । अनेकार्थत्वेऽपि सत्युपसर्गाणामेकैकोऽर्थ उदाहरणत्वेनोच्यतेऽर्थेव

१ क. ख. घ. झ. ट. ठ. मृदोऽवय°. २ क. ख. घ. झ. ट. ठ. 'ननु' नास्ति. ३ क. ख. घ. झ. ट. 'एतद्' नास्ति. ४ क. ख. घ. झ. ट. ठ. तत्रोच्यते. ५ क. ख. घ. झ. ट. ठ. अपि. ६ ग. ज. °मवेक्षेते. ७ च. °सर्गपद°. ८ क. ख. एवेति । ४ । उच्य°. ९ ग. °त.वत् ॥ ४ ॥ आ°.

स्वप्रकाशनार्थम् । " प्रपरेत्येतस्य प्रातिलोम्यम् । " प्रपरा इत्येतावुपसर्गावेतस्यैवाभेऽर्थस्य प्रातिलोम्यमाहतुः । प्रगतः परागतः । "अभीत्याभिमुख्यं" आह । अभिगतः । "प्रतीत्येतस्य" एवाभेः[1] "प्रातिलोम्यं" आह । प्रतिगत इति । " अतिसु इत्येतावभिपूजितार्थे "[2] वर्तेते । अतिधनः सुब्राह्मण इति । " निर्दुरित्येतयोः प्रातिलोम्यम् "[3] । निर्धनो दुर्ब्राह्मण इति । " न्यवेति विनिग्रहार्थीयौ "[4] । निगृह्णाति अवगृह्णातीति । " उदिति[5] " अयमेक एव द्वयोः " प्रातिलोम्यं " आह । उद्गृह्णातीति । "समित्येकीभावं[6] " अर्थमाह । संगृह्णातीति । " व्यपेत्येतस्य प्रातिलोम्यं " आहतुः । विगृह्णाति अपगृह्णातीति । " अन्विति सादृश्यापरभावं " आह । अनुरूपमस्येदमिति सादृश्यम् । अनुगच्छतीत्यपरभावः । " अपीति संसर्गं[7] " आह । सर्पिषोऽपि स्यात् । मधुनोऽपि स्यात् । " उपे[8]त्युपजनम्[9] " । उपजनमाधिक्यम् । उपजायते । " परीति सर्वतोभावं[10] " आह । परिधावतीति[11] । " अधीत्युपरिभावं " आह " ऐश्वर्यं वा " अधितिष्ठति[12] अधिपतिरिति ।

आह । नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्तीत्युक्तम् । अत्र नाम्नः कर्मोपसंयोगद्योतका भवन्तीत्येवं न गृह्यते[13] । " उपसर्गाः क्रियायोगे " (पा० १ । ४ । ५९) इति प्रसिद्धो[14] ह्युपसर्गाणां क्रियापदेन योगो न नाम्ना । उपसर्गा हि क्रियाङ्गत्वेनैव नामान्यास्कन्दन्तीति ॥ ३[15] ॥

इति[16] निरुक्तव्याख्यायां षष्ठस्याध्यायस्य[17] प्रथमः पादः[18] ।

---

१ ट. °स्यैवाभेः; ठ. 'एवाभेः' नास्ति. २ ठ. अतिसु इत्यभिपूजितार्थे इति अतिसु°. ३ ठ. °लोम्यमाह । निः°. ४ ठ. र्थीयाविति । नि°. ५ ठ. उदित्येतयोः प्रातिलोम्यं । उदि°. ६ ठ. °भावमिति अर्थ°. ७ ठ. °सर्गमिति आह°. ८ च. 'उपेत्युप०जायते' नास्ति. ९ ठ जनमिति उप°. १० ठ. भावमिति आह. ११ च. °धापयतीति. १२ घ. ट. अधितिष्ठपतिरिति. १३ च. गृह्यते. १४ घ. झ. ट. ठ. सिद्धो°. १५ ग. ५; घ. झ. ट. ठ. च. ज. '३' नास्ति. १६ क. ख. घ. झ. ट. इति जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ निरुक्त°. १७ ठ. षष्ठाध्यायस्य. १८ घ. झ. ट. पादः संपूर्णः; च. पादः समाप्तः.

अथ निपाता उच्चावचेष्वर्थेषु निपतन्त्यप्युपमार्थेऽपि कर्मोपसंग्रहार्थेऽपि पदपूरणास्तेषामेते चत्वार उपमार्थे भवन्तीवेति भाषायां चान्वध्यायं चाग्निरिवेन्द्र इवेति नेति प्रतिषेधार्थीयो भाषायामुभयमन्वध्यायं नेन्द्रं देवममंसतेति प्रतिषेधार्थीयः पुरस्तादुपाचारस्तस्य यत्प्रतिषेधति दुर्मदासो न सुरायामित्युपमार्थीय उपरिष्टादुपाचारस्तस्य येनोपमिमीते[1] चिदित्येषोऽनेककर्मा आचार्यश्चिदिदं ब्रूयादिति पूजायामाचार्यः [2]कस्मादाचार्य आचारं ग्राहयत्याचिनोत्यर्थानाचिनोति बुद्धिमिति वा दधिचिदित्युपमार्थे कुल्माषांश्चिदाहरेत्यवकुत्सिते कुल्माषाः कुलेषु सीदन्ति नु इत्येषोऽनेककर्मेदं नु करिष्यतीति हेत्वपदेशे कथं नु करिष्यतीत्यनुपृष्टे नन्वेतदकार्षीदिति चाथाप्युपमार्थे भवति[3] । वृक्षस्य नु ते पुरुहूत वयाः । वृक्षस्येव ते पुरुहूत शाखा वयाः शाखा वेतेर्वातायना भवन्ति शाखाः खशयाः शक्नोतेर्वाथ यस्यागमादर्थपृथक्त्वमह विज्ञायते न त्वौद्देशिकमिव विग्रहेण पृथक्त्वात्स कर्मोपसंग्रहश्चेति समुच्चयार्थ उभाभ्यां संप्रयुज्यते[4]ऽहं च त्वं च वृत्रहन्नित्येतस्मिन्नेवार्थे देवेभ्यश्च पितृभ्य एत्याकारो वेति विचारणार्थे हन्ताहं पृथिवीमिमां निदधानीह वेह वेत्यथापि समुच्चयार्थे भवति[5] ॥ ४ ॥

"अथ निपाताः" । उक्तमुपसर्गलक्षणं सामान्यं "नामाख्यातयोस्तु कर्मोपसंयोगद्योतका भवन्तीति" । विशेषलक्षणमपि "आ इत्यर्वागर्थे" इत्येवमादि । अल्पा इति कृत्वा च ते प्रत्येकं समाम्नाताः । अधुना सामान्यलक्षणानुषक्तं प्रतिज्ञाप्रसक्तमेव निपातलक्षणं वर्तयिष्यामः । तदधिकारार्थोऽयमथशब्दः । "[6]उच्चावचेषु" अनेकप्रकारेषु "अर्थेषु निपतन्ति" इति निपाताः । आह । कतमे पुनस्ते य एतेषामिति ।

---

१ क. ख. द. °मीते ॥ १ ॥ चिदि°; छ. त. °मीते ॥ ६ ॥ चिदि°. २ क. ख. छ. त. द. 'कस्मादाचार्यः' नास्ति. ३ क. ख. द. भवति ॥ २ ॥ वृक्ष;° छ. त. भवति ॥७॥ वृक्ष°. ४ छ. त. द. °ज्यते । अहं°. ५ क. ख. छ. त. द. भवति वायुर्वा त्वा मनुर्वा त्वेति ॥ ३ ॥ (छ. त. ८). ६ ट. उच्चावचेष्वर्थेषु निपतन्तीति । उच्चा°.

उच्यते[1] । " अप्युपमार्थेऽपि कर्मोपसंग्रहार्थेऽपि पदपूरणाः " । उपमैवार्थ उपमार्थस्तस्मिन्नुपमार्थे । उपमा नाम कस्मिंश्चिदेवार्थे यः प्रसिद्धो गुणस्तस्यान्यस्मिन्नप्रसिद्धत[2]द्गुणेऽर्थे शब्दमात्रेण यदुपसंयोज्य तद्गुणप्रकाशनं क्रियते सोपमा । कर्मोपसंग्रह एवार्थः कर्मोपसंग्रहार्थस्तस्मिन्कर्मोपसंग्रहार्थे । अर्थोपसंग्रहार्थे[3] । कर्मशब्दो हि प्रायेणार्थपर्यायवचन एतस्मिञ्शास्त्रे । गतिकर्माण उत्तरे धातवः । गत्यर्था इति गम्यते । पदमेव पूरयितव्यं येषामर्थस्ते पदपूरणाः । तदेतत्त्रैराश्यम[4]र्थभेदकृतं निपातानां समासेन ।

निपातानामर्थाः

आह । किमविशेषेण सर्व एतस्मिन्नर्थे निपतन्ति । नेत्युच्यते । तेषां सर्वेषां मध्य एत एव चत्वार इवनचिन्नवः प्रायोवृत्त्योपमार्थे भवन्ति । अधुनैवमुक्त्वा भाषाछन्दःप्रविभागेनोदाहरणे[5] एकैकं दर्शयति । समासविस्तराभ्यां हि शास्त्राणि प्रतीयन्ते । तत्रायं तावत् । " इवेति[6] भाषायां च " उपमार्थीयः " अन्वध्यायं " छन्दसि चेत्यर्थः । कश्चिच्छन्दस्येव भवति न भाषायां कश्चिद्भाषायामेव न छन्दसि कश्चिदुभयत्रेत्यतो विभागेन प्रदर्श्यते । आह । किमुदाहरणमिवेत्यस्योपमार्थीयत्वे का चोपमा[7]शब्दस्य व्युत्पत्तिरिति । उच्यते । उपगम्यानया गुणैर्मीयत इत्युपमा ।

इवेत्यस्योपमार्थीयत्वे उदाहरणम् ।

" अग्निरिव[8] मन्यो त्विषितः सहस्व सेनानीर्नः सहुरे हूत एधि । हत्वाय शत्रून्वि भजस्व वेद ओजो मिमानो वि मृधो नुदस्व " [ऋ० १० । ८४–२] । इत्येतदत्रोदाहरणम् । तपसः पुत्रो मन्युर्नाम तस्येयमार्षम्[9] ।

आह । ननु सर्व एवायमृग्यजुःसा[10]मात्मको ब्रह्मराशिरादित्यान्तरपुरुषस्य

---

१ झ. ट. ठ. उच्यंते; च. उच्यं (?) ते. २ ग. ज. °प्रसिद्धे. ३ ग. ज. °हार्थः । कर्म;° क. ख. घ. झ. ट. ठ. °हार्थ इत्यर्थः । कर्म.° ४ क. ख. घ. झ. त्रिधात्वमर्थ;° ट. त्रिधात्वं° त्रैराश्य. ५ क. ख. घ. झ. ट. ठ. °हरणमेकै°. ६ ठ. इवेतिभाषायां चान्वध्यायं चेति । इव । भाषा.° ७ घ. झ. ट. ठ. वोपमा. ८ ग. ज. अग्निरिव मन्यो त्विषितः सहस्वेति ऋक् एतद्°; घ. ट. अग्निरिव नुदस्वेत्येतद्°. ९ ठ. °तस्येदमार्षं°. १० घ झ. ट. ठ. °सामाथर्वात्मको; च. सामान्यात्मको.

'आर्ष' कथन-प्रयोजनं

भगवतो हिरण्यगर्भप्राणस्यार्षम् । ऐतरेयके रहस्यब्राह्मणे " शतर्चिनो माध्यमाः " इत्येवमादनुपरिक्रम्य पुनः पर्यायवृत्त्या[1] "एतमेव सन्तं शतर्चिन इत्याचक्षत एतमेव सन्तं गृत्समद इत्याचक्षते " [ऐ० आ० २।२।१] इत्येवमादिना क्रमेण मन्त्रदृक् शब्दान् प्राणे निगमयाति । अपि चैता ऋचः शौनकेन संदृष्टाः[2] । यस्यामार्षाणि चिन्त्यन्ते[3] सा च स्मृतिः । " श्रुतिस्मृत्योश्च विरोधे श्रुतिरेव गरीयसी " इति । न्यायविदः खल्वपि पठन्ति " विरोधे त्वनपेक्षं स्यात् [जै० सू० १।३।३] " इति । तस्माद्विशेषाभिधानमनर्थकमेवेति । उच्यते । न ह्यकस्मादात्मनः परिशयमात्रशेषः सञ्शौनकः कुर्यात् । " पश्यतो ह्युभावपि " । तेन क्षेत्रज्ञावुभावपि मन्त्राभिव्यक्तौ व्यापृतौ[4] । बुद्धिदेवतात्वेन हिरण्यगर्भः क्षेत्रज्ञो व्यवस्थितः सर्वभूतानां कर्मविपाकानुरूप्येण[5] समर्थं शब्दं वा दर्शयाति तमितरो[6] विशिष्टकर्मकारी क्षेत्रज्ञो बुद्धिस्थः पश्यति । तत्रैवं सति वसिष्ठादिर्मन्त्रदृक्[7] क्षेत्रज्ञस्तेनैवोपदर्शितं मन्त्रं पश्यतीत्युभयमुपपद्यते । एवं सत्युभावपि याथात्म्यतस्तावनुसंधेयौ[8] मन्त्रप्रयोगकाल उभयोरर्थवत्त्वाय[9] । यत्पुनरेतदुक्तं श्रुतिस्मृत्योर्विरोधे स्मृतिरनपेक्षेति[10][11] । न हि विरोधोऽस्त्युभयोरपि संधीयमानयोः । अपि च श्रुतिपूर्वकमेवेदं स्मरणं न स्वतन्त्रम् । ताण्डके हि रहस्यब्राह्मणं दर्शयति " येन साम्ना स्तोष्यन्स्यात्तत्सामोपधावेद्यस्यामृचि तामृचं यदार्षेयं[12] तमृषिं (छा० उ० १।३।८–९) इति । तत्र यदुक्तं स्मृतिरियमिति तदुक्तम्[13] । तस्माद्वक्तव्यमेव विशेषणमिति[14] ।

त्रिष्टुबेषा मान्यवी[15] श्येनादिषु निष्केवल्ये[16] शस्यते । मन्यु पुनरैन्द्र एव महाभाग्यात्[17]कर्मपृथक्त्वाच्च । अथवा देवतान्तरं पृथगभिधानस्तुत्यभिधानसंबन्धात्[18] ।

---

१ क. ख. च ठ. पर्यावृत्त्यै°. २ ग. ज. संदृष्टा; च. शौदृष्टाः; ठ. सादृष्टा°. ३ क. ख. घ. झ. विद्यन्ते, ट. विद्यन्ते° चिन्त्य. ४ ग. ज. व्यावृत्तौ. ५ ग. च. ज. ठ. °नुरूपेण. ६ क. ख. घ. झ. ट. ठ. तदितरो. ७ घ. झ. वासिष्टमन्त्र°; ठ. वसिष्ठमन्त्र ष्ठादि°. ८ क. ख. घ. झ. ट. ठ. °स्तावदनुसं°; ग. ज. °त्म्यतरथावनुसंध्येयो. ९ क. ख. ग. घ. ज. झ. ट. अर्थतत्त्वाय. १० क. ख. ठ. श्रुतिर°. ११ क. ख. घ. झ. ट. °नपेक्ष्येति; च. °नपेक्षेति° क्ष्ये. १२ क. ख. घ. झ. यदार्षे; ट. यदार्षेयं. १३ क. ख. घ. झ. ट. ठ. तदयुक्तम्. १४ क. ख. विशिष्यार्षमिति; घ. झ. ट. विशिशेषाप्यार्षमिति. १५ ग. च. ज. मान्यवे. १६ ग. °निष्केवल्येषु. १७ ग. घ. झ. ट. महाभाग्यात्. १८ ग. च. ज. °संबन्धत्वात्.

आह । ननु मान्यवो मन्त्रो माहेन्द्रग्रहयजिसंनिधौ[1] निष्केवल्ये शस्यमानो महेन्द्रमभिहितिसंस्कारेणासमर्थ एव वक्तुमथ किमर्थमयं निष्केवल्ये शस्यत इति । उच्यते । अन्यदेव हि स्तुत्यभिव्यङ्ग्यमपूर्वमाराद्दुपकाराङ्गभूतं माहेन्द्रग्रहयजिव्यङ्ग्यस्यापूर्वस्य । “ अपि[2] वा श्रुतिसंयोगात्प्रकरणे स्तौतिशंसती[3] क्रियोत्पत्तिं विदध्याताम् ” [जै० सू० २।१।२४] इति न्यायविदो याज्ञिकाः पठन्ति । वक्ष्यति चायमपि[4] “ इतीमा देवता अनुक्रान्ताः सूक्तभाजो हविर्भाज ऋग्भाजश्च भूयिष्ठाः ” [निरु० ७।१३] इति । स एव मन्युः स्तुतिभागेव । यथा “ अभित्वा शूर ” [ऋ० सं० ७ । २ । २२] इतीन्द्र एव तस्मिन्निष्केवल्ये यथा चैं “ आपो हि ष्ठा ” [ऋ० सं० १०–९–१] इत्याप आग्निमारुते सूर्योदय आश्विन एवम् ।

[5]हे मन्यो सहुरे सहनशील एतस्मिन् शत्रूणामभिभवनकाले प्रत्युपस्थित आहूतः सन्नस्माभिः सेनानीः सेनाप्रणेता नो[6]ऽस्माकमेधि भव । ततश्चाग्निरिव त्विषितो दीप्तस्त्वं तेजसा भूत्वा सहस्व अभिभव तानस्मच्छत्रून् । हत्वाय हत्वैव यदेतेषामस्मच्छत्रूणां स्वं[7] वेदो धनं तत् त्वमादाय तेषामस्मद्योधानामोजो बलं मिमानो निर्माय यथावस्तु यथार्हं विभजस्व । येऽपि[8] च केचिद्धतावशिष्टा[9] मृधो मृधकारिणोऽस्मद्विषोऽस्मत्तः प्रत्याजिहीर्षन्त्येतद्धनं तानपि विनुदस्व प्रेरयस्व[10] दूरमपुनरागमनाय । अथवा ओज इत्यस्योत्तरेण विनुदस्वेत्यनेन क्रियापदेन योगः[11] । कथम् । हत्वा शत्रूनभाजयित्वा च तद्धनं ये केचिद्धतावशिष्टा अस्मद्विषः[12] प्रत्याजिहीर्षन्त्येतद्धनमस्मत्तस्तेषामोजो मिमानः तुलयित्वा कियदवशिष्टबला ह्येते न शक्ताः प्रत्याहर्तुमित्येवं मिमानस्तावन्मात्रशेषबलान्कृत्वा त्वं विनुदस्वैनान्दूरमपुनरागमनाय ।

द्वितीयमुदाहरणमेतस्यैव । “ इहैवैधि[13] मापं च्योष्ठाः[14] पर्वत इवाविचा-

• १ ग. ज. माहेन्द्राः ग्रह. २ च. अपि च श्रु°. ३ ग. ज. स्तौति शंसतीति. ४ क. ख. घ. झ. ट. ठ. ‘ च ’ नास्ति. ५ ठ. अग्निरिवेति मन्त्रः पुनरत्र पठ्यते. ६ च. ‘ नः ’ नास्ति. ७ क. ख. घ. झ. ट. ठ. ‘स्वं’ नास्ति. ८ च. ट. यद्यपि. ९ ट. ‘द्धननावशिष्टा°. १० ग. ज. ‘ प्रेरयस्व’ नास्ति. ११ घ. झ. ट. ठ. संबन्धः. १२ घ. झ. ट. ड. द्विषंतः १३ घ. झ. ट. °वैधि° धारय; ग. ज. °वैधि मार च्यो (ज. चो) ष्ठाः० धारय.

इवेत्यस्य तस्मिन्नेवार्थे द्वितीयमुदाहरणं

चलिः । इन्द्रं इवेह ध्रुवस्तिष्ठेह राष्ट्रमु धारय [ऋ० सं० १०।१७३।२] अनया चानुष्टभा ध्रुव आङ्गिरसो राजानमभिषिषेच । इहैव राष्ट्रे त्वमेधि भव । मा चातस्त्वं अपच्योष्ठाः । पर्वत इवाविचलनशील । इन्द्र इव च इह ध्रुवः शाश्वतस्तिष्ठ । स्थित्वेदं राष्ट्रमिहैव विभूतियोगेऽवस्थितं धारयेत्याशीः ।

भाषायां प्रसिद्धमेवेति कृत्वा नोदाहरणं पठंति । अर्थनेत एव । अग्निरिव तीक्ष्ण इन्द्र एव विक्रान्तः ।

"नेति प्रतिषेधार्थीयो भाषायां" प्रसिद्धः । "उभयमन्वध्यायम्" । "नेन्द्रं देवममंसत" [ऋ० सं० १० । ८६ । १]। नेन्द्रं देवमात्मनो दीपयितारममन्यन्तादित्यरश्मयः । दैवते शेषः [निरु० १३ । ४]। किं पुनर्लक्षणमिति । उच्यते । "उपमार्थीय उपरिष्टादुपाचारस्तस्य येन" अर्थेनोपमेयमर्थं "उपमिमीते" । तद्यथा । "हृत्सु पीतासो युध्यन्ते दुर्मदासो न सुरायाम् । ऊधर्न नग्ना जरन्ते [ऋ० सं० ८ । २ । १२]। काण्वो

नेत्यस्योपमार्थीयत्वे उदाहरणं

मेधातिथिराङ्गिरसश्च प्रियमेध ऐन्द्रं सूक्तं ददृशाते । तत्रैषा गायत्री । येषामपि विनियोगः कश्चिदन्यत्र नास्ति तेऽपि वाचस्तोमे विनियुज्यन्ते । [12]हृत्सु पीतासः पीताः सन्तो हृदयेष्ववस्थिताः सोमाः युध्यन्त इव संप्रहारमिव कुर्वन्त्यहं विशिष्ट इत्येवं स्पर्धमानाः । क इव । दुर्मदासो न । दुर्मदासः "आज्जसेरसुक्" [पा० ७।१।५०] । यथा कुत्सितमदाः केचित्पुरुषाः सुरायां पीतायां सत्यां युध्येरन्नेवम् । किंच तमेव यजमानं जरन्ते स्तुवन्तीवात्मलाभपरितुष्टाः । कथं जरन्ते । ऊधर्न ऊधरिव रात्रिमिव नग्ना भूत्वा स्त्रियं संप्रयोक्ष्यामह इत्येवमभिप्राया इव केचिद्विशिष्टाः पुरुषाः ।

---

१ घ. ट. मां. २ ज. चोष्ठाः. ३ ठ. 'च' नास्ति. ४ क. ख. घ. झ. ट. स्थित्वा चेदं. ५ क. ख. घ. झ. ट. पठितम्; ग. ज. पठंति. ६ झ. प्रसिद्धः इति शेषः। उभ.° ७ क. ख. 'उच्यते' इत्यस्य पश्चात् 'प्रतिषेधार्थीयः पुरस्तादुपचारस्तस्य यत्प्रतिषेधति । दुर्मदासो न सुरायाम्' इति वर्तते; झ. इदं सर्वं 'देवममंसत' इत्यस्य पश्चाद्वर्तते. ८ घ. ट. ठ. °दुपचारः°. ९ घ. झ. ठ. हृत्सु पी०जरंते; ग. ज. हृत्सु पीतासो युध्यंते०जरंते. १० च. ठ. गायत्री । हृत्सु पीतासः । येषां°. ११ ग. ज. वाचास्तोमे. १२ च. ठ. 'हृत्सु पीतासः' नास्ति. १३ क. ख. पुरुषाः ॥ १ ॥ चिदि°; ग. पुरुषाः ॥ ६॥ चिदि°.

चिदित्येषोऽनेकार्थोऽपि सन्नुपमार्थीयसंयोगेनोदाहृतः[1] । कथमयमनेकार्थ इति । उच्यते । " आचार्यश्चिदिदं ब्रूयादिति पूजायाम् " । आचार्य एवं ब्रूयात्कोऽन्य एवं वक्ष्यतीति । " दधि चिदित्युपमार्थे " । दधिरूप ओदन इति । " कुल्माषांश्चिदाहरेत्यवकुत्सिते "[2] । भृशं[3] कुत्सिते । कुल्माषानपि तावदाहरेति किं चान्यदाहरिष्यसि[4][5] । " नु इत्येषोऽनेककर्मा " । कथम् । " इदं नु करिष्यतीति " । कथं हि क्रियाया हेतुनिमित्तमित्यर्थः । कथं नु[6] करिष्यतीति पृष्ट्वा करिष्यतीत्युक्ते यत्पुनरनुपृच्छति कथं नु करिष्यति तदनुज्ञानमेतस्मिन्ननुपृष्टे[7] । " नन्वेतदकार्षीदिति[8] च " । अनुपृष्ट एवायं भवतीति । नन्वयमकार्षीदेतत्कथमयं ब्रवीति कथं करिष्यतीति ।

'चित्' 'नु' 'ननु' इत्येतेषामर्थाः

" अथाप्ययमुपमार्थे भवति[9]" । तद्यथा[10] । " अक्षो न चक्र्योः शूर बृहन्[11]प्र ते मह्ना रिरिचे रोदस्योः। वृक्षस्य नु ते पुरुहूत वया व्यू३ तयो रुरुहुरिन्द्र पूर्वीः" [ऋ० सं० ६ । २४ । ३] ॥ भरद्वाजो बार्हस्पत्योऽस्यास्त्रिष्टुभः[12] पूर्वेणार्धर्चेनेन्द्रं स्तुत्वोत्तरेणोपालब्धवान् । हे शूर इन्द्र पुरुहूत महानक्ष इव चक्रयोः प्ररिरिचे प्रकर्षेणातिरिच्यते तव मह्ना महत्त्वेन विभूतिः । कुतोऽतिरिच्यते । रोदस्योः द्यावापृथिव्योः । तथापि चैवं विभूतियुक्तस्य सतस्तव त्वद्भक्तानामेवास्माकं सतां वृक्षस्येव वयाः शाखाः पूर्वीरूतयः पूर्वेऽस्मद्यज्ञागमनमार्गा विरुरुहुः खिलीभूतास्तवानागमनात्[13] । अहो कष्टं[14] मन्दभागधेयतास्माकं येषां नो धनं तदस्ति येन त्वां यजेमहि । किमत्र त्वां वक्ष्याम[15] इति । "वयाः शाखाः" इति पर्यायवचनः । "वेतेर्वयाः" इति निगमप्रसक्तस्य निर्वचनम् । "शाखाः खशयाः[16]" इति पर्यायप्रसक्तस्य । व्याख्याता उपमार्थीयाः ।

'नु' इत्येतस्योपमार्थीयत्वे उदाहरणम्

---

१ क. ख. घ. झ. ट. ठ. °संयोगादत्रोदाहृतः, ग. ज. °मार्थयसंगेनो°. २ च. कुल्मासान्°. ३ झ. °कुत्सिते कुलेषु सीदन्तीति भृशं°. ४ क. ख. घ. झ. ट. ठ. किं वान्य°. ५ च. °रिष्यति. ६ ठ. 'नु' नास्ति°. ७ घ झ. ट. तदनुज्ञातमे°. ८ ग. च. ज. झ. ट. कटं; घ. कठं. ९ ग. भवति ॥ ७ ॥ अक्ष्यो°. १० घ. झ. ट. तद्यथा । अक्षो न० पूर्वीः. ११ ग. बृहन्० पूर्वीः° ॥ ४ ॥; ज. बृहन्० पूर्वीः°. १२ ग. ज. बार्हस्पत्यो पारिक्षितोऽस्याः°; च. भरद्वाजः स्याः°. १३ क. ख. तवात्रागम°; झ. तवागम°. १४ ज. कथं. १५ ठ. यक्ष्याम°. १६ च. शिखया.

अथानन्तरं प्रतिज्ञाप्रसक्तानेव कर्मोपसंग्रहार्थान्वक्ष्यामः । “ अथ

कर्मोपसंग्रहार्थाः

यस्यागमादर्थपृथक्त्वमहे विज्ञायते न त्वौद्देशिकमिव विग्रहेण पृथक्त्वात्स कर्मोपसंग्रहः” । यस्यागमादध्याहारादश्रूयमाणस्यैव निपातस्य सरूपविरूपैकशेषादर्थतो वा पृथक्त्वमह पृथग्भाव एव विज्ञायते । तद्यथा देवदत्तयज्ञदत्तौ देवदत्तश्च यज्ञदत्तश्चेति । आह । द्वावप्यत्र देवदत्तयज्ञदत्तौ श्रूयेते । न तु तयोरौद्देशिकमिव पृथक्त्वमिति यथा गा अश्वान्पुरुषान्पशूनिति प्रत्येकमुद्दिश्यमानानाम् । इह तु विग्रहेण चशब्दागमादेतत्पृथक्त्वमुपजायते । तेन विग्रहणं द्वयोर्बहूनामर्थानां वेति विग्रहः । स एव पृथक्त्वाद्धेतोः पृथक्त्वेन निमित्तेनोपलक्ष्यमाणो यस्माद्द्वावर्थौ बहून्वा गृहीत्वैकस्मिन्कर्मण्युपसमावेष्टयति । तद्यथा । देवदत्तयज्ञदत्तौ पचेते इत्येवम् । तस्मात्कर्मोपसंग्रह इत्येतन्नामैव तद्भवति । अथवा बृहस्पतिश्चेत्युक्ते प्रजापतिरनुक्तोऽपि द्वितीयो गम्यते प्रजापतिश्चेति । कतमः पुनरसाविति । उच्यते । “ चेति ” ।

कदाचिस्त्वयमेव ‘ समुच्चयार्थ उभाभ्यां ’ अप्यर्थाभ्यां विगृहीताभ्यामेव संयुक्तः ‘ प्रयुज्यते ’ । यथाहं च त्वं च । “ अहं

‘च’ इत्यस्य समुच्चयार्थे उदाहरणं

च त्वं च वृत्रहन्सं युज्याव सनिभ्य आ । अरातीवा चिदद्रिवोऽनु नौ शूर मंसते भद्रा इन्द्रस्य रातयः ” [ऋ० सं० ८ । ६२ । ११] ॥

घोरपुत्रः प्रगाथोऽनयैन्द्र्येन्द्रस्य सख्यार्थी सन्नब्रवीत् । हे वृत्रहन्निन्द्र अहं च प्रगाथस्त्वं च संयुज्याव । एकस्मिन्नर्थे सति प्राप्तिलक्षणे युज्यावहै ।

---

१ च. °पृथक्त्वतो वा मह°. २ ग. ज. °शेषाद्र्थपृथक्त्वमह°; घ. ट. °शेषादर्थत्त्कमह°; ठ. °शेषादर्थपृथग्भाव°. ३ च. पृथक्त्वभावः ४ क. ख. नानाग्रह°; ग. ज. तेनाग्रह°; घ झ. ट. तेन ग्रह°; ठ. नात्वेन ग्रह°. ५ क. ख. ग. ज. घ. झ. ट. ठ. ‘वेति’ नास्ति; च. विति. ६ क. ख. घ. झ. ठ. एष; ट. एवं पृ° च. ७ च. कस्मात्. ८ घ. झ. ट. ठ. इत्येवंनाम°. ९ क. ख घ. झ. ट. ठ. ‘तु’ नास्ति°. १० घ. झ. ठ. संप्रयुक्तः; ट. संप्रयुक्तः° स. ११ घ. झ. ट. °त्वं च वृत्रहन्निति. १२ ग. च. ज. °च० रातयः; घ. झ. ट. °च वृत्रहन्० रातयः°. १३ क. ख. घ. झ. ट. ठ. °यैन्द्या पङ्क्त्या इन्द्रस्य°.

आ सनिम्य आप्रातेः[1]। 'अरातीवा' इत्येकं पदम् । अथैवमावां संयुक्तौ दृष्ट्वा हे अद्रिवः[2]' । अदानशीलोऽपि दानशीलतामुपेत्यानुमंस्यत एवावयोर्दानं भद्रा भन्दनीया इन्द्रस्य रातयो दानानीत्येवं मन्यमानः । को हि नाम त्वत्संयुक्तानामस्माकं न दद्यादित्यभिप्रायः ।

अथाप्या[3]कार "एतस्मिन्[4]" समुच्चयार्थे । "देवेभ्यश्च पितृभ्य एति"

आ इत्यस्य समुच्चयार्थे उदाहरणम्

अयमेतस्मिन्मन्त्र 'आकारः' । "यो अग्निः[5] क्रव्यवाहनः पितॄन्यक्षदृतावृधः । प्रेदु हव्यानि वोचति देवेभ्यश्च पितृभ्य आ" [ऋ० सं० १० । १६ । ११] अनुष्टुब् यामी पितृयज्ञे विनियुक्ता । योऽग्निः कव्यस्य वोढा[6] यस्याय मधिकारः कव्यानि वोढव्यानीति स इहास्माकं पितृयज्ञे होतृत्वेन व्यवस्थितः[7] पितॄनाहूय यक्षत्पूजयत्वित्यर्थः । किंलक्षणान् । ऋतावृधः सत्यवृधो वा यज्ञवृधो वा । किं च । प्रेदु हव्यानि वोचति वोचतु वा[8] प्रब्रवीत्वेतानि हवींष्यस्मत्प्रत्तानि । कस्मै । देवेभ्यश्च पितृभ्यश्चेति ।

'वेति' अयं 'विचारणार्थे' । समुच्चयार्थीयप्रसङ्गेनोदाह्रियते ।

वा इत्यस्य विचारणार्थे

"हन्ताहं पृथिवीमिमां नि दधानीह वेह वा । कुवित्सोमस्यापामिति[9]" [ऋ० सं० १० । ११९ । ९] ॥ ऐन्द्रो लवस्[10]तस्यैन्द्रमार्षं[11] गायत्री । हन्तेदानीमेवाहमिमां पृथिवीमिह वान्तरिक्षलोक इह वा द्युलोकेऽथवेह दक्षिणे स्कन्ध इह वा सव्ये निदधान्यवस्थापयाम्यतः स्थानादुद्धृत्य । अथ किमर्थं ब्रूषे । कुवित्सोमस्य बह्वहं सोमं[12] पीतवानिति । अस्य मे सोमपानस्यानुरूपमेव वीर्यमप्य[13]स्तीत्यभिप्रायः ।

---

१ ग. च. ज. आ सनि प्रातेः. २ घ. ट. °द्रिवः । आद्रिर्वज्रः । अरातीवा चित् अदान°; झ. °द्रिवः अरातीवा चित् । अदान°; ठ. °द्रिवः आद्रिर्वज्रः तद्वान् हे शूर विक्रांत अरातीवा चित् अदान°. ३ घ. ट. ठ. अथाकार°. ४ क. ख. घ. झ. ट. अस्मिन्. ५ घ. झ. ट. °अग्निः०पितृभ्य आ; ग. च. ज. °अग्निः क्रव्यवाहनः०पितृभ्य आ. ६ ग. च. ज. कव्यवोढा°. ७ क. ख. घ. झ. ट. ठ. °त्वेन स्थितः°. ८ क. ख. घ. झ. ट. °चतु च प्रब्र;° ठ. चतु च ब्रवी°. ९ ग. ज. हन्ताहं पृथिवीमिमां०मिति; घ. झ. ट. हन्ताहं०पामिति. १० ग. लवः:° ल; ज. तवः; च. लवः; ठ. बलः. ११ ठ. तस्येद्रमार्षं. १२ ग. सोमस्य पी°. १३ क. ख. घ. झ. ट. 'अपि' नास्ति.

‘ अथापि ’ वेत्ययं ‘ समुच्चयार्थे ’ भवति ’ ॥ ४ ॥

वायुर्वा त्वा मनुर्वा त्वेति अह इति च ह इति च विनिग्रहार्थीयौ पूर्वेण संप्रयुज्येते अयमहेदं करोत्वयमिदमिदं ह करिष्यतीदं नँ करिष्यतीत्यथाप्युकार एतस्मिन्नेवार्थ उत्तरेण मृषेमे वदन्ति सत्यमु ते वदन्तीत्यथापि पदपूरण इदमु तदु हीत्येषोऽनेककर्मेदं हि करिष्यतीति हेत्वपदेशे कथं हि करिष्यतीत्यनुपृष्टे कथं हि व्याकरिष्यतीत्यसूयायां किलेति विद्याप्रकर्ष एवं किलेत्यथापि न ननु इत्येताभ्यां संप्रयुज्यतेऽनुपृष्टे न किलैवं ननु किलैवं मेति प्रतिषेधे मा कार्षीर्मा हार्षीरिति च खल्विति च खलु कृत्वा खलु कृतमथापि पदपूरण एवं खलु तद्बभूवेति शश्वदिति विचिकित्सार्थीयो भाषायां शश्वदेवमित्यनुपृष्ट एवं शश्वदित्यस्वयंपृष्टे नूनमिति विचिकित्सार्थीयो भाषायामुभयमन्वध्यायं विचिकित्सार्थीयश्च पदपूरणश्चागस्त्य इन्द्राय हविर्निरुप्य मरुद्भ्यः संप्रदित्सांचकार स इन्द्र एत्य परिदेवयांचक्रे ॥ ५ ॥

“ वायुर्वा त्वा मनुर्वा त्वेति ” । “ वायुर्वा त्वा मनुर्वा त्वा गन्धर्वाः सप्तविंशतिः । ते अग्रे अश्वमायुञ्जन्ते ऽस्मिञ्जवमा दधुः ” [तै० सं० १ । ७ । ७ । काठक सं० १३ । १४ । मैत्रा० सं० १ । ११ । १] ॥ अनुष्टुबेषा । वाजपेयेऽश्वयोजने विनियुक्ता । हे अश्व वायुश्च त्वा मनुश्च त्वा गन्धर्वा एते सप्तविंशतिर्युञ्जन्ति त्वामस्मिन्नर्थे । ते हि विदुर्यथा त्वं योक्तव्यः । त एव च पूर्वमप्यश्वं युक्तवन्तो देवानामृषीणां च । त एव च तस्मिञ्जवमादधुराहितवन्तो यस्मादतो ब्रवीमि ममापि चाग्रे तमश्वं त एव युञ्जन्तु जवं चास्मिन्नादधत्विति ।

तस्यैव समुच्चयार्थे

१ नैकस्मिन्नपि पुस्तकेऽङ्को विद्यते; ढ. भवति इति निरुक्के चतुर्थः खंडः । वायु°. २ग. च, ज. ऋक् न पठ्यते. ३ घ. अम्बमयु°; ट. अम्बमयु° मा. ४ घ. °युञ्जंस्तेऽस्मि°; ट. ° युञ्जस्तेऽस्मि° स्ते अं. ५ ग. च. ज. वायै. ६ क. ख. °त्विति ॥ ३ ॥ अह°; ग. त्विति ॥ ८ ॥ अह°. ७ छ. त. द. नु. ८ क. ख. ॥ ४ ॥ इति प्रथमाध्यायस्य द्वितीयः पादः;॥ ९ ॥ छ. इति प्रथमस्य द्वितीयः पादः ॥ न ननू°; त. ॥ ९ ॥ न ननू°; द. ॥ ४ ॥ न नून°.

'अह इति च ह इति च' द्वावप्येतौ 'विनिग्रहार्थीयौ'। तयोः

अह ह च विनिग्रहार्थे

पुनरेतयोरेतत्प्रयोगस्वाभाव्यम्। द्वयोरर्थयोरेककाले प्रकृतयोः पूर्ववाक्यगतेनार्थेन संयुक्तौ 'प्रयुज्येते'। तद्यथा 'अयमहेदं करोत्वयमिदम्'। अयमह यज्ञदत्तो गाः पाययत्वयं देवदत्तो भुङ्क्तामिति। हकारस्योदाहरणम्। 'इदं ह करिष्यति' यज्ञदत्त इदं न करिष्यति। ओदनं न पक्ष्यतीति। 'अथाप्युकार एतस्मिन्नेव' विनिग्रहार्थे भवति। स

तस्मिन्नेवार्थे उकारः

पुनरुत्तरेण द्वितीयवाक्यगतेनार्थेन संयुक्तः प्रयुज्यते। तद्यथा। 'मृषेमे' वृषला 'वदन्ति' 'सत्यमु ते' ब्राह्मणा 'वदन्तीति'। विनिग्रहो नाम विभागेनावस्थितयोर्यज्ञदत्तदेवदत्तयोरेकस्मिन्यज्ञदत्तेऽभिमतरसगोपायनस्य नियमेन ग्रहणं यत्स विनिग्रहः। तदर्थो विनिग्रहार्थः। विनिग्रहार्थ एव विनिग्रहार्थीयः। 'अथापि' अयमुकारः 'पदपूरणो' भवति। "इदमु त्यत्पुरुतमं पुरस्ताज्ज्योतिस्तमसो वयुनावदस्थात्। नूनं दिवो दुहितरो विभातीर्गातुं कृणवन्नुषसो जनाय" [ऋ० सं० ४। ५१। १]॥

तस्यैव पदपूरणार्थे उदाहरणम्

वामदेवो गौतमोऽनया त्रिष्टुभोषसं तुष्टाव। प्रातरनुवाकाश्विनयोः शस्यते। इदं तज्ज्योतिर्यज्जनाः कथयन्ति। उकारः पदपूरणः। एतत्पुरुतमं बहुतमम्। कुतः पुरुतमम्। तमसः। यदभिभूय शार्वरं तमः स्वमात्मानमभिव्यनक्त्यत एव तद्बहुतमम्। पुरस्तात्प्राच्यां दिशि ज्योतिर्वयुनवत्प्रज्ञानवदुत्तिष्ठति। नूनं निश्चयेनैता उषसो दिवो दुहितरः। रूपसामान्याद्दुहितृत्वम्। विभातीर्विभासमाना गातुं गमनमपि कृतार्थं जनानां कृण्वं कुर्वत्य आगच्छन्ति यथेयमनुरज्यते प्राची दिग्विध्वंसते च तमः। एकस्या एव पूजनार्थे बहुवचनम्।

---

१ ग. ज. 'ह' नास्ति°. २ घ. झ. ट करिष्यतीति। इदं न करिष्यति। यज्ञदत्त इदं ह करिष्याति। ओदनं°. ३ ग. ज. नु. ४ क. ख. घ. झ. ट. ठ. एतस्मिन्नेवार्थ उत्तरेण। विनि°. ५ च. °गोः पाय°. ६ क. ख. घ. झ. ट. ठ. 'अयं' नास्ति°. ७ ग. ज. त्यत्पुरुत्तमं०जनाय; घ. झ. ट. त्यत्०जनाय. ८ घ. झ. ट. तमा. ९ च. °ज्ञानवत्पुरस्तादुत्ति°. १० क. ख. घ. ट. कृणवत्; ठ. कृण्वन्. ११ क. ख. विध्वंस्यते; घ. झ. ट. विध्वंसस्यते; ठ. विध्वस्यते. १२ च. एकःयां.

"तदु [1]प्रयक्षतममस्य कर्म दस्मस्य चारुतममस्ति दंसः । उपह्वरे यदुपरा अपिन्वन्मध्वर्णसो नद्य १ श्चतस्रः" [ऋ० सं० १ । ६२ । ६] ॥

तस्यैव द्वितीयमुदाहरणम्

द्वितीयमुदाहरणमस्यैव । गौत[2]मोऽनया त्रिष्टुभेन्द्रमस्तौत् । [3]प्रवर्ग्ये विनियुक्ता । तत्प्रकर्षेण यक्षतमं पूज्यतमम् । उ इति [4]पदपूरण एव । अस्येन्द्रस्य दस्मस्य दासयितुर्दर्शनीयस्य वा चारुतमं शोभनतमम् । अन्यदपि तस्यास्ति दंसः कर्म किमपि बहुप्रकारम् । तच्चा[5]प्येवं पूज्यमेव च[6] । इदमेव तस्य चारुतमं च पूज्यतमं च । [7]यत्किम् । उपह्वरे यदुपरा अपिन्वत् । उपह्वानमर्हन्ति यस्मिन्देशेऽवस्थिताः सहायाः स उपह्वरो देशः । जनैरनाकीर्णे[8] यस्मिन्नेकाकी यदुपरा[9] मेघपूरिताः मधूदकाश्चितस्रः नद्योऽपिन्व[10]दप आनयदक्षा[11]रयत्[12] । यज्ञादिवर्षद्वारेण [13]प्रवर्तत इत्यत एतदेवास्य चारुतमं पूज्यतमं चेत्यभिप्रायः ।

'हि' इत्यस्यार्थाः

'हीत्येषोऽनेककर्मा' । तद्यथा । 'इदं हि करिष्यतीति हेत्वपदेशे । कथं हि करिष्यतीत्यनुपृष्टे । कथं हि व्याकरिष्यतीत्यसूयायाम्' । कथमयं व्याकरिष्यतीत्यकृ[14]तप्रयत्नोऽयमित्यभिप्रायः । अमर्षादसाक्षाच्छब्दपूर्वकोऽभिप्रायः परि[15]वादोऽसूयेत्युच्यते । परगुणानभ्यनुज्ञेत्यर्थः ।

किल इत्यस्य

'किलेति विद्याप्रकर्षे' । विज्ञानातिशय इत्यर्थः । अन्यत उपश्रुत्यातिशयेनावधार्यान्यस्मा आचष्टे कश्चित् 'एवं किल [16]तदासीद्युद्धमिति ।

१ ग. ज. प्रयक्षतममस्य कर्म०श्चतस्रः°; घ. झ. ट. प्रत्यक्ष०श्चतस्रः २ क. ख. °मो नोधाश्चानया; ग. ज. °मो नोधानया; घ. ट. ठ. °मो नोधा अनया. ३ च. प्रवर्गे. ४ च. पादपू°. ५ घ. ट. स्त्रार्वेव; च. चार्विव; ठ. चारु पूज्य°. ६ क. ख. ग. ज. घ. झ. ट. ठ. 'च' नास्ति. ७ क. ख. ठ. तत्किम्. ८ क. ख. °रनाकीर्णो; ग. ज. जनैराकीर्णे; घ. ट. जनैरनाकिर्णे; ठ. °कीर्णे नस्ति°. ९ च. यदुपुरानेकपुरः मेघ°. १० घ. झ. ट. °दकाश्च यत°. ११ क. ख. ठ. °दपातयत् अक्षा°. १२ ग. ज. 'अक्षारयत्' नास्ति; च. अक्षारयत्. १३ ग. ज. घ. ट. प्रवर्तयते; ठ. प्रावर्तयत्. १४ च. कृतयत्नो°. १५ च. °प्रायः ६ यतः परि°. १६ क. ख. ग. ज. घ. झ. ट. किलैतदा°.

'अथापि न ननु इत्येताभ्यां' संयुक्तः किलेत्ययं 'प्रयुज्यतेऽनुपृष्टे' अर्थे । अन्यत उपश्रुत्य कंचिदर्थं नायमेवमिति ततस्तमेवार्थमन्यमनुपृच्छ[1]त्यथेतरमश्रद्दधत्पूर्वस्य 'न किलैवं' इति 'ननु किलैवं' इति । 'मेति'

मा खलु इत्येतयोः

अयं 'प्रतिषेधे' । तद्यथा । 'मा कार्षीर्मा हार्षीरिति च' । [2]अयं प्रतिषेधार्थीय एव । 'खल्विति च' । तद्यथा । एवं 'खलु कृत्वा' । [3]अकृत्वेत्यर्थः । देशभाषाव्यवस्थयैवंजातीयानामुपेक्षितव्यः क्वचित्प्रयोगः । 'अथापि' खल्वित्ययं 'पदपूरणो' भवति । तद्यथा । 'एवं खलु तद्बभूवेति' । अन्वीक्ष्यः प्रयोगः क्वचित्पादवृत्तेषु । 'शश्वदिति विचिकित्सार्थीयो भाषा-

शश्वदित्यस्य

याम्' । छन्दसि पुनरन्येष्वप्यर्थेषु भवति । यथासंभवं द्रष्टव्यः । इयं चास्य [4]शैली । अर्थ[5]मपेक्ष्य 'एवं' शब्दस्य पुरस्तात्प्रयोगो वा भवत्युपरिष्टाद्वा । तद्यथा । 'शश्वदेवमित्यनुपृष्ट एवं शश्वदित्यस्वयंपृष्टे' । अर्थे इति वाक्यशेषः ।

नूनं इत्यस्य

'नूनमिति विचिकित्सार्थीयो भाषायाम्' । विचिकित्सा नाम विवेकपूर्वकोऽवधारणाभिप्रायः । तत्रायं भाषायां भवति । '[6]अन्वध्यायं' पुनरयमर्थद्वये [7]भवति । 'विचिकित्सार्थीयश्च पदपूरणश्च' ।

उदाहरणमत्र निर्विवक्षुर्निदानमेवाह । 'अगस्त्य इन्द्राय' इत्यादि ।

न नूनमिति मन्त्रस्य निदानम्

निदानवतां मन्त्राणां निदानमेव पूर्वं [8]वक्तव्यम् । तेन ह्यतितरामर्थ उच्यमानः प्रकाशते । ततः पदानि । ततोऽर्थः । ततः प्रत्येकं विग्रहेण [9]शब्दनिर्वचनम् । एष हि व्याख्याक्रमः । अगः [10]कुम्भः । तत्र स्त्यानः संहत इत्यगस्त्यः । स 'इन्द्रार्थं हविर्निरुप्य मरुद्भ्यः संप्रदित्सांचकार' ।

---

१ च. °च्छत्यर्थान्तरमश्र°. २ च. खल्विति चायं प्रतिषेधार्थीय एव । तद्यथा°; ट. अयं प्रतिषेधार्थीय एव । खल्विति च. ३ घ. ट. अकृत्वा । अकृत्वेत्यर्थः; झ. अकृत्वेत्यर्थः । खलु कृतं न कृतमित्यर्थः । देश°. ४ क. ख. ठ. शैली. ५ घ. झ. ठ. °मवेक्ष्य; ट. °मवेक्ष्य° पे. ६ क. ख. घ. झ. ट. उभयमन्वध्यायम् । पुन°; ठ. उभयमन्वध्यायं । छन्दसि पुन°. ७ घ. ट. भवतीति चिकि°. ८ च. कर्तव्यम्. ९ क. ख. ग. ज. घ. झ. ट. 'शब्द' नास्ति. १० च. कुजः.

संप्रदातुमैच्छदित्यर्थः[1] । स इन्द्र[2] उपेत्य परिदेवयांचक्रे । परिदेवना नाम मन्युपूर्वको विलापः ॥ ५ ॥

तृतीय पादः

न नूनमस्ति नो श्वः कस्तद्वेद यदद्भुतम् । अन्यस्य चित्तमभि संचरेण्यमुताधीतं वि नश्यति [ऋ० सं० १ । १७० । १] ॥ न नूनमस्त्यद्यतनं नो एव श्वस्तनमद्यास्मिन्द्यवि द्युरित्यह्नो नामधेयं द्योतत इति सतः श्व उपाशंसनीयः कालो ह्यो हीनः कालः कस्तद्वेद यदद्भुतम् । कस्तद्वेद यदभूतमिदमपीतरदद्भुतमभूतमिवान्यस्य[3] चित्तमभिसंचरेण्यमभिसंचार्यन्यो नानेयश्चित्तं चेततेरुताधीतं विनश्यतीत्यप्या[4]ध्यातं विनश्यत्याध्यातमभिप्रेतमथापि पदपूरणः[5] ॥ ६ ॥

'न नूनमस्ति ' इति । विचार्थमेतन्ममैतत्तावदद्यतनं हविर्मम नास्तीति । नकारं दृष्ट्वाद्यतनशब्दोऽध्याहृत[6] आचार्येण प्रतिषेधे हि सति प्रतिषेध्येनावश्यं[7] भवितव्यमिति । एते च मन्त्रैकदेशा एव सन्तोऽध्याहाराः पदातिरेकादध्ययनकाले नाधीयन्ते । ते त्वर्थनिर्वचनकाले प्रकाशयितव्याः । अथापि स्याच्छ्वस्तनं भविष्यतीति । नो श्वः[8] । इदं तावदस्मदर्थमेव निरुप्तं सदस्मत्तो व्यापन्नमथ श्वस्तने का प्रत्याशा । किं कारणम् । कस्तद्वेद यदद्भुतम् । को हि नाम तद्वेद जानाति यदद्भुतमनुत्पन्नं कस्य भविष्यतीति मम वान्यस्य वेति । कस्मात्पुनर्न विज्ञायत इति । अतो यस्मादन्यस्य चित्तमभिसंचरेण्यं संचरणशीलमनवस्थितमित्यभिप्रायः । उत अपि अथेति छन्दांसि समानार्थाः[9] । एतदद्यतनं हविराधीतं[10] आध्यातमभिप्रेतं सन्मया

---

१ घ. झ. ट. प्रदातु°. २ क. ख. ॥४॥ इति निरुक्तवृत्तौ षष्ठाध्यायस्य द्वितीयः पादः; ग. च. ज. घ. झ. ट. अङ्को नास्ति; ठ. °लापः इति निरुक्तव्याख्यायां पञ्चमः खण्डः. ३ छ. त. °भूतामिति वान्य°; द. °भूतमिति वान्य°. ४ क. ख. छ. त. द. ' अप्याध्यातं विनश्यति ' नास्ति. ५ क. ख. द. १; छ. त. १०. ६ घ. झ. °ध्याह्रियत आ°; ट. ध्याह्रियेत आ° इ. ७ क. ख. घ. झ. ट. ठ. °षेध्येनाप्यव°. ८ ज. ठ. °मद्य. ९ ट. समानार्थः. १० क. ख. ग. ज. हविरधीत°.

ममेदमित्येवं तथापि विनश्यत्येव । अन्यस्मै प्रदीयते । तत्रैवं सति श्वस्तनमस्माकं भविष्यतीति कुत एतदिति समस्तार्थः ।

अथैकपदनिरुक्तम् । ‘ अद्यास्मिन्[1]द्यवि । द्युरित्यह्नो नामधेयं द्योतत इति सतः’ । द्योतते तदिति द्युरिति कर्तृकारकम् । सदिति यत्र ब्रूयात्तत्र[2] तत्रोच्चारित एव कारकनियमो द्रष्टव्यः । अन्यत्र यथेष्टं योज्यम् । ‘श्वः’ इति[3] ‘उपाशंसनीयः’ उपगम्य[4] चेतसाशास्तव्यो भवत्यनागतत्वात् । ‘ह्यो हीनः कालः’ । अतिक्रान्तो हि स भवति । श्वःसंबन्धाद्ध्यःशब्दोऽविद्यमानोऽपि निरुक्तः । ‘ अद्भुतमभूतम् ’ । इदमपीतरदद्भुतं शोणितवर्षाद्यभूतमिव कादाचित्कत्वात्[5] । शब्दसारूप्यप्रसङ्गेनेदं निरुक्तम् । ‘अन्यो नानयः’ । नानात्वेन[6] व्यवस्थितस्यापत्यमसत्कुलजस्येत्यर्थः । अथवा ‘न’ सतां ‘आनेयः’ । चित्तं चेततेः । चेतत्यनेनार्थानिति चित्तम् । उताश्वीतं विनश्यतीति । ‘आख्यातमभिप्रेतं’ इति पर्यायवचनम् । एवमयमस्मिन्मन्त्रे विचिकित्सार्थीयः । ‘अथापि’ अयमेतस्मिन्[8]नन्यस्मिन्मन्त्रे पदपूरणो भवति ॥ [9]६ ॥

[10]इति निरुक्तवृत्तौ षष्ठ[10]स्याध्यायस्य द्वितीयः पादः ॥ २ ॥

नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी । शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः (ऋ० सं० २ । १६ । ९) ॥ सा ते प्रतिदुग्धां वरं जरित्रे वरो वरयितव्यो भवति जरिता गरिता दक्षिणा मघोनी मघवती मघमिति धननामधेयं मंहतेर्दानकर्मणो दक्षिणा दक्षतेः समर्धयतिकर्मणो व्यृद्धं समर्धयतीत्यपि

---

१ क. ख. ग. ज. व. झ. ट. ‘अद्य’ नास्ति. २ क. ख. घ. झ. ट. ठ. ‘तत्र’ सकृदेव. ३ क. ख. व. झ. ट. ठ. ‘इति’ नास्ति. ४ क, ख. °गम्यः सचेतसा°; ग. ज. °गम्य चेतसां आशा°; व. °गम्य स्यचेतसा°; झ. °गम्य सचेतसा°; ट. °गम्यः स्यचेतसा°; ठ. °गम्य स्वचेतसा°. ५ ग. च. ज. कदाचि°; ठ. क्वचित्°. ६ व. ट. नानात्वेत व्यवस्थितपापन्यमसभकुलज°; झ. नानात्वेन व्यवस्थि—पन्ययसभकुलज°. ७ च. ‘इति’ नास्ति. ८ क. ख. °थाप्ययमस्मिन्म°; व. झ. ट. ठ. ‘ एतास्मिन् ’ नास्ति. ९ क. ख. १; इतरेषु पुस्तकेष्वङ्को नास्ति. १० क. ख. ‘ इति०पादः ’ नास्ति; ग. च. ज. ‘ इति ’ नास्ति; ठ. इति जम्बूमार्गाश्रमवासिनं आचार्यभगवद्दुर्गस्य कृतौ ऋज्वर्थायां निरुक्तटीकायां निघण्टाध्यायपञ्चकेन सह निरुक्तषष्ठाध्यायस्य°. १० ग. ज. घ. झ. ट. षष्ठाध्या°.

वा प्रदक्षिणागमनाद्दिशमभिप्रेत्य दिग्घस्तप्रकृतिर्दक्षिणो हस्तो दक्षतेरुत्साहकर्मणो दाशतेर्वा स्याद्दानकर्मणो हस्तो हन्तेः प्राशुर्हनने देहि स्तोतृभ्यः कामान्मास्मानतिदर्हीर्मास्मानतिहाय दा भगो नो अस्तु बृहद्वदेम स्वे वेदने भगो भजतेर्बृहदिति महतो नामधेयं परिवृढं भवति वीरवन्तः कल्याणवीरा वा वीरो वीरयत्यमित्रान्वेतेर्वा स्याद्गतिकर्मणो वीरयतेर्वा सीमिति परिग्रहार्थीयो वा पदपूरणो वा। प्र सीमादित्यो असृजत्। प्रासृजदिति वा प्रासृजत्सर्वत इति वा वि सीमतः सुरुचो वेन आवरिति च व्यवृणोत्सर्वत आदित्यः सुरुच आदित्यरश्मयः सुरोचनादपि वा सीमित्येतदनर्थकमुपबन्धमाददीत पञ्चमीकर्माणं सीम्नः सीमतः सीमातो मर्यादातः सीमा मर्यादा विषीव्यति देशाविति त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तमर्धनामेत्येके ॥ [3] ७ ॥

'नूनं सा ते' इति। गृत्समदस्येयमार्षम्। पृष्ठ्यस्य चतुर्थेऽहनि मरुत्वतीये शस्यते। नूनमिति पदपूरण एव। सा दक्षिणा ते तव या पुत्रभावके कर्मणि। सा किं करोतु। प्रतिदुग्धाम्। किम्। वरम्। कर्मणो दक्षिणागुणकात्फलप्राप्तिस्तथापि तु दक्षिणायामुपचर्यते। कस्मै। स्तुवते यजमानाय। किंलक्षणा। मघोनी मघवती हिरण्यधान्यादिधनेन संयुक्ता तद्वतीत्यर्थः। किंच शिक्ष देहि। कस्मै। स्तोतृभ्य ऋत्विग्भ्योऽनुकामान्। किंच माति धक्। मास्मानतिहायातीत्यान्येभ्यो देहीति। मा दा इत्यर्थः। अस्मभ्यं तावद्देहि ततोऽन्येभ्योऽपि दास्यसि चेत्यभिप्रायः। किंच भगो नो धनं नोऽस्तु। येन किं कुर्याम। बृहद्वदेम महदूर्जितं वदेम दीयतां भुज्यतामिति। क्व। विदथे यज्ञे। अथवा [6] स्वे गृहे। किंच युष्मदनुग्रहाच्च सुवीरा वीरवन्तो भवेम पुत्रवन्तो यद्यपुत्राः। एवमयं मत्वर्थीयः सुः। अथ पुनः पुत्रवन्त एव ततः कल्याणवीरा इति समस्तार्थः।

नूनमित्यस्य पदपूरणार्थे उदाहरणम्

---

१ क. ख. छ. त. द. °वृढं. २ क. ख. छ. त. द. विसीव्यति.
३ क. ख. द;२; छ. त. ११; ठ. अङ्को नास्ति. ४ ग. च. ज. °कस्मै ते यज°.
५ ठ. °दास्यसि चेद्देहीत्यभि°. ६ ठ. स्वगृहे°. ७ ठ. 'यद्यपुत्राः' नास्ति.

अथैकपदनिरुक्तम् । ‘ वरो वरयितव्यो भवति ’ । व्रियते ह्यसौ । जरिता गरिता गिरिते:[1] स्तुत्यर्थस्य । मघं मंहतेर्दानार्थस्य[2] । दीयते हि तत् । ‘दक्षिणा दक्षते:’ समर्धयत्यर्थस्य । यज्ञे हि यत्किंचिद्विगतर्द्धिकं भवति तदियं समर्धयति विशिष्टं हि[3] यज्ञस्य साधनमेतदिति[4] । ‘ अपि वा प्रदक्षिणागमनात् ’ दक्षिणा ‘ दक्षिणां दिशमभिप्रेत्य ’ । सा हि दक्षिणस्यां वेदिश्रोणावग्रेण गार्हपत्यं जघनेन सदो दक्षिणेनाग्नीध्रं[5] गत्वान्तर्वेदि[6] स्थित्वान्तरेण चात्वालमाग्नीध्रं[7] चोत्सृज्यमाना गच्छति[8] । ‘ दिक् ’ पुनर्दक्षिणा ‘ हस्तप्रकृतिः ’ । प्राङ्मुखस्य प्रजापतेर्यतो दक्षिणो हस्तो बभूव सा दक्षिणा दिगभवत् । अथ[9] ‘ दक्षिणो हस्तः ’ कस्माद्दक्षिण इति । ‘ दक्षतेः ’ उत्साहार्थस्य । स ह्युत्साहवान्भवति कर्मसु न तथा सव्यः । ‘दाशतेर्वा स्यात्’ दानार्थस्य । तेनैव हि प्रायेण दीयते । अथ ‘[10]हस्तः’ कस्माद्धस्तः । ‘ हन्तेः ’ । तेन हि हन्यते[11] । नन्वन्येनापि[12] केनचिदङ्गेन हन्यत[13] एव यो हन्तव्यो भवति[14] । सत्यं हन्यते । अयमेव तु ‘ प्राशुः ’ शीघ्र इत्यर्थः । ‘ बृहदिति महतो नामधेयं [15]परिवृढं ’ तत् ‘ भवति ’ इति । ‘ वीरो वीरयत्यमित्रान् ’ । नानाप्रकारमीरयतीत्यर्थः । ‘ वेतेर्वा स्याद्गतिकर्मणः ’ गत्यर्थे वर्तमानस्य । गच्छत्येवासा[16]वभिमुखः शत्रून् । ‘ वीरयतेर्वा ’ विक्रमार्थस्य । विक्रान्तो ह्यसौ भवति ।

‘ सीमिति ’ अयं ‘ परिग्रहार्थीयो वा पदपूरणो वा ’ । “ प्र सीमादित्यो[17] असृजद्विधर्ता॑ ऋतं सिन्धवो वरुणस्य यन्ति । न श्राम्यन्ति न वि मुञ्चन्त्येते वयो न पप्तू रघुया परिज्मन् (ऋ० सं० २ । २८ । ४.) ” ॥

सीमित्यस्योदाहरणम्

अस्यामेव तावदुभयमपि प्रदर्शयति । ततः परिग्रहार्थीयत्वे

१ घ. झ. ट. ठ. इति गिरते:. २ क. ख. घ. झ. ट. ठ. दानकर्मणः. ३ क. ख. घ. झ. ट. ठ. ‘ हि ’ नास्ति. ४ ठ. °साधनं तदिति. ५ क. ख. घ. झ. ट. ठ. °नाग्नीध्रीयं. ६ क. ख. ग. ज. अन्तर्वेदिं. ७ क. ख. घ. झ. ट. ठ. चात्वालोत्करौ तान्त (झ. नान्त) माग्नीध्रं°. ८ क. ख. घ. झ. ट. ठ. गच्छन्तीति. ९ ठ. °भवद्दक्षिणो हस्तो दक्षतेरुत्साहकर्मण इति अथ°. १० क. ख. घ. झ. ट. ‘ हस्तो ’ नास्ति. ११ घ. ट. हव्यते; झ. हन्वते. १२ घ. झ. ट. ठ. नन्वन्ये°. १३ घ. झ. ट. हन्यते । एवं । यो°. १४ घ. झ. ट. ठ. भवति तस्य हननेऽ (घ. ट. हनतेऽ) यमेव°. १५ ग. च. ज. परिवृल्हं हि परिवृल्हं तद्°. १६ च. °वासाभविमुखः. १७ घ. ट. सीमादि° रिज्मन् । अस्या°.

द्वितीयमुदाहरणं वक्ष्यति। गृत्समदस्य तत्पुत्रस्य वा कूर्मस्येयमार्षम्। त्रिष्टुप्सौरी। सूर्यः पुनरस्यां वरुणनाम्ना स्तूयते। प्रासृजत्सूर्यो रश्मीन्। सीमिति पदपूरण एव। कुतोऽपीत्यविवक्षितमेवैतत्पादपूरणपक्षे। अथ परिग्रहार्थीयं सर्वमेव परिगृह्णाति प्रासृजत्सर्वत इति[1]। विधर्ता विधारयिता रसानां रश्मीनां[2] वा। स्वरश्मिजालान्तर्गतस्य वा धर्ता[3] सर्वस्य जगतः। ऋतमुदकमादाय पृथिवीलोकादन्तरिक्षलोकाच्च। सिन्धवः स्यन्दनाः[4] सूर्यरश्मयः। ते ह्यादित्यमण्डलान्न्यञ्चो[5] वर्तमानाः स्यन्दन्ते[6] वर्षाकाले[7]। सूर्येण प्रसृष्टा उदकमादाय सार्वलौकिकं वरुणस्य सूर्यस्य स्थानं मण्डलं यन्ति। तदेवमप्यनिशमुत्सर्गादानलक्षणं कर्म[8] कुर्वाणा न श्राम्यन्ति। न वा श्रान्ता अपि सन्तो विरामान्नाप्येतत्कर्म मुञ्चन्त्येते। कथं पुनः पतन्तो न श्राम्यन्ति। किं शनकैः[9]। न। वयो न[10] वय इव पक्षिण इव शीघ्रं पप्तुः[11] पतन्तो रघुया[12] लघुया[13] शीघ्रिकयाऽपि[14] गत्या परिज्मन् परिजमन्तः परिगच्छन्तः सर्वमप्येतज्जगन्न श्राम्यन्ति न विमुञ्चन्त्येतत्कर्म। एतद्गुणयुक्तानामप्येतेषां सूर्य एव प्रविसर्गे[15] संयमे चेश्वर इत्येवं सूर्यस्य[16] स्तुतिरेषा।

'विसीमतः सुरुचो वेन आवरिति च' इदं द्वितीयमुदाहरणम्[17]।

तस्यैव द्वितीयमुदाहरणम्

ब्रह्म जज्ञानं[18] प्रथमं पुरस्ताद्वि सीमतः सुरुचो वेन
आवः। स बुध्न्या उपमा अस्य विष्ठाः सतश्च
योनिमसतश्च विवः (य० वा०सं०१३।३)॥

वामदेवपुत्रो नकुलोऽनया[19] त्रिष्टुभादित्यं तुष्टाव। प्रवर्ग्यविनियुक्ता रुक्मोपधाने[20] चाग्निचयने। ब्रह्म आदित्याख्यं जज्ञानं जायमानं प्रथममनुत्पन्नेष्वन्येष्वदितः[21]

---

१ क. ख. म. इति वा. २ घ. झ. ट. ठ. 'रश्मीनां वा' नास्ति. ३ घ. झ. ट. ठ. 'धर्ता' नास्ति. ४ म. च. ज. स्पन्दनात्; ठ. स्यन्दमानाः. ५ क. ख. घ. झ. ट. ठ. °लान्प्राञ्चो. ६ म. च. ज. स्पन्दन्ते. ७ क. ख. घ. झ. ट. ठ. वर्षकाले. ८ क. ख. घ. झ. ट. ठ. स्वकर्म. ९ च. शनैः. १० च. 'वयो न' नास्ति. ११ घ. च. पपुः; ट. पप्तुः प° पुः. १२ घ. ट. 'लघुया' नास्ति. १३ घ. ट. लघ्या. १४ क. ख. °कया गत्यापि; घ. झ. ट. शीघ्रकयापि गत्या. १५ क. ख. घ. झ. ट. ठ. प्रतिसर्गे. १६ च. ठ. सूर्यस्तुति°. १७ ग. °हरणम्। १३; च. ज. °हरणम्। १२. १८ ग. च. घ. ज. झ. ठ. जज्ञानमिति। वाम°. १९ घ. ट. नहुलो. २० ग. ज. रुक्माधाने. २१ घ. ट. अदितः; ठ. अदितेः.

पुरस्तात्प्राच्यां दिशि । तदुदयोपलक्षित[1]मेव हि प्राच्याः प्राचीत्वम् । वि आवः व्यवृणोद्विवृतानकरोत्सुरुचः प्रशस्तरोचनान्रश्मीन्सीमतः सर्वतः । किंच स वेनो मेधावी बुध्न्या बुध्नमन्तरिक्षं तदवयवभूता दिश उपमाः उपनिर्मात्र्यः । तासु ह्येतत्प्रतिष्ठितं सर्वमुपनिर्मीयते जगदित्येतस्मात्ता एवोपनिर्मात्र्य उच्यन्ते । विष्ठा विस्थाः । तासु ह्येतज्जगद्विभिन्नं तिष्ठतीति ता एव विष्ठाः । सतश्चाभिव्यक्तस्य स्थूलस्यासतश्चानभिव्यक्तस्य सूक्ष्मस्य[2] योनिं स्थानं । विवः व्यवृणोदित्यर्थः । तदुदये ह्येवंगुणयुक्ता दिशोऽभिव्यज्यन्त इत्यभिप्रायः । अथवा बुध्न्या आप आन्तरिक्षी[3]स्ता उपमा इत्येवमादि सर्वं योज्यम्[4] ।

‘ अपि वा सीमेत्येतदनर्थकमुपबन्धमाददीत पञ्चमीकर्माणं सीम्नः सीमतः सीमातो मर्यादातः । सीमा मर्यादा विषीव्यति[5] देशाविति ’ । विगतसंतानौ देशौ करोतीति ।

‘ त्व इति विनिग्रहार्थीयं सर्वनामानुदात्तम् ’ । निपातत्वेनैतदपि संदिह्यते । वक्ष्यति हि ‘ निपात इत्येके ’ [निरु० १ । ८] इति । अतस्त्व इति ह्येवं[6] निपातकाण्ड उदाह्रियते संशयपरिशोधनाय । त्व इत्येतद्विनिग्रहार्थीयमिति व्याख्यातम् । किंमुत[7] तत्सर्वनाम[8] । विप्रतिपन्नस्वरत्वात्स्वरमप्यवधारयन्नस्यानुदात्त[9]मित्याह । कथं पुनर्विप्रतिपन्नस्वरमेतदिति । उच्यते । ‘ प्रातिपदिकस्यान्तः ’ इत्यौत्सर्गिकं लक्षणम् । ‘ अन्यत्रापवादात् ’ । लक्षणविदोऽपि चास्यापवादं पठन्ति ‘ [10]त्वत्वनेमसमसिमेत्यनुच्चानि[11] ’ (फि० सू० ४ । १०) इति ।

त्व इति निपातः सर्वनाम च

‘ अर्धनामेत्येके ’ । अर्धस्यैतन्नामेत्येवमेक आचार्या मन्यन्ते । वक्ष्यति

---

१ ग. ज. °लक्षितेनैव हि. २ ग. ज. सूक्ष्मयोनिः स्थानं; च. सूक्ष्मस्य । योनिः स्थानं; ठ. सूक्ष्मस्य अस्य जगतः योनिं°. ३ ठ. आन्तरिक्ष्याः. ४ च. ज. योज्यं । १३ । अपि°. ५ क, ख. ग. ज. विसीव्य°. ६ ग. ज. हैवं. ७ क. ख. च. किमु तत्सर्वनामविप्र°. ८ ग. ज. °नामाविप्रति°. ९ च. °न्नस्यामित्याह. १० ग. ज. घ. झ. °पठन्ति अंशेन त्वनेम°; च. पठन्ति त्व त्वत् नेम; ट. °पठन्ति अंशेन त्वनेम° त्वत्; ठ. °पठन्ति अंशेन त्वत् नेम°. ११ ग. ज. °त्यनुच्चानि.

चायमपि ' त्वो नेम इत्यर्धस्य ' (निरु० ३ । २०) इति । तदेतत्प्रकरणोपपदाभ्यामध्यवसेयं क्वार्धनाम क्व सर्वनामेति ।

यथात्र सर्वनाम तथेयमृगुदाह्रियते[1] ॥ ७ ॥

ऋचां त्वः पोषमास्ते पुपुष्वान्गायत्रं त्वो गायति शक्वरीषु । ब्रह्मा त्वो वदति जातविद्यां यज्ञस्य मात्रां वि मिमीत उ त्वः (ऋ० सं० १० । ७१ । ११) ॥ इत्यृत्विक्कर्मणां विनियोगमाचष्ट ऋचामेकः पोषमास्ते पुपुष्वान् होतर्गर्चनी गायत्रमेको गायति शक्वरीषूद्गाता गायत्रं गायतेः स्तुतिकर्मणः शक्वर्य ऋचः शक्नोतेस्तद्यदाभिर्वृत्रमशकद्धन्तुं तच्छक्वरीणां शक्वरीत्वमिति विज्ञायते ब्रह्मैको जाते जाते विद्यां वदति ब्रह्मा सर्वविद्यः सर्वं वेदितुमर्हति ब्रह्मा परिवृढः[2] श्रुततो ब्रह्म परिवृढं[3] सर्वतो यज्ञस्य मात्रां विमिमीत एकोऽध्वर्युरध्वर्युरध्वरयुरध्वरं युनक्त्यध्वरस्य नेताध्वरं कामयत इति बाऽपि वाधीयाने युरुपबन्धोऽध्वर इति यज्ञनाम ध्वरतिर्हिंसाकर्मा तत्प्रतिषेधो निपात इत्येके तत्कथमनुदात्तप्रकृति नाम स्याद्दृष्टव्ययं तु भवत्युत[4] त्वं सख्ये स्थिरपीतमाहुरिति द्वितीयायामुतो त्वस्मै[5] तन्वं विसस्र इति चतुर्थ्यामथापि प्रथमाबहुवचने ॥ ८ ॥

त्व इत्यस्य सर्वनामत्वे उदाहरणम्

' ऋचां त्वः ' इति । बृहस्पतेरार्षम् । ऋत्विक्कर्मणां[6] विनियोगमनयर्चाचष्टे । ऋचां त्वः पोषमिति । य एते चत्वारो महर्त्विज एतेषां त्व एक इत्यर्थः । किमेकः करोति । ऋचां पोषं पुष्टिं पुपुष्वान्पुनः पुनः भृशं वा देवतायाथात्म्यानुचिन्तन[7]संतानगर्भस्थानकरणानुप्रदानवतीर्यथाकालमृचोऽधीयान आस्ते । स हि तासां पोषः ।

---

१ ग. १२ । ऋचां त्व इति ॥ १५ ॥; च. ज. १३; घ. झ. ट. अङ्को नास्ति; ठ. °ह्रियते इति निरुक्तव्याख्यायां सप्तमः खण्डः. २ क. ख. छ. त. द. परिवृल्हः. ३ क. ख. छ. त. द. परिवृल्हं. ४ क. ख. छ. त. द. भवति उत. ५ क. ख. द. ३; छ. त. १२. ६ ग. ज. ऋत्विक्कर्मविनि°. ७ घ. झ. ठ. ठ. °नुसंचिन्तन°; ग. ज. यथात्म्यानुचिन्तन°. च. याथात्मानुचिन्तन°.

कतम एक एतत्कर्म कुर्वन्नास्त इति । होता । एतत्तावदृगध्ययनकर्म तस्मिन्होतारि[1] विनियुक्तम् । उक्तं च । 'यदृचा हौत्रं क्रियते' [शत० ब्रा० ११ । ४ । २ । ७] इति । गायत्रं त्वः । गायत्रं त्वः[2] एको गायति शक्वरीषु ऋक्षु । कतमः । उद्गाता । तस्मिन्नप्येतत्सामगानकर्म विनियुक्तम् । उक्तं च । 'साम्नोद्गीथम्' (ऐ० ब्रा० २५ । ८) इति । ब्रह्मा त्वो ब्रह्मा नामैक ऋत्विग् जाते[3] जाते प्रायश्चित्ते विद्यां वदति । विद्यात्रयहेतुत्वादात्मनो विद्यां विज्ञानं वदतीतरेभ्य ऋत्विग्भ्य इदमत्र[4] कुरुतेदमत्र कुरुतेति । तत्रापि ह्येतत्कर्म विनियुक्तम् । स पुनरेष सर्वविद्यः सर्वविज्ञानः । तथाविधो ह्यसावधिकारी त्रयीविद्यासंयुक्तो येनासौ सर्वमेव वेदितुमर्हति । न ह्यसर्ववित्तमधिकारं शक्नुयान्निर्वर्तयितुम् । उक्तं च[5] । 'अथ केन ब्रह्मत्वमित्यनया त्रय्या विद्यया' (शत० ब्रा० ११ । ४ । २ । ७) इति । यज्ञस्य मात्रां विमिमीत उ त्वः । विमिमीते[6] एक इति । मीयंत[7] इति मानं[8] कर्म तन्मात्रेत्युच्यते । या काचिदितिकर्तव्यता यज्ञस्य तां विमिमीतेऽध्वर्युः । नानाप्रकारां[9] करोती[10]त्यर्थः ।

'गायत्रं गायतेः' स्तुत्यर्थस्य [धा० १ । ९४२] । स्तूयते ह्यनेन । 'शक्वर्य ऋचः शक्नोतेः' इत्युक्त्वा ब्राह्मणेनापि शक्नोतेः शक्वरीशब्दे वृत्तिं दर्शयति । 'तद्यदाभिर्वृत्रमशकद्धन्तुं तदेत[11]च्छक्वरीणां शक्वरीत्वम्' । यद्यस्मादाभिरभिष्टुत इन्द्रो वृत्रमशकद्धन्तुं[12] तच्छक्वरीत्वमिति विज्ञायते[13] ऋचां शक्वरीत्वमिति । एवं ब्राह्मणेऽपि शक्नोतेरेव शक्वर्य इति विज्ञायते । लिङ्गतोऽपि हि दर्शितं भवत्याख्यातजानि नामानीति । 'ब्रह्मा परिवृढः[14] श्रुततः' । स हि त्रयीं विद्यां वेद । शब्दसारूप्यप्रसक्तमुच्यते । 'ब्रह्म परिवृढं सर्वतः' । ऋगादि परं चोभयमपि तत्परिवृढं[15] सर्वासु दिक्षु । 'अध्वर्युरध्वरयुः' । एवमपि

---

१ घ. झ. ट. ठ. एतस्मिन्. २ क. ख. व. झ. 'त्वः' नास्ति; ट. गायत्रमेको° त्रं त्व ए. ३ क. ख. ग. च. ज. ठ. 'जाते' सकृदेव; ट. जाते प्राय° जाते जाते. ४ क. ख. ज. 'इदमत्र कुरुत' सकृदेव. ५ ट. उक्तं च पंचमपंचिका-पंचमाध्यायी द्वाविंशे खंडे । अथ.° ६ क. ख. घ. झ. ट. 'विमिमीत' नास्ति. ७ च. 'मीयन्त इति' नास्ति. ८ ग. ज. समानं. ९ घ. झ. ट. प्रकारां. १० च. 'इति' नास्ति. ११ क. ख. तदेव शक्व°; ग. ज. तदेतच्छक्वरीत्वं; घ. झ. ठ. तदेव शक्वरीत्वं; ट. तदेवं शक्वरीत्वं° तच्छक्वरीणां. १२ च. 'हन्तुं' नास्ति. १३ ठ. °यते तदेतच्छक्वरीणां ऋचां°. १४ ग. ज. परिवृल्हः. १५ ग. च. ज. परिवृल्हं.

न[1] गृह्यत इति पुनरप्याह । ' अध्वरं युनक्त्यध्वरस्य नेता ' प्रापयितेत्यर्थः । स ह्यन्तं प्रापयत्यध्वरम् । एवम् । अथवा 'अध्वरं कामयते' कर्तुमित्यध्वर्युः । एतस्मिन्निर्वचने युर्वसूयव इति यथा । अथवा 'अधीयाने' तमध्वरं कस्मिंश्चिद्ब्राह्मणेऽध्वर इतीयमेव संज्ञा भवति मञ्चक्रोशनवत् । एतस्मिंश्च निर्वचने 'युः' अयम् 'उपबन्धः' नामकरणः[2] । अध्वरमधीते यः सोऽध्वर्युः । विग्रहप्रसक्तस्याध्वरशब्दस्य तत्त्वमाचष्टे । 'अध्वर इति यज्ञनाम' । अध्वर इत्यधुना निर्वक्तव्यः । 'ध्वरति[3]र्हिंसाकर्मा' । ध्वरति धूर्वतीति हिंसार्थेषु पठितौ [नि० २ । १९] । 'तत्प्रतिषेधः' अध्वरः । अहिंस्र इत्यर्थः । आह । नन्वत्र हन्यन्ते पशवश्छिद्यन्ते तृणवनस्पतयोऽर्थे[4] कथमहिंस्रः । उच्यते । अभ्युदय एव हि[5] सः । एवं हि[6] श्रूयते । 'न[7] वा उ एतन्म्रियसे[8]' (य० वा० सं० २३ । १६) इति । तथाच । 'कुशाल्वमिच्छन्ति तृणानि राजन् ' इति । तस्मादभ्युदययोगादहिंस्र इत्युपपद्यते ।

त्व इत्यस्य दृष्टव्ययत्वेऽपि निपातत्वम्

निपातोऽयमित्येके मन्यन्ते । एवमेकीयपक्षे निपातत्वमस्योक्त्वाधुना चोदकपक्षे स्थित्वा परपक्षमाक्षिपन्नाह । 'तत्कथमनुदात्तप्रकृति नाम स्यात्' इति । तदेतच्छब्दरूपमनुदात्तमनुदात्तस्वभावं सत्कथं नाम स्यात् । ननु भवतैवोक्तमुत्सर्गेणैवान्तोदात्तानि प्रातिपदिकानीति [नि० वृत्तौ १।७] । उच्यते । सत्यमुक्तम् । ननु तत्रैवेदं प्रत्युक्तं 'अन्यत्र चापवादात्' इति । स एषोऽपवादः[10] 'त्वत्वनेमसमसिमेत्यनुदात्तानि' इति । उत्सर्गादपवादो बलीयान् । तस्माद्विप्रतिपन्नस्वरमपि तदेतन्नामैव । किंच ' दृष्टव्ययं तु भवति ' । तुशब्दो हेत्वर्थो हेतुसमुच्चयार्थो वा । अनु[9]दात्तप्रकृतित्वेऽपि सति 'दृष्टानुविधिश्छन्दसि' इति दृष्टव्ययत्वान्नामि[11]तितद्भवति । एवं हेत्वर्थः । अथै[12]वैवमन्यथा हेतुसमुच्चयार्थः । अपवादश्र[13]वणाद्ध्य-

---

१ क. ख. ग. ज. घ. झ. ट. ठ. ' न ' नास्ति. २ क. ख. नामकरणं; घ. झ. नामकारणं; ट. नामकारणं° करणः ३ च. अध्वरति°. ४ क. ख. घ. झ. ट. ठ. °तयस्तत्कथ°. ५ ठ. हि सः° हिंसा. ६ च. एवं विश्रूयते. ७ सर्वाङ्कक् पठ्यते. ८ क. ख. च. एतस्मिन्म्रियसे (च. °यते.) ९ च. अनुदात्त । अनु°; घ. झ. ट. ट. ' अनुदात्तं ' नास्ति. १० ग. ज. °वादोंऽशेन त्वसमसिमे°; घ. झ. ट. °वादांशेन त्वनेम°; ठ. °वादोंऽशेन त्वनेम°. ११ च. नामेविति; ठ. नामे॰ति° वै. १२ ग. च. अथ चैव°. १३ क. ख. घ. झ. ट. °वादस्मरणाद्ध्य°.

यद्दर्शनाच्चानुदात्तमपि सदेतन्नामैव भवति । निपातत्वेऽपि कल्प्यमानेऽस्य स्वरसामञ्जस्यं न भवत्येव । निपाता अप्याद्युदात्ता भवन्ति [फि० सू० ४ । १२] । तस्मात्कृतापवादत्वाद्दृष्टव्ययत्वाच्च नामैवैतदित्युपपन्नम् ।

आह । क्व पुनरस्य व्ययो दृष्टः । उच्यते । 'उतो त्वस्मै तन्वं, १ वि सस्रे' [ऋ० सं० १० । ७१ । ४] इति चतुर्थ्यामेकवचने व्ययो दृष्टः । 'उत त्वं सख्ये स्थिरपीतमाहुः' [ऋ० सं० १० । ७१ । ५] इति द्वितीयायामेकवचन एव । उपरिष्टाच्छेषौ [निरु० १ । १९–२०] । अथापि प्रथमाबहुवचने व्ययो दृष्ट इत्यध्याहारः ॥ ८ ॥

अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः । आदघ्नास उपकक्षास उ त्वे ह्रदा इव स्नात्वा उ त्वे ददृश्रे [ऋ० सं० १० । ७१ । ७]॥ अक्षिमन्तः कर्णवन्तः सखायोऽक्षि चष्टेरनक्तेरित्याग्रायणस्तस्मादेते व्यक्ततरे इव भवत इति ह विज्ञायते कर्णः कृन्ततेर्निकृत्तद्वारो भवत्यृच्छतेरित्याग्रायण ऋच्छन्तीव खे उदगन्तामिति ह विज्ञायते मनसां प्रजवेष्वसमा बभूवुरास्यदघ्ना अपर उपकक्षदघ्ना अपर आस्यमस्यतेरास्यन्दत एनदन्नमिति वा दघ्नं दघ्यतेः स्रवतिकर्मणो दस्यतेर्वा स्याद्विदस्ततरं भवति प्रस्नेया ह्रदा इवैके प्रस्नेया ददृशिरे स्नानार्हा ह्रदो ह्रादतेः शब्दकर्मणो ह्लादतेर्वा स्याच्छीतीभावकर्मणोऽथापि समुच्चयार्थे भवति पर्याया इव त्वदाश्विनमाश्विनं च पर्यायाश्चेत्यथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छ-

---

१ ग. ज. 'एतत्' नास्ति; ठ. तदेत°. २ ग. ज. कल्पमानस्य; च. कल्पमानेऽस्वर°; ठ. कल्पमानेस्य स्वर°. ३ घ. झ ट. अथाद्युदात्ता. ४ क. घ. दृष्टाव्यय°; ढ. दृष्टोव्य°. ५ ग. ज. नामैवं तदि°. ६ ग. च. ज. घ. झ. ट. एवमुप°. ७ क. ख. ३; ग. च. ज. १४; घ. झ. ट. 'अङ्को न वर्तते°. ८ छ. त. द. 'सखायः' नास्ति°. ९ ठ. °त्याग्रयण°. १० छ. त. निकृंत°. ११ छ. त. ऋच्छंती इव; द. ऋच्छती इव. १२ छ. त. द. ददृशिरे. १३ क. ख. °वति ॥ ४ ॥ पर्या°; छ. त. °वति ॥ १३ ॥ पर्या°; द. °वति ॥ ८ ॥ पर्या°.

न्ति पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति ॥ ९ ॥

"अक्षण्वन्तः कर्णवन्तः सखायो" इत्यस्यामृचि । बृहस्पतेरार्षं विद्यासूक्तं नाम तत्रेयमृक् । अक्षण्वन्तोऽक्षिसंयुक्ताः । कर्णवन्तः कर्णसंयुक्ताः । एवमपि समानेन्द्रियाः समानपृष्ठोदरपाणिपादाः सन्तः । अपि च समानख्यानाः सर्वे मनुष्याख्याः ।

त्व इत्यस्य दृष्टव्ययत्वे उदाहरणम्

अथवा समानेषु शास्त्रेषु कृतश्रमाः । वैयाकरणा वैयाकरणानामेव समानख्याना नैरुक्ता एव नैरुक्तानाम् । मनोजवेषु मनोगम्येष्वर्थेष्वसमा बभूवुः । केचिदूहापोहकरणवक्तृत्वसमर्थाः केचिदमेधसः । कथमसाम्यमिति । यतो दृष्टान्तेन प्रदर्शयति । आदघ्नास उपकक्षास उ त्वे ह्रदा इव । आदघ्ना एव आदघ्नासः । आस्यदघ्नह्रदपरिमाणाः केचित्प्रज्ञया । उपकक्षासः कक्षसंनिकृष्टदेशतुल्योदका इव ह्रदा एके प्रज्ञया । ह्रदाः स्नात्वाः स्नानार्हाः । स्नात्वा अक्षोभ्या अपरिमेयप्रज्ञाना ददृश्रे ददृशिरे । दृश्यन्त इति समस्तार्थः ।

अथैकपदनिरुक्तम् । 'आक्षि चष्टेः' पश्यत्यर्थस्य (धा० २।७) । दृश्यते ह्यनेन । 'अनक्तेः' व्यक्त्यर्थस्य [धा० ७ । २१] 'इत्याग्रायणो' मन्यते । ब्राह्मणमपि चैतस्मिन्निर्वचने भवति । 'तस्मादेते व्यक्ततरे इव भवतः इति ह विज्ञायते' । यस्मादिदं नामेति किमपि प्रकृतम-

---

१ क. ख. छ. त. द. ठ. '९' नास्ति. २ क. ख. व. झ. ट. ठ. 'सखायो' नास्ति. ३ क. ख. व. झ. ट. ठ. इत्येतस्या°. ४ व. झ. ट. °मृगिति; ठ. 'तत्रेयमृक्' इति नास्ति. ५ ग. ज. समानं किं समानपृष्ठो°. ६ क. ख. व. झ. ट. ठ. मनुष्याः; च. मनुष्याख्यास्याः. ७ क. ख. ग. ज. °पोहनधारणवक्तृत्व°. ८ व. ट. समार्थाः. ९ क. ख. कथमसामान्यमिति; ग. ज. कथमसामान्यमिति. १० क. ख. व. झ. ट. ठ. प्रतिपादयति. ११ ग. ज. °दघ्नह्रदयप°; व. झ. अस्यद (झ. आस्यद) ह्रदयप्रमाणाः; ट. अ (आ) स्यदह्रदयप्रमाणाः° ब्रह्मद्रपरि. १२ ग. ह्यनेनेति. १३ घ. झ. ट. व्यक्तस्यार्थस्य; च. ठ. व्यक्तार्थस्य. १४ क. ख. ग. ज. आग्रायणो. १५ क. ख. ग. ज. घ. झ. 'ह विज्ञायते' नास्ति; ट. इति । यस्मा° ह विज्ञायते. १६ क. ख. ग. ज. घ. झ. ट. ठ. किमिति प्रकृ°.

पेक्ष्य । अथवा यस्मादेते तेजोवयवभूयिष्ठे तस्मात्कारणा[1]दित्येवं यच्छब्दमन्वाकृष्य विद्यमानमविद्यमानं वोत्पाद्य[2] तस्माच्छब्दस्य[3] सामर्थ्यमुत्पाद्यते । तथा हि स निराकाङ्क्षो भवति । सर्वत्र साकाङ्क्षेषु शब्देष्वेवं व्याख्यान[4]धर्मा द्रष्टव्याः । एते अक्षिणी इतरेभ्योऽङ्गेभ्यो व्यक्ततरे स्पष्टतरे प्रकाशतरे भवतः । अन्धकारेऽपि ह्येते प्रकाशेते नक्तंचरादीनां न तथेतराण्यङ्गानि । एवं ब्राह्मणेऽप्यनक्तेरेवाक्षिणी इति[5] विज्ञायते । "कर्णः कृन्ततेर्निकृत्त[6]द्वारो भवति"। ऋच्छतेरित्याग्रा[7]यणो मन्यते । ब्राह्मणमपि चैतस्मिन्निर्वचने भवति । 'ऋच्छन्तीव खे उदगन्तामिति ह विज्ञायते' इति । ऋच्छन्तीवैतौ कर्णौ खेऽभिव्यक्ताः सन्तः शब्दाः । एतावपि चोदगन्तां प्रत्युद्[8]गच्छत इव ग्र[9]हणाय । विचार्यमाणे ज्ञायते खे कर्णाविति । 'आस्यमस्यतेः' क्षेपार्थस्य [धा० ४ । १०३] । क्षिप्यते ह्येतदाभिमुख्येनान्नम् । स्यन्दतेर्वा स्यादाङ्[10]पूर्वस्यैव स्र[11]वणार्थस्य [धा० १ । ७६२] । शुष्केऽपि ह्येतदन्ने[12] आगते स्रवत्येव श्लेष्माणं येन तदार्द्री[13]भूतं ग्रसितुं शक्यते । दध्न दध्यतेः[14] स्रवत्यर्थस्य । स्रु[15]ततरमिव तद्भवत्यु[16]त्तरात्परिमाणात् । "दस्यतेर्वा स्यात्" क्षयार्थस्य । 'विदस्ततरं' ह्युपक्षीणतरं तद् 'भवति' उत्तरस्मात्परिमाणात् । 'प्रस्नेयाः' प्रकर्षेण स्नातुं येषु योग्यमगाधत्वात्ते प्रस्नेयाः स्नानार्हा इत्यर्थः । 'ह्रदो ह्रादतेः' शब्दार्थस्य । शब्दं ह्यसावभिहन्यमानः करोति । 'ह्लादतेर्वा स्यात्' शीतीभावार्थस्य । ग्रीष्मेऽपि ह्यसौ शीत[17]ल एव भवति ।

"अथापि" अयमपरो निपातः 'समुच्चयार्थे भवति' । कतमः ? त्वदिति । किमुदाहरण[18]म् । 'पर्याया इव त्वदाश्विनं' (कौ० ब्रा० १७ ।

---

१ घ. झ. ट. ठ. 'कारणात्' नास्ति. २ क. ख. ग. ज. घ. झ. ट. ठ. चोत्पाद्य. ३ घ. झ. ट. ठ. 'च्छब्दसामर्थ्यादयमुत्पाद्यते. ४ क. ख. घ. झ. ट. ठ. व्याख्यानधर्मो द्रष्टव्यः. ५ च. ठ इति च वि°; ट. इति वि° च. ६ ग. ज. घ. झ. ट. निकृत°. ७ क. ख. ग. ज. घ. ट. आग्रायणो. ८ ग. ज. इत्युद्गच्छ°. ९ घ. ट. प्रग्रहणाय; ठ. शब्दग्रहणाय. १० च. °दापूर्व°. ११ च. श्रव°. १२ ग. ज. 'अन्ने' नास्ति. १३ क. ख. घ. झ. ट. आर्द्रीकृतं; ग. ज. आर्द्रभू°. १४ च. दध्न्यतेः १५ ग. च. ज. स्तुतर°. १६ ग. ज. घ. झ. ट. ठ. °वति पूर्वतरात्प°. १७ च. ज. सीतल°. १८ क. ख. णम् ॥ ४ ॥ पर्या°; ग. णम् ॥ १४ ॥ पर्या°.

४) इति । आह । किमुक्तं भवति । उच्यते । ‘ आश्विनं च पर्यायाश्चेति ’ । एवं समुच्चयार्थे भवति ।

“ अथ ये प्रवृत्तेऽर्थेऽमिताक्षरेषु ग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणास्ते मिताक्षरेष्वनर्थकाः कमीमिद्विति ” ।

पदपूरणलक्षणम्

व्याख्याताः कर्मोपसंग्रहार्थीयाः । तत्प्रसङ्गेन हीत्येवमादयोऽन्यार्था अप्युक्ताः । प्रतिज्ञाप्रसक्तानेवाधुना पदपूरणान्वक्ष्यामः । तेषां सामान्यमेव तावल्लक्षणमुच्यते । तत्राधिकारार्थोऽयमथशब्दः । अथ ये प्रवृत्ते परिसमाप्तेऽर्थेऽन्यैरेकवाक्यगतैः पदैरमिताक्षरेषु गद्यग्रन्थेषु वाक्यपूरणा आगच्छन्ति पदपूरणार्थास्त एव मिताक्षरेषु पादवृत्तेषु भवन्ति । उभयत्रापि तु तेऽनर्थका अनर्थान्तरवाचकाः । प्रकृतादर्थान्न किंचिदर्थान्तरं द्योतयन्ति । पदमेव वाक्यमेव वा पूरयितव्यमित्ययमेव हि तेषामर्थो नान्यदर्थान्तरम् । उक्तं च

“ क्रियावाचकमाख्यातमुपसर्गो विशेषकृत् ।
सत्त्वाभिधायकं नाम निपातः पादपूरणः ” इति ॥

के ते पदपूरणाः

कतम पुनस्त इति । उच्यते । ‘ कमीमिद्विति ’ एते चत्वारः । कम् ईम् इत् उ इति । आह । ननु ये प्रवृत्तेऽर्थ इति यदेतदुपदिष्टं लक्षणमत एव विज्ञास्यामो येऽमिताक्षरेषु वाक्येषु पठितास्ते मिताक्षरेषु पदपूरणा भविष्यन्तीति । अथ किमर्थमेते विशेषतः कमीमिदवो निर्दिश्यन्त इति । उच्यते । एते हि प्रायेण पदपूरणा एव । अन्य पुनरिवनचिन्वादयोऽर्थवन्तोऽर्थ्यर्थासंभवे सति पदपूरणा भवन्ति । लक्षणं हि तानपि व्याप्नोति । एते पुनः प्रायेणानर्थका एवेति विशेषतो निर्दिश्यन्ते । अथवा ते प्रायेणार्थवन्तः कदाचिदनर्थका एते पुनः प्रायेणानर्थकाः कदाचिदर्थवन्त इत्यतो विशेषतो निर्दिश्यन्ते । आह । एवमपि चोकारो न निर्देष्टव्यः । किं कारणम् । स हि पुरस्तान्निर्दिष्ट एव ‘ अथापि पदपूरण

---

१ च. °दयो °नार्थौ° ना २ ग. ज. अप्रवृत्ते°. ३ ग. च. परिप्रापितेऽर्थे°; ज. अपरिप्रापितेऽर्थे; ट. परित्ताप्ते° प्रापिते; ठ. प्राप्ति परि°. ४ ग. ज. अनर्थअन्तर°; च. अनर्थकान्तर°. ५ ज. झ. पदपूरणः. ६ च. अप्रवृत्ते°. ७ ग. च. ज. ‘ इति ’ नास्ति. ८ च. ‘ अपि ’ नास्ति. ९ ग. ज. निर्दिष्टव्यः.

इदमु तदु' [निरु० १ । ५] इति । उच्यते । सत्यं निर्दिष्टः । प्रासङ्गिकस्तु स[1] तस्य[2] निर्देशः । अयमेवात्रोकारस्य पदपूरणत्वे मुख्यो निर्देशः स्वप्रकरणत्वात् । आह । तत्र तर्ह्यकिंचित्कर इति ।

उकारस्य पुनर्निर्देशे कारणम्

उच्यते । नाकिंचित्करः । किं कारणम् । शृणु । यदि ह्ययमुकारस्तत्र पदपूरणत्वेन नोच्येतेहैवोच्येत[3] ततः पूर्वोक्तस्य विनिग्रहार्थीयत्वस्यायमपवाद इति गम्येत[4] । अथापि तत्रैव केवलमस्य पदपूरणत्वमुच्येत नेह तथापि पदपूरणेषु परिसंख्यायमानेषु नायमुक्त इति परिसंख्यया पदपूरण[5]त्वमस्य बाध्येत । अनिष्टं चैतत् । तस्मादुभयत्राप्यधीत[6] इति । आह । नन्वेवं खलु नूनमित्येतयोः परिसंख्यया पदपूर्णत्वस्य[7] बाधः प्राप्त इति । उच्यते । नैवम् । किं कारणम् । उकारवत्तौ[8] ह्युभावपि । यथैव ह्युकारोऽर्थवांश्चानर्थकश्चैवं तावपि । तस्मादुकारग्रहणेनैव तावप्यत्र गृहीतौ द्रष्टव्यौ । न केवलमुभावेव । किं तर्हि । अन्येऽपि[9] चानर्थकाः सन्ति । तद्यथा । 'आ घा ता गच्छानुत्तरा' [ऋ० सं० १० । १० । १०] इत्यत्र घकारः । तेऽपि चात्रावरुद्धा द्रष्टव्याः । उदाहरणमात्रप्रदर्शनार्थं ह्येतावन्त एवात्रोदाहृताः । त एते सर्व एवार्थासंभवे सत्यनर्थका एव । अर्थ[10]संभवे त्वर्थवन्त इति । किं कारणम् । न हि कस्मिंश्चिदर्थलवे[11] संभवत्यनर्थत्वकल्पना न्याय्या शब्दस्य । अर्थप्रधानो हि शब्दः । स नाकस्मादभिधेयेनार्थेन विना वाक्ये संहन्येत । तस्माद्यावद्गम्यमेव तावदर्थः कल्पयितव्यः[12] । यत्पुनरेतदुक्तं वाक्यपूरणा इत्यगतिरेषा । तदेतत्सर्वथाप्यर्थासंभवे सत्यगतौ सत्यां भवति । त एते प्रायोवृत्त्येवनन्विन्वादयोऽर्थवन्तः प्रायोवृत्त्या च कमीमिद्वोऽनर्थका इति द्रष्टव्यम् ।

सर्वे निपाताः प्रायशोऽर्थवन्तः कदाचिदनर्थकाः

---

१ घ. झ. ट. ठ. 'सः' नास्ति. २ च. त्यस्य°. ३ ग. उच्यते; ज. 'इहैवोच्येत' नास्ति. ४ क. ख. ग. च. ज. गम्यते. ५ ठ. °पूरणत्वबाधः प्राप्त इति बाध्येत. ६ ग ज. ठ. °प्यधीयत इति. ७ च. °त्वस्य च बाधः. ८ च. उकारवंततौ. ९ क. ख ग. ज. °पि तावन्त एव सन्ति. १० क. ख. 'अर्थ' नास्ति; ग. च. ज. चार्थसं° ११ क. ख. घ. झ. °दर्थे तावत्संभ°; ट. °दर्थे तावत्संभ° र्थलाभे सं; ठ. °दर्थलाभे सं°. १२ क. ख. घ. झ. ठ. कल्पनीयः; ट. कल्पनीयः । य° यितव्यः.

आह । नन्वादौ च[1] मध्ये च[2] पदपूरणानामागमो दृष्टः । तद्यथा । 'नूनं सा ते' [ऋ० सं० २।११।२१] इति । अथ कथमुच्यते 'ये प्रवृत्तेऽर्थ आगच्छन्ति ते पदपूरणाः' इति । उच्यते । न ह्येतदध्ययनकालीनमानुपूर्व्यमक्षराणां पदानां वा व्याख्याकाले नियतमस्ति । अर्थप्रकाशनार्थनिर्वचनवशेनान्यदानुपूर्व्यमुपजायते व्याख्याकाले ।

पदपूरणानां वाक्येषु स्थानम्

तत्रैवं सत्याख्यातपदं प्रधानं तदनु नाम तदनूपसर्गास्तदनु निपाता इत्येतामानुपूर्वीमवेक्ष्यैतदुक्तं[3] 'अथ ये प्रवृत्तेऽर्थ आगच्छन्ति ते[4] पदपूरणा भवन्ति' इति । एतामेवानुपूर्वीमवेक्ष्य पूर्वमाख्यातलक्षणमुक्तं तदनु नामलक्षणं तदनूपसर्गलक्षणं तदनु निपातलक्षणम् । तस्मादादावपि निपातः सन्मध्ये वान्त एव द्रष्टव्यः । लोकेऽपि हि दत्तानुयोगानां ब्राह्मणानामवस्थानक्रमोऽकिंचित्कर एव भवति । मध्येऽन्त्ये[5] वावस्थितो यः प्रधानं[6] भवति[7] सोऽग्र्य इत्युच्यते । तस्मात्सम्यगेवोक्तं 'ये प्रवृत्तेऽर्थे'[8] इति । व्यत्ययं चाधिकृत्य श्लोकमप्युदाहरन्ति ।

"आदिमध्यान्तलुप्तानि प्रच्छन्नापिहितानि[9] च ।
ब्रह्मणः परिगुप्त्यर्थं वेदे व्यवहितानि च" इति ॥ ९[10] ॥

निष्टुक्त्रासश्चिदिन्नरो भूरितोका वृकादिव । बिभ्यस्यन्तो ववाशिरे शिशिरं जीवनाय कम् । शिशिरं जीवनाय । शिशिरं शृणातेः शम्नातेर्वा । एमेनं सृजता सुते । आसृजतैनं सुते । तमिद्वर्धन्तु नो गिरः । तं वर्धयन्तु नो गिरः स्तुतयो गिरो गृणातेः । अयमु ते समतसि । अयं ते समतसीवोऽपि दृश्यते[11] । सु विदुरिव [काठक सं० ८ । ३

---

१ च. 'च' नास्ति. २ ग. च. ज. 'च' नास्ति. ३ क. ख. °दुक्तं तत्र ये°; घ. झ. ढ. ढ. °दुक्तमथ तत्र ये°. ४ ग. ज. 'ते' नास्ति. ५ क. ख घ. झ. ट. ठ. मध्येन्तेः. ६ क. ख. प्रधानः. ७ क. ख. घ. झ. ट. ठ. 'भवति' नास्ति. ८ ग. च. ज. येऽप्रवृ°. ९ ठ. प्रच्छिन्ना°. १० न कस्मिन्नपि पुस्तकेऽङ्कोऽस्ति. ११ क. ख. °श्यते ॥५॥ सु°; °छ. त. °श्यते ॥ १४ ॥ सु°; द. °श्यते ॥ ९ ॥ सु°.

तथा ८ । १३] सु विज्ञायेते इचाथापि नेत्येष इदित्येतेन संप्रयुज्यते परिभये ॥ १० ॥[1]

अधुनैवमेतानुदाहृतान्कमीमिदून्समासतः प्रत्येकमुदाहरणैर्दर्शयति । 'शिशिरं जीवनाय कम्' [ऋ० १० । १६१ । १] इति ।

कमित्यस्योदाहरणम्

अत्र कमित्येष पदपूरणः । शिशिरं जीवनाय जीवनार्थमित्यर्थः । तत्र हि प्रायेण प्रचुराणि शरद्धान्यानि भवन्ति । कमिति पदपूरण एव । शाखान्तरेषु शेषो द्रष्टव्यः । केचिदेवं कृतशेषमत्राधीयते ।

'निष्ट्वक्त्रासश्चिदिन्नरो भूरितोका वृकादिव ।
बिभ्यस्यन्तो ववाशिरे शिशिरं जीवनाय कम्' इति ॥

निष्ट्वक्त्रासः । निष्ट्वक्त्रा एव निष्ट्वक्त्रासः । निर्वसना इत्यर्थः । अपि च । भूरितोका बह्वपत्या इत्यर्थः । के पुनस्ते । दरिद्राः केचिन्नरो मनुष्या इत्यर्थः । किं तेषामिति । वृकादिव बिभ्यस्यन्तः पुनः पुनर्भृशं वा बिभ्यतो वृकादिव हिमाद्ववाशिरे पुनः पुनर्भृशं वा वाश्यन्ते । किमिति ववाशिरे । शिशिरमस्माकं जीवनाय जीवनार्थमागच्छतीत्येवं हेमन्ते ववाशिरे । अल्पतरशीतं हि शिशिरम् । सुखं तत्र जीविष्याम इत्यभिप्रायः ।

निगमप्रसक्तस्य शिशिरशब्दस्य निर्वचनम् । 'शिशिरं शृणातेः' हिंसार्थस्य [धा० ९ । १६] । 'शम्नातेर्वा' हिंसार्थस्यैव । नार्थकृतो विशेषः । हिनस्ति हि तस्मिन्कालेऽप्रतिबध्यमानोऽतिशयेन दावाग्निः शुष्कानोषधिवनस्पतीन् ।

ईमित्यस्योदाहरणम् । 'एमेनं सृजता सुते मन्दिमिन्द्राय मन्दिने । चक्रिं विश्वानि चक्रये" [ऋ० सं० १ । ९ । २]॥ ऐन्द्र्येषा गायत्री ।

ईमित्यस्य

मधुच्छन्दस आर्षम् । पृष्ठ्याभिप्लवयोः स्तोमवृद्धौ प्रातःसवने ब्राह्मणाच्छंसिनः शस्त्रे महाव्रते च तृचाशीतिषु विनियुक्ता । आसृजत । एनमाभिमुख्येन सृजत । ईमिति पदपूरण एव । सृजत[12] दत्तोक्थ[13]पात्रेण चमसैश्च सोमं हे

---

१ क. ख. छ. त. द. '१०' नास्ति. २ ठ. निष्ट्वक्त्रास इति निष्ट्व°. ३ ग. झ. विभ्यस्यंतो; घ. विभ्यस्यांतो; ट. बिभ्यस्यांतो. ४ च. ये निस्त्वे (ष्ट्व) क्त्रासः । निस्त्वक्त्रा एव निस्त्वक्त्रासः. ५ घ. विभ्यतो. ६ ग. च. ज. वाश्यंते ववाशिरे । किमि°. ७ ग. च. ज. °हरणं ॥ १६॥ एमे°. ८ घ. झ. ट. एमेनं० चक्रये; ग. ज. एमेनं सृजता सुते० चक्रये. ९ च. ऐन्द्रेषा. १० च. 'ब्राह्मणा' नास्ति. ११ घ. झ. ट. °व्रते बृहतीतृचा°. १२ कं. ख. घ. झ. ठ. ठ. 'सृजत' नास्ति; ग. ज. आसृजत. १३ घ. झ. ट. दत्तोच्छपात्रेण.

अध्वर्यवः । किमासृजत[1] । योऽयमिन्द्रस्य सुतेऽभिषुते सोमे स्वांश उक्थपात्रचमसस्थ एनमासृजत । मन्दिं मन्दयितारम्[2] । मन्दिन इन्द्राय हर्षयते । चक्रिं चक्रनवन्तं चरणवन्तं[3] क्रमणवन्तं वा । अपि वा हविर्धानशकटचक्राभ्यां चक्रवन्तम् । अपि च चक्रादिति कर्मनाम [निघ० २ । १]। प्रतिविशिष्टवीर्यजनकैः संस्कारकर्मभिस्तद्वन्तम् । विश्वानि सर्वाणि भूतानि कर्माणि चक्रये कृतवत इन्द्राय । सोमोऽत्र प्रत्यक्षो दातारश्च । परोक्षा त्विन्द्रस्य स्तुतिः । ' अथापि प्रत्यक्षकृताः स्तोतारो भवन्ति परोक्षकृतानि स्तोतव्यानि ' [नि० ७ । २] इति हि वक्ष्यति ।

इदित्यस्य

'तमिद्वर्धन्तु नो गिरः' इति ' इत् ' इत्यस्योदाहरणम्[4] । "तमिद्वर्धन्तु नो गिरो वत्सं संशिश्वरीरिव । य इन्द्रस्य हृदंसनिः[5] " [ऋ० सं० ९ । ६१ । १४] ॥ अमहीयोराङ्गिरसस्येयमार्षम् । गायत्री सौमी ग्रावस्तुतौ विनियुक्ता । तं वर्धयन्तु नः । तं सोमम् । 'इत्' इति पदपूरणः । वर्धयन्तूपजातवीर्यं कुर्वन्तु देवतृप्तये न एता अस्मद्गिरः स्तुतयः । कथं पुनर्वर्धयन्तु । वत्सं संशिश्वरीरिव । वत्समिवैकशिशुका बह्वयो गावः । ता यथा पर्यायेण वत्समेकं मृतवत्साः स्वैः स्वैः पयोभिर्वहनादिसमर्थं कुर्युरेवमेवास्मद्गिर एतं सोममुपजातवीर्यं देवतर्पणाय कुर्वन्तु वर्धयन्तु[7] । यः कतमः । य इन्द्रस्य हृदंसनिर्हृदयस्य[8] संभक्ता तमेनं वर्धयन्त्वित्यभिप्रायः ।

आह । कस्मात्पुनरत्र केचिदुदाहरणमन्त्रा अशेषाः पठ्यन्ते निरुच्यन्ते च केषांचिदेकदेशा[9] इति । उच्यते । ये तावदशेषाः पठ्यन्ते निरुच्यन्ते च ते[10] व्याख्याधर्मोपदर्शनार्थम्[11] । यदि पुनः सर्व एव पठ्येरन्निरुच्येरंश्चातिगुरु शास्त्रं संपद्येत । अथापि सर्वेषामेवोदाहरणमन्त्राणामेकदेशः[12] पठ्येत निरु-

---

१ ग. ज. कमासृजत. २ ग. मादयि°. ३ ट. चरणवन्तं; ठ. ' चरणवन्तं ' नास्ति. ४ ग. च. ज. °णम् ॥ १७ ॥ त°. ५ घ. झ. ट. तमिद्वर्ध० दं सनिः; ग. ज. तमिद्वर्धन्तु नो गिरो० हृदं सनिः. ६ घ. झ. ट. ' एव ' नास्ति. ७ घ. झ. ट. °यन्तु । कतमःसः । य°; ग. ज. °यन्तु । कयःतमः । य°; च. ठ. °यन्तु । यः कतमः । स इन्द्र°. ८ क. ख. ग. ज. हृदयसंभक्ता. ९ घ. झ. ट. एकदेशः. १० च. 'ते' नास्ति. ११ क. ख. ग. ज. धर्मोपदेशनार्थं. १२ क. ख. घ. झ; ट. °षामप्युदाह°.

मन्त्राणामेकदेशेन पठनेऽशेषेण च पठने प्रयोजनम् ।

च्येत[1] च तथापि व्याख्याधर्मो न प्रदर्शितः स्यात् । तस्माद्व्याख्योपप्रदर्शनार्थं[2] केचिदशेषाः पठ्यन्ते निरुच्यन्ते च केषांचिदेकदेशाः शास्त्रातिगौरवभयादिति । प्रतिमन्त्रमपि सकलार्धर्चपादाध्ययने शक्यते प्रयोजनमन्वेष्टुम् । तदेतत्समासेन ब्रूमः । यस्मिन्यस्मिन्मन्त्रे यद्यत्पदमेकार्थमनेकार्थमनवगतसंस्कारं वा निर्ब्रवीति किंचिद्वान्यच्छब्दरूपमध्याहरत्यन्यद्वापोहत्यन्यथा वा कस्यचिद्विपरिणामं करोति संदिग्धं वा निर्णयति तदर्थमेव तं सकलमधीते । यस्मिन्वार्धर्चे पादे वा तत्पदं भवति यदभिमतं निर्वक्तुं तावन्मात्रमेवाधीते तन्निर्विवक्षया । तदेतदेवं निपुणमन्वेष्यं[3] सर्वत्र ।

उ इत्यस्योदाहरणम्

उकारस्योदाहरणम्[4] । " अयमु ते[5] समतसि कपोत इव गर्भधिम् । वचस्तच्चिन्न ओहसे (ऋ० सं० १ । ३० । ४) ॥ शुनःशेपो[6] यूपे नियुक्त आत्मानं मोचयितुमिच्छन्ननया गायत्र्येन्द्रं तुष्टाव । अयमिति वर्तमान एव कर्मणि दर्शयन्नाह[7] । ते तव त्वदर्थं सोमो यं प्रति नित्यकालमेव समतसि संपतसि । त्वं तासु[9] तासु क्रियास्वाहूयमानः समतसि संपतसि । कथं पुनर्यं प्रति समतसि । कपोत इव । कत्पतनः कपोतः कुत्सितपतनः । स यथा गर्भधिं गर्भधानीं कपोतिकामण्डाश्रयं वा नीडं[10] प्रति पुनः पुनः पतत्येवं यं प्रति नित्यकालमिव संपतसि त्वं स एवायमभिषुतः सोम एभिर्ऋत्विग्भिः । अथ किमस्माभिः करिष्यसि । मोचय अस्मान् । किं वा वच एवेदं नः स्तुतिलक्षणं नोहसे न वितर्कयसि रोरूयमाणानां केनाप्यभिप्रायेण वयमेतद्ब्रूमः कैर्वा युष्मद्गुणैर्न[8] युक्तमेतदिति यतो न मोचयस्यस्मानतो यूपात् । श्रुत्वैतदवबुद्ध्यार्थमार्ततामस्माकमवधार्य कारुण्या[11]-

१ घ. झ. ट. वा. २ क. ख. घ. झ. ट. °व्याख्याधर्मोपदर्श°; ठ. °स्यात् । तद्व्याख्योपदर्श°. ३ क. ख. घ. झ. ट. अन्वेष्टव्यं°. ४ ग च. ज. °णम् ॥ १८ ॥ अय°. ५ घ. झ. ट. ते०हसे. ६ क. च. शुनःशेफो. ७ क. ख. निर्दर्शयन्. घ. झ. ट. ठ. निदर्शय°. ८ क. ख. ग. ज. घ. झ. युष्मदर्थं; ट. युष्मद्° त्व. ९ क. ख. घ. झ. 'तासु' सकृदेव वर्तते १० घ. झ. नीलं; ट. नीळं. ११ ग. च. कारुण्योन्मोच°.

न्मोचयास्मान् । किं तेऽस्माभिरयमेव तेऽस्मत्तः प्रतिविशिष्टतरः सोमोऽभिषुत इत्यभिप्रायः ।

'इवोऽपि दृश्यते' कदाचिदनर्थक इति वाक्यशेषः । किमुदाहरणम्[1] ।

इवेत्यस्य च

'सुविदुरिव सु विज्ञायेते इव' इत्येते उदाहरणे । सुष्ठु विदुर्यज्ञं ब्राह्मणा इति । इवोऽनर्थक एव वाक्यपूरणः । सुष्ठु विज्ञायेते यज्ञो नक्षत्रं ब्राह्मणैरिति । अत्रापीवोऽनर्थक एव ।

व्याख्याताः पदपूरणाः । निपातसमाहारमधुना दर्शयति । तदधिकारार्थोऽयं 'अथ' शब्दः । 'अपि' इति संभावने । अप्ययमेव इदिति केवलः प्रयुज्यमानः पद[3]पूरणो भवति । अपि चायमेव 'न' इत्यनेने[4] संप्रयुक्तः 'प्रयुज्यते परिभये' अर्थे । सर्वतो भयं परिभयम् । कथं प्रयोगः । 'नेज्जिह्मायन्त्यो नरकं पताम' इति । मृग्यः शेषः । केचित्त्वेतं[5] कृतशेषमत्राधीयते[6] ॥ १० ॥

हविर्भिरेके स्वरितः सचन्ते सुन्वन्त एके सवनेषु सोमान् । शचीर्मदन्त उत दक्षिणाभिर्नेज्जिह्मायन्त्यो नरकं पतामेति ॥ नरकं न्यरकं नीचैर्गमनं नास्मिन्रमणं स्थानमल्पमप्यस्तीति वाथापि न चेत्येष इदित्येतेन संप्रयुज्यतेऽनुपृष्टे न चेत्सुरां पिबन्तीति सुरा सुनोतेरेवमुच्चावचेष्वर्थेषु निपतन्ति त उपेक्षितव्याः ॥ ११[7] ॥

इति प्रथमस्य तृतीयः पादः ॥

नेत्परिभये इत्यस्यादाहरणम्

'हविर्भिरेके स्वरितः संचन्ते सुन्वन्त एके सवनेषु सोमान् । शचीर्मदन्त उत दक्षिणाभिर्नेज्जिह्मायन्त्यो नरकं पताम' ॥ इति ।

---

१ ग. °णम् । १४ सुविदु°. २ घ. ट. नक्षत्रं य ब्राह्मणै°; ठ. यज्ञनक्षत्रे ब्रा°. ३ ग. पाद°. ४ क. ख. घ. झ. ट. ठ. इत्येतेन. ५ ठ. °त्वेवं कृ° तं. ६ ग. च. ज. °यते ॥१९॥ हवि°; इतरेषु पुस्तकेष्वङ्को नास्ति. ७ क. ख. ६; छ. त. १५; ड १०. ८ ङ. थ. ध. ठ. 'इति०पाद' नास्ति; त. इति प्रथमाध्यायस्य द्वितीयः पादः ॥ २ ॥; द. द्वितीयः पादः. ९ ग. ज. सचन्ते० पतामेति; ठ. स्वरित इति.

नारदेन किल विप्रलभ्यमाना असुरपत्न्यो भर्तॄन्प्रति तमनेन मन्त्रेण प्रत्यूचुः । एके तावत् इतो लोकाद्धविर्भिः पुरोडाशादिभिर्[1]निमित्तभूतैः स्वः सचन्ते[2] स्वर्गं[3] प्राप्नुवन्ति । अथैके सवनेषु यज्ञेषु सोमानभिषुण्वन्तः । तेन कर्मणेत्यर्थः । शचीर्मदन्तः । अन्ये शच्या वाचा स्तुतिभिरेके देवान्मादयन्तः संतर्पयन्त इत्यर्थः । अप्यन्ये दक्षिणाभिः स्वः सचन्ते इत्येतदेवानुवर्तते । तत्रैवं सति तेन तेनाभ्युद्यतेषु प्राणिषु श्रेयः प्रति यदि वयमेतानपि भर्तॄन्न सम्यक्परिचरेमान्येषां जपहोमादीनां कर्मणामसंभवे सति नेद्वयमेतेषामप्युपरि जिह्मायन्त्यो जिह्ममाचरन्त्यो भगवन्नरकं पताम । न ह्यन्यो भर्तृपरिचर्यातः स्त्रियाः कश्चन धर्मोऽस्तीत्यभिप्रायः ।

नरकशब्दं निर्ब्रवीति । नीचैरस्मिन्नर्यते गम्यत इति नरकमथवा [6]नास्मिन् रमणं रतिकरं स्थानमल्पमप्यस्तीति नरकम् ।

'अथापि' अयमपरो निपातसमाहारो 'नचेत्येष इदित्येतेन' एव संप्रयुक्तः 'प्रयुज्यते' । केनचित् 'अनुपृष्टे' सति प्रतिवचनं न चेदित्यस्योदाहरणम् भवति । तद्यथा । कश्चित्कंचित्पृच्छति तिष्ठन्ति वृषला इति । ततः प्रत्याचष्टे तिष्ठन्तीति । ततो यदि तिष्ठन्ति किमर्थं नागच्छन्तीति पुनरनुपृष्टे ब्रवीति 'न चेत्सुरां पिबन्ति' आगमिष्यन्तीति । यदि सुरां न पिबन्ती[7]त्यर्थः । अथ कस्मात् 'सुरा' । 'सुनोतेः' । सा ह्यभिषूयतेऽनेकैर्द्रव्यैः पिष्टादिभिः ।

'एवमुच्चावचेष्वर्थेषु निपतन्ति त उपेक्षितव्याः' । एवमनेन प्रकारेणोच्चावचेष्वर्थेषु बहुप्रकारेषु समाहृताश्चान्येऽप्येवं बहुप्रकारा निपतन्ति प्रयुज्यमानाः । ते लक्षणशास्त्रमेतच्चार्थनिर्वचनशास्त्रमुपेत्योपगम्यानुप्रविश्येक्षितव्याः । कः कस्मिन्नर्थे[8] वर्तत इत्येवं द्रष्टव्याः । परीक्ष्या[9] इत्यर्थः ।

इतिकरणोऽधिकारपरिसमाप्त्यर्थः । इमानि[10] चत्वारि पदजातान्यनुक्रान्तानि नामाख्याते चोपसर्गनिपाताश्चेति प्रतिज्ञाभ्यासो निर्गमनार्थः[11] ॥ ११ ॥[12]

[13]इति षष्ठस्याध्यायस्य तृतीयः पादः ॥

---

१ ग. ज. पुरोलाशा°. २ ग. ज. सचन्त; च. स्वरसचन्त. ३ क. ख. घ. झ. ट. ठ. स्वर्गं लोकं प्राप्नु°. ४ क. ख. व. झ. ट. °वन्ति स्म । अथैके°; ग. ज. °वन्ति स्वा अप्येके°. ५ च. स्वरसचन्तेत्येवदे°. ६ क. ख. घ झ. ट. ठ. नास्त्यस्मिन्. ७ ग. सुरां भवन्ति; ज. सुरां न वंति. ८ ठ. °तव्याः । ११ । एक°. ९ घ. च. ट. परीक्षाः. १० ग. ज. इतीमानि. ११ च. निगमर्थः. १२ क. ख. ६; ग. १५; इतरेषु पुस्तकेष्वङ्को नास्ति. १३ ग. च. ज. 'इति' नास्ति; घ. झ. ट. ठ. 'इति षष्ठाध्या°.

चतुर्थः पादः ॥

इतीमानि चत्वारि पदजातान्यनुक्रान्तानि नामाख्याते चोपसर्गनिपाताश्च तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च न सर्वाणीति गार्ग्यो वैयाकरणानां चैके तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां संविज्ञातानि तानि यथा गौरश्वः पुरुषो हस्ती-त्यथ चेत्सर्वाण्याख्यातजानि नामानि स्युर्यः कश्च तत्कर्म कुर्यात्सर्वं तत्सत्त्वं तथाचक्षीरन्यः कश्चाध्वानमश्नुवीताश्वः स वचनीयः स्याद्यत्किंचित्तृन्द्यात्तृणं तदथापि चेत्सर्वाण्याख्यातजानि नामानि स्युर्यावद्भिर्भावैः संप्रयुज्येत तावद्भ्यो नामधेय[1]प्रतिलम्भः[3] स्यात्तत्रैवं स्थूणा दरशया[2] वा सञ्जनी च स्यात् ॥ १२ ॥

इमानि पदजातानीति व्याख्यातम् [निरु० १ । १] । अनुक्रान्तान्यानुपूर्व्येण । पूर्वमाख्यातं ततो नामानि तत उपसर्गास्ततो निपाता इत्येवमानुपूर्व्येण क्रान्तानि वर्णितानि व्याख्ययेति वाक्यशेषः । कतमानि पुनस्तानि । नामाख्याते चोपसर्गनिपाताश्चेति । तदपि व्याख्यातमेव [निरु० १ । १]। यच्च तदुक्तं 'नाम्नः किंचिदवशिष्यते तच्चतुर्थेन पादेन वर्णयिष्यामः' (पत्रं ३३ आवलयः १–३) इति तदिदमेवावसरप्राप्तं पदचतुष्टयलक्षणानन्तरमारभ्यते । 'तत्र नामान्याख्यातजानीति शाकटायनो नैरुक्तसमयश्च' । तत्र तस्मिन्नेव पद-चतुष्टये यानि नामानि तानि सर्वाण्यविशेषेणाख्यातजानीत्येवं शाकटायन आचार्यो ब्रवीतीति वाक्यशेषः । नैरुक्तानां चैष समयः सिद्धान्तः सर्वेषामविशेषेण । आह । कः पुनरन्यथा ब्रवीति येनैवमुच्यते

सर्वाणि नामान्याख्यातजानीत्येकं मतम्

---

१ छ. नामधेयः प्रतिलम्भस्या°. २ छ दर्शया चा सञ्जनी° रश; त. दरशया चा सञ्जनी°; द दर्शया चा सञ्जनी°; ठ. दरसया°. ३ क ख. द. १; छ. त. १६. ४ क. ख. ग. ज. घ. झ. ट. ठ. इतीमानि चत्वारि पद°. ५ क. ख. ग. ज. घ. झ. ट. ठ. °शेषेण मार्ग्यवर्जम् । आह°. ६ घ. ट. °ब्रवीति । नैवमुच्यते । शाक°; ठ. ब्रवीति । उच्यते । शाक°.

न सर्वाणीत्यन्यत् शाकटायन एवं ब्रवीतीति[1] । उच्यते । ' न सर्वाणीति[2] गार्ग्यः ' ब्रवीति । किं गार्ग्य एव[3]। नेत्युच्यते । ' वैयाकरणानां चैके ' । व्याकरणमधीयते एते[4] वैयाकरणाः[5] । तेषां चैके न सर्वाण्याख्यातजानि नामानीत्येवं ब्रुवत इति वाक्यशेषः ।

' तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां संविज्ञातानि तानि ' इति । तदेतत्प्रपञ्च्यते गार्ग्यसंविज्ञातनाम्नां लक्षणम् पक्षेण । यान्याख्यातजानि नामानि यानि वा[6] नेत्येवं पर्युपयुक्तस्तच्छब्दः । इह त्रिविधा व्यवस्था नाम्नाम् । तद्यथा । प्रत्यक्षक्रियाणि प्रकल्प्यक्रियाण्यविद्यमानक्रियाणीति । तत्र प्रत्यक्षक्रियाणि । तद्यथा कारको हारक इति । प्रकल्प्यक्रियाणि[7] । तद्यथा गौरश्व इति । अविद्यमानक्रियाणि । तद्यथा डित्थो[8] डवित्थः अरविन्दो वार्विंडे[9] इति । तत्रैवं सति यत्र येष्वित्यर्थः । केषु । नामसु । स्वरसंस्कारौ । स्वरश्चोदात्तादिः संस्कारश्च प्रकृतिप्रत्ययादि[10]रेतौ स्वरसंस्कारौ । समर्थौ । समर्थता नामोपपत्तिरुच्यते । संगतार्थौ लक्षणशास्त्रविहितयोपपत्त्या युक्तावित्यर्थः । यथैव लक्षणाविप्रतिपत्त्या स्वरोऽवस्थित एवं संस्कारोऽपि । येष्वपि च प्रादेशिकेन । प्रदिश्यते[11]ऽनयेति प्रदेशः क्रिया यां तस्मिन्द्रव्ये व्य[12]वस्थिता यद्धेतुकस्तस्य नामधेयप्रतिलम्भोऽभिप्रेतस्तस्याः प्रदेशाख्यायाः क्रियाया अभिधायको धातुः स गुण इत्युच्यते । अन्यत्र हि गुणशब्दोऽप्रधाने वर्तते । शेषः अङ्गं गुणः इति समानार्थाः । प्रधानं तु तत्र क्रिया प्रदेशाख्या । तदभिधायको धातुर्गुणाख्यः । स प्रदेशवाचकत्वात्प्रादेशिको गुण इत्युच्यते । तेन धा[13]तुरूपेणान्वितावनुगतौ स्वरसंस्कारौ स्यातां भवेतां येषाम् । आह । किं तेषामिति । उच्यते । संविज्ञातानि तानि । समं विज्ञातान्यैकमत्येन विज्ञातानीत्यर्थः । तेषु तावद्-

---

१ घ. झ. ट. ' इति ' नास्ति. २ ग. ज. ' इति ' नास्ति. ३ घ. झ ट. ठ. एव ब्रवीति । ने°. ४ घ. झ. ट ठ. ' एते ' नास्ति. ५ च. वैयाकरणानां तेषां°. ६ घ, झ. ट. ठ. वान्यानि । एवं°; च. वा निति एवं°. ७ क. च. प्रकल्पक्रिया°. ८ ग. ज. दित्थो दवित्थ°. ९ ग. ज. चार्विंड इति. १० ग. ज. प्रत्ययादिभिस्तौ°. ११ क. ख. ग. ज. °श्यते द्रव्यमनये°. १२ क. ख. घ. झ. °न्द्रव्येऽवस्थि°; ट. °न्द्रव्येऽवस्थि° व्य. १३ घ. झ. ट. ठ. धातुगुणेनान्वि°.

विप्रतिपत्तिरेवास्माकमाख्यातजानि तानीति[1] । तद्यथा । कर्ता कारकः पक्ता पाचक इति । न पुनर्यथा गौरश्वः पुरुषो हस्तीति । किं कारणम् । एतेषु प्रकल्प्यन्ते क्रिया न साक्षादुपलभ्यन्ते । अपि चैतेषु कल्पयितुमपि तावच्छक्यन्ते । न डित्थादिषु[2] पुनः प्रकल्पयितुमपि शक्यन्ते । तस्मान्न सर्वाण्याख्यातजानि नामानीति । तत्र[3] यदुक्तं सर्वाण्याख्यातजानि नामानीत्येतदयुक्तम् । रूढिशब्दे च क्रियाः केवलं शब्दव्युत्पत्तिकर्मण्युपलक्षणभूता निमित्तभावेनोपादीयन्ते न वस्तुतोऽर्थक्रियास्वनुसद्भावभावं प्रति । तत्र शब्दस्य[4]प्रच्युतावुपलक्षितेऽनुप्रवृत्तेऽभिधाने निवृत्तायां क्रियायामुपरतसाधन[6]व्यापारं निरूप्य[7] क्रियायामभिधानं[5] वस्तुमात्रस्य प्रतिनिर्देशकं रूढिरित्यभिधीयते ।

अपरो व्याख्यामार्गः । 'यत्र[8] स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्याताम्' । यत्र यस्मिन्नाम्नि स्वरसंस्कारौ समर्थावष्टाध्यायीलक्षणोपपत्त्या युक्तौ प्रदेशाभिधायिना च धात्वाख्येन प्रादेशिकेन गुणेनान्वितावनुगतौ[9] स्यातां न्यायवत्कार्मना[10]मिकसंस्कारेण युक्तौ[11] । तद्यथा । कर्ता कारकः पक्ता पाचक इत्येवमादि । तदाख्यातजं गुणकृतमिति प्रतीम इति वाक्यशेषः । येषु पुनरष्टाध्यायीलक्षणपराङ्मुखौ स्वरसंस्कारावनुगतौ न च न्याय्य[12]कार्मनामिकसंस्कारयुक्तेन प्रदेशाख्येन धातुरूपेण । किं तेषामिति । उच्यते । 'संविज्ञा[13]तानि तानि' । संविज्ञा[14]नपदमितीह शास्त्रे रूढिशब्दस्येयं संज्ञा । वक्ष्यति ह्यग्निरिन्द्र इत्येवमादीनां[15] संविज्ञानपदत्वं 'यत्तु संविज्ञानभूतं स्यात्' [निरु० ७ । १३] इति । तथा[16] वृत्रहा पुरन्दर इत्येवमादीनां गुणपद-

तद्यत्र० इत्यस्यान्या व्याख्या

१ ठ. 'तानि' नास्ति. २ ग. च. ज. दित्थादिषु. ३ घ. झ. ट. तत्. ४ क. ख. ग. ज. शब्दस्य प्र°. ५ ग. ज. 'क्रियायां' नास्ति. ६ ग. ज. साधनाव्या°. ७ क. ख. ग. ज. घ. झ. ट. ठ. निरूप्यक्रियाया°. ८ क. ख. ग. ज. तद्यत्र. ९ घ. ट. °नान्वितौ अतौ अनुगतौ; झ. 'अनुगतौ' नास्ति. १० क. ख. ग. ज. घ. झ. ट. ठ. °नामिकसंयुक्तेन संस्का°. ११ क. ख. ग. ज. घ. झ. ट. ठ. 'युक्तौ' नास्ति. १२ घ. झ. °च त्यायाकार्म°; च. °च नापि न्याय्यकार्म°; ट. °च त्यायाकार्म° न्याय्य; ठ. °च कर्मनामि°. १३ च. झ. °ज्ञानानि. १४ ग. ज. संविज्ञातपद°. १५ च. °मादीनां गुणपदत्वम् । स एवाय°. १६ घ. झ. ट. यथा.

संविज्ञानपदस्यार्थः

त्वम् [निरु० ७ । १३] । स एवायमिहापि विभागो द्रष्टव्यः । तत्र गुणपदानि कारक-[1]पाचकादीनि । संविज्ञान[2]पदानि तानि यथा गौरश्वः पुरुषो हस्तीत्येवमादीनि । न ह्येषां गवादीनामष्टाध्याय्यां व्युपत्तिलक्षणमस्ति । तस्माद्रूढिशब्दा एवैत इति ।

प्रदेशपदस्य गुणपदस्य चान्योऽर्थः

अन्ये तु प्रदेशो व्याकरणमिति व्याचक्षते । तत्र हि शब्दानां लक्षणानि प्रदिश्यन्ते । तत्कृतः [3]कैश्चिल्लक्षणानुग्रहः लक्षणावयवो वा गुण इत्युच्यते । प्रसिद्धो हि गुणशब्दोऽनुग्रहेऽवयवे च । [4]तद्यथा । गुणे ममायं वर्तत इत्युक्तेऽनुग्रहे [5]वर्तत इति गम्यते । अवयवेऽपि द्विगुणा रज्जुस्त्रिगुणेति चोक्ते द्व्यवयवा त्र्यवयवेति गम्यते । शेषं समानमेव पूर्वाभ्यामर्थाभ्याम् ।

अथवा सं[6]विज्ञानानि तानि सं[7]विज्ञातानि तानि वे[8]त्युभावप्ये[9]तौ पाठौ । तस्मादुभयथापि [10]व्याख्यातव्यम् । सत्त्वं प्रदेश इति केचि[11]दङ्गभूता क्रिया गुण इति व्याचक्षते ।

शाकटायनमते दोषाः।
१. एकं कर्म कुर्वाणा नैकेन नाम्नाऽभिधीयन्ते

किं चान्यत् । 'अथ चेत्सर्वाण्याख्यातजानि नामानि स्युः' तथाप्ययमपरो दोषः प्र[12]सज्येत । आह । कतम इति । 'यः [13]कश्च तत्कर्म कुर्यात्सर्वं तत्सत्त्वं तथाचक्षीरन्यः कश्चाध्वानमश्नुवीताश्वः स वचनीयः स्याद्यत्किंचित्तृन्द्यात्तृणं तत्' इति । यः कश्चाविशेषेण प्राणी तत्कर्म कुर्यात् । यत्किंचिदनेकप्राण्याश्रयमेकं तदित्यभिप्रेत्योच्यते तत्कर्म कुर्यादिति । सर्वमेव तं प्राणिनं तत्सत्त्वं तथा तेनैवैकेन नाम्नाचक्षीरन् । तद्यथा । यः कश्चाध्वा-

१ ग. च. ज. °पावका°. २ घ. झ. ट. 'संविज्ञानपदानि तानि' नास्ति. ३ क. ख. घ. झ. ट. ठ. क्वचित्. ४ घ. झ. टं. ठ. 'तत्' नास्ति. ५ झ. ट. वर्तेतन इति. ६ ठ. 'सविज्ञानानि तानि' नास्ति. ७ घ. ट. 'संविज्ञातानि तानि' नास्ति; च. संविज्ञातानि वेत्यु°; झ. संविज्ञानानि वेत्यु°. ८ क. ख. ग. ज. ठ. चेत्यु°. ९ क. ख. व. झ. ठ. 'एतौ' नास्ति; ट. वेत्युभावपि पाठौ° त्येता. १० क. ख. व. झ. ठ. व्याख्यातम्; ट. व्याख्यातं तव्यम्°. ११ च. केचिदङ्गतावत्क्रियां°. १२ ठ. प्रसज्जेत. १३ च. कश्चित्कर्म°.

नमविशेषेणानश्वोऽप्यश्नुवीताश्व[1] इत्येवं स वचनीयः स्यात् । कस्माद्वाश्वोऽश्नुवन्नश्व इत्युच्यतेऽन्योऽश्नुवन्नपि नोच्यत इति विशेषहेतुर्नास्ति[2] । तस्मादश्वोऽपि नैवाशनक्रियायोगाभिप्रायेणाश्व इत्युच्यते । किं तर्हि । शब्दव्यवहार एवायमर्थप्रत्यायनार्थ ईदृशक्रियानिरपेक्ष[3] एव[4] । यत्किंचित्तृन्द्यादविशेषेण तत्सर्वं तर्दनक्रियायोगात्तृणमित्येवोच्येत[5] । न चोच्यते । तस्मान्न सर्वाण्याख्यातजानि नामानीति ।

२ भिन्नक्रियायोगादेकमेव द्रव्यं भिन्ननामभिरभिधीयेत

किं चान्यत् । 'अथापि चेत्' अथापि यदि । 'सर्वाण्याख्यातजानि नामानि स्युः' तथाप्ययमपरो दोषः स्यात् । आह । कतम इति । उच्यते । 'यावद्भिर्भावैः संप्रयुज्येत तावद्भ्यो नामधेयप्रतिलम्भः स्यात्' । 'तत्रैव' तद्यथा । 'स्थूणा दरशया वा सञ्जनी च स्यात्' । क्रियाहेतुके हि नामधेयप्रतिलम्भे[6] सति यावद्भिर्भावैर्यावतीभिः क्रियाभिरेकं द्रव्यं संयुज्येत तावद्भ्यो भावेभ्यस्तावतीभ्यः क्रियाभ्यो नामधेयप्रतिलम्भः स्यात् । किं कारणम् । न हि तत्र[7] कासांचिद्व्यावर्तको[8] विशेषहेतुरस्त्यन्यासां वा नियामकः । तत्रैवं सति स्थूणैकैव सती दरे शेते इति दरशया[9] इत्युच्येत । न चोच्यते । तथा च सज्यते तस्यां[10] वंश इति सञ्जनीत्युच्येत । न चोच्यते । एवमनेकानि सत्त्वान्येकक्रियायोगादेकनामानि स्युरेकं वानेकक्रियायोगादनेकनाम । उभयथापि च[11] व्यवहाराप्रसिद्धिः । तस्मान्न सर्वाण्याख्यातजानि नामानीति[12] ॥ १२ ॥

---

१ ग. च. ज. °श्नुवीतश्व इ°. २ क. ख. घ. झ. ट. ठ. नास्तीति. ३ क. ख. ग. ज. घ. झ. ट. ईदृशः क्रि°. ४ क. ख. घ. झ. ट. ठ. °पेक्षः । एवमेव यत्किं°. ५ क. ख. ग. च. ज. °त्येवमुच्यते. ६ घ. झ. ट. प्रतिलंभके. ७ घ. झ. ट. ठ. 'तत्र' नास्ति. ८ ग. ज. व्यावृत्तको. ९ ठ. दर्शया. १० क. ख. घ. झ. ट. ठ. अस्यां. ११ घ. झ. ट. ठ. 'च' नास्ति. १२ क. ख. १; ग. १६; च. ज. घ. झ. ट. अङ्को नास्ति; ठ. '१२' इति निरुक्तव्याख्यायां द्वादशः खण्डः १२.

अथ पञ्चमः पादः ।

अथापि य एषां न्यायवान्कार्मनामिकः संस्कारो यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्पुरुषं पुरिशय इत्याचक्षीरन्नष्टेत्यश्वं तर्दनमिति तृणमथापि निष्पन्नेऽभिव्याहारेऽभिविचारयन्ति प्रथनात्पृथिवीत्याहुः क एनामप्रथयिष्यत्किमाधारश्चेत्यथानन्वितेऽर्थेऽप्रादेशिके विकारे पदेभ्यः पदेतरार्धान्त्संचस्कार शाकटायन एतेःकारितं च यकारादिं चान्तं[1]करणमस्तेः शुद्धं च सकारादिं चाथापि सत्त्वपूर्वो भाव इत्याहुरपरस्माद्भावात्[2] पूर्वस्य प्रदेशो नोपपद्यत इति तदेतन्नोपपद्यते ॥ १३ ॥

'अथापि[3]' चैतदन्यत्स्याद्यदि सर्वाण्याख्यातजानि नामानि[4] स्युः । आह । किमिति । उच्यते । 'य एषां[5] न्यायवान्कार्मनामिकः संस्कारो यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्' । एषां पुरुषाश्वादिनाम्नां न्यायवान् लक्षणन्यायेन युक्तः । आह कः पुनरसाविति । उच्यते । कार्मनामिकः संस्कारः । कर्मकृतं नाम कर्मनाम । तत्पुनः पाचकलावकादि । तस्मिन्भवः कार्मनामिकः[6] संस्कारः । किंच । यथा चापि प्रतीतार्थानि स्युः प्रतीतक्रियाणि स्युस्तथैव तान्याचक्षीरन् जनाः । आह । कथं पुनराख्यायमानान्येतानि[7] न्यायवता कार्मनामिकेन संस्कारेणोपेतानि स्युः कथं वा प्रतीतक्रियाणीति । उच्यते । 'पुरुषं' तावत् 'पुरि शय इत्याचक्षीरन्' । पुरि ह्यसौ शेते[8] इति पुरिशयः प्राप्नोति । एवमसौ न्यायवता कार्मनामिकसंस्कारयुक्तेन शब्देनोक्तः स्यात् । एवं चैव प्रतीतक्रियः शब्दो भवति । एवमिव 'अष्टा इत्यश्वं' आचक्षीरन् । अश्नोति[9] ह्यसावित्यष्टा प्राप्नोति । एवमेव तृन्द्यतेऽनेनेति 'तर्दनमिति तृणं' आचक्षीरन् । न चैवमाचक्षते । न चासति कारणे विद्यमाना क्रिया परोक्षीकर्तुं न्याय्या । तस्मान्न सर्वाण्याख्यातजानि नामानीति ।

---

१ छ. चान्तः क°. २ क. ख. द. २; छ. त. १७; ठ. अङ्को नास्ति. ३ च. तथापि; ठ. अथापीति । अथा°. ४ घ. ट. वानि. ५ ग. ज. य एषां. ६ च. कर्मनामिकः. ७ च. °राख्यायनामानि. ८ क. ख. घ. झ. ट. शेते पुरिशय इति प्रा°. ९ च. 'अश्नोति॰तृणमाचक्षीरन्' नास्ति.

‘ अथापि[1] ’ इदमपरमप्राप्तं कुर्वन्ति ते शाकटायनादयः । किम् । ‘ निष्पन्नेऽभिव्याहारेऽभिविचारयन्ति[2] प्रथनात्पृथिवीत्याहुः । क एनामप्रथयिष्यदिति ’ । निष्पन्ने । कस्मिन् । अभिव्याहरणमभिव्याहारः । तस्मिन्नभिव्याहारे ततः पश्चादाभिमुख्येन स्थित्वा तस्याभिधानस्य ततो विचारयन्ति कतमस्य धातोरत्र रूपमिति । आह । यथा[3] किमिति । उच्यते । तद्यथा । प्रथनात्पृथिवीत्याहुस्ते शाकटायनादयः । आह । ततः किमिति । उच्यते । तत्र वयं पृच्छामस्तान्यदीयं स्वभावत एव पृथिवी नाभविष्यत्ततः क एनामपृथिवीं सतीमप्रथयिष्येत्[4] । कोऽस्याः प्रथनमकरिष्यदित्यभिप्रायः । अथापि कश्चिदस्या अपृथिव्याः सत्याः प्रथनकर्ताऽभ्युपगम्येत ततोऽपि च वयमिदमपरं पृच्छेम[5] ‘किमाधारश्चेति’ । चशब्दः समुच्चयार्थः । सर्वस्य हि प्राणिजातस्येयमेवाधारः प्रतिष्ठा । अथ पुनर्यदेयमप्रथितासीत्तदा योऽस्याः प्रथयिता स किमाधार आसीत् । न ह्यनाधारेणाप्रतिष्ठितेन शक्येयं प्रथयितुम् । स चाधारो नास्तीति प्रथनक्रियाभावः । प्रथनक्रियाभावे च सति क्रियाजान्येवमादीनि नामानीत्येतदयुक्तम् । तस्मान्न सर्वाण्याख्यातजानि नामानीति ।

‘ अथ ’ अपीदमपरमप्राप्तं शाकटायनः कृतवान् । आह । किमिति । उच्यते । ‘ अनन्वितेऽर्थे ’ इत्येवमादिर्दोषः ।

आह । वेदाङ्गानामेकैकमनेकप्रभेदम् । तद्यथा । निरुक्तं चतुर्दश[6]प्रभेदम् । व्याकरणमष्टप्रभेदम् । तत्र केषांचिन्नैरुक्तानां कैश्चिद्वैयाकरणैः सार्कं केषुचिच्छब्देष्वैकमत्यं केषांचिद्वैमत्यम् । तत्र शाकटायनो नैरुक्ताश्च गार्ग्यवर्जं कानिचिदभिधानान्यनेकैर्धातुभिरनुविदधति कानिचिदेकेनैव । किं कारणम् । प्रतिनियतो हि[7] स्वेषु स्वेषु व्याकरणेषु शब्दानुविधानस्य[8] समयः । तद्यथा । पाणिनीया भू इति प्रकृतिमुपादाय लडित्येतं प्रत्ययमुपाददते । ततः कृतानुबन्धलोपस्या[9]नन्ष्कस्य लस्य स्थाने तिबादीनादिशन्ति । तथाहि ते तं शब्दमनुविधातुं शक्नुवन्ति । स[10] हि तेषां शब्दानुविधानोपायः पाणिनिना परिक्लृप्तः । सैषा शब्दानुविधानत[11]-

---

१ ग. ज. यथापि. २ घ. ट. ठ. रेऽतितिचा°. ३ च. ‘ यथा ’ नास्ति; ठ. तथा. ४ च. °यिष्यत. ५ क ख. घ. झ. ट. ठ. पृच्छामः. ६ ग. ज. °र्दशभेद°. ७ ग. ज. °हि स्वेषु कारणेषु शब्दा°. ८ क. घ. झ. ट. ठ. विधानसमयः. ९ च. लोथस्या°. १० घ. झ. ट. ठ. न हि°. ११ क. ख. घ. झ. ट. ठ. विधातुं

३१ तंत्र°.

न्त्रशी[1]लीत्येतदेवैकं प्रयोजनं मुक्त्वा नान्यत्प्रयोजनमस्ति लडादीनामनुबन्धानामध्ययने लोपे च । अपरे पुनर्वैयाकरणा लटमकृत्वैव तिबादीनेवोपाददते । तेषामपि हि शब्दानुविधाने सा तन्त्रशीली । एवं [2]प्रतिनियतया [3]स्वया स्वया तन्त्रशी[4]ल्या भवतीत्येवमादिसमानमेव शब्दरूपं साधयन्ति । तत्रैवं शब्दानुविधानोपायविप्रतिपत्तौ सत्यां शाकटायन आचार्योऽनेकैश्च धातुभिरेकमभिधानमनुविहितवानेकेन चैकमेव । तत्र यदनेकैरनुविहितवांस्तदितरैर्गार्ग्यपाणिन्यादिभिर्न मृष्यते । किं कारणम् । अप्रसिद्धो हि स तेषां शब्दानुविधानमार्गो धातुसमुदायमात्रमेव नामेति । यतस्ते शाकटायनमाचिक्षि[5]प्सन्त आहुः ‘ अथानन्वितेऽर्थे ’ इति । अनन्वितेऽर्थेऽननुगते शब्देनार्थे । यत्र प्र[6]तार्यमाणोऽपि शब्दोऽर्थमनुगन्तुं न शक्नोति । एवं धातुजोऽसमर्थो भवति । ‘ अप्रादेशिके च विकारे ’ । यया हि क्रियया तद्द्रव्यं [7]प्रदिश्यते तदभिधायको यो धातुः स तदभिधानं विगृह्यमाणं विकर्तुं न शक्नोति यत्र [8]तत्र हीयमानप्रतिज्ञः शाकटायनः सर्वाण्याख्यातजानि नामान्युपपादयिष्यन्नसंभवे सति काशकुशावलम्बनमिव कुर्वन्किमकरोदिति । ‘ पदेभ्यः पदेतरार्धान्त्संचस्कार शाकटायनः ’ । पदेभ्य आख्यातपदेभ्यः समस्तेभ्योऽवयवानुपादाय पदेतरार्धानन्यांश्चान्यांश्चेतरेतराख्यातपदावयवैरन्यैश्चान्यैश्चा[9]न्यमर्धं नाम्नः संस्कृतवान् । तद्यथा । सत्यमित्येतदभिधानं संचस्कार । कथम् । ‘ एतेः कारितं च यकारादि चान्तकरणमस्तेः शुद्धं च सकारादिं च ’ । एतेः इण्गतौ [धा० २ । ३५] इत्यस्य कारि[10]तान्तं ण्यन्तं रूपं कृत्वा ततो यकारमन्तमादाय मकारान्तं कृत्वा सत्यशब्दस्यान्त्यमर्धं संचस्कार । ततो यमिति भवति । अस्तेः शुद्धं च । अस्[11] भुवि [धा० २ । ५५] इत्येतस्य शुद्धमेव रूपं कृत्वा न[12]कारितान्तमित्यर्थः । ततः सकारादिशब्दरूपं गृहीत्वा सदित्येतत्सत्यमित्येतस्य शब्दस्यादिमकरोत् । आद्यमर्धं संचस्कार । तत्सदिति भवति । अत्र योऽयमस्तेस्तकारः स यकारमधिरोहति । एवमेतदेकमभिधानं द्वयोर्धात्वोः

१ ठ. तन्त्रशैली°. २ घ. झ. ठ. प्रातिनियतया°. ३ घ. झ. ट ठ. ‘ स्वया ’ सकृदेव. ४ ठ. तन्त्रशैल्या. ५ घ. झ. ट. ठ. च. आचिक्षिप्स्यन्तः. ६ क. ख. संस्कार्यमाणोऽपि. ७ च. प्रविश्यते; ठ. प्रतिदिश्यते. ८ घ. झ. ट. ठ. ‘ तत्र ’ नास्ति. ९ घ. झ. ट. ठ. °श्चान्यदन्यदर्धं. १० ठ. कारितं. ११ ग. च. ण. असु. १२ घ. झ. ट, ठ. तकारि°.

संचस्कार । सत्यमिति भवति । अथ कोऽर्थः । सन्तमर्थमाययति प्रत्याययति गमयतीति सत्यम् । कारितं च यकारादिं च शुद्धं च सकारादिं चेतीतरस्माच्चेतरस्माच्चेतरं चेतरं चार्थमिति समुच्चयार्थश्चकाराः । एवं पदेभ्यः पदेतरार्धान्संचस्कार शाकटायनः । तदेतदन्याय्यं कृतवान् । को हि नाम पदं विभज्यानेकधातुजं कुर्यात् । तदेतदकृतपूर्वमन्यैर्विद्वद्भिः शाकटायनोऽतिपाण्डित्याभिमानादकरोद्यदभिनत्पदानि । अपि चोपजायते नः शङ्का । यथासौ प्रवृत्तो नासौ पदेषु स्थास्यति । अवश्यमसौ वर्णानपि भेत्स्यत्यनेकार्थांश्च कल्पयिष्यति । यो हि पदान्यभिनत्तस्य वर्णभेदे विशेषहेतुः को भविष्यति । तस्मादतिप्रसङ्गदोषोपपत्त्या नानेकधातुजानि नामानि नापि सर्वाण्याख्यातजानीति ।

' अथापि ' अयमपरो दोषः प्रसज्येत । कतमः । ' सत्त्वपूर्वो भाव इत्याहुः ' अभियुक्तास्तद्विदः । सत्त्वं पूर्वमस्मात्सोऽयं सत्त्वपूर्वः । किं कारणम् । सत्त्वाश्रय एव ह्यसौ । तत्रैवं सत्यपरकालीनेन भावेन क्रियया पूर्वोत्पन्नस्य सत्त्वस्य ' प्रदेशः ' प्रदेशनं संज्ञाप्रतिलम्भो ' नोपपद्यते ' । किं कारणम् । उत्पत्तिसहभूता हि सा । स्वेनाभिधानेन क्रियानिरपेक्षेणाभिसंबद्धमेव द्रव्यमुत्पद्यते नित्यसंबद्धौ हि शब्दार्थाविति । ' तदेतत् ' सर्वथा सर्वाण्याख्यातजानि नामानीति शाकटायनमतं नोपपद्यते । तदनुपपत्तावस्मत्पक्षसिद्धिः कानिचिदाख्यातजानि नामानि कानिचिदनाख्यातजानीति । अथ शक्यते प्रत्यवस्थातुं प्रत्यवस्थीयतामिति परिसमाप्तो गार्ग्यपक्षः ॥ १३ ॥

---

१ घ. यकारादिं इतरस्माच्चतरस्माच्च शुद्धं च सकारादि वेति इतरं चेतरं°; ट. यकारादिं इतरस्माच्च च शुद्धं च सकारादिं चेति (इतरस्माच्चेत) इतरं चेतर° रस्माच्च; ठ. एतेः कारितं च सकारादिं च. २ ग. ज. °तरस्याप्येतरं चार्थ°. ३ क. ख. घ. झ. ट. ठ. प्रवृत्तो°. ४ क. ख. घ. झ. अपि चासौ; ट. अपिचासौ° अवश्यमसौ पाठः. ५ क. ख. घ. झ. ठ. वर्णभेदे; ट. वर्णभेदे° र्णा. ६ क. ख. घ. झ. ट. °ख्यातजानि नामानीति. ७ ग. ज. °भूता सा हि. ८ ठ. प्रत्यक् स्थातुं. ९ ठ. प्रत्यक् स्थी°. १० क. ख. ग. च. ज. घ. झ. ट. अङ्को नास्ति; ठ. ॥ १३ ॥ इति निरुक्तव्या० त्रयोदशः खण्डः । शाक°.

अथ षष्ठः पादः ।

यथो हि नु वा एतत्तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्यातां सर्वं प्रादेशिकमित्येवं सत्यनु[1]पालम्भ एष भवति यथो एतद्यः कश्च तत्कर्म कुर्यात्सर्वं तत्सत्त्वं तथाचक्षीरन्निति पश्यामः समानकर्मणां नामधेय[2]प्रतिलम्भमेकेषां नैकेषां यथा तक्षा परिव्राजको जीवनो भूमिज[3] इत्येतेनैवोत्तरः प्रत्युक्तो यथो एतद्यथा चापि प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्निति सन्त्यल्पप्रयोगाः कृतोऽप्यैकपदिका[4] यथा व्रततिर्[5]दमूना जाट्य आट्नारो जागरूको दर्विहोमीति यथो एतन्निष्पन्नेऽभिव्याहारेऽभिविचारयन्तीति भवति हि निष्पन्नेऽभिव्याहारे योगपरीष्टिः प्रथनात्पृथिवीत्याहुः क एनामप्रथयिष्यत्किमाधारश्चेत्यथ वै दर्शनेन पृथुरप्रथिता चेदप्यन्यैर्[6]थाप्येवं सर्व एव दृष्टप्रवादा उपालभ्यन्ते यथो एतत्पदेभ्यः पदेतरार्धान्त्संचस्कारेति योऽनन्वितेऽर्थे संचस्कार स तेन गर्ह्यः[7] सैषा पुरुषगर्हा न शास्त्रगर्हा[8] इति यथो एतदपरस्माद्भावात्पूर्वस्य प्रदेशो नोपपद्यत इति पश्यामः पूर्वोत्पन्नानां सत्त्वानामपरस्माद्भावान्नामधेयप्रतिलम्भमेकेषां नैकेषां यथा बिल्वादो लम्बचूडक[9] इति बिल्वं भरणाद्वा भेदनाद्वा ॥ १४ ॥[10]

[11] इति प्रथमाध्यायस्य चतुर्थः पादः ॥

शाकटायनपक्षेणेदानीमेतान्दोषान्प्रतिसमाधास्यामस्तदर्थमिदमारभ्यते[12] 'यथो हि नु वा एतत्' इति । यथेति वाक्योपादाने । यथा येन प्रकारेण । उकारोऽवधारणार्थः । व्याख्यातमेतत् 'अथाप्युकार एतस्मिन्ने-

---

१ छ. सत्यमुपा°. २ छ. नामधेयःप्र°. ३ ठ. भूतिज°. ४ छ. त. द. °तोऽप्येकप°. ५ छ. व्रजति°; त. व्रजंति° त. ६ क. ख. द. °प्यन्यैः ॥ ३ ॥ अथ;° छ. त. °प्यन्यैः ॥ १८ ॥ अथा°. ७ क. ख. छ. त. गर्ह्यः. ८ क. ख. छ. त. द. 'न शास्त्रगर्हा' इति नास्ति. ९ छ. त. चूलक; द. चूडंक° ल. १० क. ख. द. . ४; छ. त. १९. ११ ङ. थ. ध. त. द. ठ. 'इति पादः' नास्ति. १२ ग. °भ्यते ॥ १७ ॥ यथा°.

वार्थे उत्तरेण' (निरु० १ । ९ इति)। येनैव प्रकारेण प्रसिद्धमाचार्येणाख्यातजत्वं प्रतिषिद्धं नाम्नस्तेनैव प्रकारेण प्रत्यनुभाष्य समीकरिष्यामीति । हीत्यसूयायां 'कथं हि व्याकरिष्यति' (निरु० १ । ५) इति । नु इत्येष हेत्वपदेशे । वै इत्ययं यथोक्तपूर्वपक्षोपदेशार्थः । येनैव प्रकारेणासमर्था हेतव उक्तास्तेनैव प्रकारेण प्रत्यनुभाष्य प्रतिवक्तृधर्मेण समीकरिष्यामः । यत्त्वयैतदुक्तम्[1] । किमिति । 'तद्यत्र स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ स्याताम्' इति । आह । तत्र किमिति । उच्यते । तदेतत्प्रत्युच्यत इत्युपयुक्तस्तच्छब्दः । आह । केन[2] प्रकारेण प्रत्युच्यत इति । उच्यते । 'सर्वं प्रादेशिकमित्येवं सत्यनुपालम्भ एष भवति' । सर्वमेव प्रादेशिकं सर्वमेव क्रियाजं नाम । आह । ततः किमिति । इत्येवं सत्यनुपालम्भ[3] एष भवति । आह । कथम् । शृणु । प्रदेशवाचिनो धातूननुप्रेक्ष्य[4] तदाश्रयौ स्वरसंस्कारौ यावद्गम्यमनुविधेयौ । विस्पष्टा हि लक्षणगतिः । नैष शब्दापराधो नाप्यस्माकम् । भवत एवायमपराधो[5] मन्दशिक्षितत्वाद्येनानुविधातुं स्वरसंस्कारौ विद्यमानावपि प्रदेशवाचिनि धातौ न शक्नोषि । स त्वं तावत्पुनः पुनः[6] शिक्षस्वान्यद्व्याकरणं यावच्छक्तिस्तावानुविधातुमिति[7] । व्याकरणेऽप्यष्टधाभिन्ने लक्षणैकदेशो[8] विक्षिप्तः । कश्चित्सौत्रो विधिः[9] । कश्चित्तुशब्दचशब्दवाशब्दातिरिक्ताभिव्याहारयोगविभागादिगम्यः[10] । तद्यथा मतान्तरेष्वप्यभिन्नेषु कश्चित्क्वचिद्विधिरुच्यते ते[11] च सर्व एव प्रयोगमिच्छता प्रयोगकाल उपसंहर्तव्या एवमिहापि सर्वाण्येव लक्षणशास्त्राण्यपेक्ष्याणि स्वरसंस्कारसिद्ध्य[12] इति । स त्वं तावच्छिक्षस्वानिर्विण्णो यावदखिलशब्दानां स्वरसंस्कारावनुविधातुमुपजातं[13] सामर्थ्यमिति ।

---

१ क. ख. घ. झ. ट. ठ. यथैतदुक्तं; च. यथेत्वये°. २ क. ख. घ. झ. ट. ठ. केन पुनः प्र°. ३ ग. सत्यमुपा° नु. ४ क. ख. ग. ज. घ. झ. ठ. °चिन आख्यातानुत्पे°; च. °चिनः धातून्पाठः । आख्यातानुत्पे°; ट. °चिन आख्यातानु° नो धातू. ५ घ. ट. °वायं त्वं अप°; ठ. °वायं त्वा°. ६ घ. ट. 'पुनः' सकृदेव. ७ ग. ज. °क्तिस्तावानुविधा°. ८ क. ख. घ. झ. लक्षणैरेकदे°; ग. ज. लक्षणैकदे°; ट. लक्षणैरेकदे° के. ९ क. ख. धातुः; घ. धाविधितुः; झ. धाविधातुः; ट. धाविधिः तुः. १० क. ख. °रिक्ताध्याहारविभा°; ग. ज. °रिक्ताव्याहारयोगविभा°; घ. झ. ट. ठ. °क्ताध्याहार°. ११ घ. ट. 'ते' नास्ति. १२ क. ख. घ. झ. ट. ठ. °पेक्ष्याण्यखिलस्वर°; ग. ज. अखिलसंस्कारसिद्ध्येभिस्वरसंस्कारे वा; च. अखिलस्वरसंस्कार इति पाठः । स्वरसंस्कार°. १३ क. ख. घ. झ. ट. ठ. उपज्ञातुं.

'यथो एतत्' यत्पुनरेतदुक्तं यः कश्च तत्कर्म कुर्यात्सर्वं तत्सत्त्वं तथाचक्षीरन्नित्यनेकेषामेकक्रियायोगादेकनामता प्रसज्येतेत्यत्र ब्रूमः । न हि प्रसज्यते । त्वमपि पश्यसि वयमपि च 'पश्यामः समानकर्मणां' तुल्यकर्मणामपि सतां कर्मकृत—'नामधेयप्रतिलम्भमेकेषां नैकेषां यथा तक्षा परिव्राजको जीवनो भूमिज' इति । तक्षन्कश्चित्तक्षेत्युच्यते । अन्यस्तक्षन्नपि न तक्षेत्युच्यते । आह । कोऽत्र हेतुरिति । शृणु । लोकमेव पृच्छ तमेवोपालभस्व न मयैष नियमः कृत इति । अथ च तद्यथा समानमीहमानानां कश्चिदेवार्थेन संयुज्यते कश्चिन्न । न चेदानीमेकोऽर्थेन संयुज्यत इत्यन्यैरपि संयोक्तव्यमेकेन वा लब्धमित्यन्यैरपि लब्धव्यम् । स्वभावतो हि शब्दानां क्रियाजत्वेऽपि सति कांचिदेव क्रियामङ्गीकृत्यावस्थितिर्भवतीति । अथवा क्रियातिशयकृतो नियमः स्यात् । यो हि यदतिशयेन करोति तस्यानेकक्रियावत्त्वेऽपि सति तद्धेतुक एव नामधेयप्रतिलम्भो भवति । अयं समाधिः । अथवा न ब्रूमो यो यत्र यदा च तक्षति

---

१ घ. ट. यथा एव तत्. २ व. झ. ठ. °नरुक्तं; ढ. °नरुक्तं° रेतदुक्तं सर्वं पाठः. ३ ग. च. ज. 'यः कश्च तत्कर्म कुर्यात' नास्ति. ४ ठ. प्रसज्जेते°. ५ ठ. प्रसज्जते. ६ क. ख. घ. झ. ट. ठ. कर्मकृतां. ७ क. ख. ग. च. ज. °पालम्भस्व; ठ. तमेव्यालभस्व. ८ क. ख. कश्चिन्न वेदादीनाम्, एकोऽर्थेन संयुज्यत इति अन्यैरपि संयुक्तः, सत्यमेकेन चालब्धम् । स्वभा°; ग. ज. कश्चिन्न वेदानीमेकोऽर्थेन संयुक्त इति अन्यैरपि संयुक्तंः सत्यमेकेन वालब्धं स्वभा°; घ. कश्चिन्न चेदानी एकोऽर्थेन संयुज्यत इति अन्यैरापि संयुक्तं सत्यमेकेन वा लब्धं । स्वभा°; झ. कश्चिन्न वेदानीं एकोऽर्थेन संयुज्यत इति अन्यैरपि संयुक्तं सत्यमेकेन वा लब्वं स्वभा°; ट. कश्चिन्न चेदानी (वेदादीनां पाठः) एकोऽर्थेन संयुज्यत इति अन्यैरपि संयुक्तंः सत्यमेकेन वा लब्धं °न चेदानीं एकार्थेन संयुक्त इत्यन्यैरपि संयोक्तव्यं । एकेन वा लब्धं अन्यैरपि लब्धव्यं॰इति वा पाठः; च. कश्चिन्न । वेदादीनामेकोर्थेन संयुज्यत इति अन्यैरपि मेकेन वा लब्धं । न च इदानीं एकोऽर्थेन संयुक्त इत्यन्यैरपि संयोक्तव्यं एकेन वा लब्ध न्यैरपि लब्धव्यं । इति पाठः शुद्धः; ठ. कश्चिनन्वेदानीमेकोर्थेन संयुक्त इति अन्यैरपि संयोक्तव्यं एकेन वा लब्धमन्यैरपि लब्धव्यं चेदानीमेकोर्थेन संयुज्यत इति अन्यैरपि संयुक्तं सत्यमेकेन वा लभ्यत इति अन्यैरपि लब्धं स्वभा°. ९ ठ. भवतीति. १० ग. ज. चक्षति.

स एव तक्षेति । किं तर्हि । यो यदा यत्र तक्षा भवति स एव तक्षति[1] । तदेतल्लक्षणमनियतं काममन्येष्वप्यस्तु । कदाचित्[2]क्वचित्तेषामप्यन्याः क्रिया नियततराः सन्ति यद्धेतुको नामधेयप्रतिलम्भ इति । तेषां तु [3]तक्षानियमत-स्तक्षतीति विशेषः । जीवन इक्षुरसः शाकजातिर्वा । भूमिजोऽङ्गारको वृक्षो वा ।

'एतेनैवोत्तरः प्रत्युक्तः' । आह । कतमः । 'यावद्भिर्भावैः सं[4]प्रयुज्येत तावद्भ्यो नामधेयप्रतिलम्भः स्यात्' [निरु० १ । १२] इत्ये[5]षः । पश्यामोऽनेकक्रियायुक्तानामप्येकक्रियाका[6]रितो नामधेयप्रतिलम्भः । तद्यथा । तक्षा परिव्राजक इत्येतान्येवोदाहरणानि । तक्षा ह्यन्यान्यपि कर्माणि करोति । न पुन[7]स्तस्य तत्कृतो नामधेयप्रतिलम्भोऽस्ति । तत्र यदुक्तमेक-स्यानेकक्रियायोगादनेकनामता प्रस[8]ज्येतेत्येतदयुक्तम् । न हि प्रसज्येत । य[9]दि चोक्तमनेकेषामेकनामतैकस्य चानेकनामता प्राप्नोति ततश्च व्यवहा-राप्रसिद्धिरिति न हि तदुभयमस्ति । अनेकेषामेकक्रियायोगेऽपि हि सत्ये-कस्य चा[10]नेकक्रियायोगेऽपि हि सति व्यवस्थित एव शब्दनियमः स्वभावत एव लोके । तस्मान्न व्यवहाराप्रसिद्धिदोषोऽस्ति । तत्र यदुक्तं व्यवहाराप्र-सिद्धिदोषप्रसङ्गान्न सर्वाण्याख्यातजानि नामानीत्येतदयुक्त[11]म् ।

'अथो एतत्' यत्पुनरे[12]तदुक्तं 'यथा चापि प्रतीतार्थानि स्युस्तथै-नान्याचक्षीरन्निति' अत्र ब्रूमः । शब्दस्वाभाव्यमेतद्यन्न तथा सर्वाण्या-ख्यायन्ते यथा यथा प्रतीतार्थानि भवन्ति । न तत्राहमपराध्ये भवतो नापि शास्त्रम् । यथावस्थितानां हि शब्दानामन्वाख्यानमात्रमेव क्रियते । नाहं शब्दानां कर्ता । य एषां प्रयोक्तारस्ता[13]नुपालभस्व । निराकुरु वा यदि शक्नोषि ।

---

१ क. ख. ग. ज. घ. झ. ट. ठ. तक्षेति. २ ठ. 'कदाचित्' नास्ति. ३ घ. झ. ट. लक्षणानियः°; ठ तक्षानियतः. ४ घ. झ. ट. संयुज्येत. ५ च. 'स्यादित्येषः......क्रियाकारितो नामधेयप्रतिलम्भः' नास्ति. ६ ठ. क्रियाकृतो नाम°. ७ ठ. पुनस्तत्र तत्कृतो°. ८ ठ. प्रसज्येत. ९ ठ. यच्चोक्त°. १० घ. झ. ठ. ठ. वानेक°. ११ ग. च. ज. °दयुक्तमिति. १२ घ. झ. ट. 'एतत्' नास्ति. १३ क. ख. घ. झ. ठ. ठ. °स्तानेवोपालभस्व.

आह । कस्मात्पुनः कानिचिदाख्यायन्ते लोके । तदभिधानस्वाभाव्यमेव । कानिचित्प्रतीतार्थानि कानिचिदप्रतीतार्थानि । तान्यपि शास्त्रेण प्रतीतार्थान्येव कर्तव्यानि । एतदेव शास्त्रस्य शास्त्रार्थत्वम्[1] । यदप्रतीतार्थान्यपि प्रकृत्यादिना[2] ‘ प्रतीतार्थानि स्युस्तथैनान्याचक्षीरन्निति ’ आख्यायन्त एव कानिचित्कानिचिच्छास्त्रेण प्रतीतानि क्रियन्ते । रूढ्यनुविधायित्वाल्लक्षणशास्त्रस्य गुणतस्तेषु लक्षणम् । अपि च । ‘ सन्ति ’ एव अल्पप्रयोगाः प्रतीतार्थक्रिया अपि केचित्कृत्प्रत्ययान्ताः शब्दा ‘ ऐकपदिकाः[3] ’ एकपदप्रकरणान्तर्वर्तिनस्तद्धर्माणः । तत् ‘ यथा व्रततिर्दमूना जाट्य आट्णारो जागरूको दर्विहोमीति’ । व्रततिर्वृणातेः ।

प्रतीतार्थक्रियाणां नाम्नामुदाहरणानि

वल्ली । दमूना दममना वेत्येवमादि[4] । अग्निरतिथिर्वा । जाट्यः जटावान् । आट्णारः अटनशीलः । जागरूकः जागरणशीलः । दर्विहोमी[5] दर्व्या जुहोतीति । एवं प्रतीतार्थान्यपीति[6] शाकटायनाभिप्रायः । तत्र यदुक्तं न सर्वाण्याख्यातजानि नामानीत्येतदयुक्तम् ।

‘ यथो एतत् ’ यत्पुनरेतदुक्तं ‘निष्पन्नेऽभिव्याहारेऽभिविचारयन्तीति ’ अत्र ब्रूमः । युक्तं ते कुर्वन्ति[7] । ‘ भवति हि निष्पन्नेऽभिव्याहारे योगपरीष्टिः[8] ’ । योगपरीष्टिर्नाम योगस्य परीक्षणम् ।

निष्पत्त्यनन्तरं वस्तुनो नाम्ना व्यवहारः

कथं चानुत्पन्नः[9] सन्नभिधानयोगः परीक्ष्येत[10] । तत्र यदुक्तं ‘ प्रथनात्पृथिवीत्याहुः क एनामप्रथयिष्यत्किमाधारश्चेति ’ । न वयमेवं ब्रूमः प्रथितेयं केनचिदतः पृथिवीयमिति । आह । कथमियमप्रथिता सती पृथिवीत्वमापेति । उच्यते । ‘ अथ[11] वै दर्शनेन पृथुरप्रथिता चेदप्यन्यैः ’ । दृश्यमाना हीयं पृथिवी । तस्माद्यद्यप्यप्रथिता कैश्चिदन्यैस्तथापीयं

पृथुत्वदर्शनात्पृथिवी

पृथुदर्शनक्रियायोगात्पृथिव्येव । तत्र यदुक्तं ‘ क एनामप्रथयिष्यत्किमाधारश्चेति ’ एतदयुक्तम् ।

---

१ क. ख. झ. शास्त्रत्वं. २ च. प्रकृत्यादीना; झ. प्रकृत्यादीनिः. ३ च. एक°. ४ च. °मादिः. ५ क. ख. ग. झ. ट. ठ. °होमीति. ६ क. ख. ग. च. ज घ. झ. ट. ‘ इति ’ नास्ति. ७ ग. ज. ‘ युक्तं ते कुर्वन्ति ’ नास्ति. ८ च. °परिष्टिः. ९ ग. घ. झ. ट. ठ. कथं वानु°. १० ग. ज. घ. झ. ट. ठ. परीक्षेत. ११ च. ‘ अथ वै ’ नास्ति.

अन्यथापि हि धात्वर्थ उपपद्यत एव । तत्रैवं सति यथा न विरोत्स्यते तथा निर्वक्ष्यामः । तस्मादविरुद्धः शाकटायनाभिप्रायः[1] ।

दृष्टप्रवादे नोपालम्भार्हता

'अपि' च यदि दृष्टेऽप्यस्याः पृथुत्वे वयमुपालभ्यामहे[2] ननु 'एवं' सति 'सर्व एव दृष्टप्रवादा उपालभ्यन्ते'[3] न केवलमहमेव । यो यद्दृष्ट्वा ब्रवीति स तत्र दोष एव । तथा सति दृष्टहानं प्रसज्येत[4] । अनिष्टं चैतत् । तस्मात्पृथुदर्शनात्पृथिवीत्युपपद्यते[5] ।

अनेकैर्धातुभिर्नाम्नो व्युत्पत्तौ न कोऽपि दोषः

'यथो एतत्[6]' यत्पुनरेतदुक्तं 'पदेभ्यः[7] पदेतरार्धान्त्संचस्कारेति' अत्र ब्रूमः । 'योऽनन्विते' शब्देनानभिधेये 'अर्थे' अननुगतमसंबद्धं 'संचस्कार स तेन' असमञ्जसेनासंबद्धेन संस्कारेण 'गर्ह्यो' गर्हणीयो न पुनराचार्यो योऽनुगमय्य धातुभिरनेकैरेकाभिधानगतानर्थांस्ततः संचस्कार नैव मौढ्येन ।

'सैषा' तदभिप्रायापरिज्ञानात् 'पुरुषगर्हा' । पुरुषो हि कश्चिदशिक्षितत्वादेकधातुजमपि न जानाति किमुत बहुधातुजम् । अपि च सन्ति लोके तादृशाः पुरुषा ये कारकहारकादीन्यपि प्रकटक्रियाणि सन्ति कतमेभ्यो धातुभ्य एतान्यभिनिष्पाद्यन्त[8] इति न जानते । एष पुरुषदोषो न शास्त्रदोषो यदनुगमयितुं धातुशब्दैरर्थो न शक्यते । तत्र यदुक्तं '[9]अनन्वितेऽर्थेऽप्रादेशिके विकारे पदेभ्यः पदेतरार्धान्त्संचस्कार शाकटायनः' इति तदयुक्तम् । अनुगत एवार्थे संचस्कार शाकटायनः । सन्तमेव ह्यर्थमाययति गमयतीति सत्यम् । तस्मादुपपद्यत एव शाकटायनमतम् ।

अपि च रूढिशब्दव्युत्पत्तिर्[10]मन्त्रेष्वपि दृश्यते । यथा च[11] लक्ष्यं[12] तथा च[11] लक्षणं प्रवर्तितुमर्हति । इतरथा हि कस्यै[13] तल्लक्षणं स्यात् । 'यदसर्प-

१ क. ख. °प्रायः ॥ ३ ॥ अपि°. २ ग. °भ्यामहे । १८ । ननु°. ३ घ. उपलभ्यंते. ४ ठ. प्रसज्जेत. ५ क. ख. घ. झ. ट. ठ. °त्युच्यते. ६ घ. झ. ट. ठ. 'एतत्' नास्ति. ७ घ. झ. ट. पदेभ्यः पदेभ्यः पदे°. ८ घ. झ. ट. ठ. °निष्पद्यंते. ९ क. ख. ग. ज. 'अनन्विते० तदयुक्तम्' नास्ति. १० ग. व्यूढिश°. ११ क. ख. घ. झ. ट. ठ. 'च' नास्ति. १२ च. लक्षणः. १३ घ. झ. ट. कस्यचिल्लक्षणं

त्तत्सर्पिः ' [तै० सं० २ । ३ । १०] इति मन्त्रः । यन्नवमैत्तन्[1]नवनीतमभवत् । [तै० सं० २ । ३ । १०] तादृशाव्युत्पत्तौ ब्राह्मणो इति मन्त्रः ॥ अपि च ब्राह्मणेनाप्यनेदाहरणम् । कधातुजान्येव कृत्वा निरुच्यन्ते तत्र मन्त्राभिधानानि यत्परिज्ञाने च फलमुपपद्यते । आह । ' तदेतत्र्य[2]क्षरं हृदयमिति हृ इत्येकमक्षरमभिहरन्त्यस्मै स्वाश्चान्ये च य एवं वेद द इत्येकमक्षरं ददन्त्यस्मै स्वाश्चान्ये च य एवं वेद यमित्येकमक्षरमेति[3] स्वर्गं लोकं य एवं वेद ' [श० ब्रा० १४ । ८ । ४ । १ बृ० उ० ५ । ३ । १] इति । एवं हरतेर्ददातेरेतेर्हृदयशब्दः । तदर्थफलोपप्रदर्शनार्थं[4] ब्राह्मणे चैवं[5] निरुक्तः । तच्च नः परं प्रमाणम् । तस्माच्छाकटायनस्तदनुदृश्य सम्यगेव कृतवान्यदनेकैर्धातुभिरेकमभिधानं निरुक्तवानिति ॥

पश्चात्कालीनेन भावेन पूर्वोत्पन्नस्य सत्त्वस्य नामधेयप्रतिलम्भः

' यथो एतत्[6] ' यत्पुनरेतदुक्तं ' अपरस्माद्भावात्पूर्वस्य प्रदेशो नोपपद्यत इति ' अत्र ब्रूमः । 'पूर्वोत्पन्नानां सत्त्वानां नामधेयप्रतिलम्भः ' अपरकालीनादपि[7] सतो भावात् केषांचित् । तत् 'यथा बिल्वादो लम्बचूडक[8] इति' । पश्चात्कालीनयापि चूडालम्बनक्रियया भविष्यता योगेन बिल्वादनक्रियया च पूर्वोत्पन्नस्य सत्त्वस्य[9] नामधेयप्रतिलम्भ उपपद्यमानो दृष्टः । क चान्यत्र [10]नोपपद्यते । तत्र यदुक्तं ' अपरस्माद्भावात्पूर्वस्य प्रदेशो नोपपद्यत इति ' तदनैकान्तिकत्वादयुक्तम् । उपपद्यत एव हि केषांचिदिति ।

' बिल्वं भरणाद्वा भेदनाद्वा ' । भृतं हि तद्भवति बीजानाम् । बिभर्ति वा दुर्भिक्षादौ भक्ष्यमाणं जनम् । भेदनाद्वा । भिद्यते हि तदवश्यं भक्षणायेति ॥

आह । किमिदमतिबाह्वेव[11] किमपि पूर्वोत्तरपक्षसंबद्धं नामाख्यातजत्वमधि-

१ क. झ. ट. यन्नवमेतन्नव°. २ च. तदेतदक्षरं. ३ ग. च. ज. यमिदमित्ये°. ४ क. ख. घ. झ. ट. ठ. °फलोपदर्शः°. ५ क. ख. ग. ज. ब्राह्मणेनैवं. ६ घ. झ. ट. ठ. ' एतत् ' नास्ति. ७ क. ख. घ. झ. ठ. अपरस्मादपि; ट. अपरस्माद्° कालिना पाठः. ८ ग. च. ज. लम्बचूलक°. ९ ग. च. ज. सत्त्वनामधे°. १० घ. झ. ट. ठ. ' न ' नास्ति. ११ च. °बव्हेच कि°.

नाम्नामाख्यातजत्वमधिकृत्य किंहेतुकोऽयं वादः

कृत्योक्तमिति । उच्यते । शिष्यबुद्धिवृद्ध्यर्थमेतदुक्तम् । कथं नाम व्युत्पन्नबुद्धिः शिष्योऽप्रतिब[1]ध्यमानः सर्वतोमुखानेव लौकिकवैदिकाञ्छब्दान्निर्ब्रूयादिति । सर्वाण्येव हि व्याकरणानि निरुक्तानि च वेदाङ्गत्वाविशेषात्प्रमाणानि । तेषामिदं फल्गिवदं साध्वित्येतदशक्यं [2]वक्तुमिति ॥ १४[3] ॥

इति नि[4]रुक्तवृत्तौ षष्ठाध्यायस्य चतुर्थः पादः ।

पञ्चमः पादः ।

अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यतेऽर्थमप्रतियतो नात्यन्तं स्वरसंस्कारोद्देशस्तदिदं विद्यास्थानं व्याकरणस्य कार्त्स्न्यं स्वार्थसाधकं च यदि मन्त्रार्थप्रत्ययायानर्थकं भवतीति कौत्सोऽनर्थका हि मन्त्रास्तदेतेनोपेक्षितव्यं नियतवाचोयुक्तयो नियतानुपूर्व्या भवन्त्यथापि ब्राह्मणेन रूपसंपन्ना विधीयन्ते । उरु प्रथस्वेति प्रथयति । प्रोहाणीति प्रोहत्यथाप्यनुपपन्नार्था भवन्ति । ओषधे त्रायस्वैनं स्वधिते मैनं हिंसीरित्याह हिंसन्नथापि विप्रतिषिद्धार्था भवन्ति । एक एव रुद्रोऽवतस्थे न द्वितीयः । असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् । अशत्रुरिन्द्र जज्ञिषे शतं सेना अजयत्साकमिन्द्र इत्यथापि जानन्तं संप्रेष्यत्यग्नये समिध्यमानायानुब्रूहीत्यथाप्याहादितिः सर्वमिति । अदितिर्द्यौरदितिरन्तरिक्षमिति । तदुपरिष्टाद्व्याख्यास्यामोऽथाप्यविस्पष्टार्था भवन्त्यम्यग्याद्दृश्मिञ्जारयायि काणुकेति[5] ॥ १५ ॥

---

१ क. °प्रतिबुध्यमानः; ग. ज. न प्रतिबुध्यमानः; च. न प्रतिबध्यमानः. २ क. ख. तदुक्तमिति; घ. ट. त्वदुक्तमिति; झ. त्वदुक्तमिति. ३ क. ख. ४; घ. झ. ट ठ. च. ज. अङ्को नास्ति. ४ ग. च. ज. निरुक्तस्य षष्ठा°; ठ. निरुक्तव्याख्यायां षष्ठाध्यायचतु°. ५ क. ख. छ. त. द. °केत्यर्थ°.

‘ अथापीदमन्तरेण मन्त्रेष्वर्थप्रत्ययो न विद्यते ’ । एवं नामाख्यातोपसर्गनिपातानां प्रविभागेनावस्थितानामेतस्माल्लक्षणं परिज्ञायते । ‘अथापीदमन्तरेण’ । अथशब्दोऽधिकारार्थे द्वितीयं शास्त्रारम्भप्रयोजनमधिकरोतीति[1] । अपीति संभावने । अपि पदेषु विभागेनावस्थितेषु लोके वेदे वापि मन्त्रेषु वाक्यभावेनावस्थितेषु यः समस्तार्थ[2]स्तस्मिन्प्रत्ययो विशेषावधारणं न विद्यते नास्तीत्यर्थः । अपीदं शास्त्रमन्तरेण पदार्थे प्रत्ययो नास्ति । अपि वाक्यार्थ इत्यभिप्रायः । आह । कः पुनः पदार्थवाक्यार्थयोर्विशेष इति । उच्यते । साकाङ्क्षः पदार्थो निराकाङ्क्षो वाक्यार्थः । तद्यथा गौरित्युक्ते किमित्याकाङ्क्षा भवति ततो गच्छतीत्युक्ते निराकाङ्क्षं भवति । तथा[3] गच्छतीत्युक्ते क इति साकाङ्क्षं भवति तथा गौरित्युक्ते निराकाङ्क्षं भवति । अथेदानीं गौर्गच्छतीति[4] यद्गौर्वाहदोहादिभ्यो व्यावृत्य गमनेऽवतिष्ठते गमनं चान्येभ्यो व्यावृत्य गव्येवावतिष्ठत एष वाक्यार्थः । स एष प्रकरणा[5]विरोधी वाक्यार्थः पदार्थं[6] नियमेन लक्षयति । पदार्थश्च पदलक्षणम् । पदार्थसंनियोगेन[7] हि[8] व्याकरणे पदानां प्रकृतिप्रत्ययादीनि[9] लक्षणानि व्यादिश्यन्ते ।

मन्त्रार्थावधारणं निरुक्तादेव

पदार्थवाक्यार्थलक्षणम्

यत एवमतः ‘ अर्थमप्रतियतो[10] नात्यन्तं स्वरसंस्कारोद्देशः ’ । अर्थमप्रतियतोऽप्रतिपद्यमानस्यानवधृतार्थस्येत्यर्थः[11] । नात्यन्तं नैकान्तेन[12] । एकान्तं नाम निश्चयः । निश्चयेनेत्यर्थः । किम् । स्वरसंस्कारोद्देशः । स्वरोद्देशश्च संस्कारोद्देशश्च । स्वरावधारणं संस्कारावधारणं च नास्तीति वाक्यशेषः । किं कारणम् । न ह्यनवधृतार्थः स्वरसंस्कारावधारयितुं शक्नुयात् । अर्थवशेन हि स्वरसंस्काराववतिष्ठेते । ‘ तदिदं ’

स्वरसंस्कारावधारणमर्थज्ञानादेव

---

१ ग. ज. ‘ इति ’ नास्ति. २ क. ख. घ. झ. ट. ठ. न भवतीत्यर्थः. ३ घ. झ. ट. ठ. यथा. ४ क. ख. घ. झ. ट. ठ. °च्छतीत्युक्ते गौ°. ५ घ. झ. ट. ठ. प्रकरणविरोधी; च. प्रकरणाविशेषेण. ६ ग. ज. घ. झ. ट. ठ. पदार्थनिय°. ७ ग. च. ज. घ. झ. ट. °सन्नियोगेन. ८ च. °हि तेषां लक्षणे पदा°. ९ घ. ट. °यादीतिलक्षणादीनि व्या°. १० च ‘अर्थमप्रतियतः’ नास्ति. ११ ग. ज. °स्यानवर्त्तार्थस्ये°. १२ क. ख. घ. झ. ट. ठ. नैकान्तिकेन; ग. ज. नैकान्ते च.

व्याकरणमपूर्णं यावत्स्वरसंस्कारौ नावधार्येते.

एवं कृत्वा निरुक्तशास्त्रं ' विद्यास्थानं ' एतदधीनत्वादर्थपरिज्ञानस्य । अर्थवशगत्वाच्च स्वरसंस्कारयोरिदं ' व्याकरणस्य कार्त्स्न्यं ' कृत्स्नभावं करोतीति[2] वाक्यशेषः । व्याकरणे[1] हि स्वरसंस्कारौ चिन्त्येते ॥ तस्मादपरिसमाप्तमेव तावद्व्याकरणं यावन्निरुक्तं नाधिगतमिति । न ह्यनैरुक्तोऽर्थमवधारयितुमलं नानवधृतार्थः स्वरसंस्कारतत्त्वं विजानीयादिति । आह । ननु व्याकरणस्य कार्त्स्न्यमेतत्करोतीत्युच्यमाने तच्छेषभूतमेवैतदुणादिवत् । ततश्च विद्यास्थानत्वमस्य विरुध्यत इति । नेत्युच्यते । 'स्वार्थसाधकं च' । स्वार्थाजहद्वृत्त्या ह्येतदनुषङ्गतो[3] व्याकरणकृत्स्नतां[4] करोति यथा लोके स्वार्थमपरिहाय[5] कश्चित्परानुग्रहं करोत्येवम् । यत्पुनरेतदुक्तमुणादिवदिति । ते हि तत्रान्तर्भूता एव । ' उणादयो बहुलम् (पा० ३ । ३ । १) ' इत्युक्तं न पुनर्निघण्टवो बहुलमिति । तस्मात्स्वतन्त्रमेवेदं विद्यास्थानमर्थनिर्वचनम् । व्याकरणं तु लक्षणप्रधानमिति विशेषः ।

निरुक्तं स्वतन्त्रं शास्त्रं विद्यास्थानं च

आह । ' यदि मन्त्रार्थप्रत्ययाय ' एतदारभ्यते हन्त तर्ह्येतदेवमर्थमारभ्यमाणं ' अनर्थकं ' एवं भवतीति । आह । क एवमाहेति । उच्यते । ' कौत्सः ' । किं कारणम् । ' अनर्थका हि मन्त्राः ' । न हि मन्त्राणामर्थोऽस्ति वाच्यवाचकत्वेन । तदर्थनिर्वचनायारभ्यमाणमिदमप्यनर्थकमेव भवति । तस्मान्नारब्धव्यमित्येव कौत्सो मन्यते । ' तत् ' एतदेवमुच्यमानं कौत्सेनानेन नैरुक्तेन ' उपेक्षितव्यम् ' । उपगम्य वेदं[6] शास्त्रं चेक्षितव्यं किमसौ सत्यमाचष्टे वृथेति वा परीक्ष्यम् । अर्थवत्त्वे मन्त्राणां यद्धेतुज्ञानं वक्ष्यमाणं तदुपगम्यार्थवत्त्वं मन्त्राणामीक्षितव्यमिति केचिदाहुः ।

मन्त्रा अनर्थका इति कौत्सः

कया पुनरुपपत्त्या कौत्सो मन्त्राणामानर्थक्यमाहेति । उच्यते । ' निय-

---

१ क. ख. घ. झ. ट. ठ. व्याकरणेन हि. २ क. ख. घ. झ. ट. ठ °रोतीत्युक्ते. ३ घ. झ. ट. ठ. °षङ्गात्. ४ क. ख. घ. झ. ट. ठ. व्याकरणस्य कृत्स्नतां. ५ ग. च. ज. °हाय; घ. झ. ट. स्वार्थं परिहाप्य. ६ च. चेदं.

तथा वाचोयुक्तयो नियतानुपूर्व्यो भवन्ति ' इति । नियतवाचोयुक्तयो[1] निरूढवाचोयुक्तयः । अभिधाननियता हि ते भवन्ति । अग्न आ याहि वीतये [ऋ० ६ । १६ । १०] इति मन्त्रे न पुनर्विभावसो आगच्छ पानायेति । नियतानुपूर्व्या । नियतनिष्ठानुपूर्वी[2] पदप्रयोगस्य । तद्यथा । ' अग्न आ याहि ' इति न[3] पुनर्भवति ' आयाह्यग्ने ' इति । इह लोकेऽर्थवतां शब्दानामनियमेन पर्यायवचनता दृष्टा गवादिप्रयोगे । तथा न पौर्वापर्यं दृष्टम् । तद्यथा । गोणीमभ्याज[4] गामभ्याज । आहर पात्रं पात्रमाहरेति । न च तथा मन्त्रेषु । ते[5] वयमर्थवच्छब्दवैधर्म्यात्पश्यामोऽनर्थका मन्त्रा इति ।

मन्त्रानर्थक्ये कारणानि

नियतवाचोयुक्तित्वं नियतानुपूर्व्यत्वं च

अथाप्ययमपरो हेतुरानर्थक्ये मन्त्राणाम् । आह । कतम इति । उच्यते । " ब्राह्मणेन ' ह्येते ' रूपसंपन्ना ' अपि सन्तो ' विधीयन्ते ' एव । रूपं नाम लिङ्गं तेन संपन्ना लिङ्गसंयुक्ता इत्यर्थः । प्रकटलिङ्गा अपि सन्तस्तदविवक्षितं कृत्वा कर्मसु विधीयन्त एव । यदि ह्येते[6]ऽर्थवन्तोऽभविष्यन्स्वेनैव लिङ्गेन स्वमात्मानमेते विनियोक्तुं समर्था इति कृत्वा न ब्राह्मणेन तेषु तेषु कर्मसु व्यधास्यन्त । विहिताश्च । तद्यथा । 'उरु प्रथस्वेति' [श० ब्रा० १ । १ । ६ । ८] प्रथनलिङ्गो मन्त्रो विहितः प्रथनकर्मणि । तथा च[7] । ' उरु प्रथा उरु प्रथस्वोरु ते यज्ञपतिः प्रथताम् ' [य० वा० सं० १ । २२] । यजुरिदम् । पुरोडाशं प्रत्युच्यते । पुरोडाश[8] त्वं विस्तीर्णप्रथनः सन्विस्तारयात्मानम् । ते तव यज्ञपतिश्चायं यजमानः प्रजापशुहिरण्यादिभिश्चोरु प्रथतां विस्तीर्यतामिति । तथा । 'प्रोहाणीति प्रोहति' इति ब्राह्मणं द्रोणकलशप्रोहणविधायि । 'इदमहमात्मानमेवं प्राञ्चं प्रोहामि तेजसे ब्रह्मवर्चसायेति । तेजोर्थं ब्रह्मवर्चसार्थं चात्मानं प्रोहामि प्राञ्चं प्रेरयामीति । प्रोहाणीति प्रोहति' इति[9] प्रोहणलिङ्गो

मन्त्राणां ब्राह्मणकृतो विनियोगः

---

१ च. नियता वा°. २ ग. ज. नियतामिनिष्ठा°; घ. °निष्ठानुयेपूर्वीपमद्‌योगस्य; झ. °निष्ठायेनुपूर्वोपद्प्रयोगस्य; ट. °निष्ठानुपूर्वीपदप्रयोगस्य° ये; ठ. नियतानुपूर्वी°. ३ ठ. पुनर्न भ°. ४ घ. झ. ट. गोमभ्याज. ५ क. ख. घ. झ. ट. ठ. ततोऽर्थव°. ६ ठ. ह्येते ह्यर्थ°. ७ ग. च. ज. तथा च ॥ २० ॥ उरु°. ८ च. °डाश इत्यु°. ९ क. ख. ग. ज. इति नास्ति.

विहितः प्रोहणकर्मणि । तस्माल्लिङ्गसंपन्नविधानात्पश्यामो ब्राह्मणेनानर्थकस्वरूपमेव सन्तं[1] विनियुक्तम् । एवं सति मन्त्रं पुनर्विदधद्ब्राह्मणमर्थवदनर्थका हि[2] मन्त्राः । न ह्यर्थवन्तः सन्तो दासवद्ब्राह्मणेन विधीयेरन् । विहिताश्च । तस्मादनर्थका मन्त्रा इति पश्यामः । अपि च ब्राह्मणस्यानर्थक[3]त्वाभ्युपगमे देशकालकर्तृदक्षिणादि कर्माङ्गभूतं कुत उपल[4]भ्येत । तथा च[5] ब्राह्मणस्यानर्थक्येऽभ्युपगम्यमाने वेदैकदे[6]शस्यात्यन्तमेवानर्थकत्वमभ्युपगतं स्यात् । न हि ब्राह्मणस्य विधिस्तुत्यर्थत्वादृतेऽर्थवत्तास्ति । मन्त्राणां पुनर्वाच्यवाचकत्वेनानर्थकानामपि सतां विनियोगमात्रेणा[7]प्यर्थवत्ता स्यादे[8]व । त[9]स्मात्काममनर्थका मन्त्रा वाच्यवाचकत्वेन सन्तो विनियोगमात्रेणैवार्थवन्तो विधेयत्वात् । विधायकत्वाच्च ब्राह्मणमर्थवदस्त्विति ।

मन्त्राणां विधेयत्वाद्ब्राह्मणस्य विधायकत्वाच्चार्थवत्त्वम्

‘ अथापि ’ अयमपरो हेतुरनर्थकत्वे मन्त्राणाम् । आह । कतम इति । उच्यते । ‘ अनुपपन्नार्था ’ ह्येते ‘ भवन्ति ’ । य एतेष्वर्थो लभ्यतेऽयमे[10]षोऽर्थः स्यादिति नासावुपपद्यते । तद्यथा । ‘ ओषधे त्रायस्वैनम् । [य० वा० ५ । ४२ । तै० सं० १ । ३ । ५] इत्याह । न चौषधिरात्मानमपि त्रातुं समर्था किमु[11]त वृक्षम् । तथा । ‘ स्वधिते मैनꣳ हिꣳसीः [य० सं० वा० सं० ५ । ४२ । तै० सं० १ । ३ । ५] इत्याहात्मनैव ‘हिंसन्’ । को हि नामैवमुक्त्वा स्वयमेव हिंस्यात् । हिनस्ति च । लोके यान्येवंविधानि वाक्यान्युन्मत्तप्रभृतीनां तान्यनर्थकानीत्युच्यन्ते । तथैवेमानि । तस्मादिमान्यप्यनर्थकानीत्युपपद्यते ।

मन्त्रा अनुपपन्नार्थाः

‘अथापि’ अयमपरो हेतुरानर्थक्ये मन्त्राणाम् । आह । क[12]तम इति ।

---

१ क. ख. घ. झ. ट. ठ सन्तं मन्त्रं विनि°. २ क. ख. घ. झ. ठ. ठ. ‘हि’ नास्ति. ३ घ. झ. ट. ठ. °नर्थक्याभ्युपगमे; च. °नर्थकत्वाभ्युपगमने. ४ ग. ज. उपलभ्यते. ५ ग. ज. ‘ च ’ नास्ति. ६ क. ख. घ. झ. ट. ठ. °देशस्य मन्त्रस्यात्यन्त°; च. °देशस्य ब्राह्मणाख्यस्यात्यन्त°. ७ क. ख. घ. झ. ट. ठ. ‘ अपि ’ नास्ति. ८ क. ख. घ. झ. ट. ठ. ‘ एव ’ नास्ति. ९ क. ख. घ. झ. ट. ठ. एतस्माच्च काम°. १० क. ख. घ. झ. ट. °यमेनेष्वर्थः. ११ क. ख. घ. झ. ट. ठ. किं पुनर्वृक्षं. १२ घ. झ. ट. ‘ कतमः ’ नास्ति .

विप्रतिषिद्धार्थाश्च

उच्यते । ‘ विप्रतिषिद्धार्था भवन्ति ’ इति । अन्यस्यान्येन विरुद्धार्थेन प्रतिषेधोऽन्यस्य चा[1]न्येन विप्रतिषेध इतरेतरव्याघात इत्यर्थः । तद्यथा । ‘ एक एव रुद्रोऽवतस्थे न द्वितीयः ’ ‘ असंख्याता सहस्राणि ये रुद्रा अधि भूम्याम् ’ [य० वा० सं० १६।५४] “ अशत्रुरिन्द्र जज्ञिषे [ऋ० सं० १० । १३३ । २] ‘ शतं सेना अजयत्साकमिन्द्रः ’ [ऋ० सं० १० । १०३ । १] इत्येतान्युदाहरणा[2]नि ।

विप्रतिषिद्धार्थत्वस्योदाहरणानि

‘ एक एव रुद्रोऽवतस्थे न द्वितीयो रणे निघ्नन्पृतनासु शत्रून् । संसृज्य विश्वा भुवनानि गोप्ता प्रत्यङ्जनान्संचुकोचान्तकाले ॥ एक एवावतस्थे रुद्रः स्थितवान् रणाय रणार्थं नान्यो द्वितीयः कश्चिदस्ति । [3]इति रुद्रबहुत्वप्रतिषेधः । कथमवतस्थे । निश्चयेन घ्नन् पृतासु स्पर्धनायेषु संग्रामेषु । किं निघ्न[4]न् । शत्रून् । किंच स एकः संसृज्य सृष्ट्वा विश्वा विश्वानि भुवनानि गोप्ता रक्षिता । सृष्ट्वा च सर्गकाले पालयित्वा च स्थितिकाले प्रत्यङ् सर्[5]गप्रातिलोम्येन जनान्संचुकोच संकोचयत्यन्तकाले प्रलयकाले । य एवंगुणयुक्तो रुद्रस्तं वयं स्तुमः[6] ।

असंख्याता सह[7]स्राणि ये रुद्रा अधि भूम्याम् । तेषां सहस्रयोजनेऽव धन्वानि तन्मसि ’ [य० वा० सं० १६ । ५४] ॥ एषा शतरु[8]द्रियेऽनुष्टुप् । तेन चाग्निचयनेऽर्कपर्णेनाजाक्षीरमिश्रा गवेधुकाः सक्तवो हूयन्त उत्तरस्यां श्रोणावन्त्यायामिष्टकायाम् [का० श्रौ० १८ । १ । १ । ५] । प्रजापतेरार्षम् । असंख्यातानि सहस्राणि बहूनीति[9] याव[10]दुक्तं स्यात् । केषाम् । ये रुद्रा भूम्यामधि उपरि तेषाम् । सहस्रयोजनेऽध्वनि अवस्थितानामेवावतनुमो धनूंषि । अप्राप्तानामेवास्मान्प्रतीत्यभिप्रायः । तावदेव च तानभिष्टुमो यावदवततानि तानि धनूं[11]षीति ।

---

१ घ. झ. ट. ठ. वान्येन. २ ग. च. ज. °णानि। २१ ।एक°. ३ ग. च. ज. ‘इति’ नास्ति. ४ घ. झ. ट. ठ. किं घ्नन्°. ५ ग. ज. सम्राति°. ६ ग. ज. स्तुमः । २२ । असं°; च. स्तुमः । २३ । असं°. ७ ग. च. ज. घ. झ. ट. सहस्राणि । एषा शतरु°. ८ ग. ज. शतरुद्रीये. ९ ग. च. ज. ‘इति’ नास्ति. १० घ. झ. ट. यावद् युक्तं. ११ ग. च. ज. °षीति । २२ ।

त्वं सिन्धूँ[1]रवासृजोऽधराचो अहन्नहिम् । अशत्रुरिन्द्र जज्ञिषे विश्वं पुष्यसि वार्यं तं त्वा परि ष्वजामहे नभन्तामन्यकेषां ज्याका अधि धन्वसु [ऋ० सं० १० । १३३ । २] ॥ एतयाऽतिच्छन्दसेन्द्रं तुष्टाव सुदाः पैजवनः । षोडशिनि शस्त्रे विनियुक्ता [आश्व० श्रौ० ६ । २] । हे इन्द्र त्वं अवासृजः सिन्धून्स्यन्दनानेतान्माध्यमिकानुदकसंस्त्यायान् । कथं पुनरवासृजः । अधराचः तानधोगमनान्कृत्वा सर्वानेवावासृजो नित्यकालं अहन् अहिं घ्नन्मेघम् । अशत्रुः अशातयितव्यो जज्ञिषे जायसे नित्यकालं भवसि तस्मिंस्तस्मिन्[2]हते मेघे । किंच त्वमेतेन प्रकारेण मेघवधकर्मणा विश्वं सर्वं पुष्यसि पुष्णासि वार्यं वारिप्रभवं व्रीह्यादिकम् । तं त्वामेवंगुणसंयुक्तं वयं परिष्वजामहे सर्वतः स्वजामहे आश्लिष्यामः । न भन्तां मा भूवन् अन्यकेषां अन्येषां ज्याका ज्या अपि अधिधन्वसु अधिधनुःषु । किमुतान्ये केचनाभ्युँ[3]च्चछमाना एतेऽस्मद्विषोऽवततज्यधनुषो हतसर्वोद्यमाः सन्त्वित्यतस्त्वां परिष्वजामह इत्यभिप्रायः[4] ।

' आशुः शिशानो वृषभो न भीमो घनाघनः क्षोभणश्चर्षणीनाम् । संक्रन्दनोऽनिमिष एकवीरः शतं सेना अजयत्साकमिन्द्रः (ऋ० सं० १० । १०३ । १) ॥ ' आशुः शिशानः ' इत्येषाप्रतिरथे त्रिष्टुबग्न्यवग्निप्रणयने विनियुक्ता (तै० सं० ५ । ४ । ६ ।) । अप्रतिरथस्येन्द्रपुत्रस्यार्षम् । आशुः[5] व्यापकः क्षिप्रो वा । शिशानः शिश्यानस्तीक्ष्णीकुर्वन्नायुधं प्रगृहीतायुधः वृषभो न वृषभ इव पुष्टो योद्धा । घनाघनः हनाहनः जहिजहीत्येवंशब्दकारी क्षोभणः । केषाम् । चर्षणीनां प्रत्यनीकावस्थितानामसुरादीनाम् । संक्रन्दनः समाह्वाता शत्रूणाम् । आहूय चानिमिषः आदरवान् जयं प्रति । एकवीरः एक एव विक्रान्तोऽप्रतिबन्धः संग्रामेषु । शतं सेनाः बह्वीः शत्रुसेनाः साकमवस्थिताः अजयदेक इन्द्रो यस्तं वयं स्तुमः ।

---

१ ग. सिंधूरवासृजो०धन्वसु; घ. झ. ट. सिंधून्०न्वसु. २ क. ख. घ. झ. ट. ' तास्मिन् ' सकृदेव. ३ घ. झ. ट. अभ्युच्छमानाः. ४ ग. च. ज. °प्रायः ॥ २४ ॥ आशुः°. ५ ग. च. ज. घ. झ. ट. आशुः शिशान इत्येषा न पठ्यते. ६ च. व्यापनः; ट. व्यापकः° नः. ७ ग. च. ज. ' शिश्यानः ' नास्ति. ८ च प्रतिगृही°. ९ ठ. योद्धा । भीमः शत्रूणां भयजनकः । घना°. १० च. प्रत्यनिका°. ११ च. 'एकवीरः' नास्ति. १२ क. ख. °प्रतिद्वन्द्वः सं°; ग. ज. घ. झ. ट. °प्रतिबद्धः सं°.

एवमितरेतरविप्रतिषिद्धान्येतानि मन्त्रवाक्यानि । यद्येको रुद्रो नासंख्यातानि सहस्राणि । अथासंख्यातानि नैकः । यद्यशत्रुः कथं शतं सेना अजयत् । अथ शतं सेना अजयत्कथमशत्रुः । लोके[1] यान्येवंलक्षणानि वाक्यान्युन्मत्तादीनां तान्यनर्थकानीत्युच्यन्ते । तथाचेमानि । तस्मादिमान्यप्यनर्थकानीति ।

विधिज्ञाय प्रैषः

'अथापि' अयमपरो हेतुर्मन्त्राणामानर्थक्ये । कतम इति । उच्यते । 'जानन्तं संप्रेष्यति' इति[2] । अध्वर्युर्होतारम् । कथम् । 'अग्नये समिध्यमानायानुब्रूहि' (शतपथब्रा० १ । ३ । २ । २) इति । होता हि विधिज्ञ[3] एव भवति । नह्यविद्वान्विहितोऽस्तीति[4] । स विजानात्येवामुष्मिन्नवधाविदं मयानुष्ठातव्यमिति । तदेतद्विज्ञातार्थस्य सतः संप्रेषणमनर्थकमेव[5] भवति । यथैतदनर्थकमेवमन्येऽपि मन्त्रा इति ।

परस्परासंबद्धत्वम्

'अथापि' अयमपरो हेतुर्मन्त्राणामानर्थक्ये । आह । कतम इति । उच्यते । 'अथाप्याह' मन्त्रनिगमः 'अदितिः सर्वमिति' । आह । किमुदाहरणम् । 'अदितिर्द्यौरदितिरन्तरिक्षम्' (ऋ० सं० १ । ८९ । १०) इति । 'तत्' एतदुदाहरणं 'उपरिष्टाद्' ऐकपदिके 'व्याख्यास्यामः' (निरु० ४।२३)। इह त्वेवमर्थमियमुदाहृता । कथं यैव द्यौः सान्तरिक्षं यैव माता स एव पुत्रः स एव च पितेत्येवमादि । किमपि च[6] बह्वत्र परस्परासंबद्धमुच्यते । तदर्थवत्त्वे सत्युपपादयितुमशक्यम् । तस्मादनर्थका मन्त्रा इति ।

अविस्पष्टार्थत्वम्

'अथापि' अयमपरो हेतुरानर्थक्ये मन्त्राणाम् । आह । कतम इति । उच्यते । 'अविस्पष्टार्थाः' अपि हि केचिद् 'भवन्ति' । तद्यथा । 'अम्यग् यादृश्मिन् जारयायि काणुकेति' एवमादयः । न ह्येतेषां विस्पष्टार्थता मन्त्रेषु शक्यते परिज्ञातुम् । न च केचिदर्थवन्तः केचिदनर्थका इति न्याय्यमभ्युपगन्तुम् । अर्धवैशसं हि स्यात् । तस्मात्सर्व एवानर्थकाः । इति परिसमाप्तः पूर्वपक्षः ॥ १५[7] ॥

---

१ क. ख. घ. झ. ट. ठ. लोके हि यान्ये°. २ ठ. 'इति' नास्ति. ३ घ. ट. विधि. त एव°; झ. विधि. न एव°; ठ. विहित एव°. ४ च. भवतीति. ५ घ. ट. °दनर्थमेव°. ६ क. ख. घ. झ. ट. ठ 'च' नास्ति. ७ क. ख. ग. च. ञ. घ. झ. ट. अङ्को न वर्तते; ठ. °पक्षः इति निरुक्तव्याख्यायां पञ्चदशः खण्डः.

अर्थवन्तः शब्दसामान्यादेतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं यत्कर्म क्रियमाणमृग्यजुर्वाभिर्वदतीति च ब्राह्मणम्[1]। क्रीळन्तौ[2] पुत्रैर्नप्तृभिरिति यथो एतान्नियतवाचोयुक्तयो नियतानुपूर्व्या भवन्तीति लौकिकेष्वप्येतद्यथेन्द्राग्नी पितापुत्राविति यतो एतद्ब्राह्मणेन रूपसंपन्ना विधीयन्त इत्युदितानुवादः[3] स भवति यथो एतदनुपपन्नार्था भवन्ती[4]त्याम्नायवचनादहिंसा प्रतीयेत यथो एतद्विप्रतिषिद्धार्था भवन्तीति लौकिकेष्वप्येतद्यथा सपत्नोऽयं ब्राह्मणोऽनमित्रो राजेति यथो एतज्जानन्तं संप्रेष्यतीति जानन्तमभिवादयते जानते मधुपर्कं प्राहेति[5] यथो एतददितिः सर्वमिति लौकिकेष्वप्येतद्यथा सर्वरसा अनुप्राप्ताः पानीयमिति यथो एतदविस्पष्टार्था भवन्तीति नैष स्थाणोरपराधो यदेनमन्धो न पश्यति पुरुषापराधः स भवति यथा जानपदीषु विद्यातः पुरुषविशेषो भवति [6]पारोवर्यवित्सु तु खलु वेदितृषु भूयोविद्यः प्रशस्यो भवति ॥ १६ ॥[7]

[8]इति प्रथमाध्यायस्य पञ्चमः पादः ॥

स्वपक्षनि[9]दानं स्थापयिष्यामस्तदर्थमिदमारभ्यते ' अर्थवन्तः शब्दसामान्यात्' इति। अर्थवन्त एव मन्त्रा इति प्रतिज्ञा।

मन्त्रा अर्थवन्तः शब्दसामान्यात्

हेतुरुच्यते शब्दसामान्यादिति । समान एव हि शब्दो लोके मन्त्रेषु च । तद्यथा । य एव गोशब्दो लोके स्वरसंस्कारसं[10]युक्तः स एव मन्त्रेष्वपि। तत्रैवं सति स एवार्थवाल्लोके स एव चानर्थको मन्त्रेष्विति विशेषहेतुर्नास्ति। असति च विशेषहेतावर्थवन्त एव मन्त्राः शब्दसामान्यादित्युपपद्यते । यत्पुनरेतदुक्तं प्रयोगानियमाल्लोकेऽर्थवत्त्वं प्रयोगानियमाच्च

---

१ क. ख. °णम् ॥ १ ॥ क्री°; छ. त. णम् ॥ २० ॥ क्री°; द, णम् ॥५॥ क्री°. २ क. ख. छ. त. द. क्रीलन्तौ. ३ ड. °नुवाकः. ४ ड. 'इति' नास्ति. ५ क. ख. छ. त. द. 'इति' नास्ति. ६ छ. त. ठ. परो°. ७ क. ख. २; छ. त. २१; द. ६. ८ ड. थ. घ. ठ. 'इति० पादः' नास्ति; त. इति प्रथमोऽध्यायस्य तृतीयः पादः; द. तृतीयः पादः. ९ घ. झ. ट. ठ. °क्षमिदानीं स्थाप°. १० क. ख. घ. झ. ट. ठ. °स्कारयुक्तः.

मन्त्राणामानर्थक्यमिति प्रतिवक्ष्याम एतत् । लोकेऽपि हि प्रयोगनियमो दृष्टः । तद्यथापितापुत्राविति ।

ऋग्यजुर्भिरभ्युदितं कर्म समृद्धं भवति

किं चान्यत् । 'एतद्वै यज्ञस्य समृद्धं यद्रूपसमृद्धं[1] यत्कर्म क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणम्' [गोपथब्रा० २ २ । ६ ॥ २ । ४ । २] । एतदेव हि यज्ञस्य कर्मणः[2] समृद्धम् । तत्किमिति[3] । उच्यते । यद्रूपसंमृद्धं[4] मन्त्रलिङ्गैरभिधीयते तदेवमिह[5] समस्तऋद्ध्या युक्तं भवति नेतरत् । एतदेव सुतरां स्पष्टीकरोति । 'यत्कर्म क्रियमाणमृग्यजुर्वाभिवदतीति च ब्राह्मणम्' इति । शब्दसामान्याद्ब्राह्मणप्रामाण्याच्चेति चशब्दः । ब्राह्मणमपि च मन्त्राणामर्थवत्त्वमेव दर्शयति । अनर्थका हि सन्तः[6] कथं कर्माभिवदेयुः[7] । कथं चानभिवदन्त समर्धयेयुः । अर्थवत्त्वं चाभ्युपगतं भवता ब्राह्मणस्य 'अथापि ब्राह्मणेन रूपसंपन्ना विधीयन्ते' इत्यत्र । ब्राह्मणेन सिद्धमेवार्थवत्त्वमुक्तं मन्त्राणाम् । तदेतदुपदर्शितमस्माभिः । तस्मादर्थवन्त एव मन्त्रा इति[8] । आह । किं पुनः समृद्धरूपत्वे मन्त्राणामुदाहरणमिति । उच्यते । क्रीळंताविति[9] ।

'इहैव[10] स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम् । [11]क्रीळंन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वे गृहे' [ऋ० सं० १० । ८६ । ४२] ॥ सूर्याया आर्षम् । विवाहे विनियुक्ता । अनुष्टुप् । इहैव स्तं भवतं युवां स्वे गृहे मोदमानौ हर्षमाणौ मा वियौष्टं मा च वियुज्यतम्[12] । सर्वमायुः व्यश्नुतं क्रीळंन्तौ[13] पुत्रैश्च[14] पौत्रैश्च सहेत्याशीः ।

स्थापितमर्थवत्त्वं मन्त्राणाम् । अधुना परपक्षहेतवो निराकर्तव्यास्त-

---

१ घ. ट. 'यद्रूपसमृद्धं' नास्ति. २ क. ख. ग. घ. झ. ट. ठ. यज्ञकर्मणः. ३ ग. ज. तद्यत्किमिति. ४ घ. झ. ठ. 'यद्रूप......धीयते' नास्ति; ठ. यद्रूपसमृद्धं तदेव हि सम°. ५ क. ख. घ. झ. तदेव हि सम°; ट. तदेव हि सम°मिह. ६ घ. झ. ट. मन्त्राः कथं°; ट. मन्त्राः कथं° सन्तः. ७ ग. कर्म वदेयुः; ठ. कर्माणि वदेयुः. ८ क. ख. °इति ॥ १ ॥ क्री°. ९ क. ख. घ. झ. ट. क्रीलन्ताविति; ग. च. ज. क्रीलन्ताविति ॥ २५ ॥ इहे°. १० ग. स्तं मा वियौष्टं० स्वे गृहे; घ. झ. ट. स्तं० गृहे. ११ क. ख. ग. च. ज. घ. झ. ट. क्रीलन्तौ. १२ क. ख. घ. ट. ठ. वियुज्येताम्; च वियुज्यतां° तं; झ. वियुज्येतं. १३ क. ख. घ. झ. क्रीलंतौ; ग. च. ज. क्रीडंतौ. १४ क. ख. घ. झ. ट. ठ. 'च' नास्ति.

परपक्षहेतुनिराकरणम्

दर्थमिदमाह । ' यथो एतत् ' इति । यत्पुनरेतदुक्तं ' नियतवाचोयुक्तयो नियतानुपूर्व्या भवन्तीति ' अत्र ब्रूमः । ' लौकिकेष्वपि '

ह्यर्थवत्सु शब्देषु

नियतवाचोयुक्तित्वं नियतानुपूर्व्यत्वं च दृष्टमेव । ' तद्यथा इन्द्राग्नी ' इति ' पितापुत्राविति ' च । तत्र यदुक्तं नियतवाचोयुक्तित्वानियतानुपूर्व्यत्वाच्चानर्थका मन्त्रा इत्येतदयुक्तम् ।

लौकिकेष्वपि प्रयोगेषु नियतवाचोयुक्तित्वं नियतानुपूर्व्यत्वं च दृश्यते

लौकिकेष्वपि हि नियतप्रयोगाः सन्तः शब्दाः केचिदर्थवन्तो दृष्टा यथैन्द्राग्नी पितापुत्राविति । स एष³ प्रयोगनियमादनर्थका मन्त्रा इत्यनैकान्तिको हेतुः । तस्मादर्थवन्त एवेति ।

यत्पुनरेतदुक्तं ' ब्राह्मणेन रूपसंपन्ना विधीयन्ते । अत्र ब्रूमः । ' उदितानुवादः स भवति ' । नासमर्था आत्मानमेते स्वेन रूपेण विधातुमित्यतो ब्राह्मणेन विधीयन्ते । किं तर्हि । आत्मनियोगाश्रयमुक्तमेव सन्तं मन्त्रेणार्थं

ब्राह्मणेन मन्त्रोक्तमनूद्यते

ब्राह्मणमनुवक्ति विस्तरेण प्रकृतार्थसंतुष्टूषया । न ह्यनुक्तं स्तोतुं शक्यते । सोऽयमेवमुदितानुवाद एव भवति । उक्तानुवाद इत्यर्थः । अपि चानेकेऽपि समानलिङ्गाः प्रकरणे मन्त्रा भवन्ति । ते ह्यहंपूर्विकयैकं⁵ प्रयोगं प्रति खले कपोतवत्संनिपतन्ति । तेषां समुच्चये विकल्पे च प्राप्ते सत्यभिमत एको नियमार्थं ब्राह्मणेन विधीयते । एवमुभयोरर्थवत्त्वं मन्त्रब्राह्मणयोः । तत्र यदुक्तं रूपसंपन्नविधानान्मन्त्रानर्थक्यं मन्त्रार्थवत्त्वे वा ब्राह्मणानर्थक्यमित्येतदयुक्तम् । तस्मादुभयमर्थवन्मन्त्राश्च ब्राह्मणं चेति ।

यत्पुनरेत⁶दुक्तं ' ओषधे त्रायस्वैनं स्वधिते मैनं हिंसीरिति ' एवमादयः 'अनुपपन्नार्था इति ' अत्र ब्रूमः । ओषध्यधिदेवतोच्यते । हे ओषधे

---

१ ग. ज. नियतानुपूर्ववत्त्वं; च. ठ. नियतानुपूर्वत्वं. २ घ. झ. ट. ठ. °युक्तत्वा°. ३ घ. झ. ट. ठ. एव. ४ क. ख. घ. झं. ट. ठ. °यन्त इति । अत्र°. ५ घ. झ. ट. ठ. °यैवं°. ६ घ. झ. ट. 'एतत् ' नास्ति. ७ क. ख. घ. [illegible]

न कश्चिदनुपपन्नार्थः

त्रायस्वैनं त्वत्पूर्वकी ह्येष वृक्षश्छिद्यमानः सम्यक्छिन्नो भविष्यति ततश्च यज्ञे विनियुक्तः[1] प्रतिविशिष्टमुत्कर्षमेतस्मात्स्थावरत्वात्प्राप्स्यत इत्येतदत्र त्राणमभिप्रेत्योक्तमोषधे त्रायस्वैनमिति न च्छेदनं प्रतिषेत्स्यतेऽयमित्यनेनाभिप्रायेण[2] । तस्मादुपपन्नार्थ एवायम् । तत्र यदुक्तमनुपपन्नार्था इत्येवदमादयो मन्त्रा इत्येतदयुक्तमिति ।

आम्नायवचनाद्धिंसाहिंसैव

यदपि चोक्तं 'स्वधिते मैनं हिंसीरित्याह हिंसन्' इति । अत्र[3] ब्रूमः । 'आम्नायवचनादहिंसा' एषा 'प्रतीयते' । आह । कथमहिंसा । प्रत्यक्षतो हि च्छिद्यते वृक्षः । शृणु । इयमहिंसेयं हिंसेत्यागमादेतत्प्रतीयते । प्रतिविशिष्टश्चायमेव वैदिक आम्नाय आगम एतत्पूर्वकत्वादन्येषामागमानाम् । स एव कृत्स्नस्यस्य जगतः प्रतिविशिष्टाय श्रेयसेऽभ्युद्यतः सन्हिंसायां कर्तारं विनियोक्ष्यत इति कुत एतत् । नूनमियमहिंसैव यतोऽस्यां नियुनक्ति कर्तारम् । तदेतदागमप्रत्यक्षमेव यथेयमहिंसेति । अपि चैतदोषधिवनस्पतिपशुमृगपक्षिसरीसृपाः सम्यगुपयुक्ताः सन्तो यज्ञे परमुत्कर्षं प्राप्नुवन्ति । सोऽयमभ्युदय एव संपद्यते न हिंसा । तत्र यदुक्तं मैनं हिंसीरित्याह हिंसन्निति न ह्यसौ हिनस्ति । किं तर्हि । अनुगृह्णाति यज्ञविनियोगार्थं विधानतश्छिन्दन् । तस्मादुपपन्नार्थमेवमपि । तत्र यदुक्तमनुपपन्नार्थत्वादनर्थका मन्त्रा इत्येतदयुक्तमिति[4] ।

न कश्चिद्विप्रतिषेधः

यत्पुनरेतदुक्तं 'विप्रतिषिद्धार्था भवन्तीति' । अत्र ब्रूमः । नैष विप्रतिषिद्धोऽर्थः 'एक एव रुद्रोऽवतस्थे' 'असंख्याता सहस्राणि' इति । देवता हि माहाभाग्य[5]योगादेकापि सत्यनेकधा भवत्यनेकापि[6] चैकधा[7] । तदुपरिष्टाद्व्याख्यास्यामो 'माहाभाग्याद्देवतायाः [निरु० ७ । ४] इत्यत्र ।

यत्पुनरेतदुक्तं 'अशत्रुरिन्द्र जज्ञिषे' 'शतं सेना अजयत्साकमिन्द्रः'

---

१ ग. घ. विनियुक्ताः. २ च. प्रतिभत्स्यते. ३ क. ख. तत्र; घ. झ. ठ. अतत्र ४ क. ख. घ. झ. ठ. 'इति' नास्ति. ५ क. ख. च. ठ. महाभाग्य°. ६ घ झ. ट. ठ. °त्यनेका भव°. ७ ग. च. ज. °नेकधा चैक°.

लौकिकेष्वप्युक्तिष्वेवमतिशयोक्तियुक्तानि विधानानि

इति । अत्र ब्रूमः । ‘ लौकिकेष्वपि ’ अर्थवत्सु शब्देषु ‘ एतत् ’ एवमेवोच्यमानं दृष्टम् । तद्यथा । ‘ असपत्नोऽयं ब्राह्मणोऽनमित्रो राजेति ’ । न हि कश्चिदसपत्नोऽस्ति लोके । उक्तं च । ‘ मुनेरपि वनस्थस्य स्वानि कर्माणि कुर्वतः । उत्पद्यन्ते त्रयः पक्षा मित्रोदासीनशत्रवः’ इति॥ तथापि स्वल्पसपत्नं दृष्ट्वा केचिदेवंवक्तारो भवन्ति ‘असपत्नोऽयं ब्राह्मणः’ इति। एवमेव कस्मिंश्चिदतिप्रवृद्धे संशातिते मेघे ह्यन्येषामसारतामभिप्रेत्येदमुक्तं स्यात् ‘ अशत्रुरिन्द्र जज्ञिषे ’ यस्त्वमेतमेवमतिप्रवृद्धं ‘ अहन्नहिं ’ इति ।

युद्धप्रवादः केवलं रूपकम्

यत्पुनरेतदुक्तं ‘शतं सेना अजयदिति ’।अत्र ब्रूमः । कुतो हि सेना या इन्द्रो जेष्यति ।न हि देवानां शत्रवः सन्ति ये जेतव्या इति । किं कारणम् । विभवो देवा वशिनोऽधिकरणधर्माणश्च परेण महिम्ना युक्ताः । आह । कथं तर्हि शतं सेना अजयत् ’ इत्येतदुक्तम् । उच्यते । रूपकल्पनयैवैषा युद्धप्रवादो स्तुतिः । वक्ष्यति च ‘ अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्ति ’ (निरु० २ । १६) इति । तदेतद्भवता न सम्यग्दृश्यते । सम्यगन्विष्यतां देवतासतत्त्वं नैरुक्तेभ्यस्ततो मन्त्रार्थानविरोधेन सम्यगवभोत्स्यते । नैवमवाक्यतत्त्वज्ञेन मन्त्रार्थोऽवगाहितुं शक्यः । गम्भीरपदार्थो हि वेदः कथमेवमवभोत्स्यते । वेदार्थविबोधविभ्रान्ता एवं हि प्रवादिनः स्वबुद्धिलाघवमाविर्भावयन्तो ब्राह्मणाः सन्तः सर्ववर्णसाधारणानि दर्शनान्तराणि प्रतिपेदिरे। यदुक्तं विप्रतिषिद्धार्थत्वादनर्थका मन्त्रा इत्येतदयुक्तम् । न हीमे विप्रतिषिद्धार्थाः । भवत एवं मतिविभ्रमो मन्दशिक्षितत्वात् । तस्मादर्थवन्त एव मन्त्रा इति ।

---

१ क. ख. घ. झ. ट. ठ. हि. २ ग. ज. °वृद्धे भृशं संशातिते; घ झ. ट. °वृद्धे भृशं शातिते. ३ क. ख. घ. झ. ट. ‘हि’ नास्ति. ४ घ. ट. युद्धप्रवादो; झ. युद्धप्रवादो. ५ क. ख. ग. ज. घ. झ. ट. ठ. °भोत्स्यसे. ६ क. ख. ज. °र्थो विगाहि°. ७ ग. ज. कथमवलोक्यते कथमवभो°; घ. झ. ट. ठ. कथमवभोत्स्यसे. ८ ट. °र्थावबो°. ९ क. ख. घ. झ. ट. ठ. एव.

यत्पुनरेतदुक्तं[1] 'जानन्तं संप्रेष्यतीति' अत्र ब्रूमः । लौकिकेष्वप्यर्थवत्सु शब्देष्वेतदेव स्वाभाव्यं दृष्टम् । तद्यथा ।

लोकेऽपि हि ज्ञातार्थख्यापनम्

'जानन्तं' गुरुं 'अभिवादयते' स्वगोत्रमभिवदन् । तथा च 'जानते मधुपर्कं प्राह' त्रिर्मधुपर्को मधुपर्को मधुपर्कः[2] [आश्व० गृ० सू० १।२४।७] इति । तदेतदर्थवत्स्वपि शब्देषु विहितार्थख्यापनार्थ[3]शब्दसामान्यादर्थवन्तो मन्त्रा इति ।

यत्पुनरेतदुक्तं 'अथाप्याह अदितिः सर्वमिति' अत्र ब्रूमः । द्विविधा हि शब्दप्रवृत्तिर्मुख्या[4] गौणी च[5] । तत्रैवं सति यत्र

अदितिः सर्वमितीदृशा गुणवादा लौकिकोक्तिष्वपि

मुख्यासंभवस्तत्र गौण्याश्रीयते । स एष भक्तिवादः स्यात्[6] 'अदितिः सर्वमिति' । यथा कश्चिद्ब्रूयात्कांचि[7]दनेकोपकारे प्रवृत्तं 'त्वमेव मे माता त्वं पिता[8]' एवमेतदपि द्रष्टव्यम् । लौकिकेष्वपि चार्थवत्सु शब्देषूच्यमानं दृष्टं 'यथा सर्वरसा अनुप्राप्ताः पानीयमिति' । ततो हि तेषां प्रभव इत्यनया गुणवृत्त्यैवमुच्यते । एवमिहापि गुणवृत्त्या कयाचिददितेः सर्वत्वमुच्यते । यदुक्तमितरेतरविरुद्धं किमपि बह्वत्रेत्येतदयुक्तम् । सर्वमेतदुपपद्यत एव गुणवृत्त्या । तस्मादर्थवन्त एव सर्वे मन्त्रा इति ।

यत्पुनरेतदुक्तं 'अथाप्यविस्पष्टार्था भवन्तीति' अत्र ब्रूमः । 'नैष स्थाणोरपराधः' इति । न ह्यत्रे[9] स्थाणुरपराध्यति

मन्त्रा अविस्पष्टार्था इत्यज्ञानां प्रलपितम्

'यदेनं' स्थाणुं 'अन्धो न पश्यति' यदत्रासावभिहन्यते । किं तर्हि । पुरुष एवापराधी तत्र यदसावचक्षुष्मान् । एवमिहापि नैषं[10] मन्त्राणामपराधो यदशिक्षितेन भवता न विज्ञायन्ते । भवत एवापराधोऽस्ति । भो[11] भवान् सर्वमात्मीयमपराधं मन्त्रेष्वस्मासु चासञ्जयितुमिच्छति । न ते[12] प्रज्ञास्ति किंचित् ।

---

१ क. ख. व. झ. ट. ठ. 'एतत्' नास्ति. । २ क. ख. घ. झ. ट. 'मधुपर्कः' द्विवारमेव. ३ घ. °तार्थाव्याप°; ट. °तार्थाव्याप° ख्या. ४ क. ख. घ. झ. ट. ठ. मुख्यार्था. ५ ग. चेति. ६ क. ख. घ. झ. 'स्यात्' नास्ति; ट. °वादोऽदितिः° दः स्याद्. ७ घ. झ. ट. किंचित्. ८ क. ख. ध. झ. ट. ठ. त्वं मे पिता. ९ ग. ज. ह्यतस्थाणु°; च. ह्येतत्स्थाणु°. १० क. ख. घ. झ. ट. ठ. नैव. ११ ग. ज. यो भो १२ क. ख. घ. झ. ट. ठ. तव.

'यथा जानपदीषु' कासुचित्प्रवृत्तिष्वितिकर्तव्यतासु कौशलशिक्षाकृतो 'विद्यातः पुरुषविशेषो भवति' पुरुषाणां विशेषः । एवमिहापि मन्त्रार्थशिक्षाकौशलकृतः पुरुषाणां विज्ञानविशेषो भवत्येव । तत्रैवं सति

लोके विद्यातः पुरुषविशेषः

केचित्पुरुषाः सुविस्पष्टार्थानपि मन्त्रान्न शक्नुवन्ति निर्वक्तुमपरे पुनरविस्पष्टार्थानपि शक्नुवन्ति विस्पष्टीकर्तुम् । तदुक्तं 'उत त्वः' [निरु० १ । १९] इत्यत्र । तत्रैवं सति य एते पारोवर्यविदो ब्राह्मणाः । पारोवर्येण विजानत आचार्यपरम्परया ते पारोवर्यविदः । न साक्षात्कृतधर्माण इत्यभिप्रायः । किं तेषाम् । तेषां य एव

विद्वत्सु भूयोविद्यः प्रशस्यते

भूयोविद्यो भवति बहुश्रुतः कश्चित्स एव प्रशस्यते । स एव मन्त्रार्थविज्ञाने प्रशस्यो भवति नेतरो मन्दबुद्धिरशिक्षितः । स हि बहुश्रुतो बहुदृष्टत्वादनेकविषये मन्त्रार्थे न क्वचित्प्रतिबध्यते । न हि तस्याविस्पष्टार्थो नाम कश्चिदस्ति । तस्माद्धेतोः स त्वं बहु शृणु ततः सम्यगवभोत्स्यसे मन्त्रार्थान् । तत्र यदवोचोऽविस्पष्टार्था मन्त्रा न हि तेऽविस्पष्टार्थाः । तांश्चोपरिष्टात्स्पष्टीकृत्य व्याख्यास्यामहे । तवैष मतिं विभ्रययति संमोहः । तस्मादर्थवन्त एव मन्त्रा इति सिद्धम् । तस्माच्चैतदपि शास्त्रं मन्त्रार्थप्रत्ययायारभ्यमाणमर्थवदेव भवतीति सिद्धः शास्त्रारम्भः । तत्र यदुक्तं 'मन्त्रार्थप्रत्ययायानर्थकं भवतीति' एतदयुक्तम् ।

इति प्रभिन्नेषु परस्य हेतुषु स्वपक्षसिद्धावुदिते च कारणे ।

अवस्थिता मन्त्रगणस्य सार्थता तदर्थमेतत्स्वलु शास्त्रमर्थवत् ॥ १६ ॥

इति निरुक्तटीकायां षष्ठस्याध्यायस्य पञ्चमः पादः ॥ ५ ॥

---

१ ग. च. ज. घ. झ. ट. °रुषा ये सु°. २ ट. °त्वः पश्यन्नित्यत्र. ३ ठ. परो°. ४ क. ख. घ. झ. ट. ठ. तेषां किं. ५ क. ख. घ. झ. ठ. °विज्ञाता स°; ट. विज्ञाता स° पाठः प्रज्ञाने. ६ ग. ज. प्रतिषिध्यते. ७ क. ख. घ. झ. ट. ठ. मतिं भ्रम°; च. मतिविभ्रम इति सं°. ८ क. ख. घ. झ. ट. ठ. यदुक्तं यदि मन्त्रार्थ°. ९ घ. झ. ट. °द्धावुद्धिते; ठ. °द्धा उदिते. १० च. °मेतच्छास्त्र° नु शा. ११ क. ख. २; ग. २१; घ. झ. ट. ठ. च. ज. अङ्को नास्ति. १२ क. ख. ग. घ. झ. ट. °र्थवदिति । इति निरु°; च. ज. °र्थवदिति निरु°; ठ. °र्थवदिति । इति निरु० टी० ६ ध्यायः.

षष्ठः पादः ।

अथापीदमन्तरेण पदविभागो न विद्यते । अवसाय पद्वते रुद्र मृळेति[1] पद्वद्वसं गावः पथ्यदनमवतेर्गत्यर्थस्यासो[2] नामकरणस्तस्मान्नावगृह्णन्त्य[3]वसायाश्वानिति स्यतिरुपसृष्टो विमोचने तस्मादवगृह्णन्ति दूतो निर्ऋत्या इदमाजगामेति पञ्चम्यर्थप्रेक्षा वा षष्ठ्यर्थप्रेक्षा वाःकारान्तं परो निर्ऋत्या आचक्ष्वेति चतुर्थ्यर्थप्रेक्षैकारान्तं परः संनिकर्षः संहिता पदप्रकृतिः संहिता पदप्रकृतीनि सर्वचरणानां पार्षदान्यथापि याज्ञे दैवतेन बहवः प्रदेशा भवन्ति तदेतेनोपेक्षितव्यं ते चेद्ब्रूयुर्लिङ्गज्ञा अत्र स्म इति । इन्द्रं न त्वा शवसा देवता वायुं पृणन्तीति वायुलिङ्गं चेन्द्रलिङ्गं चाग्नेये मन्त्रेऽग्निरिव मन्यो त्विषितः सहस्वेति[4] तथाग्निर्मान्यवे मन्त्रे त्विषितो ज्वलितस्त्विषिरित्यप्यस्य दीप्ति[5]र्नाम भवत्यथापि ज्ञानप्रशंसा भवत्यज्ञाननिन्दा च ॥ १७ ॥[6]

'अथापीदमन्तरेण पदविभागो न विद्यते' । शास्त्रारम्भप्रयोजनाधिकारे वर्तमाने[7] 'अपीदमन्तरेण मन्त्रेष्वर्थावधारणं नास्ति' इत्युक्ते यदि मन्त्रेत्यादिनानर्थक्यहेतुभिर्बहुभिरानर्थक्य उपपादिते निरुक्तशास्त्रस्य कौत्सेन मन्त्राणामर्थवत्तां[8] स्थापयित्वा परपक्षहेतवः प्रत्युक्ताः । तेषु स्थितमर्थवत्त्वं मन्त्राणाम् । तेषामर्थनिर्वचनायेदमारभ्यमाणमर्थवदित्युपपन्नमर्थवत्त्वं निरुक्तशास्त्रस्य । तदेतत्सर्वमपि चोदकशास्त्रकारव्याजेन प्रसक्तानुप्रसक्तमुक्तं प्रज्ञाया विवृद्धये शिष्यस्य कथं नामासाव[9]विवृद्धप्रज्ञः शब्दार्थन्यायसंकटेषु हेतुसमयानभिज्ञः परैः प्रतिबध्यमानोऽपि पदार्थान्वाक्यार्थांश्चासंमोहेन निर्ब्रूयादिति । एवं तावदेतदन्तरेण मन्त्रार्थप्रत्ययो नास्ति । अथेदमपरमारम्भप्रयोजनमित्येवं विशेषाधिकारार्थोऽयमथशब्दः । अपि मन्त्रार्थप्रत्यय इदमन्तरेण नास्ति नाप्यस्ति यदिदं वक्ष्यमाणमित्यपिशब्द एवं प्रभावने[10] ।

१ क. ख. छ. त. द. मृळेति. २ क. ख. छ. द. °स्यासौ; त. °स्यासौ° सो. ३ क. ख. छ. त. द. °ह्णन्ति । अव°. ४ छ. त. द. °सहस्वेत्यथाग्नि°. ५ क. ख. छ. त. दीप्तिर्नाम. ६ क. ख. द. १; छ. त. २२. ७ ठ °मानेथापीद°. ८ ग. °मनर्थवत्तां. ९ क. ख. नामा सा विवृ°; व. झ. ट. ठ. नामासौ विवृ°. १० ठ. संभावने.

पदविभागोऽर्थज्ञानावलम्बी। अर्थज्ञानं च निरुक्तशास्त्रावलम्बि

आह । किं पुनस्तद्वक्ष्यमाणमिति । उच्यते । ' पदविभागः ' । एवं पदानि वक्तव्यानीत्येतत्पदविभागपरिज्ञानं नास्तीत्यर्थः । किं कारणम् । अर्थवशेन हि पदान्यवतिष्ठन्ते । न चेदमन्तरेणार्थपरिज्ञानमस्ति । तस्मादत एव पदविभागप्रसिद्धिरिति । इदमर्थवत्त्वं मन्त्राणामन्तरेण पदविभागोऽप्यकिंचित्करः । प्रसिद्धश्चैष सर्वशाखासु । तस्मात्पदविभागार्थवत्त्वाय चार्थवन्तो मन्त्रा इति केचिद्वर्णयन्ति ।

समानसंहितेषु ग्रन्थेष्वर्थकृतः पदविभागः

एवं प्रतिज्ञाय समानसंहितेषु ग्रन्थेष्वर्थहेतुकं पदविभागविशेषं दर्शयति । तद्यथा । ' अवसाय पद्वते रुद्र मृळेति[1] ' । पद्वत्पदैकत्पादसंयुक्तम्[2] । ' अवसं पथ्यदनं ' इति निगमप्रसक्तस्य पर्यायवचनम् । 'अवतेर्गत्यर्थस्यासौ[3] नामकरणप्रत्ययः ' । ' तस्मात् ' असमासत्वादस्य ' नावगृह्णन्ति ' एतत्पदकारा इति शेषः[4] ।

समानसंहितायां उदाहरणे

मयोभूर्वातो[5] अभि वातूस्रा ऊर्जस्वतीरोषधीरा रिशन्ताम् । पीवस्वतीर्जीवधन्याः पिबन्त्ववसाय पद्वते रुद्र मृळ[6] [ऋ० सं० १० । १६९ । १]॥ सुभरॉ[7] नाम गौतमः[8] स मयोभूरित्यस्यास्त्रिष्टुभः पूर्वैस्त्रिभिः पादैः गवामाशिषमाशास्योत्तमेन तासामेव रुद्रात्सुखमयाचत । गवामुपस्थाने विनियुक्ता [आश्व० गृ० २ । १० । ५] । मयोभूः मयोभावयिता पाश्चात्यो वातः एता उस्राः अभिवातु आभिमुख्येन वातु । किं च तेन सुखभुवा वातेनानुद्वेजनीयेन[9][10] स्पृश्यमाना ऊर्जस्वतीः प्रभूतरसाः ओषधीरारिशन्तामास्वादयन्तु । आस्वाद्यास्वाद्य च सलवणस्वादमात्माभिप्रेते काल उदकं पिबन्तु । तच्च पीतमोषधिसहितमासां तथा कोष्ठे विपच्यतां रसशोणितमांसमेदोमज्जास्थिक्रमेण यथैताः पीवस्वत्यो[11]

---

१ क. ख. ग. च. ज. घ. झ. मृलेति. २ क. ख. ज. घ. झ. ट. ठ. °द्वत्पादव°. ३ क. ख. म. °स्यासौ नाम°. ४ ग. च. ज. शेषः ॥ २६ ॥ मयो°. ५ ग. मयोभूर्वातो० रुद्र मृल; घ. झ. मयोभूः० रुद्र मृल; ट. मयोभूः० रुद्र मृल. ६ क. ख. ग. च. ज. घ. झ. मृल. ७ ठ. शबलो नाम काक्षीवत ऋषिः स मयो°. ८ ट. गौतमः °शबला ऋषिः कक्षीवतः. ९ ग. ज. यातेन. १० घ. झ ट. ठ. °जनीःयेन. ११ ग. ज. 'पीवस्वत्यो भवेयुः ' नास्ति.

भवेयुः पीवगुणयुक्ताः स्थूला बलवत्यो बहुपयस्काः । सति च बहुपयस्त्वे जीवधन्या जीवधनिन्यो रोगदुष्टपातृकाः[1] । हे[2] रुद्र वयमेतासां गवामेतामाशिषमाशास्महे । त्वमप्यस्मै गोलक्षणाय अवसाय[3] पादयुक्ताय मृळ[4] सुखो भव । मैना हिंसीस्त्वमासामीश्वर इत्यभिप्रायः ।

'अवसायाश्वानिति' इदमपरमुदाहरणम् । अस्मिन्पूर्वेण रूपेण सरूपमेव पदमर्थकृताद्विशेषादवगृह्णन्ति । द्वयोः पदयोर्बहूनां वा यदविच्छेदेनो[5]च्चारणं स समासः । तयोरेवार्थप्रविभागोप[6]प्रदर्शनार्थमवच्छेदेन ग्रहणमवग्रहः । तदेतदवगृह्यते पदम् । 'स्यतिः' धातुः 'विमोचने' अर्थे वर्तते । स पुनः 'उपसृष्टः' उपसर्गेणावेत्यनेनोपसृष्टः संयुक्त इत्यर्थः । यतो धातूपसर्गविभागोपप्रदर्शनार्थमेव तत्पदमवगृह्यतेऽवसायेत्येतत्[7] ।

योनिष्ट[8] इन्द्र निषदे अकारि तमा नि षीद स्वानो नार्वा । विमुच्या वयोऽवसायाश्वान्दोषा वस्तोर्वहीयसः प्रपित्वे [ऋ० सं० १ । १०४ । १]

एतया त्रिष्टुभा कुत्स आङ्गिरस इन्द्रं तुष्टाव । योनिस्ते[9] हे इन्द्र[10] स्थानं ते तव यदिदं[11] निषदे निषदनाय मयाकारि कृतं तं योनिं तत्स्थानं आनिषीद एत्य निश्चयेन सीद । कथं पुनर्निषीद । स्वानो न स्वन्यमान इवार्वा अश्वः । संशब्द्यमान इवाश्वबन्धेनाश्वः[12] । स यथा स्वे स्थाने निषीदेदेवं मया त्वमुपशब्द्यमानः[13] स्तुतिभिरेतास्मिन्मया संस्कृते स्वास्तीर्णे बर्हिषि स्थाने निषीद । कथं पुनर्निषीद । विमुच्यैतान्वयोऽश्वान् । कुतः । रथात् । पुनरपि[14] चैतानवसाय वियुज्य[15] रश्मिभ्योऽश्वान् लब्धोदकयवसान्कृत्वा दोषावस्तोर्वहीयसः । अहनि च रात्रौ च ये केचिद्वहन्ति तेभ्योऽपि वहीयसः शीघ्रतरेण[16] जवेन वोढृतमान् । ततस्त्वं स्वस्थो भूत्वा निषीदैत-

---

१ ढ. °दुष्टयातृकाः. २ ध. झ. ट. हेतु रुद्र. ३ ग. ज. अवसाय पथ्यदनाय पद्वते पाद°. ४ क. ख. ग. च. ज. घ. झ. मूल. ५ घ. झ. ट. ठ. पदाविच्छे°. ६ क. ख. घ. झ. ट ठ. °वार्थविभागो°. ७ ग. च. ज. °त्येतत् ॥ २७ ॥ योनि°. ८ ग. योनिष्ट इन्द्र निषदे अकारि॰ प्रपित्वे; घ. झ. ट. योनिष्टे प्रपित्वे०. ९ घ. ट. योनिः हे इन्द्र°; झ. योनिः हे°; ठ. योनिष्टे हे°. १० ठ. इन्द्र वेद्याख्यं स्थानं°. ११ ग. °यदिदं निषदने निषदनायनि मया°; ज. °यदिदं निषदनायनि मया; च. °यदिदं निषदे निषदनायोपवेशनाय मया°. १२ ठ. °श्वबन्धने यथा स्वे°. १३ घ. झ. ट. त्वमनुशब्द्य°. १४ घ. ट. °रपि वा एतान्; झ. °रपि चा एतान्. १५ क. ख. ग ज. घ. झ. ट. वियोज्य. १६ ७ क. ख. घ. झ. ट. शीघ्रतमेन.

स्मिन्योनावेतस्मिन् संस्कृते बर्हिषि प्रपित्वे प्राप्तेऽस्माकं त्वद्यजनकाले । मा नो विघ्नं कार्षीरित्यभिप्रायः । एवं तावदिदमवगृह्यमिदमनवगृह्यमित्यर्थपरिज्ञानद्वारेण तस्मादेतन्निरुक्तशास्त्राद्विज्ञायते ।

समानसंहितायामनवगृह्यपदेष्वपि पदविभागोऽर्थकृत एव

यान्यपि च खल्वनवगृह्याणि पदानि समानसंहितानि तेषामप्यर्थकृतमेव विभागवैशेष्यं भवति । तद्यथा “ दूतो निर्ऋत्या ” इति । पञ्चम्यर्थप्रेक्षा वैतस्मिन्पदे षष्ठ्यर्थप्रेक्षा वा । पञ्चम्यर्थदर्शनं षष्ठ्यर्थदर्शनं वेत्यर्थः । पञ्चम्यर्थोऽत्र दृश्यते षष्ठ्यर्थो वा निरुच्यमाने । अत एतत् ‘ आःकारातं ’ पदं निर्ऋत्या इति ।

तस्योदाहरणे

देवाः कपोतं इषितो यदिच्छन्दूतो निर्ऋत्या इदमाजगाम । तस्मा अर्चाम कृणवाम निष्कृतिं शं नो अस्तु द्विपदे शं चतुष्पदे ॥

ऋ० १०।१६५।१) । प्रचेता नामाङ्गिरसः । तेनेयं कपोतसूक्ते दृष्टा । कपोतनिलयनशान्त्यै कपोतपदनिर्हरण एतत्सूक्तम् [आश्व० गृ० ३ । ७ । ७] । त्रिष्टुबेषा । हे देवाः कपोत इषितः प्रेषितो निर्ऋत्याः स्वभूतः त्वयैवानुप्रेषित इत्येवं षष्ठ्यर्थः । अथवा निर्ऋत्याः सकाशादेवं पञ्चम्यर्थः । यत्कर्तुमिच्छन्निदमस्मद्गृहमाजगाम यस्य नः पापस्य च पापकर्मणो जन्मान्तरकृतस्यैतत्कपोतगृहनिलयनं तत्पददर्शनं च कुड्यादिषु विपाकलिङ्गं तस्मै कर्मणे तदर्थं युष्मानेवार्चाम । समर्था यूयमेतत्पापं कर्म विपच्यमानमस्माकमपहर्तुं मृदुविपाकं वा कर्तुम् । वयमपि च तस्मै पापाय कर्मणे कृणवाम निष्कृतिं निष्क्रमणं निर्णेजनं तपसैतद्भूतानुरूपेण । यतो ब्रूमः शं नः सुखं नोऽस्तु द्विपदे चतुष्पदे । युष्मत्प्रसादेन च स्वेन च तपसेत्यभिप्रायः ।

---

१ च. संकृतबर्हिषि. २ ठ. एतस्मा°. ३ क. ख. घ. झ. वा अस्मिन्; ट. वा अस्मिन्° एन. ४ घ. झ. ट. ठ. निरुच्यमानोऽत°; च. निरुच्यमाने अत° नोऽ. ५ ग. इति । २७ । देवाः°; च. ज. इति । २८ । देवाः°. ६ ग. कपोत इषितो०चतुष्पदे; घ. झ. ट. कपोत०चतुष्पदे. ७ क. ख. घ. झ. ट. °शादित्येवं. ८ घ. ट. जन्मांतस्यैतत्क°. ९ घ. झ. ट. ‘च’ नास्ति. १० क. ख. घ. झ. ट. ठ. पापकर्म. ११ घ. ट. निःक्रमणं. १२ ग. च. ज. निर्नेजनं; ठ. ‘निर्णेजनं’ नास्ति. १३ घ. झ. ट. °पसा तद्भू°. १४ ठ. °पदे शं चतुः°.

'परो निर्ऋत्या आचक्ष्वेति'। एतस्मिन्पदे चतुर्थ्यर्थदर्शनम्। अत एतत्पदमैकारान्तम्। अपेहि मनसस्पतेऽप क्राम परश्चर। परो निर्ऋत्या आ चक्ष्व बहुधा जीवतो मनः [ऋ० सं० १०। १६४। १]॥ प्रचेता आङ्गिरस[3] एतामनुष्टुभमपश्यत्। दुःस्वप्नदर्शने विनियुक्ता। मन इति हि[4] विज्ञानमुच्यते बुद्ध्यादि। तस्य पतिर्मनसस्पतिरात्मा। इह पुनर्मृत्युर्व्याधिर्वा मनसस्पतिः। उभावपि स्वकृतकर्मापेक्षया प्राणिनां बुद्ध्यादिविज्ञानोपसंहारस्येशाते। तयोरन्यतरः[5] संबोध्यते[6]। हे मनसस्पते अपेहि अपगच्छास्मत्तः। मा च त्वमीषदपगम्यास्मत्तः समीप एव स्था अस्माकम्। किं तर्हि। अपक्राम दूरमपेत्य क्राम। अपक्रम्य च परः परतोऽन्यतोऽस्मत्तश्चरापुनरावर्तमानोऽस्मान्प्रति। किं च परः परागत्य यस्यास्त्वं दूतो निर्ऋत्या तस्यै आचक्ष्व। किमिति। बहुधा जीवतो मम[7] मनः। अथवा परः प्रकृष्ट[8] आप्तस्त्वं तस्या निर्ऋत्या दूतो मां प्राप्तोऽविज्ञातमरणकाल एवातिसंमोहात्। अतो ब्रवीमि। तस्यै निर्ऋत्यै गत्वा बहुधानेकप्रकारमाचक्ष्व कथय। जीवतो यादृशं मनो भवति तादृशं मम मनो बुद्ध्यधिकरणं[9] ज्ञानं दिनकरकिरणसंपृष्टवृत्ति[10]। न तावत्स[11] मुमूर्षुरित्येतदाचक्ष्व। मुमूर्षोर्ह्युपक्षीणकर्मणो नातिस्पष्टा इन्द्रियवृत्तयो भवन्ति। न च मम तथेत्यभिप्रायः। एवं समानसंहितानामपि पदानामर्थभेदकृतं विभागवैलक्षण्यम्। सं[12] चार्थ इदमन्तरेण न विज्ञायते। अत इदमुक्तं 'अथापीदमन्तरेण पदविभागो न विद्यते' इति।

पदविभागप्रसक्तमधुना संहितालक्षणमाह। 'परः संनिकर्षः संहिता' इति। परः प्रकृष्टो यः संनिकर्षः संश्लेषः परस्परेण स्वराणां स्वराधिरूढानां[13] व्यञ्जनानां सा संहितेत्युच्यते। सा च[14]

---

१ ग. च. ज. °रान्तम्। २९। अपे°. २ ग. मनसस्पते०मनः; घ. ट. मनसस्पते० बहुधा जीवतो मनः; झ. मनः०तो मनः. ३ क. ख. घ. झ. ट. ठ. प्रचेता नाम आङ्गिरस°. ४ क. ख. घ. ट. 'हि' नास्ति. ५ ग. ज. अन्यः सं°. ६ च. संबध्यते. ७ घ. ट. ममतः। अथ°; झ. मम मतः अथ°. ८ क. ख. ग. ज. प्रकृष्ट आप्त°. ९ क. ख. घ. झ. ट. ठ बुद्ध्यादिकरणज्ञानं; च. बुद्ध्याधि°. १० घ. ट. °किरणस्पृष्ट°. ११ घ. झ. न स मुमूर्षुस्तावदित्येत°; ट. न सं मुमूर्षुस्तावदित्ये° तावत्सपाठः; ठ. तावत्सं मु°. १२ ग. ज. सर्वार्थे°; च. सर्वार्थ° चा. १३ क. ख. घ. झ. ठ. रूढाणां; ट. रूढाणां° ना. १४ ठ. 'च' नास्ति.

संहितालक्षणम्

पुनरियं ‘ पदप्रकृतिः संहिता ’ [ऋ० प्राति० २ । १]। अत्र द्विधा वर्णयन्ति । पदानां या प्रकृतिः सेयं पदप्रकृतिः संहिता । किं कारणम् । संहितातो हि पदानि प्रक्रियन्ते । तस्मात्संहितैव प्रकृतिर्विकारः पदानीत्येवमेके मन्यन्ते।

किं संहिता प्रकृतिः पदानि वा

अपरे पुनः पदप्रकृतिः संहितेति पदानि प्रकृतिरस्याः[1] सेयं पदप्रकृतिरिति । किं कारणम् । पदान्येव हि संहन्यमानानि[2] संहिता भवति । तस्मात्पदान्येव हि[3] प्रकृतिर्विकारः संहितेति ।

सर्वशाखासु पदानि प्रकृतिः

एवं च कृत्वा ‘ पदप्रकृतीनि सर्वचरणानां पार्षदानि ’ । सर्वेषां चरणानां[4] सर्वशाखान्तराणामित्यर्थः[5] । किम् । पार्षदानि स्वचरणपर्षद्येव यैः प्रतिशाखानियतमेव पदावग्रहप्रगृह्याप्रगृह्य[6]क्रमसंहितास्वरलक्षणमुच्यते तानीमानि पार्षदानि । प्रातिशाख्यानीत्यर्थः । आह । किं तेषामिति । उच्यते । तानि पदप्रकृतीनि । पदं येषु संहितायाः प्रकृतित्वेन चिन्त्यते तानीमानि पदप्रकृतीनि । तेषामपि स एव समय इत्यभिप्रायः ।

अत्र निर्णयः

आह । किं पुनरत्र साधीयः पदानां प्रकृतित्वं संहिताया विकारत्वमुत[7] वा विकारत्वं पदानां प्रकृतित्वं संहिताया इति। उच्यते संहितायाः प्रकृतित्वं ज्यायः । आह । किं कारणम् । उच्यते । मन्त्रो ह्यभिव्यज्यमानः पूर्वमृषेर्मन्त्रदृशः संहितयैवाभिव्यज्यते न पदैः । अतश्च संहितामेव पूर्वमध्यापयन्त्यनूचाना ब्राह्मणा अधीयते चाध्येतारः[8] । अपि च यज्ञकर्मणि संहितयैव विनियुज्यन्ते मन्त्रा न पदैः । यदि हि पदानि प्रकृतिरभविष्यन्न संहिता पदैरेव मन्त्रोऽभिव्यज्येत पदानि च पूर्वमध्यापयिष्यन्ब्राह्मणा अध्यैष्यन्त चाध्येतारः[9] पदैरेव विन्ययोक्ष्यन्त मन्त्राः कर्मसु । न त्वेतत्सर्व-

---

१ क. ख. घ. झ. ठ. °कृतिर्यस्याः. २ क. ख. घ. झ. ट. च. संहत्यमा°; ठ. संहन्यै°त्य. ३ क. ख. घ. झ. ‘हि’ नास्ति; ट. न्येव ˇप्र° हि. ४ घ. झ. शाखानां; ट. शाखानां° चरणानां. ५ ग. ज. °शाखानूत्तराणा°; च. °शाखान्तूरणा°. ६ ग. ज. प्रगृह्याप्रगृह्यं क्रम°. ७ घ. झ. ट. °स्त्वमथवा°. ८ घ. झ. ट. वाध्येतारः; ठ. वाध्ये° चा. ९ ठ. वाध्ये°.

मस्ति । तस्मादेतैर्विशेषहेतुभिः संहितैव प्रकृतिर्न पदानीति पश्यामः । समयमात्रमितरत्स्वशास्त्रनियतमेव । यदुक्तं पदप्रकृतीनि सर्वचरणानां पार्षदानि तेष्वेव हि व्याख्यायमानेषु पदानां प्रकृतित्वं भवति न सर्वत्रैवं । तस्मात्संहितैव प्रकृतिरित्येतदेव साधीय इति ।

याज्ञे कर्मणि मन्त्रा लिङ्गेन विनियुज्यन्ते

'अथापि याज्ञे दैवतेन बहवः प्रदेशा भवन्ति' । अथेदमपरमारम्भप्रयोजनमस्य शास्त्रस्येत्येवं विशेषाधिकारार्थोऽयमथशब्दः । अपीदं वक्ष्यमाणमपि यान्युक्तानीत्येवमपिशब्दः संभावने । आह । किं पुनस्तदिति । उच्यते । याज्ञे कर्मणि प्रवर्तमाने दैवतेन बहवः प्रदेशा भवन्ति । दैवतेन लिङ्गेन बहवो विधिप्रदेशा भवन्ति । तद्यथा । 'उपतिष्ठते व्युच्छन्त्यामैन्द्र्या सद आग्नेय्याग्नीध्रं वैष्णव्या हविर्धानम्' इत्येवमादि । न्यायविदः

न्यायविदां याज्ञिकानां तदेव मतम्

खल्वपि याज्ञिकाः पठन्ति लिङ्गतो मन्त्राणां शेषभावमधिकृत्य 'लिङ्गक्रमसमाख्यानात्काम्ययुक्तं समाम्नानम्' [जै० न्या० ३ । २ । १९] इति 'अधिकारे च मन्त्रविधिरतदाख्येषु शिष्टत्वात्' [जै० न्या० ३ । २।२०] इति चैवमादि ।

तत्रैवं सति 'तेचेद्ब्रूयुर्लिङ्गज्ञा अत्र स्म इति' । ते यद्यत्र ब्रूयुः । किमिति । लिङ्गज्ञा लिङ्गज्ञातारो वयमत्रैतस्मिन्नाम्नाये । लिङ्गतो वयमत्र या यस्मिन्देवता तां विजानीमो विज्ञाय च तद्दैवत एव कर्मणि विनियुञ्ज्महे तं मन्त्रम् । एवं च सति न नो निरुक्तशास्त्रेण प्रयोजनमस्तीति लिङ्गमस्माकं ज्ञापकमिति केचिद्वर्णयन्ति । त एवं ब्रुवन्तो वक्तव्याः यदि यूयं लिङ्गतो मन्त्रदेवतां विजानीध्वे 'इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति' इत्येतस्मिन्मन्त्रे का देवतेति । आह । केन पुनरभिप्रायेणास्मिन्मन्त्रे देवता पृच्छ्यत इति । उच्यते । 'वायुलिङ्गं चेन्द्रलिङ्गं

---

१ ठ. °त्रैवमस्मात्सं°. २ ग. ज. साधीयत इति; च. स(सा)धीयते इति. ३ ग. ज. व्युच्छत्यामै°. ४ घ. झ. °क्रमसंख्यानात्कस्य युक्तं°; च. °क्रमसमाख्यानात्काम्यैयु°. त्कस्य; ट. °क्रमसंख्यानात्कस्य युक्तं° समाख्यानात्काम्य; ठ. °क्रमसंख्यानकाम्य°. ५ क. ख. °कारे एवं च म°; घ. झ ट. °कारे एव च म°. ६ क. ख. घ. झ. ट. ठ. तां तत्र वि°. ७ क. ख. ग. ज. घ. झ. ट. विनियुज्महे.

चाग्नेये मन्त्रे '। अथ तावदयमाग्नेयो मन्त्रः । अथ च तावदेतस्मिन्मन्त्र इन्द्रवायू अपि श्रूयेते । तदेतद्दुःपरिज्ञानं लिङ्गमात्रेण कतमदत्र प्रधानं देवताभिधानं कतमदत्र नैघण्टुकमिति। ते चेद्याज्ञिका लिङ्गमात्रान्निरुक्तमनपेक्ष्य मन्त्रान्कर्मसु विनियुञ्जाना गुणप्रधानभावमजानन्तो देवताभिधानानामेकमन्त्रगतानामन्यदेवतं मन्त्रमन्यदेवते कर्मणि विनियुञ्जीरंस्ततश्चायथाकरणात्कर्मासमृद्धिः स्यात्। न च केवलं कर्मासमृद्धिरेव। किं तर्हि। अपध्वंसोऽपि स्यादेव दुरिष्टहेतुकः । तस्मात्परिज्ञेयं निरुक्तम् । तेन हि गुणप्रधानभावः शक्यते विवेक्तुमेकमन्त्रगतानां देवताभिधानानामिति। तदेतदेवं देवतापरिज्ञानद्वारेण पुरुषस्य प्रतिविशिष्टोपकारकारि। तस्माद्युज्यते प्रारब्धुमिति ।

निरुक्तशास्त्रज्ञानं विना केवलं लिङ्गतो मन्त्रविनियोगात्कर्मासमृद्धिरपध्वंसश्च

त्वां हि मन्द्रतममर्कशोकैर्ववृमहे महि नः श्रोष्यग्ने। इन्द्रं न त्वा शवसा देवता वायुं पृणन्ति राधसा नृतमाः (ऋ०सं०६।४।७)॥ भरद्वाजस्यार्षम् । आग्नेयी। प्रातरनुवाकाश्विनयोर्विनियुक्ता [आश्व० श्रौ० ४ । १३]। हे अग्ने त्वां हि त्वामेव मन्द्रतमं मृदुतमं सुखाराध्यतमम्। त्वं हि देवेषु सर्वेषु मृदुहृदयतमो यतोऽतस्त्वामेव ववृमहे संभजामहे । केन । अर्कशोकैः । एकपदमेतत् । अर्चनैर्मन्त्रैः शोकैर्दीप्तैर्यथोक्तब्रह्मचर्यजनितवीर्यैः । स नस्त्वं संभज्यमानस्तैर्मन्त्रैः संसेव्यमानो महि महत्स्तोत्रं तैरेव मन्त्रैर्युष्मद्गुणानुस्मृतिसंतानगर्भैरुपग्रथितं श्रोषि शृणु। किं चैवं त्वं महती देवता येन त्वामेवैकं देवता अपि सर्वा इन्द्रमिव च वायुमिव च शवसा बलेन बलकृतिभिस्तुतिभिरभ्यर्चन्ति किं पुनः स्वैः कर्मभिः । येऽपि च केचिदन्ये नृलोके नृणां मध्ये बलधनश्रुतैर्नृतमास्तेऽपि च त्वामेव पृणन्ति पालयन्ति पूरयन्ति वा राधसा हविर्लक्षणेन धनेन। एवं सदेवमनुष्यस्य जगतः पूज्यस्त्वं न केवलमस्माकमिति।

लिङ्गबाहुल्याद्देवतापरिज्ञानं दुर्लभम्। तस्योदाहरणम्

---

१ च. 'अयं' नास्ति. २ घ. ट. दुःपरिज्ञातं; ठ. दुष्परि°. ३ क. ख. घ. झ. °क्तमुपेक्ष्य; ट. °क्तमुपे° मन. ४ क. ख. घ. झ. ट. ठ. विज्ञातुमेक°. ५ ग. च. ज. °मिति। ३०। त्वां°. ६ ग. मंद्रतममर्कशोकै० नृतमाः; घ. झ. ट. मंद्र० तमाः; च. मंद्रतममिति. ७ क. ख. घ. झ. ट. ठ. विनियोगः. ८ ठ. अतस्त्वं. ९ क. ख. घ. झ. ट. ठ. °स्त्वं भज्य°. १० घ. झ. ट. 'तैः' नास्ति. २३ ११ घ. झ. ट. ठ. बलवतीभिः. १२ ग. ज. 'पालयन्ति' नास्ति.

एवमयमाग्नेयो मन्त्रः । स एष लिङ्गमात्रदर्शनेनाविज्ञातप्रधानदेवतो विनियुज्यमान ऐन्द्रे वायव्ये वा कर्मणि कर्तुरभिप्रेतफलसिद्धये नालं स्यात् । कर्मवैगुण्याच्च कर्तुरपध्वंसाय स्यात् । तस्माद्विज्ञेयं मन्त्रदेवतानिश्चयज्ञानाय निरुक्तमिति ।

'अग्निरिव मन्यो त्विषितः सहस्व' [ऋ॰ सं॰ १० । ८४ । २] इति । यथा पूर्वस्मिन्नाग्नेये वायुलिङ्गमिन्द्रलिङ्गं च 'तथा' एतस्मिन्नपि 'मान्यवे मन्त्रे' अग्निलिङ्गं नैघण्टुकम् । एवमनेकदेवतालिङ्गसंकटेषु दुरवधारं देवतातत्त्वमनैरुक्तेनाप्रसिद्धमन्त्रव्याख्यानसमयेन । यदुक्तं लिङ्गज्ञातारो वयमत्र लिङ्गत एव मन्त्रान्कर्मसु विनियोक्ष्यामहे न नो निरुक्तेन प्रयोजनमस्तीत्येतदयुक्तमिति ।

अन्यदुदाहरणम्

'त्विषिरित्यप्यस्य[1] दीप्तिनाम[2]' अपठितमपि दीप्तिनामसु । न केवलं यान्येव पठितान्यन्यान्यपीति ।

'अथापि' इदमपरमारम्भप्रयोजनमस्य । आह । किमिति । उच्यते ।

'ज्ञानप्रशंसा भवत्यज्ञाननिन्दा च' । ज्ञानं च प्रशस्यतेऽज्ञानं च निन्द्यते । तत्रैवं सति कथं[3] नामानिन्द्याः स्याम प्रशस्याश्चेति परिज्ञेयं निरुक्तम् । अतो ह्यध्यात्माधिदैवाधियज्ञाभिधायिनां[4] मन्त्राणामर्थाः परिज्ञायन्ते । ते च परिज्ञाताः सन्तः पुरुषस्योत्तमाय श्रेयसे भवन्ति । तदेवमखिलपुरुषार्थोपकारसमर्थं[5] शास्त्रमिति न्याय्यमारब्धुम्[6] । आह । क्व पुनर्ज्ञानं प्रशस्यतेऽज्ञानं च निन्द्यत इति । उच्यते । लोके शास्त्रे च[7] । लोके तावद्यः कश्चिद्विद्वान्भवति स पूज्यते पुण्यफलैषिभिर्जनैः । तदेतत्प्रत्यक्षत एव दृष्टम्[8] । शास्त्रेऽपि ॥ १७ ॥[9]

निरुक्तशास्त्रस्यापरं प्रयोजनम्

---

१ ग. 'अपि' नास्ति. २ क. ख. ग. ज. दीप्तिर्नाम. ३ क. ख. ग. ज. °सति वयमनिन्द्याः; घ. झ. ट. ठ. °सति वयं कथं°. ४ क. ख. घ. झ. ट. हि आध्या°. ५ क. ख. घ. झ. ठ. समर्थशास्त्र°. ६ क. ख. °रब्धुम् ॥ १ ॥ आह°. ७ ग. च. ज. लोके वेदे च; घ. झ. ट. लोके वेदे शास्त्रे च. ८ ठ. दृष्टम् ॥ अज्ञाननिन्दा ज्ञानप्रशंसा शास्त्रेपि स्थाणु°. ९ क. ख. घ. झ. ट. ठ. अङ्को न विद्यते; ग. च. ज. ३१.

स्थाणुरयं भारहारः किलाभूदधीत्य वेदं न विजानाति योऽर्थम् । योऽर्थज्ञ इत्सकलं भद्रमश्नुते नाकमेति ज्ञानविधूतपाप्मा । यद्गृहीतमविज्ञातं निगदेनैव शब्द्यते । अनग्नाविव शुष्कैधो न तज्ज्वलति कर्हिचित् । स्थाणुस्तिष्ठतेरर्थोऽर्तेररणस्थो वा ॥ १८ ॥

स्थाणुरयं भारहार इत्येवमादि । स्थाणुर्वृक्षः । स यथा पत्रपुष्पफलानामात्मीयानां धारणमात्रेणैव संबध्यते न तज्जैर्गन्धरसरूपस्पर्शोपभोगसुखैः । एवं[1] च किलासावधीत्य वेदं न विजानाति योऽर्थं तस्य

स्मृतावज्ञाननिन्दा

वेदस्याध्ययन[3]भारमात्रमेव ह्यसौ बिभर्ति । योऽर्थज्ञ इत्सकलं भद्रमश्नुते । य एवार्थज्ञो भवति न ग्रन्थमात्राध्येता स एव सकलमनवखण्डितं भद्रमश्नुतेऽर्थपरिज्ञानफलमश्नुते प्राप्नोति । किं पुनस्तत् । इह लोके पूज्यतामुपेत्य शिष्टानामितो लोकादन्तकाले नाकमेति । यत्रासुखं किंचिदपि

ज्ञानप्रशंसा च

नास्त्याध्यात्मिकमाधिदैविकमाधिभौतिकं वा तत्स्थानमेति निरतिशयम् । कस्मात्पुनरसावीदृशं स्थानमेतीति । इतो यस्मादसौ ज्ञानविधूतपाप्मा । ये हि नाकगमनप्रतिबन्धिनः पाप्मानस्ते तस्य ज्ञानेन विधूताः । अतोऽसावेति नाकम् । उक्तं चान्यत्रापि ' न हि ज्ञानेन सदृशं पवित्रमिह विद्यते ' (भ० गी० ४ । ३८] इति । अथवा स्थाणुर्गर्दभः । स यथा चन्दनभारं वहत्येव न[5] तदुपभोगै[6]नाभिसंबध्यत एवं किलासौ यो ग्रन्थमात्राध्येता नार्थज्ञः[7] । एवं तावदस्मिन् ज्ञानं प्रशस्तम् ।

अथैतस्मिन्नज्ञानं निन्द्यते[8] । यद्गृहीतं गुरुमुखादज्ञातं[9] चार्थतः किंचिन्निगदमात्रेणैव नित्यकालं शब्द्यत उच्चार्यते न पुनस्तै[10]रर्थतो विचार्यते ।

---

१ क. ख. ड. २; छ. त. २३. २ क. ख. घ. झ. ट. 'एवं' नास्ति. ३ ग. ज. °ध्ययनं भा°. ४ घ. ढ. रर्थज्ञपरिज्ञा°. ५ क. ख. ग. ज. घ. झ. ट. 'न' नास्ति. ६ क. ख. ग. ज. घ. झ. ट. °भोगैर्नाभि°. ७ ठ. °ध्येतानर्थज्ञः. ८ क. ख. घ. झ. ट. ढ. निन्द्यते । यद्गृहीतमविज्ञातमिति । यद्गृहीतं गुरु°; ग. च. ज. निन्द्यते ॥ ३२ ॥ यद्गृहीतं गुरु°. ९ क. ख. घ. झ. ट. ठ. °दविज्ञातं. १० क. ख. घ. झ. ट. ढ. ' तैः ' नास्ति.

आह । किं तस्य । उच्यते । अनग्नाविव शुष्कैधः । शुष्कं काष्ठमनग्नौ प्रदेशे नालं ज्वलनाय प्रकाशाय । एवं यो

अज्ञाननिन्दा

वेदार्थस्यानभिज्ञोऽध्येता स वेदाध्ययनभारमात्रेणैव संबध्यते न तु तदीयेन फलेन । परिज्ञानं तु श्रेयसा चाभ्युदयेन च युनक्तीति । तस्मादेतत्परिज्ञानायावश्यं निरुक्तशास्त्रमारब्धव्यमिति ।

स्थाणुशब्दमर्थशब्दं चोदाहरणाप्रसक्तौ निर्वक्ति । 'स्थाणुस्तिष्ठतेः' । स्थितो ह्यसौ नित्यकालमेव भवति न कदाचिदप्यासीदेति[1] । 'अर्थोऽर्तेः' गतिकर्मणः । अर्यते ह्यसावर्थिभिः । 'अरणस्थो वा' । यदा ह्यस्य स्वाम्यरति गच्छतीतो लोकादमुं लोकं तदायमिहैव तिष्ठति नानेनैव सहामुं लोकं गच्छति दीनारादिरर्थः । तत्सामान्यादितरोऽपि शब्दार्थोऽर्थ उच्यते ।

एवं तावच्छिष्टानुगमस्मृतौ ज्ञानं प्रशस्यतेऽज्ञानं च निन्द्यते[2] । न केवलं स्मृतावेव ज्ञानप्रशंसाज्ञाननिन्दा च । किं तर्हि । वेदेऽपि प्रदर्शयति ॥ १८[3] ॥

उत त्वः पश्यन्न ददर्श वाचमुत त्वः शृण्वन्न शृणोत्येनाम् । उतो त्वस्मै तन्वं[1] वि सस्रे जायेव पत्य उशती सुवासाः (ऋ० सं० १० । ७१ । ४) ॥ अप्येकः पश्यन्न पश्यति वाचमपि च शृण्वन्न शृणोत्येनामित्यविद्वांसमाहार्धमप्येकस्मै तन्वं विसस्र इति स्वमात्मानं विवृणुते ज्ञानं प्रकाशनमर्थस्याहानया वाचोपमोत्तमया वाचा जायेव पत्ये कामयमाना सुवासा ऋतुकालेषु सुवासाः[4] कल्याणवासाः कामयमाना ऋतुकालेषु । यथा स एनां पश्यति स शृणोतीत्यर्थज्ञप्रशंसा । तस्योत्तरा भूयसे निर्वचनाय ॥ १९[5] ॥

---

१ क. °प्यासीदिति; घ. झ. ट. ठ. °प्यासीतेति; च. प्यासीदिति° ते. २ क. ख. °न्द्यते ॥२॥ न°; ठ. °न्द्यते । न केवलं स्मृतावेव ज्ञानप्रशंसा । इति नि० व्याख्यायां षष्ठाध्याये अष्टादशः खण्डः ॥ न केवलं°. ३ क. ख. घ. झ. ट. ठ. अङ्को नास्ति; ग. च. ज. २३. ४ छ. त. द. 'सुवासाः कल्याणवासाः कामयमाना ऋतुकालेषु' नास्ति. ५ क. ख. द. २; छ. त. २४.

उत त्वः पश्यन्न ददर्श वाचमिति विद्यासूक्ते द्वे अप्येते ऋचौ । बृहस्पतेरार्षम् । उतशब्दोऽपिशब्देन समानार्थः । त्वः

वेदेऽज्ञाननिन्दा

एक इत्यर्थः । बहूनामपि समानपृष्ठोदरपाणिपादानां समानमेवाध्ययनमधीयानानामेकः कश्चित्पश्यन्नपि वाचं मनसा स्वभ्यस्ताध्ययनोऽपि तीक्ष्णविद्यः सन्न पश्यत्येवार्थानभिज्ञत्वात् । स हि तां सम्यक्पश्यति यस्तस्या अर्थं विजानाति । अर्थपरिज्ञानफला हि वागित्यभिप्रायः । एवमेकः शृण्वन्नपि न शृणोत्येवैनां वाचम् । य एव ह्यर्थमवबुध्यते वाचस्तेनैव हि सा सम्यक्श्रुता भवति नेतरेण । इतरो ह्यविद्वान्ध्वनिमात्रमेवोच्चारयति शृणोति वा वाचः । एवमनेनार्धर्चेन 'अविद्वांसमाह' निन्दन्मन्त्रदृक् । सांप्रतमुत्तरेणार्धर्चेनार्थज्ञं प्रशंसन्नाह । उतो त्वस्मै अप्येकस्मै कस्मैचिदर्थज्ञाय

ज्ञानप्रशंसा च

तन्वं शरीरं विसस्रे विस्रंसयति विवृणोतीत्यर्थः । अर्थो वाचः शरीरम् । तं विवृत्यात्मानं दर्शयत्येकस्मै कस्मैचिदर्थज्ञाय । 'अर्थप्रकाशनमाहानया वाचा'। अनेन तृतीयेन पादेनेत्यर्थः । कथं पुनर्विवृणुते तन्वमिति । यत 'उपमोत्तमया वाचा' उत्तमेन पादेनोच्यते 'जायेव पत्य उशती सुवासाः' इत्यनेन । यथा हि जाया विवृतसर्वाङ्गावयवा भूत्वा उशती कामयमाना इष्टाय भर्त्रे प्रेम्णा दर्शयेदात्मानम् । कस्मिन्काले । यदा सुवासा भवति निर्णिक्तवासा भवति निर्णिक्तवासा नीरजस्का 'ऋतुकालेषु' तदा ह्यातितरां स्त्री पुरुषं प्रार्थयते । अत एतयाऽवस्थयोपमीयते । यथा स पुरुषस्तां यथावत्पश्यति स्त्रियं नेतरो यो घनपटप्रावृतसर्वगात्राम् । एवं स एवैतां वाचं यथावत्पश्यति यः पदशोऽवच्छिद्यैतां विगृह्य चार्थमस्याः पश्यति समस्तव्यस्तम् । एवमस्यामृचीयं 'अर्थज्ञप्रशंसा' ।

---

१ क. ख. घ. झ. ट. पश्यन्निति । विद्या°. २ च. समानाध्यय°. ३ क. ख. °श्यति वाचम् । एव°; ग. °श्यति शृणोति वाचम् । एव°; घ. ट. श्यन्न शृणोति वाचम् । एव;° झ. श्यन्नृणोति वाचम् । एव;° ठ. °श्यन्न शृणो°. ४ ग. ज. अप्येकस्मैचिद्; घ. अप्येकस्मैचिद्°; ट. अप्येकस्मैकस्मैचिद्°. ५ क. ख. घ. झ. ट. विवृणोत्यात्मा°. ६ घ. ट. 'त्येकस्मैचिद्°. ७ घ. झ. कथं हि पुन°. ८ ग. ज. 'निर्णिक्तवासा भवति' नास्ति. ९ घ. झ. ट, °श्यति यः पश्यति यः पदशो°. १० ग. ज. झ. चार्थ°.

अपीयमपरा ऋगस्या एव 'उत्तरा' अस्यैवार्थस्य प्रकृतस्य ज्ञानप्रशंसाख्यस्य फलाभिधानद्वारेण 'भूयसे' बहुतरायामुना फलेनाभिसंबन्धात्प्रतिविशिष्टं ज्ञानमित्येवं निर्विविच्य[1] निर्धार्य वचनाय निर्वचनाय । तद्यथा[2] ॥ १९ ॥

उत त्वं सख्ये स्थिरपीतमाहुर्नैनं हिन्वन्त्यपि वाजिनेषु ।
अधेन्वा चरति माययैष वाचं शुश्रुवाँ अफलामपुष्पाम्

[ऋ० सं० १० । ७१ । ५] ॥ अप्येकं वाक्सख्ये स्थिरपीतमाहू रममाणं विपीतार्थं देवसख्ये रमणीये स्थान इति वा विज्ञातार्थं यं नाप्नुवन्ति वाग्ज्ञेयेषु[3] बलवत्स्वप्यधेन्वा ह्येष चरति मायया वाक्प्रतिरूपया[4] नास्मै कामान्दुग्धे वाग्दोह्यान्देवमनुष्यस्थानेषु यो वाचं श्रुतवान्भवत्यफलामपुष्पामित्यफलास्मा अपुष्पा वाग्भवतीति वा किंचित्पुष्पफलेति वार्धं वाचः पुष्पफलमाह याज्ञदैवते पुष्पफले देवताध्यात्मे[5] वा[6] साक्षात्कृतधर्माण ऋषयो बभूवुस्तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्त्संप्रादुरुपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदं च वेदाङ्गानि च बिल्मं भिल्मं भासनमिति वैतावन्तः समानकर्माणो धातवो धातुर्दधातेरेतावन्त्यस्य सत्त्वस्य नामधेयान्येतावतामर्थानामिदमभिधानं नैघण्टुकमिदं देवतानामप्राधान्येनेदमिति तद्यद्न्यदैवते मन्त्रे निपतति नैघण्टुकं तत्[7] । अश्वं न त्वा वारवन्तम्[8] । अश्वमिव त्वा वालवन्तं वाला दंशवारणार्था भवन्ति दंशो दशतेः । मृगो न भीमः कुचरो गिरिष्ठाः । मृग इव भीमः कुचरो गिरिष्ठा मृगो

---

१ क. ख. घ. झ ट. ठ. °त्येवं निर्वचनाय । निर्विविच्य निधार्य वचनं कथनं निर्वचनं तस्मै निर्वच°. २ क. ख. ३; ग. ३४ । २४; च. ज. ३४; घ. झ. ट. अङ्को नास्ति; ठ. इति निरुक्तव्याख्यायां षष्ठाध्याये एकोनविंशः खण्डः. ३ ङ. वाग्न्येयेषु° ग्ये; छ. वाङ्नेयेषु; त. वाज्ञेयेषु° ज्ञे. ४ ठ. °तिभूतया. ५ ठ. दैव° दै. ६ क. ख. द. °ध्यात्मे वा ॥४॥ साक्षा°; छ. त. °ध्यात्मे वा ॥२५॥ साक्षा°. ७ क. ख. द. तत् ॥ ५ ॥ अश्वं; छ. त. तत् ॥ २६ ॥ अश्वं°. ८ ङ वारवन्तं.

मार्ष्टेर्गतिकर्मणो भीमो बिभ्यत्यस्माद्भीष्मोऽप्येतस्मादेव । कुचर इति चरति कर्म कुत्सितमथ चेद्देवताभिधानं क्वायं न चरतीति गिरिष्ठा गिरिस्थायी गिरिः पर्वतः समुद्गीर्णो भवति पर्ववान् पर्वतः पर्व पुनः पृणातेः प्रीणातेर्वार्धमासपर्व देवानस्मिन् प्रीणन्तीति तत्प्रकृतीतरत्सन्धिसामान्यान्मेघस्थायी मेघोऽपि गिरिरेतस्मादेव तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते तदुपरिष्टाद्व्याख्यास्यामो नैघण्टुकानि नैगमानीहेह[1] ॥ २० ॥

उत त्वं सख्ये स्थिरपीतमाहुरिति । अप्येकं अपि बहून् । विदुषः सख्ये सखिभावे । कतरस्मिन् । देवसख्ये । देवानां समानख्यानतायां देवसायुज्य इत्यर्थः । वक्ष्यति हि 'यां यां देवतां निराह तस्यास्तस्यास्ताद्भाव्यमनुभवति' (निरु० १३ । १३) इति[2] । अथवा

ज्ञानप्रशंसार्थान्या ऋक् ।

देवसख्ये रमणीये स्थाने । यस्मिन्देवानां सखिभावस्तद्देवसख्यं स्थानम् । तस्मिन्देवसख्ये रमणीये स्थाने देवलोक इत्यर्थः । किमिति । स्थिरं अविचालिनमप्रच्यवनधर्माणम् । कमेवमाहुः । विपीतार्थं आपीतार्थं गृहीतार्थमित्यर्थः । क एवमाह । इयमेव वाक् ऋक्संज्ञिका । किंच । नैनं हिन्वन्त्यपि वाजिनेषु । एनं वागर्थज्ञं न हिन्वन्ति नानुगन्तुं शक्नुवन्ति । केषु । वाजिनेषु वाग्ज्ञेयेष्वर्थेषु[3] बलवत्स्वपि दुर्ज्ञेयेषु दुरवघटनीयेषु[4] समुद्रपिहितरत्नसंनिभेषु देवतापरिज्ञानादिषु व्याकर्तव्येषु । स हि तान्व्याकर्तुं शक्नोति । नेतरे मन्दबुद्धयो बहवोऽपि समागताः शक्नुवन्ति तानर्थान्व्याकर्तुं यानसौ व्याकरोति । अत एतदुक्तं 'नैनं हिन्वन्त्यपि वाजिनेषु' इति । एवं तावदर्थज्ञः प्रशस्तः ।

अथेदानीमविद्वानुत्तरेणार्धर्चेन निन्द्यते । अधेन्वा चरति । अधेन्वा ह्येष चरति[5] । न हि सा वाग्धिनोतीह न परत्र च यस्या अर्थो न परिज्ञायते । तया गृहीतयैव तामधीयान इतश्चेतश्च चरति । तत्प्रधान एव सर्वतः पर्य-

---

१ क. ख. ६; छ. त. २७; ङ. द. अङ्को नास्ति २ घ. ट. 'तस्याः' सकृदेव. ३ ग. ज. वाज्ञेये°; च. वाज्ञेये° ग्ज्ञे. ४ घ. झ. ठ. दुरववघघटनीयेषु; च. दुरवघाटनीयेषु ५ घ. झ. ट. वराति.

इतीत्यभिप्रायः । किं च मायय्यैष चरति गृहीतया ।

तस्यामेवाज्ञाननिन्दा

यथा हि कश्चिन्मायया सुवर्णं बिभृयादेवमयमेवाचमेतां बिभर्ति । सा तादृशी भ्रियमाणा वाक्किं करोति । नास्मै कामान्दुग्धे । कतमान् । ये तस्या वाचो दोग्धव्याः । क्व । देवतास्थानेषु मनुष्यस्थानेषु च । यः किं करोति । य एवं शुश्रुवान् श्रुतवान्भवति । कथम् । अफलामपुष्पामिति । एवं यः श्रुतवान् भवत्यन्येभ्यः सकाशाच्छ्रुत्वा च दृढग्राहेण गृहीत्वावस्थितो भवत्यध्ययनादृते नान्यदस्ति वाचि किंचिन्मृग्यमिति । तस्मै किमिति । अफलैवास्मै अपुष्पा च वाग्भवति । यथैव ह्यसौ पश्यत्यफलेयमपुष्पा चेति तथैव भवतीत्यभिप्रायः । अथवा किंचित्पुष्पफलेति वा । एतदुक्तं भवत्यल्पफलामल्पपुष्पामिति । किं कारणम् । अस्ति ह्यध्ययनमात्रेऽपि किंचिदल्पं[1] फलम् । नासौ परिश्रमो व्यर्थ एवेति भाष्यकाराभिप्रायः । आह । किं पुनर्वाचः पुष्पफलमिति । उच्यते । ‘ अर्थं वाचः पुष्पफलमाह ’ एतस्मिन्मन्त्रे मन्त्रदृक् । आह । कः पुनरसावर्थ इति । याज्ञं दैवतमध्यात्ममित्येष वाचः समासतोऽर्थः । स पुनरेष रूपक[2]कल्पनया पुष्पफलविभागेन द्विधा प्रविभज्यते ‘ याज्ञदैवते पुष्पफले दे[3]वताध्यात्मे वा ’

वाचः पुष्पफले याज्ञदैवते देवताध्यात्मे वा

इति । यज्ञपरिज्ञानं याज्ञं देवतापरिज्ञानं दैवतमात्मन्यधि यद्वर्तते तदध्यात्मम् । स एष सर्वोऽपि मन्त्रब्राह्मणराशिरेव त्रिधा[4] विभक्तः । तत्रैवं सति यदाभ्युदयलक्षणो धर्मोऽभिप्रेयते तदा याज्ञं पुष्पं दैवतं फलम् । किं कारणम् । पूर्वं हि पुष्पं भवति फलार्थम् । याज्ञमपि च पूर्वं तन्यते देवतार्थं चेत्येतस्मात्सामान्याद्याज्ञं पुष्पं दैवतं फलम् । यदा पुनर्निःश्रेयसलक्षणो धर्मोऽभिप्रेयते तदोभे अपि याज्ञदैवते पुष्पत्वमेव बिभृतः । दैवते हि याज्ञमन्तर्भूतमेव तदर्थत्वादतो न पृथगुच्यते । तत्पुन[5]रे[6]तदधिदैवतं सर्वमपि प्रतिविशिष्टज्ञानेनोपासकेन मुमुक्षुणा निरूप्य चेतसात्मानमेव प्रत्यभिसंपाद्यते कार्यकरणाधिदै[7]वताद्वारेण । सोऽयमेवमधि-

---

१ ग. ज. °दल्पफलम्; ठ. ‘दल्पं’ ल्पं. २ क. ख. घ. झ. ट. ठ. रूपकल्प°. ३ क. ख. घ. झ. ट. दैवता°. ४ ग. ज. त्रेधा. ५ क. ख. ग. ज. घ. झ. ट. ठ. यत्पुन°. ६ क. ख. ध. झ. ट. ठ. ‘ एतद् ’ नास्ति. ७ ग. ज घ. झ. ट. °धिदैवता°.

दैवतमधि[1]यज्ञं चोच्छिद्याध्यात्ममेवाभिसंपादयति यथा पुष्पभावमुच्छिद्य पुष्पं फलभावायेति । एवं सोऽयमात्म[2]याज्येवाभिसंपद्यते । तत्रैवं सत्यभ्यात्मार्थत्वादधिदैवस्याध्या[3]त्मे च[4] पुरुषार्थस्य निष्ठावाद्दैवतं पुष्पमध्यात्मं फल[5]मित्येव युक्तम् ।

आह । कुतः पुनरिदमायातं निरु[6]क्तशास्त्रं प्रधानमितराणि चाङ्गानीति । उच्यते[7] । 'साक्षात्कृतधर्माण ऋषयो बभूवुः' । साक्षात्कृतो यैर्धर्मः साक्षाद्दृष्टः प्रतिविशिष्टेन तपसा त इमे साक्षात्कृतधर्माणः । के पुनस्त इति । उच्यते । ऋषयः । ऋषन्त्यमुष्मात्कर्मण एवमर्थवता मन्त्रेण [8]संयुक्तादमुना प्रकारेणैवं लक्षणः फलविपरिणामो भवतीत्यृ[9]षयः । 'ऋषिर्दर्शनात्' इति वक्ष्यति (नि० २ । ११) । तदेतत्कर्मणः साक्षात्फलविपरिणामदर्शनमौपचारिक्या वृत्त्योक्तं साक्षात्कृतधर्माण इति । न हि धर्मस्य दर्शनमस्त्यत्यन्तापूर्वो हि धर्मः । आह । किं तेषामिति । उच्यते । 'तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान्संप्रादुः' । ते ये साक्षात्कृतधर्माणस्तेऽवरेभ्योऽवरकालीनेभ्यः शक्तिहीनेभ्यः श्रु[10]तर्षिभ्यः । तेषां हि श्रुत्वा ततः पश्चादृषित्वमुपजायते न यथा पूर्वेषां साक्षात्कृत[11]धर्मणां श्रवणमन्तरणैव । आह । किं तेभ्य इति । तेऽवरेभ्य उपदेशेन शिष्योपाध्यायिकया वृत्त्या मन्त्रान्ग्रन्थतोऽर्थतश्च संप्रादुः संप्रत्तवन्तः । तेऽपि चोपदेशेनै[12]व जगृहुः । अथ तेऽपि 'उपदेशाय ग्लायन्तोऽवरे बिल्मग्रहणायेमं ग्रन्थं समाम्नासि-

साक्षात्कृतधर्मभिरसाक्षात्कृतधर्मभ्यो मन्त्रदानम्

१ झ. ट. °वतमाधि°. २ घ. ङ. °मात्मा याज्ये°. ३ क. ख. ग. ज. घ. झ. ट. ठ. °स्याध्यात्मस्य. ४ ग. ज. 'च' नास्ति. ५ क. ख. निष्पन्नत्वात् ; ग.ज. नि–त्वात्; घ. झ. ट. न निष्पन्नत्वात्; ड. न निष्पन्नत्वात्. ६ क. ख. फलमित्युक्तम् ॥ ४ ॥ आह°; घ. झ. ट. ठ. फलमित्युक्तं आह°. ७ ग. ज. निरुक्तं शास्त्रप्रधानं; च. निरुक्तं शास्त्रमितरा;° ठ. नैरुक्त°. ८ ग. °ते ॥ २५ ॥ सा°. ९ घ. ट. मन्त्रेण युक्ता°. १० ठ. भवतीति पश्यन्ति त ऋषयः. ११ ग. ज. श्रुतऋषिभ्यः; च. श्रुतर्कऋषिभ्यः. १२ ग. च. ज. घ. ट. ढ. °धर्माणां १३ ग. घ. झ. 'एव' नास्ति; ट. °शेनै° ज. °नैव.

सौकर्येणोपदेशग्रहणाय वेदवेदाङ्गानामसाक्षात्कृतधर्मभिः समाम्नानम्.

षुर्वेदं च वेदाङ्गानि च ' इति । उपदेशायोपदेशार्थम् । कथं नामोपदिश्यमानं[1]मेते शक्नुयुर्ग्रही[2]तुमित्ये[3]वमर्थमधिकृत्य ग्लायन्तः खिद्यमानास्तेष्ववमृह्णत्सु, तदनुकम्पया तेषामायुषः संकोचमवेक्ष्य कालानुरूपां च ग्रहणशक्तिं बिल्मग्रहणा[4]येमं ग्रन्थं गवादिदेवपत्न्यन्तं समाम्नातवन्तः । किमेतमेव । नेत्युच्यते । वेदं च वेदाङ्गानि चेतराणीति । कथं पुनः समाम्नासिषुरिति । आह । शृणु । वेदं तावदेकं सन्तमतिमहत्त्वाद्दुरध्येयमनेकशाखाभेदेन समाम्नासिषुः । सुखग्रहणाय व्यासेन समाम्नातवन्तः । तद्यथा । एकविंशतिधा बाह्वृच्यमेकशतधाध्वर्यवं सहस्रधा सा-

समाम्नानप्रकारः

मवेदं नवधाथर्वणम् । वेदाङ्गान्यपि । तद्यथा । व्याकरणमष्टधा निरुक्तं चतुर्दशधेत्येवमादि । एवं समाम्नासिषुर्भेदेन ग्रहणार्थम् । कथं नाम भिन्नान्येतानि शाखान्तराणि लघूनि सुखं गृह्णीयुरेते शक्तिहीना अल्पायुषो मनुष्या इत्येवमर्थं समाम्नासिषुरिति ।

बिल्मशब्दं भाष्यत्रो[5]क्यप्रसक्तं निर्ब्रवीति । यदेतत् ' बिल्मं ' इत्युक्तमेतत् " भिल्मं ' वेदानां भेदनम् । भेदो व्यास इत्यर्थः । ' भासनमिति वा ' । अथवा भासनमेव बिल्मशब्देनोच्यते । वेदाङ्गविज्ञानेन भासते प्रकाशते वेदार्थ इत्यत इदमुक्तं बिल्ममिति । एवं भिदेर्भासतेर्वा बिल्मशब्दः । एवमिदमृषिभ्यो निरुक्तशास्त्रमाया[6]तमितराणि चाङ्गानीति परिशोधित आगमः ।

अथेदानीं निघण्टुसमाम्नायविरचना वक्तव्या प्रकरणत्रय[7]विभागेन सुखव्याख्यानार्थमस्य शास्त्रस्य । सेयमुच्यते ।

निघण्टुसमाम्नायस्य प्रकरणत्रयम्.

' एतावन्तः समानकर्माणो[8] धातव एतावन्त्यस्य सत्त्वस्य नामधेयानि ' इति । स एष[9] पदराशिर्नै-

---

१ क. ख. घ. झ. ट. ठ. °मानमर्थमेते°. २ क. ख. घ. झ. ट. ठ. °र्गृहीतुं. ३ क. ख. मित्येतमधि°; घ. झ. ट. °मित्येतवमर्थ°. ४ क. ख. घ. झ. ट. ठ. बिल्मग्रहणं. ५ घ. झ. ट. ठ. भाष्यकारप्र°. ६ क. ख. °मागत°; घ. ट. °मागयात°. ७ घ. झ. ठ. ढ. °त्रयसंविभागेन°. ८ ग. च. ज. ढ. °कर्मणो°. ९ च. एकः.

नैघण्टुकम्

घण्टुकं नाम प्रकरणम् । एतावन्त इति या चैषु धातुषु चाख्यातपदेषु प्रतिनियता संख्या साभिप्रेयते । तद्यथा । ‘ गतिकर्माण उत्तरे धातवो द्वाविंशं शतम् ’ [नि० ३ । ९] ‘ कान्तिकर्माण उत्तरे धातवोऽष्टादश ’ [निरु० ३ । ९] इत्येवमादि । एतावन्त्यस्य सत्त्वस्येति नामधेयप्रतिनियता संख्याभिप्रेयते । तद्यथा । ‘ पृथिवीनामधेयान्येकविंशतिः ’ [निरु० २ । ७] ‘ हिरण्यनामान्युत्तराणि पञ्चदश ’ [निरु० २ । १०] इत्येवमादि । यत्रैतावर्थौ प्रायेण चिन्त्येते प्रसङ्गतोऽन्यद्यत्किंचित्तदेतदेवंलक्षणं नैघण्टुकं नाम प्रकरणं गवादि प्राग्जहाशब्दात् [निघ० अध्या० १–३] ।

ऐकपदिकम्

अथ पुनर्यत्र ‘ एतावतामर्थानामिदमभिधानं ’ इत्यर्थः प्रायेण चिन्त्यते । तद्यथा । ‘ आदित्योऽप्यकूपारः समुद्रोऽप्यकूपारः [निरु० ४ । १८] इत्येवमादिः । अनवगतसंस्काराश्च निगमा जहादयः प्रायेण चिन्त्यन्तेऽनुषङ्गतोऽन्यद्यत्किंचित्तदेतदेवंलक्षणमैकपदिकं नाम प्रकरणं जहादि प्रागग्निशब्दात् [निघ० अध्या० ४] ।

दैवतम्

अथ पुनर्यत्र नैघण्टुकं देवतानामास्मिन्मन्त्र इदमन्यदत्र प्राधान्येन वर्तत इत्ययं विभागः प्रायेण चिन्त्यते तदेवंलक्षणं प्रकरणं दैवतं नामाग्निशब्दादि देवपत्न्यन्तम् । (निघ० अध्या० ५) । तान्येतानि त्रीणि प्रकरणानि नैघण्टुकमैकपदिकं दैवतमिति । अनेन प्रकरणत्रयविभागप्रपञ्चेनेदमवस्थितं निरुक्तशास्त्रमिति ।

नैघण्टुकदेवतानाम्नो लक्षणम्

‘ तद्यदन्यदेवते मन्त्रे निपतति नैघण्टुकं तत् ’ । इदमुक्तं ‘ नैघण्टुकमिदं देवतानाम प्राधान्येनेदमिति ’ । तत्र न ज्ञायते किमिदमुक्तं भवति । तदेतल्लक्षणत उपदिश्यत इति पर्युपयुक्तस्तच्छब्दः । यदभिधानमन्यदेवते । अन्या यस्मिन् प्रधानदेवता सोऽयमन्यदेवतः । तस्मिन्नन्यदेवते मन्त्रे स्वमर्थमन्यस्यां प्रधानायां मन्त्रदेवतायां-

१ घ. झ. ट. वैषु. २ क. ख. ढ. व्याख्यात°; झ. वाख्यानपदेषु. ३ क. ख. ग. ञ. नामसु प्रति°; घ. झ. °स्येति या नामसु प्रति°; ढ. °स्येति या नामसु प्रति° नामधेय. ४ घ. झ. ट. संख्या साभिप्रे°. ५ ठ. ‘ एतत् ’ नास्ति. ६ घ. झ. ढ. ठ. तदेवंदेवं.° ७ घ. ट. ठ. दैवमिति. ८ क. ख. ग. च. ञ. ढ. °न्यदैव°. ९ क. ख ढ. °न्यदैव°.

निगमयत्[1]पतति प्रयुज्यमानमङ्गभावं गच्छति मन्त्रवाक्ये नैघण्टुकं तदित्युच्यते । गुणभूतमित्यर्थः । संज्ञा हि तस्येयमस्मिञ्छास्त्रे[2] । तद्यथा ।

नैघण्टुकदेवतोदाहरणम्

अश्वं न त्वा[3] वारवन्तं वन्दध्या अग्निं नमोभिः । सम्राजन्तमध्वराणाम् (ऋ० सं० १ । २७ । १) ॥ अस्यामृच्यश्वो नैघण्टुकोऽग्निः प्रधानम् । शुनःशेपस्यार्षम् । गायत्री । वारवन्तीयानुशंसने विनियुक्ता । साम्नश्च वारवन्तीयस्यैषा योनिः । अश्वं न त्वा अश्वमिव त्वा हे अग्ने अग्निं अग्रेनेतारं[4] देवानां[5] वारवन्तं बालवन्तं वृषाश्वम् । स ह्यतितरां वालवान्भवति वन्द्यते परिचर्यते च न तथान्ये । तमिव त्वां वन्दध्यै वन्दामहे स्तुमो नमोभिर्नमस्कारैरन्नैर्वा[6] हविर्भिरुद्यतैः । क्व पुनरवस्थितं कथं वा वन्दामह इति । सम्राजन्तं दीप्यमानमध्वराणां यज्ञानां मध्येऽवस्थितमुत्तरवेद्यादिषु धिष्ण्येष्वभिप्रेतार्थसिद्धये वन्दामहे ।

वालशब्दस्य[7] निगमप्रसक्तस्य निर्वचनम् । 'वाला[8] दंशवारणार्था भवन्ति' । तैर्हि दंशादयो निवार्यन्ते । दंशशब्दस्य प्रसक्तानुप्रसक्तस्य निर्वचनं 'दंशो दशतेः' इति । दशति ह्यसौ ।

तत्रैव द्वितीयोदाहरणम्

द्वितीयमुदाहरणम्[9] । मृगो न भीमः[10] कुचरो गिरिष्ठाः परावत आ जगन्था परस्याः । सृकं संशाय पविमिन्द्र तिग्मं वि शत्रून्ताळ्हि वि मृधो नुदस्व [ऋ० सं० १० । १८० । २] ॥ जयो[11] नामेन्द्रपुत्रः । तस्येयमार्षम् । त्रिष्टुप् । वैमृधस्य हविषो याज्या [आश्व० श्रौ० २ । १०] । इन्द्रोऽस्य प्रधानं मृगो नैघण्टुकः । मृगो न मृग इव व्याघ्रो वा सिंहो वा । भीमो भीषणः[12] कुचरः कुत्सितचरणो हिंस्रः प्राणिवधजीवनः । गिरिष्ठाः पर्वताश्रयः । स यथा

१ ग. ज. निगमयत्यभिप्रयुज्य.° २ क ख. °च्छास्त्रे ॥ ५ ॥ तद्य;° ग. °च्छास्त्रे ॥ २५ । २६ खण्डः ॥ तद्य;° च. ज. °च्छास्त्रे ॥ २५ ॥ तद्य°. ३ ग. त्वा०मध्वराणाम् ; घ. झ. ट. त्वा०अध्वराणाम्. ४ क. ख. ग. ज. ठ. °अग्रे ने°. ५ घ. झ. ट. देवतानां. ६ घ. झ ट. 'नमोभिः' नास्ति. ७ ठ वाल°. ८ ठ. वाला°. ९ ग. च. ज. °णम् ॥ २६ ॥ मृगो°. १० ग. च. ज. घ. झ. ट. भीम इति. ११ क. ख. ग. च. ज. ठ. गयो. १२ घ. झ. ट. भीषणं.

कंचिदन्यं प्राणिविशेषं हन्ति तैर्[1]नाभिभूयमानः । परावतः[2] परस्मा[3]दतिदूरस्थानात्परस्याः दिवः[4] संबन्धिन आगच्छे[5] । एतदर्थमागत्य चेह कर्मणि हे इन्द्रैतदस्मद्वचः कुरु । सृकं यः शत्रुका[6]र्येषु सर्तुं शक्नोति तं पविं वज्रं संशाय तीक्ष्णीकृत्य तिग्मं छेदनायोत्साहवन्तं सुनिशितं कृत्वा ततो वि[7]तान्ढि विताडय एतानस्मच्छत्रून् । एकप्रहारवर्जितदेहान्कुरुष्व । यानपि च[8] न हिनस्सि कथंचित्तानपि हिंसकान्विनुदस्व नानाप्रकारं प्रेरयस्व दूरमपुनरागमनाय ।

' अथ चेद्देवताभिधानं ' एतत्कुचर इति ततः ' क्वायं न चरतीति ' सर्वत्र चरतीति । ' गिरिष्ठा मेघस्थायी ' इति च । अनुपक्षीणशक्तयो

वैदिकशब्दानां सर्वतोमुखत्वम्

हि विभवो वेदशब्दा यथाप्रज्ञं पुरुषाणामर्थाभिधानेषु विपरिणममानाः सर्वतोमुखा अनेकार्थान्ब्रुव[9]न्तीत्येतदनेन प्रदर्शितं भवतीत्यथ चेद्देवताभिधानमिति ।

मृगादिशब्दान्निगमप्रसक्तान्निर्ब्रवीति । 'मृगो मार्ष्टेर्गतिकर्मणः' । नित्यं ह्यसौ गच्छति । ' भीमो बिभ्यत्यस्मात् ' । सर्व एव ह्यस्माद्बिभेति । भीष्मशब्दं सारूप्यप्रसक्तं निराह ' भीष्मोऽप्येतस्मादेव ' इति । ' कुचर इति चरतिकर्म कुत्सितम् ' । चरति ह्यसौ कर्म कुत्सितं व्याघ्रो वा सिंहो वा । क्वायं न चरतीति देवताभिधानत्वे । 'गिरिः[10] समुद्गीर्णो भवति' । समस्तो ह्यसावुद्गीर्ण इव भूमौ भवति । पर्वतशब्दं पर्यायाख्या[11]नुप्रसक्तं निराह 'पर्ववान्पर्वतः' इति । शिलाशि[12]खरसंधिभिरसौ तद्वान्हि[13] भवति । पर्वशब्दं विग्रहप्रसक्तं निराह । ' पर्व पुनः पृणातेः ' पूरणार्थस्य । पूरयन्ति हि ते शिलाशिखरसंधयोऽखिलं पर्वतम् । ' प्रीणातेर्वा ' तर्पणार्थस्य । तत्पुनरेतत् ' अर्धमासपर्व ' । किं कारणम् । ' देवानस्मिन् '

१ ठ. तैनाभिभू°. २ ग. ज. ' परावतः..........स्थानात् ' नास्ति. ३ घ. झ. ट. ठ. परस्याःअति°. ४ ग. ज. 'दिव........मागत्य च' नास्ति. ५ घ. झ. ट. आजगन्थ; ठ. आजगन्थ आगच्छ. ६ घ. झ. ट. ठ. °कार्येषु. ७ ग. च. ज. घ. झ. विताळ्हि. ८ ठ. °च मृधः संग्रामयुक्तान् युयुत्सून्न हिन°. ९ ग. ज. प्रब्रुवन्ति; च. स्रवन्ति. १० क. ख. घ. झ. ट. ठ. गिरिः पर्वतः समुद्गी°. ११ क. ख. ग. ज. °ख्यानप्रसक्तं; ठ. पर्यायानुप्रसक्तं. १२ च. शिखर° ख. १३ क. ख. घ. झ ठ. 'हि ' नास्ति.

हविर्भिः 'प्रीणन्ति'[1]। 'तत्प्रकृतीतरत्सन्धिमात्रसामान्यात्'। कालसन्धिश्च शिलासंधिश्च समानं संधित्वमिति । देवताभिधानपक्षे 'मेघस्थायी' गिरिष्ठाः । 'मेघोऽपि गिरिरेतस्मादेव'। असावपि समुद्गीर्णो भवत्यन्तरिक्षलोके ।

देवतसंज्ञाया अर्थः

'तद्यानि नामानि प्राधान्यस्तुतीनां देवतानां तद्दैवतमित्याचक्षते । तदुपरिष्टाद्व्याख्यास्यामः । नैघण्टुकानि नैगमानीहेह'। तदेतदुच्यते । सामान्यलक्षणोपलक्षितप्रकरणत्रयविभागेनावस्थितो गवादिर्देवपत्न्यन्तः समाम्नायोऽयमानुपूर्व्या व्याख्यास्यत इति पर्युपयुक्तस्तच्छब्दः। यानि नामानि प्राधान्यस्तुतीनामग्न्यादीनाम् । प्रधानभावेन याः स्तूयन्ते न निपातभाक्त्वेन ता एता प्राधान्यस्तुतयो देवताः । तासां किल यानि नामान्यग्न्यादीनि देवपत्न्यन्तानि तानि सर्वाण्यपि समुदितानि सन्त्येतयैकया सामान्यया प्रकरणसंज्ञया[2]चक्षत आचार्याः । कतमया । उच्यते दैवतमित्येतया । निरूढा ह्रीयमेतस्मिन्निघण्टुशब्दसमुदाये[3] संज्ञेत्यभिप्रायः । तत्पुनरेतद्दैवतं प्रकरणमुपरिष्टाद्व्याख्यास्यामोऽस्य शास्त्रस्य । आह । किं कारणमिति[4] । उच्यते । गुणपदेषु व्याख्यातेषु प्रधानदेवतापदानि सुखं व्याख्यास्यन्त इत्यनेनाभिप्रायेण देवतापरिज्ञानतत्फलाभिधाननिष्ठं च कथं नामेदं शास्त्रं स्यादिति ।

त्रयाणां प्रकरणानां व्याख्यानक्रमः

यानि पुनर्नैघण्टुकानि गवादीनि नैगमानि च जहादीनि तानीह प्रकरणद्वये नैघण्टुके चैकपदिके च व्याख्यास्याम इत्येतदेवानुवर्तते । त एते गवादयो देवपत्न्यन्ता निघण्टवः । तदेकदेशो[5] नैघण्टुकं प्रकरणम् ।

निघण्टुनैघण्टुकशब्दयोरर्थः

निघण्टुसंज्ञया च व्यवहारो लोके निघण्टुमधीमहे निघण्टुमध्यापयाम इति । शास्त्रे खल्वपि नैघण्टुकं प्रकरणमिति । नैगममित्यैकपदिकम् ।

---

१ क. ख. घ. झ. ट. ढ. प्रीणन्तीति. २ च. °संज्ञा आच°. ३ क. ख. घ. झ. ट. ढ. °स्मिन्नैघण्टुकशब्द°; ग. ज. °स्मिन्नैघण्टुशब्द°. ४ क. ख. घ. झ. ट. ढ. 'इति' नास्ति. ५ ग. च. ट. तदेकदेशे.

नैघण्टुकानि च पदानि नैगमानि चेह प्रकरणद्वये[1] व्याख्यास्यामः। अध्यायपरिसमाप्तिलक्षणार्थः परितोषार्थो वा द्विरभ्यास इति ॥ २०[2] ॥

इति ऋज्वर्थायां निरुक्तवृत्तौ जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ षष्ठोऽध्यायः ॥ ६ ॥[3][4]

---

*[5] समाम्नायः[1] तत्र[2] चतुष्ट्वम्[3] अतोऽन्ये[4] अथ निपाताः[5] वायुर्वा त्वा[6] नूनं[7] नूनं सा ते[8] ऋचां त्वो[9] अक्षण्वन्तो[10] निष्ट्वक्त्रासो[11] हिविभिरिती[12] मान्यथा[13] पियो[14] यथो हि[15] अन्वर्थापीदं[16] अर्थवन्तो[17] अथापीदं[18] स्थाणुरयमुत त्वः[19] पश्यन्नुत त्वं[20] सख्ये विंशतिः।

इति निरुक्ते पूर्वषट्के प्रथमोऽध्यायः ॥ १ ॥[6]

अथ द्वितीयोऽध्यायः।

तत्र प्रथमः पादः।

हरिः ॐ। अथ निर्वचनं तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन गुणेनान्वितौ[7] स्यातां तथा तानि निर्ब्रूयादथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद्वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयान्न त्वेव न निर्ब्रूयान्न संस्कारमाद्रियेत विशयवत्यो हि वृत्तयो भवन्ति यथार्थं विभक्तीः संनमयेत्प्रत्तमवत्तमिति धात्वादी एव शिष्येते[8] अथाप्यस्तेर्निवृत्तिस्थानेष्वा-

---

* इयं खण्डशृङ्खला छ. त. द. पुस्तकेषु न विद्यते.

---

१ क. ख. घ. झ. ट. ठ. नैघण्टुकानि नैगमानि पदानि चेह°. २ क. ख. घ. झ. ट. ठ. अङ्को नास्ति; ग. च. ज. ३७. ३ क. ख. घ. झ. ट. ठ. इति निरुक्तटीकायां. ४ ग. षष्ठोऽध्यायः। निरुक्ते प्रथमोऽध्यायः समाप्तः; घ. ट. चष्ठस्याध्यायस्य षष्ठः पादः समाप्तः; झ. षष्ठस्य षष्ठः पादः समाप्तः अध्यायः समाप्तः; ठ. षष्ठाध्यायस्य षष्ठः पादः समाप्तिमगमत्, ५ छ. त. द. पुस्तकेष्वियं खण्डशृङ्खला नास्ति. ६ ङ. 'इति०ध्यायः' खण्डशृङ्खलायाः प्राग्वर्तते; थ. इति नैरुक्ते पूर्व°; छ. द. इति प्रथमोऽध्यायः समाप्तः; त. इति प्रथमोऽध्यायः. ७ छ. °केन विकारेणान्वितौ. ८ क. ख. छ. त. द. °ते ॥ १ ॥ अथा°.

दिलोपो भवति स्तः सन्तीत्यथाप्यन्तलोपो भवति गत्वा गतमित्यथाप्युपधालोपो भवति जग्मतुर्जग्मुरित्यथाप्युपधाविकारो भवति राजा दण्डीत्यथापि[1] वर्णलोपो भवति तत्त्वा यामीत्यथापि द्विवर्णलोपस्तृच इत्यथाप्यादिविपर्ययो भवति ज्योतिर्घनो बिन्दुर्वाट्य इत्यथाप्याद्यन्तविपर्ययो भवति स्तोका रज्जुः सिकतास्तर्क्वित्यथाप्यन्तव्यापत्तिर्भवति[2] ॥ १ ॥

" अथ निर्वचनम्" । नामाख्यातोपसर्गनिपातलक्षणमुक्त्वा शास्त्रारम्भप्रयोजनानि च वेदवेदाङ्गव्यूहं च सप्रयोजनं निघण्टुसमाम्नायविरचनां च प्रकरणत्रयविभागेनोक्त्वा दैवतमुत्कृष्य नैघण्टुकनैगमे प्रकरणे पुरस्कृते 'नैघण्टुकानि नैगमानीह'[3] इति । ते पुनरेते निर्वचनलक्षणमनुक्त्वा[4] न शक्येते व्याख्यातुं यस्मात् ' अथ ' एतस्मात्कारणात् ' निर्वचनं ' लक्षणतो व्याख्यास्याम इति वाक्यशेषः[5] । अपिहितस्यार्थस्य परोक्षवृत्तावतिपरोक्षवृत्तौ वा शब्दे निष्कृष्य विगृह्य वचनं निर्वचनम् । स एष निर्वचनाभ्युपाय इत्युच्यते । इह द्विविधाः[6] शब्दाः समर्थस्वरसंस्कारा[7] असमर्थस्वरसंस्काराश्च । तत्रैवं सति ' येषु ' तावत् ' पदेषु स्वरसंस्कारौ समर्थौ ' संगतार्थौ[8] अवैपरीत्येन ' प्रादेशिकेन ' च[9] ' गुणेनान्वितौ स्यातां प्रदेशाभिधायिना[10] धातुरूपेणान्वितौ[11] संबद्धावनुगतावभिधेयस्थे धातुरूपे स्यातां ' तानि ' तावत् ' तथा ' एव यथालक्षणमेव ' निर्ब्रूयात् ' । आह । कुतो वा संशय इति । उच्यते । अर्थप्रधानत्वादनादृत्यैव लक्षणमेषु[12] नैरुक्तो निर्ब्रूयात्तन्मा भूदित्यत इदमुच्यते ' येषु पदेषु स्वरसंस्कारौ समर्थौ स्यातां तथा तानि निर्ब्रूयात् ' इति ।

निर्वचनशब्दस्यार्थो निर्वचनप्रकाराश्च

केषांचिच्छब्दानां लक्षणशास्त्रानुसारेण निर्वचनम्

---

१ ठ. ड. दण्डोति ॥ अथा°. २ क. ख. छ. त.द्. २. ३ ट. नैगमानीह ति° हे; ठ. ड. नैगमानीहेहेति. ४ ठ. ड. °चनलक्ष°. ५ क. ख. झ. °इति शेषः. ६ क. ख. झ. द्विधा. ७ क. ख. ग. ज. °संस्काराश्च अस°. ८ क. ख. झ. 'संगतार्थौ' नास्ति. ९ ग. ज. ठ. ड. 'च' नास्ति १० ठ. ड. °धायिना गुणेन धातु°. ११ ग. ज. °न्वितौ स्यातां संबंधावनु°. १२ ख. झ. ट. ठ. ड. लक्षणमेवमेषु°.

नैघण्टुकानि[1] च पदानि नैगमानि चेह प्रकरणद्वये व्याख्यास्यामः। अध्यायपरिसमाप्तिलक्षणार्थः परितोषार्थो वा द्विरभ्यास[2] इति ॥ २० ॥

इति[3] ऋज्वर्थायां निरुक्तवृत्तौ जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ षष्ठोऽध्यायः[4] ॥ ६ ॥

समाम्नायस्तत्र[1][2] चतुष्ट्वमतोऽन्ये[3]ऽथ निपाता[4] वायुर्वा[5] त्वा नन्नूनं[6] नूनं[7] सा तत्[8] ऋचां त्वो[9] ऽक्षण्वन्तो[10] निष्क्रासो[11] हि विभिरिती[12] मान्यथा[13] पियोयर्थो[14] हिन्वथापी[15] दमर्थवन्तो[16] ऽथापीदं[17] स्थाणु[18] रयमुतत्वः[19] पश्यन्नुतत्वं[20] सख्ये विंशतिः ।

इति[6] निरुक्ते पूर्वषट्के प्रथमोऽध्यायः ॥ १ ॥

अथ द्वितीयोऽध्यायः ।

तत्र प्रथमः पादः ।

हरिः ॐ । अथ निर्वचनं तद्येषु पदेषु स्वरसंस्कारौ समर्थौ प्रादेशिकेन[7] गुणेनान्वितौ स्यातां तथा तानि निर्ब्रूयादथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद्वृत्तिसामान्येनाविद्यमाने सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयान्न त्वेव न निर्ब्रूयान्न संस्कारमाद्रियेत विशयवत्यो हि वृत्तयो भवन्ति यथार्थं विभक्तीः संनमयेत्प्रत्तमवत्तमिति धात्वादी एव शिष्येते[8] अथाप्यस्तेर्निवृत्तिस्थानेष्वा-

---

* इयं खण्डशृङ्खला छ. त. द. पुस्तकेषु न विद्यते.

---

१ क. ख. घ. झ. ट. ठ. नैवण्टुकानि नैगमानि पदानि चेह°. २ क. ख. घ. झ. ट. ठ. अङ्को नास्ति; ग. च. ज. ३७. ३ क. ख. घ. झ. ट. ठ. इति निरुक्तटीकायां. ४ ग. षष्ठोऽध्यायः । निरुक्ते प्रथमोऽध्यायः समाप्तः; घ. ट. षष्ठस्याध्यायस्य षष्ठः पादः समाप्तः; झ. षष्ठस्य षष्ठः पादः समाप्तः अध्यायः समाप्तः; ठ. षष्ठाध्यायस्य षष्ठः पादः समाप्तिमगमत्, ५ छ. त. द. पुस्तकेष्वियं खण्डशङ्खला नास्ति. ६ ङ. 'इति०ध्यायः' खण्डशृङ्खलायाः प्राग्वर्तते; थ. इति नैरुक्ते पूर्व°; छ. द. इति प्रथमोऽध्यायः समाप्तः; त. इति प्रथमोऽध्यायः. ७ छ. °केन विकारेणान्वितौ. ८ क. ख. छ. त. द. °ते ॥ १ ॥ अथा°.

“ अथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद्वृत्ति-सामान्येन ’। अथ पुनरनन्वितेऽर्थे न्याय्यस्वरसंस्कारयुक्तेन शब्देन।

केषांचिदर्थसामान्येन

यत्र निपुणम[1]न्विष्यमाणः शब्दोऽर्थवान्कल्पयितुं न शक्येत[2]। अन्यथैवार्थो व्यवतिष्ठतेऽन्यथैव शब्दः। प्रादेशिकेन विकारेण विक्रियमाणोऽपि चासौ शब्दो विपरिणम्यमानोऽप्रादेशिक एव स्यादसमर्थ एव तां प्रदेशाख्यामभिधेयसत्त्वस्थां क्रियामभिधातुम्। आह। तत्र किं कर्तव्यमिति। उच्यते। तत्रैवं सत्यर्थनित्यो भूत्वार्थप्रधानः। तद्यथा मुद्गनित्यमेवास्य भोजनमित्युक्ते मुद्गप्रधान-मिति गम्यत एवमिहाप्यर्थनित्य इत्युक्तेऽर्थप्रधान इति गम्यते। अर्थप्राधान्येनानादृत्य स्वरसंस्कारौ परीक्षेत। ततस्तदभिधानं बुद्ध्वा केनचिदर्थवृत्तिसामान्येन क्रियागुणसामान्येनेत्यर्थः। कतमस्य धातोरर्थ-सामान्यमिहा[3]स्तीति। ततस्तर्कयित्वा सामान्यं तेन निर्ब्रूयात्। अर्थो हि प्रधानं तद्गुणभूतः शब्दः। तस्मादर्थसामान्यं बलीयः शब्दसामान्यात्।

केषांचिदक्षरवर्णसामान्येन

अथ पुनर्यत्रार्थसामान्यमपि नास्ति तत्र ‘ अविद्यमानेऽर्थसामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूया[4]न्न त्वेव न निर्ब्रूयान्न संस्कारमाद्रियेत विशयवत्यो हि वृत्तयो भवन्ति यथार्थं विभक्तीः संनमयेत् ’। स्वरवर्णसामान्ये-नापि निर्ब्रूयादेव। अमुष्मिन्धातावयं स्वरो वर्णो वा मया दृष्टः स एवायमस्मिन्नभिधाने लक्ष्यत इत्येवमुत्प्रेक्ष्य स धात्वर्थः सूत्रबद्ध इव तस्मिन्नभिधान आहृत्य स्फा[5]रीकृत्य कृत्स्नः प्रकाश-यितव्यः। एवमविद्यमानेऽर्थ[6]सामान्ये स्वरवर्णसामान्यमात्रेणापि निर्ब्रूयादेव। न त्वेव न निर्ब्रूयात्। इतरथा ह्यनर्थकमेव निरुक्तशास्त्रं स्यात्। तन्मा भूदित्यत उच्यते लक्षणपराङ्मुखेषु शब्देषु ‘ न संस्कारमाद्रियेत ’। किं तर्हि। अर्थसामान्यमाद्रियेत शब्दसामान्यं वा। तद्यथा। प्रवीणोदारनि-

---

१ क. ख. घ. झ. ट. ठ. ड. निपुणमप्यन्विष्य°. २ क. ख. घ. झ. ट. ठ. ड. शक्यते. ३ क. ख. घ. झ. °मान्यमत्रास्ती°; ट. °मान्यमत्रास्ती° मिहा. ४ ट. ड. °ब्रूयादिति। स्वर वर्ण°. ५ च. फारीकृत्य. ६ घ. झ. ट. ठ. ड. अर्थस्य सामान्ये.

स्त्रिंशशब्दा उत्सृष्टस्वार्थाभिधेयसंबन्धाः सन्तः
मान्यस्यो- क्रियागुणसामान्य[1]हेतु[2]मात्रमाश्रित्यान्येष्वेवार्थान्तरे-
ने. षु वर्तन्ते । तद्यथा प्रकृष्टो वीणायां प्रवीणो
गान्धर्वे । अत्र ह्यस्य मुख्या वृत्तिः[3] । स एष
वेयमुत्सृज्यैव गान्धर्वमभ्यासपाटवमात्रं सामान्यमाश्रित्य सर्व-
तः । यो हि यस्मिन्कृतयत्न उत्पन्नकौशलो भवति स
प्रवीण इति । तद्यथा । प्रवीणो व्याकरणे प्रवीणो निरुक्त
एवमेवोदार इति । प्रागार[4]संनिपाताद्व्याहृतमात्रेणैवाकूतेनैव
वहत्यश्वोऽनड्वान्वा स उद्गाता[6]रत्वादुदारः । तत्र हि सम-
रस्य शब्दस्य । स एष उत्सृज्यैव स्वमर्थमाकूतानुविधायि-
सामान्यमाश्रित्य प्रवृत्तः । यो हि कश्चित्कस्मैचिदाकूतमेव[7] लक्ष-
णेव प्रार्थनाद्ददाति स उदार इत्युच्यते । एवमेव निस्त्रिंशः ।
देशैर्द्वाभ्यां धाराभ्यामग्रेण च निशितः[8] श्यतीति[9] निस्त्रिंशः
त्र ह्यस्य शब्दस्य[12] समञ्जसा वृत्तिः । स एष छेदनसमानरूपं
न्यमाश्रित्य सर्वत्रै[13]वाभिप्रवृत्तः । यो हि लोके क्रूरो भवति स
[14]उच्यते । एवमेते क्रियागुणसामान्यमात्रेण वर्तन्ते ।

एवमन्येऽप्य[15]भ्यूहितव्याः । [16]अभ्यूह्य चै[17]वमर्थसामान्येन निर्वक्तव्याः ॥
स्वरवर्णसामान्ये तु प्रचुराण्यत्रोदाहरणानि ।
शब्देषु स्वर- सर्व एव हि नैगमाः शब्दा जहादयः स्वरवर्ण-
न्यमेव. सामान्यमात्रेणैव निरुच्यन्ते । न च निरुक्ते
कारकहारकलावकादिशब्दा व्युत्पाद्यन्ते सुबोधैव

ख. ग. ज. क्रियागुणसामान्यं हेतु°. २ घ. ट. ठ. ड. °हेतुमाश्रि°.
ज. प्रवृत्तिः. ४ ठ. ड. प्रागारसं°. ५ क. ख. ग. ज. °पाताद्वाकूतेनैव;
°पाताद्व्याहृतमात्रेणैव वाक्संकेतेनैव सार°. ६ ठ. ड. उद्गततरत्वा°.
. च. 'एव' नास्ति. ८ ग. ज. निसितः. ९ च. श्यसतीति°. १० घ. झ.
. स निस्त्रिंशः. ११ क. ख. खड्गःमुख्यग्रहणात् । तत्र°; घ. झ. ट. ड.
मुखग्रहणात् । तत्र°; ठ. खड्गमुख्यग्रहणात् । तत्र° हि. १२ च. 'शब्द-
तं. १३ क. ख. घ. झ. ट. ठ. ड. 'अभि' नास्ति. १४ क. ख. घ. झ.
. इत्युच्यते. १५ घ. झ. ट. ठ. ड. 'अपि' नास्ति. १६ च. अभ्युह्य;
युह्यैव° भ्युह्य च ए. १७ घ. झ. ट. ठ. ड. 'च' नास्ति.

हि तेषां व्युत्पत्ति[1]प्रसिद्धैव च व्याकरण इति । य एव तु दुर्बोधाः परोक्षातिपरोक्षवृत्तयो बिल्मकु[2]दरोदरवैतसपर्वशब्दादयस्त ए[3]व व्युत्पाद्य निरुच्यन्ते । तेषु हि विशेषेणार्थवत्ता निरुक्तस्य ।

दुर्बोधशब्दनिर्वचनं हि निरुक्तशास्त्रस्य प्रयोजनं यस्मात्तान्निर्वचनं संशयाकुलम् ।

तान्येवार्थसामान्येन वा[4] शब्दसामान्येन वा निर्ब्रूयान्न तेषु स्व[5]रसंस्कारमाद्रियेते[6] । आह । किं कारणमिति । उच्यते । ‘ विशयवत्यो हि वृत्तयो भवन्ति ’ । हिरयं हेत्वर्थे । यस्माद्विशेयवत्यो बहुसंशयवत्यः शब्दानामर्थेषु वृत्तयो भवन्ति । ना[7]नाभावेनार्थेष्ववस्थिता प्रवृत्तिरित्येवं स्यान्नैवं स्यादिति विचारयन्तः सन्तः प्रतिपक्षसंमोहाच्छेरत इवास्मिन्निति विशयः संशय इति । अत्र केचिदर्थसामान्येन क्वचिद्वर्तन्ते शब्दाः केचित्स्वरसामान्येन केचिद्वर्णसामान्येन । यत एवमतो विभक्तीरपि यथार्थमेव संनमयेद्विपरिणमयेत्पूर्वोत्तरपदप्रकारणाविरोधेन । किं कारणम् ।

निर्वचनार्थं विभक्त्योऽपि विपरिणमयितव्याः

तासामपि हि व्यत्ययो भवत्येव । ‘ सुपां स्थाने सुपो भवन्ति ’ इति हि वैयाकरणाः पठन्ति । दर्शयिष्यति चायमपि विभक्ति[8]विपरिणामम् । तद्यथा । ‘हृत्सु शोकैर्हृदयानि शोकैः’ [नि० ९ । ३३] इत्येवमादि ।

अधुनैवमुक्त्वा विशयवत्यो भवन्तीत्यर्थवशेन व्याकरणेऽपि शब्दविपरिणामो भवतीत्येवं दर्शयति । ‘ प्रत्तमवत्तमिति

शब्दविपरिणामस्योदाहरणानि । केषांचिद्धातूनामादी एव शिष्येते

धात्वादी एव शिष्येते’ इत्येवमादि । ‘डुदाञ् दाने’ [धा० ३ । ९] । तस्य प्रपूर्वस्य प्रत्तमिति । अत्र दकार आकारश्च धातुः । परो निष्ठाप्रत्ययस्तकारः । तत्रैवं सति ‘ दोदद्घोः [पा० ७ । ४ । ४६] इति वर्तमाने ‘ अच उपसर्गात्तः ’

१ ब. झ. ट. ठ. ड. ‘ प्र ’ नास्ति. २ ग. ज. कुक्लरोद°; ठ. ड. कृदनोद°. ३ क. ख. घ. झ. ट. ठ. ड. एव हि व्युत्पा°. ४ ब. झ. ट. ‘ वा ’ नास्ति. ५ क. ख. घ. झ. ट. ठ. ड. ‘ स्वर ’ नास्ति. ६ क. ख. ग. ज. ठ. ड. °माद्रियेत. ७ ग. ज. नाभावेनार्थेष्ववस्थिता प्रवृत्तिरित्येवं स्यादेवं स्यादिति विचारयन्न प्रतिपन्नः संमोहाच्छेरत इवास्मिन्निति विशयः संशयः नानाभावेना° च. [नानाभावेनार्थानवस्थितौ प्रतीत्य चेतसा एवं स्यादेवं स्यादिति विचारयन्नप्रतिपन्नः संमो- ११ हाच्छेत इवास्मिन्निति विशयः संशयः] नानाभावेना° ८ ग. च. ज. ‘भक्तिपरि°.

[पा० ७ । ४ । ४७] इत्याकारस्य तकारो भवति । 'झरो झरि सवर्णे' [पा० ८ । ४ । ६५] इति धात्वन्त्यस्य तकारस्य लोपे कृते 'खरि च' [पा० ८ । ४ । ५५] इति तकारस्य चर्त्वे कृते 'परः संनिकर्षः संहिता' [पा० १ । ४ । १०९] इति धातुतकारः प्रत्ययतकारेण साकं संयोगतामुपैति 'हलोऽनन्तराः संयोगः' [पा० १ । १ । ७] इति । ततः प्रादिसमासे कृते 'प्रत्तं' इति भवति । एवमेव 'दो अवखण्डने' [धा० ४ । ४२] इत्यस्यावपूर्वस्य 'अवत्तं' इति । अत्रापि दकार ओकारश्च धातुः परो निष्ठातकारः । अत्र 'आदेच उपदेशेऽशिति' [पा० ६ । १ । ४५] इत्योकारस्याकारे कृते तभावलोपचर्त्वपरगमनप्रादिसमासाः पूर्ववदेव । एवमनयोर्धात्वोरादी एव शिष्येते । यथानयोरेवमन्येषामपि दृष्ट्वा यथासंभवमनुविधेयम्[1] ।

'अथाप्यस्तेर्निवृत्तिस्थानेष्वादिलोपो भवति स्तः सन्तीति' । 'असे[2] भुवि' [धा० २ । ५५] इत्यस्य निवृत्तिस्थानेषु गुणवृद्धिनिवृत्तिस्थानेषु 'क्ङिति[3]' [पा० १।१।५] इति वर्तमाने 'श्नसोरल्लोपः' [पा० ६।४।१११] इत्यादिलोपो भवति । योऽयं धात्वादावकार एष लुप्यते । तस्मिन् लुप्ते कथं प्रयोगः । स्तः सन्तीति । एवमन्येषामपि दृष्ट्वाऽनुविधेयं यथासंभवम् ।

आदिलोपः

'अथाप्यन्तलोपो भवति गत्वा गतमिति' । अत्र गमेः क्त्वाप्रत्यये निष्ठाप्रत्यये च परतोऽनुनासिकलोपो भवति 'अनुदात्तोपदेश०' [६ । ४ । ३७] इत्यधिकृत्य 'क्ङिति' [पा० १।१।५] इति । एवमन्येष्वपि द्रष्टव्यमनुविधेयं च यथासंभवम् ।

अन्तलोपः

'अथाप्युपधालोपो भवति जग्मतुर्जग्मुरिति' । अत्र गमेः अलोपः । 'अलोऽन्त्यात्पूर्व उपधा' [पा० १ । १ । ६५] इत्यकारस्योपधासंज्ञा[4] । तस्य 'गमहनजनखनघसां लोपः' [पा० ६ । ४ । ९८] इत्युपधालोपः । एवमन्येषामपि द्रष्टव्यमनुविधेयं च यथासंभवम् ।

उपधालोपः

'अथाप्युपधाविकारो भवति राजा दण्डीति' । राजन् दण्डिन्

---

१ क. ख. ग. °धेयम् ॥ १ ॥ अथा°. २ ग. च. ज. असु. ३ च. ङितीति.
४ क. ख. घ. झ. ट. ठ. ड. 'अकारस्य' नास्ति.

उपधाविकारः

इति स्थिते ' नोपधायाः ' [पा० ६ । ४ । ७] ' सर्वनामस्थाने चासंबुद्धौ ' [पा० ६ । ४ । ८] इति दीर्घत्वम् । दण्डिन् इत्यत्रापि 'इन्हन्पूषार्यम्णां शौ ' [पा० ६ । ४ । १२] 'सौ च' [पा० ६ । ४ । १३] इति दीर्घत्वम् । ' नलोपः प्रातिपदिकान्तस्य ' [पा० ८ । २ । ७] इत्युभयोरपि नकारलोपे कृते राजा दण्डीति । एवमुपधाविकारो भवति ।

वर्णलोपः

' अथापि वर्णलोपो भवति तत्त्वा यामीति ' । अत्र चकारलोपः । याचामीत्येवमेतद्द्रष्टव्यम् । अयं च छान्दस एव । अत एव च छान्दसत्वादेवमेव याच्ञाकर्मस्वयं पठितः ' यामि मन्महे ' [निघ० ३ । १९] इति । भाषायां हि याचे इति भवति ।

' तत्त्वा यामि ब्रह्मणा वन्दमानस्तदा शास्ते यजमानो हविर्भिः । अहेळमानो वरुणेह बोध्युरुशंस मा न आयुः प्र मोषीः ' [ऋ० सं० १ । २४ । ११] ॥

'यामि' इत्यस्योदाहरणम्

अनया त्रिष्टुभोपाकृतः शुनःशेपो वरुणं तुष्टाव । आज्याहुतिरनया साग्निकेषु ऋतुषु समिष्टयजुष उत्तरकालं हूयते । चातुर्मास्येषु च वरुणप्रघासेषु वारुणस्य हविषो याज्यैषा [आश्व० श्रौ० २ । १७] । हे वरुण तदहं त्वां वरुणं यामि याच इत्यर्थः । किम् । यन्ममाभिप्रेतम् । कथं पुनर्याचे । ब्रह्मणा ऋग्यजुःसामाख्येन वन्दमानः स्तुवन् । किं च । यदेव त्वं मया याच्यसे तदेवायमपि यजमानो हविर्भिः संस्कृतैः सान्नाय्यादिभिराशास्ते । तावावां भवन्तमेकमेवार्थं याचावहे स्तुतिभिर्हविर्भिश्च । स त्वमहेळमानोऽक्रुध्यन् । सर्वो हि याच्यमानः क्रुध्यतीत्यत एवमुच्यते । हे वरुण बोधि बुध्यस्व । बुद्ध्वा चैनमावयोरभिप्रेतार्थं कुरु । उरुशंसेत्येकं पदं संबोधनं च । हे उरुशंस बहुस्तुत्य वरुण मा नोऽस्माकं याचमानानामायुः प्रमोषीः । कुरु नोऽभिप्रेतार्थसिद्धिमित्यभिप्रायः ।

---

१ घ. झ. ट. इति हि दी°. २ ग. ज. ' कृते ' नास्ति. ३ घ. झ. ट. °त्येवमेव द्रष्ट°. ४ घ. झ. ट. °षायां च या°. ५ ग. च. ज. घ. झ. ट. ठ. ड. यामीत्यनया त्रिष्टुभा°. ६ च. ' च ' नास्ति. ७ ठ. ड. ' याज्यैषा ' इत्यस्यानन्तरं सर्वा ऋक्पठ्यते. ८ क. ख. ग. च. ज. घ. झ. °महेलमानो°.

२१

‘ अथापि द्विवर्णलोपस्तृच इति ’ । अत्र ऋवर्णरेफयोर्लोपः ।

द्विवर्णलोपः

रेफ एक ऋवर्णोदरं कृमिवद्[1]नुप्रविष्टो द्रष्टव्यः । स लुप्यते ऋवर्णेन साकम् ।

‘ अथाप्यादिविपर्ययो भवति । ज्योतिर्घनो बिन्दुर्वाट्य[2] इति ’ । ‘ द्युत दीप्तौ ’ [धा० १ । ७४१] । तस्यादिव्यापत्त्या ज्योतिः । ‘ हन हिंसागत्योः ’ [धा० २ । २] । तस्य घन इति । ‘ भिदिर्विदारणे ’ [धा० ७ । २] । तस्य बिन्दुः । ‘ भट भृतौ ’ [धा० १ । ३०७] । तस्य[3] वाट्यः ।

आदिविपर्ययः

‘अथाप्याद्यन्तविपर्ययो भवति स्तोका रज्जुः सिकतास्तर्क्विति’ । ‘श्चु[4]तिर् क्षरणे ’ [धा० १।४१] । तस्याद्यन्तविपर्ययेण स्तोकाः । ‘ सृज विसर्गे ’ [धा० ४ । ७२ ॥ ६ । १३४] । तस्य रज्जुः । ‘ कस विकसने ’ तस्य सिकताः । ‘ कृती छेदने ’ [धा० ६ । १५५] । तस्य तर्कु ।

आद्यन्तविपर्ययः

‘अथाप्यन्तव्यापत्तिर्भवति’ ॥ १[5] ॥

अथ द्वितीयः पादः ।

ओघो मेघो नाधो गाधो वधूर्मध्वित्यथापि वर्णोपजन आस्थद्वारो भरूजेति तद्यत्र स्वरादनन्तरान्तस्थान्तर्धातु भवति तद्द्विप्रकृतीनां स्थानमिति प्रदिशन्ति तत्र सिद्धायामनुपपद्यमानायामितरयोपपिपादयिषेत्तत्राप्येकेऽल्पनिष्पत्तयो भवन्ति तद्यथैतदूतिर्मृदुः पृथुः पृषतः कुणारुमित्यथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते दमूनाः क्षेत्रसाधा इत्यथापि नैगमेभ्यो भाषिका उष्णं घृतमित्यथापि प्रकृतय एवैकेषु भाष्यन्ते विकृतय एके[6]षु शवतिर्ग-

---

१ घ. ट. ऋवर्णोदरं कृमिवदरं कृमिवद्°; ट. ऋवर्णोदरं कृमिवत् बदरं कृमिवद्°; ङ. ऋवर्ण उदरं कृमिवत् बदरं कृमिवद्°. २ ग. घ. च. ज. वाट्यः. ३ ग. च. ज. ‘ तस्य ’ नास्ति. ४ श्च्युतिरक्षणे. ५ क. ख. ग. २; घ. झ. ट. च. ज. ‘१’ नास्ति; ठ. ड. ॥ १ ॥ इति निरुक्तव्याख्यायां द्वितीया(ङ ये ऽ)ध्याये प्रथमः खण्डः. ६ क. ख. छ. त. द. एकेषु ॥ ३ ॥ शव°.

तिकर्मा कम्बोजेष्वेव भाष्यते[1] कम्बोजाः कम्बलभोजाः कमनीयभोजा वा कम्बलः कमनीयो भवति विकारमस्यार्येषु भाषन्ते शव इति दातिर्लवनार्थे प्राच्येषु दात्रमुदीच्येष्वेवमेकपदानि निर्ब्रूयादथ तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयाद्दण्ड्यः पुरुषो दण्ड[2]पुरुषो दण्डमर्हतीति वा दण्डेन संपद्यत इति वा दण्डो ददतेर्धारयतिकर्मणोऽक्रूरो ददते मणिमित्यभिभाषन्ते दमनादित्यौपमन्यवो दण्डमस्याकर्षतेति गर्हायां[3] कक्ष्या रज्जुरश्वस्य कक्षं सेवते कक्षो गाहतेः क्स इति नामकरणः ख्यातेर्वानर्थकोऽभ्यासः किं[4]मस्मिन्[5]ख्यानमिति कर्षते[6]र्वा तत्सामान्यान्मनुष्यकक्षो बाहुमूलसामान्यादश्वस्य ॥ २[7] ॥

'ओघो मेघो नाघो गाधो वधूर्मध्विति'। 'वह प्रापणे' [धा० १ । १०२९]। तस्यान्तव्यापत्त्या ओघः। 'मिह सेचने' [धा० १ । १०१७]। तस्य मेघः। 'णह बन्धने' [धा० ४ । ६०]। तस्य नाधः। 'गाहू विलोडने' [धा० १ । ६५०] । तस्य गाधः[8]। 'वह प्रापणे' [धा० १ । १०२९]। तस्य वधूः। 'मद तृप्तौ' [धा० १० । १७२]। तस्य मधु।

अन्तव्यापत्तिः

'अथापि वर्णोपजन आस्थत् द्वारो भरूजेति'। 'असु क्षेपणे' [धा० ४ । १०३] । तस्य आस्थत्। 'वृङ्[9] संभक्तौ' [धा० ९ । ३७] । तस्य द्वारः। 'भ्रस्ज[10] पाके' [धा० ६ । ४]। तस्य भरूजः।

वर्णोपजनः

एवं व्याकरणेऽपि लक्षणप्रधाने सत्यर्थवशेन लोपागमौ विपरिणामश्च शब्दानां दृष्टः किमुत निरुक्ते यदर्थप्रधानमेव। तस्मात्साधूक्तं 'अथानन्वितेऽर्थेऽप्रादेशिके विकारेऽर्थनित्यः परीक्षेत केनचिद्वृत्तिसामान्येनाविद्यमाने

---

१ छ. भाष्यन्ते. २ क. ख. छ. त. द. ठ. 'दण्डपुरुषो' नास्ति. ३ क. ख. छ. त. द. °र्हायाम् ॥ ४ ॥ कक्ष्या°. ४ ङ. तदस्मिन्. ५ छ. °स्मिन्ख्यान°. ६ ठ. ड. कर्षते°. ७ क. ख. छ. त द. अङ्को नास्ति. ८ ग. च. ज. गाधं. ९ घ. च. ज. थ. ट. वृञ्. १० ग. भ्रस्जौ; ज. भ्रस्जो. १० ठ. ड. नैरुक्ते.

सामान्येऽप्यक्षरवर्णसामान्यान्निर्ब्रूयाद्विभक्तीरपि यथार्थं ‘संनमयेत्’ इति। एवमयमादिमध्यान्तलोप आदिमध्यान्तविकारो वर्णलोपो द्विवर्णलोप आदिविपर्यय आद्यन्तविपर्ययो वर्णोपजनश्छन्दसि भाषायां च द्रष्टव्यः। दृष्ट्वा च यथासंभवमनुविधेयः।

अतः परं संप्रसारणचिन्ता वर्तिष्यते तदर्थमिदमारभ्यते। ‘तद्यत्र स्वरादनन्तरान्तस्थान्तर्धातु भवति तद्द्विप्रकृतीनां स्थानमिति प्रदिशन्ति’ इति[1]।

संप्रसारणप्रकारेण निर्वचनम्

संप्रसार्यप्रकृतयश्चासंप्रसार्यप्रकृतयश्चोभयप्रकृतयश्च धातवः। तत्रैवं सत्युभयप्रकृतिषु स्वशास्त्रविषयगतं यद्वक्तव्यं तदिदमुच्यत इति पर्युपयुक्तस्तच्छब्दः। आह। इदमेवं[2] तावदुच्यतामुभयप्रकृतीनां किं लक्षणमिति। उच्यते। ‘यत्र’ यस्मिन्धातौ ‘स्वरात्’ अकारादेः ‘अनन्तरा’ अनन्तर्हितान्येन व्यञ्जनेन परा वा पूर्वा वा ‘अन्तस्था’ यरलवानामन्यतमो वर्णः ‘अन्तर्धातु[3]’ धातुमध्ये भवति। किं तत्र। एतदेवंलक्षणं

एके धातवो द्विप्रकृतीनां स्थानम्

धातुरूपं[4] ‘द्विप्रकृतीनां’ द्विस्वभावानां शब्दानां स्थानं आश्रयः ‘इति’ एवमाचार्याः प्रविभागेनोपदिशन्ति। तद्यथा। ‘यज देवपूजासंगतिकरणदानेषु’ [धा० १। १००२] इति। अत्र द्वे शब्दप्रकृती भवतः। संप्रसारणपक्षे तावत् ‘इष्टवान्[5] इष्टः इष्टिः इष्ट्वा’ एताः शब्दप्रकृतयो भवन्ति। असंप्रसारणपक्षे पुनः ‘यष्टा यष्टुं यष्टव्यं’ इत्येताः।

‘तत्र[6]’ एवं सत्येकप्रकारेण ‘सिद्धायां’ अर्थसिद्धौ ‘अनुपपद्यमानायामितरयोपपिपादयिषेत्’ उपपादयितुमिच्छेदर्थम्।

द्विप्रकृत्योः प्रयोजनम्

द्वयोः संप्रसारणासंप्रसारणप्रकृत्योर्यथै[7]वोपपद्यतेऽर्थस्तथैवो[8]पपादयेत्। उभयथाप्यनु[9]पपद्यमाने[10]ऽर्थे स्वयमुत्पाद्य निर्धार्य यथा यथो-

१ क. ख. घ. झ. ट. ठ. ड. ‘इति’ नास्ति. २ ग. ज. इदमेवमुच्यता°. ३ घ झ. ट. ठ. ड. ‘वर्णोऽन्तर्धातुमध्ये. ४ क. ख. घ. झ. °रूपं हि द्विप्र°; ट. °रूपं हि द्विप्र;° ठ. ड. °रूपं तद्द्विप्र°. ५ घ. ट. इष्टवान् इष्टिः इष्ट एता°; च. इष्टवान् इष्ट एता°; झ. ठ. ड. इष्टवान् इष्टिः एता°. ६ ठ. ड. तत्र सिद्धायामिति। तत्र एवं°. ७ ठ. ड. °र्थथैवो°. ८ ठ. ड. °स्तथैवो°. ९ क. ख. घ. झ. ट. ठ. ड. अथवोभय°. १० घ. झ. ट. ठ. ड. °पद्यमानोऽर्थः स्वय°

पपद्येतार्थस्तथा तथोपपादयेदर्थलक्षणशास्त्रविहितेनार्थसाधनोपायेनार्थस्य प्रधानत्वात् ।

अल्पनिष्पत्तयो धातवः

' तत्राप्येकेऽल्पनिष्पत्तयो भवन्ति ' । एतस्मिन्नपि संप्रसारणलक्षणे सति ' एके ' धातवः 'अल्पनिष्पत्तयो भवन्ति' । अल्पेषु शब्दरूपेषु संप्रसारणप्रकृतिरभिनिष्पद्यते । तदप्युपेक्षितव्यम् । ' तद्यथैतत् ' उदाहरणजातं ' ऊतिः मृदुः पृथुः पृषतः कुणारुं ' इति । अवतेर्गत्यर्थस्य [धा० १ । ६००] क्तिप्रत्यये परे ' च्छ्वोः शूडनुनासिके च ' [६ । ४ । १९] इति वर्तमाने ' ज्वरत्वरस्रिव्यविमवामुपधायाश्च [६ । ४ । २०] इत्यूठ्भावः क्रियते । तत ऊतिरिति भवति । ' म्रद मर्दने ' [धा० १ । ७६८] । तस्य मृदुः । रेफः संप्रसार्यमाण ऋकारो भवति । एवमेव ' प्रथ प्रख्याने ' [धा० १ । ७६६]। तस्य पृथुः । 'प्रुष स्नेहने' [धा० ९।५६] । तस्य पृषतः । 'कण शब्दार्थः' [धा० १ । ५१] । तस्य कुणारुम् । एवमयमपि संप्रसार्यासंप्रसार्यविशेषः परिज्ञेयः शब्दान्निर्ब्रुवता ।

वेदे वर्तमानाः कृदन्ता भाषायां वर्तमानेभ्यो धातुभ्यो निर्वक्तव्याः

'अथापि भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते' । अथापि इदमपरमुपेक्षितव्यमनेन शब्दान् निर्ब्रुवता । आह । किमिति । उच्यते । भाषिकेभ्यो धातुभ्यः । भाषायां येषां प्रायेण प्रसिद्धप्रयोगैस्ते भाषिकास्तेभ्यः । नैगमाः छन्दोविषयाः । कृतः कृत्प्रत्ययान्ताः शब्दाः । 'भाष्यन्ते' विव्रियन्ते निरुच्यन्त इत्यर्थः । तद्यथा ' दमूनाः क्षेत्रसाधा इति ' । ' दम उप-

१ ग ज. 'पादयेदलक्ष° २ ग. च. ज. °तेनाप्यर्थ°. ३ क. ख. घ. झ. ट. °क्षितव्यम् । तद्यथैतदूतिर्मृदुः पृथुः पृश्नतः कुणारुमिति । तद्यथा°; ठ. ड. तद्यथैतदूतिर्मृदुरिति । तद्यथा°. ४ क. ख. परतः; ग. ज. घ. ट. पर. ५ क. ख. प्रुष दाहे; ग. परिषस्तेहने; च. प्रुंश° पृ; ज. परिषहस्तेहने; घ. ट. प्रुरुष स्नेहने; झ. पुरुष स्नेहने; ठ. ड. पृष. ६ ग. ज. कणशब्दास्तस्य°; घ. झ. ट. ठ. च. कणशब्दा तस्य°. ७ क. ख. घ. झ. ट. 'तस्य' नास्ति. ८ क. ख. घ. झ. ट. ठ. ड. निर्ब्रुवता पुंसा । अथा°. ९ ठ. ड. भाषिकेभ्य इति । अथा°. १० क. ख. घ. झ. ट. °प्रयोगास्ते°; ग. ज. °द्धयोगस्ते°; ठ. ड. °प्रायेण सिद्धप्रयोगास्ते°.

शमे ’ [धा० ४ । ९७] । तस्य भाषायां दाम्यत्यनड्वान् दमयत्यनड्वाहं दान्तोऽनड्वानित्येवमादयः प्रयोगा भवन्ति । छन्दसि पुनर्दमूना अग्निरुच्यते । स भाषाशब्दसामान्येन केनचिन्निर्वक्तव्यो दममना इत्येवमादिना । एवमेव सा[1]धतेर्भाषाप्रायोवृत्तेः ‘ मित्रं न क्षेत्रसाधसम् ’ [ऋ० सं० ८ । ३१ । १४] इत्येवमादयो मित्रमिव क्षेत्रसा[2]धयितारमित्येवमादिना प्रकारेण निर्वक्तव्याः ।

यथा दमूनाः क्षेत्रसाधाः

‘ अथापि नैगमेभ्यो भाषिकाः ’ । निगमे छन्दसि ये[3] प्रायोवृत्त्या प्रसिद्धास्तेभ्यः सामान्यं गृहीत्वा भाषिकाः कृत्प्रत्ययान्ता भाष्यन्ते विक्रियन्ते । तद्[4]यथा । ‘ उष्णं घृतमिति ’ । ‘ उष दाहे ’ [धा० १ । ६९६] । एष प्रायेण च्छन्दसि प्रसिद्धः । ‘ प्रत्युष्टं रक्षः प्रत्युष्टा अरातयः ’ [य० वा० सं० १ । ७ तै० सं० १ । १ । २] इत्येवमादि[5] । भाषायां पुनरुष्णमिति श्रूयते । स एष नैगमशब्दसामान्येन निर्वक्तव्यः । एवमेव ‘ घृ क्षरणदीप्त्योः ’ [धा० ३ । १४] । तस्य च्छन्दसि “ आ त्वा जिघर्मि ” [य० वा० सं० ११ । २३] इति प्रसिद्धः प्रयोगः । भाषायां पुनर्घृतमिति श्रूयते । स एवं जिघर्तेरेव छान्दसस्य सामान्येन निर्वक्तव्यः । एवं भाषाविषयेभ्यश्छन्दोविषया निर्वक्तव्याश्छन्दोविषयेभ्यश्च भाषाविषयाः ।

नैगमेभ्यो भाषिका व्युत्पाद्या यथा ‘ उष्णं घृतम् ’

‘ अथापि ’ इदमपरमुपेक्षितव्यमनेन शब्दान्निर्ब्रुवता । आह । किमिति । उच्यते । ‘ प्रकृतय एवैकेषु भाष्यन्ते विकृतय एकेषु’ । एकेषु देशेषु प्रकृतय एव धातुशब्दानां भाष्यन्ते विकृतय एकेषु । धातोराख्यातपदभावेन यः प्रयोगः सा प्रकृतिः । नामीभूतस्य तस्यैव यः प्रयोगः सा वि[10]कृतिः ।

केषुचित्प्रदेशेषु धातुभ्य उत्पन्नान्याख्यातरूपाणि प्रयुज्यन्ते केषुचिद्धातूत्पन्नानि नामानि

---

१ क ख. ग. ज. साध्यते°. २ क. ख. ग. ज. °साधमित्येव°. ३ घ. झ. ट. ‘ ये ’ नास्ति. ४ घ. झ. ट. ‘ तद्यथा ’ नास्ति. ५ ठ. ड. °मादिः. ६ क. ख. ज. सिद्धः; ग. च. प्रसिद्धप्र°. ७ च. एव; ठ. ड. एष. ८ क. ख. घ. झ. ट. ठ. ड. अथापि प्रकृतय°. ९ क. ख. ग. ज. घ. झ. ट. प्रदेशेषु. १० क. ख. °कृतिः ॥ ३ ॥ स°. ३१

स एष ' शवतिर्गतिकर्मा ' गत्यर्थो धातुः 'कम्बोजेष्वेव भाष्यते ' । म्लेच्छेषु प्रकृत्या प्रयुज्यते आख्यातपदभावेन ।

'शवतिः' कम्बोजेषु

'शवः' आर्येषु

शवति गच्छतीत्यर्थः । उदाहरणविशेषप्रसक्तः कम्बोजशब्दो निरुच्यते । ' कम्बोजाः कम्बलभोजाः ' । ते हि प्रायेण कम्बलानुपभुञ्जते हिमप्रायत्वात्तस्य देशस्य । ' कमनीयभोजा वा ' । कमनीयानि प्रार्थनीयानि च ते हि द्रव्याण्युपभुञ्जते । प्रचुररत्नो हि स देश इति । कम्बलशब्दं विग्रहप्रसक्तं निर्ब्रवीति । ' कम्बलः कमनीयो भवति ' । प्रार्थनीयो हि स शीतार्तैर्भवति । ' विकारमस्यार्येषु भाषन्ते शव इति ' । आर्येषु जनपदेष्वस्यैव शवतेर्विकारं भाषन्ते । मृतकनामधेयभूतमेतं प्रयुञ्जते । कथम् । शव इति । एवमेकेष्वाख्यातस्य एव प्रयुज्यते नामीभूत एकेष्वित्येतत्प्रकृतित्वं विकारत्वं च । अथवा चेतनावत्स्वेकेषु गमनक्रियायोगिनि द्रव्ये प्रयुज्यत एकेषु पुनश्चेतनारहित एवेत्येतत्प्रकृतित्वं विकारत्वं च ।

'दातिः' प्राच्येषु

'दात्रं' उदीच्येषु

द्वितीयमुदाहरणम् । ' दातिर्लवनार्थे प्राच्येषु ' । दातिर्धातुराख्यातस्थो लवनार्थे प्राच्येषु जनपदेषु प्रयुज्यते । तद्यथा । व्रीहीन्दाति यवान्दाति । अयमेव नामीभूतः ' उदीच्येषु ' प्रयुज्यते ' दात्रं ' इति । दीयतेऽनेनेति दात्रम् । लूयत इत्यर्थः ।

' एवमेकपदानि निर्ब्रूयात् ' । अनेनैकंप्रकारेणैकपदानि निर्ब्रूयाद्भाषानिगमव्यवस्थया रूढिव्यवस्थया वा देशभाषाप्रसिद्धिविभागेन वा ।

आह । एवं तावदतद्धितयुक्तेषु पदेष्वसमासयुक्तेषु निर्वचनम् । अथ पुनर्यानि तद्धितयुक्तानि समासयुक्तानि च पदानि तानि कथं निर्वक्तव्यानि । किं तद्धितयुक्तेषु पूर्वं पदार्थो निर्वक्तव्य उत तद्धितार्थः । समासयुक्तेष्वपि

---

१ ग. स एषः ॥ ३ ॥ शव°. २ ठ. ड. °भूते प्रेते प्रयु°. ३ घ. झ. प्रयुज्यन्ते; ढ. प्रयुज्यन्ते° युञ्जते. ४ च. 'एव' नास्ति. ५ ठ. ड. °भूतः । दात्रमुदीच्येष्विति । उदी°. ६ क ख. घ. झ. ठ. °च्येषु जनपदेषु प्रयु°. ७ क. ख. ग. ज. ' एक ' नास्ति; ढ. ड. अनेनैव प्र°. ८ क. ख. ग. ज. °युक्तेषु च निर्व°. ९ क. ख. घ. झ. ट. °युक्तेषु पदेषु पूर्वं°

किं पदार्थः पूर्वमुत समासार्थो वा पूर्वमिति ।

तद्धितसमासपदनिर्वचनप्रकारः

उच्यते । ‘ अथ तद्धितसमासेष्वेकपर्वसु चानेकपर्वसु च पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयात् ’ ।

अथशब्दो विशेषाधिकारार्थः । ‘ तद्धिताः ’ [पा० ४ । १ । ७६] इत्यधिकृत्य ये प्रत्यया विहितास्ते तद्धिताः । ‘ समर्थः पदविधिः ’ [पा० २ । १ । १] इत्यधिकृत्य ये विहितास्ते समासाः । तेषूभयेष्वपि तद्धितसमासेष्वविशेषेण ‘ एकपर्वसु चानेकपर्वसु च ’ एकपदेष्वनेकपदेषु च । तद्यथा । दण्ड्य इत्येकपदस्तद्धितः । वार्ष्यायणिरित्यनेकपदः । अनेकानि ह्येष पदानि स्वात्मन्यन्तर्णीय प्रवर्तते । तद्यथा । वृषस्यापत्यं वार्ष्यः । वार्ष्यस्यापत्यं वार्ष्यायणः । तस्यापि वार्ष्यायणिरिति । एवं समासेष्वप्येकपदेषु चानेकपदेषु चैवं निर्ब्रूयाद्यथा वक्ष्यामः । एकशेषः एकपदः समासः । ‘ सरूपाणामेकशेष एकविभक्तौ ’ [पा० १।२।६४) इति । तद्यथा । पुरुषश्च पुरुषश्च पुरुषौ पुरुषश्च पुरुषश्च पुरुषश्च पुरुषा इत्येवम् ।

‘ द्विगुर्द्वन्द्वोऽव्ययीभावः कर्मधारय एव च ।
पञ्चमस्तु बहुव्रीहिः षष्ठस्तत्पुरुषः स्मृतः ’ [बृह० २।१०७] ॥

एतेऽनेकपदाः समासाः । तत्र ‘ संख्यापूर्वो द्विगुः ’ [पा० २ । १ । ५२] पञ्चपूली पञ्चरथी दशरथीत्येवमादि । ‘ चार्थे द्वन्द्वः ’ [पा० २ । २ । २९] । स च पुनर्विभाषयैकवद्भवति । तद्यथा । प्लक्षन्यग्रोधौ अहिनकुलं भीमार्जुनवासुदेवा इत्यादि । उपसर्गनिपातपूर्वकोऽव्ययीभावः । तद्यथा । उपमणिकं अनुसमुद्रं व्यभ्रमित्येवमादि । तुल्यविभक्तिलिङ्गयोरुभयोः पदयोः समानाधिकरणः कर्मधारयः । तद्यथा । कृष्णमृगो रक्ताश्वः श्वेतपताकेत्येवमादि । एतेष्वेकपर्वसु चानेकपर्वसु च तद्धितसमासेषु पूर्वं पूर्वमेव निर्ब्रूयादपरमपरमेव प्रविभज्य विगृह्णीयेत्यर्थः । पूर्वं तद्धितार्थं निर्ब्रूयात्पश्चात्पदार्थम् । समासेष्वपि पूर्वं समासार्थं पश्चात्पदार्थम् ।

तदेतदुदाहरणैरेव दर्शयति । तद्यथा । ‘ दण्ड्यः पुरुषः ’ इति ।

---

१ क. ख. °पदेषु चानेक°. २ च. °कपदमेकसमासः. ३ घ. झ. ट. ठ. ड. इत्येवमादि. ४ ख. झ. ट. पुरुषो दण्डपुरुषो दण्डमर्हतीति वा दण्डेन संपद्यत इति वा इति । दण्ड्य इत्येष°.

तद्धितनिर्वचनस्योदाहरणम् ।

दण्ड्य इत्येष तद्धितः पुरुषशब्दविशेषणम् । पूर्वं तावत्तद्धितार्थं निर्वक्ष्यति ततः पदार्थं निर्वक्ष्यति । कस्मिंश्चिदपराधे दण्डमर्हतीति दण्ड्यः । दण्डेन वा कार्षापणादिना यः संपद्यते संयुज्यते स दण्ड्यः । अधुना पदार्थनिर्वचनम् । 'दण्डो ददतेः[1]' धारयत्यर्थे[2] वर्तमानस्य । धार्यते ह्येषोऽपराधेषु राजभिः । आह । दृष्टः पुनः क्वचित्प्रयोगो ददतेर्धारयत्यर्थे इति । उच्यते । दृष्टो वेदे लोके च । वेदे तावत् । विश्वे देवाः पुष्करे त्वाददन्त [ऋ० सं० ७ । ३३ । ११] इति । तथा लोके 'अक्रूरो ददते मणिम्[3]' ।

ददतिर्धारणार्थः

अक्रूरो नाम राजा वृष्ण्यन्धकाधिपतिः । स ददते मणिं स्यमन्तकनामानं शिरसा । लोकेऽप्येवं धारणार्थे[4] ददतिर्भाष्यते । 'दमनात्[5]' दण्डः 'इत्यौपमन्यवः' आचार्यो मन्यते । तेन ह्यदान्तो दम्यते राजभिः । 'तेनादान्तान्दमयेत्' इत्युक्तम् [गौत० धर्म० ११ । २८] । लोके हि प्रसिद्धम्[6] । यः कश्चिददान्तो भवति तमधिकृत्य वक्तारो भवन्ति '[7]दण्डमस्याकर्षत हे सभासदः । तेन संपद्यतामयं ततो दान्तो भविष्यति' इति । एवमयं[8] गर्ह्यायां दृष्टः । एवं च दमनाद्दण्ड इत्यौपमन्यव आचार्यो मन्यते[9] ।

तद्धितस्य द्वितीयोदाहरणम्

तद्धितस्यैव द्वितीयमुदाहरणं[10] 'कक्ष्या रज्जुरश्वस्य' इति[11] । कक्ष्या इत्येष तद्धितः । आह । का पुनरियं कक्ष्येति । उच्यते । याश्वस्य संनाहरज्जुः सा कक्ष्येत्युच्यते । एवं कक्ष्याशब्दस्य तत्त्वमुक्त्वाधुना तद्धितार्थं ब्रवीति । 'कक्षं सेवते' । सा[12] हि कक्षं सेवते । कक्षसंयुक्ता भवति । कक्षे भवा वा[13] कक्ष्या । अधुना पदार्थं निर्वक्ति ।

---

१ क. ख. घ. झ. ट. ड. दण्डो ददतेर्धारयति कर्मणः । ददतेः°. २ च. ददातेर्धा°. ३ ठ. ड. मणिमित्यभिभाषन्ते । अक्रूरो°. ४ क. ख. घ. झ. ट. ड. ददतिर्धारणार्थे भा°; च. धारणार्थे ददातिर्भा°; ठ. ददातिर्धारणार्थे भा°. ५ घ. झ. ट. ठ. दमनादित्यौपमन्यवः । दमनाद्दण्ड°. ६ ग. ज. °सिद्धं दान्तो यः°. ७ क. ख. घ. झ. ट. ठ. ड. दण्डमस्याकर्षतेति गर्ह्यायाम् । दण्डमस्या°. ८ घ. झ. ट. ठ. ड. इत्येव°. ९ क. ख. °न्यते॥४॥तद्धि°. १० ग. °रणम् । ४ । कक्ष्या°. ११ घ. झ. ट. ठ. ड. 'इति' नास्ति. १२ ग. ज. 'सा हि कक्षं सेवते' नास्ति. १३ च. 'वा' नास्ति.

' कक्षो गाहतेः ' विलोडनार्थस्य [धा० १ । ६६९] । कक्षयोरेव हि बलेन विलोडयति स्त्री दध्यादि । अत्र पुनः ' क्स इति नामकरणः ' । सर्वमन्यदाद्यन्तविपर्ययादि यथोपप्रदर्शितं यथासंभवं योज्यं तत्र तत्र । ' ख्यातेर्वानर्थकोऽभ्यासः ' ककारः । कैख्यः सन्कक्ष इत्युच्यते । अर्थचानेव वा ककारः । कथम् । ' किमस्मिन्ख्यानमिति ' एवम् । किमस्मिन्ख्यापनीयमस्ति । न किंचिदप्यदर्शनीयत्वात् । गूहनीयोऽयमित्यर्थः । स एष एवं कृत्वा किंख्यः सन्कक्ष इत्युच्यते । ' कषतेर्वा ' [धा० १ । ६८६] । नित्यकालं ह्यसौ स्वेदशीलत्वात्कण्डूं ददाति ततो नखैः कष्यते यतस्तस्मात्कर्षणक्रियायोगात्कक्षः । ' तत्सामान्यान्मनुष्यकक्षः ' । स्त्रीकक्षस्य सामान्यान्मनुष्यकक्षोऽपि कक्ष इत्युच्यते । ' बाहुमूलसामान्यादश्वस्य ' अपि यो बाहुमूलप्रदेशः स कक्ष इत्युच्यते । तं सेवत इति कक्ष्या ।

अन्ये तु ब्रुवते । ' पूर्वं पूर्वमपरमपरं प्रविभज्य निर्ब्रूयात् " । पूर्वं पदं पूर्वमेव प्रविभज्य निर्ब्रूयादपरं पदमपरमेवेति ।

पूर्वं पूर्वमित्यादेरपरो व्याख्यामार्गः एतस्मिन्नेवार्थे कल्प्यमाने पदानामेव पौर्वापर्यं निर्वचने । तद्धितसमासयोस्त्वनियमः पूर्वं वा पश्चाद्वेति । पूर्व एव त्वर्थः साधीयान् ।

उक्तं तद्धितनिर्वचनलक्षणं सोदाहरणम् । अधुना समासोदाहरणमुच्यते ॥ २ ॥

अथ द्वितीयः पादः ।

राज्ञः पुरुषो राजपुरुषो राजा राजतेः पुरुषः पुरिषादः पुरिशयः पूरयतेर्वा पूरयत्यन्तरित्यन्तरपुरुषमभिप्रेत्य ।

---

१ ग. ज. ' तत्र ' सकृदेव. २ घ. झ. ठ. ठ. ड. °भ्यासः । ख्यातेरनर्थोऽ-(ठ. ड. र्थकोऽ) भ्यासःककारः. ३ घ. ट. कख्यः; ठ. ड. ख्यः. ४ घ. झ. ट. ठ.ड. °इति । एवं किम°. ५ ठ. ड. कृष्यते. ६ ठ. ड. °त्कर्षण°. ७ क. ख. घ. झ. ठ. ड. °त्कक्ष इत्युच्यते । तत्सा°. ८ क. ख. घ. झ. ट. ठ. ड. °मान्यादश्वस्य । अश्वस्यापि°. ९ क. ख. घ. झ. ठ. ड. ' एव ' नास्ति; ठ. स्मिन्नर्थे° एवा. १० च. °निर्वचनं सोदा°. ११ क. ख. ग. च. ज. घ. झ. ट. अङ्को नास्ति; ठ. ड. ॥ २ ॥ इति निरुक्तटीकायां द्वितीयाध्याये द्वितीयः खण्डः ॥ अधुना समासोदाहरणमुच्यते । राज्ञः°.

यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति किंचित्[1]। वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वमित्यपि निगमो भवति[2]। विश्वकद्राकर्षो वीति चकद्र इति श्वगतौ भाष्यते द्रातीति गतिकुत्सना कद्रातीति द्रातिकुत्सना चकद्राति कद्रातीति सतोऽनर्थकोऽभ्यासस्तदस्मिन्नस्तीति विश्वकद्रः[3] कल्याणवर्णरूपः कल्याणवर्णस्येवास्य रूपं कल्याणं कमनीयं भवति वर्णो वृणोते रूपं रोचतेरेवं तद्धितसमासान्निर्ब्रूयान्नैकपदानि निर्ब्रूयान्नावैयाकरणाय नानुपसन्नायानिदंविदे वा नित्यं ह्यविज्ञातुर्विज्ञानेऽसूयोपसन्नाय तु निर्ब्रूयाद्यो वालं विज्ञातुं स्यान्मेधाविने तपस्विने वा ॥ [4]३ ॥

समासनिर्वचनस्योदाहरणम्

' राज्ञः पुरुषो राजपुरुषः ' । राज्ञ इत्युक्ते सर्वं[5] स्वं गम्यते षष्ठीसामर्थ्यात् । तथा पुरुष इत्युक्ते सर्वः स्वामी गम्यते निर्देशसामर्थ्यात् । अथेदानीं राजपुरुष इत्युक्ते राजा पुरुषमन्येभ्यः स्वामिभ्यो विनिवर्त्य स्वात्मनि संयुनक्ति । पुरुषोऽपि राजानमन्येभ्यः स्वेभ्यो[6] निर्वर्त्य[7] स्वात्मना[8] संयुनक्ति[9] । ता उभावप्यन्योन्यविमिश्रपदार्थकौ मिथःसंस्पृष्टपदार्थौ[10] समस्येते । अथेदानीं राजपुरुष आनीयतामित्युक्ते न राजानमानयन्ति नापि पुरुषमात्रं नाप्युभयम् । किं तर्हि । राजस्वामिकं पुरुषमानयन्ति । एवं समासार्थः । कुतः पुनरेतद्राजस्वामिकमिति । प्रधानोपसर्जने हि सहभूते विवक्षितमेकमर्थं ब्रूतः ।

---

१ ङ. कश्चित्. २ क. ख. छ त. द. °वाति ॥ ५ ॥ वि°. ३ क. ख. छ. विश्वक°. ४ क. ख. छ. त. द. ६. ५ घ. झ. सर्वस्वं. ६ घ. झ. ट. ठ. ड. स्वामिभ्यः. ७ क. ख. झ. ठ. ड विनिवर्त्य; घ. ट. निर्वर्त्य. ८ झ. ठ. ड. स्वात्मनि. ९ घ. झ. °क्ति । पुरुषोऽपि राजान्येभ्यः स्वामिभ्यो विनिवर्त्य स्वात्मना संयुनक्ति । ता°. १० क. ख. ज. संसृष्टः°; ग. संभृष्ट°; घ. ट. संसृस्पृष्ट°.

राजपुरुषशब्दावधुना विग्रहप्रसक्तावाह । ‘ राजा राजतेः[1] ’ दीप्त्यर्थस्य [धा० १ । ८४७] । दीप्यते ह्यसौ पञ्चानां लोकपालानां वपुषा । ‘ पुरुषः पुरिषादः ’ । : शरीरं बुद्धिर्वा । तयोरसौ विषयोपलब्ध्यर्थं सीदतीति[2] पुरिषादः[3] पुरुषः । ‘ पुरिशयः[4] ’ । अथवा तयोरसौ शेते विशेषेणास्त इति पुरिशयः सन्पुरुष इत्युच्यते । ‘ पूरयतेर्वा ’ । पूर्णमनेन पुरुषेण सर्वगतत्वाज्जगदिति पुरुषः । ‘ पूरयत्यन्तरित्यन्तरपुरुषमभिप्रेत्य[5] ’ । अन्तरित्यन्तरपुरुषाभिप्रायेणैवमुच्यते प्रासङ्गिकम् ।

पूरयतेः पुरुष इत्यर्थ उपनिषच्छ्लोकः

निगमश्च भवति । यस्मात्परं नापरमस्ति किंचिद्यस्मान्नाणीयो न ज्यायोऽस्ति किंचित्[6] । वृक्ष इव स्तब्धो दिवि तिष्ठत्येकस्तेनेदं पूर्णं पुरुषेण सर्वम् [श्वेता० उप० ३ । ९ ॥ महाना० उप० १० । ४] ॥ यस्मात्परमपरं वा न किंचिदप्यस्ति यस्माच्च न किंचिदप्यणीयो नापि ज्यायोऽन्यदस्ति स एव सर्वमित्यभिप्रायः । वृक्ष इव स्तब्धो नित्यमसंकोचविकाशधर्मा दिवि द्योतनवति स्वात्मनि सर्वर्द्धिभावेन[7] तिष्ठति यस्तेन पुरुषेणेदं पूर्णं सर्वं जगदिति[8] ।

समासस्य द्वितीयमुदाहरणम्

समासस्यैव द्वितीयमुदाहरणं[9] ‘ विश्वकद्राकर्षः ’ इति । विश्वकद्रमाकर्षतीति विश्वकद्राकर्षः । आह । कः पुनरयं विश्वकद्र इति[10] । वीति[11] चकद्र इति शब्दद्वयं श्वगतौ भाष्यते । श्वभिः साकं यो गच्छति मनुष्यस्तास्मिन्भाष्यते[12] । अत्र पुनर्द्रातीति गतिकुत्सना । ‘ द्रा कुत्सायां गतौ ’ [धा० २।४४] इत्युक्तम् । इदं हि तस्य कुत्सितगतित्वं यदस्य[13] श्वभिः सह गमनम्[14] । इदानीं कद्रातीति द्राति-

---

१ क. ख. घ. झ. ट. ठ. ड. राजतेः । राजतेर्दी°. २ ग. ज. ‘ इति ’ नास्ति. ३ ग. ज. पुरिषाद इति पुरुषः; च. ‘ पुरिषादः ’ नास्ति. ४ च. झ. ‘ पुरिशयः ’ नास्ति. ५ च. ‘ पूर......प्रेत्य ’ नास्ति. ६ ठ. ड. कश्चित्. ७ क. ख. घ. झ. सर्वविभागेन; च. सर्वर्द्धिभावेन° वि; ट. सर्वविभागेन° र्द्धिभावे. ८ क. ख. °दिति ॥ ५ ॥ समा°. ९ ग. °णम् । ५ । वि°. १० क. ख. घ. झ. ट. ठ, ड. इति । वीति चकद्र इति श्वगतौ भाष्यते । वीति°. ११ घ. झ. ट. वीतीति. १२ क. ख. घ. झ. ट. ठ. ड. भाष्यते । द्रातीति गतिकुत्सना । अत्र°. १३ ठ. ड. यदसौ श्वभिः सह गच्छति । कद्रातीतिद्रातिकुत्सना । इद्रा°. १४ घ. झ. ट. गतिः । कद्रातीति द्रातिकुत्सना । इद्रा°.

कुत्सना । कुत्सितकुत्सनेत्यर्थः । इदमेव तावत्तस्य कुत्सितत्वं यदसौ श्वभिः सह गच्छति । इदमपरं कुत्सिततरं यद्धत्वा श्वभिः सत्त्वानि हन्ति । तस्मात्कद्रातीति कुत्सितकुत्सनेत्युपपद्यते । अथेदानीं च इत्येष कद्रातीत्येवमेव सतः शब्दस्वरूपस्यानर्थक एवाभ्यासः । यदेवोक्तं भवति कद्रातीति तदेव चकद्रातीति । तदस्मिन्द्वितयमप्यस्ति कुगतित्वं कुत्सिततरगतित्वं च नानाप्रकारमिति विश्वकद्रः श्वजीवनः पुरुषः । तमपराधे कस्मिंश्चिद्वर्तमानमन्यो य आकर्षति स विश्वकद्राकर्षः । अन्ये तु ब्रुवते । श्वैव विश्वकद्रः । तस्यैव हि स्वभावत एव हिंस्रत्वाद्गतिः कुत्सिता । स च पुनः पादविकलोऽतस्तस्य कुत्सितकुत्सितत्वम् । वीत्युभयोरर्थयोर्मत्वर्थः । तमाकर्षति यः पुरुषः स विश्वकद्राकर्षः ।

रूपसमासस्योदाहरणम्

अधुना रूपसमासं दर्शयति । ' कल्याणवर्णरूपः ' । कल्याणवर्णं सुवर्णं तस्येव यस्य रूपं स कल्याणवर्णरूपः । अग्निरन्यो वा कश्चित् ।

कल्याणादिशब्दान्विग्रहप्रसक्तान्निर्ब्रवीति । 'कल्याणं कमनीयं भवति' । प्रार्थ्यते हि तत्सर्वेणैव । ' वर्णो वृणोतेः ' । आवृणोति हि स आश्रयम् । ' रूपं रोचतेः ' । तद्धि रोचिष्णु भवति । ' एवं तद्धितसमासान्निर्ब्रूयात् ' इत्युपसंहारवचनम् ।

निर्वचनं कथं कर्तव्यं कथं न

' नैकपदानि निर्ब्रूयात् ' । प्रकरणोपपदरहितानि सन्ति केवलान्येव परेणाभिद्रोहबुद्ध्या पृच्छ्यमानानि न निर्ब्रूयान्न निर्वक्तव्यानीति । किं कारणम् । तेषां प्रकरणादुपपदाद्वार्थः शक्यतेऽवधारयितुम् । सोऽसौ प्रकरणानभिज्ञोऽन्यथैव निर्ब्रूयात्ततश्च प्रत्यवायेन योगादपहास्यश्च स्यात् । तद्यथा । ' जहा ' इत्येतदेकं पदं प्रकरणोपपदरहितं न विज्ञायते किं ' हन्तेः ' उत ' ओहाक्त्यागे' [धा० ३ । ८] इत्यस्य धातोः स्यादिति । तत्पुनरेतत् ' मा न एकस्मिन्नागसि मा द्वयोरुत त्रिषु । वधीर्मा शूर भूरिषु' [ऋ० सं०

---

१ घ, ट. कुत्सितकुत्सित्वं; ठ. ड. कुत्सितकुत्सिततत्वं. २ घ. झ. ट. कुत्सिततरत्वं. ३ घ. झ. ट. श्वभिः सह सत्त्वानि°. ४ क. ख. घ. झ. ट. ठ. ड. °पद्यते । चकद्राति कद्रातीति सतोऽनर्थकोऽभ्यासः । अथे°. ५ क. ख. घ. झ. ट. ठ. ड. °तीति । तदस्मिन्नस्तीति विश्वकद्रः । तद्°. ६ ग. च. ज. ' अतः ' नास्ति. ७ क. ख. ग. ज. °पहारश्च. ८ ग. च. ज. व. झ. ट ठ. ड. एकस्मिन्नित्येतस्यां°.

८ । ४५ । ३४] इत्येतस्यां पूर्वस्यामृचि यदेतद् 'मा वधीः' इति पदमेतस्माद्गम्यते हन्तेः स्यादिति । किं कारणम् । विज्ञातप्रकरणोपपदस्य हि समञ्जसं ह्युपाकरणं न्याय्यमित्येवमनवगतसंस्कारााणामेकपदानां प्रकरणादर्थावधारणमुपपदाद्वा शक्यते कर्तुम् । अत इदमुक्तं 'नैकपदानि निर्ब्रूयात्' इति ॥

'नावैयाकरणाय' इति । उक्तं निर्वचनलक्षणम् । अधुना यस्मै निर्वक्तव्योऽयमुक्तनिर्वचनलक्षणः समाम्नायस्तस्य लक्षणं कस्मै न कर्तव्यम् । वक्तव्यमिति तदर्थमिदमारभ्यते 'नावैयाकरणाय'।

अवैयाकरणाय

यस्तावदवैयाकरणस्तस्मै न निर्वक्तव्योऽयं समाम्नायः । न ह्यसावलक्षणज्ञत्वाद्व्युत्पाद्य निरुच्यमानमेतद्बुध्येत ततो व्यर्थ एव श्रमः स्यादिति । किंच । 'नानुपसन्नाय'। किमपि महदद्भुतमनेन कृतं यद्व्याकरणमधीतमित्येतावता गौरवेण वैयाकरणायापि न निर्ब्रूयात् ।

अनुपसन्नाय

धर्मो हि सर्वथैवापरित्याज्यस्तस्माद्वैयाकरणायापि सम्यगुपसन्नाय परं शिष्यवृत्तिमास्थितायैव निर्ब्रूयात् । नैवमेवं । किंच । 'अनिदंविदे वा'। वैयाकरणोऽपि जडः कश्चिदसमर्थ एव वेदितुं स्यात् । बहु वेदितव्यमत्रास्ति देवतादि किंचित् । तस्माद्वैयाकरणायापीदं वेदितुमसमर्थायानिदंविदे नैव निर्ब्रूयात् ।

अनिदंविदे

अथवा । इदमित्यात्मपर्यायवाचि । इदंविद आत्मविदे योगिने । स ह्यात्मज्ञानविधूतकल्मषोऽल्पेनैव यत्नेन बोद्धुं सूक्ष्मानर्थाञ्शक्त इतीदंविदे निर्ब्रूयात् । अथवा । यत्किंचिच्छास्त्रमिदमिति निर्दिश्यते । येन ह्यन्यत्किंचिदश्रुतपूर्वं शास्त्रं तस्मै न निर्ब्रूयादिदं निरुक्तशास्त्रमनास्फालितकुड्मलाय नाक्षालितहृदयकुड्मलाय ।

---

१ क. ख. घ. ट. ठ. ड. किमतिमह°. २ ग. ज. 'नैवमेव' नास्ति. ३ ग. ज. 'वैयाक......किंचित्' इदं वाक्यं 'तस्मात्...निर्ब्रूयात्' इत्यस्य पश्चाद्वर्तते. ४ च. ट. एवं. ५ क. ख. ट. तस्मै वै°. ६ घ. ट. ठ. ड. 'यत्नेन' नास्ति. ७ क. ख. घ. ट. ठ. °श्रुतं पूर्वशास्त्रं; ड. °श्रुतं पूर्वं शास्त्रं. ८ क. ख. घ. ठ. ड. [झ. पत्रं गलितं]. अनास्फालितहृदयकुड्म°; ग. ज. अनास्फुलितकुड्म°. ९ घ. ट. ठ. अनाक्षालित°.

किं कारणम् । ‘ नित्यं ह्यविज्ञातुर्विज्ञानेऽसूया ’ । यो हि न विजानाति नावबुध्यते तस्याविज्ञातुर्नित्यकालमेव विज्ञानेऽसूया । स ह्यनवबुध्यमान [1]आत्मीयदोषमाचार्य एवासर्[2]जति स्वयमेव तावदयं नावबुध्यते किमस्मान् बोधयिष्यतीति । एतस्मात्कारणादश्रुतपूर्वान्यशास्त्रा[3]यांखिन्नमनसे नेदं निर्ब्रूयात् ।

अज्ञस्य विज्ञानेऽसूया

‘ उपसन्नाय तु निर्ब्रूयाद्यो वालं विज्ञातुं स्यान्मेधाविने तपस्विने वा ’। य एव तु मेधावी स्यादन्यजन्मान्तरानुभावितया प्रज्ञया युक्तो यो वा तपस्वी कामं ताभ्यामवैयाकरणाभ्यामपि निर्ब्रूयादेव । न हि तयोरसाध्यं किंचिदस्ति । तपसा हि स्वयमपि वेदार्थः प्रादुर्भवेदेव यथा मन्त्राः प्रादुरभूवन् पूर्वेषामृषीणाम् । मेधाव्यपि च स्वयमप्युत्प्रेक्षितुं शक्नुयात्किमुतोच्यमानमवबोद्धुम् । यो वान्यः कश्चिदलं पर्याप्तो विज्ञातुमेतच्छास्त्रं भवेद्दृढग्राही स्थिरबुद्धिस्तस्मै निर्ब्रूयादेव सर्वथा यतात्मने[4] विदितवेदाङ्गाय वेदार्थे ब्राह्मणाय । अनुपसन्नायैव न निर्ब्रूयाद्यद्यपि तपस्वी मेधावी दृढग्राही वा । उक्तं हि । ‘ यश्चान्यायेन निर्[5]ब्रूयाद्यश्चान्यायेन पृच्छति । तयोरन्यतरो मृत्युं विद्वेषं वाधिग[6]च्छति’ ॥ अथाप्येतमर्थमधिकृत्योदाहरन्ति ॥ ३ ॥[7]

उपसन्नाय निर्वचनं कर्तव्यम् । मेधाविने तपस्विने च

विद्या ह वै ब्राह्मणमाजगाम गोपाय मा शेवधिष्टेऽहमस्मि । असूयकायानृजवेऽयताय न मा ब्रूया वीर्यवती तथा स्याम् । य आतृणत्त्यवि[8]तथेन कर्णावदुःखं कुर्वन्नमृतं संप्रयच्छन् । तं मन्येत पितरं मातरं च तस्मै न द्रुह्येत्कतमच्चनाह । अध्यापिता ये गुरुं नाद्रियन्ते विप्रा वाचा मनसा कर्मणा वा । यथैव ते न गुरोर्भोजनीयास्तथैव तान्न भुनक्ति श्रुतं तत् । यमेव विद्याः शुचिमप्रमत्तं

---

१ क. ख. घ. ट. ठ. ड. आत्मीयं दोषं. २ ठ. ड. °सज्जाति. ३ घ. °शास्त्राय । खिन्न°; ट. ठ. ड. °शास्त्राय खिन्न°. ४ ग. ज. यतात्मानं विदितवेदाङ्गवेदार्थब्राह्मणं. ५ च. विब्रू°. ६ क. ख. °गच्छति ॥ ६ ॥ अथा°. ७ घ. ट. ठ. ड. च. ज. अङ्को नास्ति ; ग. ६. ८ छ. °विदृथेन.

मेधाविनं ब्रह्मचर्योपपन्नम् । यस्ते न द्रुह्येत्कतमच्चनाह तस्मै मा ब्रूया निधिपाय ब्रह्मन्निति निधिः शेवधिरिति[1]॥४॥

इति[2] द्वितीयाध्यायस्य प्रथमः पादः ।

अनृजवेऽसूयकायायताय विद्या न देयेत्यर्थे गाथाः

विद्या ह वै ब्राह्मणमाजगामेति । विद्या किल कामरूपिणी भूत्वा विद्याधिदेवता वा संयतात्मानं विदितवेदाङ्गवेदार्थं ब्राह्मणं प्रति कंचिदाजगाम । तमेत्य प्रह्वीभूतोवाच । किमिति । गोपाय मा रक्ष माम् । ततस्तेऽहं गुप्ता सती शेवधिर्भविष्यामि सुखनिधानमित्यर्थः । आह कुतः[3] पुनस्त्वां रक्षामि[4] । असूयकायानृजवेऽयताय । असूयकः परापवादशीलः । अनृजुः यस्य मनोवाग्देहेष्वसमाः प्रवृत्तयः । अयतो विप्रकीर्णेन्द्रियः । यत्किंचनकार्यशुचिः । एवंलक्षणाय न मां ब्रूयास्त्वम्[5] । किं तथा भविष्यति । वीर्यवती तथाहं तव स्यां भवेयमित्यर्थः ।

यो विद्यां ददाति स मातापितृसदृशः

य आतृणत्त्यवितथेन । अधुना शिष्योपदेशमाह । य आतृणत्ति आभिनत्ति अपिहिताविव सन्तौ कर्णौ विवृणोति अवितथेन सत्येन ब्रह्मणा । कथं पुनरातृणत्ति । अदुःखं कुर्वन् । यो हि किंचिदातृणत्ति स दुःखयति । अयं पुनः सुखमातृणत्ति । किंच । अमृतत्वप्राप्तिहेतुं[6]ज्ञानं संप्रयच्छन् । य आतृणत्ति तस्मै किमिति । उच्यते । तं मन्येत[7] पितरं मातरं च । नेतरौ मातापितराविल्यभिप्रायः । उक्तं च । 'उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता । प्रेत्य[8] चेह च विप्रस्य ब्रह्मजन्म हि शाश्वतम्' [म० सं० २ । १४६]॥ तस्मै मातापितृभूताय गुरवे न द्रुह्येत्कतमच्चनाह कदाचिदपि । आपद्यपि कष्टायामित्यभिप्रायः ।

---

१ क. ख. छ. त. द. ७. २ ङ. थ. ध. ठ. ड. 'इति......पादः' नास्ति. ३ ठ. ड. कथं. ४ ठ. ड. रक्षामि । उच्यते । असू°. ५ ग. ज. ब्रूयात् स्त्वम्; थ. ब्रूयां रिः अ किं°; ट. ब्रूयास्त्र रि. अ किं°. ६ ठ. ड. हेतुं. ७ ग. ज. मन्ये. ८ क. ख. घ. ट. ठ. ड. ब्रह्मजन्म हि विप्रस्य प्रेत्य चेह च शाश्वतम्.

अधुनेतरान् दुष्टशिष्यान् विद्याभिशपन्त्याह[1] । अध्यापिताः[2] सन्तो ये गुरुं प्रति नाद्रियन्ते नादरं कुर्वन्ति । के[3] पुनस्त इति । उच्यते । विप्रा मेधाविनः सन्तो गृहीतविद्याः । कथं पुनर्नाद्रियन्ते । वाचा मनसा कर्मणा वा । आह । किं तेषामिति । उच्यते । यथैव ते तस्य[4] गुरोर्न भोजनीया न[5] भोज्याः न भोजनार्हास्तथैव तांस्तच्छ्रुतमपि न भुनक्ति न पालयति । श्रुत[6]फलेन न संयुनक्तीत्यर्थः ।

ये गुरुं नाद्रियन्ते ते श्रुतफलं नाप्नुवन्ति

अधुना यस्मै वक्तव्या तस्य लक्षणं ब्रवीति । यमेव विद्या[7] जानीयास्त्वं शुचिमप्रमत्तं यमनियमेषु मेधाविनं च ब्रह्मचर्येणोपपन्नम् । किंच । यस्ते न द्रुह्येत् द्रोहमुपगच्छेत्कतमच्चनाह कदाचिदपि सर्वास्वप्यापत्सु गोपायमानः तस्मै मां ब्रूयास्त्वं निधिपाय गोप्त्रे ब्रह्मन् ।

विद्या कस्मै देया

आह । निधिः क इति । उच्यते । शेवधिरिति[8] । शेवं[9] इति सुखनाम[10] । सुखनिधानमित्यर्थः । ब्रह्मकोशो[11] हि निधिः सुखानां कृत्स्नस्य जगतो यज्ञद्वारेण । अत इदमुक्तं निधिः शेवधिरिति ।[12] ४ ॥

इति निरुक्तवृत्तौ सप्तमस्या[13]ध्यायस्य प्रथमः पादः[14] ॥

अथातोऽनुक्रमिष्यामो गौरिति पृथिव्या नामधेयं यद्दूरं गता भवति यच्चास्यां भूतानि गच्छन्ति गातेर्वौकारो नाम-

१ क. ख. घ. ट. ठ. ड. अभिशपन्ती विद्या इदमाह. २ क. ख. घ. ट. ठ. ड. अध्यापिता ये गुरुं नाद्रियन्त इत्यादि । अध्या°. ३ घ. ट. ' के पुनस्त इति ' नास्ति; ठ. ड. आह । कतमे इति. ४ ग. ज. ' तस्य ' नास्ति. ५ घ. ट. ' न भोज्याः ' नास्ति; च. ' न ' नास्ति. ६ ठ. ड. श्रुतं फलं°. ७ घ. ट. ठ. ड. विद्याः शुचिमप्रमत्तमिति (ठ. ड. ' इति ' नास्ति) यमेव विद्या जानीया°. ८ ग. ज. सेवधि°. ९ ग. ज. सेव. १० च. सुषनाम. ११ क. ख. घ. ट. ठ. ड. ब्रह्मलोको. १२ क. ख. ७; घ. ट. च. ज. अङ्को नास्ति; ठ. ड °रीति । इति निरुक्त°. १३ ग. ज. सप्तमाध्यायस्य; घ. द्वितीयस्याध्या°; ठ. द्वितीयस्याध्या° सप्तम; ठ. ड. °निरुक्तटीकायां द्वितीयाध्यायस्य चतुर्थः खण्डः । इति द्वितीयाध्यायस्य प्रथमः पादः. १४ घ. ट. पादः समाप्तः.

करणोऽथापि पशुनामेह भवत्येतस्मादेवाथाप्यस्यां ताद्धितेन कृत्स्नवन्निगमा भवन्ति गोभिः श्रीणीत मत्सरमिति पयसो मत्सरः सोमो मन्दतेस्तृप्तिकर्मणो मत्सर इति लोभनामाभिमत्त एनेन धनं भवति पयः पिबतेर्वा प्यायतेर्वा क्षीरं क्षरतेर्घसेर्वेरो नामकरण उशीरमिति यथांशुं दुहन्तो अध्यासते गवीत्यधिषवणचर्मणोऽंशुः शमष्टमात्रो भवत्यननाय शं भवतीति वा चर्म चरतेर्वोच्चृत्तं भवतीति वाथापि चर्म च श्लेष्मा च गोभिः संनद्धो असि वीळयस्वेति[2] रथस्तुतावथापि स्नाव च श्लेष्मा च गोभिः संनद्धा पतति प्रसूतेतीषुस्तुतौ ज्यापि गौरुच्यते[3] गव्या चेत्ताद्धितमथ चेन्न गव्या गमयतीषूनिति ॥ ५ ॥

‘ अथातोऽनुक्रमिष्यामः ’ । ‘ समाम्नायः समाम्नातः स व्याख्यातव्यः ’ इति प्रतिज्ञातम् । सा च पुनरियं व्याख्या सामान्या वैशेषिकी च । तत्र सामान्या सर्वनाम्नामिदं सामान्यलक्षणमिदमाख्यातानामिदमुपसर्गाणामिदं निपातानामिति । सोऽयमनयैवंप्रकारया व्याख्यया कृत्स्नः समाम्नायो व्याख्यातः । तदनुषक्तान्येव च शास्त्रारम्भप्रयोजनान्युक्तानि । आगमश्च परिशोधितः । वेदवेदाङ्गव्यूहश्च सप्रयोजन उक्तः । निघण्टुसमाम्नायविरचना चोपदिष्टा प्रकरणत्रयैविभागेन । निर्वचनलक्षणं चानेकप्रपञ्चमुक्तम् ।

अथेदानीं विशेषव्याख्यया प्रतिपदमयं समाम्नायो व्याख्यातव्यस्तदधिकारार्थोऽयम् ‘ अथ ’ शब्दः । ‘ अतः ’ शब्दः क्रमे हेतौ वा । सामान्यव्याख्यानादनन्तरं विशेषव्याख्यानमेवावसरप्राप्तमित्येवं क्रमे । अथवा हेतौ । यस्मात्सामान्यतः समाम्नायो व्याख्यातोऽत इदानीं विशेषतः ‘अनुक्रमिष्यामः’ आनुपूर्व्येण क्रमिष्यामो वर्णयिष्यामः । व्याख्ययेति शेषः ।

आह । किंलक्षणा पुनरसौ व्याख्येति । उच्यते । तत्त्वपर्यायभेदसंख्या-

संदिग्धोदाहरणतन्निर्वचनविभागेन यदाख्यानं
व्याख्यालक्षणम् — सा व्याख्या नैघण्टुके प्रकरणे । तद्यथा ।
तत्त्वं ‘गौरिति पृथिव्या नामधेयम्’ इत्येवमादि ।

---

१ क. ख. छ. त. द. यथा । अंशुं°. २ क. ख. छ. त. द. वीलयस्व. ३ क. ख. द. १; छ. त. ८. ४ ग. च. ज. चोद्दिष्टा. ५ ग. ज. °त्रयप्रविभा°. ६ क. ख. °संदिग्धसंदिग्धो°. ७ घ. ट. ठ. ड. यद्वा व्याख्यानं.

पर्यायवचनं प्रसिद्धेनाभिधानेनाप्रसिद्धस्यार्थस्य ख्यापनम् । तद्यथा । 'पृथिव्या नामधेयं गौरिति ' । भेदो व्युत्पत्तिरिति समानार्थः । तद्यथा । ' यद्दूरं गता भवति ' इत्येवमादि । संख्या । तद्यथा । ' पृथिवीनामधेयान्येकविंशतिः' । संदिग्धं 'तत्र निर्ऋतिर्निरमणादृच्छतेः कृच्छ्रापत्तिरितरा सा पृथिव्या संदिह्यते ' इत्येवमादि । संदिग्धोदाहरणं ' य ईं चकार ' इत्येवमादि । तन्निर्वचनं 'बहुप्रजाः कृच्छ्रमापद्यत इति परिव्राजकाः' इत्येवमादि । एवंप्रकारया व्याख्ययेदं नैघण्टुक[1]प्रकरणं व्याख्यास्यते ।

' गौरिति पृथिव्या नामधेयम् ' । आह । यस्मात्कारणाद्द्रव्ये शब्दनिवेशो नैरुक्तानां तदुच्यतां कारणं केन कारणेन गोशब्दः पृथिव्यां संनिविष्ट इति । उच्यते । यस्मादियं[2] ' दूरम् ' अध्वानं प्रति ' गता भवति ' । न ह्यस्या अन्त उपलभ्यते । यस्मात् ' चास्यां भूतानि गच्छन्ति ' आधारभूतायाम् । एवं कर्तृकारकमधिकरणं वा योज्यम् । ' गातेर्वा ' । ' गाङ् गतौ ' [धा० १ । ९५०] इत्यस्य धातोः । ' ओकारो नामकरणः ' प्रत्ययः ।

पृथिव्यभिधायक-गोशब्दव्युत्पत्तिः

' अथापि ' गौरित्येतत् ' पशुनाम भवतीह ' एव कारकद्वये तस्मादेव धातुद्वयाद्गमेर्गातेर्वा । 'अथाप्यस्यां' एव पशुगवि 'ताद्धितेन' प्रयोगेणाकृत्स्नायां सत्यां 'कृत्स्नवन्निगमा भवन्ति'। तद्यथा । 'गोभिः श्रीणीत मत्सरमिति' गोरेक[3]देशस्य 'पयसः' कृत्स्नवत्प्रयोगः । तदेतच्छिष्यबुद्धिव्युत्पादनार्थमनेकप्रका[4]रशब्दवृत्तिविषयोपप्रदर्शनं क्रियते कथं नामोपदर्शितशब्दवृत्तिविषयोऽसंमुह्य[5]न्मन्त्रार्थान्निर्ब्रूयादिति ।

गौरिति पशुनाम

आ धांवता सुहस्त्यः शुक्रा गृभ्णीत मन्थिनां । गोभिः श्रीणीत मत्सरम् । [ऋ० सं० ९ । ४६ । ४] । इमां गायत्रीमयास्य आङ्गिरसोऽपश्यत् । ग्रावस्तुतौ विनि[6]युक्ता [आश्व० श्रौ० ५ । १२] । हे अध्वर्यव एभिर्ग्रावभिः संस्कृत एष सोमः । ते

पयोर्थे गोशब्दप्रयोगः

१ ग. ज. नैवण्टुकं प्र°. २ घ. ट. यस्मादिदं. ३ घ. ट. गौरेक°. ४ ग. ज. °प्रकारं. ५ क. ख. ठ. ड. °संमुह्य मन्त्रा°. ६ घ. ट. ठ. ड. °स्तुतौ नियुक्ता.

यूयं हे[1] सुहस्त्यः सुवर्णेनालंकृतहस्ताः । किम् । आधावत । गृभ्णीत गृह्णीतैतौ शुक्रामन्थिनौ ग्रहावनतिक्रान्त[2]कालम् । किंच । गोभिर्गोभ्योऽभि[3]-निष्पन्नेन क्षीरेण श्रीणीतैनं मत्सरं मादयितारं सोमं मैत्रावरुणग्रहतामुपगतं श्रृतशीतेन तृतीयसवने[4] वा पूतभृत्याशिरेण । ततोऽनतिक्रान्तकालं जुहुत । एवमत्र विधानादशक्यत्वाच्च गोभिः श्रयणस्य[5] गव्येन पयसेति गम्यते ।

'मत्सरः[6] सोमो मन्दतेस्तृप्तिकर्मणः' । तृप्यन्ति ह्यनेन देवताः । शब्दसामान्यप्रसङ्गप्रसक्तमुच्यते । 'मत्सर इति लोभनाम' । तेन ह्याविष्टो धनाभिमुख्येन मत्तो भवति । पर्यायाख्यानप्रसक्तं निरुच्यते । 'पयः पिबतेर्वा' पानार्थस्य [धा० १ । ९२५] । पीयते हि तत् । 'प्यायतेर्वा' वृद्ध्यर्थस्य [धा० १ । ४८८] । तेन हि वर्धन्ते प्राणिनः । प्रसक्तानुप्रसक्तं निरुच्यते । 'क्षीरं क्षरतेः' श्च्योतनार्थस्य [धा० १ । ४१] । श्च्योतते[7] हि तदूधसः । 'घसेर्वा । ईरो नामकरण[8]'—प्रत्ययः । अदेर्घस्लृ आदेशः क्रियते [पा० २ । ४ । ३७] । अतस्तेनैव सिद्धरूपेण निर्दिश्यते 'घसेरीरो नामकरणः' इति । धात्वन्तरमिति वा केचित् [धा० १ । ७१६] । ज्ञापकं च ददाति 'उशीरमिति' । 'वश कान्तौ' [धा० २ । ७०] । तस्य कृतसंप्रसारणस्येरप्रत्ययेनोशीरमिति भवति । तद्धि सौगन्ध्याक्रान्तं भवति ।

'अंशुं दुहन्तो अध्यासते गवीत्यधिषवणचर्मणः' कृत्स्नवदभिधायकः ।

ते सोमादो हरी इन्द्रस्य निंसतेऽंशुं दुहन्तो

अधिषवणचर्मार्थे अध्यासते गवि । तेभिर्दुग्धं पपिवान्त्सोम्यं

प्रयोगः मध्विन्द्रो वर्धते प्रथते वृषायते [ऋ० सं० १० । ९४ । ९] । एषा जगती ।

अर्बुदो नाम काद्रवेयः सर्प ऋषिस्तस्यार्षम् । ग्रावस्तुतौ विनियुक्ता [आश्व० श्रौ० ५ । १२] । त एते ग्रावाणः सोमादः सोमभक्षयितारो यदाभिषवकर्मणि प्रवर्तन्तेऽथ तदा हरी इन्द्रस्याश्वौ यज्ञागमनार्थमेतेषां शब्दमुपश्रुत्य संस्कृतं सोमं मन्वानौ रथे योगमिच्छन्तौ

---

१ घ. ट. ठ. ड. 'हे' नास्ति. २ घ. ट. ठ. ड. °नतिक्रान्तिकाले. ३ च. 'अभि' नास्ति. ४ घ. ट. ठ. ड. सवनेन वा°. ५ क. ख. श्रपणस्य. ६ ठ. ड. पयसो मत्सरः°. ७ च. च्योतते. ८ क. ख. घ. ट. ठ. ड. °करणः । अदे°.

आत्मना ऋजीषं भक्षयिष्यन्ताविन्द्रं च सोमं पाययिष्यन्तौ स्वयमेव निसते नीचैर्नमेते युक्तौ आवां हे[3] इन्द्र गच्छ यज्ञायतनं संस्कृतः सोम इति । तदैव च ऋत्विजोऽपि त्वरमाणा इन्द्रोपस्थानकालमभ्यग्रं मन्वानाः अंशुं सोमांशुमभिषुत्य दुहन्तः प्रपूरयन्तो गव्यधि गोरुपरि गोरवयवेऽधिषवेणचर्मणि एतत्कर्म कुर्वाणा इन्द्रं प्रतीक्षमाणा आसते। अथ स इन्द्र एत्य तेभिः दुग्धमृत्विग्भिः प्रक्षारितं पपिवान्पीतबान्सोम्यं मधु सोममयम्। तेन तृप्तस्तत्पानानन्तरं वर्धते वीर्येण । प्रथते च शरीरेण विस्तीर्यते । विस्तीर्णश्च स्वेन वीर्येण मेघं विदार्य वृषायते वर्षं प्रवर्तयते । तदिदं सर्वमपि वर्षादि जगदनुग्राहकमैन्द्रं कर्माभिषवद्वारेण सोमाभिषवग्रावाधीनमित्येवं ग्रावस्तुतिः ।

निगमप्रसक्तं निरुच्यते । ' अंशुः शमष्टमात्रो भवति ' । व्याप्तमात्रो हि स यजमानेन तस्यैव शं भवति सुखो भवति । इष्टसोमो ह्यनृणोऽहमिति विगतमनोदुःखो भवति । अननाय जीवनाय शं सर्वेषां भूतानां भवति सुखो भवतीति वा । यज्ञो हि वर्षप्रवृत्तिहेतुस्ततश्च सर्वभूतानि सुखं जीवन्ति । व्याख्यानप्रसक्तं निरुच्यते । 'चर्म चरतेर्वा' । चरितं हि तत्सर्वस्मिञ्छरीरे गतमित्यर्थः । 'उच्चृत्तम्' उत्कर्तितं शरीरादिति वा ।

' अथापि चर्म च श्लेष्मा च ' गोशब्देनोच्यत इति शेषः । ' गोभिः संनद्धो असि वीळयस्व [ऋ० ६ । ४७ । २६] इति रथस्तुतौ ' । स हि चर्मणावनद्धो भवति । श्लेष्मणा च तस्यारादयः संश्लेषिता भवन्ति ।

चर्मश्लेष्मार्थे प्रयोगः

' अथापि स्नाव च श्लेष्मा च ' गोशब्देनोच्यते । ' गोभिः संनद्धा पतति प्रसूता [ऋ० सं० ६ । ७५ । ११] इतीषुस्तुतौ ' । सा हि स्नाम्ना वेष्टिता भवति श्लेष्मणा च संश्लेषिता ।

स्नावश्लेष्मार्थे प्रयोगः

---

१ च. ' च ' नास्ति. २ ग. ज. युक्त्वौ; च. युक्त्वा तौ. ३ च. 'हे' नास्ति. ४ ग. ज. तथैव. ५ घ. ड. °धिषणवच°; ज. °धिषवच; ट. ठ. धिषवर्णच°. ६ ठ. ड. प्रक्षालितं. ७ च. ' तेन ' नास्ति. ८ ट. ड. °नुग्रहकारकमैन्द्रं. ९ क. ख. घ. ट. ठ. ड. अननाय शं भवतीति वा। अननाय जीव°. १० क. ख. घ. ट. ठ. ड. वर्षे प्रवृ°. ११ क. ख. ग. च. ज. घ. ड. वीलय°. १२ ग. ज. संश्लेष्मकाः; च. संश्लेष्मकाः° स; घ. सश्लेषिता°; ट. सश्लेषिता° ष्मका.

'ज्यापि गौरुच्यते[1]'। सा पुनर्यदि 'गव्या ताद्धितम्' अभिधानम्[3]। [4] अथ' पुनः 'न गव्या गमयतीषूनिति' [2] गौरन्यद्द्रव्यमयी ॥ ५ ॥

वृक्षेवृक्षे नियता मीमयद्गौस्ततो वयः प्रपतान्पूरुषादः। वृक्षे वृक्षे धनुषि धनुषि वृक्षो [4] व्रश्चनाद्वृत्वा क्षां तिष्ठतीति वा क्षा क्षियतेर्निवासकर्मणो नियता मीमयद्गौः शब्दं करोति मीमयतिः शब्दकर्मा ततो वयः प्रपतन्ति पुरुषानदनाय विरिति शकुनिनाम वेतेर्गतिकर्मणोऽथापीषुनामेह भवत्ये-तस्मादेवादित्योऽपि गौरुच्यते। उताद: परुषे गवि। पर्ववतीति[5] भास्वतीत्यौपमन्यवोऽथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते तदेतेनोपेक्षितव्यमादित्यतोऽस्य दीप्तिर्भव-तीति। सुषुम्णः[6] सूर्यरश्मिश्चन्द्रमा गन्धर्व इत्यपि निगमो भवति। सोऽपि गौरुच्यते। अत्राह गोरमन्वतेति तदुप-रिष्टाद्व्याख्यास्यामः सर्वेऽपि रश्मयो गाव उच्यन्ते ॥ ६[7] ॥

---

[8] वृक्षेवृक्षे नियता मीमयद्गौस्ततो वयः प्र पतान्पूरुषादः। अथेदं विश्वं भुवनं भयात इन्द्राय सुन्वदृषये च शिक्षत्'

ज्यार्थे प्रयोगः [ऋ० सं० १० । २७ । २२] । वसुक्र-स्येन्द्रपुत्रस्येयमार्षम् । त्रिष्टुबैन्द्री । महाव्रते मरुत्वतीये शस्यते [ऐ० आ० ५ । १ । १]। इन्द्रो भगवानैश्वर्ययोगा-त्संग्रामेष्वनेकबाहुर्भूत्वानेकानि धनूंष्यादत्ते[9]। तानि मन्त्रदृग्दृष्ट्वैवमाह। वृक्षेवृक्षे

---

१ घ. ट. गौरित्युच्यते. २ ग. ज. गौरन्यद्द्रव्य°; घ. ट. गोरन्य°; ठ. ड. गोरन्यतद्द्रव्य°. ३ क. ख. १; ग. ८; घ. ट. च. ज. अङ्को नास्ति; ठ. ड. इति निरुक्तव्याख्यायां २ ध्याये ५ खण्डः. ४ क. ख. छ. त. द. 'वृत्वा क्षां००० कर्मणो' इति नास्ति. ५ छ. त. द. पर्ववती°. ६ क. ख. छ. त. द. सुषुम्णः°. ७ क. ख. द. २; छ. त. ९. ८ ग. वृक्षेवृक्षे० । अथेदं विश्वं भुवनं० शिक्षत् ॥ ॥ ३ ॥ वसु°. ९ च. °ष्याधत्ते.

वृक्षावयवे धनुषि धनुषि । यावन्तीन्द्रेण गृहीतानि धनूंषि तेषु सर्वेषु प्रत्येकं नियता[1] निबद्धा गौः गव्या गमयित्री वा शराणामिन्द्रबाह्वाकृष्टा मीमयत् मीमयति शब्दं करोति । जात्यभिप्रायेणैकवचनम् । ततः शब्दकरणानन्तरमेव प्रपतन्ति वयः । अथवा ततः[2] ततो धनुषो वयः पक्ष्यवयवपत्रसंबन्धादिषवो वयः पक्षिणः । अथवा वेतेर्गतिकर्मणः । साक्षादेव इषवो वयो न गुणवृत्त्या । तेन[3] प्रपतान्प्रपतान्ति पुरुषानदनाय भक्षणाय । ते हि शत्रूणां प्राणान्भक्षयन्ति । अथायमेवमतिप्रभाव इन्द्र इति ज्ञात्वा विश्वं सर्वं भुवनं भूतजातं यावत्किंचिदधिकृतं कर्मणि भयाते बिभेति । अथ बिभ्यत्किं करोति । इन्द्राय इन्द्रार्थं सुन्वत् अभिषवमुचिते काले कुर्वत् ऋषये च ऋत्विजे शिक्षत् दाक्षिणां ददत्[4] इन्द्रोन्मुखमादरवदास्ते सर्वमन्यत्परिहाय[5] । य एवंप्रभाव इन्द्रस्तं वयमभिप्रेतार्थसिद्धये स्तुमः ।

निगमप्रसक्तं निराह ‘ वृक्षो व्रश्चनात् ’ इति । स हि वृश्च्यते छिद्यत इन्धनार्थम् । मन्त्रव्याख्याने गतार्थत्वान्न शेषो विव्रियते । एवं तावदेकदेशे कृत्स्नवदभिधानं भवतीति प्रदर्शितम् ।

अथेदानीमन्येष्वर्थान्तरेषु गोशब्दोऽभिप्रसृतो बहुष्वित्येतत्प्रसङ्गतो दर्शयति । एतद्ध्यैकपदिके वक्तव्यमिह तु गोशब्दप्रसक्तमुच्यते । नआदित्योऽपि गौरुच्यते’ एतस्मिन्मन्त्रे । उताद[6]ः परुषे गवि सूरश्चक्रं हिरण्ययम् । न्यैरयद्रथीतमः [ऋ० सं० ६ । ५६ । ३] भरद्वाजस्येयमार्षम् । गायत्री । पौष्णे सूक्ते । पूषा पुनरादित्यो नैरुक्तानां दृष्ट्या । अन्यत्र ‘इयं वै पूषा’ [मै०सं० २ । ५ । ५ ॥ ३ । ७ । ६ । काठ०सं० ७ । ९] इति भूमिरुच्यते । उतादः । उत अपि अथ इति च्छन्दसि समानार्थाः । अपि चक्रमीरयत्यपि[7] रसानादत्तेऽपि आदित्यार्थे प्रयोगः तमांस्यपहन्ति । अदः अमुष्मिन्नादित्यमण्डले परुषे पर्ववति । अहोरात्रादिपर्वभिस्तद्वति[8] । अथवा भास्वति । भासा तद्वतीत्यौपमन्यवः[9] । गवि गमनशीले मुहूर्तमप्यनवस्था-

१ घ. ट. ठ. ड. नियतानिबद्धानि गौ°. २ ठ. ड. ‘ ततः ’ सकृदेव. ३ क. ख. ते; च. ‘ तेन ’ नास्ति. ४ ग. ज. घ. ठ. ड. ददाति; ट. ददाति° दत्. ५ ठ. ड. °त्परिहाराय. ६ घ. ट. उतादः । रथीतमः । भर°. ७ घ. ट. °मीरययदपि°; ठ. ड. °मीरयदपि°. ८ घ. ट. ठ. ड. °रात्रादिभिस्तद्वति. ९ क. ख. घ. ट. ठ. ड. भासा तद्वतीति । अहोरात्रादिपर्ववतीत्यौ°.

यिनि सूरः सूर्योऽवस्थितः पूषा आदित्यमण्डलान्तःपुरुषस्तदेव पर्ववद्वास्वद्वा चक्रं चकनं क्रमणं वा गमनशीलं मण्डलं हिरण्ययं[1] हिरण्मयं[2] तेजोमयं चक्रं चक्राकृति न्यैरयत् । नियतगगनवृत्तिना[3] मार्गेण नित्यकालमीरयत्युदयास्तमयमध्यंदिनकालोपलक्षणार्थम् । अथवामुष्मिन्मण्डलेऽवस्थितः[4] पर्ववति मण्डलान्तःपुरुषः सूर्यो भगवान् चक्रं क्षणलवनिमेषत्रुटिमुहूर्ताहोरात्रार्धमासमासर्त्वयनसंवत्सरलक्षणं[5] कालचक्रं सर्वभूतहारि हिरण्मयं हैरण्मयं[6] सर्वभूतस्थितिविनाशहेतुं[7][8] न्यैरयत् नित्यमीरयति । कीदृशः पुनः स सूर्यो य ईरयति । रथीतमः । अन्येऽपि रथिनः सन्ति । अयं तु मुहूर्तमप्यनवस्थितरथ इत्यतो रथीतमः । य एवंगुणयुक्तः पूषा तं वयमभिप्रेतार्थसिद्धये स्तुमः ।

आदित्याच्चन्द्रमसो दीप्तिः

‘ अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते ’ । एको रश्मिरादित्यस्य सुषुम्नो[9] नाम चन्द्रमसि प्रत्यवस्थितो दीप्यते । ‘ तदेतेन ’ मन्त्रार्थविदा मन्त्रानुपेत्य ‘ ईक्षितव्यं ’ द्रष्टव्यम् । येयमस्य चन्द्रमसो ‘ दीप्तिः ’ ज्योत्स्ना इयमादित्यरश्म्यनुग्रहादेव ‘ अस्य भवति ’ । अम्मयं[10] हि चन्द्रमसो मण्डलं तत्तेजःसंबन्धाद्दीप्तिमद्भवति । ततः सर्वा दिशः प्रकाशयति । यथा चैतदेवं तथा ‘ सुषुम्नः[11] सूर्यरश्मिश्चन्द्रमा गन्धर्व इत्यपि निगमो भवति ’ । सुषुम्णः[12] सूर्यरश्मिश्चन्द्रमा गन्धर्वस्तस्य नक्षत्राण्यप्सरसो भेकुरयो नाम ।

तदभिवादिनी ऋक् स न इदं ब्रह्म क्षत्रं पातु तस्मै स्वाहा वाट् ताभ्यः स्वाहा [य० वा० सं० १८।४०]॥

राष्ट्रभृत्सु[13] [शत० ब्रा० ९ । ४ । १ ॥ कात्या० श्रौ० १८।५।१६]।

---

१ ग. ज. ‘ हिरण्ययं ’ नास्ति. २ क. ख. ठ. ड. ‘हिरणमयं’ नास्ति. ३ क. ख. घ. ट. ठ. ड. °गमनवृत्ति°. ४ घ. ट. ठ. ड. लेऽनवस्थितः. ५ क. ख. घ. झ. ट. ठ. ड. लवक्षणनिमे°. ६ ग. ज. हिरणमयं; घ. ट. ठ. ड. हिरण्यमयं. ७ क. ख. ग. ज. घ. ट. ठ. ड. °भूतविनाशस्थितिहे°. ८ ग. ज. घ. ट. ठ. ड. °हेतु. ९ क. ख. ग. च. ज. सुषुम्णो. १० क. ख. असमदुपरि यच्च°; ग. च. ज. अब्मयं; ठ. ड. अस्मयं. ११ क. ख. ग. घ. ज. सुषुम्णः. १२ घ. ट. सुषुम्नः; ग. च. ज. ठ. ड. मन्त्रो न पठ्यते. १३ घ. ट. ठ. ड. °भृत्सु हस्तग्रहहोमे अप्य°.

अप्यग्रमप्यन्ये बहव इत्यपिशब्दः । सुषुम्नः[1] सुष्ठुसुख[2] इत्यर्थः । सर्व[3]भूतानि नित्यमसौ ह्लादयति । कोऽसाविति । सूर्यरश्मिः सूर्यान्निःसृत्य[4] चन्द्रमसं प्रति गतः । चन्द्रमाः गन्धर्वः । सति सुषुम्न[5]गमने गोशब्दवाच्यता । तस्य[6] गोमतश्चन्द्रो धारयिता गन्धर्वः । स हि तस्य प्रतिष्ठा । स न इदं सोऽस्माकमिदं[7] ब्रह्म क्षत्रं च पातु रक्षतु । किं च तस्मै सुषुम्नाय[8] सूर्यरश्मये स्वाहा शोभन[9]मिदमाभिमुख्येनाहं[10] हविराज्यलक्षणमस्तु । स चेदं वाट् वेतु पिबत्वित्यर्थः ।

सुषुम्णाख्यरश्मेः गौरिति नाम

'सोऽपि' सुषुम्णो रश्मिरेक एव 'गौः' इति 'उच्यते' । यथासौ गौस्तथेदमुदाहरणम् ' अत्राह गोरमन्वतेति ' । ' तत् ' पुनरेतत् ' उपरिष्टात् ' ऐकपदिके ' व्याख्यास्यामः ' [निरु० ४।२५]। ' सर्वेऽपि रश्मयो गाव उच्यन्ते ' । यथैतदेवं तथैव[11]मृगुदा[12]ह्रियते[13] ॥ ६ ॥

ता वां वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृङ्गा अयासः । अत्राह तदुरुगायस्य वृष्णः परमं पदमव भाति भूरि [ऋ० सं० १ । १५४ । ६] । तानि वां वास्तूनि कामयामहे गमनाय यत्र गावो भूरिशृङ्गा[14] बहु-

---

१ क. ख. ग. ज. ठ. ड. सुषुम्णः. २ ग. च. ज. ठ. सुष्टुसुख; घ. ट. ड. सुष्ठुसुम्नः सुष्ठुसुख°. ३ क. ख. घ. ट. ठ. ड. सर्वाणि भूता°. ४ च. ज. निसृत्य; घ. ट. ' निःसृत्य ' इत्यस्य पश्चात्सर्वा ऋग्दीयते. ५ क. ख. च. ज. सुषुम्णग°; ग. ' सति... धारयिता गन्धर्वः ' नास्ति. ६ क. ख. घ. ज. ट. ठ. ड. तस्य गन्धर्वस्य सतश्चन्द्रो°. ७ घ. ट. 'सोऽस्माकमिदं' नास्ति. ८ क. ख. ग. ज. सुषुम्णाय. ९ क. ख. घ. ट. °स्वाहा सु शोभन°. १० क. ख. घ. ट. ठ. ड. °नाह । हवि°. ११ घ. तथैवमृ° ट. तथैवमृ° थेय. १२ क. ख. ग. घ. ज. °दाहरणम् ; ट. दाहरणं° ह्रियते. १३ ग. ९; घ. ट. च. ज. अङ्को नास्ति; ठ. ड. °ह्रियते । इति नैरुक्तव्याख्यायां २ ध्याये षष्ठः खण्डः. १४ क. ख. छ. त. द. 'भूरिशृङ्गा' नास्ति.

शृङ्गा भूरीति बहुनो नामधेयं प्रभवतीति सतः शृङ्गं श्रयतेर्वा शृणातेर्वा शम्नातेर्वा शरणायोद्गतमिति वा शिरसो निर्गतमिति वायासोऽयनास्तत्र तदुरुगायस्य विष्णोर्महागतेः परमं पदं परार्ध्यस्थमवभाति भूरि पादः पद्यतेस्तन्निधानात्पदं पशुपादप्रकृतिः प्रभागपादः प्रभागपादसामान्यादितराणि पदान्येवमन्येषामपि सत्त्वानां संदेहा विद्यन्ते तानि चेत्समानकर्माणि समाननिर्वचनानि नानाकर्माणि चेन्नानानिर्वचनानि यथार्थं निर्वक्तव्यानीतीमान्येकविंशतिः पृथिवीनामधेयान्यनुक्रान्तानि तत्र निर्ऋतिर्निरमणादृच्छतेः कृच्छ्रापत्तिरितरा सा पृथिव्या संदिह्यते तयोर्विभागस्तस्या एषा भवति ॥ ७[1] ॥

ता वां वास्तूनीति[2] । दीर्घतमस आर्षम् । वैष्णवी । त्रिष्टुप् । यूपावर्धाने[3] विनियुक्ता [आप० श्रौ० ७ । १० । ७] सोमातिरेके[4]शस्त्रे [आश्व० श्रौ० ६ । ७] च । वामिति दम्पती अभिप्रेत्य द्विवचनम् ।

रश्म्यर्थे गोशब्दस्य प्रयोगः

तानि युवाभ्यामर्थाय वास्तूनि[5] निवासस्थानानि उश्मसि कामयामहे गमध्यै गमनाय यत्र येषु स्थानेषु । किम् । गावो रश्मयो भूरिशृङ्गा बहुदीप्ता अयासः अयना मुहूर्तमप्यनवस्थायिनः । किंच । अत्राह तेषु[6] स्थानेषु तत्पदमुरुगायस्योरुगमनस्य महागतेर्भगवतो विष्णोः परमं पदमादित्यमण्डल[7]स्थानम् । स्थाने हि पदसंज्ञा । पदस्थ इति लोकेऽपि[8] वक्तारो भवन्ति । अवभाति अर्वागिदं सर्वं कृत्वा भाति दीप्यते । भूरि बह्वित्यर्थः । इति समस्तार्थः ।

अर्थैकपदनिरुक्तम् । ‘ भूरीति ’ एतत् ‘ बहुनो नामधेयम् ’ । ‘ प्रभवति ’ हि तद्बहुधापि दीयमानम् । ‘ शृङ्गं श्रयतेः ’ । तद्ध्याश्रितं भवति शिरसि । ‘ शृणातेर्वा ’ हिंसार्थस्य [धा० ९ । १६] । तेन हि हिनस्ति । ‘शिरसो निर्गतमिति वा’ शृङ्गम् । परमेऽर्धे स्थितं परार्ध्यस्थम् ।

---

१ क. ख. द. ३; छ. त. १०. २ घ. ट. ‘ इति ’ नास्ति. ३ घ. ट. ठ. ड. °धानविनि.° ४ च. °तिरिक्तशस्त्रे°; ठ. ड. °तिरेके शस्त्रे°. ५ ग. ज. वास्तूनि इति निवास°. ६ ग. स्थानेषु तेषु. ७ क. ख. घ. ट. ठ. ड. मण्डलं स्थानं स्थाने हि°; ग. ज. °मण्डलस्थाने हि. ८ च. ‘ अपि ’ नास्ति.

अथवा परमर्यद्धर्या[1] युक्ते स्थाने स्थितं परार्ध्यस्थम्[2]। 'पादः पद्यतेः' गत्यर्थस्य [धा० ४। ६३]। पद्यते हि तेन। 'तन्निधानात्पदं' यदुत्पद्यते तत्सरूपमेव पांसावन्यत्र वा तत्पदमित्युच्यते पशोर्मनुष्यस्य वा। 'पशुपादप्रकृतिः' चतुर्भागसामान्यात् 'प्रभागपादः' दीनारादिपादः। 'प्रभागपादसामान्यादितराणि' ग्रन्थपदानि क्षेत्रपदानि वा। विभागो हि तेष्वपि समान एव। प्रसक्तानुप्रसक्तमिदमुक्तम्।

संदेहपदानां निर्वचनप्रकारः

अधुनोपसंहरति। 'एवमन्येषामपि सत्त्वानां' यानि नामानि तेषु 'संदेहा विद्यन्ते' न केवलं गोशब्दे पदशब्दे वा। तेषु[3] त्वेतदौत्सर्गिकं निर्वचनलक्षणं द्रष्टव्यम्। 'तानि' यदि सामान्यक्रियया युक्तानि ततः 'समाननिर्वचनानि' एव कर्तव्यानि। अथ पुनः 'नानाकर्माणि' ततो 'नानानिर्वचनानि'। एवं 'यथार्थं निर्वक्तव्यानीति'।

अधुनैवमुक्त्वोदाहरणैरेव तत्र संदेहपदान्यनुक्रम्य मन्त्रेष्वेव दर्शयन्नाह। 'इमान्येकविंशतिः पृथिवीनामधेयान्यनुक्रान्तानि'। 'तत्र निर्ऋतिर्निरमणादृच्छतेः कृच्छ्रापत्तिरितरा'। लोकेषु हीदं सर्वं[4] भूतजातमन्तर्भूतं यदभिधानानि यदाश्रयक्रियावचनाश्च शब्दा निघण्टव उच्यन्ते। तेषां च पृथिवी प्रथमा। तस्मात्तत आरम्भः। एकविंशतिरिति संख्या। पृथिवीनामधेयानि। स्वार्थे धेयप्रत्ययः। नामैव नामधेयम्। अनुक्रान्तानि आनुपूर्व्येण पठितानीत्यर्थः। एकविंशतिर्यान्यनुक्रान्तान्येभ्योऽन्यान्यपि यानि कानिचित्स्युस्तान्युपलभ्य निर्वक्तव्यानि। तद्यथा कु इत्येतदसमाम्नातं पृथिव्या नामधेयम्। उक्तं हि 'नाग्निचिन्नरकं याति न सद्वादी[5] न कुप्रदः' इति। तत्रैतस्मिन्नेकविंशके[6] नामगणे 'निर्ऋतिः' इत्येतदभिधानं

'निर्ऋतिः' इत्येतस्य संदेहपदस्य निर्वचनम्

'निरमणात्'। निविष्टानि रमन्तेऽस्यां भूतानीति निर्ऋतिः पृथिवी रमेर्धातोः। 'ऋच्छतेः इतरा कृच्छ्रापत्तिः' दुःखसंज्ञिका[7]। निर्ऋतिः पाप्मा। 'सा' पुनरियं समाननामधेयत्वादसमानश्रुतित्वात्[8] 'पृथिव्या संदिह्यते'।

१ च. परमयाद्धर्या. २ च. ज. परार्द्धस्थं; ठ. ड. परार्ध्यस्य. ३ क. ख. ग. ट. ठ. ड. तेषु हि त्वेत°. ४ क. ख. घ. सर्वभूत°. ५ क. ख. ग. ठ ड. सत्पुत्रो; ट. सत्पुत्रो° हादी. ६ ग. ट. ठ. ड. एकविंशतिके. ७ क, ख. घ. ट. ठ. ड. °संज्ञका ८ च. °श्रुतत्वात्.

'तयोः' समाननामधेयत्वे[1] सत्येव कर्मकृतो भेदो 'विभागः'। एका निविष्टानां भूतानां रमयित्री । एका पुनः कृच्छ्रमापादयित्री । एवं नानाकर्माण्यभिधानानि निर्वक्तव्यानि ।

'तस्याः' कृच्छ्रापत्तेः पृथिव्या[2] 'एषा' निर्वाचिका ऋक् 'भवति'[3] ॥ ७ ॥

य ईं चकार न सो अस्य वेद य ईं ददर्श हिरुगिन्नु तस्मात् । स मातुर्योना परिवीतो अन्तर्बहुप्रजा निर्ऋतिमाविवेश (ऋ० सं० १ । १६४ । ३२) ॥ बहुप्रजाः कृच्छ्रमापद्यत इति परिव्राजका वर्षकर्मेति नैरुक्ता य ईं चकारेति करोतिकिरती संदिग्धौ वर्षकर्मणा न सोऽस्य[4] वेद मध्यमः स एवास्य वेद मध्यमो यो ददर्शादित्योपहितं स मातुर्योनौ मातान्तरिक्षं निर्मीयन्तेऽस्मिन् भूतानि योनिरन्तरिक्षं महानवयवः परिवीतो वायुनायमपीतरो योनिरेतस्मादेव परियुतो भवति बहुप्रजा भूमिमापद्यते वर्षकर्मणा शाकपूणिः संकल्पयांचक्रे सर्वा देवता जानामीति तस्मै देवतोभयलिङ्गा प्रादुर्बभूव तां न जज्ञे तां पप्रच्छ विविदिषाणि त्वेति सास्मा एतामृचमादिदेशैषा मद्देवतेति[5] ॥ ८ ॥

य ईं चकारेति । दीर्घतमस आर्षम् । त्रिष्टुप् । महाव्रते वैश्वदेवे शस्त्रे शस्यते [ऐ० आ० ५ । ३ । २] । 'अयं स शिङ्क्ते' [ऋ० सं० १ । १६४ । २९] इतीयमप्यनयैव समानार्षविनियोगा । जगती । द्वे अप्येते अस्यवामीये । कश्चित् । बह्वपत्यो दरिद्रः पुरुषः । स दुष्पोषत्वादपत्यानां व्यापन्नत्वाद्दुःखं 'कृच्छ्रमापद्यते'। सा या तस्य कृच्छ्रापत्तिः सैवैतस्यामृचि निर्ऋतिशब्देनोच्यते 'इति' एष परिव्राजका-

---

१ क. ख. घ. ट. ठ. ड. °धेयत्वेऽपि सत्येष कर्म°. २ क. ख. घ. ट. ठ. ड. पृथिव्या अपि एषा°. ३ क. ख. ३; घ. ट. च. ज. अङ्को नास्ति; ठ. ड. भवति इति निरुक्तव्याख्यायां २ ध्याये सप्तमः खण्डः. ४ क. ख. छ. त. द. सो अस्य. ५ क. ख. द. ४; छ. त. ११.

नामस्यामृचि संक्षेपार्थः । स एष विस्तरेण प्रदर्श्यते । यः करोति गर्भं न सोऽस्य गर्भस्य तत्त्वं 'वेद'। केवलं त्वसौ कामार्तः पुत्रार्थी वा करोत्येव गर्भम् । य ईं ददर्श यश्चैनं पश्यति हिरुग् अन्तर्हितमेतस्मिन् जठरे एतस्मिन् वा शरीरे जन्तुं तस्मात्तस्यैव एष गर्भो याथात्म्यतः प्रत्यक्षो भवत्यध्यात्मशास्त्रदृष्ट्या नेतरस्य गर्भकर्तुः। स पुनरेवं[1] गर्भो मातुर्योनौ गर्भाशयस्थाने अन्तः उदरे पुष्यति स मातुरशितपीतलीढभक्षितेन चतुर्विधाहारेण[2] । ततः परिवीतो जरायुणा परिवेष्टितो यथाकालं जायते । अथैवं बहुशः प्रजायमानः स गर्भकर्ता गर्भतत्त्वमजानानो निर्ऋतिं दुःखमाविवेश आविशतीत्यर्थः । एवं गर्भतत्त्वापरिज्ञानाद्यो गर्भं करोति स दुःखमापद्यते । यस्त्वध्यात्मदृष्ट्या गर्भतत्त्वं वेद स गर्भकर्मणो निवर्तते । स निर्ऋतिं नापद्यते । एवमस्यामृचि निर्ऋतिर्देवतेत्येष परिव्राजकार्थः । अन्ये तु ब्रुवते । यः करोति गर्भं स गर्भभूतो जन्मान्तरेषु बहुषु प्रजायमानो जन्ममरणसंतानानुबद्धां[3] निर्ऋतिमाविशति । यो रेतः सिञ्चति तद्भूयो[4] भूयो जन्मान्तरेषु बहुशः प्रजायमानो जन्ममरणसंतानाननुभवतीत्युक्तम्[5] ।

तत्पदस्योदाहरणम्

ऋचो गर्भाधानार्थे निर्ऋतिशब्दस्य दुःखमित्यर्थः

'वर्षकर्मेति नैरुक्ताः'। वर्षकर्मैतदुच्यते निर्ऋतिश्चात्र भूमिरुच्यत एवं नैरुक्ता मन्यन्ते । यः करोति वर्षं यो वा किरति क्षिपति । कः पुनरसौ । मेघः । स हि वर्षस्य कर्ता विक्षेप्ता वा । मेघाद्धि वर्षं प्रवर्तते । किं तस्य । न सोऽस्य वर्षस्य तत्त्वं वेद कुतोऽप्येतदुदकं मय्यागच्छति यन्मया विसृज्यते किं वोदकस्य तत्त्वमिति । केवलं त्वसौ विसृजत एवोदकम् । य ईं ददर्श य एव पश्यत्येतद्वर्षं हिरुगिन्नु तस्मादन्तर्हितमन्तरिक्षलोके तस्मात्तस्येत्यर्थः । तस्यैव प्रत्यक्षं तद्याथात्म्यतो वर्षं नेतरस्य मेघस्य मध्यस्थानस्य । स एव ह्यस्य वर्षस्य सतत्त्वं[6] वेद यो ददर्श यः

वर्षार्थे पृथिवीत्यर्थः

१ क. ख. घ. ट. पुनरेष; ग. ज. पुनरेवं. २ क. ख. °हारपरिणामे ततः°; घ. ट. ठ. ड. °हारपरिणामेन ततः°. ३ क. ख. °नुभवविद्धां; घ. °नुविद्धां; ट. °नुविद्धां° ब. ४ ग. ज. तद्भूय एवं भवतीत्युक्तम् । वर्ष°; च. तद्भूय एव यो भूयो ज°. ५ घ. ट. ठ. ड. संतानान्यनुभ°. ६ ग. ज. सतत्त्व°. ७ घ. ट. ठ. ड. तत्त्वं.

पश्यस्यादित्यरश्म्यन्तर्गतं वर्षमनभिव्यक्तम् । कश्चासौ । इन्द्रः । असावपि हि मध्यम एव । तत इदमुक्तं 'न सोऽस्य वेद मध्यमः' मेघः 'स एवास्य वेद मध्यमः' इन्द्र इति । स एव महानुदकसंस्त्याय इन्द्रप्रत्यक्षो मातुरन्तरिक्षलोकस्योदकाभिव्यक्त्याशयस्थाने परिवीतः परिवेष्टितः सौर्येण रश्मिजालेन वायुना च मेघोदरान्तर्गतः प्रावृट्काले वर्षभावेनाभिव्यक्तो बहुप्रजा बहुशः प्रजायमानो निर्ऋतिं भूमिमाविशतीति समस्तार्थः ।

अथैकपदनिरुक्तम् । 'करोतिकिरती संदिग्धौ' धातू 'वर्षकर्मणा' संबध्येते । उभयथापि ह्युपपद्यते यः करोति यो वा क्षिपति । 'मातान्तरिक्षम्' । एतस्मिन् हि 'भूतानि निर्मीयन्ते' । एतद्ध्यवकाशदानेन विशिष्टमुपकारं करोति भूतानां जायमानानाम् । 'योनिरन्तरिक्षम्' । आकाशस्यैव प्रदेशविशेषः कश्चित् । स वायुसंयुतः सन्नुदकयोनिभावं पुष्णाति । तदेतत् 'वायुना' तस्य संयवनं दृष्ट्वोक्तं 'परियुतो भवति' इति । शब्दसारूप्यप्रसक्तमुच्यते । 'अयमपीतरः' स्त्रीयोनिः 'एतस्मादेव' । असावपि 'परियुतः' एव 'भवति' स्नाव्ना मांसेन च ।

एवमेतस्मिन्मन्त्रे नैरुक्तानां निर्ऋतिशब्देन भूमिरुच्यते परिव्राजकानां कृच्छ्रापत्तिः । तदेवं मन्त्रेषु शब्दगतिविभुत्वादुभयमप्युपपद्यत एव । तद्यथा । 'दधिक्राव्णो अकारिषम्' [ऋ० सं० ४ । ३९ । ६] इत्येष मन्त्रोऽग्न्युपस्थानेऽग्निहोत्रे [मैत्रा० सं० १ । ५ । ६] । अयमेव चाग्निष्टोमे 'दधिक्राव्णो अकारिषमित्याग्नीध्रे भक्षयन्ति' [आश्व० सू० १२ । १२] इति दधिभक्षणे । तथा चाश्वमेधे 'दधिक्राव्णो अकारिषमित्युत्थितायां सर्वा जपन्ति' इत्यश्वसंनिधावेतं पत्न्यो जपन्ति महिष्यामुत्थितायाम् । तत्रैवं सति प्रतिविनियोगमस्यान्येनान्येनार्थेन भवितव्यम् । त एते वक्तुरभिप्रायवशादर्थान्यत्वमपि भजन्ते मन्त्राः । न ह्येतेष्वर्थस्येयत्तावधारण-

शब्दगतिविभुत्वादृचां विविधार्था विविधविनियोगाश्च.

१ क. ख. घ. ट. ठ. ड. °दित्यस्य र°; क. ख. अन्तर्गतः. २ घ. ठ. ड. °सौ अन्तर्गत इन्द्रः; ठ. °सौ अन्तर्गतं वेदः इन्द्रः. ३ ग. ज. रश्मिजातेन वायु°. ४ ठ. ड. 'तदेतत्..........मुच्यते' नास्ति. ५ ग. ज. कृत्स्नापत्तिः. ६ च. अकार्षं. ७ ग. च ज. अकार्षं. ८ क. ख. घ. ट. ठ. ड. °ग्नीध्रे दधि भक्ष°. ९ ग. ज. °मित्युत्थायां. १० क. ख. घ. ट. ठ. ड. 'अन्येन' सकृदेव.

मस्ति। महार्था ह्येते दुष्परिज्ञानाश्च। यथाश्वारोहवैशेष्याद[1]श्वः साधुः साधुतरश्च वहत्येव[2]मेते वक्तृवैशेष्यात्साधून्साधुतरांश्चार्थान्स्रवन्ति। तत्रैवं सति लक्षणोद्देश[3]मात्रमेवैतस्मिञ्छास्त्रे निर्वचनमेकैकस्य क्रियते। क्वचिच्चाध्यात्माधिदैवाधियज्ञोपदर्शनार्थम्। तस्मादेतेषु यावन्तोऽर्था उपपद्येरन्नधिदैवाध्यात्माधियज्ञाश्रयाः सर्व एव ते[4] योज्याः। नात्रापरोधो[5]ऽस्ति।

शाकपूणेर्ज्ञानगर्वोक्तिः

एवमेव संदेहाधि[6]कारमुपजीवन्नाह। 'शाकपूणिः संकल्पयांचक्रे सर्वा देवता जानामीति[7]'। शाकानि यः पूणयति संहन्ति स शाकपूणः। तस्यापत्यं शाकपूणिराचार्यः। स संकल्पयाचक्रे संकल्पं कृतवान्। किमिति। सर्वा देवता जानामीति। 'तस्मै' संकल्पमेवं कृतवते 'देवतोभयालिङ्गा' द्विलिङ्गा[8] स्त्रीपुंलिङ्गाथवा मध्यस्थानलिङ्गा द्युस्थानलिङ्गा च 'प्रादुर्बभूव' प्रादुर्भूतवती[9]। 'तां' पुरतोऽवस्थितां सतीं 'न जज्ञे' न ज्ञातवान् किमियं स्त्री स्यादथवा पुरुष इत्यथवा किमयमन्त[10]रिक्षस्थानाथवा द्युस्थानेति। 'ताम्' अजानन् 'पप्रच्छ विविदिषाणि' वेदितुमिच्छामि त्वां किमसि पुरुषोऽथवा स्त्रीत्यथवा किमस्यन्तारिक्षस्थानाथवा द्युस्थानेति। 'सा' एवं पृष्टा सती 'अस्मै' शाकपूणये 'एतामृचमादिदेश' आदिष्टवती[11]। किमिति।

अस्यामृचि का देवतेत्याह्वानम्

'एषा मद्देवतेति'। अस्यामृच्यहं देवतेति त्वं च नैरुक्तो माभेतस्या[12] ऋचः सकाशादर्थगे[13]त्यावधारयेति। कतमा पुनरसावृगिति। उच्यते[14] ॥ ८ ॥

---

१ क. ख. घ. ट. ठ. ड. °वैशिष्ट्याद्°. २ च. 'वहति' नास्ति. ३ घ. °देशमात्रेवैत°; ट. °देशमात्रैवैत° त्रमे. ४ ग. ज. 'ते' नास्ति. ५ ग. च. ज. °परोधो°. ६ घ. ट. ठ. ड. संदेहाविकार°. ७ च. जानामीति° नी. ८ क. ख. 'द्विलिङ्गा' नास्ति; घ. ट. ठ. ड. 'द्विलिङ्गा स्त्रीपुंलिङ्गा' एतत् 'मध्यस्थानालिङ्गा' इत्यस्य पश्चाद्वर्तते. ९ क. ख. घ. 'प्रादुर्भूतवती' नास्ति; ट. °भूव तां° प्रादुर्भूतवती. १० क. ख. ग. ज. घ. ट. ठ. ड. किमियं मध्यस्थाना°. ११ ग. ज. °देश सा आदि°. १२ घ. ट. °भेनस्या°. १३ क. ख. घ. ट. ठ. ड. °दर्थावगत्या°.
१८ १४ क. ख. ४; ग. ११; घ. झ. ट. ठ. ड. च. ज. अङ्को नास्ति.

अयं स शिङ्क्ते येन गौरभीवृता मिमाति मायुं ध्वसनावधि श्रिता । सा चित्तिभिर्नि हि चकार मर्त्यं विद्युद्भवन्ती प्रति वव्रिमौहत [ऋ० सं० १ । १६४ । २९] ॥ अयं स शब्दायते येन गौरभिप्रवृत्ता मिमाति मायुं शब्दं करोति मायुमिवादित्यमिति वा वागेषा माध्यमिका ध्वंसने मेघेऽधिश्रिता सा चित्तिभिः कर्मभिर्नीचैर्निकरोति[1] मर्त्यं विद्युद्भवन्ती प्रत्यूहते वव्रिं वव्रिरिति रूपनाम वृणोतीति[2] सतो वर्षेण प्रच्छाद्य पृथिवीं तत्पुनरादत्ते ॥ ९ ॥

इति[3] द्वितीयाध्यायस्य द्वितीयः पादः ।

अयं स शिङ्क्त इति । अयं स मेघः शब्दायते शब्दमिव करोति । न च तावदसौ शब्दं करोति । अयं[4] च तावन्माध्यमिकायां वाचि तत्स्थायां शब्दं कुर्वत्यां तत्साहचर्याद्विज्ञायते स एव शब्दं करोतीति । येन मेघेन किं कृतमिति । येन गौरभीवृता । येन माध्यमिका वागभिप्रच्छादिता सती मिमाति मायुं निर्मिमीते निर्वर्तयति मायुम् । शब्दं करोतीत्यर्थः । ' मायुः काकुत् ' इति च वाङ्नामसु पठितम् [निघ० १ । ११] । अथवा मायुरादित्यो भवति सर्वभूतनिर्माता । तमिवात्मानं निर्मिमीते । क्वावस्थिता । ध्वंसने । उदकध्वंसने उदकस्रंसने मेघेऽध्याश्रिता । अयं तावदर्धर्चो मेघान्तर्वर्तिन्या वाचोऽनभिव्यक्तविद्युद्रूपाया अभिधायकः । मेघरूपत्वात्पुरुषत्वाभिप्रायः । अथ चायमुत्तरः स्त्रीत्वाभिप्रायः । यैवंलक्षणा वाग्मेघरूपा मेघशरीरा वा[5] सा चित्तिभिः स्वैश्चटचटाशब्दकर्मभिः[6] नि हि चकार नीचैः

एकस्मिन् पक्षे प्रथमोऽर्धर्चोऽव्यक्तविद्युद्रूपाया वाचोऽभिधायकः । मेघस्य प्राधान्यात्पुरुषत्वाभिप्रायः

---

१ क. ख. छ. त. द. 'कर्मभिर्नीचै.' नास्ति. २ क. ख. द. ५; छ. त. १२. ३ ङ. थ. घ. ठ. ड. 'इति...पादः' नास्ति; छ. इति द्वितीयः पादः. ४ च. अथ. ५ क. ख. घ. ट. ठ. ड. वार्य. ६ च. स्वैश्च चट°.

करोति मर्त्यं मनुष्यम्। सर्वो हि विभ्यत्तस्या आसीदित्यवनमति वा। कदा पुनर्निकरोति मर्त्यमिति। उच्यते। विद्युद्भवन्तीति। विद्युदात्मना स्त्र्याख्येनाभिनिर्वर्तमाना। तदा हि दारुणश्चटचटाशब्दो भवतीति विशेषेण भयंकरो न तथा विद्युद्रहितः। सैवमात्मानमाविष्कृत्य विद्युद्रूपेण विक्षिप्य सर्वासु दिक्ष्वात्मानं वर्षेण प्रच्छाद्य पृथिवीं ततो वर्षव्युपरमे प्रत्यूहते वव्रिं प्रत्युपसंहरति रूपमात्मीयम्। अदृश्यं करोतीत्यर्थः। 'वव्रिरिति रूपनाम.'। तेध्यावृत्य स्वमाश्रयं वर्तते। यस्मिन्पक्षे मध्यस्थानलिङ्गा द्युस्थानलिङ्गा वेति तस्मिन्पक्षे मेघरूपत्वमविवक्षितमत्र वाचो विद्युद्रूपत्वं च। किं त्वेतावीद्विवक्षितम्। मेघाश्रया शब्दवती भूत्वा माध्यमिका वाग्विद्युदात्मना स्थित्वा वर्षेण प्रच्छाद्य पृथिवीं तद्वर्षमुदकरूपभूतं जलाशयेभ्य आदित्यात्मना स्थित्वा पुनरादत्ते विद्युदात्मना मध्यस्थाने स्थित्वा वर्षत्यादित्यात्मना द्युस्थाने स्थित्वा पुनरादत्त इत्यभिप्रायः। वक्ष्यति हि 'तमकुर्वंस्त्रेधाभावाय पृथिव्यामन्तरिक्षे दिवि' [नि० ७। २८] इति। सेयमेकैव देवता मध्यस्थाना विद्युद्रूपा द्युस्थाना वादित्यरूपेत्ययमेवंलक्षणो देवतातत्त्वसंदेह उपेक्षितव्यो मन्त्रदर्शनाच्च निर्वक्तव्य इत्ययं मन्त्रसंक्षेपार्थः।

[द्वितीयो व्यक्तविद्युद्रूपाया अभिधायकः। विद्युत्प्राधान्यात्त्वीत्वाभिप्रायः.

द्वितीयपक्षे मेघविद्युद्रूपे गौणे। मेघस्था वाक्शब्दं कृत्वा वर्षं करोत्यादित्यात्मना च वर्षजलमाकर्षति

संदेहकारणम्

'सा पृथिव्या संदिह्यते' [निरु० २।७] इत्यनेन संदेहसामान्येनोदाहृतमिदमत्र मतं शाकपूणेरित्येवमादि। अनुक्रमणं त्वधिकृतम्। तस्मिन्गोशब्द एको निरुक्तः प्रकारोपप्रदर्शनार्थम्। इतराण्यप्यभ्यूह्य निर्वक्तव्यानि। तद्यथा। ग्मा

---

१ च. मर्त. २ क. ख. ग. ज. तथ्यावृत्य; घ. ट. ठ. ड. ताव्यावृत्य. ३ क. ख. घ. ट. ठ. ड. यस्मिंस्तु पक्षे. ४ ग. ज. चेति. ५ क. ख. ग. ज. घ. ट. ठ. ड. °येभ्यश्चादित्या°. ६ च. निर्णेक्तव्यः. ७ क. ख. घ. ट. ठ. ड. °सेपदर्श°. ८ ग. ज. °प्यभ्युह्य°.

गमनात् । अस्यां गच्छन्ति[1] भूतानीति ग्मा[2] ज्मा जमनात्[3] । जमन्ति गच्छन्त्यस्यां भूतानीत्येवमादि ।

नैघण्टुकांस्तु यास्कश्छब्दान्प्रत्यर्थं गणशः स्थितान् ।
छन्दोभ्योऽन्विष्य तत्त्वार्थान्निर्ब्रूयाद्योगतस्तु तान् ॥ ९ ॥[4]

इति निरुक्तवृत्तौ सप्तमो[5]ऽध्यायस्य द्वितीयः पादः[6] ।

हिरण्यनामान्युत्तराणि पञ्चदश हिरण्यं कस्माद्ध्रियत आयम्यमानमिति वा ह्रियते जनाज्जनमिति वा हितरमणं भवतीति वा हृदयरमणं भवतीति[7] वा हर्यतेर्वा स्यात्प्रेप्साकर्मणोऽन्तरिक्षनामान्युत्तराणि षोळशा[8]न्तरिक्षं कस्मादन्तरा क्षान्तं भवत्यन्तरेमे इति वा शरीरे[9]ष्वन्तरक्षयमिति वा तत्र समुद्र इत्येतत्पार्थिवेन समुद्रेण संदिह्यते समुद्रः कस्मात्समुद्द्रवन्त्यस्मादापः समभिद्रवन्त्येनमापः संमोदन्तेऽस्मिन्भूतानि समुदको भवति समुनत्तीति[10] वा तयोर्विभागस्तत्रेतिहासमाचक्षते देवापिश्चार्ष्टिषेणः शंतनुश्च कौरव्यौ भ्रातरौ बभूवतुः स शंतनुः कनीयानभिषेचयांचक्रे देवापिस्तपः प्रतिपेदे ततः शंतनो राज्ये द्वादश वर्षाणि देवो न ववर्ष तमूचुर्ब्राह्मणा अधर्मस्त्वया चरितो ज्येष्ठं भ्रातरमन्तरित्याभिषेचितं तस्मात्ते देवो न वर्षतीति स शंतनुर्देवापिं शिशिक्ष राज्येन तमुवाच देवापिः पुरोहितस्तेऽसानि याजयानि च त्वेति तस्यैतद्वर्षकामसूक्तं तस्यैषा भवति ॥ १० ॥[11]

---

१ च. अस्यां ग (ज?) मंति गच्छ°. २ क. ख. घ. ट. ठ. ड. 'इति ग्मा' नास्ति. ३ च. ज्मा यमनाद्यमन्ति गच्छ°. ४ ग. १२; इतरेषु अङ्को नास्ति. ५ घ. ट. सप्तमस्याध्याय°. ६ च. पादः समाप्तः. ७ क. ख. छ. त. द. 'हृदयरमणं भवतीति वा' नास्ति. ८ क. ख. त. षोडशा°; छ. षोलशा°; द. षोडशा° ळ. ९ छ. त. द. °ष्वन्तरिक्षय°. १० छ. त. द. समुनत्ती°. ११ क. ख. द. १; छ. त. १२.

'हिरण्यनामान्युत्तराणि पञ्चदश' । हिरण्यस्य नामानि हिरण्यनामानि । उत्तराणि । कुतः । प्रकृतेभ्यः पृथिवीनामभ्यः । पृथिव्यामेव हिरण्यमुत्पद्यते[1] । अतः पृथिव्यभिधानानन्तरं हिरण्यनामानि समाम्नातानि । कियन्ति पुनस्तानि । पञ्चदश[2] । पञ्च[3] च दश च पञ्चदश यानि समाम्नातानि । असमाम्नातान्यपि सन्ति हाटकसुवर्णचामीकरशातकुम्भादीनि । कतमानि पुनस्तानि समाम्नातानीति । उच्यते । 'हेम चन्द्रं रुक्मम्' [निघ० १।२] इत्येवमादीनि । हितं ममेदमिति सर्व एवैतन्मन्यते तस्माद्धेम । चन्द्रं चन्दतेः कान्तिकर्मणः [धा० १ । ६८] । सर्व एव ह्येतत्कामयते । रुक्मं रोचतेर्ज्वलत्यर्थस्य [धा० १।७४६] । तद्धि रोचिष्णु भवतीति । एवमूहितव्यं सर्वत्र निर्वचनम् ।

आह । 'हिरण्यं कस्मात्' । उच्यते । 'ह्रियते आर्यम्यमानमिति वा' । आर्यम्यमानं[4] ह्रियत एव शिल्पिभिः कटकरुचकस्वस्तिकादिभावेन विस्तीर्यमाणम् । 'ह्रियते जनाज्जनमिति वा' । तेन हि व्यवहारः क्रियते । ततस्तन्नैकत्रावतिष्ठते ह्रियत एव सर्वदा । 'हितरमणं भवतीति वा' । यस्य हि तद्भवति तस्य हितं च दुर्भिक्षादिषु तद्भवति रमणं चेति । तेन हि[5] गृहीतेन मूषकोऽपि[6] रमते किमुत मनुष्यः । 'हर्यतेर्वा स्यात्प्रेप्सार्थस्य' । तद्धि सर्वैरेव प्राथ्यते लोके[7] ।

अनुक्रमेण 'अन्तरिक्षनामान्युत्तराणि षोडश[8]' । षट् च दश च षोडश । कतमानि पुनस्तानि । 'अम्बरं वियद् व्योम' [निघ० १।३] इत्येवमादीनि । अम्बरमम्बुर्वे[9]द्भवति । नानाभावेन सर्वतो वियातमिति वियत् । नानाप्रकारमेतदवति भूतानीति व्योम । एवमाद्यभ्यू[10]हितव्यम् ।

आह । 'अन्तरिक्षम्' एव तावत्[11] 'कस्मात्' इति । उच्यते । 'अन्तरा' हीदं द्यावापृथिव्योरवस्थितं 'क्षान्तं' च 'भवति' । पृथिव्यन्तमित्यर्थः । अथ 'वा अन्तरा' द्यावापृथिव्यौ

---

१ क. ख. °द्यत इत्यतः°; घ. ट. ठ. ड. °मुपपद्यत इत्यतः°. २ च. 'पञ्चदश' नास्ति. ३ ग. ज. 'पञ्च च दश च' नास्ति. ४ च. आयाम्यमानं. ५ क. ख. घ. ट. ठ. ड. 'हि' नास्ति ६ क. ख. ग. ज. मूषिको°. ७ क. ख. लोकानुक्रमेणैव । अन्त°; ग. ज. लोकानुक्रमेणान्त°; घ. ट. ठ. ड. लोकेऽनुक्रमेणैवान्त°. ८ ग. च. ज. षोलश. ९ क. ख. घ. ट. ठ. ड. अम्बुमत्. १० घ. ट. अभ्युहितव्यं. ११ च. 'तावत्' नास्ति.

इमे क्षियति निवसति ' इति ' अन्तरिक्षम्। अथ ' वा शरीरेषु ' एतदेव ' अन्तर् ' मध्येऽवस्थितम् ' अक्षयम् ' इतराणि पृथिव्यादीनि भूतानि क्षीयन्ते तस्मादक्षयत्वादन्तरिक्षम्।

समुद्र इति संदेहपदम्

' तत्र ' तस्मिन् षोडशकेऽन्तरिक्षनामसमुदाये ' समुद्रः ' इत्येतदभिधानमुभयाभिधायित्वात् ' पार्थिवेन समुद्रेण' एतेन जलाशयेन ' संदिह्यते '। एतदत्र संदेहपदम्।

आह। ' समुद्रः कस्मात् ' इति। उच्यते। ' समुद्रवन्त्यस्मादापः ' वीचितरङ्गसीकरादिभावेन। ' समभिद्रवन्त्येनमापः '। सर्वा एव ह्यापो निम्नानुसारित्वात्समुद्रमेवाभिमुख्येन द्रवन्ति। स हि निम्नो भवति। ' संमोदन्तेऽस्मिन्भूतानि '। संहृष्यन्ति जलचराणि सत्त्वानि बहूदकत्वात्। ' समुदको भवति '। उदं इत्युदकनाम। तदस्मिन्संहतमिति समुद्रः। ' समुनत्तीति वा '। संक्लेदयतीत्यर्थः। अतो हि प्रसृतैरम्भोभिः सर्वमिदं संक्लिद्यते।

यस्यामृचि समुद्रशब्दो द्वयोरर्थयोः प्रयुज्यते तन्निदानभूत इतिहासः

' तयोर्विभागः ' यस्मिन्नुदाहरणे लक्ष्यते ' तत्रेतिहासमाचक्षते ' आचार्या निदानभूतम्। इति हैवमासीदिति यः कथ्यते स इतिहासः। कतमः पुनरसाविति। उच्यते। ' देवापिश्चार्ष्टिषेणः ' इत्येवमादि। ' देवापिश्चार्ष्टिषेणः शंतनुश्च ' आर्ष्टिषेण एव ' कौरव्यौ ' कुरुवंशप्रभवौ ' भ्रातरौ बभूवतुः '। तयोरेको यः ' कनीयान् शंतनुः ' नाम स आत्मानम् ' अभिषेचयांचक्रे ' अभिषेचितवानित्यर्थः। सोऽभिषिक्तः सन् राजा बभूव। इतरः पुनर्ज्येष्ठो ' देवापिस्तपः प्रतिपेदे '। स किल तीव्रेण तपसा ब्राह्मणत्वमापेदे विश्वामित्रवत्। ' ततः ' तेनापचारेण ज्येष्ठातिक्रमजेन ' शंतनो राज्ये ' राष्ट्रे ' द्वादश वर्षाणि देवो न

---

१ घ. 'इमे' नास्ति; ट. पृथिव्यौ क्षिय° इमे. २ क. ख. घ. ट. ठ. ड. °दभिधानमुभयाभिधानम्। उभयाभि°. ३ क. ख. घ. ट. ठ. ड. उद्र°. ४ क. ख. ग. ज. निदानभूतः. ५ क. ख. ठ. °मादीनि; घ. ट. ड. °मादीति ६ घ. ट. ठ. ड. °न्तनुर्नामवान्सः° ७ क. ख. घ. ब्राह्मण्यमा°; ट. ब्राह्मण्यमा° णत्व. ८ ग. ज. 'राज्ये ' नास्ति

ववर्ष ' । अवर्षति देवे शंतनुम् ' ऊचुः ' उक्तवन्तो ' ब्राह्मणाः ज्येष्ठं भ्रातरमन्तरित्य ' अतिक्रम्य ' अभिषेचितम् ' अभिषेकं आत्मनः कारितो यतस्त्वया ' तस्मात् ' तेन मर्यादातिक्रमेण ' ते ' तव राज्ये 'देवो न वर्षति ' प्राप्तकालं प्रतिपद्यस्व ' इति ' । ' सः ' एवमुक्तः ' शंतनुः- देवापिं शिशिक्ष ' पुनः पुनः[1] शशासाभिगमितवानित्यर्थः । कथम् । ' राज्येन ' अभ्युद्यतेन । तेनार्थ्यमानो ' देवापिरुवाच ' काममहं ' पुरोहितस्तेऽसानि ' भवानि ' याजयानि च ' त्वां वार्षिकेणे[2] कर्मणा । न च राजा भविष्यामि भवानेवास्तु राजेत्यभिप्रायः । ' तस्य ' देवापेः एतत् वर्षकामस्य ' सूक्तम् ' आविरभूत् । तत्र ' तस्य ' समुद्राभिधानस्य संदिग्धस्य[3] प्रविभागोपदर्शनाय ' एषा ' निर्वाचिका ऋग् ' भवति ' ॥ १० ॥

आर्ष्टिषेणो होत्रमृषिर्निषीदन्देवापिर्देवसुमतिं चिकित्वान् । स उत्तरस्मादधरं समुद्रमपो दिव्या असृजद्वर्ष्या अभि [ऋ० सं० १० । ९८ । ५]॥ आर्ष्टिषेण ऋष्टिषेणस्य पुत्र इषितसेनस्येति वा सेना सेश्वरा समानगतिर्वा पुत्रः पुरु त्रायते निपरणाद्वा पुन्नरकं ततस्त्रायत इति वा होत्रमृषिर्निषीदन्नृषिर्दर्शनात्स्तोमान्ददर्शेत्यौपमन्यवस्तद्यदेनांस्तपस्यमानान्ब्रह्म स्वयंभ्वभ्यानर्षत्त ऋषयोऽभवंस्तदृषीणामृषित्वमिति विज्ञायते [तै० आ० २ । ९] देवापिर्देवानामाप्त्या स्तुत्या च प्रदानेन च देवसुमतिं देवानां कल्याणीं मतिं चिकित्वांश्चेतनावान् । स उत्तरस्मादधरं समुद्रम् । उत्तर उद्धततरो भवत्यधरोऽधोरोऽधो न धावतीत्यूर्ध्वगतिः प्रतिषिद्धा तस्योत्तरा भूयसे निर्वचनाय ॥ ११ ॥

---

१ ग. ज. पुनर शशास न अभि॰; ठ. ड. ' पुनः ' सकृदेव. २ घ. ट. वार्षिकेन. ३ क. ख. १; घ. ट. च. ज. अङ्को नास्ति; ठ. ड. ॰भवति । इति निरुक्तटीकायां द्वितीयाध्याये दशमः खण्डः. ४ क. ख. छ. त. द. ' त ऋषयोऽभवन्' नास्ति. ५ क. ख. द. २; छ. त. १४.

आर्ष्टिषेणो० वर्ष्या अभि । त्रिष्टुप् । एतया देवानस्तौत् । आर्ष्टिषेण[1] ऋष्टिषेणस्य पुत्र इषितसेनस्येति[2] वा ।

द्व्यर्थसमुद्रपदोदाहरणम्

अन्यकल्पान्तरीणोऽन्यकल्पान्तरीणस्यैव शंतनोर्वर्षार्थीये कर्मणि होतृत्वे वृतो होत्रं[3] कर्म प्रति निषीदन् उपविष्टवान् । ततो देवापिः नाम नाम्ना देवसुमतिं देवानां कल्याणीं मतिमुदकसंप्रदानाभिमुखीं कर्तुं चिकित्वान् जानानः । स हि तथास्तौद्यथा[4] देवानामुदकसंप्रदानाभिमुखी मतिरभूत् । ततः परितुष्टेषु देवेषु स देवापिः उत्तरस्मादधरम् उत्तरस्मादन्तरिक्षाख्यात्समुद्रादधरं समुद्रं पार्थिवं प्रति । एष विभागः समुद्रयोः । अपो दिव्याः प्रशस्ताः सस्यसंपत्करीः असृजदक्षारयत् । किंलक्षणाः । वर्ष्या वर्षभूताः । अभि सर्वभूतानामुपरि । स देवाप्यधिकारे वर्तमान एतदकरोत् । अन्यस्मिन्कल्पे देवापिर्ममाप्येतदेवमेवास्त्वित्येवं वर्तमानेनाभिसंबध्यत इति समस्तार्थः ।

अथैकपदनिरुक्तम् । ऋष्टिरायुधविशेषः । तद्बहुला सेना यस्य सोऽयमृष्टिषेणः । इषितसेनो वा नित्यमेव प्रेषितसेनः शत्रून्प्रति । ‘ सेना सेश्वरा ’ । इनेतीश्वरनाम । तेन हि सा नित्यमेव संयुक्ता भवति । ‘ समानगतिर्वा ’ । समानमेकमर्थमुद्दिश्य जयाख्यमिति[5] सेना । ‘ पुत्रः पुरु त्रायते ’ । बह्वपि यत्पित्रा पापं कृतं भवति ततोऽयं त्रायत इति पुत्रः । ‘ निपरणाद्वा ’ । निपृणाति ददाति[6] ह्यसौ पिण्डान्पितृभ्य इति पुत्रः । अथवा ‘ पुत् ’ इति नरकस्थानमुच्यते । ‘ ततस्त्रायत इति ’ पुत्रः । ‘ ऋषिर्दर्शनात् ’ । पश्यति ह्यसौ सूक्ष्मानप्यर्थान्[7] । ‘ स्तोमान्ददर्शेत्यौपमन्यवः ’ । मन्त्राः स्तोमाः । तानसौ तारकेण ज्ञानेन पश्यतीत्येवमौपमन्यव आचार्यो मन्यते । ब्राह्मणमपि चैतस्मिन्नर्थे दर्शयति । ‘ तद्यदेनांस्तपस्यमानान् ब्रह्म ’ इत्येवमादि । तदेतदुच्यते यत्कृतमृषीणामृषित्वम् । यद्यस्मादेनांस्तपस्यमानांस्तप्यमानान्[10] ब्रह्म ऋग्यजुःसामाख्यं स्वयंभु अकृतकमभ्यागच्छत् । अनधीतमेव तत्त्वतो ददृशुस्तपोविशेषेण ।

---

१ ठ. ड. आर्ष्टिषेण इति । त्रिष्टु°. २ च. ‘ इति ’ नास्ति. ३ ग. च. हौत्रं. ४ च. तथा तथा. ५ घ. ट. जयाख्यमेति सेना. ६ क. ख. घ. ट. निर्ददाति. ७ क. ख. ग. ज. ‘ अपि ’ नास्ति. ८ क. ख. घ. ट. ‘ एवं ’ नास्ति. ९ ठ. ड. ‘ एतत् ’ नास्ति. १० च. ‘ तप्यमानान् ’ नास्ति.

तदृषीणामृषित्वमित्येवं ब्राह्मणेऽपि विचार्यमाणे ज्ञायते । ' देवापिर्देवानामाप्त्या ' । स हि स्तुतिभिर्देवानाप्नोति हविःसंप्रदानेन च । ' उत्तर उद्गततरः ' । उद्गततरोऽसौ भवत्युपरिष्टादवस्थानात्[1] । 'अधरः अधोऽरः'[2] । किमुक्तं भवति । अध एवासावरति । ' अधः ' पुनः ' न धावति ' । तस्य ह्यधोगतित्वादेव ' ऊर्ध्वगतिः प्रतिषिद्धा ' ।

' तस्योत्तरा भूयसे निर्वचनाय ' । किमुक्तं भवति । तस्यैवार्थस्य प्रकृतस्य यथोत्तरस्मात्समुद्राद्वृष्टिमयाचत देवेभ्यो देवापिर्यथा च पौरोहित्यमकरोद्यथा वायाजयच्छंतनुं वर्षार्थीयेन कर्मणा । भूयसे बहुतराय निर्वचनाय निर्विविच्य वचनाय[3] ॥ ११ ॥

यद्देवापिः शंतनवे पुरोहितो होत्राय वृतः कृपयन्नदीधेत् । देवश्रुतं वृष्टिवनिं[4] रराणो बृहस्पतिर्वाचमस्मा अयच्छत् [ऋ० सं० १० । ९८ । ७] ॥ शंतनुः शं तनोऽस्त्विति वा शमस्मै तन्वा अस्त्विति वा पुरोहितः पुर एनं दधति होत्राय वृतः कृपायमाणोऽन्वध्यायद्देवश्रुतं देवा एनं शृण्वन्ति वृष्टिवनिं वृष्टियाचिनं रराणो रातिरभ्यस्तो बृहस्पतिर्ब्रह्मासीत्सोऽस्मै वाचमयच्छद्बृहदुपव्याख्यातम्[5] ॥ १२ ॥

[6]इति द्वितीयाध्यायस्य तृतीयः पादः ।

यद्देवापिरिति । यत् यस्माद्देवापिः शंतनवे राज्ञे पुरोहितः । पुरोहितो होत्राग्निकर्मणि[7] व्याप्रियते । स पुरोहितः सन् देवापिर्होत्राय होतृकर्मणे वर्षार्थीये कर्मणि वृतः सन्कृपायमाणो राज्ञे[8]ऽदीधेत्[9] अन्वध्यायत् वृष्टिर्भवेदिति । तं देवश्रुतं देवापिमेनं वृष्टिवनिं वृष्टियाचिनं मत्वा रराणो

देवापेः पौरोहित्येऽन्या ऋक्

---

१ च. °ष्टादुपस्थानात्. २ ग. ज. आधारः. ३ क. ख. २; ग. १४; च १५; ठ. ड. °वचनाय।इति निरुक्तटीकायां द्वितीयाध्याय एकादशः खण्डः. ४ क. ख. छ. त. द. '°वृष्टिवनिं ' नास्ति. ५ क. ख. द. ३; छ. त. १५. ६ ङ. थ. ध. ' इति...पादः ' नास्ति; त. इति द्वितीयाध्याये द्वितीयः पादः. ७ च. होकाग्निक°. ८ क. ख. ग. ज. राज्ञः. ९ घ. ट. अदिधेत्.

ददत् । इह बृहस्पतिस्तस्मिन्नेव कर्मणि ब्रह्मत्वेऽवस्थितः । सो[1]ऽस्मै वर्षसा[2]धिकां वाचमयच्छदददादित्यर्थः । तया वाचा तदनुगृहीतया देवान्स्तुत्वा तेभ्यो वर्षमलभतेति समस्तार्थः ।

अथैकपदनिरुक्तम् । ‘ शंतनुः ’ कस्मादिति । उच्यते । स हि कं[3]चिद्रोगार्तं दृष्ट्वा ब्रवीति हे ‘ तनो शं ’ तव ‘अस्त्विति ’ । ततोऽसावगदो भवति । अथवा ‘शमस्तु[4] तन्वा ’ इत्येवमसावाशास्ते । शमिति सुखनाम । तनुः शरीरम् । तदसौ नित्यं शरीरायाशास्ते । ‘ पुरोहितः ’ । शान्तिकपौष्टिकाभिचारिकेषु कर्मसु ‘ पुर एनं दधति ’ राजानः । पुरस्कुर्वन्तीत्यर्थः । ‘ देवश्रुतं देवाः ’ हि ‘ एनं ’ स्तुतीरुच्चारयन्तं ‘शृण्वन्ति’ इति देवश्रुत् तं देवश्रुतम् । ‘ रराणः ’ इति ‘ रातिः ’ दानार्थः ‘ अभ्यस्तः ’ । ‘ बृहदुपव्याख्यातम् ’ ‘ बृहदिति महतो नामधेयं परिवृ[5]ढं भवति ’ [निरु० १ । ७] इति ।

मन्त्रनिदानद्वारेण धर्मोऽयमत्र दर्शितो ज्येष्ठे तिष्ठति कनीयसो राज्यप्राप्तिर्धर्मातिक्रमो धर्मातिक्रमे च[6] देवो न वर्षतीति । नैरु[7]क्तपक्षे ऋष्टिषेणो मध्यमस्तदपत्यमयमग्निः पार्थिव आर्ष्टिषेणो देवापिः[8] शंतनवे सर्वस्मै यजमानायेति योज्यम् । बृहस्पतिर्वाचस्पतिरिति मध्यमः । स्तनयित्नुलक्षणां वाचमित्यर्थः ॥ १२ ॥[9]

(नैरुक्तकृतोऽस्या ऋचोऽर्थः)

इति निरुक्तवृत्तौ सप्तमा[10]ध्यायस्य तृतीयः पादः[11] ।

साधारणान्युत्तराणि षड् दिवश्चादित्यस्य च यानि त्वस्य प्राधान्येनोपरिष्टात्तानि व्याख्यास्याम आदित्यः कस्मादादत्ते रसानादत्ते भासं ज्योतिषामादीप्तो भासेति वादितेः पुत्र इति वाल्पप्रयोगं त्वस्यैतदार्चाभ्याम्नाये सूक्तभाक्सूर्यमादितेयमदितेः पु[12]त्रमेवमन्यासामपि देवताना-

---

१ घ. ठ. ठ़. ड. ‘ सः ’ नास्ति. २ घ. ट. ड़. वर्षसो वाच°; ट. वर्षसो वाच° साधिकां. ३ ग. ज. किंचि°. ४ क. ख. ग. ज. घ. ट. ठ. ड. शमस्मै तन्वा°. ५ ग. च. ज. परिवृल्हं. ६ ग. ‘ च ’ नास्ति; ज. °क्रमेत्र देवो°. ७ ग. ज. °वर्षतीति नित्यपक्षे । ऋष्टि°. ८ क. ख. ग. ज. देवापिः स शन्त°. ९ क. ख. ३; ग. १५; घ. ट. ठ. ड़. च. ज. अङ्को नास्ति. १० घ. ट. सप्तमस्याध्यायस्य. ११ च. पादः समाप्तः. १२ क. ख. छ. त. द. ‘ अदितेः पुत्रमेवं ’ नास्ति.

मादित्यप्रवादाः स्तुतयो भवन्ति तद्यथैतन्मित्रस्य वरुणस्यार्यम्णो दक्षस्य भगस्यांशस्येत्यथापि मित्रावरुणयोः। आदित्या दानुनस्पती[1] दानपती। अथापि मित्रस्यैकस्य। प्र स मित्र मर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेनेत्यपि निगमो भवत्यथापि वरुणस्यैकस्य। अथा वयमादित्य व्रते तव। व्रतमिति कर्मनाम[2] निवृत्तिकर्म वारयतीति सत इदमपीतरद्व्रतमेतस्मादेव वृणोतीति[3] सतोऽन्नमपि व्रतमुच्यते यदावृणोति शरीरम्॥ १३[4]॥

लोकाभिधानाधिकारेणेदमुच्यते[5]। 'साधारणान्युत्तराणि षड् दिवश्चादित्यस्य च' इति। समानं ध्रियन्त इति साधारणानि। नामानीत्यधिकारो वर्तत एव। उत्तराणि प्रकृतमपेक्ष्य। किं वात्र[6] प्रकृतम्। अन्तरिक्षनामानि। तेभ्य इमान्युत्तराणि। कियन्ति पुनस्तानि। षट्। कयोः पुनः साधारणानि। दिवश्चादित्यस्य च। कतमानि पुनस्तानि। 'स्वः पृश्निः नाकः' [निघ० १।४] इत्येवमादीनि। 'यान्यस्य[7]' आदित्यस्य 'प्राधान्येन' वर्तन्ते प्रधानस्तुतिभाञ्जि नामानि 'सविता भगः सूर्यः[8] पूषा' इत्येवमादीनि 'तान्युपरिष्टाद्व्याख्यास्यामः' सप्तदशेऽध्याये [निरु० १२। १२–१८ खण्डेषु]। इमानि तु नैघण्टुकानि संसृष्टरूपाणि च द्युनामभिः साकमित्यत इह नैघण्टुकप्रकरणे निरुच्यन्ते।

आह। 'आदित्यः' एव तावत् 'कस्मात्' आदित्य उच्यते[9]। शृणु। 'आदत्ते' ह्यसौ 'रसान्' रश्मिभिरित्यादित्यः। 'आदत्ते भासं ज्योतिषाम्'। तदुदये हि चन्द्रादीनां प्रभानाशो भवति। अन्येऽग्र[10]हापेक्षमेतत्। 'आदीप्तो भासेति वा'। सर्वतो ह्येष भासा आदीप्त आवृतो[11] भवति। 'अदितेः पुत्र इति वा'। अदितिर्देवमाता तस्याः पुत्रः। सोऽयमादितेयः सन्नादित्य इत्युच्यते।

---

१ छ. त. द. °स्पती। दान°. २ क. ख. °नाम वृणोतीति सत°. ३ क. ख. °देव निवृत्तिकर्म वारयतीति सतो°. ४ क. ख. द. १; छ. त. १६. ५ घ. ट. °च्यते ॥ १ ॥ साधा°. ६ क. ख. ग. ज. घ. ट. ठ. ड. चात्र. ७ क. ख. घ. ट. ठ. ड. यानि त्वस्य. ८ ग. च. ज. 'सूर्यः' नास्ति. ९ घ. ट. ठ. ड. इत्युच्यते. १० ग. ज. अवग्रहा°; च. अवग्रहा° न्य. ११ ग. ज. घ. ट. आवृत्तो.

' अल्पप्रयोगं त्वस्यैतदार्चाभ्याम्नाये सूक्तभाक्सूर्यमादितेयम् ' इति । अल्पप्रयोगविषयम् । ' तु ' शब्दो विशेषणार्थः ।

आदितेय इत्यल्पप्रयोगं सूक्तभाक्च

एतदेवाल्पप्रयोगविषयमितराणि सवितृभगपूषादीनि बहुप्रयोगविषयाण्यस्यादित्यस्य । क्वाल्पप्रयोगविषयम् । आर्चाभ्याम्नाये । ऋचो यस्मिन्नाम्नाये अभि उपर्युपर्याम्नाताः सोऽयमार्चाभ्याम्नायो दाशतयः । तस्मिन्नल्पप्रयोगविषयमेतददितेः पुत्रत्वाभिप्रायमभिधानम् ' आदितेयः ' इति । सूक्तभागेव चैतदभिधानं न हविर्भाक् । न ह्यादितेय इत्यनेन नाम्ना हविराध्वर्यवे चोदितपूर्वमस्ति । यथा चैतत्सूक्तमेव नैघण्टुकवृत्त्या भजते तथेदमुदाहरणं ' सूर्यमादितेयम् ' इति ' यदेदेनमदधुर्यज्ञियासः ' [ऋ० सं० १० । ८८ । ११] इत्यस्यामृचि । अन्ये तु मन्यन्ते । आदित्य इत्येतदेवाल्पप्रयोगमिति । तत्र त्वेतद्विरुद्ध्यते

अल्पप्रयोगमित्यादेरन्यद्विवरणम्

सूक्तभागिति । हविरपि ह्यनेनाभिधानेन चोद्यते ' आदित्यं बहुरूपमालभेत ' [मैत्रा० सं० २ । ५ । ११] इति । ' तस्य पशोरेतत्षळर्चमादित्यो देव उदगात्पुरस्तात् ' [मैत्रा० सं० ४ । १४ । १४२] इति । अथैवैवमन्यथा वाक्यद्वयप्रविभागेन स्यात् । ' अल्पप्रयोगं त्वस्यैतदार्चाभ्याम्नाये ' । आदित्य इति हविर्भाक्सूक्तभाक्च । अल्पहविःसूक्तविषयमित्यर्थः । इदं त्वन्यत्सूक्तमेव नैघण्टुकवृत्त्या भजते न कदाचिदपि हविः । तद्यथा । 'सूर्यमादितेयम् ' इति ।

आदित्यशब्दप्रसक्तमाह ' एवमन्यासामपि देवतानाम् ' इति । देवता-

---

१ घ. ट. ठ. ड. ° प्रयोगस्य विष°. २ ग. ज. पूषाप्रभृतीनि; च. पूषाप्रभृतीनि° षन्. ३ ठ. ड. अर्चाभ्या°. ४ क. ख. घ. ठ. ड. ' आम्नाये ' नास्ति; ट. यस्मिन्नभ्यु° ञ्नाम्नाय अभि उ°. ५ ग. च. ज. °यमर्चाभ्या°. ६ च. दाशतयी. ७ घ. भागे एव°; ट. भागे एँव°. ८ ग. च. ज. च तद्°. ९ क. ख. घ. ट. ठ. ड. त्वेत°. १० ठ. ड. सर्वा ऋक् पठ्यते. ११ क. ख. घ. ट. ठ. ड. तस्य च पशो°. १२ ट. षळर्चमा°. १३ क. ख. घ. ट. ठ. ड. अथ चैव°. १४ क. ख. घ. ठ. ' प्र ' नास्ति; ट. °द्वयेऽवि° प्र. १५ क. ख. घ. ट. ठ. ड. °सूक्तभाग्विषय°.

आदित्यनाम्नान्या अपि देवता अभिधीयन्ते।

भेदपक्षमपेक्ष्येदमुच्यते।[1] 'आदित्याभिधानप्रवादाः स्तुतयो भवन्ति'। 'तद्यथैतत्' उदाहरणजातं 'मित्रस्य वरुणस्यार्यम्णो दक्षस्य भगस्यांशस्येति'।

यथा 'इमा गिरः' इत्यस्यां मित्रावरुणार्यमदक्षभगांशाः

इमा गिर आदित्येभ्यो घृतस्नूः[2] सनाद्राजभ्यो जुह्वा जुहोमि। शृणोतु मित्रो अर्यमा भगो नस्तुविजातो वरुणो दक्षो अंशः [ऋ० सं० २ । २७ । १] ॥ अस्यामृचि सर्व एवादित्यप्रवादया स्तुत्या स्तूयन्ते।

'अथापि मित्रावरुणयोः' आदित्यप्रवादाः स्तुतयो भवन्ति। तद्यथा।

'ता सम्राजा' इत्यस्यां मित्रावरुणौ

'आदित्या दानुनस्पती। दानपती'। 'ता सम्राजा[3] घृतासुती आदित्या दानुनस्पती। सचेते अनवह्वरम्' [ऋ० सं० २ । ४१ । ६] ॥ गायत्रीयं गृत्समदेन दृष्टा। अभिप्लवस्य षडहस्य[4] द्वितीयेऽहनि प्रउगं[5] नाम शस्त्रम्। तत्र 'अयं वां मित्रावरुणा सुतः सोमः' [ऋ० सं० २ । ४१ । ४] इत्येष तृचः शस्यते [आश्व० श्रौ० ७ । ६] तस्योत्तमैषा। ता सम्राजा तौ संदीप्तौ घृतासुती। [6]तौ हि घृतमुदकमासुवाते वर्षकर्मणा जनयतः। आदित्यौ अदितेः पुत्रौ दानुनस्पती दानानामीशाते। तौ यजमानैः सम्यक्स्तुतिभिर्हविर्भिश्च संसेवितौ सन्तौ प्रतिसंसेवेते यजमानानभिमतैर्दानैः। अनवह्वरम्[7] अनवरुध्यमानावित्यर्थः। यजमानविशेषणं चायुक्तम्।[8] न कृतघ्नौ शक्तौ च दातुमित्येवं मित्रावरुणावत्र स्तूयेते।

'अथापि मित्रस्यैकस्य' आदित्यप्रवादा स्तुतिर्भवतीति[9]। तद्यथा[10]।

---

१ घ. ट. ठ. ड. देवताभेदमपेक्ष्य. २ ग. च. ज. घ. ट. घृतस्नूरित्यस्या°. ३ ठ. ड. प्रसम्रा°; ग. ता सम्राजा० वह्वरं. ४ घ. ट. ड. षलहस्य; ठ. षळहस्य. ५ च. प्रयुगं. ६ ठ. ड. 'तौ हि' नास्ति. ७ ग. ज. अनवह्वरं। यजमानविशेषणं चायुक्तं। अनवरुध्यमानावित्यर्थः। न कृत°; घ. ट. ठ. ड. °नवनुध्य°. ८ च. 'यजमानविशेषणं चायुक्तं' नास्ति. ९ क. ख. ग. ज. ठ. ड. 'इति' नास्ति. १० ग. च. तद्यथा। १७।; घ. ट. तथा.

'प्र स मित्र' इत्यस्यां मित्रः

प्र स मित्र मर्तो अस्तु प्रयस्वान्यस्त आदित्य शिक्षति व्रतेन । न हन्यते न जीयते त्वोतो नैनमंहो अश्नोत्यन्तितो न दूरात् [ऋ० सं० ३ । ५९ । २] ॥ अप्ययमप्यन्ये बहवो निगमा इत्यपिशब्दः । प्र स मित्रेति विश्वामित्रेण दृष्टा । त्रिष्टुप् । मैत्रस्य चरोः पुरोनुवाक्या [आश्व० श्रौ० ३ । १२]। प्रास्तु प्रकर्षेणास्तु भवतु हे मित्र आदित्य अदितेः पुत्र स मर्तः स[3] मनुष्यः प्रयस्वान् अन्नवान् । यः किं करोति । यस्तुभ्यं शिक्षति ददाति व्रतेन कर्मणा[4] निर्वपणप्रोक्षणादिना संस्कृत्येदं हविश्चरुलक्षणम् । किंच । एवमतिमहाप्रभावस्त्वं येन स[5] मर्त्यो यस्तव यष्टा त्वोतः त्वत्परिग्रहे वर्तमानस्त्वया रक्षितो न केनचित्प्रत्यनीकभूतेनातिबलेनापि शत्रुणा हन्यते हिंस्यते । न चाहतो[6]ऽपि सन्[7] जीयते वशीक्रियते केनचित् । न केवलं शत्रूणामनाधृष्यः । नचैनं त्वोतं सन्तमंहोऽपि पापमपि अश्नोति न व्याप्नोति । यदन्तितः अन्तिकात्समीपात् । यत्स्वशरीरादेव वाङ्मनश्चेष्टानिमित्तमुत्पद्यते पापं तदुत्पत्तिसमकालमेव त्वदनुग्रहादपध्वस्यते । ततस्तन्नैनं[8] व्याप्नोति । न च केवलमन्तिके[9] यत्तदुत्पद्यते तदेवैनं न व्याप्नोति । किं तर्हि । यदपि दूरात्पुत्रभ्रातृजायादिद्वारेणैनमास्कन्दति तदपि नैनमभिव्याप्तुं शक्नोति त्वोतं सन्तम् । एवं महानुभावस्त्वम् । ततस्त्वां स्तुम इत्यभिप्रायः ।

' अथापि[1] वरुणस्यैकस्य ' आदित्यप्रवादा[2] स्तुतिर्भवति । तद्यथा

आदित्यनाम्ना वरुणस्य स्तुतिः

' अथा वयमादित्य व्रते तव ' इति । उदुत्तमं वरुण पाशमस्मदवाधमं वि मध्यमं श्रथाय । अथा वयमादित्य व्रते तवानागसो अदितये स्याम [ऋ० सं० १ । २४ । १५]॥ अनया[10] त्रिष्टुभोपाकृतः शुनःशेपो वरुणं

---

१ क. ख. घ. ट. ठ. ड. ' अपि ' नास्ति. २ घ. ट. ड. मित्रस्यादित्य°. ३ ठ. ड. ' स ' नास्ति. ४ ठ. ड. कर्मणा यागाख्येन निर्व°. ५ घ. ट. ठ. ड. ' स ' नास्ति. ६ ग. ज. वाहतो; घ. ट. ठ. च. च हतो°. ७ घ. ट. स न जीय°. ८ क. ख. ठ. ड. ततस्तैनं न; घ. ततस्त्वैनं न; ट. ततस्त्वेनं नं व्या° स्तन्नैनं. ९ क. ख. घ. ट. ठ. ड. केवलं यदन्तिके उत्प°. १० ग. च. ज. घ. ट. वरुणेति । अनया°.

स्तुतयानात्मानं मोचयिष्यन् । वरुणप्रघासेष्ववभृथेष्टौ वारुणस्य निष्काषहविषः[1] पुरोनुवाक्येयम् । हे वरुण त्रिषु स्थानेषु अधो मध्ये उपरिष्टाच्च वयं त्वया बद्धाः स्वैः पाशैर्यतो[2] ब्रूमः । स्तुत्या हविषा चोपसृतस्त्वमस्माभिरतस्तावदुत्तमं पाशमुपरिष्टादवस्थितमस्मदस्मत्त उच्छ्रथय ऊर्ध्वमेव श्लथय । उच्छ्रथ्य च विमुञ्चास्मानपीडयन्[3] । योऽपि चायमधमस्ते पाशोऽस्मासु वर्तत एतमप्यवाञ्चमेव[4] श्रथयावमुञ्च । तथा च योऽप्ययं मध्यमस्ते पाशोऽस्मन्मध्ये वर्तत एतमपि तथैवावस्थितमनभिसर्पयन्नूर्ध्वमधो वा अदुःखयन्नस्मान्विश्रथय विमुञ्च । अथैवं त्वया वयं सर्वविमुक्तपाशाः सन्तो हे आदित्य अदितेः पुत्र वरुण अनागसः अपापाः संशुद्धसर्वकिल्बिषाः । एतदेव हि यौष्माकीणं पाशत्रयमागः । तेन विमुक्ताः सन्तस्तवैव व्रते तवैव परिचरणकर्मणि अदितये चात्मनोऽदीनत्वाय अनुपक्षयाय आदरवन्तः स्थिताः स्यामेत्याशीः ।

निगमप्रसक्तमुच्यते । 'व्रतमिति कर्मनाम वृणोतीति' एवं कर्तरि कारके 'सतो' वृणोतेः । तद्धि कर्म शुभमशुभं वा कृतं सदावृणोति कर्तारम् । 'इदमपीतरद् व्रतमेतस्मादेव निवृत्तिकर्म' यमनियमाख्यं बाहिर्वेदिकमान्तर्वेदिकं[5] वा यदग्निसंनिधावुपेयते । तत्पुनः 'वारयतीति' एवं 'सतः' । तद्विषयेषु प्रवर्तमानं[6] पुरुषं स्त्र्यादिषु वारयति । तदनुस्मृत्य[7] स पुरुषो निवर्ततेऽवकीर्णी भविष्यामीत्येतस्माद्भयात् । 'अन्नमपि व्रतमुच्यते' । तदपि[8] 'आवृणोति शरीरं' रसशोणितमांसमेदोमज्जास्थिभावेन विपरिणममानम् । आदित्यशब्दप्रसक्तानुप्रसक्तमिदमुक्तम्[9] । अधुना प्रकृतमेवोच्यते ॥ १३ ॥[10]

---

[1] क. ख. वारुण्यामिष्ट्यां ह;° ग. ज. वरुणस्य तुषनिकासह°; घ. ट. वारुण्यनिष्काषह°; च. वारुणस्य उँषै निष्काषह°; ठ. ड. वारुणनिष्काषह°. [2] क. ख. घ. ट. ठ. यतोऽतो ब्रूमः. [3] घ. ट. ठ. ड. °पीडयत्. [4] ग. ज. एनम°; ञ. एँतमप्येवमेव°; ट. एतमप्येवैमेव° प्यवाञ्च. [5] घ. ट. ठ. ड. °माख्यं वा बाहि° (ठ. ड. बाहि°). [6] ग. च. ज. वर्तमानं. [7] ग. च. ज. °नु स्मृत्वा. [8] घ. ट. ठ. ड. तदस्यावृणोति. [9] क. ख. °मुक्तम् ॥ १ ॥ अधु°; ठ. ड. °मुक्तम् ॥ इति निरुक्तवृत्तौ १३ खण्डः । अधु°; ग. ज. °प्रसक्तमुक्तम्. [10] क. ख. ग. च. ज. घ. ट. ठ. ड. अङ्को नास्ति.

स्वरादित्यो भवति सु अरणः सु ईरण स्वृतो रसान्स्वृतो भासं ज्योतिषां स्वृतो भासेति वैतेन द्यौर्व्याख्याता[1] । पृश्निरादित्यो भवति प्राश्नुत एनं वर्ण इति नैरुक्ताः संस्प्रष्टा रसान्संस्प्रष्टा भासं ज्योतिषां संस्पृष्टो भासेति वाथ द्यौः संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च[2] । नाक आदित्यो भवति नेता रसानां[3] नेता भासां ज्योतिषां प्रणयोऽथ द्यौः कमिति सुखनाम तत्प्रतिषिद्धं प्रतिषिध्येत न वा अमुं लोकं जग्मुषे किंचनाकम् । न वा अमुं लोकं गत[4]वते किंचनासुखं पुण्यकृतो ह्येव तत्र गच्छन्ति[5] । गौरादित्यो भवति गमयति रसान्गच्छत्यन्तरिक्षेऽथ द्यौर्यत्पृथिव्या अधि दूरंगता भवति यच्चास्यां ज्योतींषि गच्छन्ति[6] । विष्टबादित्यो भवत्याविष्टो रसानाविष्टो भासं ज्योतिषामाविष्टो भासेति वाथ द्यौराविष्टा ज्योतिर्भिः पुण्यकृद्भिश्च[7] । नभ आदित्यो भवति नेता रसानां नेता भासां ज्योतिषां [8]प्रणयोऽपि वा भन एव[9] स्याद्विपरीतो न न भातीति वैतेन द्यौर्व्याख्याता ॥ १४ ॥

इति[10] द्वितीयाध्यायस्य चतुर्थः पादः ।

' स्वरादित्यो भवति ' इति[11] । ' सु अरणः ' सुगमन इत्यर्थः । अथवा सुष्ठु तमांसि ईरयति नाशयतीत्यर्थः । अथवा विशेषणविशेष्यभावेनैते वाक्ये स्याताम् । किमुक्तं भवति ' सु अरणः ' इति । उच्यते[12] । सु ईरणः[13] ' इत्येवम् । ' स्वृतो रसान् ' । सुष्ठु रसानादातुम् ऋतो गतो

---

१ छ. त. व्याख्याता ॥ १७ ॥ पृश्नि॰; द. व्याख्याता ॥ २ ॥ पृश्नि॰. २ छ. त. कृद्भिश्च॰ ॥ १८ ॥ नाक॰; द. कृद्भिश्च ॥ ३ ॥ नाक॰. ३ क. ख. छ. त. द. ' रसानां नेता ' नास्ति. ४ क. ख. छ. त. द. जग्मुषे. ५ छ. त. ॰गच्छन्ति ॥ १९ ॥ गौ॰; द. गच्छन्ति ॥४॥ गौ॰. ६ छ. त. गच्छन्ति ॥ २० ॥ विष्ट॰; द. गच्छन्ति ॥ ५ ॥ विष्ट॰. ७ छ. त. ॰कृद्भिश्च ॥ २१ ॥ नभ;॰ द. ॰कृद्भिश्च ॥ ६ ॥ नभ॰. ८ छ. त. द. प्रभवोऽपि. ९ क. ख. २; छ. त. २२; द. ७. १० ड. थ. ध. ' इति००० पादः ' नास्ति. ११ क. ख. घ. ट. ठ. ड. ' इति ' नास्ति. १२ घ. ङ. उच्यते । सु ईरण इत्युच्यते । सु॰. १३ ग. च. ज. ईरणेत्येवम्.

भौमानान्तरिक्षांश्च । ‘ स्तृतो भासं[1] ज्योतिषाम् ’ । सुष्ठु ग्रहनक्षत्रादीनां ज्योतिषां भासमादातुम् ऋतो गतः । ‘स्वृतो भासेति वा’ । सुष्ठु परिगतो भासेति वा । सर्वतो ह्येष परिगतो दीप्त्या भवति ।

‘ एतेन द्यौर्व्याख्याता ’ । उक्तं हि ‘ तानि चेत्समानकर्माणि समाननिर्वचनानि’ [निरु० २ । ७] इति । सापि हि सु अरणा शोभनगमना[2] भवति । शोभनं वा अस्यामर्यत इत्येवमादि यथासंभवं योज्यम्[3] ।

‘ पृश्निरादित्यो भवति ’ । आह । कस्मात् । उच्यते । ‘ प्राश्नुत एनं वर्ण इति नैरुक्ताः ’ । प्राश्नुते प्रकर्षेण व्याप्नोति एनम् आदित्यं वर्णः प्रोज्ज्वल इति नैरुक्ता मन्यन्ते । ‘ संस्प्रष्टा रसान् ’ । स हि नित्यकालमेव रसानां संस्प्रष्टा भवति । तस्य हि तदेव कर्म । वक्ष्यति ‘ अथास्य कर्म रसादानम् ’ [निरु० ७ । ११] इति । ‘ संस्प्रष्टा भासं ज्योतिषाम् ’ । आदित्यसंस्पर्शादेव ग्रहनक्षत्रचन्द्रमसां भासो नश्यन्ति । ‘ संस्पृष्टो भासेति वा ’ । दीप्त्या ह्येष सर्वतः संस्पृष्टो भवति । आह । ‘ अथ द्यौः ’ कस्मात्पृश्निरिति[4] । उच्यते । सापि हि संस्पृष्टा ज्योतिर्भिः पुण्यकृद्भिश्च[5] ’ ।

‘ नाक आदित्यो भवति ’ । आह । कस्मात् । उच्यते । ‘ नेता भासाम्[6] ’ । नेता ह्यसौ भासां सर्वासु दिक्षु । ‘ज्योतिषां’ च ‘ प्रणयः ’ । अस्यैव हि भगवतो रश्मिजालप्रान्तोपलग्नं ज्योतिश्चक्रं बंभ्रमीति[7] । ‘ अथ द्यौः ’ कस्मान्नाकः इति । उच्यते । ‘ कमिति सुखनाम ’ । आह । ततः किमिति । शृणु । ‘तत्प्रतिषिद्धं’ सत्पुनरपि ‘ प्रतिषिध्यते ’ । आह । किमिति[8] । उच्यते । तत्प्रतिषिध्यमानम् ‘ अकं ’ भवति । असुखमित्यर्थः । पुनरपि च प्रतिषिध्यमानं ‘ नाकं ’ भवति । ततो द्विः प्रतिषेधः प्रकृतिमापादयति[9] । नाकमित्युक्ते सुखमिति प्रतीयते । ब्राह्मणमपि चैतस्मिन्नर्थे[10] भवति । ‘ न वा अमुं लोकं जग्मुषे किंचनाकम् ’ [काठ० सं० २१ । २] इति । आह । किमुक्तं भवति ।

१ ग. च. ज. ‘ भासं ’ नास्ति. २ ग. ज. शोभनगता. ३ ग. योज्यम् । १७ । पृश्नि°. ४ क. ख. घ. ट. ठ. ड. ‘ इति ’ नास्ति. ५ ग. °द्भिश्च ॥ १८ ॥ नाक°. ६ ग. ज. ट. ठ. ड. भासां ज्योतिषां. ७ क. ख. बभ्रमीति; ग. ज. बभ्रम्यते; च. बंभ्रम्यते; ठ. ड. बभ्रमिति. ८ ग. ज. किमिदं उच्य°. ९ क. ख. घ. ट. ठ. ड. प्रकृतमापा°. १० घ. ट. ठ. ड. °न्नर्थेष्वेव भवति.

अमुमेव द्युलोकं जग्मुषे गतवते न किंचनाकं[1] किंचिन्नासुखमित्यर्थः । किं कारणम् । य एव हि 'पुण्यकृतो' भवन्ति ते 'एव हि तत्र गच्छन्ति' । न च पुण्यकृतां दुःखेन भवितुं न्याय्यम्[2] ।

'गौरादित्यो भवति' । आह । कस्मात् । उच्यते । 'गमयति' ह्यसौ 'रसान्' आत्मानं प्रति । उपक्षयं वा गमयति । किंच । 'गच्छत्यन्तरिक्षे' स एवात्मना । 'अथ द्यौः' कस्माद्द्यौरिति । उच्यते । यत् यस्मादियं द्यौः 'पृथिव्या अधि' उपरि 'दूरम्' अध्वानं 'गता भवति' । किंच । 'यत्' यस्मात् 'चास्यां ज्योतींषि' ग्रहनक्षत्रतारकादीनि 'गच्छन्ति' तस्माद्द्यौः[3] ।

'विष्टबादित्यो भवति' । आह । कस्मात् । उच्यते । आभिमुख्येन ह्येष 'रसान्' भौमानान्तरिक्षांश्च विष्टैः[4] प्रविष्टो रश्मिभिरादातुम् । किंचाभिमुख्येन विष्टः प्रविष्टो 'भासं ज्योतिषां' ग्रहादीनाम् । अथवायमेवाभिमुख्येन 'आविष्टो भासेति वा' । सर्वतो ह्येष संदीप्तो भवति । आह । 'अथ द्यौः' कस्माद्विष्टबिति । उच्यते । इयमपि ह्याविष्टा ज्योतिर्भिः ग्रहनक्षत्रादिभिः । ये चान्ये पुण्यकृतस्तैश्च[5] । तस्माद्विष्टबिति[6] ।

'नभ आदित्यो भवति' । आह । कस्मात् । उच्यते । 'नेता' ह्येष 'भासां' सर्वासु दिक्षु । 'ज्योतिषां' च 'प्रणयः' । व्याख्यातमेतत् । अपि वा भन एव स्याद्विपरीतः[7] । भनः भासनः सन् नभ इत्युक्तो विपर्ययेण । 'न न भातीति वा' । न न भाति भात्येवेति नभः । 'एतेन द्यौर्व्याख्याता' । सापि ह्यादित्यवन्नेत्री[8] भासामित्यादि योज्यम् ॥१४॥[9]

इति निरुक्तवृत्तौ सप्तमाध्यायस्य[10] चतुर्थः पादः[11] ।

रश्मिनामान्युत्तराणि पञ्चदश रश्मिर्यमनात्तेषामादितः साधारणानि पञ्चाश्वरश्मिभिर्दिङ्नामान्युत्तराण्यष्टौ दिशः

---

१ ग. ज. किंचन नाकं. २ ग. न्याय्यम् ॥ १९ ॥ गौ°. ३ ग. °स्माद्द्यौः ॥ २० ॥ विष्ट°. ४ क. ख. घ. ट. ठ. ड. आविष्टः. ५ घ. ट. ठ. ड. सुपुण्यकृतः. ६ ग. °बिति ॥ २१ ॥ नभ°. ७ च. °रीतो नभः । भास°. ८ घ. ट. ठ. ड. 'हि' नास्ति. ९ क. ख. २; ग. २२; घ. ट. ठ. ड. च. ज. अङ्को नास्ति. १० घ. ट. सप्तमस्याध्यायस्य. ११ च. पादः समाप्तः.

कस्माद्दिशतेरासदनादपि वाभ्यशनात्[1] तत्र काष्ठा इत्येतदनेकस्यापि सत्त्वस्य नाम[2] भवति काष्ठा दिशो भवन्ति क्रान्त्वा स्थिता भवन्ति काष्ठा उपदिशो भवन्तीतरेतरं क्रान्त्वा स्थिता भवन्त्यादित्योऽपि काष्ठोच्यते क्रान्त्वा स्थितो भवत्याज्यन्तोऽपि काष्ठोच्यते क्रान्त्वा स्थितो भवत्यापोऽपि काष्ठा उच्यन्ते[3] क्रान्त्वा स्थिता भवन्तीति स्थावराणाम् ॥ १५ ॥

आदित्यसंबन्धेनैव 'रश्मिनामान्युत्तराणि पञ्चदश'। 'रश्मिर्यमनात्' उदकस्याश्वानां वा। 'तेषां पञ्च[4]' यानि 'आदितः' तानि 'साधारणानि अश्वरश्मिभिः'। कतमानि पुनस्तानि। खेदयः किरणाः इत्येवमादीनि। खे ईर्यन्ते[5] खे गच्छन्तीति खेदयः। किरणाः। ते हि विक्षिप्ता भवन्ति।

'दिङ्नामान्युत्तराण्यष्टौ'। आदित्योपलक्षणा एव हि दिश इत्यादित्यनामभ्य उत्तराणि दिङ्नामानि। कियन्ति पुनस्तानि। अष्टौ। कानि। 'आता आशा उपराः' इत्येवमादीनि। आता आगता ह्येतास्तं तमर्थं प्रति भवन्ति। आशा अभ्यश्नुवते ह्येताः सर्वमेव यावदस्ति किंचित्। उपराः सर्वमेव ह्येता उपगम्य रता भवन्तीत्युपराः। आह। 'दिशः कस्मात्'। 'दिशतेः' अतिसर्जनार्थस्य [धा० ६ । ३]। अतिसृज्यन्ते ह्यासु हविरादीनि देवतानाम्। अथवा 'आसदनात्'। तं तमर्थं प्रत्येता आसन्ना भवन्ति। 'अपि वाभ्यशनात्'। अभ्यश्नुवते ह्येतास्तं तमर्थम्[6]।

'तत्र[7]' तस्मिन्नष्टके दिङ्नामगणे[8] 'काष्ठा इत्येतन्नामानेकस्यापि सत्त्वस्य भवति'। तद्यथा। 'काष्ठा दिशो भवन्ति'। आह। किं कारणमिति। उच्यते। क्रान्त्वा[9] ह्येतास्तं तमर्थं प्रति गत्वा स्थिता भवन्ति। न हि तदस्ति यत्रैता न सन्ति। 'काष्ठा उपदिशो भवन्ति'।

---

१ ङ. °भ्यसना°. २ क. ख. छ. त. द. 'नाम' नास्ति. ३ क. ख. द. १; छ. त. २३. ४ च. 'पंच' नास्ति. ५ ग. च. ज. दयन्ति. ६ ग. च. ज. तमर्थं प्रति. ७ घ. ट. ठ. ड. तत्र काष्ठा इत्येतदनेकस्यापि सत्त्वस्य नाम भवति। तत्र तस्मिन्नष्टके°. ८ घ. दिग्नाम°; ट. दिग्नाम° ङ्ना. ९ क. ख. घ. ट. ठ. ड. क्रान्त्वा स्थिता भवन्ति। क्रान्त्वा ह्येता°.

ता[1] अपि हीतरेतरं क्रान्त्वा दिग्भिः साकं स्थिता भवन्ति । ‘ आदित्योऽपि काष्ठोच्यते ’ । असावपि[2] स्वं स्थानं क्रान्त्वा गत्वा[3] स्थितो भवति । आज्यॅन्तोऽपि[4] शरपथान्तः काष्ठोच्यते । असावपि स्वप्रदेशं क्रान्त्वा गत्वा स्थितो भवति । ‘ आपोऽपि काष्ठा उच्यन्ते ’ । ताः पुनर्द्वय्यः[5] स्थावराश्चास्थावराश्च । तत्र ‘ क्रान्त्वा ’ गत्वा जलाशयमेताः ‘ स्थिता भवन्तीति स्थावराणां ’ काष्ठात्वम् । अस्थावराणां पुनः क्रामन्त्येवैता न क्वचित्तिष्ठन्तीति काष्ठा मेध्या[6] आपः[7] । मन्त्रोऽपि चैतस्मिन्नेवार्थे भवति ॥ १५[8] ॥

अतिष्ठन्तीनामनिवेशनानां काष्ठानां मध्ये निहितं शरीरम् । वृत्रस्य निण्यं वि चरन्त्यापो दीर्घं तम आशयदिन्द्रशत्रुः [ऋ० सं० १ । ३२ । १०] ॥ अतिष्ठन्तीनामनिविशमानानामित्यस्थावराणां काष्ठानां मध्ये निहितं शरीरं मेघः शरीरं शरीरं शृणातेः शम्नातेर्वा वृत्रस्य निण्यं[9] निर्णामं विचरन्ति विजानन्त्याप इति दीर्घं द्राघतेस्तमस्तनोतेराशयदाशेतेरिन्द्रशत्रुरिन्द्रोऽस्य शमयिता वा शातयिता वा तस्मादिन्द्रशत्रुस्तत्को वृत्रो मेघ इति नैरुक्तास्त्वाष्ट्रोऽसुर इत्यैतिहासिका अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्त्यहिवत्तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च विवृद्ध्या शरीरस्य स्रोतांसि निवारयांचकार तस्मिन्हते प्रसस्यन्दिर[10] आपस्तदभिवादिन्येषर्ग्भवति ॥ १६[11] ॥

---

१ क. ख. घ. ट. ठ. ड. इतरेतरं क्रान्त्वा स्थिता भवन्ति । ता अपि°. २ क. ख. घ. ट. ठ. ड. क्रान्त्वा स्थितो भवति । असावपि°. ३ घ. ट. ठ. ड. ‘ गत्वा ’ नास्ति. ४ घ. ट. ठ. ड. आज्यन्तोऽपि काष्ठोच्यते । आज्यन्तोऽपि शर°. ५ घ. ट. ठ. ड. द्वय्या. ६ क. ख. ग ठ. मेध्या. ७ क. ख. ठ. ड. पुस्तकेषु. ‘आपः’ इत्यस्यानन्तरं खण्डसमाप्तिः. ८ क. ख. १; ग. २१; घ. ट. ठ. ड. च. ज. अङ्को नास्ति. ९ छ. त. द. ‘ निण्यं ’ नास्ति. १० क. ख. छ. द. प्रशस्य°; त. प्रशंस्य° स. ११ क. ख. द. २; छ. त. २४.

अतिष्ठन्तीनामिति । हिरण्यस्तूपस्येयमार्षम् । दासपत्नीरिति च । त्रिष्टुभावेते । अग्निष्टोमे निष्केवल्यं नाम शस्त्रं तत्र निविद्धानीयं यत्सूक्तं तत्रैते द्वे अपि शस्येते [आश्व०श्रौ०५।१५] । न तिष्ठन्तीत्यतिष्ठन्त्यः । तासामतिष्ठन्तीनां मेघोदरान्तर्गतानामपाम् । ता हि मेघे गच्छति गच्छन्त्येव तदाधारत्वात् । अनिवेशनानामनिविशमानानाम् । न हि ताः क्वचिन्निविशन्ते यावज्जलाशयं नाप्नुवन्ति । तासामेवंविधानां काष्ठानां मध्येऽवस्थितानां बाह्यतो मेघाख्यं निहितमवस्थापितं धात्रा शरीरमावृत्यापस्तासामेव गुप्तये । ताः पुनस्तस्य[1] मेघस्य वृत्रस्य[2] निण्यं निर्णामं यत्रासौ[3] नीचैर्नमति[4] तं प्रदेशं विजानन्तीव यतस्तेन प्रदेशेन विचरन्ति प्रचरन्ति । निम्नानुसारिण्यो हि ताः । असावपि वृत्रस्तासु प्रक्षरन्तीषु तत्प्रक्षरणनिरोधं[5] चिकीर्षुः स्वशरीरविवृद्ध्या दीर्घं तमः । स हि तमःस्तत[6] एव धूमादिप्रभवत्वात् । यावत्तं[7] प्रदेशं निम्नमनुसरन्त्यो मेघस्य ताः स्तुता[8] भवन्ति निपित्सन्त्यस्ततो[9] बहुतरमसौ वर्धते तदवरुरुत्सया । एवं दीर्घं तम आतत्याशयत्[10] आशेते इत्यर्थः । कः पुनरेवमाशयत् । इन्द्रशत्रुरिति समस्तार्थः ।

अथैकपदनिरुक्तम् । ‘ शरीरं शृणातेः ’ हिंसार्थस्य [धा० ९ । १६] । हिंस्यते हि तत् । ‘ शम्नातेर्वा ’ हिंसार्थस्यैव । ‘ दीर्घं द्राघतेः ’ वृद्ध्यर्थस्य [धा० १।११४] । वृद्धं हि तद्भवति । ‘ तमस्तनोतेः ’ । तेन हि सर्वमेव ततं भवति । ‘ आशयत् ’ आङ्पूर्वस्य ‘ शेतेः ’ । ‘ इन्द्रशत्रुः इन्द्रोऽस्य शमयिता वा ’ हन्तेत्यर्थः । ‘ शातयिता वा ’ हन्तैव । धात्वन्यत्वमर्थैकत्वम् ।

इह मन्त्रे वृत्र[11] इत्येतच्छ्रुतम् । तदेतन्निगमानुप्रसक्तं[12] विचार्यत इत्युपयुक्तस्तच्छब्दः । आह । को वृत्रः । उच्यते । ‘ मेघ इति नैरुक्तास्त्वाष्ट्रोऽसुर

---

१ घ. ट. ठ. ड. ‘ तस्य ’ नास्ति. २ क. ख. घ. ट. ठ. ड. वृत्रस्य मेघस्य. ३ क. ख. घ. ठ. ड. येनासौ; ट. येनासौ° यत्र पाठः; ग. ज. येत्रासौ. ४ ग. च. ज. नीचैर्णमति. ५ घ. ट. ड. °रणानिरो°; ठ. °रणानिरो° ण. ६ क. ख. घ. ट. ठ. ड. तमः स्वत एव°. ७ ग. च. ज. यावत्तं. ८ क. ग. ताः स्तुताः; च. ताः स्तुताः° सु; घ. ट. ठ. ड. ता स्तुताः. ९ घ. ट. निःपित्सन्त्यपित्स्यन्ति ततो; ठ. ड. निःपित्स्यन्त्यः ततो°. १० क. ख. आवृत्या°; च. आतत्य आवृत्याशयत्. ११ घ. ट. ठ. ड. वृत्रं. १२ ग. च. ज, तदेव तन्नि°.

इत्यैतिहासिकाः’। निरुक्तमधीयते विदुश्च ये ते नैरुक्ताः । आह । यदि मेघो वृत्रो य एषु[1] मन्त्रेषु[2] संग्रामः[3] श्रूयते तत्र तत्र[4] कः समाधिरिति । उच्यते । ‘अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्ति’। अपां च मेघोदरान्तर्गतानां ज्योतिषश्च वैद्युतस्योद्भूतवृत्तेर्मिश्रीभावकर्मणो वर्षकर्म जायते । तेन हि वैद्युतेन ज्योतिषा वाय्वाविष्टितेनेन्द्राख्येनोपताप्यमाना[5] आपः प्रस्यन्दन्ते वर्षभावाय प्रकल्पन्ते[6] । तत्रैवं सत्युदकतेजसोरितरेतरप्रतिद्वंद्वभूतयोरुपमार्थेन रूपककल्पनया[7] युद्धवर्णा भवन्तीति । युद्धरूपकाणीत्यर्थः[8] । न ह्यत्र यथाभूतं युद्धमस्ति । न हीन्द्रस्य शत्रवः केचन सन्ति । मन्त्रोऽपि चैतस्मिन्नर्थेऽस्ति नेन्द्रस्य शत्रवः[9] । ‘यदचरस्तन्वा वावृधानो[10] बलानीन्द्र प्रब्रुवाणो जनेषु । मायेत्सा ते यानि युद्धान्याहुर्नाद्य शत्रुं न नु पुरा विवित्से [ऋ० सं० १०।५४।२]॥ वामदेवपुत्रस्य[11] बृहदुक्थस्यार्षम् । त्रिष्टुप् । व्यूढस्याष्टमेऽहनि[12] निष्केवल्ये शस्यते [आश्व० श्रौ० ८।७]। यदचरस्त्वं नानाप्रकारं तन्वा वावृधानः शरीरेण विग्रहवान् भूत्वा वावृधानः पुनः पुनर्वर्धमानः । कथं पुनरचरः । बलानीन्द्र प्रब्रुवाणो जनेषु । बलान्यात्मीयानि वीर्याणि हे इन्द्र प्रब्रुवाण इव प्रकथयन्निव । क्व । जनेषु । किं त्वं तथैव । न । मायेत्सा ते यानि युद्धान्याहुः[13] । माया सा तव । ऐश्वर्ययोगात्तथा वान्यथा[14] वा भवसि । न ते तव[15] निजं रूप-

को वृत्रः। मेघ इति नैरुक्तास्त्वाष्ट्रोऽसुर इत्यैतिहासिकाः

वृत्रस्य मेघत्वे प्रमाणम्

इन्द्रस्य न कोऽपि शत्रुरित्यर्थे ऋक्

---

१ क. ख. ग. ज. घ. ट. ठ. ड एषः. २ घ. ट. ठ. ड. °षु तत्र तत्र संग्रा°. ३ ग. ज. संग्रामे श्रू°; च. संग्रामे श्रू° मः. ४ क. ख. घ. ट. ‘तत्र’ सकृदेव. ५ च. वाय्वाविष्टेन. ६ क. ख. कल्प्यन्ते; घ. ट. ठ ड. कल्पन्ते; च. प्रकल्प्यन्ते. ७ क. ख. घ. ट. ठ. ड. रूपकल°. ८ क. ख. घ. ट. ठ. ड युद्धे रू°; सर्वेषु लिखितपुस्तकेषु ‘रूपकानि’ इति पाठः. ९ च. शत्रवः । २० ।. १० ग. वावृधानो० विवित्से ॥ १४ ॥ वाम°. ११ ठ. ड. °देवस्य पुत्रस्य; च°. देवस्य पुत्रस्य. १२ ठ. व्यूळ्हस्या°; ड. व्यूल्हस्या°. १३ ग. ज. ‘यानि युद्धान्याहुः’ नास्ति. १४ ग. ज. चान्य°. १५ ग. ज. ‘तव’ नास्ति.

[1]मेकमवधृतमस्तीत्यभिप्रायः । यानि च युद्धान्याहुरैतिहासिका नानारूपाण्युपप्रदर्शयन्तः सापि च तव मायैव । किं कारणम् । नाद्य शत्रुस्तवास्ति प्रत्यनीकभूतो न नु पुरा नापि पुरा कश्चिदासीत् । [2]यावद्वीर्यं किंचित्क्वचिदस्ति सर्वं [3]तत्त्वमेव । 'वीर्यं वै प्राणो वीर्यमिन्द्र इति ह विज्ञायते' [मैत्रा० सं० १ । ६ । ९] । कुतस्ते शत्रुर्येन साकं [4]युध्येथाः । एतच्च त्वमपि विवित्से वेत्स्येव न केवलमहमित्यभिप्रायः । एवमेतस्मिन्मन्त्रे मायामात्रत्वमेव युद्धमिति श्रूयते ।

एतस्मिन्नेवार्थे ब्राह्मणवाक्ये

'विज्ञायते च [5]तस्मादाहुर्नैतदस्ति [6]यद्देवासुरमिति' [शत० ११ । १ । ६ । ९] । तस्मात्साधूक्तम् 'अपां च ज्योतिषश्च मिश्रीभावकर्मणो वर्षकर्म जायते तत्रोपमार्थेन युद्धवर्णा भवन्ति' । आह । किं वृत्रवदेव युद्धरूपाणि भवन्ति । नेत्युच्यते । 'अहिवत्तु खलु मन्त्रवर्णा ब्राह्मणवादाश्च' । [7]तुशब्दः समुच्चयार्थो द्रष्टव्यः । वृत्रवच्चाहिवच्चेति मन्त्रवर्णा मन्त्रलिङ्गानि भवन्ति ब्राह्मणवादाश्च शाखान्तरेषु भवन्ति तदप्युपेक्षितव्यम् ।

मन्त्रेषु ब्राह्मणेषु च मेघोऽहिरित्यपि वर्ण्यते

'तस्मिन्' अहिवृत्राख्ये मेघे 'हते प्रसस्यन्दिरे' प्रस्यन्दितवत्य 'आपः' । '[8]तदभिवादिन्येषा' तस्यार्थस्याभिमुख्येन वादिन्येषा 'ऋग्भवति' ॥ [9]१६ ॥

दासपत्नीरहिगोपा अतिष्ठन्निरुद्धा आपः पणिनेव गावः । अपां बिलमपिहितं यदासीद् वृत्रं जघन्वाँ अप तद्ववार [ऋ० सं० १ । ३२ । ११] ॥ दासपत्नीर्दासाधिपत्न्यो दासो दस्यतेरुपदासयति कर्माण्यहिगोपा अतिष्ठन्नहिना गुप्ता अहिरयनादेत्यन्तरिक्षेऽयमपीतरोऽहिरेतस्मादेव निर्ह्रसितोपसर्ग आहन्तीति । निरुद्धा आपः

१ घ. ट. ठ. ड. 'एकं' नास्ति. २ घ. ट. ठ. ड. यावद्वर्णं; ट. यावद्वर्णं° द्वीर्यं. ३ ट. ठ. 'तत्' नास्ति. ४ क. ख. घ. ट. ठ. ड. युयोधिथ. ५ क. ख. ग. ज. तदाहु°. ६ क. ख. ग. ज. यद्देवा°. ७ क. ख. घ. ट. ठ. ड. चः समु°. ८ ठ. ड. तदभिवादिन्येषर्भवति । तदभि°. ९ क. ख. २; ग. २४; घ. ट. च. ज. अङ्को नास्ति; ठ. ड. °वति । इति निरुक्तटीकायां द्वितीयाध्याये षोडशः खण्डः

पणिनेव गावः । पणिर्वणिग्भवति पणिः पणनाद्वणिक्पण्यं नेनेक्ति । अपां बिलमपिहितं यदासीत् । बिलं भरं भवति बिभर्तेर्वृत्रं जघ्निवानपववार तद् वृत्रो वृणोतेर्वा वर्ततेर्वा वर्धतेर्वा यदवृणोत्तद् वृत्रस्य वृत्रत्वमिति विज्ञायते यदवर्तत तद् वृत्रस्य वृत्रत्वमिति विज्ञायते यदवर्धत तद् वृत्रस्य वृत्रत्वमिति विज्ञायते ॥ [1]१७ ॥

[2]इति द्वितीयाध्यायस्य पञ्चमः पादः ॥

अहिशब्देन मेघवाचिका ऋक्

[3]दासपत्नीरहिगोपा अतिष्ठन्निति । दासपत्नीरापः । अहिगोपा मेघगोपाः । अतिष्ठन् स्थितवत्यो निरुद्धास्ता दासपत्नीरापः । यथा केनचित्पणिना वणिजा कस्मिंश्चिद्द्वी[4]प्यन्तरे विक्रयार्थं गावो निरुद्धास्तिष्ठेयुरेवं स्थितवत्यः । ताः पुन[5]रेवं निरुद्धाः सत्यस्तेन मेघेन तासामपां यद्बिलं निर्ग[6]मनद्वारमपिहितमासीत्तेन मेघेन तद्यदेन्द्रस्तं मेघं वृत्रं निजघ्निवान् अह[7]न्हत्वा चापववारापावृतवान् अथ तदा तस्मिन्निहतेऽपावृते च द्वारे ता आपः [8]प्रसस्यन्दिरे वर्षभावेनेति समस्तार्थः ।

अथैकपदनिरुक्तम् । ' दासपत्नीर्दासाधिपत्न्यः ' । दासः कर्मकरः । तं हि ता अधिष्ठाय पान्ति रक्षन्ति । स हि कर्मणा श्रान्तस्तासु पीतासु विश्रान्त आप्यायितो भवति । विग्रहप्रसक्तं निरुच्यते । ' दासो दस्यतेः ' [धा० ४ । १०७] । स हि ' उपदासयति ' उप[9]क्षपयति कृष्यादीनि ' कर्माणि ' । ' अहिगोपाः ' अहिना गुप्ताः । ' अहिः ' कस्मात् । उच्यते । ' अयनात् ' । ' एति ' ह्यसौ ' अन्तरिक्षे ' । शब्दसामान्यान्निरुच्यते । ' अयमपीतरोऽहिः ' सर्पः ' एतस्मादेव ' । असावपि ह्येति । अथवा ' निर्ह्रसितोपसर्गः ' स्यात् । कथम् ।

---

१ क. ख. द. ३; छ. त. २५. २ ड. थ. ध. ठ. ड. त. ' इति० पादः ' नास्ति; छ. इति पञ्चमः पादः; द० इति नैरुक्तस्य द्विती°. ३ ठ. ड. दासपत्नीरिति । दासपत्नीरहि°. ४ ठ. ड. °स्मिंश्चिद् द्वीपान्तरे. ५ ग. ज. पुनः खे निरु°. ६ क. ख. निर्गमद्वारं; ग. च. ज. निर्ग्रमणद्वारं. ७ घ. ट. ठ. ड. अहनत्. ८ ग. ज. ' प्र ' नास्ति. ९ क. ख. घ. ट. ठ. ड. उपक्षयति.

'आहन्ति' असौ भोगेनेत्यहिः। आङ्पूर्वस्य हन्तेः। स पुनरयमुपसर्गं निहृस्य ह्रस्वं कृत्वाहिरित्युच्यते। 'पणिर्वणिग्भवति' इति पर्यायेण तत्त्ववचनम्। 'पणिः पणनात्'। पणति ह्यसौ व्यवहारं करोति। पर्यायप्रसक्तं निरुच्यते। 'वणिक् पण्यम्'। वणिजो यद्द्रव्यं तत्पण्यम्। तदसौ 'नेनेक्ति' नित्यकालं शुचि करोति मूल्यार्हं स्यादिति। 'बिलं भरं भवति' बिभर्तेर्धातोः। भ्रियते हि तदुदकादिभिः। 'वृत्रो वृणोतेर्वा वर्ततेर्वा वर्धतेर्वा' इत्येषां धातूनामन्यतमस्य। ब्राह्मणमपि चैतस्मिन्नर्थे भवति। 'यदवृणोत्' अन्तरिक्षमुदकं वा महत्त्वात् 'तद्वृत्रस्य वृत्रत्वमिति' एवं ब्राह्मणेऽपि विचार्यमाणे ज्ञायते। अथवा 'यदवर्तत तद्वृत्रस्य वृत्रत्वमिति'। त्वष्टेन्द्रशत्रुर्वर्धस्वेत्यनेनालभ्यमानः सोमो यदसुररूपेणावर्तत। अथवा यदवर्तयदिन्द्रेण हतो वृत्रो मेघः अपां बिले अपावृतेऽपो वृष्टिभावेनावर्तयत्प्रावर्तयत् 'तद्वृत्रस्य वृत्रत्वम्'। अथवा 'यदवर्धत' असावतिमात्रप्रमाणं 'तद्वृत्रस्य वृत्रत्वं' स्यादिति॥ १७॥

इति निरुक्तवृत्तौ सप्तमाध्यायस्य पञ्चमः पादः।

रात्रिनामान्युत्तराणि त्रयोविंशती रात्रिः कस्मात्प्रमयति भूतानि नक्तंचारीण्युपरमयतीतराणि ध्रुवीकरोति रातेर्वा स्याद्दानकर्मणः प्रदीयन्तेऽस्यामवश्यायाः उषोनामान्युत्तराणि षोळशोषाः कस्मादुच्छतीति सत्या रात्रेरपरः कालस्तस्या एषा भवति॥ १८॥

'काष्ठा इत्येतदनेकस्यापि सत्त्वस्य भवति' [निरु० २।१५] इत्यत आरभ्य दिङ्नामप्रसक्तानुप्रसक्तमुक्तम्। प्रकृतमिदानीमुच्यते। 'रात्रि-

---

१ क. ख. घ. ट. ठ. ड. 'इति' नास्ति. २ क. ख. घ. द. ठ. ड. भूतं. ३ घ. ट. ठ. ड. °त्येतेषां. ४ क. ख. ग. ज. 'तद्वृत्रस्य......णावर्तत। अथवा यदवर्तयत्' नास्ति. ५ घ. ट. ठ. ड. त्वष्टेन्द्र°. ६ च. 'अथवा......प्रावर्तयत्तद्वृत्रस्य वृत्रत्वं' नास्ति. ७ क. ख. ३; ग. २५; घ. ट. ठ. ड. च. ज. अङ्को नास्ति. ८ घ. ट. सप्तमस्याध्यायस्य. ९ घ. ट. पादः संपूर्णः; ठ. ड. पादः समाप्तः. १० क. ख. थ. द. षोडशो°; छ. त. षोलशो°, ड. षोधशो°. ११ क. ख. द. १; छ. त. २६. १२ घ. ट. ठ. ड. °सक्तमिदमुक्तं.

नामान्युत्तराणि त्रयोविंशतिः' । रात्रेर्नामा[1]नि उत्तराणीति प्रकृतेभ्यो दिङ्नामभ्यः । तमः[2]सतत्त्वा हि रात्रिः । तस्य च तमसो दिक्ष्वेवात्मलाभो भवति । अतो दिङ्नामभ्य उत्तराणि रात्रिनामानि । कियन्ति पुनस्तानि । त्रयोविंशतिः । त्रीणि[3] च विंशतिश्च त्रयोविंशतिः । कतमानि पुनस्तानि । 'श्यावी क्षपा शर्वरी' इत्येवमादीनि । श्याववर्णा हि रात्रिरिति श्यावी । स्वैः स्वैः कर्मभिरहनि क्षीणान्प्राणिन इयं स्वापेन पातीति क्षपा । अस्यां हि सुप्ताः पुन[4]र्नवा इव प्राणिनः प्रातरुत्तिष्ठन्ति । शरणमस्यां स्वापार्थं व्रियत इति शर्वरी इत्येवमादि सर्वत्र योज्यम् । आह । 'रात्रिः कस्मात्' इति । उच्यते । इयं ह्यागच्छन्ती प्रकर्षेण 'रमयति' । कानि । 'भूतानि नक्तं[5]चारीणि' पिशाचादीनि । तानि हि विगतेऽहनि रात्र्यामुपस्थितायां [6]प्राप्तोऽयं विहारसमय इति प्रकर्षेण रमन्ते । 'उपरमयतीतराणि ध्रुवीकरोति' । इतराण्यपि दिवाचारीणि सैवोपरमयति । तस्यां ह्युपस्थितायां दिवाचराणि भूतानि मनुष्यादीनीतिकर्तव्यताभ्य उपरमन्ति उपरम्य च स्थिरीभवन्ति निवासाय । 'रातेर्वा स्याद्दानकर्मणः' दानार्थस्य । आह । किमस्यां प्रदीयते । उच्यते । 'प्रदीयन्तेऽस्यामवश्यायाः' । अवश्यमायन्तीत्यवश्या-या[7]स्तुषारा इत्यर्थः । ते हि रात्रौ निपतन्ति ।

'उषोनामान्युत्तराणि षोळ[8]श' । उषसो नामानि । रात्रेरेव ह्यपरः काल उषआख्यो भवतीति रात्रिनामभ्य उत्तराणि उषोनामानि । कियन्ति पुनस्तानि । षोडश । षट् च दश च[9] । कतमानि पुनस्तानि । 'विभावरी सूनरी' इत्येवमादीनि । विविधां[10]मियं भासं वृणोतीति विभावरी । शोभनं नराणामस्यामुत्थानं भवतीति सूनरीत्येवमादि निर्वचनं योज्यम् । आह । 'उषाः कस्मात्' इति । उच्यते[11] । 'उच्छतीति सत्याः' । उच्छी विवासे [धा० १।२१६] । विवासयति हीयं तमांसि । तस्मादुच्छतीत्येवमस्या एतस्मिन् कर्मणि सत्याः कर्तरि कारके

---

१ क. ख. घ. ट. ठ. ड. °मानि रात्रिनामानि । उत्त°. २ क. ख. °सतन्त्वा; घ. °सतत्रा, ट. सतत्त्रों° त्वा. ३ घ. ट. ठ. ड. 'त्रीणि च...विंशतिः' नास्ति. ४ ग. च. ज. पुनर्णवा. ५ ग. च. ज. नक्तंचराणि. ६ च. प्राप्तायां वि°. ७ ग. ज. °श्यायाः । विप्रुषः तुषा°; च. °श्यायाः । प्रुष्वाःइत्य°. ८ क. ख. ग. ज. घ. ट. षोड़श; च. षोलश; ड. षोधश. ९ क. ख. घ. ट. ठ. ड. च षोडश। -कृत°. १० घ. ट. ठ. ड. विविधां भासमियं वृणो°. ११ घ. ट. ठ. ड. 'उच्यते' नास्ति.

उषा इत्येतदभिधानं भवति । आह । का पुनरियमुषा इति । उच्यते । ‘ रात्रेरपरः कालः ’ स उषा इत्युच्यते । आह । कथमेतद्गम्यते रात्रेरपरः काल उषा इति । उच्यते । ‘ तस्याः ’ उषसो रात्र्यपरकालत्वे ‘ एषा ’ निर्वाचिका ऋग् ‘ भवति ’ ॥ १८ ॥

इदं श्रेष्ठं ज्योतिषां ज्योतिरागाच्चित्रः प्रकेतो अजनिष्ट विभ्वा । यथा प्रसूता सवितुः सवायँ एवा रात्र्युषसे योनिमारैक् [ऋ० सं० १ । ११३ । १] ॥ इदं श्रेष्ठं ज्योतिषां ज्योतिरागमच्चित्रं प्रकेतनं प्रज्ञाततममजनिष्ट विभूततमं यथा प्रसूता सवितुः प्रसवाय रात्रिरादित्यस्यैवं रात्र्युषसे योनिमरिचत्स्थानं स्त्रीयोनिरभियुत एनां गर्भस्तस्या एषापरा भवति ॥ १९ ॥

इदं श्रेष्ठमिति । आङ्गिरसस्य कुत्सस्येयमार्षमुत्तरा च । उभे अपि त्रिष्टुभावेते । प्रातरनुवाकाश्विनयोः शस्येते [आश्व० श्रौ० ४ । १४] ।

उषसो रात्र्यपरकालत्वे ऋक्

इदमुषोलक्षणं ज्योतिः श्रेष्ठमादित्यादीनां ज्योतिषामिति निर्धारणे षष्ठी । आदित्यो हि तापकः प्रकाशकः । चन्द्रमा अप्यतिशीतः प्रकाशकश्च । इदं पुनर्नात्युष्णं नातिशीतं प्रकाशकं चेत्येवमादित्यादीनामिदमेव श्रेष्ठम् । आगादागच्छतीत्यर्थः । चित्रं चायनीयं पूजनीयं दर्शनीयं वा श्रेष्ठत्वादेव । प्रकेतनं प्रज्ञाततमं प्रकाशतमम् । अजनिष्ट जातमित्यर्थः । जातं सदागच्छति सर्वासु दिक्षु । विभ्वा विभूततमम् । इदमतिमहत्त्वाद्विभूततमं विस्तीर्णतममितराणि परिच्छिन्नतराणि ज्योतींष्यपेक्ष्य । किंच । यथा प्रसूता प्रकर्षेण सूता प्रसवमनुप्राप्ता । सूतिशब्दः प्रसवार्थः । रात्रिरादित्यस्य प्रसवायादित्योत्सृष्टे देशे जायत एवमेव रात्रिरुषसोऽपि जन्मार्थं योनिं स्थानमवकाश-

---

१ क. ख. घ. ट. ठ. ड. °मेतदुच्यते रात्रे° . २ क. ख. १; ग. २६; च. २२; घ. ट. ज. अङ्को नास्ति; ठ. ड. °भवति । इत्यष्टादशः खण्डः. ३ क. ख. द. २; छ. त. २७. ४ घ. ट. ठ. ड. ‘ उत्तरा च ’ नास्ति. ५ ग. ज. शस्यते । च; च. शस्येते । चँ. ६ घ. ट. अथ विशीतः.

मुषस आत्मलाभायारैक् आरेचयति । ददातीत्यर्थः । यथोषा आदित्यस्य जन्मनो हेतुस्तदनन्तरजन्मत्वादेवं रात्रिरुषसो जन्मनो हेतुरित्येवमस्यामृचि रात्रेरेवापरः काल उषःसंज्ञित इति गम्यते । स्थानं योनिशब्देनोच्यते । यद्धि यस्मिन्निधीयते तत्तेन साकं युतं भवति । मिश्रीभूतमित्यर्थः । इयमपीतरा ' स्त्रीयोनिरेतस्मादेव ' । किं कारणम् । ' अभियुतो ' हि ' गर्भ एनां ' भवति । आमिश्रीभूत इत्यर्थः । पूर्वत्र ' अयमपीतरो योनिरेतस्मादेव । किम् । परियुतो भवति ' [निरु० २ । ८] इति

योनिशब्दः किमर्थं पुनर्व्युत्पाद्यते

परियवनक्रियासामान्येन निरुक्तो योनिशब्दः । इह पुनः ' अभियुत एनां गर्भः ' इति मिश्रीभावसामान्येन । उभयलिङ्गत्वं चास्योपदर्शितमिह स्त्रीलिङ्गं तत्र पुंलिङ्गमिति ।

' तस्याः ' उषस एषापरा ऋग् ' भवति ' अस्यैवार्थस्य दृढतायै रात्रेरपरः काल उषा उच्यत इति ॥ १९ ॥

रुशद्वत्सा रुशती श्वेत्यागादारैगु कृष्णा सदनान्यस्याः । समानबन्धू अमृते अनूची द्यावा वर्णं चरत आमिनाने [ऋ० सं० १ । ११३ । २] ॥ रुशद्वत्सा सूर्यवत्सा रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः सूर्यमस्या वत्समाह साहचर्याद्रसहरणाद्वा रुशती श्वेत्यागात् । श्वेत्या श्वेततेररिचत्कृष्णा सदनान्यस्याः कृष्णवर्णा रात्रिः कृष्णं कृष्यतेर्निकृष्टो वर्णोऽथैने संस्तौति समानबन्धू समानबन्धने अमृते अमरणधर्माणावनूची अनूच्याविवीतरेतरमभिप्रेत्य द्यावा वर्णं चरतस्ते एव द्यावौ द्योतनादपि वा द्यावा चरतस्तया सह चरत इति स्यादामिनाने आमिन्वाने अन्योन्यस्याध्यात्मं कुर्वाणे अहर्नामान्युत्तराणि

---

१ ड. °संज्ञ इति. २ ग. ज. ' किं कारणम्......किम् ' नास्ति. ३ क. ख. २; ग. २९; च. २३; घ. ट. ज. अङ्को नास्ति; ठ. ड. ॥ १९ ॥ इति निरुक्तटीकायां पूर्वषट्के द्वितीयाध्याये एकोनविंशतिः खण्डः. ४ क. ख. छ. त. द. ' अनूच्यौ ' नास्ति. ५ क. ख. छ. त. द. ' सह ' नास्ति. ६ क. ख. छ. त. द. ' आमिन्वाने ' नास्ति.

द्वादशाहः कस्मादुपाहरन्त्यस्मिन्कर्माणि तस्यैष निपातो भवति वैश्वानरीयायामृचि[1] ॥ २० ॥

रुशद्वत्सा[2] रोचिष्णुवत्सा। सूर्यो हि रोचिष्णुः। तम् 'अस्या वत्समाह' मन्त्रदृक् 'साहचर्यात्'। मातृसहचरो हि वत्सो भवति। अयमपि चानयोषसा सह चरतीत्येतस्मात्सामान्याद्वत्स इत्युच्यते[3]। 'रसहरणाद्वा'। यथा हि मातुरूधसः क्षीराख्यस्य[4] रसस्याहर्ता भवति वत्स एवमेषोऽप्यौषसिकानामवश्यायाख्यानां रसानामाहर्ता भवति रश्मिभिरित्येतस्मात्सामान्याद्वत्सत्वम्। रुशती रोचनशीलात्मनापि। 'श्वेत्या श्वेततेः' धातोः। 'श्विता वर्णे' इत्येतस्य [धा० १। ७४३]। श्वेतवर्णेत्यर्थः[5]। या चैवंलक्षणोषाः सा आगादागच्छति। आगतायाश्च तस्या अपि[6] आरैक् आरेचयति कृष्णवर्णा रात्रिः। किमारेचयति। सदनानि स्थानान्यस्या उषसः। येष्वेवमुषा[7] स्थानेष्वागता सत्यासीदति तान्यारेचयति रात्रिः। एवं तावदयमर्धर्चो रात्र्युषसोर्विभक्तस्तुतिः। 'अथ' अनेनोत्तरेणार्धर्चेन एते[8] रात्र्युषसी 'संस्तौति'। 'समानबन्धू' एते रात्र्युषसी 'समानबन्धने'। समानमनयोर्बन्धनम्। आदित्यस्येयं ह्यस्तमयं[9] प्रति रात्रिर्बद्धा संश्लिष्टोदयं प्रत्युषाः। एवं[10] समानबन्धू। 'अमृते अमरणधर्माणौ'। न हि रात्र्युषसी म्रियेते। 'अनूची इतीतरेतरमभिप्रेत्य'। इतरेतरसंश्लिष्टे हीमे 'द्यावा' वर्णं 'चरतः'। 'ते एवं' रात्र्युषसी 'द्यावौ द्योतनात्'। उषा हि स्वेन प्रकाशेन द्योतते। रात्रिरपि स्वेन तमोवीर्येण नक्षत्रगणेन वा स्वमधिकारं[11] प्रति द्योतते। एवं हि द्यावेति द्विवचनम्। अथ 'वा' तृतीयान्तमेकवचनमेतत् 'स्यात्' द्यौः। 'तया द्यावा सह' युक्ते तया सह स्पर्धमाने चरतो गच्छतः। कथं च[12] पुनश्चरतः। आमिनाने[13]। आङ्ध्यर्थे।

उषसो रात्र्यपरकालत्वेऽपरा ऋक्

---

१ क. ख. द. ३; छ. त. २८. २ ठ. ड. °वत्सेति रोचि°. ३ क. ख. घ. ट. ठ. ड. 'इति' नास्ति. ४ ग. ज. क्षीराख्यपरसस्य. ५ क. ख. घ. ट. ठ. ड. श्वेतो वर्ण एत्यस्यां सा श्वेत्या। श्वेतवर्णे°; ग. ज. श्वितो वर्णत्येतस्या श्वेतवर्णे°. ६ क. ख. घ. ठ. ठ. ड. 'अपि' नास्ति. ७ क. ख. घ. ट. ठ. ड. येष्वियमुषा°. ८ ग. ज. 'एते' नास्ति. ९ क. ख. घ. ट. ठ. ड. ह्येते. १० ठ. ड. एवं. ११ घ. ट. ड. स्वस्वमधि°; ठ. स्वं स्वमधि°. १२ क. ख. घ. ट. ठ. ड. 'च' नास्ति. १३ घ. ट. ठ. ड. वर्णं रूपं आमिमाने.

उषा अपि रात्रेरधि आत्मानं निर्मिमीते रात्रिरप्युषसः । इतरेतरसंश्लिष्टे हीमे रात्र्युषसी । तस्मादेवमुच्यते[1] ' अन्योन्यस्याध्यात्मं कुर्वाणे ' इति[2] ।

उषःशब्दतत्त्वावधारणार्थं[3] प्रसक्तावेतौ मन्त्रावुपवर्णितौ । प्रकृतमिदानीमुच्यते । ' अहर्नामान्युत्तराणि द्वादश ' । अह्नो नामान्यहर्नामानि । ' उत्तराणि ' प्रकृतेभ्य उषोनामभ्यः । उषस एवानन्तरमहर्भवति । तस्मादुषोनामभ्य उत्तराण्यहर्नामानि । कियन्ति पुनस्तानि । द्वादश । द्वे च दश च द्वादश । कानि पुनस्तानि । ' वस्तोः द्युः भानुः ' इत्येवमादीनि । वस्ते ज्योतिरेतदिति वस्तोरित्युच्यते । यथैव हि श्रुतं मन्त्रे तथैवेह समाम्नातम् । द्युः । द्योतते ह्येतज्ज्योतिषा । भानुः । भासते ह्येतज्ज्योतिषेत्येवमादि[4] योज्यम् । आह[5] । ' अहः कस्मात् ' । उच्यते । ' उपाहरन्त्यस्मिन्कर्माणि ' । न हि तथा रात्रावनुतिष्ठन्ति कर्माणि कर्मकरा यथाहनि । ' तस्य ' अह्नः ' एष निपातो भवति ' नैघण्टुकवृत्त्या ' वैश्वानरीयायां ' वैश्वानरदेवतायाम् ' ऋचि ' । अहःशब्दो हि रात्रिमहश्चोभयमभिधत्ते । अतः संदेहपदम् । तस्यैष विभागोऽस्यामृच्युपपदविशेषात्प्रदर्श्यते ॥ २०[6] ॥

अहश्च कृष्णमहरर्जुनं च वि वर्तेते रजसी वेद्याभिः । वैश्वानरो जायमानो न राजावातिरज्ज्योतिषाग्निस्तमांसि [ऋ०सं०६।९।१]॥अहश्च कृष्णं रात्रिः शुक्लं चाहरर्जुनं विवर्तेते रजसी वेद्याभिर्वेदितव्याभिः प्रवृत्तिभिर्वैश्वानरो जायमान इवोद्यन्नादित्यः सर्वेषां ज्योतिषां राजावाहन्नग्निर्ज्योतिषा तमांसि मेघनामान्युत्तराणि त्रिंशन्मेघः कस्मान्मेहतीति सत आ उपर उपल इत्येताभ्यां साधारणानि पर्वतनामभिरुपर उपलो मेघो भवत्युपरमन्तेऽस्मिन्नभ्राण्युपरता आप इति वा तेषामेषा भवति ॥ २१[7] ॥

---

१ ठ. ड. °मुच्येते. २ ठ. ड. ' इति ' नास्ति. ३ घ. ट. ठ. ड. °शब्दत्वावधा°. ४ च. 'एतत्' नास्ति. ५ घ. ट. ठ. ड. 'आह' नास्ति. ६ क. ख. ३; ग. २८; च. २४; घ. ट. ज. अङ्को नास्ति; ठ. ड. °ऋचि ॥ इति निरुक्तभाष्ये २० खण्डः समाप्तः. ७ क. ख. द. ४; छ. त. २९.

अहश्च कृष्णमिति । भरद्वाजस्येयमार्षम् । त्रिष्टुप् । पृष्ठयस्य षष्ठेऽहन्याग्निमारुते शस्त्रे शस्यते [आश्व० श्रौ० ८ । ८] । अहश्च कृष्णं रात्रिः शुक्लं चाहरर्जुनम् । अर्जुनशब्दो हि शुक्लपर्यायः । विवर्तेते विपर्ययेण वर्तेते । रात्रिरतीताहरायातमहरतीतं रात्रिरायातेत्येवम् । रजसी रञ्जके । ज्योतिषा हि भूतान्यहो रञ्जयति तमसा रात्रिः । वेद्याभिर्वेदितव्याभिः प्रवृत्तिभिः । न हि तासां प्रवृत्तीनामन्तोऽस्त्यहनि च रात्रौ च प्राणिनाम् । अतस्ता वेदितव्या एव भवन्ति बहुत्वात् । न हि विदिता नाम ताः कदाचित् । किंच । वैश्वानरोऽग्नि[1]रपाहरत् [2]अपहन्ति स्वेन ' ज्योतिषा तमांसि ' । कथं पुनरपहन्ति । जायमानो न राजा जायमान इव उद्यन्निव सर्वभूतानां राजादित्यः । [3]यथाभ्युद्यन्नादित्यस्तमांस्यपहन्ति दिवैवमग्निरपि रात्रावपहन्तीत्य[4]ग्निरादित्येन तमोपघातं प्रत्युपमीयते ।

'अहन्' शब्दस्य नैघण्टुकवृत्तिः

'मेघनामान्युत्तराणि त्रिंशत्' । मेघानां नामानि मेघनामानि । तान्युत्तराणि प्रकृतेभ्योऽहर्नामभ्यः । मेघा ह्यहनि च[5] रात्रौ च[6]विशेषेण भवन्त्यतो रात्र्यु[7]षोऽहर्नामभ्य उत्तराणि मेघनामानि । कतमानि पुनस्तानि । 'अद्रिः ग्रावा गोत्रः ' इत्येवमादीनि । अद्रिः । आदारयितव्यो [8]ह्यसौ भवत्युदकार्थमित्यद्रिः । ग्रावा गृणातेर्वा गृह्णातेर्वा । गृणात्यसौ शब्दं करोति गृहीतं वोदकमनेनेति ग्रावा । गौर्वागत्रेति गोत्र इत्येवमाद्यभ्यूहितव्यं पर्वतनामत्वेऽपि यथासंभवं योज्यम् ।

आह । ' मेघः कस्मात् ' । उच्यते । ' मेहति ' सिञ्चत्यसौ । एवं कर्तरि कारके ' सतः ' अस्यैतदभिधानं भवति मेघ इति । तेषां मेघनाम्नाम् ' आ उपर उपल इति ' प्राक् उपर उपल इत्येताभ्यां यानि नामानि तानि ' साधारणानि पर्वतनामभिः ' । तदेषां प्रकरणोपपदाभ्यां विशेषो[9]ऽवधार्यः । ' आ उपर इत्येतस्मात् ' इति वक्तव्ये

---

१ ग. ज. °ग्निरवाहन् अप°. २ घ. ट. ठ. ड. अपहरन्ति. ३ क. ख. घ. ट. ठ. ड. यथा ह्युद्य°. ४ घ. ट. ठ. ड. 'इति' नास्ति. ५ क. ख. ग. ज. 'च' नास्ति. ६ घ. ट. °चाविशेषगभ°; ठ. ड. °चाविशेषणं भ°. ७ क. ख. घ. ट. ठ. ड. 'उषः' नास्ति. ८ क. ख. घ. ट. ठ. ड. °तव्यो भवति ह्यसावुद°. ९ च. °षोऽप्यवधार्यः.

"आ उपर उपल इत्येताभ्यां" इत्युक्तम्[1] । उभावपि ह्येतौ समाननिर्वचनौ शब्दावेकस्मिन्निरुक्ते निरुक्तौ भविष्यत इति श्लोश्चाविशेषख्यापनार्थम् । 'उपर उपलो मेघो भवति' । उपर इति [2]उपल इति च मेघ उक्तो भवति । उपरशब्दादारभ्य मेघनामान्येव न पर्वतनामानि ।

आह । उपरः कस्मात् । उच्यते ।'उप'गम्योपगम्य '[3]रमन्तेऽस्मिन्नभ्राणि' । अथ 'वा' 'उप'गम्यास्मिन्रता आपो भवन्ति 'इति' उपरः । उपलोऽप्येतस्मादेव श्लोरविशेषेण । आह । कथं पुनर्गम्यते उपरशब्देन[4] मेघ एवोच्यते न पर्वतः[5] । उच्यते । 'तेषां' मेघानामुपरशब्दवाच्यत्वे[6] विशेषलिङ्गवाचिका 'एषा' ऋक् 'भवति' ॥ २१ ॥

देवानां माने प्रथमा अतिष्ठन्कृन्तत्रादेषामुपरा उदायन् । त्रयस्तपन्ति पृथिवीमनूपा द्वा बृबूकं वहतः पुरीषम् (ऋ० सं० १० । २७ । २३) ॥ देवानां निर्माणे[7] प्रथमा अतिष्ठन्माध्यमिका[8] देवगणाः प्रथम इति मुख्यनाम प्रतमो भवति [9]कृन्तत्रमन्तरिक्षं विकर्तनं मेघानां विकर्तनेन मेघानामुदकं जायते । त्रयस्तपन्ति पृथिवीमनूपाः । पर्जन्यो वायुरादित्यः शीतोष्णवर्षैरोषधीः पाचयन्त्यनूपा अनुवपन्ति लोकान्त्स्वेन स्वेन कर्मणायमपीतरोऽनूप एतस्मादेवानूप्यत उदकेनापि वान्वाविति स्याद्यथा प्रागिति तस्यानूप इति स्याद्यथा प्राचीनमिति । द्वा बृबूकं वहतः पुरीषम् । वाय्वादित्या उदकं बृबूकमित्युदकनाम ब्रवी[11]तेर्वा[10] शब्दकर्मणो भ्रंशतेर्वा पुरीषं पृणातेः पूरयतेर्वा ॥२२॥

[12]इति द्वितीयाध्यायस्य षष्ठः पादः ।

---

१ घ. ट. ठ. ड. 'इति' नास्ति. २ क. ख. घ. ट. ठ. ड. °इति च उप°. ३ घ. ट. ठ. ड. आरमन्ते. ४ घ. ट. ठ. °शब्दे मेघ°; ड. शब्दो मेघ°. ५ क. ख. घ. ट. ठ. ड. पर्वत इति. ६ क. ख. ४; ग. २९; च. २५; घ. ट. ज. अङ्को नास्ति. ठ. ड. भवति । इति निरुक्तभाष्ये सप्तमाध्याय एकविंशतिः खण्डः. ७ द. निर्वाणे. ८ क. ख. माध्यामिका. ९ क. ख. छ. त. द. 'कृतन्त्रमन्तरिक्षं विकर्तनं मेघानां' नास्ति. १० छ. त. द. ठ. ड. 'वा' नास्ति. ११ क. ख. ५; छ. त. ३८. १२ ड. थ. घ. ठ. ड. 'इति...पादः' नास्ति; छ. इति षष्ठः पादः; त. इति द्वितीयाध्याये तृतीयः पादः; द. इति नैरुक्तस्य द्विती°.

देवानां मान इति । वसुक्रस्यैन्द्रस्[1]येयमार्षम् । त्रिष्टुप् । महाव्रते[2] शस्यते [ऐ० आ० ५ । १ । १] । देवानां दानादिगुणयुक्तानां माने[3] निर्माणे । यदा देवाः सृष्टाः प्रजापतिना तदैत एव माध्यमका[4] देवगणाः प्रथमाः अतिष्ठन् । एतेऽपि हि दानादियोगाद्देवा उच्यन्ते । प्रथमाः प्रतमाः प्रकृष्टतमा मुख्या इत्यर्थः । मेघाभावे हि सर्वमेवेदं जगद्वर्षाभावान्न स्यात् । तस्मादेत एव प्रकृष्टतमा अतिष्ठन् अव[5]स्थितवन्तः । सृष्टौ हि सर्वदेवानामेत एवाग्रे सृष्टा इत्यभिप्रायः । किंच । कृन्तत्रात् उत्कृत्तात्[6]प्रदेशादेषां मेघानामिन्द्रेण उपरा आप उदायन् आगता[7] आगच्छन्ति च । किं कारणम् । 'विकर्तनेन[8] मेघानामुदकं जायते' । उपराशब्देना[9]त्रोदकमुक्तम् । तात्स्थ्या[10]त्ताच्छब्द्यं मञ्चक्रोशनवत्[11] । उपरेषु मेघेषु या आपस्ता उपचारा[12]दुपरा इत्युच्यन्ते । किंच यदा[13]भिरुपराभिरद्भिरोषधयः प्ररोहिता[14] भवन्त्यथ तदा त्रयस्तपन्ति । त्रयः पर्जन्यादयस्तपन्ति पृथिवीलोके[15] । अनूपाः । ते ह्यनुवपन्ति लोकान् । स्वेन स्वेन कर्मणा यथाकालमनुगृह्णन्ति । एतदनुवपनं लोकानां यद्वर्षादिभिः पर्जन्यादयो यथार्थमोषधीः पाचयन्ति । किंच । द्वा बृबूकं वहतः पुरीषम् । द्वौ वाय्वादित्यौ वहत आक्षिपत इतः पृथिवीलोकाद् बृबूकमुदकम् । किंलक्षणम् । पुरीषं प्रीणयितृ पूरयितृ[16] वा ।

'अयमपीतरः' नद्यनूपः समुद्रानुपो वा 'एतस्मादेव' वपतेर्धातोः । असावपि[17] 'अनूप्यते' प्रकीर्यते[18] नित्यकालम् 'उदकेन' । 'अपि

---

१ क. ख. घ. ट. ठ. ड. °क्रस्येन्द्रपुत्रस्येय°. २ क. ख. घ. ट. ठ. ड. °व्रते मरुत्वतीये शस्य°. ३ क. ख. घ. ट. ठ. ड. माने विमाने नि°. ४ क. ख. माध्यमिका. ५ क. ख. घ. ट. ठ. ड. 'अव' नास्ति. ६ क. ख. घ. ट. ठ. ड. उत्कृष्टात्. ७ क. ख. घ. ट. ठ. ड. आगतवत्यः. ८ क. ख. घ. ट. ठ. ड. °र्तनेनैव हि मेघा°. ९ क. ख. घ. ट. ठ. ड. उपरशब्दे°. १० च. तात्स्थ्ये ता°. ११ क. ख. घ. ट. ठ. ड. मञ्चाः क्रोशन्त इतिवत्. १२ च. 'उपचारात्' नास्ति. १३ क. ख. ग. ज. घ. ट. ठ. ड. यदा ताभिरु°. १४ ग. ज. पुरोहिताः; घ. ट. ड. प्रोहिताः; ठ. प्रहिताः. १५ ग. ज. पृथिवीं लोक अनू°; घ. ट. ठ. ड. पृथिवीं पृथिवीलोकं । अनू°. १६ घ. ट. ड. °पूरयितृ वा अतः अयम°; ठ. °पूरयितृ वा यतः अयम°. १७ क. ख. घ. ट. ठ. ड. °वपि हि अनू°. १८ क. ख. घ. ट. ठ. ड. अनुप्रकीर्यते.

वा[1] ' एवमन्यथा 'स्यात्' आप्नोतेः । अन्वाप्यतेऽसावुदकेनेति 'अन्वाप्' । ' यथा[2] ' पुरस्तादञ्चतीति ' प्राक् ' । ' तस्य ' अन्वाबित्येतस्य सतः ' अनूप इति[3] ' एव शब्दः ' स्याद्यथा प्राचीनमिति ' । प्रागित्येवं सतः प्राचीनम् । ' बृबूकमिति उदकनाम ' इति पर्यायवचनेन तत्त्वाभिधानम् । ' ब्रवीतेर्वा ' शब्दार्थस्य [धा० २ । ३४] । शब्दकारि हि तद्भवति । ' भ्रंशतेर्वा[4] ' । भ्रंश्यति[5] [धा० ४ । ११९] हि तन्मेघादिति ॥ २२[6] ॥

इति निरुक्तवृत्तौ सप्तमाध्यायस्य षष्ठः पादः[7] ॥

वाङ्नामान्युत्तराणि सप्तपञ्चाशद्वाक्कस्माद्वचेस्तत्र सरस्वतीत्येतस्य नदीवद्देवतावच्च निगमा भवन्ति तद्यद्देवतावदुपरिष्टात्तद्व्याख्यास्यामोऽथैतन्नदीवत्[8] ॥ २३ ॥

वाङ्[9]नामान्युत्तराणि सप्तपञ्चाशत् । मेघनामप्रसक्तो ' देवानां माने' इत्येष मन्त्रो व्याख्यातः । प्रकृतमिदानीमुच्यते वाङ्नामानीति । वाचो नामानि वाङ्नामानि । उत्तराणि प्रकृतेभ्यो मेघनामभ्यः । मेघेष्वेव हि भूयसी वाग्भवतीति मेघनामभ्य उत्तराणि वाङ्नामानि भवन्ति । कियन्ति पुनस्तानि । सप्तपञ्चाशत् । कानि पुनस्तानि । ' श्लोकः धारा इला ' इत्येवमादीनि । श्रूयत इति श्लोकः । ध्रियते तं तमर्थमवधारयितुमिति धारा । तं तमर्थं प्रतीयमीट्टे गच्छतीति इले[10]त्येवमाद्यभ्यूहितव्यम् । आह । ' वाक्कस्मात् ' । उच्यते । ' वचेः ' धातोः । उच्यतेऽनयेति वाक् । ' तत्र सरस्वतीत्येतस्य ' । तत्र तस्मिन्सप्तपञ्चाशत्के वाङ्नामगणे सरस्वतीत्येतस्य नाम्नो 'नदीवद्देवतावच्च निगमा भवन्ति' । नद्यर्थयुक्ताश्च देवतार्थयुक्ताश्चेत्यर्थः । तत्रैवं सति ' यत् ' अभिधानं ' देवतावत् ' ' तत् ' अधिकृत्य ' उपरिष्टाद्व्याख्यास्यामः ' षोडशेऽ-

सरस्वतीत्येतस्य नदीवद्देवतावच्च निगमाः

---

१ घ. ट. ठ. ड. च. °अपि चैव°. २ क. ख. घ. ट. ठ. ड. 'यथा' नास्ति. ३ क. ख. घ. ट. ठ. ड. इत्येष शब्द°. ४ च. भ्रंसतेर्वा°. ५ ग. च. ज. भ्रस्यति. ६ क. ख. ५; ग. ३०; घ. ट. च. ज. अङ्को नास्ति; ठ. ड. इति द्वाविंशतिः खण्डः. ७ घ. ट. पादः संपूर्णः; च. ठ. ड. पादः समाप्तः. ८ क. ख. द. १; छ. त. ३१. ९ च. वाङ्नामा°; ठ. ड. ' वाङ्नामान्युत्तराणि सप्तपञ्चाशत् ' नास्ति. १० क. ख. घ. ट. ठ. इडेत्ये°.

ध्याये ' पावका नः सरस्वती ' इत्येतस्मिन्मन्त्रे [[2] निरु० ११।२६]। ' अथ ' पुनः यत्र[1] नदीवत् तद्व्याख्यायते ॥ २३ ॥

इयं शुष्मेभिर्बिसखा इवारुजत्सानु गिरीणां तविषेभिरूर्मिभिः। पारावतघ्नीमवसे सुवृक्तिभिः सरस्वतीमा विवासेम धीतिभिः (ऋ०सं०६।६१।२)॥ इयं शुष्मैः शोषणैः शुष्ममिति बलनाम शोषयतीति सतो बिसं बिस्यतेर्भेदनकर्मणो वृद्धिकर्मणो वा सानु समुच्छ्रितं भवति समुन्नुन्नमिति वा महद्भिरूर्मिभिः पारावतघ्नीं पारावारघातिनीं पारं परं भवत्यवारमवरमवनाय सुप्रवृत्ताभिः शोभनाभिः[3] स्तुतिभिः सरस्वतीं नदीं[4] कर्मभिः परिचरेमोदकनामान्युत्तराण्येकशतमुदकं कस्मादुनत्तीति सतो नदीनामान्युत्तराणि सप्तत्रिंशन्नद्यः कस्मान्नदना इमा[5] भवन्ति शब्दवत्यो बहुलमासां नैघण्टुकं वृत्तमाश्चर्यमिव प्राधान्येन तत्रेतिहासमाचक्षते विश्वामित्र ऋषिः सुदासः पैजवनस्य पुरोहितो बभूव विश्वामित्रः सर्वमित्रः सर्वं संसृतं सुदाः कल्याणदानः पैजवनः पिजवनस्य पुत्रः पिजवनः पुनः स्पर्धनीयजवो वामिश्रीभावगतिर्वा स वित्तं गृहीत्वा विपाट्छुतुद्र्योः संभेदमाययावनुययुरितरे स विश्वामित्रो नदीस्तुष्टाव गाधा भवतेत्यपि द्विवदपि बहुवत्तद्यद्द्विवदुपरिष्टात्तद्व्याख्यास्यामो[6]ऽथैतद्बहुवत् ॥ २४ ॥

इयं शुष्मेभिरिति। भरद्वाजस्यार्षम्। जगती[7]। इयं सरस्वती नदी शुष्मेभिर्बलैः। किं करोति। बिसखा[8] इवारुजत्। यथा बिसखानको बिसाननादरेणैव मृदुत्वात्[9]खनत्येवमियमनादरेणैव यदपि सानु भवति संमु[10]-

---

१ क. ख. घ. ट. ठ. ड. यन्नदीव°. २ क. ख. १; ग. ३१; च. २६; घ. ठ. ठ. ड. ज. अङ्को नास्ति. ३ क. ख. छ. त. द. ' शोभनाभिः ' नास्ति. ४ क. ख. छ. त. द. ' नदीं ' नास्ति. ५ क. ख. छ. त. द. ' इमाः ' नास्ति. ६ कं. ख. द. २; छ. त. ३२. ७ ठ. ड. जगतीछन्दः पृष्ठ्यः षळहे (ड. षघहे) चतुर्थेऽहानि व्यूळ्हपक्षे प्रउगतृचे विनियुक्तेयम्। इयं°. ८ क. ख. ग. ज. व. ट. ठ. ड. बिसमना°. ९ घ. झ. ट. ड. °त्वात् वनत्ये°; ठ. °त्वात् रुजत्ये°. १० ग. च. ज. समुच्छ्रूतं.

च्छ्रितं वज्रसंघातकल्पं गिरीणां शिखरं तदपि तविषेभिर्महद्भिरूर्मिभिर्बिसखानक इवानादरेणैव रुजति[1] भनक्तीत्यर्थः । येयमेवंगुणविशिष्टा तामेतां वयं पारावतघ्नीं पारावारघातिनीम् । सा ह्यूर्मिभिः पारं चावारं[2] चोभे अपि हन्ति । अवसे अवनाय रक्षणायात्मनः । कथं नाम रक्षेदसावस्मानित्येतमर्थं पुरस्कृत्य सुवृक्तिभिः सुप्रयुक्ताभिः[3] स्तुतिभिः स्वरसौष्ठवादियुक्ताभिः । किम् । सरस्वतीमाविवासेम धीतिभिः । सरस्वतीमाभिमुख्येनावस्थिताः[4] परिचरेम । धीतिभिः कर्मभिः स्तुतिभिश्चानेकप्रकाराभिरित्यर्थः । एष समस्तार्थः ।

अस्यामृचि सरस्वतीत्येतन्नदीवदभिधानम्

अथैकपदनिरुक्तम् । ‘ शुष्ममिति बलनाम ’ । तद्धि ‘ शोषयतीति सतः ’ । सत इति कारकावधारणम् । विपर्ययेणापि ह्यभिधानानामर्थो भवत्येवं मन्यमानो भाष्यकारो बलनामसु पठितमपि सदेतदभिधानमेवमाह शुष्ममिति बलनामेति । ‘ बिसं बिस्यतेर्भेदनकर्मणः ’ । तद्धि भिद्यते । ‘ वृद्धिकर्मणो वा ’ । वर्धते हि[5] तत् । ‘ सानु ’ समस्तं हि तद् ‘उच्छ्रितं’[6] भवति । अथ ‘वा’ समस्तमूर्ध्वं ‘नुन्नं’ प्रेरितं भवति । ‘पारं परं भवति’ अवरस्मात्[7]कूलादेव[8] । अवारमवरं[9] भवति परस्मात्कूलात् ।

अस्यामृचि तविषेभिः ऊर्मिभिः पारावतघ्नीमित्येतद्विशेषलिङ्गं[10] नदीसत्त्वं पश्यता भाष्यकारेण ‘ अथैतन्नदीवत् ’ इत्युक्त्वेयमृगुपात्ता[11] सरस्वतीशब्दस्य नद्यभिधाय[12]कत्वे । इयं पुनर्मैत्रायणीयके[13] ‘ उतस्यानः सरस्वती ’ इत्यस्य षडर्चस्योत्तमा । एतच्च पुनः षडर्चं षडर्चानुक्रमेण पश्वनुक्रमेण च ‘ सारस्वतीं धेनुष्टरीमालभेत यः क्षेत्रे पशुषु वा

एतन्न नदीवदभिधानं किंतु देवतावदित्यर्थे मैत्रायणीसंहिताप्रमाणम्

१ च. आरुजति. २ क. ख. ग. ज. चावारं उभे°; घ. झ. ट. ठ. ड. चावूरं चोभे°. ३ क. ख. सुप्रवृत्ताभिः स्तु°; घ. झ. ट. ठ. ड. सुप्रवृत्ताभिः सुप्रयुक्ताभिः स्तु°. ४ घ. झ. ट. ठ. ड. °ख्येन संस्थिताः. ५ च. ‘ हि ’ नास्ति. ६ ग. च. ज. उच्छृतं. ७ ग. ज. अपरस्मात्; च. अपरस्मात्° व. ८ क. ख. झ. ट. ठ. ड. ‘ एव ’ नास्ति. ९ च. अपरमव°. १० क. ख. °द्विशेष्यलिङ्गं; ग. °द्विषयलिङ्गं; ज. °द्विलयलिङ्गं. ११ च. उपात्तातः सर°. १२ घ. झ. ठ. ड. तदभिधायकत्वे; ट. तदभि° नद्य; च. नद्यभिधायकत्वं. १३ ग. च. ज. मैत्रावरुणीयके.

विवदेत ' [मैत्रा० सं० २।५।४] इत्येतस्य पशोः संपद्यते । सेयमनेन प्रकारेण सारस्वतस्य पशुहविषो याज्या भवति । एवं च सतीदमपि देवतावदेवेत्येतदापद्यते । न ह्यदेवतेज्यते । तदेतदेवं कृत्वा भाष्यकारेण यदुक्तं 'तद्यद्देवतावदुपरिष्टात्तद्व्याख्यास्यामोऽथैतन्नदीवत्' इति तद्विरुध्यते । तत्रोक्तः समाधिः [निरु० २ । ८ वृत्तिः] । विभवो ह्यनुपक्षीणशक्तयो मन्त्रशब्दाः । प्रदर्शनमात्रमेतत्क्रियते सर्वथैव मन्त्रशब्दानां योऽर्थ उपपद्यते स योज्यो यथासंभवमिति । देवतापक्षे विनियोगानुविधानाभिप्रायेण सरस्वती माध्यमिका वाक् । सा गिरीणां मेघानां सानूनि भनक्त्यूर्मिभिः स्तनयित्नुभिः पारावारे द्यावापृथिव्यौ हन्तीति योज्यम् । तविषेभिरूर्मिभिः महद्भिरित्येवमादि योज्यम् । ' सुप्रवृत्ताभिः स्तुतिभिः सरस्वतीं कर्मभिः परिचरेम ' गतार्थम् ।

भाष्यकारस्य मैत्रायणीसंहितया विरोधे कः समाधिः

देवतापक्षे ऋङ्निरूपणम्

'उदकनामान्युत्तराणि एकशतम्' । उदकस्य नामान्युदकनामानि । उत्तराणि प्रकृतेभ्यो वाङ्नामभ्यः । मेघाश्रया हि वाग्मेघोत्थं चोदकं स्तनयित्नुशब्दपूर्वकं चेति वाङ्नामभ्य उत्तराण्युदकनामानि । कियन्ति पुनस्तानि । एकशतम् । एकं च शतं च । कतमानि पुनस्तानि । ' अर्णः क्षोदः क्षद्म ' इत्येवमादीनि । अरणशीलमर्णः । क्षिप्रमुनत्तीति क्षोदः । क्षीणमन्नं करोतीति क्षद्मेत्येवमाद्यभ्यूहितव्यम् । आह । ' उदकं कस्मात् ' । उच्यते । ' उनत्तीति सतः ' । तद्धि यत्र गच्छति तत्रोनत्ति क्लेदयति । ' उन्दी क्लेदने ' [धा० ७ । २०] । सत इति कारकावधारणं पूर्ववत् ।

' नदीनामान्युत्तराणि सप्तत्रिंशत् ' । नदीनां नामानि नदीनामानि । उत्तराणीति प्रकृतेभ्य उदकनामभ्य उत्तराणि नदीनामानि । कियन्ति पुनस्तानि । सप्तत्रिंशत् । कानि पुनस्तानि । ' अवनयः यव्याः खाः

१ क. ख. घ. ट. ठ. ड. °सतीयमपि°. २ च. ' यः ' नास्ति. ३ क. ख. भञ्जयत्यू°. ४ क. ख. घ. झ. ट. ठ. ड. शतं चैकशतम् । कत°. ५ क. ख. घ. झ. ट. ठ. ड. क्षीरिण°. ६ ग. ज. ' आह...पूर्ववत् ' नास्ति. ७ ग. ज. ' नदीनां नामानि ' नास्ति. ८ घ. झ. ' इति ' नास्ति; ट. उत्तराणि ˇ प्रकृ° इति. ९ क. ख. यव्याः.

सीराः ' इत्येवमादीनि । अवनतेन निम्नेन प्रदेशेन यान्तीत्यवनयः । यातव्या भवन्तीति यव्याः । खातव्या भवन्तीति खाः । सरन्तीति सीराः । एवमादि योज्यम् ।

नदीनां प्राधान्येन देवतात्वे मन्त्रा अल्पाः । नैघण्टुकवृत्तिर्बहुला

आह । ' नद्यः कस्मात् ' । उच्यते । ' नदनाः ' ह्येता ' भवन्ति ' ' शब्दवत्यः ' शब्दसंयुक्ताः । किंच । ' बहुलमासां ' नदीनामन्यदेवतेषु मन्त्रेषु नैघण्टुकं वृत्तम् अप्रधानम् । ' आश्चर्यमिव प्राधान्येन' । क्वचिदेव नदीदेवतो मन्त्रः स्यात् । 'तत्रेतिहासमाचक्षते ' । यस्मिन्सूक्ते प्रधाना नद्य एव तत्रेमं निदानभूतमितिहासमाचक्षते वदन्त्याचार्याः ।

प्राधान्येन यत्र देवतात्वं तस्य सूक्तस्य निदानभूत इतिहासः ।

' विश्वामित्रो ' नाम ' ऋषिः सुदासः पैजवनस्य ' राज्ञः ' पुरोहितो बभूव ' । ' विश्वामित्रः सर्वमित्रः ' । सर्वस्यैव हि स मित्रं सर्वमेव वा तस्य मित्रमिति विश्वामित्रः । ' सर्वम् ' इति किमुक्तं भवति । उच्यते । तद्धि ' संसृतं ' संगतं भवत्येकस्मिन् । ' सुदाः कल्याणदानः ' । तस्य हि नित्यमेव प्रशस्तं दानं भवति । ' पैजवनः पिजवनस्य पुत्रः ' । ' पिजवनः पुनः स्पर्धनीयजवः ' । तस्य हि स्पर्धार्हो जवो वेगः । अथ ' वा अमिश्रीभावगतिर्वा ' । न तस्य मिश्रीभूतपूर्वा गतिरन्यैर्वेगवद्भिरतिशैघ्र्यात् । तस्य पैजवनस्य विश्वामित्रः पुरोहितो बभूव । ' सः ' पौरोहित्योपार्जितं ' वित्तं ' धनं ' गृहीत्वा विपाट्छुतुद्र्योः ' नद्योः ' संभेदं ' संगममागतवान् । यत्र विपाट्छुतुद्र्यौ इतराभिः सिन्ध्वाद्याभिर्नदीभिः संभिन्ने एकीभूते इत्यर्थः । 'अनुययुरितरे' तदनुयायिनस्तस्करा वा । ' स विश्वामित्रः ' तास्तितीर्षुः ' नदीस्तुष्टाव गाधोदकाः ' यूयं ' भवतेति ' एतमर्थं पुरस्कृत्य । कथं पुनस्तुष्टाव । ' अपि द्विवत् ' अपि द्विवचन-

१ घ. ट. ठ. ड. अवनुतेन. २ क. ख. व्ह्यन्त्यो यान्तीति यव्ह्यः. ३ क. ख. ग. ज. °क्षत इति आचा°. ४ क. ख. घ. झ. ट. ठ. ड. °संसृतं भवति संगतमेक° ५ च. कल्याणदाता. ६ ग. ज. स्पर्धे तव्यत्तव्यानीयर इति स्पर्धनीयः शब्दो निःपन्नः । नीयजवो वा । तस्य°. ७ ग. ज. ' वित्तं ' नास्ति. ८ घ. झ. ट. °पाट्शुतु°. ९ क. ख. घ. झ. ट. ठ. ड. संगममागयौ आग°. १० च. एकभूते.

विश्वामित्रेण कृता नदीस्तुतिः केषुचिन्मन्त्रेषु द्विवचनसंयुक्ता केषुचिद्बहुवचनसंयुक्ता

संयुक्तैर्मन्त्रैः । ' अपि बहुवत् ' बहुवचनसंयुक्तैर्मन्त्रैः । तत्रैवं सति ' यद् द्विवत् ' द्विवचनवत् ' तदुपरिष्टात् ' चतुर्दशेऽध्याये प्रपर्वतानामित्येतस्यामृचि ' व्याख्यास्यामः ' [निरु० ९ । ३९] । ' अथ ' पुनः ' एतद्बहुवत् ' व्याख्यायते ॥ २४ ॥

रमध्वं मे वचसे सोम्याय ऋतावरीरुप मुहूर्तमेवैः । प्र सिन्धुमच्छा बृहती मनीषावस्युरह्वे कुशिकस्य सूनुः [ऋ० सं० ३ । ३३ । ५]॥ उपरमध्वं मे वचसे सोम्याय सोमसंपादिन ऋतावरीर्ऋतवत्य ऋतमित्युदकनाम प्रत्यृतं भवति मुहूर्तमेवैरयनैरवनैर्वा मुहूर्तो मुहुर्ऋतुर्ऋतुरर्तेर्गतिकर्मणो मुहुर्मूढ इव कालो यावदभीक्ष्णं चेत्यभीक्ष्णमभिक्षणं भवति क्षणः क्षणोतेः प्रक्ष्णुतः कालः कालः कालयतेर्गतिकर्मणः प्राभिह्वयामि सिन्धुं बृहत्या महत्या मनीषया मनस ईषया स्तुत्या प्रज्ञया वावनाय कुशिकस्य सूनुः कुशिको राजा बभूव क्रोशतेः शब्दकर्मणः क्रंशतेर्वा स्यात्प्रकाशयतिकर्मणः साधुविक्रोशयितार्थानामिति वा नद्यः प्रत्यूचुः ॥ २५ ॥

रमध्वं मे वचस इति । त्रिष्टुभ एताः । उपरमध्वं मे । उपेत्ययमुपसर्गो मन्त्रस्य मध्यादाकृष्य भाष्यकारेण रमध्वमित्यनेन क्रियापदेन योजितः । उपरमध्वं मे मम वचसे सोम्याय सोमस्य संपादिने । सोमा ह्यनेनास्मद्वचसा देवतानामन्नभूता बहवः संपादिताः । ता यूयमस्मै प्रतिविशिष्टाय वचसे सत्यतार्थं कथं नाम सत्यमिदं स्यादित्येवमर्थमुपरमध्वम् । मन्दवेगा गाधाश्च भवतेत्यभिप्रायः । हे ऋता-

अस्यामृचि बहुवचनसंयुक्ता । विश्वामित्रेण नद्य उच्यन्ते पारगमनाय साहाय्यं कुरुतेति

---

१ च. ' द्विवत् ' नास्ति. २ ठ. ड. °स्यामः । इति निरुक्तभाष्ये द्वितीयाध्याये २४ खण्डः. ३ क. ख. २; ग. ३२; च. २१; घ. ट. ठ. ड. ञ. अङ्को नास्ति. ४ ड. ' सोमसंपादिने ' नास्ति. ५ क. ख. छ. त. द. मूल्ह इव°. ६ क. ख. द. ३; छ. त. ३३. ७ घ. ट. ठ. ड. मन्त्रमध्यात्. ८ ग. ञ. सौम्याय.

बरीः उदकवत्यः । कियन्तं पुनः कालमुपरमध्वम् । मुहूर्तमेवैः । मुहूर्तम् । न च नित्यमेव मन्दवेगतां गाधोदकतां वा प्रार्थये । किं तर्हि । यावदुत्तरेयमहं तावदेवेत्यभिप्रायः । एवैः एभिरुदकैरतिप्रवृद्धैरुपरमध्वम् । 'अवनैर्वा' । कामैरेतैरस्मत्प्रार्थनाविशेषैरुत्तरेम गृहान्गच्छेम वित्तं प्रापयेमेत्येवमादिभिर्निमित्तैः प्रार्थ्यमाना अस्माभिरुपरमध्वम् । अथ 'वा अयनैः' चित्रैर्गमनैर्वेगवद्भिर्यैर्यूयमभिप्रवृत्तास्तैरुपरमध्वं मुहूर्तम् । यदैवमविशेषेणोच्यमाना न शुश्रुवुस्तदैकामुद्दिश्य प्रवर्तते[1] वक्तुम् । प्रसिन्धुमच्छ । अच्छ अभेः स्थाने । अह्वे इत्येतत्पदमाकृष्य प्राभिह्वयामीत्येवं योजितं भाष्यकारेण । किं प्राभिह्वयामि । सिन्धुम् । केन । बृहती मनीषा । बृहत्या[2] मनीषया मनस ईषया मनःपूर्विकया स्तुत्येत्यर्थः । अथवा प्रज्ञया । कमर्थमिच्छन्प्राभिह्वयामि । अवस्युः अवनमिच्छन् । गमनमित्यर्थः । कुशिकस्य सूनुरहमिति पितुरपि गौरवान्मम गौरवमेताः कुर्युरिति समस्तार्थः ।

अथैकपदनिरुक्तम् । 'ऋतमित्युदकनाम' । तद्धि देशं देशं 'प्रत्यृतं भवति' । गतमित्यर्थः । 'मुहूर्तो मुहुर्ऋतुः' । एवं विगृह्य ऋतुशब्दं तावन्निर्ब्रवीति । 'ऋतुरर्तेः' गत्यर्थे वर्तमानस्य । स हि गच्छत्येव । अधुना मुहुःशब्दं निर्ब्रवीति 'मुहुर्मूढ[3] इव कालः' अल्पत्वात् । मूढ इव यः काल ऋतुः स मुहूर्त इत्युच्यते । किंच । 'यावत्' एव च[4] 'अभीक्ष्णं' तावान्मुहूर्तः । यावांश्च मुहूर्तस्तावदेवाभीक्ष्णमित्यर्थः । सारूप्यप्रसक्तं निरुच्यते । 'अभीक्ष्णमभिक्षणं[5] भवति' । तद्धि क्षणमाभिमुख्येन स्थितं भवति । 'क्षणः क्षणोतेः' हिंसार्थस्य [धा० ८ । २] । स हि 'प्रक्ष्णुतः' प्रकर्षेण हिंसितः 'कालः' अल्पत्वात् । 'कालः कालयतेर्गतिकर्मणः' । स हि सर्वाण्येव भूतानि कालयति । क्षयं नयतीत्यर्थः । 'कुशिको राजा' इति तत्त्ववचनम् । 'क्रोशतेः' वा शब्दार्थस्य [धा० १ । ८५६] । स हि साध्वेव क्रियतामित्येवं[6] नित्यकालमेव क्रोशयति । 'क्रंशतेर्वा स्यात्' प्रकाशयत्यर्थस्य । स हि प्रकाशयिता साधूनां धर्माणामात्मनैव प्रकाशः[7] । अथ 'वा' साधुषु ब्राह्मणेषु 'विक्रोशयितार्थानां' दातेत्यर्थः ।

---

१ क. ख. घ. झ. ट. ठ. ड. प्रववृते. २ ग. ज. बृहत्या महत्या. ३ क. ख. घ. झ. मूल्ह इव; ट. मूळ्ह इव. ४ क. ख. घ. झ. ट. ठ. ड. 'च' नास्ति. ५ घ. झ. ट. ठ. ड. अभीक्षणमाभि°. ६ घ. झ. ट. ठ. ड. 'इति' नास्ति. ७ क. ख. घ. झ. ट. ठ. ड. प्रकाशकः.

एवमुक्तवन्तं ' नद्यः प्रत्यूचुः ' ॥ २५[1] ॥

इन्द्रो॑ अ॒स्माँ अ॑रदद्वज्र॑बाहु॒रपा॑ह॒न्वृत्रं॑ परि॒धिं न॒दी-
नाम्॑ । दे॒वो॑ऽनयत्सवि॒ता सु॑पा॒णिस्तस्य॑ व॒यं प्र॑स॒वे या॑म
उ॒र्वीः [ऋ० सं० ३ । ३३ । ६] ॥ इन्द्रो अस्मानरद-
द्वज्रबाहू रदतिः खनतिकर्मापाहन् वृत्रं परिधिं नदीनामिति
व्याख्यातम् । देवोऽनयत्सविता सुपाणिः कल्याणपाणिः
पाणिः पणायतेः पूजाकर्मणः प्रगृह्य पाणी देवान्पूज-
यन्ति । तस्य वयं प्रसवे याम उर्वीः । उर्व्य ऊर्णोतेर्वृणो[2]-
तेरित्यौर्णवाभः प्रत्याख्यायान्तत आशुश्रुवुः ॥ २६ ॥

इन्द्रो अस्माँ अरददिति । अरदत् अखनदित्यर्थः । ' रदतिः खनति-कर्मा[3] ' । कथं पुनरखनत् । अपाहन्वृत्रम् । अपां[4]वधीन्मेघम् । परिधिं नदीनां परिधारयितारं नदीनां नदनानामपाम् । स हि निपतन्तीरपो निरुणद्धि । तमिन्द्रो वज्रेण हन्ति । तस्मिन्हते पृथिवीं प्राप्यापो यथानिम्नानुसारिण्यः खातानि कुर्वत्यो[5] वहन्ति । तैः खातैर्वयं गच्छामः । एवं कृत्वास्मानिन्द्रोऽरदत् । एवं च कृत्वा स एव [6]चेन्द्रो देवः सविता सर्वार्थ[7]प्रसविता वर्ष[8]द्वारेणास्मानानयत्समुद्रम् । सुपाणिः प्रशस्तपाणिरित्यर्थः । य[9]त एवं सोऽस्माकं खनिता नेता चातस्तस्येन्द्रस्य प्रसवे अनुज्ञायामादेशे वर्तमाना वयं यामो गच्छामः । उर्वीः ऊर्णुवत्यः संभजमाना वा तानि तानि देशान्तराण्यम्भोभिः । सोऽस्माकमीश्वरः । स एवं[10]मस्मानाज्ञापयितुमर्हति न त्वमित्यभिप्रायः ।

तासां प्रत्यादेशरूपं प्रतिवचनम्

' पाणिः पणायतेः ' [धा० १ । ४४०] पूजार्थस्य । ' प्रगृह्य पाणी ' संयतौ कृत्वा ततो ' देवान्पूजयन्ति ' इति ।

---

१ क. ख. ३; ग. ३३ (२२); घ. झ. ट. च. ज. अङ्को नास्ति; ठ. ड. °त्यूचुः ॥ इति निरुक्तभाष्ये द्वितीयाध्याये पञ्चविंशतिः खण्डः. २ क. ख. द. ४; छ. त. ३४. ३ घ. झ. ट. कर्मा । वज्रबाहुः । वज्रयुक्तो बाहुर्यस्यासौ । कथं°. ४ ग. ज. अघ्नन्; च. अहन्. ५ क. ख. घ. ट. ठ. ड. च. कुर्वन्त्यो. ६ क. ख. घ. झ. ट. ठ. ड. ' च ' नास्ति. ७ घ. ज. ट. ठ. ड. सर्वार्थस्य प्रस°. ८ घ. वर्षाद्वारे°; ट. वर्षाद्वारेर्ष°. ९ क. ख. ड. यत एव; ग. ज. य एव. १० क. ख. एव.स्मान्; घ. झ. ट. ठ. ड. एव चास्मान्

‘प्रत्याख्याय’ एवं तमृषिम् ‘अन्ततः’[1] सूक्तस्य अन्ततः[2] अन्तेऽनयर्चा ‘आशुश्रुवुः’[3] । ता नद्यः श्रुतवत्य इत्यर्थः । तदा च[4] श्रुतं भवति यदा तद्वचः क्रियते । श्रूयमाणमपि हि तन्नैव श्रुतं भवति यन्न क्रियते ॥ २६[5] ॥

आ ते कारो शृणवामा वचांसि ययाथ दूरादनसा रथेन । नि ते नंसै पीप्यानेव योषा मर्यायेव कन्या शश्वचै ते [ऋ० सं० ३ । ३३ । १०] ॥ आशृणवाम ते कारो वचनानि याहि दूरादनसा च रथेन च निनमाम ते पाययमानेव योषा पुत्रं मर्यायेव कन्या परिष्वजनाय निनमा इति वाश्वनामान्युत्तराणि षड्विंशतिस्तेषामष्टा उत्तराणि बहुवदश्वः कस्मादश्नुतेऽध्वानं महाशनो भवतीति वा तत्र दधिक्रा इत्येतद्दधत्क्रामतीति वा दधत्क्रन्दतीति वा दधदाकारी भवतीति वा तस्याश्ववद्देवतावच्च निगमा भवन्ति तद्यद्देवतावदुपरिष्टात्तद्व्याख्यास्यामोऽथैतदश्ववत्[6] ॥ २७ ॥

आ ते कारो शृणवाम[7] । आभिमुख्येनावस्थिताः सत्यः श्रृणवाम हे कारो स्तोमानां कर्तः । किमाश्रृणवाम । वचांसि वचनानि । श्रुतानि चैतानि तावकानि वचांसि यतो[8] ब्रूमः । ययाथ याहि त्वम् अनसा शकटेन सह[9] रथेन च । कस्मात्पुनरेवमादरवत्यो ब्रूमो ययाथेति[10] । इतो यस्माद्दूरादायातस्त्वं परिश्रान्तस्तस्मात्कारुण्यं नस्त्वयि । तेन वयमेता नि ते नंसै ‘निनमाम ते’ नीचैर्नमाम ।

पारगमनायानुमतिः

साहाय्याश्रावणं च

---

१ क. ख. तत्; घ. झ. ट. ठ. ड. ततः. २ च. अन्ततैः. ३ ग. ज. प्रतिशुश्रुवुः च. प्रतिशुश्रुवुः॰ आ. ४ क. ख. घ. झ. ट. ‘च’ नास्ति. ५ क. ख. २६; ग. ३४ २३; च. २९; घ. झ. ट. ज. अङ्को नास्ति. ६ क. ख. द. ५; छ. त. ३५. ७ ठ. ड. ॰वामेति । आभि. ८ क. ख. घ. झ. ट. अतो. ९ ग. ज. शकटेन च सह. १० क. ख. घ. झ. ट. याहीति; ग. ज. यथायथेति; च. यया । ययेति.

गाधोदका भवामेत्यर्थः । कथं पुनर्निनमाम । पीप्यानेव योषा । पाययमानेव योषा पुत्रं यथा निनमेदेवं वयं तव निनमाम । एवमुक्त्वा पुत्रोपमया कदाचिदयं क्रोधमियादिति मन्वानाः सत्यः पतिकन्यासंबद्धा[1]मन्यामुपमामुपाददिरे । मर्यायेव कन्या शश्वचै ते । मर्याय मनुष्याय कन्या नवोढा शश्वचै ते परिष्वजनाय[2] । कथं नाम परिष्वजेत मामयमित्यभिप्रायेण यथा सा निनमेदेवं वयं तव निनमाम । निनमै इति वा । यदि वा निनमाम इत्येवं [3]विपरिणामो निनंसै इत्येतस्य पदस्याथवा निनमै इति ।

' अश्वनामान्युत्तराणि षड्विंशतिः ' । अश्वस्य नामान्यश्वनामानि । उत्तराणि प्रकृतेभ्यो नदीनामभ्यः । अब्जा एव ह्यश्वाः । एवं ह्युक्तम् । ' अप्सु जाता अश्वाः स्वादेवैनान्योनेर्जनयन्ति ' इति । तस्मान्नदीनामभ्य उत्तराण्यश्वनामानि । कियन्ति पुनस्तानि । षड्विंशतिः । षडधिका विंशतिः । कतमानि पुनस्तानि । ' अत्यः हयः अर्वा ' इत्येवमादीनि । अतति गच्छतीत्यत्यः । हयति गच्छति[4] हन्ति वाध्वानमिति हयः । ईरणवानर्वा । गमनवानित्यर्थः । एवमादि । ' तेषाम् ' अश्वनाम्नामष्टौ यानि ' उत्तराणि ' अव्यथयै[5] इत्येवमादीनि तानि बहुवचनसंयुक्तानीत्यर्थः । आह । ' अश्वः कस्मात् ' । उच्यते । स हि ' अश्नुतेऽध्वानम् ' । व्याप्नोतीत्यर्थः । ' महाशनो वा भवतीति ' । स हि बहु भुङ्क्ते । ' तत्र ' तस्मिन्षड्विंशकेऽश्वाभिधानगणे ' दधिक्रा इत्येतत् ' पदं संदिग्धम् । तत्पुनरेतत् ' दधत्क्रामतीति ' । अथ ' वा ' धारयन्नयमश्वारोहं क्रामतीति दधिक्राः । अथ ' वा ' धारयन्नयमश्वारोहं

दधिक्रा इत्येतत्संदिग्धं पदम् — ' क्रन्दति ' शब्दं करोति ' इति ' दधिक्राः । अथ ' वा ' दधद्धारयन्[6]श्वारोहम् ' आकारी ' आकारवान् ' भवतीति ' दधिक्राः । स ह्यधिरूढेऽश्वारोह आकुञ्चितग्रीवो विप्रुष्पितसर्वगात्र आकृतिमान् भवति ।

' तस्य ' दधिक्राशब्दस्य ' अश्ववत् ' अश्वसंयुक्ताः ' देवतावत् '

१ च. संबन्धाबद्धाम°. २ ग. च. ज. परिस्वजनाय. ३ क. ख. घ. झ. ट. ठ. ड. ' वि ' नास्ति; ग. ज. °त्येव विपरि°. ४ क. ख. घ. झ. ट. ठ. ड. गच्छतीति. ५ ग. ज. अव्ययः; च. व्यथयः. ६ क. ख. घ. झ. ट. ठ. ड. °रयन्नयमश्वा°.

तस्याश्ववद्देवतावच्च निगमाः

देवतासंयुक्ताः ‘ च निगमा भवन्ति ’ । ‘ तत् ’ एतदुच्यते । ‘ यद्देवतावत् ’ अस्य दधिक्राशब्दस्य ‘ तदुपरिष्टात् ’ पञ्चदशेऽध्याये ‘ आ दधिक्राः शवसा ’ इत्यस्यामृचि ‘ व्याख्यास्यामः ’ [निरु० १० । ३१] । ‘ अथ ’ पुनर्यत् ‘ अश्ववत् ’ अस्य तत् ‘ एतत् ’ व्याख्यायते ॥ २७[1] ॥

उत स्य वाजी क्षिपणिं तुरण्यति ग्रीवायां बद्धो अपिकक्ष आसनि । क्रतुं दधिक्रा अनु संतवीत्वत्पथामङ्कांस्यन्वापनीफणत् [ऋ० सं० ४ । ४० । ४] ॥ अपि स वाजी वेजनवान्क्षेपणमनु तूर्णमश्नुतेऽध्वानं ग्रीवायां बद्धो ग्रीवा गिरतेर्वा गृणातेर्वा गृह्णातेर्वापिकक्ष आसनीति व्याख्यातं क्रतुं दधिक्राः कर्म वा प्रज्ञां वा । अनु संतवीत्वत् । तनोतेः पूर्वया प्रकृत्या निगमः । पथामङ्कांसि पथां कुटिलानि पन्थाः पततेर्वा पद्यतेर्वा पन्थतेर्वाङ्कोऽञ्चतेरापनीफणदिति फणतेश्चर्करीतवृत्तं दशोत्तराण्यादिष्टोपयोजनानीत्याचक्षते साहचर्यज्ञानाय ज्वलतिकर्माण उत्तरे धातव एकादश तावन्त्येवोत्तराणि ज्वलतो नामधेयानि नामधेयानि ॥ २८[2] ॥

उत स्य वाजीति । गौतमपुत्रस्य वामदेवस्यार्षम्[3] । जगती । वाजपेये वाजियुक्तं रथमधिरुह्य यजमानोऽनुवाकं जपति तत्रैषा [तै० सं० १ । ७ । ८] । उत स्यः अपि सः इत्यर्थः । वाजी वेजनवान् । ‘ओविजी[4] भयचलनयोः’ [धा० ७ । २३] । भयवान् । परेभ्यो भयदाता । परेषां

अस्यामृच्यश्ववत्प्रयोगः

हि तं दृष्ट्वा भयमुत्पद्यते । चलनवान् वा । स हि नित्यं चलनशीलः । क्षिपणि क्षेपणमनु कशाघातमनु तुरण्यति तूर्णमश्नुतेऽध्वानम् । व्याप्नोतीत्यर्थः । अपि कशाप्रहारमनु तुरण्य-

---

१ क. ख. ५; ग. ३५[२४]; घ. ट. ठ. ड. च. ज. अङ्को नास्ति. २ क. ख. द. ६; छ. त. ३६. ३ क. ख. घ. झ. ट. ठ. ड. °वस्येयमार्षम्. ४ घ. झ. ट. ठ. ड. ओ°.

त्यप्यनाहत एवेत्यपिशब्दः । किंच । ग्रीवायामुरसि वध्रेणे बद्धः अपि कक्षे कक्षायाम् । अप्यासनि मुखे खलीनेन बद्धः । एवमनेकेषु स्थानेषु बद्धस्तथापि तुरण्यत्येव । अन्यो ह्येकस्मिन्नपि प्रदेशे बद्धः स्पन्दितुमपि न शक्नोति किमुत त्वरितुम् । किंच क्रतुमात्मीयं गमनकर्म प्रज्ञां वाश्वारोहस्य संतनोति । काममभिप्रेतेनार्थेन शीघ्रगामित्वादधिक्रा अश्वोऽनुसंतनोतीत्यर्थः । किंच । यान्यपि च कानिचित्पथां कुटिलानि मार्गाणाम् अङ्कांसि अञ्चितानि कुटिलानि तान्यपि सन्त्यनुलोमानीव कुर्वन्नाशुगामित्वादाभिमुख्येन पुनः पुनर्वा भृशं वा फणति गच्छतीत्यर्थः । एष समस्तार्थः ।

अथैकपदनिरुक्तम् । ‘ ग्रीवा गिरतेर्वा ’ गिलनार्थस्य [धा० ६ । १२९] । तया हि गिलत्यन्नम् । गृणातेर्वा शब्दार्थस्य [धा० ९ । २६] । तया हि शब्दो गीर्यते । गृह्णातेर्वा । तया ह्युदकादि गृह्यते तस्यामेव वा गृह्यते यः शृङ्खलीक्रियते । ‘ अनुसंतवीत्वत् ’ इति ‘ तनोतेः ’ धातोः ‘ पूर्वया प्रकृत्या निगमः ’ । षड्विधो हि धातुः । ‘ प्रकृत्यन्तः सनन्तश्च यङन्तो यङ्लुगेव च । ण्यन्तो ण्यन्तसनन्तश्च षड्विधो धातुरुच्यते’ ॥ आसां षण्णां धातुप्रकृतीनां या पूर्वा प्रकृतिस्तयैष निगमो न सन्प्रकृतीत्यादीनामन्यतमया । ‘ पन्थाः पततेर्वा [धा० १ । ८७०] पद्यतेर्वा [धा० ४ । ६३] पन्थतेर्वा ’ [धा० १०।४२] । त्रयोऽपि ह्येते गत्यर्थाः । एतेषामन्यतमस्य । अङ्कोऽञ्चतेः गत्यर्थस्य [धा० १ । ८८७] । ‘ आपनीफणदिति फणतेः’ [धा० १।८४६] गत्यर्थस्य चर्करीतान्तत्वेन वृत्तम् ।

षट्प्रकारो धातुः।
अनसंतवीत्वदिति पूर्वया प्रकृत्या निगमः

दश यानि ‘ उत्तराणि ’ नामानि तान्यश्वनामसंबन्धेनैवोच्यन्ते । तान्यपि ह्यश्वानामेव । तानि पुनः ‘आदिष्टोपयोजनानीति’ एवम् ‘आचक्षते’ आचार्याः । इदमिन्द्रस्याश्वानां नामेदमग्नेरिदमादित्यस्येत्येवमादिष्टोपयोजनानि । कतमानि पुनस्तानि । ‘ हरी

आदिष्टोपयोजनान्यश्वनामानि

१ ग. ज. वरत्रद्वत्रण; घ. झ. ट. ठ. ड. वरत्रेण. २ क. ख. घ. झ. ट. ठ. ड. अथासनि. ३ क. ख. घ. झ. ट. ठ. ड. चलितु°. ४ क. ख. घ. झ. ट. ठ. ड. ‘ कुटिलानि ’ नास्ति; ग. ज. °निचित् । यथा कुटिलानि मार्गा°. ५ क. ख. घ. झ. ट. ठ. ड. सन्ति तान्यप्यनुलो°. ६ ग. च. ज. गिलतेऽन्नम्. ७ घ. ट. °सनन्त्यश्च. ८ ग. च. ज. पन्थतेर्वा पद्यतेर्वा. ९ क. ख. घ. ट. ठ. ड. एषां. १० च. चर्करीतान्तेन. ११ क. ख. घ. झ. ट. ठ. °नामेवेति.

इन्द्रस्य ' इत्येवमादीनि । हरी हरितवर्णाविन्द्रस्याश्वौ । रोहिता[1]वग्नेः । रोहितवर्णावित्येवमादि ।

'ज्वलतिकर्माण उत्तरे धातव एकादश ' । य एव ह्यश्ववन्तो भवन्ति त एव ज्वलन्तीव तेजसा । ततोऽश्वनामभ्य उत्तरे ज्वलत्यर्था धातवः । कतमे पुनस्त इति । ' भ्राजते भ्राशते[2] भ्राश्यति[3] ' इत्येवमादयः ।

' तावन्त्येवोत्तराणि ' ' जमत् कल्मलीकिनं जञ्झणाभवन्[4] ' इत्येवमादीनि ' ज्वलतो नामधेयानि ' । जमति गच्छतीति जमत् । कमहं मलिनं शोधयामीति कल्मलीकिनम् । जनं[5] जनं भावयतीति ' जञ्झणाभवन्[6] ' इत्येवमादि । ज्वलतो नामधेयानीत्यध्यायपरिसमाप्त्यर्थो द्विरभ्यासः ॥ २८[7] ॥

इति[8] ऋज्वर्थायां निरुक्तवृत्तौ जम्बुमार्गाश्रमवासि[9]न आचार्यभगवद्दुर्गस्य[10] कृतौ सप्तमोऽध्यायः[11] ॥ ७ ॥

अथ[1] निर्वचनमो[2] घोरा[3] ज्ञो विद्या[4] हवा अथातो[5]ऽनुक्रमिष्याम[6] ओ वृक्षे वृक्षे[7] ता वां वास्तूनि[8] थई[9] चकारायं[10] सं शिक्षे हिरण्यनामा+[11]न्यार्ष्टिषेणो[12] यद्देवापिः[13] साधारणानि[14] स्वरादित्यो[15] रश्मिनामान्याति[16]ष्ठन्तीनां[17] दासपत्नी[18]स्त्रि[19]नामानीदं[20] श्रेष्ठं[21] रुशद्वत्साहश्वे[22] कृष्णं देवो[23] नामानेवाङ्ने[24] मानीयं[25] शुष्मे मीरमध्वरं[26] इन्द्रो[27] अस्मा नाते[28] कारोऽतस्य वाज्य ऽष्टाविंशतिः ॥

इति निरुक्ते पूर्वषट्के द्वितीयोऽध्यायः ॥ २ ॥

---

१ क. ख. घ. झ. ट. ठ. ड. रोहितोऽग्नेः. २ घ. झ. ट. भ्लाशते. ३ ग. ज. भ्लाश्यते; घ. झ. ट. च. भ्राश्यते. ४ च. °भवम्. ५ क. ख. घ. ट. ' जनं ' सकृदेव. ६ ग. च. ज. भवम्. ७ क. ख. ७; ग. ३६; घ. झ. ट. ठ. ड. च. ज. अङ्को नास्ति. ८ घ. झ. ट. 'इति' नास्ति. ९ क. ख. घ. झ. ट. ठ. ड. °श्रमनिवा°. १० ग. च. ज. °दुर्गकृतौ. ११ घ. झ. ठ. ठ. ड. च. °ध्यायः समाप्तः. + ङ. °नामान्युत्तराण्यार्ष्टि°.

अथ तृतीयोऽध्यायः ।

तत्र प्रथमः पादः ।

ॐ । कर्मनामान्युत्तराणि षड्विंशतिः कर्म कस्मात्क्रियत इति सतोऽपत्यनामान्युत्तराणि पञ्चदशापत्यं कस्मादपततं भवति नानेन पततीति वा तद्यथा जनयितुः प्रजैवमर्थीये ऋचा उदाहरिष्यामः ॥ १ ॥

'कर्मनामान्युत्तराणि षड्विंशतिः' । कर्मणो नामानि कर्मनामानि[1] । उत्तराणीति प्रकृतेभ्यो ज्वलन्नामधेयेभ्यः[2] । ज्वलत्येव ह्यग्नौ कर्माणि क्रियन्त इति ज्वलन्नामभ्य उत्तराणि कर्मनामानि । कियन्ति पुनस्तानि । 'षड्विंशतिः'[3] । षडधिका विंशतिः षड्विंशतिः । कतमानि पुनस्तानि । 'अपः अप्नः दंसः' [निघ० २ । १२] इत्येवमादीनि । आप्यते पुरुषेणैतदाप्नोति वा पुरुषमेतदित्यपः । अप्नः इत्येतदप्याप्नोतेरेव । एवमादि योज्यम् । आह । 'कर्म कस्मात्' । उच्यते । 'क्रियत इति सतः' । सत इति कारकावधारणार्थमिति ।

'अपत्यनामान्युत्तराणि पञ्चदश' । अपत्यस्य नामान्यपत्यनामानि । उत्तराणीति प्रकृतेभ्यः कर्मनामभ्यः । सर्वकर्मणां ह्यपत्योत्पादनकर्मैव प्रधानमृणापाकरणद्वारेणेति कर्मनामभ्य उत्तराण्यपत्यनामानि । कियन्ति पुनस्तानि । पञ्चदश । कतमानि पुनस्तानि । 'तुक् तोकम् तनयम्' [निघ० २ । २] इत्येवमादीनि । तुक् तकतेर्धातोस्तुज्यतेर्वा[5] । तोकं तुद्यतेः । तनयं[4] तनोतेरिति वक्ष्यति [निरु० १० । ७] । आह । 'अपत्यं कस्मात्' । उच्यते । 'अपततं भवति' । पितुः सकाशादपेत्य पृथगिवं[6] ततं भवति । अथ 'वानेन' जातेन सता पितरो नरके 'न पतन्तीति' अपत्यम् ।

अत्र पुनर्विवदन्ते । द्वयोः संनिपाते किं क्षेत्रिणोऽपत्यमुत बीजिन

---

१ ग. ज. 'कर्मनामानि' नास्ति. २ ग. च. ज. ज्वलतिनाम°. ३ क. ख. झ. 'षड्विंशतिः' नास्ति. ४ ठ. ड. तनयः. ५ घ. ट. °स्तुजजतेः; च. °स्तुक्यतेः° ज्य. ६ ग. ज. °थगेव.

अपत्यं क्षेत्रिणो बीजिनो वेति प्रश्नः

इति । ‘ तत् ’ एतदुच्यते । ‘ यथा जनयितुः ’ एव ‘ प्रजा ’ भवतीति ‘ एवमर्थीये ऋचा-[2]वुदाहरिष्यामः ’ ॥ १ ॥

परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम । न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः [ऋ० सं० ७ । ४ । ७] ॥ परिहर्तव्यं हि नोपसर्तव्यमरणस्य रेक्णोऽरणोऽपार्णो भवति रेक्ण इति धननाम रिच्यते प्रयतो नित्यस्य रायः पतयः स्याम । पित्र्यस्येव धनस्य । न शेषो अग्ने अन्यजातमस्ति । शेष इत्यपत्यनाम शिष्यते प्रयतोऽचेतयमानस्य तत्प्रमत्तस्य भवति मा नः पथो विदूदुष इति तस्योत्तरा भूयसे निर्वचनाय ॥ २ ॥

‘ परिषद्यं हि ’ ‘न हि ग्रभाय’ इति चैते त्रिष्टुभौ । वसिष्ठाग्निसंवादे वसिष्ठेन हतपुत्रेणाग्निरभ्यर्थितः[3] पुत्रं मे देहीति । तेन किलासौ प्रत्युक्तः क्रीतकक्रत्रिम[4]दत्तकादीनां पुत्राणामन्यतमं कुरुष्व पुत्रमिति । स एवमुक्त एताभ्यामृग्भ्यामन्यजान्पुत्रान्निन्दन्नौरसं पुत्रं ययाचे । परिषद्यं[5]० वि दुक्षः इति । परिषद्यं हि परिहरणीयं परित्याज्यं परिहर्तव्य[6]मित्यर्थः । किं पुनस्तत् । अरणस्य रेक्णः । अरणस्यापगतार्णस्यापगतोदकसंबन्धस्य परकुलजस्य[7] रेक्णो यदपत्याख्यं धनं तत्परिहर्तव्यम् । न पुत्रत्वेन परिकल्पयितव्यमित्यर्थः । न हि तत्पुत्रत्वेन कल्प्यमानमपि पुत्रकार्येष्ववतिष्ठते परकीयत्वात् । यत एवमतो ब्रूमः । नित्यस्य रायः पतयः स्याम । पित्र्यस्येव धनस्य । यथा हि यदेव पित्र्यं धनं पुत्रत्वे भवति तस्यैव ह्युपर्यगौणं स्वामित्वं भवत्येवं यदेव स्वयंजातमपत्यं भवति तदेव मुख्यं

क्रीतकक्रत्रिमादीनि नैव स्वापत्यानि

---

१ क. ख. ग. ज. ‘ इति ’ नास्ति. २ ठ. ड. ॥ १ ॥ इति निरुक्तवृत्तौ तृतीयाध्याये प्रथमः खण्डः. ३ ग. ज. °रभ्यर्चितः. ४ च. क्रीतकृत्रि°. ५ घ. ट. सर्वा ऋक् पठ्यते. ६ क. ख. घ. झ. ट. ठ. ड. ‘ परिहर्तव्यं ’ परिहरणीयमित्यस्य प्राग्वर्तते. ७ क. ख. °कुलजातस्य; ट. °कुलजस्य° जातः

स्वबीजजातमेव स्वापत्यं नान्यबीजजातम्

भवति नेतरत्क्षेत्रजं वा[1] क्रीतकं वा । यत एवमतो ब्रूमः । यदेव नित्यमात्मीयमगौणं स्वयमुत्पादितं पुत्राख्यं रायो[2] धनं तस्यैव वयं पतयः[3] पालयितारः स्याम । मा परकीयस्येत्यभिप्रायः[4] । कस्मात्पुनरेवं ब्रूमहे । इतो यस्मान्न शेषो अग्ने[5] अन्यजातमस्ति । नास्ति शेषो नास्त्यपत्यमन्येन जातं हे अग्ने । य एव जनयति तस्यैव हि तद्भवति नेतरस्येत्यभिप्रायः । अचेतानस्य य एव ह्यचेतयमानो भवत्यविद्वान्प्रमादी तस्यैवाचेतनस्य प्रमत्तस्याश्रुतवतो धर्मं[6] परितोषमात्रं भवति ममेदमपत्यमिति । नापत्यकार्येऽवतिष्ठते । यत एवमतो ब्रूमः । मा पथो विदुक्षः । मास्मानेतस्मात्पितृपितामहप्रपितामहानुसंततात्पथो मार्गादेन केनचित्प्रत्याख्यानद्वारेण विदूदुषस्त्वम्[7] । देहि नः पुत्रमौरसमित्यभिप्रायः । इति समस्तार्थः[8] ।

अथैकपदनिरुक्तम् । ‘ अरणोऽपार्णः ’ । अपगतोदकसंबन्ध इत्यर्थः । ‘ रेक्ण इति धननाम ’ । तद्धि ‘ रिच्यते ’ अतिरिच्यत इतो लोकादमुं लोकं ‘ प्रयतो ’ म्रियमाणस्येत्यर्थः । ‘ शेष इत्यपत्यनाम ’ । तद्धि ‘ शिष्यते ’ इहैव लोकेऽवतिष्ठते पितुरमुं लोकं ‘ प्रयतो ’ गच्छत इत्यर्थः ।

एवमस्यामृचि ‘ न शेषो अग्ने अन्यजातमस्ति ’ इत्यनेन विशेषलिङ्गेनोपपन्नमेतद्भवति जनयितुरेव प्रजा भवति न क्षेत्रिणो नापि क्रेतुरन्यस्य वा कस्यचिदिति । एवं चैष शब्दार्थ उपपद्यते यस्मादेवापेत्य ततं भवति तस्यैवापत्यमिति । अनेनैव चा[9]पत्यशब्दनिर्वचनप्रसङ्गेनैष मन्त्रो व्याख्यातः । उत्तरं च सावशेषमपत्यशब्दं[10] प्रसक्तानुप्रसक्तमेवोच्यते । ‘तस्योत्तरा भूयसे निर्वचनाय ’ ॥[11] २ ॥

---

१ च. ‘ वा ’ नास्ति; ठ. ड. वा क्रीतं वा. २ ट. रायो° राः. ३ ग. ज. पतयः ’ पालयितार इत्यस्य पश्चाद्वर्तते. ४ घ. झ. ठ. ड. °स्येत्यर्थः; ट. °स्येत्यर्थः° भिप्रायः. ५ सर्वेषु पुस्तकेषु विरामः ‘ जातम् ’ इत्यस्य पश्चाद्वर्तते नात्र. ६ क. ख. धर्मात्; घ. झ. ट. ठ. ड. धर्मान्. ७ क. ख. घ. झ. ट. ड. °दुषः । त्वं देहि. ८ ठ. मन्त्रार्थः. ९ च. ‘च’ नास्ति. १० क. ख. घ. झ. ढ. ठ. ड शब्दे प्र°. ११ ठ. ड. इति २ निरुक्तवृत्तौ तृतीयाध्याये द्वितीयः खण्डः.

न हि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मंतवा उ । अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषाळेतु[1] नव्यः [ऋ० सं० ७ । ४ । ८]॥ न हि ग्रहीतव्यो[2]ऽरणः सुसुखतमोऽप्यन्योदर्यो मनसापि न मन्तव्यो ममायं पुत्र[3] इत्यथ स ओकः पुनरेव तदेति यत आगतो भवत्योक इति निवासनामोच्यत एतु नो वाजी वेजनवानभिषहमाणः सपत्नान्नवजातः स एव पुत्र इत्यथैतां दुहितृदायाद्य उदाहरन्ति पुत्रदायाद्य इत्येके ॥ ३ ॥

न हि ग्रभायेति । न हि ग्रहीतव्यो नात्मीयः[4] कर्तव्यः पुत्रो ममायमित्यनेनाभिप्रायेण । कः पुनरसौ नात्मीयः कर्तव्यः । अरणोऽपार्णोऽपगतोदकसंबन्धोऽन्यकुलजः । यद्यपि सुशेव एव स्यात्सुखतमः पारिचारिता हितैषी तथाप्यन्योदर्योऽन्येनोदीरितादेतसो जातोऽन्यजायोदरसंभूतो वा । यो हि स्वस्यां[6] जायायां संभवति स स्व एवोदरे संभूतो भवति । ‘ अर्धो ह वा एष आत्मनो यज्जायेति विज्ञायते [शत० ब्रा० ५ । २ । १ । १०] । तस्माद्योऽन्यजायोदरसंभूतः स मनसापि न मन्तव्यो ममायमिति किं पुनः पुत्रत्वे परिकल्पयितव्य इति । किं कारणं मनसापि न मन्तव्य इति । अधा चिदोकः पुनरित्स एति । अधशब्दोऽथशब्दस्यार्थे वर्तते । स च हेत्वर्थः । यस्मादोकः स्वं निवासस्थानं स्वं वंशं बहुनापि कालेन स एति तद्वंश्य एव भवति तस्मादपुत्र एवासौ । यत एवमतो ब्रवीमि । आ नो वाज्यभीषाळेतु नव्यः । ऐतु आगच्छतु नो वाजी वेजनवान्परेभ्यो भयदाता अभीषाट् अभिषहमाणः अभिभवन्

अन्यजायोदरसंभूतं स्वापत्यमिति न कदापि मन्तव्यम्

तादृशमपत्यं स्वं वंशमेव गच्छति

---

१ क. ख. छ. त. द. °षाळेतु. २ क. ख. द. °तव्यो अर°; त°. तव्यो अर°. ३ क. ख. छ. त. द. °ममायमित्यथ°. ४ क. ख. ग. ज. घ. झ. ट. नात्मीयीकर्त°. ५ ठ. ड. °चरता. ६ घ. झ. ट. ठ. ड. स्वस्य. ७ च. °शब्दार्थे. ८ क. ख. ग. च. ज. घ. °षाळेतु. ९ ग. ज. ठ. ड. एतु.

सपत्नान् नव्यो नवजातः । शिशुरित्यर्थः । स एव पुत्र आगच्छतु । किं नः परकीयैः पुत्रैः संकल्पितैरित्यर्थः ।

' अथैतां दुहितृदायाद्य उदाहरन्ति ' । इदमुक्तमपेत्य यस्मात्पितुः सकाशात्ततं भवति तस्मादपत्यमिति । तदिदमुभयोरपत्यत्वं[1] प्राप्नोति दुहितुः पुत्रस्य च । दुहिताऽपि ह्यपेत्यैव तता भवति पितुः सकाशात् । तत्रैवं सत्युभयोर्दुहितृपुत्रयोरपत्यकार्याणि दायाद्यादीन्यविशेषेण[2] प्राप्नुवन्ति । तदिदं विचार्यते । तदधिकारार्थोऽयमथशब्दः । एतामृचं शासद्वह्निरित्यादि या वक्ष्यमाणा तां दुहितृदायाद्येऽर्थे उदाहरन्ति धर्मविदः । अस्यामृचि वक्ष्यमाणायां दुहितुरपि दायाद्यत्वमस्तीति दृश्यते । पुत्रदायाद्य इत्येके । एके पुनर्धर्मविदो मन्यन्ते यत्पैतृकं वित्तं तत्पुत्रस्यैव दायाद्यं न दुहितुरिति । यथा दुहितापि दायाद्यमर्हति तथेयमृग्[3]निरुच्यते[4] ॥ ३ ॥

शासद्वह्निरित्येषा ऋग्दुहितृदायाद्ये कैश्चिदुदाह्रियते पुत्रदायाद्ये कैश्चित् ।

शासद्वह्निर्दुहितुर्नप्त्यं गाद्विद्वाँ ऋतस्य दीधितिं सपर्यन् । पिता यत्र दुहितुः सेकमृञ्जन्त्सं शग्म्येन मनसा दधन्वे [ऋ० सं० ३ । ३१ । १] ॥ प्रशास्ति वोढा[5] संतानकर्मणे दुहितुः पुत्रभावं दुहिता दुर्हिता दूरे हिता दोग्धेर्वा नप्तारमुपागमद्दौहित्रं पौत्रमिति विद्वान् प्रजननयज्ञस्य रेतसो वाङ्गा[6]दङ्गात्संभूतस्य हृदयादधिजातस्य मातरि प्रत्यृतस्य विधानं पूजयन्नविशेषेण मिथुनाः पुत्रा दायादा इति तदेतदृक्श्लोकाभ्यामभ्युक्तम्[7] । अङ्गादङ्गात्संभवसि हृदयादधिजायसे । आत्मा वै पुत्रनामासि स जीव शरदः शतमित्यविशेषेण पुत्राणां दायो भवति धर्मतः । मिथुनानां

---

१ ग. ज. °पत्यत्वं दुहितृपुत्रयोः प्राप्नोति दुहि°. २ क. ख. ' इति ' नास्ति; घ. °दीनि न्य इत्यपि°; ट. °दीनि इत्यवि° न्य. ३ घ. ट. ठ. ड. °मृङ् निरु°. ४ ठ. ड. ३ इति निरुक्तवृत्तौ तृतीयाध्याये तृतीयः खण्डः. ५ क. ख. छ. त. द. वोल्हा. ६ क. ख. छ. त, द. वा अङ्गा°. ७ छ. त. द. °भ्युक्तम् ॥ ४ ॥ अ°.

विसर्गादौ मनुः स्वायंभुवोऽब्रवीत् । न दुहितर इत्येके तस्मात्पुमान् दायादोऽदायादा स्त्रीति विज्ञायते तस्मात्स्त्रियं जातां परास्यन्ति न पुमांसमिति च स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते न पुंसः पुंसोऽपीत्येके शौनःशेपे दर्शनात् । अभ्रातृमतीवाद इत्यपरम् । [1]अमूर्या यन्ति जामयः सर्वा लोहितवाससः । अभ्रातर इव योषास्तिष्ठन्ति हतवर्त्मनः ॥ अभ्रातृका इव योषास्तिष्ठन्ति संतानकर्मणे पिण्डदानाय हतवर्त्मान इत्यभ्रातृकाया[2] अनिर्वाह औपमिकस्तस्योत्तरा भूयसे निर्वचनाय ॥ ४ ॥

शासद्वह्निरिति । एषा त्रिष्टुबैन्द्रे सूक्ते विश्वामित्रेण दृष्टा । माध्यंदिने सवन उक्थपर्यायेष्वच्छावाकस्य यच्छस्त्रमभिजिद्विश्वजिदादिष्वाहीनि[3]केष्वहःस्वहीनसूक्तं नाम तत्रेयं शस्यते [आश्व०श्रौ० ७।४]। 'न जामये तान्वः' इतीयमप्यनयैव समानार्षविनियोगदै[4]वतच्छन्दस्का । शासद्वह्निः प्रशास्ति प्रख्यापयति। प्रज्ञापयतीत्यर्थः । कः पुनरसौ प्रशास्ति किं वा प्रशास्तीति । वोढा । य उद्वोढा स्त्रिया भवति स तस्यां या जायते दुहिता तस्याः पुत्रभावं प्रशास्ति संतानकर्मणेऽर्थाय । 'दुहिता दुर्हिता[5]' । सा हि यत्रैव दीयते तत्रैव दुर्दत्ता भवति । 'दूरे' वा सती सा पितुः 'हिता' पथ्या भवतीति दुहितेत्युच्यते। 'दोग्धेर्वा' । सा हि नित्यमेव पितुः सकाशाद् द्रव्यं दोग्धि प्रार्थनापरत्वात् । आह । कथं पुनर्गम्यते प्रशास्ति वोढा[6] संतानकर्मणे दुहितुः पुत्रभावमिति । उच्यते । इतो यस्मात् नप्त्यं गात् नप्तारमुपागमदुपागच्छति चेतसा । दौहित्रं दुहितृपुत्रं पौत्रमिति पौत्रो ममायमित्येवमुपागच्छति । न चापुत्रस्य पुत्रः[7] पौत्रः स्यात् । उपागच्छति च दुहितुः पिता पौत्रो ममायमिति दौहित्रम् । तस्माद् दुहितापि पुत्र एव यस्याः पुत्रः पौत्रो ममायमित्येवं चेतसोपगम्यते । विद्वाँ ऋतस्य दीधितिं सपर्यन् । विद्वान्कस्य । ऋतस्य प्रजननयज्ञस्य ।

दुहिता दायाद्यमर्हतीत्यर्थे ऋक्

---

१ छ. त. द. अभूरित्यर्धं नास्ति. २ छ. त. द. ५. ३ क. ख. ठ. ड. °दिष्वहीनकेषु. ४ ग. च. ज. 'दैवत' नास्ति. ५ क. ख. ग. ज. दुर्हिता. ६ च. वोल्हा. ७ क. ख. घ. ट. ठ. ड. 'पुत्रः' नास्ति.

ऋत इत्येतदपठितं यज्ञनाम । दीधितिं विधानमित्यर्थः । प्रजननयज्ञविधानमविशेषेण सपर्यन्पूजयन्नित्यर्थः । यथैव हि पुत्रजन्मने[1] प्रजननयज्ञस्तन्यते तथैव हि दुहितृजन्मनेऽपि । यैरेव हि मन्त्रैर्येनैव च विधानेन पुत्रगर्भ आधीयते तैरेव मन्त्रैस्तेनैव च विधानेन दुहितृगर्भोऽपि । अथवा ऋतशब्देन रेत उच्यते । तद्व्यङ्गादङ्गात्संभूतं[2] सर्वगात्रेभ्यो हृदयानुस्मरण[3]निमित्तेन गर्भजन्मने मातरि प्रत्यृतं[4] प्रवृत्तं भवति रेतः । तस्य रेतसो विधानमविशेषेण पूजयन् स वोढा दौहित्रं पौत्रो ममायमित्येवमुपागच्छति चेतसा । येनैव हि विधानेन पुत्रजन्मने रेत उत्सृज्यते तेनैव हि दुहितृजन्मनेऽपि । तत्रैवं सति रेतउत्सर्गविध्यविशेषात्प्रजननयज्ञाविशेषाद्वा 'अविशेषेण मिथुनाः' पुरुषाः स्त्रियश्चोभयेऽपि 'दायादा' इत्येवमेके धर्मविदो मन्यन्ते । तदेतत् 'ऋक्श्लोकाभ्याम् अभि' आभिमुख्येन 'उक्तं मिथुनाः पुत्रा दायादा इति' 'अङ्गादङ्गात् संभवसि' [कौषी० आर० ४ । ११][5] 'अविशेषेण पुत्राणाम्' इत्येताभ्याम् ।

पुत्रा दुहितरश्चोभयेऽपि दायादा इत्यृक्श्लोकाभ्यामुच्यते

शासद्वह्निरित्येतस्या ऋचः प्रथमोऽर्धर्चो व्याख्यातः । पिता यत्र दुहितुरित्ययं द्वितीय उपरिष्टादस्य पादस्य[6] व्याख्यास्यते । अनयोरर्धर्चयोरन्तरा[7] तदेतदृक्श्लोकाभ्यामभ्युक्तमित्यत आरभ्य प्रसक्तानुप्रसक्तं दायाद्यधर्माश्रितमेव पूर्वोत्तरपक्षसंबन्धादाचारगतं बहु व्याख्यायते मन्त्रविषयख्यापनायेदृशोऽपि मन्त्राणां विषयो भवतीति धर्मसंविज्ञानाय[8] च । सर्व एवायमेवंप्रकारो धर्मो मन्त्रेभ्य एव निर्बभावित्येतदेतेन प्रकारेण ख्यापितं भवति ।

लोकव्यवहारोऽपि मन्त्राणां विषयो भवति

अङ्गादङ्गात्संभवसीत्येतामृचं[9] प्रवासादेत्य पुत्रस्य मूर्धनि जपति[10] । [आश्व० गृ० १ । १५ । ११ ॥ मान० गृ० १ । १८ । ६]

---

१ क. ख. घ. झ. ट. ठ. ड. °जनने. २ क. ख. घ. झ. ट. ठ. ड. °दङ्गाद्यत्संभूतं तत्सर्व°. ३ च. °नुसरण°. ४ च. प्रसृतं. ५ ग. इति । ४ । अङ्गा°. ६ घ. ट. ठ. ड. 'पादस्य' नास्ति. ७ घ. ट. ठ. ड. च. °रन्तरा । तदे°. ८ ठ. ड. 'सं' नास्ति. ९ घ. ट. 'अङ्गात्' सकृदेव. १० क. ख. ग. ज. घ. ट. ठ. ड. जपन् जिघ्रति । अनु°.

अनुष्टुब्वेषा । स पुत्र उच्यते । हे पुत्र अङ्गादङ्गात्संभवसि त्वं हृदयाच्चाधिजायसे । यत्तदुक्तम् ' अङ्गादङ्गात्संभूतस्य हृदयादधिजातस्य ' इति तदेतदनेनापि स्पष्टार्थतरेण मन्त्रेणोच्यत इति पूर्वस्यास्पष्टार्थतायां स्पष्टार्थीकरणार्थोऽयं मन्त्रः । तत्र हि ' ऋतस्य दीधितिं सपर्यन् ' इत्यत्र ऋतस्य ' प्रजननयज्ञस्य रेतसो वा विधानमविशेषेण पूजयन् ' इत्युक्तम् । तत्पुनरेतदस्पष्टम् । इह पुनरङ्गादङ्गात्संभवसि हृदयादधिजायस इत्येवमुच्यते । तत्रैवं सति यथैवं पुमानङ्गादङ्गात्संभवति हृदयाच्चाधिजायते तथैव दुहितापीत्यविशेष उपपद्यते । तस्मात्साधूक्तम् ' अविशेषेण मिथुनाः पुत्रा दायादा ' इति ।

अङ्गादङ्गादित्यनेन दुहितुः पुत्रत्वं स्पष्टीक्रियते

आत्मा वै पुत्रनामासि । यस्मादङ्गादङ्गात्संभूतस्त्वं हृदयादधिजातस्तस्मादात्मैव त्वम् । ममैवावयवभूत इत्यभिप्रायः । केवलं तु पुत्रनामा त्वमहं पितृनामैतावानावयोर्विशेषः । नाममात्रं भिन्नमित्यभिप्रायः । स त्वं जीव शरदः शतमित्याशीः । सर्वस्मिन्नपि संवत्सरे शरद्येव दुर्जीव्यं प्रचुररोगत्वाच्छरदः । तस्माच्छरदैवोपलक्ष्य संवत्सरशतमेतदायुराशास्यते ।

' अविशेषेण पुत्राणां दायो भवति धर्मतः । मिथुनानाम् ' । क एवमाह । ' मनुः स्वायंभुवः ' । स्वयंभुवोऽपत्यं स्वायंभुवः । कस्मिन् काले स एवमाह । ' विसर्गादौ ' सृष्ट्यादावित्यर्थः । पूर्वमर्धं श्लोकस्य ऋज्वेव । एवमेताभ्यामप्यृक्श्लोकाभ्यामुक्तमविशेषेण पुत्रस्य दुहितुश्च दायादत्वम् ।

सर्वेषामप्यपत्यानां दायाद्यार्हत्वमित्यर्थे मनुवचनम्

' न दुहितर इत्येके ' । न दुहितरो दायाद्यमर्हन्तीत्येवमेके धर्मविदो मन्यन्ते । ब्राह्मणमपि चैतस्मिन्नर्थे दर्शयति । ' तस्मात्पुमान् दायादः स्त्र्यदायादेति ह विज्ञायते ' । ' यदुच्छन्ति स्थालीं न दारुमयं तस्मात्पुमान्दायादोऽदायादा स्त्रीति विज्ञायते ' [मैत्रा० सं० ४ । ६ । ४] । एतस्मिन् ब्राह्मणे

दुहितरो न दायाद्यार्हा इत्यर्थे ब्राह्मणवचनं

१ क. ख. घ. ट. ठ. ड. ' एतत् ' नास्ति. २ ग. ज. पूर्वस्यामस्प°. ३ ग. ज. पुनः पुनरङ्गा°. ४ घ. झ. ट. ठ. ड. यथैवं; च. यथैवंव°. ५ च. पुत्रद्दायादा°. ६ घ. झ. ट. ठ. ड. अहं तु. ७ घ. झ. ट. ठ. ड. दुर्जीवा । प्रचु°. ८ क. ख. घ. झ. ट. ठ. ड. °रदैवो°. ९ च. °दाया स्त्री°.

विचार्यमाणे ज्ञायते[1] न दुहितरो दायाद्यमर्हन्ति पुमानेवार्हतीति । 'तस्मात्स्त्रियं जातां परास्यन्ति न पुमांसमिति च ' [मैत्रा० सं० ४।६। ४] । एतदपरं दर्शनं दुहितुरदायादत्वं लिङ्गतो दर्शयति । अथ यत्स्थालीं परास्यन्ति हवनकर्मणो न तया जुह्वति न दारुमयं परास्यन्ति हवनकर्मणो दारुमयेनैव जुह्वति तस्मात्कारणात्स्त्रियं जातां परास्यन्ति परस्मै प्रयच्छन्ति । तस्मात्पुमानेव पैतृकस्य वित्तस्येष्टे न दुहिता । किंच ।

स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते न पुंसः

' स्त्रीणां दानविक्रयातिसर्गा विद्यन्ते न पुंसः ' । प्रदीयते हि परस्मै स्त्री विक्रीयते च वैवाहिकेन शुल्केन । ' विक्रयं चाप्यपत्यस्य मतिमान्कोऽनुमंस्यते । स्वल्पो वाथ बहुर्वापि विक्रयस्तावदेव सः ॥ ' इति भगवता वासुदेवेनोक्तं सुभद्राहरणे । तथा च ब्राह्मणमपि दर्शयति चातुर्मास्येषु ।

महाभारते कन्याविक्रयनिषेधः । स्त्रीविक्रये ब्राह्मणवचनम्

' अनृतं वा एषा करोति या पत्युः क्रीता सत्यन्यथान्यैश्चरति ' [मैत्रा० सं० १ । १०।११] इति । तस्माच्छुल्केन प्रदानं विक्रयः[2] कन्याया इत्युपपद्यते । अतिसर्गः परित्यागः । परित्यज्यते हि कन्या स्वबन्धुभिः स्वयंवरे यो बलिष्ठः स गृह्णात्विति यो वा तुभ्यं रोचते तं वृणीष्वेति । स एष क्षत्रियाणामेव स्वयंवरधर्मो नेतरेषां वर्णानामिति । स पुनरयमितरेषामपि वर्णानामदायार्हत्वे[3] कन्याया लिङ्गं भवति । तस्मान्न दायाद्यमर्हति कन्येति ।

' पुंसोऽपीत्येके शौनःशेपे दर्शनात् ' । यदुक्तं दानविक्रयातिसर्गैर्हेतुभिरदायादत्वं स्त्रिया इत्यनैकान्त[4] एषः । पुंसोऽपि हि[5] दानविक्रयातिसर्गा विद्यन्त एव । पुरुषोऽपि[6] परस्मै दीयते[7] । एवं ह्युक्तं ' दत्तक्रीतकृत्रिमक्षेत्रजौरसाः पुत्राः' इति । तथा च ' शौनःशेपे

दानविक्रयातिसर्गाः पुंसोऽपि

---

१ घ. झ. ट. ठ ड. च. ज्ञायत इति. २ ठ. ड. °प्रदानं दानविक्रयः. ३ क. ख. अदायाद्यार्हत्वे; ग. ज. अदायादार्हत्वे; ठ. ड. अदायादत्वे; घ. अदायार्द्वे; ट. अदायार्द्वे° ई. ४ ठ. ड. अनेकान्त. ५ क. ख. ग. ज. ठ. ड. ' हि ' नास्ति. ६ क. ख. ग. ज. घ. ट. ठ. ड. °पि हि पर° ७ च. दीयत एव ह्युक्तं.

दर्शनात् ’। शौनःशेप आख्याने बह्वृचानां [ऐ० ब्रा० अध्या० ३३]। भारते च शुनःशेपस्य विक्रयो दृष्टो ‘ विक्रीतं मध्यमं मन्ये ’ इत्येवमादि। तथा च परित्यागोऽपि दृष्टो यथा विश्वामित्रेण मधुच्छन्दआदीनाम् [ऐ० ब्रा० ३३ । ६] । तस्मादनैकान्तिकत्वादेतेषां[1] हेतूनामुभयोराधि दायाद्यत्वमित्येवमेके मन्यन्ते ।

शासद्वह्निरितीयमृगभ्रातृमतीपरा

‘ अभ्रातृमतीवाद इत्यपरम् ’। आचार्यमतमिति वाक्यशेषः । यैवाभ्रातृका भवति कन्या सैव पित्र्यं धनमर्हति[3] नेतरा सभ्रातृका । पुरुषेषु हि पितुः पिण्डदातृषु तिष्ठत्सु न स्त्री धनमर्हति । सा हि परकीयं वंशं वर्धयति न स्वम् । तस्मादसौ नार्थभागिनी । अभ्रातृकायां पुनरयं विशेषः। अभ्रातृका[4]पितुरन्यः पुत्रो नास्तीति दौहित्रः पिण्डदानादिषु कार्येष्ववतिष्ठत इति भवत्यर्थभागिन्यभ्रातृका दुहिता । तदुक्तं ‘ पितोत्सृजेत्पुत्रिकामनपत्योऽग्निं प्रजापतिं चेष्ट्वास्मदर्थमपत्यमिति संवाद्य ’ [गौ० ध० २८ । १६] ‘ अभिसंधानमात्रं पुत्रिका इत्येकेषाम् ’ [गौ० ध० २८ । १७]।

अस्मिन्नर्थे गौतमवचने

निगममप्येतस्मिन्नर्थ[5] उदाहरन्ति ‘ अभ्रातर इव योषास्तिष्ठन्ति हतवर्त्मनः ’ इति[6] । निगमस्य समासतोऽर्थमाह । ‘अभ्रातृका इव योषास्तिष्ठन्ति संतानकर्मणे पिण्डदानाय हतवर्त्मान इति ’। अस्यामृचि ‘अभ्रातृकायाः’ कन्यायाः ‘अनिर्वाहः’ अनिर्वहणम् । विवाहनिषेध इत्यर्थः ।

अथर्ववेदीया ऋक्च

‘ औपमिकः ’ उपमया दर्शितोऽभ्रातर इवेति । ‘ अमूर्या यन्ति जामयः सर्वा लोहितवाससः । अभ्रातर इव योषास्तिष्ठन्तु[7] हतवर्त्मनः ’ [अ० सं० १ । १७ । १] । इयमथर्वणाम् । प्रसवमार्गवहनरोगिणी या स्त्री भवति तस्यास्तत्प्रतीकारकर्मणि विनियुज्यते । अमूर्या यन्ति स्रवन्ति नाड्यो रक्त-

---

१ ठ. ड. °दनैकान्ति. २ क. ख. घ. झ. ट. ठ. ड. °देवैषां. ३ घ. झ. ट. ठ. ड. °मर्हतीति. ४ क. ख. घ. झ. ट. ठ. ड. अभ्रातृकायाः पितु°; च. अभ्रातृकापि पुनरन्यः°. ५ ठ. ड. निगममित्येतस्मि°. ६ च. ‘ इति ’ नास्ति. ७ क. ख. ग. च. ज. ठ. ड. तिष्ठन्ति; ट. तिष्ठन्तु° न्ति.

मजस्रमविरताः स्त्रिय इवातिलोहितवस्त्राः सर्वा एतास्तिष्ठन्तु उपरमन्तु हतलोहितवहनमार्गा अस्य मन्त्रस्य वीर्येण । कथं पुनस्तिष्ठन्तु । अभ्रातर इव योषाः । यथा काश्चिदभ्रातृका योषा हतभर्तृवंशमार्गास्तिष्ठन्ति संतानकर्मणे पिण्डदानाय एवमेता नाड्यस्तिष्ठन्त्विति । एवमस्यामृच्यभ्रातृकाया अनिर्वाह उपमया लिङ्गतो दर्शितः ।

अत्राभ्रातृकाया विवाहनिषेधः

'तस्य' अनिर्वाहस्य 'उत्तरा' ऋक् 'भूयसे' बहुतराय निर्विविच्य 'वचनाय' ॥ [1] ४ ॥

अभ्रातेव पुंस एति प्रतीची गर्तारुगिव सनये धनानाम् । जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्सः [ऋ० सं० १ । १२४ । ७] ॥ अभ्रातृकेव पुंसः पितॄनेत्यभिमुखी संतानकर्मणे पिण्डदानाय न पतिं गर्तारोहिणीव धनलाभाय दाक्षिणा[2]जी गर्तः सभास्थाणुर्गृणातेः सत्यसंगरो भवति तं तत्र यापुत्रा यापतिका सारोहति तां तत्रा[3]क्षैराघ्नन्ति सा रिक्थं लभते श्मशानसंचयोऽपि गर्त उच्यते गुरतेरपगूर्णो भवति श्मशानं श्मशयनं श्म शरीरं शरीरं शृणातेः शम्नातेर्वा श्मश्रु लोम श्मनि श्रितं भवति लोम लुनातेर्वा लीयतेर्वा नोपरस्यावि[4]ःकुर्याद्यदुपरस्यावि[4]ःकुर्याद्गर्तेष्ठाः स्यात्प्रमायुको यजमान इत्यपि निगमो भवति । रथोऽपि गर्त उच्यते गृणातेः स्तुतिकर्मणः । स्तुततमं यानम् । आरोहथो वरुण मित्र गर्तमित्यपि निगमो भवति । जायेव पत्ये कामयमाना सुवासा ऋतुकालेषूषा हसनेव दन्तान् । विवृणुते रूपाणीति चतस्र उपमा नाभ्रात्रीमुपयच्छेत तोकं ह्यस्य तद्भवतीत्यभ्रातृकाया उपय[5]मनप्रतिषेधः प्रत्यक्षः पितुश्च पुत्रभावः पिता यत्र

---

१ ग. ५; ठ. ड. ४ इति निरुक्तभाष्ये तृतीयाध्याये चतुर्थः खण्डः समाप्तः. २ छ. दाक्षिणायाजी; त. दाक्षिणा^जी° या; दाक्षिणाजा [सायणभाष्ये]. ३ छ. त. द. तत्राक्षेणाघ्न°. ४ क. ख. छ. त. द. आविष्कु°. ५ छ. °यमनःप्राति°; त. यमनोऽप्राति°; द. यमनः प्राति°.

दुहितुरप्रत्ताया रेतःसेकं प्रार्जयति संदधात्यात्मानं संगमेन मनसेत्यथैतां जाम्या रिक्थप्रतिषेध उदाहरन्ति ज्येष्ठं पुत्रिकाया इत्येके ॥ ५ ॥

अभ्रातेव पुंस एति । दीर्घतमःपुत्रस्य कक्षीवत आर्षम् । त्रिष्टुबौषसी । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १४]। अभ्रातेव पुंसः । यथा अभ्रातृका कन्या दत्तापि सती पित्रा ऊढापि भर्त्रा पुनः पुंसः पितॄनेव पितृवंशमेव अभिमुखी एति संतानकर्मणे पिण्डदानार्थम् । न पतिवंशमित्यर्थः । सा हि पितृवंशं पुत्रैः पौत्रैश्च वर्धयति न भर्तृवंशमिति । तस्मादभ्रातृका पैतृकं दायाद्यमर्हतीत्युपपद्यते । गर्तारुगिव सनये धनानाम् । गर्तारोहिणीव काचिद्दाक्षिणात्या स्त्री । सा यथा गर्तः सभास्थाणुस्तमारोहति । अक्षनिवपनपीठमुपविशतीत्यर्थः । तत्र गता सत्यपुत्रा रिक्थं लभते । कितवा दापयन्ति रिक्थमिति दाक्षिणात्येषु देशरीतिः । सनये लब्धये धनानाम् । एवमुषाः अपरकाले रात्र्यां नभ आरोहति । किंच । जायेव पत्य उशती सुवासाः । यथा जाया पत्ये भर्त्रे सुवासाः भूत्वा ऋतुकालेष्वात्मानं दर्शयत्येवमुषा आत्मानं दर्शयति जनानाम् । किंच । उषा हस्रेव निरिणीते अप्सः । यथा हसनस्वभावा स्त्री हसनस्वभावाद्दन्तानात्मनो दर्शयत्येवमुषा अप्यात्मनोऽन्तर्भूतानि सर्वद्रव्याणां रूपाणि विवृणुते । शार्वरेण तमसा दिग्धानि सर्वद्रव्याणि स्वेन प्रकाशोदकेन धौतानीव करोति ।

विवाहनिषेधे ऋक्

‘ चतस्रः ’ एताः ‘ उपमाः ’ अस्यामृचि । अभ्रातेव पुंस इत्येका । गर्तारोहिणीवेति द्वितीया । जायेव पत्य इति तृतीया । हस्रेवेति चतुर्थी । अत्र प्रथमयोपमया ‘ अभ्रातेव पुंसः ’ इत्यनयाभ्रातृकाया अनिर्वाहो

---

१ छ. त. द्. ६. २ ठ. ड. इति. ३ ग. ज. गौतमपुत्रस्य; च. गोतमपुत्रस्य; घ. झ. दीर्घतमसः पु°; ट. दीर्घतमसः पुत्रस्य° दे. ४ क. ख. घ. झ. ट. ठ. ड. पुसः प्रतीची पितॄ°. ५ ग. ज. दाक्षिणा स्त्री; च. दाक्षिणाजा स्त्री° त्या. ६ क. ख. घ. झ. ट. ड. ड. हसना स्त्री.

लिङ्गयते । यथाभ्रातृका पितॄनेव प्रत्येति न पतिमेवमुषा आदित्यमेव प्रत्येति । एवमभ्रातृका कन्यापि[1] यस्मिन्नेव वंश उत्पन्ना भवति तमेव प्रकाशयति वर्धयति न भर्तृवंशमित्येवमुपमया नासावुद्वोढव्येत्येतदुपदर्शितं भवति पुत्रार्थत्वाद्विवाहस्य । तस्मादवर्धयितृत्वाद्भर्तृवंशस्य वर्धयितृत्वाच्च[2] पितृवंशस्याभ्रातृका पितृदायाद्यमर्हतीत्युपपद्यते ।

अभ्रातेव पुंस इत्यनयोपमयाभ्रातृकाया विवाहनिषेधः

निगमप्रसक्तस्य तत्त्वमाचष्टे ' गर्तः सभास्थाणुः ' इति । अक्षनिवपनपीठमित्यर्थः । ' गृणातेः ' [धा० ९ । २६] । स हि ' सत्यसंगरो भवति' । संगीर्यते हि तत्र सत्यमिदमत्र पतितमिदमत्र न पतितमित्येवम् । प्रायेण कितवास्तत्रानृतं ब्रुवते । ' तम् ' एवंलक्षणं गर्तमारोहति या स्त्री सा गर्तारुगित्युच्यते । तदेतद्गर्तस्य सभास्थाणोरारोहणं रिक्थलाभहेतुर्दाक्षिणात्येष्वपुत्राया[3] अपतिकायाः स्त्रियाः प्रसिद्धम् । तयैव प्रसिध्या निरुच्यते । देशसमाचारव्यवस्थयापि क्वचिन्मन्त्रार्थो निर्वक्तव्य इत्येतदनेन प्रदर्शितं भवति । तं ' तत्र यापुत्रा यापतिका सारोहति ' । तं सभास्थाणुं तत्र कितवमध्येऽवस्थितं यापुत्रा स्त्री यापतिका सारोहति । तस्मिन्नुपविशतीत्यर्थः । ततः ' सा ' भर्तृबन्धुभ्यः सकाशात् ' रिक्थं लभते ' यस्तस्या भर्तृसक्तो धनांशस्तम् । एवमसौ सनये लब्धये धनानां गर्तमारोहति ।

देशाचारानुरोधेन मन्त्रार्थो निर्वक्तव्यः

गर्तशब्दप्रसक्तमुच्यते । ' श्मशानसंचयोऽपि गर्त उच्यते ' । ' गुरतेः ' उद्यमनार्थस्य [धा० ६ । ११६] । स हि लोकविनाशायाभ्युद्यत इव भवति । यानि [4]हि तत्र पिशाचादीनि[5] सत्त्वान्याश्रितानि भवन्ति तानि जनमरण[6]माशासते । म्रियमाणेषु जनेषु तानि प्रमुदितानि भवन्ति । ' श्मशानं [7]श्मशयनम् ' इत्याख्यानप्रसक्तमुच्यते । तत्र हि श्म शेत इति श्मशयनं सत्[8] श्मशानमित्युच्यते । श्मशब्दार्थमाह । ' श्म शरीरम् ' इति । तद्धि तत्र शेते । तत्र हि तन्निक्षिप्यते मृतस्य सतः ।

---

१ क. ख. ग. ज. ' अपि ' नास्ति. २ ग. ज. ' च ' नास्ति. ३ व. ट. ठ. ड. च. °पुत्रकाया. ४ व. ह; ट. हि तत्र° हि; ठ. ड. °यानीह. ५ ग. ज. शिवादीनि; घ. झ. ट. ठ. ड. पिशाचशिवादीनि. ६ ग. ज. °मरणकामान्याशा°; झ. जननमरणमाशा;° ठ. ड. जननमरणमाशास्ते. ७ च. श्मशयं. ८ च. तं.

' शरीरं शृणातेः शम्नातेर्वा '। कृतव्याख्यानमपि [नि० २ । १६] पुनराह मुख्यत्वादस्य। तत्रौपमिकं वृत्रसंबन्धात्। न हि वृत्रस्य मुख्यं शरीरम्। श्मशब्दप्रसक्तं निराह। ' श्मश्रु लोम ' इति। तद्धि ' श्मनि ' शरीरे ' श्रितं भवति '। पर्यायप्रसक्तमाह। ' लोम लुनातेः ' [धा० ९ । ११]। तद्धि लूयते। ' लीयतेर्वा ' [धा० ४ । ३३]। तद्धि शरीरे लीयते तत्र।

निगममपि चात्रोदाहरन्ति ' श्मशानसंचयोऽपि गर्त उच्यते ' इति। ' नोपरस्याविष्कुर्याद्यदुपरस्याविष्कुर्याद्गर्तेष्ठाः स्यात्प्रमायुको यजमानः ' इति। उपर इति यूपस्यातष्टः प्रदेश उच्यते। ' पञ्चभागोपरा यूपाः ' इति ह्युक्तम्। तदतष्टं यूपस्य नाविष्कुर्यादित्यर्थः। पांसुभिस्तदवच्छादनीयं बर्हिषा च। यदि पुनरुपरस्य कंचिदप्यवयवमाविःकुर्याद्गर्तेष्ठाः गर्तप्रतिष्ठः श्मशानप्रतिष्ठः प्रमायुकः प्रमरणधर्मा पुरैव यथाविहितादायुषो यजमानः स्यादित्यपि निगमो भवति। अप्ययमप्यन्ये बहव इत्यपिशब्दः।

' रथोऽपि गर्त उच्यते '। ' गृणातेः ' स्तुत्यर्थस्य [धा० ९।२६]। तद्धि ' स्तुततमम् ' अश्वादिभ्यो यानेभ्यः। सुखतरं हि तेन गम्यते।

रथोऽपि गर्त इत्यर्थे ऋक्

रथोऽपि गर्त इत्यस्मिन्नर्थे ' आरोहथो वरुणमित्र गर्तमित्यपि निगमो भवति '। ' हिरण्यरूपमुषसो व्युष्टावयःस्थूणमुदिता सूर्यस्य। आ रोहथो वरुण मित्र गर्तमतश्चक्षाथे अदितिं दितिं च ' [ऋ० सं० ५ । ६२ । ८]॥ श्रुतविदात्रेय एतया त्रिष्टुभा मित्रावरुणावस्तौत्। राजसूयेऽभिषेचनीयो नाम क्रतुः। तत्र यजमानस्य रथमारुरुक्षतो गृहीतेषुधनुष्कौ बाहू अनयाभिमन्त्रयेते। तावेवात्र मित्रावरुणावभिप्रेतावधिदेवताभिप्रायेण। एवं ह्याह। ' मित्रोऽसीतीममभिमन्त्रयेते मित्रस्य ह्येतद्रूपं वरुणोऽसीतीमं वरुणस्य ह्येतद्रूपम् ' [मैत्रा० सं० ४ । ४ । ३]।

---

१ च. शृतं. २ क. ख. °सक्तं निराह; ट. °सक्तमाह° क्तंनिरा. ३ क. ख. ठ. ड. लीयते । तत्र निग°. ४ क. ख. ठ. ड. ' अत्र ' नास्ति; ट. चात्रो° च. ५ ड. °विःष्कुर्या°. ६ ग. च. ज. ' उपर इति ' नास्ति. ७ क. ख. घ. झ. ट. ठ. ड. °तष्टप्रदेशः. ८ ज. °विः कुर्या°. ९ क. ख. ग. ज. पांशुभि°; च. पांशुभि° सु. १० घ. झ. ट. ठ. ड. च. किंचि°. ११ क. ख. °विष्कुर्या°. १२ घ. ट. ठ. ड. पुरैवः य°. १३ ठ. ड. ' आरोहथो० भवति ' नास्ति. १४ ग. च. ज. घ. झ. ट. व्युष्टौ। श्रुतावि°. १५ क. ख. °याति; ट. °यते° ति; ठ. ड. °यतेति मित्र°.

४ । ४ । ३] इति । ताबुच्येते । हे मित्र हे वरुण हिरण्यवर्णौ[1] हिरण्य-सदृशवर्णम् । उषसो व्युष्टौ उषसो व्युच्छेदकाले उदिता चोदयकाले सूर्यस्य यौ युवामेतस्मिन्काल एवंरूपमयःस्थूणमयोमयस्थूणं[2] स्वं रथमारोहथस्तौ युवां ब्रवीमि ममैतं[3] रथं गर्तमेतस्मिन्विधावङ्गभूतं तत्तद्रूपमेव सांप्रतमारोहतम् । तत एतं[4]मारुह्य चक्षार्थे । कुरुतमित्यर्थः । अदितिं दितिं च । अदीनमनुपक्षीणमात्मपक्षं दीनं चापक्षीणममित्रपक्षमित्यर्थः ।

गर्तः सभास्थाणुरित्यत आरभ्य प्रसक्तानुप्रसक्तमुक्तम् । जायेव पत्य उशती सुवासा उषा हस्रेव निरिणीते अप्स इत्ययमप्यर्धर्चः पूर्वमेव व्याख्यातो भाष्यकारव्याख्यानुक्रमं भित्त्वाऽस्माभिस्तथा ह्येवं वाक्यस्यास्यैकवाक्यतानवच्छिन्ना[5] भवेदिति । 'चतस्र उपमाः' इति यदुक्तं भाष्यकारेण तदपि परिसंख्याय ता उपमा उपपादिता अस्माभिः ।

एवमभ्रातेव पुंस एति प्रतीचीत्यनेन पादेनास्यामृच्यनिर्वाहो दर्शितः । अन्यत्रापि चोक्तं ' नाभ्रातृकामुपयच्छेत तोकं ह्यस्य तद्भवति इति ' ।

पूर्वत्र लिङ्गत उपयमनप्रतिषेधः । अत्र पुनः प्रत्यक्षः

अयमस्मिन्वाक्ये ' नाभ्रातृकामुपयच्छेतेति प्रत्यक्ष एवोपयमनप्रतिषेधः ' । विवाहार्थे पाणिग्रहणप्रतिषेधः इत्यर्थः । पूर्वयोर्हि मन्त्रयोरुपमया लिङ्गतो विवाहप्रतिषेधो दर्शितः । एतस्मिंस्तु वाक्ये साक्षादेव प्रतिषेध आहत्यविधानेनैव 'नाभ्रातृकामुपयच्छेत ' इति । अत एतदुक्तम् 'उपयमनप्रतिषेधः प्रत्यक्षः' इति । आह । किमुपयमनप्रतिषेध एव । नेत्युच्यते । ' पितुश्च पुत्रभावः ' प्रत्यक्षः श्रूयते । कथम् । ' तोकं ह्यस्य तद्भवति ' । तोकमित्यपत्यनाम । यदपत्यमभ्रातृकायाः पितु[6]र्भवति नेतरस्य वोढुरिति । एवमितरस्य विवाहप्रतिषेध एव तेनेत्युच्यते[7] पुत्रभावादितरस्य च पुत्रिकापितुरपत्यप्राप्तेरिति[8] । तस्मादुपपन्नं भवति । यैवाभ्रातृमती सैव पैतृकं धनमर्हति नेतरेति ।

१ घ. ढ. हिरण्यरूपरूपं; झ. ' हिरण्यवर्णौ ' नास्ति; ठ. ड. हिरण्यस्तूपरूपं.
२ ठ. ड. ' अयोमयस्थूणं ' नास्ति. ३ क. ख. ग. ज. ममाप्यैतं. ४ ग. ज. एवमारु°. ५ ग. ज. °स्यैकतानवं. ६ ग. ज. तत्पितुः. ७ क. ख. ग. ज. घ. ट. ठ. ड. °एव नेत्यु. ८ क. ख. घ. ट. ढ. ड. °प्रातिरिति.

अथवा योऽसौ शासद्वह्निरित्यस्या ऋचि उत्तरोऽर्धर्चे उत्कृष्टः स एवा- भ्रातृकावादपक्षेणैव निरुच्यते । पूर्वोऽपि च शासद्वह्निरित्ययमभ्रातृमती- वादपक्षेणैव योजयितव्यः । एष एव हि स्थितः पक्षः । तस्या एव ह्यभ्रातृमत्या यः पुत्रो भवति तमेव पुत्रिकाविधानेन कृताभिसंधित्वात्पौत्रो ममा- यमित्यपुत्रः सन्मातामह उपगच्छति नेतरान्भ्रा- तृमतीपुत्रान् । अन्यथा हि सर्व एव वोढारोऽपुत्राः स्युः । ततो विवाहपरिश्रमो व्यर्थ एव स्यात् । अथवा सर्व एव लोको द्व्यामुष्यायणः स्यात् । किंच । पुत्रिकापितुरपि या भार्या साऽप्यन्यस्य दुहितेति तस्यामपि या जायते सापि मातामहस्यैव नेतरस्य पुत्रिकापितुः स्यात् । अनिष्टं चैतत्सर्वम् । तस्माद्यैवाभिसंधिपूर्वकं धर्मेण पुत्रिका क्रियते तस्या एव पुत्रो मातामहस्य भवति न सर्वस्या इति । सैव च दायाद्यार्हा नेतरा भ्रातृमत्यः । अत इदमुच्यते पिता यत्र दुहितुरिति । पिता यत्र यस्मिन्काले दुहितुरप्रत्तायाः । प्राक्प्रदानादित्यर्थः । रेतःसेकं रेतसः सेक्तारं यो दुहितरि रेतः सिञ्चति तं जामातरं प्रार्जयति प्रसाधयति प्रकल्पयति । उपावर्तय- तीत्यर्थः । तदा तस्मै तां दुहितरं ददात्किं करो- तीति । संशग्म्येन मनसा दधन्वे । संदधात्य- भिसंदधात्यात्मानं यदत्रापत्यमुत्पत्स्यते तन्ममेति ।

शासद्वह्निरित्ययमप्यर्धर्चोऽभ्रातृमतीवादपक्षेणैव योजयितव्यः

तस्मिन्नेवार्थे शासद्वह्निरित्यस्या उत्तरोऽर्धर्चः

कथं पुनरभिसंदधात्यात्मानमिति । संशग्म्येन मनसा । संगमेन मनसा विगतापुत्रत्वसंतापेन चेतसा । नाहमपुत्र इयमेव पुत्रिका मम पुत्रः । यो ह्यस्यामुत्पत्स्यते स पौत्रो मम भविष्यतीत्येवं सुखेन मनसा संदधात्यात्मानं तस्यां पुत्रिकायाम् । तत्रैवं सति यस्तस्यामेव कृतपुत्रिकाधर्मिण्यामुत्पद्यते दौहित्रस्तमेव नप्ता ममायमित्येवमुपगच्छति मातामहो न सर्वानेव दौहि- त्रान्भ्रातृमत्या अपि संतानकान् । स एव च मुख्यया वृत्त्या मातामहस्य पौत्रा भवति नेतरे भ्रातृमतीपुत्राः । ते हि गौण्या वृत्त्या जनयितुः पितुः पौत्राः सन्तो मातामहस्य पौत्रा इत्युच्यन्ते कदाचिल्लोके शास्त्रे वा ।

---

१ क. ख. उत्सृष्टः. २ क. ख. घ. ट. ठ. ड. एव स्यात्. ३ ग. ज. 'या' नास्ति ४ ट. उपा° प. ५ ग. ज. संतकात्; च. संतकान्° तान; ट. संतानिकान्° का. ६ घ. ट. ठ. ड. 'पौत्रो० लोके शास्त्रे' नास्ति. ७ क. ख. पुत्राः.

तत्रैवं सत्यङ्गादङ्गात्संभवस्यात्मा वै पुत्रनामासीत्येवमादिषु गौणं दुहितुः पुत्रत्वमुच्यते । किंच । यदि दुहिता पुत्रेणाविशिष्टैव स्यात्ततो दुहितेति विशेषसमाख्या[1] नैव स्यात् । अस्ति चेयम् । तस्माद्विशिष्टतरः पुत्रो दुहितुः सकाशादित्युपपद्यते । यदपि चोक्तम् 'अविशेषेण पुत्राणां दायो भवति' इति तदप्यभ्रातृमतीपक्षे द्रष्टव्यम् । अथवा वेदस्मृत्योर्विरोधे वेददृष्ट एव धर्मो ज्यायान्न स्मृतिदृष्टः । तस्मिंश्च वेदे 'अथैतां जाम्या रिक्थप्रतिषेध उदाहरन्ति' धर्मविदो येयमृग्वक्ष्यमाणा 'न जामये तान्वः' इति । अथशब्दो विशेषाविकारार्थः । 'ज्येष्ठं पुत्रिकाया इत्येके' । ज्येष्ठमपत्यं यत्पुत्रिकायास्तदेव मातामहस्य नेतराणि । जनयितुरेवेत्येवमेके मन्यन्ते । अथवा ज्येष्ठं पुत्रिकाया इत्येक इति । यदोत्सृष्टायां पुत्रिकायां पुत्रिकापितुरन्ये पुत्रा जायेरंस्तदा विभागकाले ज्येष्ठं धनभागं[2] पुत्रिकायै[3] दद्याद्यथाभागमितरान्पुत्रान्विभजेदभागा एव त्वितरा दुहितर इति । तदेतदनयर्चा निरुच्यते यथा दुहितॄणां[4] भागो नास्तीति ॥ ५[5] ॥

अङ्गादङ्गादित्यत्र दुहितुः पुत्रत्वं गौणम्

मनुवचनमभ्रातृमतीपक्षे योज्यम्

वेदस्मृत्योर्विरोधे वेददृष्टो धर्म एव ज्यायान्

न जामये तान्व इतीयमृक् स्त्रिया रिक्थप्रतिषेधे

ज्येष्ठं पुत्रिकाया इत्यस्य द्वावर्थौ

न जामये तान्वो रिक्थमारैक्चकार गर्भं सनितुर्निधानम् । यदी मातरो जनयन्त वह्निमन्यः कर्ता सुकृतोरन्य ऋन्धन् [ऋ० सं० ३ । ३१ । २] ॥ न जामये भगिन्यै जामिरन्येऽस्यां जनयन्ति[6] जामपत्यं जमतेर्वा स्याद्गतिकर्मणो निर्गमनप्राया[7] भवति तान्व आत्मजः पुत्रो रिक्थं

---

१ ठ. ड. °समानाख्या. २ क. ख. ग. ज. 'धन' नास्ति. ३ क. ख. घ. ट. पुत्रिकायै च; ग. ज. ठ. ड. पुत्रिकायैव. ४ ट. दुहितॄणां° भ्रातृमतीनां; ठ. ड. भ्रातृमतीनां दुहितॄणां. ५ ग. ६; ज. ८; ठ. इति निरुक्त० पञ्चमः खण्डः; ड. ५ खण्डः. ६ छ. त. द. जनयन्त्यजैनमपत्यं. ७ छ. द. निर्भमनःप्राया°.

प्रारिचत्प्रादाच्चकारैनां गर्भनिधानीं सनितुर्हस्तग्राहस्य यदिह[1] मातरोऽजनयन्त वह्निं पुत्रमवह्निं च स्त्रियमन्यतरः संतानकर्ता भवति पुमान् दायादो[2]ऽन्यतरोऽर्धयित्वा जामिः प्रदीयते परस्मै ॥ ६ ॥

इति[3] तृतीयाध्यायस्य प्रथमः पादः ॥

न[4] जामये भगिन्यै तान्वः आत्मजः। आत्मनो धियो जातः स आत्मजः। स[5] किं करोतीति । रिक्थमारैक् ।

दुहितॄणां भागो नास्तीत्यर्थे ऋक् — रिक्थं पैतृकं धनं न[6] प्रादात् प्रददाविति । किं तर्हि तस्याः करोतीति । उच्यते । चकार गर्भं सनितुर्निधानम् । करोति[7] गर्भनिधानं सनितुर्हस्तग्राहस्य भगिनीभर्तुः । प्रसवसमर्थां करोति पुष्णातीत्यर्थः[8]। किंच। यदी[9] मातरो यत्पुत्रद्वयमिह[10] मातरो जनयन्ति वह्निं च वध्वा वोढारं पुत्रमवह्निं चावोढ्रीं स्त्रियं तयोर्द्वयोरपि वोढ्रवोढ्रोः[11] पुत्रयोरन्यतर एकतरः कर्ता भवति संतानकर्मणः । कतमः । यः पुमान् । स एव च दायादो दायाद्यार्हो नेतरः कन्याख्यः । किंच । तयोरुभयोरपि सुकृतयोः सुतरामेकेनापि प्रयत्नेन कृतयोरुत्पादितयोरन्य ऋन्धन् अन्यतरोऽर्धयित्वा सुकृतोऽपि सुपुष्टोऽपि सन् जाम्याख्यो भगिन्याख्यः प्रदीयते परस्मै । न कस्यांचिदप्यवस्थायामसावात्मीयो भवतीत्यभिप्रायः । एवमस्यामृचि न जामये तान्वो रिक्थमारैगिति न दुहितरो रिक्थभागिन्यो भवन्ति नैताः संतानकर्मणि पितुरुपतिष्ठन्ते वर्धयित्वा ह्येताः परस्मै दीयन्ते तस्मादभागा एता इति ।

यत्पुनरेतदुक्तं[12] पुंसोऽपि दानातिसर्गविक्रया विद्यन्त इति तत्कदाचि-

---

१ क. ख. छ. त. द. यदी मा°. २ छ. त. द. ह. ३ ड. थ. ध. 'इति..... पादः' नास्ति; छ. इति प्रथमः पादः; त. इति तृतीयोऽध्यायः प्रथ°; द. इति नैरुक्तस्य तृती°. ४ ठ. ड. न जामय इति । न जाम°. ५ ष. ट. ठ. ड. स च. ६ ष. ट. 'न' नास्ति. ७ क. ख. ग. ज. 'करोति गर्भनिधानं' नास्ति. ८ ज. 'पुष्णाति' नास्ति. ९ च. यदि. १० क. ख. च. 'इह' नास्ति. ११ क. ख. वोढ्रवोढ्रोः; घ. ट. ठ. ड. वोढ्रोः. १२ क. ख. च. 'एतद्' नास्ति.

पुंसां दानातिसर्गविक्रया न नैसर्गिकाः

त्केनचिन्निमित्तेन भवति । स्त्री तु निसर्गेणैव दीयते विक्रीयते विसृज्यते[1] वा । सा हि परार्थमेवोत्पद्यते तस्मादसममिति ॥ ६ ॥[2]

इति निरुक्तवृत्तौ[3] अष्टमाध्यायस्य प्रथमः पादः ॥

मनुष्यनामान्युत्तराणि पञ्चविंशतिर्मनुष्याः कस्मान्मत्वा कर्माणि सीव्यन्ति मनस्यमानेन सृष्टा मनस्यतिः पुनर्मनस्वीभावे मनोरपत्यं मनुषो वा तत्र पञ्चजना इत्येतस्य[4] निगमा भवन्ति ॥ ७ ॥

प्रसक्तानुप्रसक्तमिदमुक्तं 'तद्यथा जनयितुः प्रजा' इत्येवमादि । प्रकृतमिदानीमुच्यते ।

'मनुष्यनामान्युत्तराणि पञ्चविंशतिः' । मनुष्याणां नामानि मनुष्यनामानि । उत्तराणि प्रकृतेभ्योऽपत्यनामभ्यः । अपत्यान्येव हि विवृद्धानि सन्ति मनुष्या इत्युच्यन्ते । कियन्ति पुनस्तानि । पञ्चविंशतिः । पञ्च च विंशतिश्च पञ्चविंशतिः । कतमानि पुनस्तानि । मनुष्याः नराः [निघ० २।७] इत्येवमादीनि[5] । नृत्यन्ति कर्मस्विति नरा इत्येवमादि । आह । 'मनुष्याः कस्मात्' । उच्यते । 'मत्वा' ज्ञात्वा तत एते 'कर्माणि सीव्यन्ति' । संतक्षन्तीत्यर्थः[6] । अथवा 'मनस्यमानेन' प्रजापतिना 'सृष्टाः' । 'मनस्यतिः पुनः' अयं धातुः 'मनस्वीभावे' । मनस्वीभावो नाम प्रहृष्टता । हृष्यता[7] प्रजापतिनैते सृष्टाः । अथवा 'मनोरपत्यं' मनुष्याः । 'मनुषो वा' अपत्यं मनुष्याः ।

'तत्र पञ्चजना इत्येतस्य निगमा भवन्ति' संदिग्धाः[8] ।

पञ्चजनशब्दः संदिग्धः

तत्रेयमृगुदाहरणम्[9] । तद्यथा ॥ ७ ॥[10]

---

१ ग. ज. अतिसृज्यते. २ ग. ७; ङ. ६ इति निरुक्ततृतीयाध्याये षष्ठः खण्डः ६. ३ ठ. ड. इति ऋज्वर्थायां निरुक्तटीकायामष्ट°. ४ क. ख. द. १; छ. त. ८. ५ ठ. ड. प्रजैवमर्थीय इत्ये°. ६ घ. ट. ठ. ड. संतन्वन्ती°. ७ क. ख. घ. ट. ढ. ड. प्रहृष्यता. ८ ठ. ड. °दिग्धाः । इति निरुक्तपूर्वषट्के तृतीयाध्याये सप्तमः खण्डः. ९ ग. ज. 'ऋक्' नास्ति. १० क. ख. १; ग. ९; ज. ९; घ. ढ. ठ. ड. च. अङ्को नास्ति.

तदद्य वाचः प्रथमं मंसीय येनासुराँ अभि देवा असाम । ऊर्जाद उत यज्ञियासः पञ्चजना मम होत्रं जुषध्वम् [ऋ० सं० १० । ५३ । ४] ॥ तदद्य वाचः परमं मंसीय येनासुरानभिभवेम देवा असुरा असुरता स्थानेष्वस्ता स्थानेभ्य इति वापि वासुरिति प्राणनामास्तः शरीरे भवति तेन तद्वन्तः सोदेवानसृजत तत्सुराणां सुरत्वमसोरसुरानसृजत तदसुराणामसुरत्वमिति विज्ञायते । ऊर्जाद उत यज्ञियासः । अन्नादाश्च यज्ञियाश्चोर्गित्यन्ननामोर्जयतीति सतः पक्वं सुप्रवृक्णमिति वा । पञ्चजना मम होत्रं जुषध्वम् । गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवो निषादः कस्मान्नि[1]षदनो भवति नि[2]षण्णमस्मिन्पापकमिति नैरुक्ताः । यत्पाञ्चजन्यया विशा । पञ्चजनीनया विशा पञ्च पृक्ता संख्या स्त्रीपुंनपुंसकेष्वविशिष्टा बाहुनामान्युत्तराणि द्वादश बाहू कस्मात्प्रबाधत आभ्यां कर्माण्यङ्गुलिनामान्युत्तराणि द्वाविंशतिरङ्गुलयः कस्मादग्रगामिन्यो भवन्तीति वाग्रगालिन्यो भवन्तीति वाग्रकारिण्यो भवन्तीति वाग्र[3]सारिण्यो भवन्तीति वाङ्कना भवन्तीति वा[4]ञ्चना भवन्तीति[6] वापि वा[5]भ्यञ्चनादेव स्युस्तासामेषा भवति ॥ ८ ॥

तदद्य वाचः[7] प्रथमं मसीयेति । सौ[8]चीकस्याग्नेरार्षम् । तस्य विश्वैर्देवैः[9] संवादः । तत्रेयम् । होतृजपे विनियुक्ता [आश्व० श्रौ० १ । २] ।

---

१ क. ख. छ. त. द. ‘ निषद्नो भवति ’ नास्ति. २ छ. त. निःषृण्ण°. ३ क. ख. छ. त. द. ‘ अग्रसारिण्यो भवन्तीति वा’ नास्ति. ४ क. ख. वाञ्चना; त. वाञ्चना° अ. ५ छ. द. °भ्यञ्जना°; त. °भ्यञ्जना° श्च. ६ क. ख. द. २; छ. त. ९. ७ क. ख. घ. ट. वाच० जुषध्वम्; ठ. ड. वाच इति. ८ च. सूचीकस्य. ९ क. ख. घ. ट. ठ. ड. °देवैः सह संवादः.

पञ्चजनशब्दवती ऋक्

तद्वीर्यं ‘ वाचः परममुत्कृष्टम्[1]हमद्य मंसीय[2] मन्ये । जान इत्यर्थः । येन वीर्येण किमिति । येनासुरानभिभवेम वयं देवाः[3] । ऊर्जादोऽन्नभक्षयितारः । अपि च हे यज्ञियासो यज्ञसंपादिनो देवा यूयमपि च हे पञ्चजना मनुष्या निषादपञ्चमा वर्णा ममेदं होत्रं जुषध्वमासेवध्वमनुगृह्णीध्वमिति समस्तार्थः ।

अथैकपदनिरुक्तम् । ‘ असुरा असुरताः स्थानेषु ’ । ते हि न सुष्ठु रताः स्थानेषु । चपला इत्यर्थः । अथ ‘ वा अस्ताः स्थानेभ्यः ’ । प्रच्याविता देवैरित्यर्थः । ‘ अपि वासुरिति प्राणनाम ’ । स हि ‘ अस्तः ’ क्षिप्त इव ‘ शरीरे भवति ’ । तस्य हि तत्र नित्यमवस्थानमित्यभिप्रायः । ‘ तेन ’ हि ‘ तद्वन्तो भवन्ति ’ । रो मत्वर्थे । अथवेदमन्यद्ब्राह्मणोक्तं निर्वचनं स्यात् । ‘ सोऽर्देवानसृजत[4] ’ । सुरिति प्रशस्तनाम । प्रशस्तादात्मनः प्रदेशात्प्रजापतिः सुरानसृजत । उर्ध्वेभ्यः प्राणेभ्यः । तदुक्तम् । ‘ऊर्ध्वमुदतृणत्पूर्वपक्षः पञ्चदशस्तेन देवानसृजत ’ [मैत्रा० सं० १ । ९ । ३] ‘ तत्सुराणां सुरत्वम् ’ इति विज्ञायते । एवमेव प्रातिलोम्येन ‘असोरसुरानसृजत ’ । असुरिति प्रशस्तप्रतिषेधः । अप्रशस्तादात्मनः प्रदेशात्प्रजापतिरसुरानसृजत । तदुक्तम् । ‘ अवाङ्वातिरदपरपक्षस्तेनासुरानसृजत ’ [मैत्रा० सं० १ । ९ । ३] इति । ऊर्जाद उत यज्ञियासः । अन्नादाश्च यज्ञियाश्च । ‘ ऊर्गित्यन्ननाम ’ । तद्धि ‘ ऊर्जयति ’ । बलिष्ठं करोतीत्यर्थः । अथ ‘ वा पक्वम् ’ एतत् ‘ सुप्रवृक्णं[5] ’ भवति ‘ इति ’ ककाररेफसामान्यात्पचेर्व्रश्चतेर्वा स्यात् । द्वयोरपि वा । तद्धि पक्वं सत् मृदुत्वात्सुच्छेद्यं[6] भवति ।

पञ्चजनशब्दस्यार्थौ

पञ्चजना मम होत्रं जुषध्वम् । एतदत्र संदेहपदमेकमुद्धृत्य प्रदर्शितम्[7] । ‘गन्धर्वाः पितरो देवा असुरा रक्षांसीत्येके ’ मन्यन्ते । ‘ चत्वारो वर्णा निषादः पञ्चम इत्यौपमन्यवः ’ ।

निषादनाम्ना कोऽभिधीयते

निर्षद्य[8] निषद्य हन्तीति प्राणिवधजीवनः[9] । अथवा ‘ निषण्णमस्मिन्पापकमिति ’ निषादः । सौधन्वना इत्येके

१ ब. ट. ठ. ड. °त्कृष्टं महदद्य°. २ च. मसीय. ३ ब. ट. ठ. ड. हे देवाः. ४ क. ख. ब. ट. असृजत्. ५ ग. ज. सुप्रवृक्तं. ६ ब. ट. ठ. ड. °त्सुछेद्यं. ७ ब. ‘ प्र ’ नास्ति. ८ ग. ज. निषिद्य निषिद्य. ९ ज. प्राणिगन्धजीवनः.

मन्यन्ते । स च रथकारः । तस्य हि भिन्नकालमाधानं श्रूयते । ' वर्षासु रथकारः ' । ऋभूणां त्वेति रथकारस्येति च मन्त्रभेदः [तै० ब्रा० १ । १ । ४] । सौधन्वना ऋभवः [ऋ० सं० १ । ११० । ४ ॥ ३ । ६० । ४] इति च मन्त्रलिङ्गात् ।

यथा तु पञ्चजनशब्देन मनुष्या एव निषादपञ्चमा वर्णा उच्यन्ते तथैव निगमः ।

पञ्चजनशब्देन निषादपञ्चमा वर्णा यस्यामुच्यन्ते सा ऋक्

' यत्पाञ्चजन्यया विशेन्द्रे घोषा असृक्षत । अस्तृणाद्बर्हणा विपोऽर्यो मानस्य स क्षयः [ऋ० सं० ८ । ६३ । ७] ॥ प्रगाथेन दृष्टेयमनुष्टुबैन्द्री । पृष्ठ्यस्य पञ्चमेऽहनि मरुत्वतीयशस्त्रस्य प्रतिपदेषा [आश्व० श्रौ० ७ । १२] । यदा पञ्चजनीनया विशा पञ्चजनसमुदायलक्षणया सहितैः स्तोतृभिर्ऋत्विग्भिरवर्षतीन्द्रे वर्षार्थिभिर्घोषाः स्तुतीरसृक्षतासृज्यन्त । निषादपञ्चमा वर्णा आर्ताः सन्तो वर्षाभावेऽस्तुवतेन्द्रं वर्ष भगवन्निन्येवमर्थयन्तः । अत इदमुक्तं यदा पाञ्चजन्यया विशा सह घोषा ऋत्विग्भिरसृज्यन्तेति । तदा किमिति । तदोपश्रुत्य स इन्द्रस्ताभिः प्रह्लादितचेता अस्तृणादहन्वर्षार्थं मेघान्बर्हणा परिवृद्धेन वधेन परिवृद्धानि वा मेघजालानि । विपो विपाटयिता मेघानां मेधावी वा । अर्य ईश्वरः कृत्स्नस्य जगतः । कस्मात्पुनरस्तृणात् । यस्मान्मानस्य स क्षयः । मानस्य दर्पस्य वीर्यस्य बलस्य स क्षयो निवासस्तस्मादस्तृणात् । अवीर्यो हि स्तूयमानः परितुष्टोऽपि किं कुर्यात् । अथवा मानस्य सत्कारस्य पूजायाः स इन्द्रः क्षयो निवासो भाजनमिति मन्वानैः स्तोतृभिर्वर्षार्थिभिः सत्कृतस्तान्वर्षप्रदानेन प्रतिसत्कारयिष्यन्नस्तृणान्मेघान् । अपि वास्य जगन्निर्माणस्य देवादेः स्थावरान्तस्य स इन्द्रः क्षयो निवास आश्रयो यस्मात्ततो मेघानस्तृणात् । अनावृष्टिद्वारेणास्य जगतो विनाशो मा भूत्कथं नामेत्यनेनाभिप्रायेण ।

---

१ क. ख. घ. ट. ठ. ड. ' हि ' नास्ति. २ च. ' च ' नास्ति. ३ क. ख. घ. ट. ठ. ड. तथैव; ग. तथैव° ष. ४ ग. ज. निगमः । १० । यत्पा°. ५ क. ख. घ. ट. ठ. ड. बलस्य वीर्यस्य. ६ क. ख. घ. ट. ठ. ड. °मानः किं कुर्यात्परितुष्टोऽपि ७ घ. ठ. ढ. ड. मत्वा तैः. ८ ठ. ड. प्रतिसंस्कार°. ९ ठ. ड. ' अस्य ' नास्ति. १० क. ख. घ. ट. ठ. ड. नामेत्यभिप्रायः.

'पञ्च पृक्ता संख्या' । सा हि 'स्त्रीपुंनपुंसकेष्वविशिष्टा' एव भवति । तद्यथा । पञ्च स्त्रियः पञ्च पुरुषाः पञ्च कुलानीति । एवं पञ्चशब्दे स्त्रीपुंनपुंसकेषु विशेषो नास्ति ।

'बाहुनामान्युत्तराणि द्वादश' । बाह्वोर्नामानि बाहुनामानि । उत्तराणि प्रकृतेभ्यो मनुष्यनामभ्यः । मनुष्याणामेव हि बाहवो भवन्तीति मनुष्यनामभ्य उत्तराणि बाहुनामानि । कियन्ति पुनस्तानि । द्वादश । द्वे[1] च दश च द्वादश । कानि[2] पुनस्तानि । 'आयैती[3] च्यवाना[4] अभीशू' [निघ० २ । ४] इत्येवमादीनि । आमिश्रीभवतः[5] कर्मभिरेताविति आयैती । च्यावयितारौ कर्मणां च्यवाना । अभीशू अभ्यश्नुवाते कर्माणीत्येवं[6] योज्यम् । आह । 'बाहू कस्मात्' । उच्यते । 'प्रबाधत आभ्यां' प्रकर्षेण बाधते प्रक्षेपयत्याभ्यां[7] 'कर्माणि' ।

'अङ्गुलिनामान्युत्तराणि द्वाविंशतिः' । अङ्गुलीनां नामान्यङ्गुलिनामानि । उत्तराणि प्रकृतेभ्यो बाहुनामभ्यः । बाह्वोरेवं[8] ह्यङ्गुलयो भवन्तीति बाहुनामभ्य उत्तराण्यङ्गुलिनामानि । कियन्ति पुनस्तानि । द्वाविंशतिः । द्वे च विंशतिश्च[9] द्वाविंशतिः । कतमानि पुनस्तानि । 'अग्रुवः अण्व्यः क्षिपः' [निघ० २ । ५] इत्येवमादीनि । बाह्वग्रेऽवस्थिता अवन्त्येताः कर्माणीत्यग्रुवः । अण्व्यः परिमाणत एताः । क्षिप्यत आभिः क्षेप्तव्यं द्रव्यमिति क्षिप इत्येवमादि । आह । 'अङ्गुलयः कस्मात्' । उच्यते । 'अग्रगामिन्यो[10] भवन्ति' । अग्रे ह्येताः कर्मसु गच्छन्ति । अथवा 'अग्रगालिन्यो भवन्ति' अग्रे ह्येता गलन्ति उदकानि । 'अग्रकारिण्यो वा भवन्ति' । अग्रे ह्येताः कर्माणि कुर्वन्ति । 'अङ्कना भवन्तीति वा' । यो[11] ह्येताभिरभिहन्यतेऽसावङ्कित इव भवति । 'अपि वाभ्यञ्चनादेव स्युः' । एता हि तं तमर्थमाभिमुख्येनाञ्चन्ति गच्छन्ति । ये तु 'अभ्यञ्जनाः' इत्यधीयन्ते[12] तेषामभ्यज्यत आभिरित्यङ्गुलयः ।

---

१ ग. ज. द्वौ च°; घ. ट. ठ. ड. द्वौ दश द्वादश. २ क. ख. घ. ट. ठ. ड. कतमानि. ३ च. आयुती. ४ च. च्यवना. ५ घ. ट. ठ. ड. आभिश्रीयभवत°. ६ ग. ज. एव योज्यं. ७ क. ख. घ. ट. ठ. ड. आभ्यां कर्माणि प्रक°. ८ ग. ज. °रेवं. ९ घ. ट. 'च द्वाविंशतिः' नास्ति. १० च. अग्रगामिन्यो. ११ क. ख. घ. ट. ठ. ड. तथाहि यो°. १२ क. ख. अभिधीयन्ते; ग. ज. ठ. ड. अभिधीयते.

' तासाम् ' अङ्गुलीनाम् ' एषा ' निर्वाचिका ऋक् ' भवति ' ॥ ८[1] ॥

दशावनिभ्यो दशकक्ष्येभ्यो दशयोक्त्रेभ्यो दशयोजनेभ्यः । दशाभीशुभ्यो अर्चताजरेभ्यो दश धुरो दश युक्ता वहद्भ्यः [ऋ० सं० १० । ९४ । ७] ॥ अवनयोऽङ्गुलयो भवन्त्यवन्ति कर्माणि कक्ष्याः प्रकाशयन्ति कर्माणि योक्त्राणि योजनानीति व्याख्यातमभीशवोऽभ्यश्नुवते कर्माणि । दश धुरो दश युक्ता वहद्भ्यः । धूर्धूर्वतेर्वधकर्मण इयमपीतरा धूरेतस्मादेव विहन्ति वहं धारयतेर्वा कान्तिकर्माण उत्तरे धातवोऽष्टादशान्ननामान्युत्तराण्यष्टाविंशतिरन्नं कस्मादानतं भूतेभ्योऽत्तेर्वात्तिकर्माण उत्तरे धातवो दश बलनामान्युत्तराण्यष्टाविंशतिर्बलं कस्माद्बलं भरं भवति बिभर्तेर्धननामान्युत्तराण्यष्टाविंशतिरेव धनं कस्माद्धिनोतीति सतो गोनामान्युत्तराणि नव क्रुध्यतिकर्माण उत्तरे धातवो दश क्रोधनामान्युत्तराण्येकादश गतिकर्माण उत्तरे धातवो द्वाविंशशतं क्षिप्रनामान्युत्तराणि षड्विंशतिः क्षिप्रं कस्मात्संक्षिप्तो विकर्षोऽन्तिकनामान्युत्तराण्येकादशान्तिकं कस्मादानीतं भवति संग्रामनामान्युत्तराणि षट्चत्वारिंशत्संग्रामः कस्मात्संगमनाद्वा संगरणाद्वा संगतौ ग्रामाविति[2] वा तत्र खल इत्येतस्य निगमा भवन्ति ॥ ९ ॥

दशावनिभ्य[3] इति । अवनय इत्येवमादीनि नद्यादिनामभिः संदिह्यन्ते तदर्थमियं[4] मुदाह्रियते । त्रिष्टुबेषा । अर्बुदस्य काद्रवेयस्य सर्पस्यार्षम् । ग्रावस्तुतौ विनियुक्ता । [आश्व० श्रौ० ५ । १२] दशभिरवनिभिर्य

अङ्गुलिवाचकानि बहुविधामि नामानि

---

१ क. ख. २; ग. च. ज. ११; घ. ट. अङ्को नास्ति; ठ. इति निरुक्तवृ० अष्टमः; ड. इति निरुक्तभाष्ये पूर्वषट्के तृतीयाध्यायेऽष्टमः खण्डः समाप्तः. २ क. ख. द. ३; छ. त. १०. ३ घ. ट. दशावनिभ्यो० वहद्भ्यः । अवनय°; ठ. ड. ' दशावनिभ्य इति ' नास्ति. ४ क. ख. घ. ट. ठ. ड. °मिदमु°.

यस्यां प्रयुज्यन्ते सा ऋक्

उपचर्यन्ते ग्रावाणः सोमाभिषवकर्मणि प्रवृत्ते ते दशावनयस्तेभ्यो दशावनिभ्यो हे ऋत्विजो यूयमभ्यर्चत । स्तुतीः प्रोच्चारयतेत्यर्थः । एवमेव दशभिः कक्ष्याभिर्य उपचर्यन्ते ते दशकक्ष्यास्तेभ्यो दशकक्ष्येभ्योऽर्चत । दशभिर्योक्त्रैर्य उपचर्यन्ते ते दशयोक्त्रास्तेभ्यो दशयोक्त्रेभ्योऽर्चत । दशभिर्योजनैरुपचर्यन्ते ये ते दशयोजनास्तेभ्यो दशयोजनेभ्योऽर्चत । दशभिरभीशुभिरुपचर्यन्ते ते दशाभीशवस्तेभ्यो दशाभीशुभ्योऽर्चत । अजरेभ्योऽजरणधर्मेभ्यो[2] दश धुरो य एते ग्रावाणस्तेभ्योऽर्चत । दशभिर्दशभिरङ्गुलीभिर्य एते युक्ता वहन्ति ग्रावाणस्तेभ्य एभ्यो दश युक्ता वहद्भ्योऽर्चतेति समस्तार्थः ।

अथैकपदनिरुक्तम् ॥ 'अवनयोऽङ्गुलयो भवन्ति' । ता हि 'अवन्ति कर्माणि' रक्षन्ति भक्षयन्ति वा । क्षपयन्तीत्यर्थः । 'कक्ष्याः' अप्य-[3]ङ्गुलय एव । ता हि 'प्रकाशयन्ति कर्माणि' । प्रकटीकुर्वन्तीत्यर्थः । 'योक्त्राणि' इत्येतत्पदं 'योजनानीति' अनेन पदेन 'व्याख्यातम्' । योजनानीत्येतन्निगदसिद्धमेव । 'अभीशवः' अप्यङ्गुलय एव । ता हि 'अभ्यश्नुवते कर्माणि' । व्याप्नुवन्तीत्यर्थः । अनेकैर्नामभिरङ्गुलय एवोक्ता अनेकक्रियाशक्त्युपप्र[4]दर्शनाय । एते ग्रावाण एवमनेकक्रियायोगिनीभिरङ्गुलीभिर्गृहीताः । तदर्थमर्चतेति । 'धूर्धूर्वतेर्वधकर्मणः' । ध्वरति धूर्वतीति वधकर्मसु पठिते[5]ः [निघ० २ । १९] । 'इयमपीतरा धूः' अनडुदादि[6]संबन्धिनी 'एतस्मादेव' धातोर्वधकर्मणः । सापि हि[7] 'विहन्ति वहम्[8]' अनडुहोऽश्वस्य वा । 'धारयतेर्वा' । सा हि धारयत्यश्वमनड्वाहं वा ।

'कान्तिकर्माण उत्तरे धातवोऽष्टादश' । स खल्वयं पुरुषो व्याख्यातः सपादः साङ्गुलि[9]ः । 'तं खलु काम एव प्रथममाविवेश' इत्युत्तरे कान्त्यर्था इत्यर्थः । यदपि ह्यकान्तं भवति तदप्यङ्गु[10]लीभिरेव कान्तं क्रियत इत्यतोऽ-

---

१ क. ख. घ. ट. ठ. ड. य उपचर्यन्ते ते°. २ च. °धर्मेभ्यः. ३ ग. ज. 'अप्यङ्गुलय एव' नास्ति. ४ च. 'प्र' नास्ति. ५ क. ख. घ. ट. ठ. ड. पठितम्. ६ क. ख. घ. ट. ठ. ड. अनडुहादि. ७ क. ख. घ. ट. ठ. ड. 'हि' नास्ति. ८ च. वहनं. ९ क. ख. ग. ज. घ. ट. ठ. ड. साङ्गुलः. १० घ. ट. अङ्गुलिभि°.

[1]ङ्गुलीनामभ्य उत्तरे कान्तिकर्माणः समाम्नाताः । कियन्तः पुनस्ता इति । अष्टादश । अष्टौ च दश च[2] । कतमे पुनस्त इति । ' वश्मि उश्मसि अववेति ' [निघ० २ । ६] इत्येवमादयः ।

' अन्ननामान्युत्तराण्यष्टाविंशतिः ' । अन्नस्य नामान्यन्ननामानि । उत्तराणि प्रकृतेभ्यः कान्तिकर्मभ्यः । अन्नमेव हि कान्तं सर्वभावेभ्यो भवतीति कान्तिकर्मभ्य उत्तराण्यन्ननामानि । कियन्ति पुनस्तानि । अष्टौ[3] च विंशतिश्चाष्टाविंशतिः । कतमानि पुनस्तानि । 'अन्धः वाजः पाजः[4] प्रयः[5] पृक्ष' [निघ० २ । ७] इत्येवमादीनि । अन्ध इत्ययं निर्वक्ष्यति [निरु० ५।१] । वाजयितव्यं पूजयितव्यमेतद्भोजनायोपस्थितं भवतीति वाजः । पीयत इति पाजः । प्रयः पानादेव । आह । ' अन्नं कस्मात् ' । उच्यते । आभिमुख्येन ह्येतत् ' नतं ' प्रह्वीभूतं भवति भोजनाय[6] भूतानाम् । ' अत्तेर्वा ' । ' अद्यतेऽत्ति च भूतानि तस्मादन्नं तदुच्यते ' इति ह्युक्तम्[7] [तै० उ० २ । २] ।

' अत्तिकर्माण उत्तरे धातवो दश ' । अन्नमेव ह्यद्यत इत्यन्ननामभ्य उत्तरेऽत्तिकर्माणः समाम्नाताः । कियन्तस्त इति[8] । दश । कतमे पुनस्ते । ' आवयति भर्वति बभस्ति ' [निघ० २ । ८] इत्येवमादयः ।

' बलनामान्युत्तराण्यष्टाविंशतिः ' । बलस्य नामानि बलनामानि । उत्तराणि प्रकृतेभ्योऽत्तिकर्मभ्यः । य एव ह्यदन्ति त एव बलवन्तो भवन्तीत्यत्तिकर्मभ्य उत्तराणि बलनामानि समाम्नातानि । कियन्ति पुनस्तानि । अष्टाविंशतिः । अष्टौ च विंशतिश्च । कतमानि पुनस्तानि । ' ओजः पाजः शवः ' [निघ० २ । ९] इत्येवमादीनि । ओज ओजतेर्वोब्जतेर्वेत्येवमादि[9] । आह । 'बलं कस्मात्' । उच्यते । तद्धि ' भरं[10] भवति ' । भ्रियते हि स यो बलिष्ठो भवति । ' बिभर्तेः ' वा । ह्यन्येषां भर्ता भवति ।

' धननामान्युत्तराण्यष्टाविंशतिरेव ' । य एव हि बलवन्तो भवन्ति त एव धनं प्राप्नुवन्तीति बलनामभ्य उत्तराणि धननामानि । कियन्ति

---

१ घ. ट. ठ. ङ, °ङ्गुलिना°. २ क. ख. घ. ट. ठ. ङ. चाष्टादश । कत°. ३ क. ख. घ. ट. अष्टाविंशतिः । अष्टौ°. ४ च. ' पाजः ' नास्ति. ५ ग. ज. पयः. ६ घ. ट. ठ. ङ. भजनाय. ७ क. ख. घ. ट. ठ. ङ. ' हि ' नास्ति. ८ ग. च. ज. 'कियन्तस्त इति । दश ' नास्ति. ९ च. °तेर्वौब्जते°. १० ग. ज. भरतं. ११ ख. भृतं.

पुनस्तानि । अष्टाविंशतिरेव । बलनामान्युत्तराण्यष्टाविंशतिरिमान्यप्य[1]ष्टाविंशतिरेवेत्येवशब्दः । कतमानि पुनस्तानि । ' मघं रेक्णः रिक्थं वेदः ' [निघ० २ । १०] इत्येवंप्रभृतीनि । रिच्यत इति रेक्णः । अतिरिच्यमानमेतदिहैव तिष्ठति म्रियमाणस्येति रिक्थम् । विद्यते लभ्यत एतदिति वेदः । इत्येवमादि[2] । आह । ' धनं कस्मात् ' । उच्यते । ' धिनोतीति ' एवं 'सतः' शब्दस्य कर्तरि कारके । सत इति कारकावधारणम् । धिनोतिस्तर्पणार्थः [धा० १ । ५९३] ।

' गोनामान्युत्तराणि नव ' । गवां नामानि गोनामानि । उत्तराणि प्रकृतेभ्यो धननामभ्यः । गाव एव हि प्रकृष्टं[3] धनमिति धननामभ्य उत्तराणि गोनामानि । कियन्ति पुनस्तानि । नव । कतमानि पुनस्तानि । ' अघ्न्या उस्रा उस्रिया ' [निघ० २ । ११] इत्येवमादीनि । अघ्न्या अहन्तव्या भवतीत्येवमादि निर्वचनम् । उक्तनिर्वचनो हि[4] गोशब्दः [निरु० २ । ५] । अतो गौः कस्मादिति न ब्रवीति ।

' क्रुध्यतिकर्माण उत्तरे धातवो दश ' । धनार्थमेव हि गवार्थं च क्रोधो भवतीति गोनामभ्य उत्तरे क्रुध्यर्थाः समाम्नाताः । कतमे पुनस्त इति । ' रेळते[5] हेळते ' [निघ० २ । १२] इत्येवमादयः ।

क्रुध्यर्थसंबन्धेनैव ' क्रोधनामान्युत्तराणि ' । कियन्ति पुनस्तानि । एकादश । कतमानि पुनस्तानि । ' हेळः[6] हरः ह्णिः त्यजः ' [निघ० २ । १३] इत्येवमादीनि । हे अरे इत्यनेनाविष्टो ब्रवीति[7] हेडः । नीचैरनेन नरकं प्रति ह्रियन्ते प्राणिन इति ह्णिः । त्यजत्यनेना[8]विष्टो[9] धर्मं[10] जहातीति त्यज इत्येवमादि ।

' गतिकर्माण उत्तरे धातवो द्वाविंशं शतम् ' [निघ० २ । १४] । क्रुद्धा एवं सन्तः सुतरां गच्छन्तीति क्रोधनामभ्य उत्तरे ग[11]च्छतिकर्माणः समाम्नाताः ।

---

१ क. ख. च. ' अपि ' नास्ति. २ क. ख. घ. ट. ठ ड. °त्येवमादीनि. ३ च. प्रकृष्टधनं. ४ च. ' हि ' नास्ति. ५ क. ख. घ. रेळते हेळते; ग. च. ज. रेडते हेडते. ६ क. हेडः; ग. च. ज. घ. हेलः. ७ ग. ज. ब्रवीतीति. ८ घ. ट. त्यजः । त्यजत्य°; ठ. ड. त्यजः । त्यज इत्यने°. ९ च. °नाविशिष्टो°. १० च. एव हि. ११ क. ख. घ. ट. ठ. ड. गतिकर्मा°.

‘ क्षिप्रनामान्युत्तराणि षड्विंशतिः ’ । गतिसंबन्धादेव क्षिप्रनामान्युत्तराणि समाम्नातानि । कियन्ति पुनस्तानि । षड्विंशतिः । षट् च[1] विंशतिश्च । कतमानि पुनस्तानि । ‘ नु मक्षु द्रवत् ’ [निघ० २ । १५] इत्येवमादीनि । नुन्न इव हि[2] क्षिप्रं गच्छतीति नु । मां क्षिणोति मां क्षिणोतीति सर्व एव क्षिप्रगामिनं मन्यन्त इति मक्षु । द्रवद्द्रवतेरेवेत्येवमादि । आह । ‘ क्षिप्रं कस्मात् ’ । उच्यते । विकृष्टो[3] विक्षिप्तोऽर्थः ‘ संक्षिप्तः ’ सत्क्षिप्रमुच्यते[4] ।

‘ अन्तिकनामान्युत्तराण्येकादश ’ । य एव हि क्षिप्रं गच्छति स एवाभिप्रेतस्यार्थस्यान्तिके[5] समीपे भवतीति क्षिप्रनामभ्य उत्तराण्यन्तिकनामानि । कतमानि पुनस्तानि । ‘ तळित्[6] आसात्[7] ’ [निघ० २ । १६] इत्येवमादीनि । ताड्यतेऽस्मिन्प्रदेशेऽत्रस्थित इति तडिदित्युच्यते । अन्तिकप्रदेशो य आसन्नः स आसादित्येवमादि योज्यम् । आह । ‘ अन्तिकं कस्मात् ’ । उच्यते । तद्धि ‘ आनीतं भवति ’ संनिकृष्टत्वात् ।

‘ संग्रामनामान्युत्तराणि षट्चत्वारिंशत् ’ । संग्रामस्य नामानि[8] उत्तराणि प्रकृतेभ्योऽन्तिकनामभ्यः । अन्तिकीभूतानामेव हि संग्रामो भवतीत्यन्तिकनामभ्य उत्तराणि संग्रामनामानि । कियन्ति पुनस्तानि । षट्चत्वारिंशत् । षट् च चत्वारिंशच्च षट्चत्वारिंशत् । कतमानि पुनस्तानि । ‘ रणः विवाक् नदनुः[9] ’ [निघ० २ । १७] इत्येवमादीनि । रणन्त्यस्मिञ्शूरा इति रणः । विविधां[10] शूराणामत्र वाग्भवतीति विवाक् । नदन्त्यस्मिन् शूरा इति नदनुरित्येवमादि[11] योज्यम् । आह । ‘ संग्रामः कस्मात् ’ । उच्यते । ‘ संगमनाद्वा ’ । संगच्छन्ते हि[12] परस्परेण तत्र योधाः । ‘ संगरणाद्वा ’ । संगृणन्ति संशब्दायन्ते[13] शूरास्तत्र परस्परेण । ‘ संगतौ ग्रामाविति वा ’ । ग्राम इति संवास उच्यते[14] । तौ हि परस्परविजिगीषया समागतौ तत्र भवतः ।

---

१ ठ. ड. ‘ च ’ नास्ति. २ क. ख. घ. ट. ठ. ड. ‘ हि ’ नास्ति. ३ च. विप्रकृष्टो°. ४ घ. ट. ठ. ड. °प्रमित्युच्यते. ५ क. ख. घ. ट. ठ. ड. °प्रेतार्थस्य. ६ क. ख. ग. घ. च. ज. ट. तडित्. ७ ग. ज. घ. ट. आसा इत्ये°. ८ क. ख. घ. ट. ठ. ड. °नामानि संग्रामनामानि । उत्त°. ९ ग. ज. नद्नु इत्ये°; घ. ट. च. नद्न इत्ये°. १० च. विविधाः शूरास्तेषामत्र°. ११ ग. च. ज. घ. ढ. ठ. ड. नद्न इत्ये. १२ ग. ज. ‘ हि ’ नास्ति. १३ ग. च. ज. संशब्द्यन्ति. १४ क. ख. घ. ट. ठ. ड. इत्युच्यते.

'तत्र' षट्चत्वारिंशके[1] संग्रामनामगणे 'खल इत्येतस्य' नाम्नो 'निगमाः' संदिग्धा 'भवन्ति'। इतरोऽपि खलशब्दः संदिग्धः धान्यखलः खल इत्युच्यते। संग्रामोऽपि च। तत्रैवं[2] सत्यस्यामृचि वक्ष्यमाणायां 'खले न पर्षान्' इति व्यपदेशाद्विभागो लक्ष्यते सस्यखलसंग्रामखलयोः॥ ९[3]॥

अभी३दमेकमेको अस्मि निष्षाळभी[4] द्वा किमु त्रयः करन्ति। खले न पर्षान्प्रतिहन्मि भूरि किं मा निन्दन्ति शत्रवोऽनिन्द्राः [ऋ० सं० १० । ४८ । ७]॥ अभिभवामीदमेकमेकोऽस्मि निःषहमाणः[5] सपत्नानभिभवामि द्वौ किं मा त्रयः कुर्वन्त्येक इता संख्या द्वौ द्रुततरा संख्या त्रयस्तीर्णतमा संख्या चत्वारश्चलिततमा संख्याष्टावश्नोतेर्नव न वननीया नावाप्ता वा दश दस्ता दृष्टार्था वा विंशतिर्द्विर्दशतः शतं दशदशतः सहस्रं सहस्वदयुतं नियुतं[6] प्रयुतं तत्तदभ्यस्तमम्बुदो[7] मेघो भवत्यरणमम्बु तद्दोऽम्बुदोऽम्बुमद्भातीति वाम्बुमद्भवतीति वा स यथा महान् बहुर्भवति वर्षस्तदिवार्बुदम्। खले न पर्षान्प्रतिहन्मि भूरि। खल इव पर्षान्प्रतिहन्मि भूरि खल इति संग्रामनाम खलतेर्वा स्खलतेर्वायमपीतरः खल एतस्मादेव समास्कन्नो भवति। किं मा निन्दन्ति शत्रवोऽनिन्द्राः। य इन्द्रं न विविदुरिन्द्रो[10] ह्यहमस्म्यनिन्द्रा इतर इति वा[11] व्याप्तिकर्माण उत्तरे धातवो दश तत्र द्वे नामनी आक्षाण आश्नुवान आपान आप्नुवानो वधकर्माण उत्तरे धातवस्त्रयस्त्रिंशत्तत्र वियात[12] इत्येतद्वियातयत इति वा वियातयेति वा।

---

१ क. ख. च. °रिंशत्के. २ च. तस्यैवं. ३ क. ख. ३; ग. च. ज. १२; घ. ट. अङ्को नास्ति; ठ. ड. ९। इति निरुक्तभाष्ये तृतीयाध्याये नवमः खण्डः. ४ ङ. थ. ठ. ड. निःषाळभी; छ. निःषालभी; त. द. निष्षालभी. ५ क. ख. त. द. निष्षह°. ६ छं. त. द. प्रयुतं नियुतं. ७ क. ख. छ. त. द. °मर्बुदो°. ८ छ. त. द. 'अम्बुदः' नास्ति. ९ छ. त. द. °म्बुमद्भवतीति वाम्बुमद्भातीति वा. १० क. ख. छ. त. द. °न विदु°. ११ छ. 'वा' नास्ति; द. इति व्याप्ति° घा. १२ छ. वियातय.

आखण्डल प्रहूयसे । आखण्डयितः[1] खण्डं खण्डयतेस्तडिदित्यन्तिकवधयोः संसृष्टकर्म ताडयतीति[2] सतः ॥ १० ॥

अस्यामृचि खलशब्दोऽर्थद्वयवाची

अभी३दमेक०[3] निन्द्राः । वैकुण्ठस्येन्द्रपुत्रस्येयमार्षम्[4] । जगती । दशरात्रस्य नवमेऽहनि निष्केवल्ये शस्यते [आश्व० ८।७] । आध्यात्मिको मन्त्रः । इदं तावज्जगदेक एवाहमभ्यस्मि अभिभवामि अभिभूय च वर्ते[5] । अस्य सर्वस्याहमेकोऽधिपतिरित्यभिप्रायः । कथं पुनरभिभवाम्यहमेतत् । एकमेको निष्षाट्[6] निःषहमाणः[7] सपत्नान् । शत्रून्निश्चयेनाधिकं वाभिभवामीत्यर्थः । सहतिरभिभवार्थश्छन्दसि । कथं पुनरभिभवन्सपत्नानहमस्य जगत आधिपत्ये वर्ते । यत[8] एकं तावदागतं सन्तमेक एवाभिभवामि सपत्नम् । अभी द्वा । द्वावप्यागतौ सन्तावेक एवा[9]भिभवामि । किमु त्रयः करन्ति । त्रयोऽपि युगपदागताः सन्त एकाकिनोऽपि मम किं कुर्वन्ति । न किंचिदपीत्यभिप्रायः । किंच । खले न पर्षान्गाह्यमाने[10] हन्यमाने । गम्यमानोऽत्र[11] एकः खलशब्दः उपमानमुप[12]मासंबन्धात्[13] । यथा खले खलस्थाने कर्षकेण पर्षान्[14]बहूनपि संचितान्पूलान्[15]प्रतिबन्धेन क्षुधैरन्[16]नेवमहमपि भूरीनपि शत्रूनागतान्क्षणादेव तैरप्रतिबध्यमानो हन्मि । तमेवंप्रभावं सन्तं मां किं निन्दन्ति शत्रवः । नाहं निन्दार्हः स्तव्योऽहमित्यभिप्रायः । अपि चानिन्द्राः ये मामिन्द्रं न विदुर्याथात्म्यतस्ते कथमविज्ञायैव मां निन्दन्ति । नैतन्न्याय्यमित्यभिप्रायः । अनिन्द्रा इतर इति वा । अथवानिन्द्राः सन्त आत्मना कथमिन्द्रं सन्तं मां निन्दन्ति । ननु[17] नामेन्द्रत्वेनैवाहमतिरिक्तस्तेभ्योऽथ कथमितरे मां निन्दन्ति । अनिन्द्राः सन्तो न लज्जन्तीत्यभिप्रायः । इति समस्तार्थः ।

---

१ क. ख. छ. त. द. °यितः । तलिदि° (क. ख. तडिदि°). २ छ. त. द. तालयती°. ३ क. ख. द. ४; छ. त. ११. ४ च. ठ. ड. °मेकमिति । वैकु;° ज. सर्वा ऋक् पठ्यते. ५ क. ख. घ. ट. ठ. ड. भवामि; ग. ज. वर्ते भवामि. ६ ग. घ. ट. ठ. ड. निष्षाट्. ७ क. ख. घ. ट. निष्षह°. ८ क. ख. घ. ट. ठ. ड. यावत्. ९ घ. ट. ड. एवामि । किमु°; ठ. एवास्मि । किमु°. १० ग. ज. 'गाह्यमाने हन्यमाने' नास्ति. ११ क. ख. घ. ट. ठ. ड. गम्यमानेऽत्रे एक°. १२ ग. ज. 'उपमानं' नास्ति. १३ ग. च. ज. उपमानसंबन्धात्. १४ च. कर्षान्. १५ ग. च. ज. मज्ञान्. १६ ग. ज. क्षुद्येर°, १७ क. ख. ग. ज. न तु.

अथैकपदनिरुक्तम् । ‘ एक इता संख्या ’ गता । संख्यात्वं प्राप्तेत्यर्थः । द्व्यादिकं वा परं[1] गता । ‘ द्वौ द्रुततरा संख्या ’ एकस्याः सकाशात् । ‘ त्रयस्तीर्णतमा संख्या ’ द्वयोः सकाशात् । प्रसक्तानुप्रसक्तमुच्यते । ‘चत्वारश्चलिततमा संख्या’ त्रिभ्यः सकाशात् । ‘अष्टावश्नोतेः’ । ते हि सप्तसंख्यां[2] व्याप्य वर्तन्ते । ‘ नव ’ इति या संख्या सा ‘ न वननीया ’ न संभजनीया भवति । नवसंख्यायुक्तायां हि तिथौ न कश्चिदप्यारम्भः क्रियते । ‘ दश ’ इति या संख्या सा ‘ दस्ता ’ । दशान्तैव हि संख्या भवति । ‘ दृष्टार्था वा ’ । दृष्टार्थैव हि दशानामुपरि पुनः पुनर्दृश्यते संख्या । तद्यथा । एकादशेत्येवमादि । तस्माद्दृष्टार्थदर्शनाद्दशेत्युच्यते । ‘ विंशतिर्द्विदशतः ’ । द्विर्दश विंशतिरित्युच्यते । ‘ शतं दश दशतः ’ । दश[3] दशतः समुदिताः शतमुच्यन्ते । ‘ सहस्रं सहस्वत् ’ । सह इति बलनाम तेन तद्वत् । दुर्बलानामपि सहस्रं समुदितं बलवदेव भवति संघातबलीयस्त्वात् । ‘ अयुतं नियुतं[4] प्रयुतं तत्तदभ्यस्तम् ’ । सहस्रं दशकृत्वोऽभ्यस्तमयुतम् । आमिश्रीभूतमयुतमित्युच्यते । अयुतमपि दशकृत्वोऽभ्यस्तं नियुतमित्युच्यते । नियुतमपि दशकृत्वोऽभ्यस्तं प्रयुतमित्युच्यते । अथार्बुदशब्दनिर्विवक्षया[5] अम्बुशब्दं निर्वक्ति । ‘ अरणशीलं ’ गमनशीलम् ‘ अम्बु तद्दः[6] ’ तस्य दाता मेघः सः ‘ अम्बुदः ’ इत्युच्यते । ‘ स यथा ’ उदकभावमापद्यमानो ‘ महान् बहुर्भवति वर्षंस्तदिवार्बुदम् ’ । तदपि[7] वर्षदिव यद्बहु द्रव्यजातं भवति तदर्बुदमित्युच्यते । ‘ खल इति संग्रामनाम स्खलतेर्वा[8] ’ भ्रंशयत्यर्थस्य[9] [धा० १ । ५४९] । भ्रंशयन्ति[10] हि तत्र योधाः । ‘ खलतेर्वा[11] ’ हिंसार्थस्य । हिंस्यते[12] हि तत्र परस्परेण । ‘ अयमपीतरः खलः ’ धान्यखलः ‘ एत-

---

१ क. ख. घ. ट. ठ. ड. °वापीयं ग°. २ क. ख. ग. ज. संख्या; ठ. ड. संख्याकां. ३ क. ख. घ. ट. ठ. ड. दशकृत्वोऽभ्यस्ता या दश ताः समुदिताः शतमित्युच्यन्ते । सहस्रं°; ट. पुस्तके पुस्तकस्थोऽपि पाठः प्रान्ते लिख्यते. ४ घ. ट. ठ. ड. ‘ नियुतं प्रयुतं ’ नास्ति. ५ च. निर्विविक्षया. ६ क ख. घ. ट. ठ. ड. ‘ तद्दः ’ नास्ति; ट. °अम्बु-तस्य° तद्दः. ७ क. ख. घ. ट. तदिव वर्षन् यद्ब°; ग. ज. तादि वर्षन् तदपि°. ८ क. ख. घ. ट. ठ. ड. खलतेर्वा. ९ ग. च. ज. भ्रस्यत्य°. १० ग. च. ज. भ्रस्यन्ति. ११ क. ख. घ. ट. ठ. ड. स्खलतेर्वा. १२ क. ख. ग. ज. घ. ट. ठ. ड. हिंस्यन्ते.

स्मादेव ’ । तत्रापि हि भ्रश्यन्ति[1] चूर्ण्यमानानि धान्यानि । हिंस्यन्ते वा । चूर्ण्यन्त इत्यर्थः । अथवा ‘ समास्कन्नः ’ असौ ‘ भवति ’ विप्रकीर्णै[2] धान्यैः ।

‘ व्याप्तिकर्माण उत्तरे धातवो दश ’ । संग्रामे हीतरेतरं व्याप्नुवन्ति योधा इति संग्रामनामभ्य उत्तरे व्याप्तिकर्माणः[3] । कतमे पुनस्त इति । ‘इन्वति ननक्षे’ [निघ० २ । १८] इत्येवमादयः । ‘तत्र’ दशके व्याप्तिकर्मधातुगण एते ‘ द्वे नामनी ’ भवतः ‘ आक्षाणः ’ इति च ‘आपानः’ इति च । तत्र ‘ आक्षाण आश्नुवानः[4] ’ । यो ह्यश्नोति व्याप्नोति स आक्षाण इत्युच्यते[5] । तथा[6] च य आप्नोति स आप्नुवानः सन् ‘ आपानः ’ इत्युच्यते ।

‘ वधकर्माण उत्तरे धातवस्त्रयस्त्रिंशत् ’ । संग्रामे हीतरेतरं व्याप्य ततो घ्नन्तीति व्याप्तिकर्मभ्य उत्तरे वधकर्माणः समाम्नाताः । कियन्तः । त्रयस्त्रिंशत् । कतमे पुनस्त इति । ‘दभ्नोति श्नथति[7] ध्वरति धूर्वति’ [निघ० २ । १९] इत्येवमादयः । ‘ तत्र ’ वधकर्मधातुमध्ये ‘ वियात इत्येतत् ’ नाम । तत्पुनरेवं निर्वक्तव्यम् । ‘ वियातयते[8] ’ नानाप्रकारं यातयते यः शत्रून् स वियातः । अथ ‘ वा ’ एवमन्यथा स्यात् । ‘ वियातय ’ एवमुच्यते यः स्तोतृभिः[9] स वियातः । आखण्डल इत्येतदपि नामैव । निगममपि चात्र दर्शयति । ‘ आखण्डल प्रहूयसे ’ । आभिमुख्येनावस्थितो यः खण्डयति मेघान् स आखण्डयिता तस्य संबोधनं हे ‘ आखण्डयितः ’ ।

इरिम्बिठिर्नाम कण्वो मन्त्रदृक् । तस्येयमार्षम् । गायत्री । ऐन्द्री रात्रिपर्यायेषु महारात्रिके[10] पर्याये होतुरियं शस्त्रे विनियुक्ता[11] [आश्व० श्रौ० ५ । १०] । शाचिगो[12] शाचिपूजनायं रणाय ते सुतः । आखण्डल प्रहूयसे ’ [ऋ० सं० ८ । १७ । १२] ॥ शाचिगो इति चैकं[13] पदम् । शचीति कर्मनाम [निघ० २ । १ । २२] । तस्य शच्या-

---

१ ग. च. ज. भ्रस्यन्ति. २ क. ख. घ. ट. ठ. ड. विप्रकीर्णैः. ३ घ. ट. ठ. ड. °कर्माणः । कियन्तस्ते । दश । कतमे°. ४ च. अश्नुवानः. ५ च. ‘ इति ’ नास्ति. ६ घ. ट. ठ. ड. यथा. ७ ग. च. ज. ‘ श्नथति ’ नास्ति. ८ च. वियातयत्येव°. ९ ग. घ. ट. ठ. ड. ज. स्तोतृभिः शत्रून्स°. १० क. ख. मध्यमरात्रिपर्याये°; घ. ट. मध्यरात्रिपर्याये°. ११ ग. च. ज. °युक्ता । १३ । शाचि.° १२ ग. ज. शाचिगो शाचिपूजन । शाचिगो इति°; घ. ट. शाचिगो० प्रहूयसे. १३ ठ. ड. ‘ च ’ नास्ति.

त्व्यस्य कर्मणो येयमिष्टिः[1] पशुसोमादिलक्षणा संततिः सा शाचिः । अथवा स्वार्थिक एव तद्धितः स्यात् । शच्येव शाचिः । तां प्रत्याहूयमानो यो गच्छति स शाचिगुरिन्द्रः । तस्य संबोधनं हे[2] शाचिगो इति । तयैव[3] शाच्या य आगतः सन् पूज्यते स शाचिपूजनः । तस्य संबोधनं हे शाचिपूजन । हे[2] आखण्डल आखण्डयितः शत्रूणां मेघानां वा । इयमस्माभिः प्रस्तुता शची यां प्रति ते नित्यमिष्टमागन्तुं यया च पूज्यसे त्वमागतः सन् । किंच । एतस्यां च शच्यामस्मिन्कर्मण्ययं रणाय र[4]मणाय ते तव सुतोऽभिषुतः सोमो यतोऽस्माभिस्त्वं प्रहूयसे प्रकर्षेणादरवद्भिर्हूयस आहूयसे । स एवमेतज्ज्ञात्वास्मदनुग्रहायानतीतकालमागन्तुमर्हसीत्यभिप्रायः ।

आखण्डलशब्देऽल्पतरं वक्तव्यं बहुतरं तडिच्छब्द इति क्रमभेदेनैतौ[5] निरुच्येते । ‘ तडिदित्यन्तिकवधयोः संसृष्टकर्म ’ । तडिदित्येतच्छब्दरूपमन्तिकाभिधायि वधाभिधायि चेत्येकमेव ह्येतदुभाभ्यामर्थाभ्यां संप्रयुज्यत । विद्युदपि च तडिदित्युच्यते । सा पुनः कर्तरि कारके ‘ ताडयतीति सतः’ । यथा त्वन्तिकनामेदं तथेयमृगुदाहरणम् ॥ १०[6] ॥

त्वया॑ व॒यं सु॑वृधा॑ ब्रह्मणस्पते स्पा॒र्हा॑ वसु॑ मनु॒ष्या द॑दी॒महि । या नो॑ दू॒रे त॒ळितो॒[7] या अरा॑तयो॒ऽभि सन्ति॑ ज॒म्भया॒ ता अ॑न॒प्नसः॑ [ऋ० सं० २ । २३ । ९] ॥ त्वया वयं सुवर्धयित्रा[8] ब्रह्मणस्पते स्पृहणीयानि वसूनि मनुष्येभ्य आददीमहि याश्च नो दूरे तळितो[9] याश्चान्तिकेऽरातयोऽदानकर्माणो वादानप्रज्ञा वा जम्भय ता अनप्नसोऽप्न इति रूपनामाप्नोतीति सतो विद्युत्तडिद्[10] भवतीति शाकपूणिः सा

---

१ क. ख. ग. ज. घ. ट. ठ. ड. °मिष्टिपशु°. २ च. ‘ हे ’ नास्ति. ३ क. ख. घ. ट. तथैव शाच्यां; ठ. ड. तस्यैव शाच्यां. ४ ग. ज. घ. ट. ठ. ड. ‘ रमणाय ’ नास्ति. ५ क. ख. घ. ट. ठ. ड. °भेदतो निरुच्यते; ग. ज. °भेदेनेतौ निरुच्यते. ६ क. ख. ४; ग १४; च. ज. १४; घ. ठ. अङ्को नास्ति; ठ. ड. °रणं । इति निरुक्तवृत्तौ भगवद्दुर्गकृतौ (ड. पुस्तके ‘ भगवद्दुर्गकृतौ ’ नास्ति) तृतीयाध्याये दशमः खण्डः. ७ क. तडितो; छ. त. द. तलितो. ८ ङ. छ. °र्धयित्वा. ९ क. ख. तडितो; छ. त. द. तलितो. १० छ. त. द. तलिद्°.

ह्यवताडयति[1] दूराच्च दृश्यतेऽपि त्विदमन्तिकनामैवाभिप्रेतं स्यात् । दूरे चित्सन्तळिदिवाति[2] रोचसे । दूरेऽपि सन्नन्तिक इव सन्दृश्यस इति वज्रनामान्युत्तराण्यष्टादश वज्रः कस्मा-[3]द्वर्जयतीति सतस्तत्र कुत्स इत्येतत्कृन्ततेर्ऋषिः कुत्सो भवति कर्ता स्तोमानामित्यौपमन्यवोऽत्राप्यस्य[4] वधकर्मैव भवति तत्सख इन्द्रः शुष्णं जघानेत्यैश्वर्यकर्माण उत्तरे धातव-श्चत्वार ईश्वरनामान्युत्तराणि चत्वारि तत्रेन इत्येतत्सनित ऐश्वर्येणेति वा सनितमनेनैश्वर्यमिति वा ॥ ११[5] ॥

त्वया वयं[6] सुवृधा ब्रह्मणस्पत इति । गृत्समदस्यार्षम् । जगती । प्रवर्ग्ये[7] विनियुक्ता [आश्व० ४।६] । हे ब्रह्मणस्पते त्वया वयं सुष्ठु वर्धयित्रा वर्धिता अनुगृहीताः सन्तो वसु वसूनि यानि यानि स्पार्हा[8] स्पृहणीयानि तानि तानि मनुष्या मनुष्येभ्यस्ता-नभिभूयाद्दीमहि[9] । किंच । यानो दूरे तळितो[10] याश्च नो[11] दूरेऽध्वन्यवस्थिता अरातयो याश्चान्तिके । तडिच्छब्दस्यान्तिकाभिधायित्वम् । दूरे चान्तिके च या अरातयोऽ-रातिसेना । रातिर्दानार्थः । अस्माकमभिमतानर्थान्ददतो ये निवारयन्ति ते अरातयः । अदानप्रज्ञा वा[12] । न दातव्यमस्माभिरित्येवं[13] येषां प्रज्ञा ते अदानप्रज्ञाः[14] । द्विविधा हि शत्रवः । दुःखसंनाश्याः[15] सुखसंनाश्याश्च । तत्र ये दुःखसंनाश्यास्ते[16]ऽदानप्रज्ञाः । ये अदानकर्माणस्ते[17] सुखसंनाश्याः । ते चोभयेऽपि दूरे चान्तिके चावस्थिता भवन्ति । तान्दूरान्तिकावस्थितानुभया-नपि जम्भय स्तम्भय निश्चेष्टान्कुरु त्वं ब्रह्मणस्पते । किंच अनप्नसोऽरूपां-श्चैतान्कुरु । ‘ अप्न इति रूपनाम ’ । तद्व्याप्नो[18]त्याश्रयम् ।

तडिच्छब्दोऽत्रान्तिकाभिधायी

---

१ छ. त. द. °तालयति. २ क. तडिदि°; छ. त. द. तलिदि°. ३ द. °द्वज्रय°. ४ छ. °वोऽथाप्य°. ५ क. ख. द. ५; छ. त. १२. ६ क. ख. घ. ट. वयं० अनप्नसः; ठ. ड. वयमिति । गृ°. ७ च. प्रवर्गे. ८ घ. ट. ठ. ड. स्पार्हाणि स्पृह°. ९ ग. ज. °स्तानि अभि°; ठ. ड. °स्तानभिभूय ददी°. १० क. ख. तडितो; ग. च. ज. घ. तलितो. ११ घ. ट. ठ. ड. ‘ नो ’ नास्ति. १२ क. ख. घ. ट. ठ. ड. ‘ वा ’ नास्ति. १३ क. ख. घ. ट. ठ. ड. °भिरेभ्य इत्ये°. १४ घ. ट. ठ. ड. °दानकर्माणः. १५ ग. च. ज. सुखसंनाम्या दुःखसंनाश्याश्च (च. °नाम्याश्च). १६ च. °संनाम्यास्ते°. १७ ग. च. ज. ‘ ये अदा...संनाश्याः ’ नास्ति. १८ ग. ज. ठ. ड. तद्व्याप्नो°.

'विद्युत्तडिद्भवतीति शाकपूणिः' आचार्यो मन्यते । किं कारणम् । सा ह्यवताडयति अशनिरूपेण । 'दूरात्' एव 'च' दृश्यते । तस्मान्न तस्यान्तिकनामाभिसंबन्धोऽस्ति । 'अपि त्विदम्' अपरेणोदाहरणेन 'अन्तिकनामैवाभिप्रेतं स्यात्' । 'दूरे चित्सन्तळिदिवातिरोचसे'[1] । 'दूरेऽपि सन्नन्तिक इव' अवस्थितो 'दृश्यसे इति' । अत्र दूरेऽपि सन्नन्तिक इवेति स्फुटतरमन्तिकाभिधानत्वम् । न तथा पूर्वस्मिन्मन्त्रे 'या नो दूरे तळितः'[2] इति । एवमन्तिकनामत्वेन वा विद्युन्नामत्वेन वा वधनामत्वेन वा प्रकरणोपपदे अवेक्ष्य यथासंभवं निर्वक्तव्यम्[3] ।

'यो विश्वतः सुप्रतीकः[4] सदृङ्ङसि दूरे चित्सन्तळिदिवाति[5] रोचसे । रात्र्याश्चिदन्धो अति देव पश्यस्यग्ने सख्ये मा रिषामा वयं तव' [ऋ० सं० १ । ९४ । ७] ॥ एषा जगती । आग्नेयी । कुत्सेन दृष्टा । महाव्रत आग्निमारुते शस्त्रे [ऐ० आ० १ । ५ । ३] अभिप्लवस्य च षष्ठेऽहन्याग्निमारुत एव [आश्व० श्रौ० ७ । ७] च शस्यते । यस्त्वं

अस्यामृचि तडिच्छब्दोऽन्तिकाभिधाय्येव

हे अग्ने विश्वतः सर्वतः सुप्रतीकः सुदर्शनः शोभनदर्शनः । अपि च[6] सदृङ् । यतो[7] यतो दृश्यसे ततस्ततः समानदर्शनस्तुल्य एव लक्ष्यसे[8] । अपि च । दूरेऽपि सन्नतिभ्राजिष्णुत्वात्तडिदिवान्तिक इवावस्थितोऽतिरोचसेऽतिरोचिष्णुर्दृश्यसे[9] । अपि च । यदेतद्रात्र्याश्चिद्रात्र्या अपि संततम्[10] अन्धः अध्यानलक्षणं तमो यत्र ध्यातुमपि दुःखं शक्यते किमुत द्रष्टुमेतदप्यतीत्य हे देव सर्वभूतदीपयितव्य पश्यस्येव त्वम् । न तेऽस्माकमिव तेनान्धेनापि तमसा प्रतिबध्यते दर्शनम् । तस्य तवैवंगुणयुक्तस्य हे अग्ने वयं सख्ये सखिभावे परिचरणकर्मणि आ उत्तमादुच्छ्वासात्कृताध्यवसायाः सन्तो मा केनचिद्व्याधिना शत्रुणा वा रिषाम । मास्मान्कश्चिद्धिंसीत्त्वदनुध्यानादेवेत्यभिप्रायः ।

'वज्रनामान्युत्तराण्यष्टादश' । यो हि हन्यते स[11] वज्रेणैवेति वध-

१ क. ख. ग. च. ज. तडिदि°; घ. तलिदि°. २ क. तडितः; ग. च. ज. घ. तलितः. ३ ग. च. ज. °व्यम् ॥ १५ ॥ यो°. ४ ग. ज. °प्रतीकः । एषा°; घ. ट. °प्रतीकः० वयं तव. ५ क. तडिदि°; च. तलिदि°. ६ घ. ट. ठ. ड. 'च' नास्ति. ७ च. 'यतः' सकृदेव. ८ च. दृश्यसे. ९ घ. ट. °रोचसे । अतिरोचसे अतिरोचिष्णु°. १० च. संकैमन्धः° संततः; ठ. ड. सतत°. ११ ग. ज. 'स' नास्ति.

कर्मभ्य उत्तराणि वज्रनामानि । कियन्ति पुनस्तानि । अष्टादश । अष्टौ च दश च । कतमानि पुनः स्तानि । 'दिद्युत् नेमिः हेतिः' [निघ० २ । २०] इत्येवमादीनि । दिद्युत् द्युतेर्वा[1] द्योततेर्वा । पुनः[2] पुनरतिशयेन वा द्यत्यवखण्डयति द्योतते दीप्यते वा सा दिद्युत् । अवनामयति खण्डयति प्रहारेणेति नेमिः । हेतिर्हन्तेरित्येवमादि । आह । 'वज्रः कस्मात्' । उच्यते । 'वर्जयति' । वियोजयति प्राणैः प्राणिनः । 'तत्र कुत्स इत्ये[3]तत्' संदेहपदम् । ऋषिरपि कुत्स इत्युच्यते । तत्पुनरेतद्यदा वज्रनाम तदा 'कृन्ततः' । कृत्यतेऽनेनेति कुत्सः । यदा पुनरेतदृष्यभिधानं तदा 'कर्ता स्तोमानामित्यौ[4]पमन्यवः' आचार्यो मन्यते । 'अत्रा[5]प्यस्य वधकर्मैव' अभिप्रेतं स्यात् । अत्राप्येतदृषौ वर्तमानमभिधानमस्य ऋषेर्वधकर्मैव वधार्थसंयुक्तमेव स्यात् । किं कारणम् । 'तत्सख इन्द्रः शुष्णं जघान[6]' । तेन स्तूयमानो विवृद्धबलः शुष्णं शोषयितारं रसानामसुरं मेघं वा जघान । मेघो हि शुष्णः । तदुदये हि धान्यान्युदकग्राहनिमित्तेन शुष्यन्ति ।

कुत्स इत्येतत्संदेहपदम्

'ऐश्वर्यकर्माण उत्तरे धातवश्चत्वारः' । घ्नतामेव हि वज्रेणायुधेनैवैश्वर्यं[7] भवतीति वज्रनामभ्य उत्तरे ऐश्वर्यकर्माणः । कतमे पुनस्त इति । 'इरज्यति पत्यते क्षयति[8] राजति' [निघ० २ । २१] ।

'ईश्वरनामान्युत्तराणि चत्वारि' । ऐश्वर्यसंबन्धेनैवोच्यन्ते । कतमानि पुनस्तानि । 'राष्ट्री अर्यः नियुत्वान् इनः' [निघ० २ । २२] । 'तत्र इन इत्येतत्' अभिधानमेवं व्युत्पाद्यम् । 'सनितः' संभक्तः 'ऐश्वर्येणेति वा' । अथ वा 'सनितं' संभक्तं 'अनेनैश्वर्यमिति' । अधुना मन्त्रमपि व्याचष्टे यस्मिन्नेतदीश्वरनाम इन इति ॥ ११[9] ॥

यत्रा सुपर्णा अमृतस्य भागमनिमेषं विदथाभिस्वरन्ति ।

---

१ च. युतेर्वा. २ ग. च. ज. 'पुनः...दिद्युत्°' नास्ति. ३ ग. च. ज. एत्येतत्. ४ ग. ज. 'औपमन्यव आचार्यो मन्यते' नास्ति. ५ च. तत्रा°. ६ क. ख. घ. ट. ठ. ड. जघानेति. ७ क. ख. घ. ट. ठ. ड. 'इति' नास्ति. ८ क. ख. ग. च. ज. घ. ट. क्षियति. ९ क. ख. ५; ग. १२/१६ च. ज. १६; घ. ठ. अङ्को नास्ति; ठ. ड. इति । इति निरुक्तभा० तृ० एकादशः खण्डः.

इनो विश्वस्य भुवनस्य गोपाः स मा धीरः पाकमत्राविवेश [ऋ०सं० १।१६४।२१]॥ यत्र सुपर्णाः[1] सुपतना आदित्यरश्मयोऽमृतस्य भागमुदकस्यानिमिषन्तो वेदनेनाभिस्वरन्तीति वाभिप्रयन्तीति वेश्वरः सर्वेषां भूतानां गोपायितादित्यः स मा धीरः पाकमत्राविवेशेति धीरो धीमान्पाकः पक्तव्यो भवति विपक्वप्रज्ञ आदित्य इत्युपनिषद्वर्णो भवतीत्यधिदैवतमथाध्यात्मं यत्र सुपर्णाः सुपतनानीन्द्रियाण्यमृतस्य भागं ज्ञानस्यानिमिषन्तो[2] वेदनेनाभिस्वरन्तीति वाभिप्रयन्तीति वेश्वरः सर्वेषामिन्द्रियाणां गोपायितात्मा स मा धीरः पाकमत्राविवेशेति धीरो धीमान्पाकः पक्तव्यो भवति विपक्वप्रज्ञ आत्मेत्यात्मगतिमाचष्टे ॥ १२[3] ॥

इति[4] तृतीयाध्यायस्य द्वितीयः पादः ।

यत्रा सुपर्णा इति । त्रिष्टुबेषा । वैश्वदेवे[5] सूक्ते दीर्घतमसा दृष्टा । तृतीयसवने[6] वैश्वदेवे शस्त्रे[7] शस्यते [ऐ० आ० ५ । ३ । २] । वैश्वदेवेषु हि सूक्तेष्वेकदेवता बहुदेवताश्च मन्त्रा भवन्ति तदप्युपेक्षितव्यम् । यत्र यस्मिन्मण्डलेऽवस्थिताः सुपतना आदित्यरश्मयः । ते हि शोभनमर्थमुद्दिश्य तमोऽपघातलक्षणं[8] पतन्ति । अथवा शोभमानाः[9] पतन्तीति सुपर्णाः । ते किं कुर्वन्ति । उच्यते । अमृतस्य भागमुदकस्यामरणधर्मिणो भागं भजनीयमंशमादाय पृथिवीलोकात्तेनान्विताः सन्तः सर्वभूतान्यभिस्वरन्ति । स्वृ शब्दोपतापयोः [धा० १ । ९३२] । अभितपन्तीत्यर्थः[10] । अथवाभिस्वरन्त्यादित्यमण्डलम् ।

यत्रा सुपर्णा इत्येतस्यामृचि 'इन' शब्दस्याधिदैवतपरोऽर्थः

---

१ छ. त. द. ' सुपर्णाः ' नास्ति. २ छ. त. द. °मिषन्ति. ३ क. ख. द. ६; छ. त. १३. ४ ङ. थ. ध. ठ. ड. ' इति०००पादः ' नास्ति; छ. इति द्वितीयः पादः; त. इति तृतीयाध्याये द्वि°; द. इति नैरुक्तस्य तृ°. ५ ठ. ड. °देवसूक्ते. ६ क. ख. घ. ट. ठ. ड. महाव्रते तृतीय°. ७ च. ' शस्त्रे ' नास्ति. ८ क. ख. घ. ट. ठ. ड. तमोविघात°. ९ घ. ट. ठ. ड. शोभनाः. १० ग. ज. घ. ट. ठ. ड. अभिपतन्ती°.

आभिमुख्येन रसान्गृहीत्वा प्रयान्ति । कथं[1] पुनः प्रयान्ति । अनिमेषम्[2] अनिमिषमाणा इव । आदरवन्त इत्यर्थः । विदथा वेदनेन विज्ञानेन स्वकर्माधिकारयुक्तेनान्विताः सन्त इदमेवास्माभिः कर्तव्यं रसादानादि-[3] लक्षणं कर्मेत्यभिस्वरन्ति । यत्रैतदेवंलक्षणं कर्म कुर्वन्त्यादित्यरश्मयस्तत्र किमिति । उच्यते । इनो विश्वस्य भुवनस्य गोपाः । इन ईश्वरः । इनो ह्यसावादित्य ऐश्वर्येण भवति । विश्वस्य भुवनस्य भूतस्य भवति । किंच । गोपाः गोपायिता । आदित्यो मण्डलान्तरपुरुषो यस्तत्र मण्डलेऽवस्थितः स मा धीरो धीमान्प्रतिविशिष्टया बुद्ध्यान्वितः । बुद्धिरेव हि तस्य शरीरम् । पाकः[4] पक्तव्यः । पक्तव्यप्रज्ञो विपक्वप्रज्ञः सम्यग्दर्शनोऽनुग्राह्य-तया आविवेशाविशतु । इतिकरणः प्रकरणप्रदर्शनार्थ[5] एवमयमुपनिष-द्वर्णो ' मन्त्रो भवतीति ' । यद्विज्ञानमुपगतस्य[6] सतो गर्भजन्मजरामृत्यवो विनिश्चयेन[7] सीदन्ति सा रहस्या विद्योपनिषदित्युच्यते । उपनिषद्भावेन वर्ण्यत इति उपनिषद्वर्णः । ' अधिदैवतम् ' उक्तम् ।

अथाध्यात्मिकच्यते[8] । अधिदैवतमध्यात्ममित्येतौ[9] शब्दौ व्याख्यातौ [नि० १ । २०] । यत्र यस्मिञ्शरीरे सुपतनानीन्द्रियाण्यवस्थितानि स्वेषु स्वेष्वायतनेषु कृष्णसारादिषु । किं कुर्वन्ति । उच्यते । अमृतस्यामरणधर्मणो ज्ञानस्य भागं भज-नीयं स्वं स्वं रूपादिलक्षणमंशमादाय[10] विदथा वेदनेन विज्ञानेन युक्तान्यभिस्वरन्ति । न हीन्द्रियाणां चैतन्यमस्तीति । तानि ह्यचे-तनानि चेतनस्य पुरुषस्य कर्तुर्विज्ञानमयस्य करणानि । तदधिष्ठात्र्यस्तु देवताश्चेतनाः । तदभिप्रायेणोच्यते विदथा वेदनेन विज्ञानेनेति । किं कुर्वन्ति । अभिस्वरन्ति अभितपन्ति[11] । विषयैर्विज्ञानं[12] पुरुषस्य भोक्तुः

तत्रैव तस्याध्यात्मपरोऽर्थः

---

१ क. ख. ठ. ड. 'कथं पुनः प्रयान्ति' नास्ति. २ च. अनिमिषं. ३ ठ. ड. रसदाना°. ४ ग. ज. पार्कः। पक्तव्यः प्रज्ञं । विपक्व। प्रज्ञः; च. पाकं पक्तव्य प्रज्ञो° कः. ५ ग. च. ज. ' प्रकरण ' नास्ति. ६ क. ख. घ. ठ. ड. यद्वा ज्ञान° ; ट. यद्वा ज्ञान° द्वि; च. तद्विज्ञान°. ७ क. ख. घ. ट. ठ. ड. ' वि ' नास्ति. ८ घ. ट. ठ. ड. °ध्यात्ममु°. ९ क. ख. घ. ट. ठ. ड. °वतमथाध्यात्म°. १० क. ख. घ. ट. ठ. ड. °क्षणं रसमा°. ११ क. ख. अभिप्रयन्ति; ग. ज. अभिपतन्ति. १२ क. ख. घ. ट. ठ. ड. विषयविज्ञानेन पुरुषस्यापि भोक्तुर्दुःखं कुर्वन्ति.

पर्टुं[1] कुर्वन्ति । अथवा अभिस्वरन्ति बुद्धिमाभिमुख्येन विषयवि[2]ज्ञानमादाय बाह्यप्रत्ययाधानार्थं स्वरन्ति । गच्छन्तीत्यर्थः । तत्र किमिति । उच्यते । तत्र योऽवस्थित ईश्वर इनः सर्वेषामिन्द्रियाणां गोपायिता य आत्मा स मा धीरो धीमान् पाकः पक्तव्यः[3] पक्तव्यप्रज्ञो विपक्वप्रज्ञः सम्यग्दर्शी सर्वज्ञः। सोऽत्रैव हि देहेऽवस्थितो बुद्ध्यधिदैव[4]ताभावेन तैजसाख्यो मामाविवेश आविशत्वनुग्राह्यतया । स मामत्रैवावस्थितोऽनुगृह्णात्वित्यर्थः । तदनुग्रहाद्धि[5] सम्यग्दर्शनं प्रकाशते । तदाशास्यत इति ' आत्मगतिमाचष्टे ' । एवमयमात्मविज्ञानमाचष्टे मन्त्रः ।

अधिदैवेऽध्यात्मे चैक एव पुरुषः । देवताध्यात्मे वा पुष्पफले इत्यस्यैवमुपपत्तिः

यत्त[6]दुक्तं ' देवताध्यात्मे वा पुष्पफले[7] ' इति [निरु० १ । २०] तदेवमुपपाद्यं तत्र[8] तत्र । एक एव ह्यसावादित्यमण्डले चाधिदैवते[9]ऽध्यात्मे[10] च बुद्ध्यधिदेवताभूतः । स एव तत्र तत्रोपेक्षितव्यः । तस्मादमुष्मादादित्यमण्डलाद्ये रश्मयः प्रसर्पन्ति ते विश्वेदेवा इति । ' रश्मयो वै विश्वेदेवाः ' इति ह्युक्तम् । अध्यात्मेऽपि हृद्याकाशाद्यानीन्द्रियाणि प्रसर्पन्ति त एव रश्मयः । अध्यात्मे त एव च[11] विश्वेदेवा इत्युक्तम् । एवं तत्र तत्र योज्यम् । प्रकारमात्रमेवेदमुपप्रदर्शितं भाष्यकारेणेति ॥ १२[12] ॥

[13]इति निरुक्तवृत्तावष्टमा[14]ध्यायस्य द्वितीयः पादः ।

---

१ ग. ज. पटूकु°; च. पर्टुं कु° उप. २ घ. ट. ठ. ड. ' वि ' नास्ति. ३ ग. ज. पक्तव्यः प्रज्ञं । असम्यग्दर्शिनमसर्वज्ञं विपक्वप्रज्ञः; च. पक्तव्यो विपक्वप्रज्ञः. ४ क. ख. घ. ट. ठ. ड. °धिदैवतभा°. ५ घ. ट. ठ. ड. °हाद्यस्य सम्य°. ६ क. ख. घ. ट. ठ. ड. ' तत् ' नास्ति. ७ ग. ज. पुष्पफलं; च. पुष्पफलमिति० ले इ. ८ क. ख. घ. ट. ठ. ड. ' तत्र ' सकृदेव. ९ ग. ज. वाधिदैवते; च. चाधिदैवे. १० घ. ट. ठ. ड. आध्यात्मे. ११ क. ख. घ. ट. ठ. ड. ' च ' नास्ति. १२ क. ख. ६; ग. १३; घ. ट. च. ज. अङ्को नास्ति; ठ. १२ इति निरुक्तवृत्तौ तृतीयाध्याये द्वादशः खण्डः; ड. १२ खण्डः. १३ ग. च. ज. घ. ट. ठ.ड. 'इति निरुक्तवृत्तौ ' नास्ति. १४ घ. ट. °ष्टमस्याध्या°. ड. अष्टमस्य द्विती°.

बहुनामान्युत्तराणि द्वादश बहु कस्मात्प्रभवतीति सतो ह्रस्वनामान्युत्तराण्येकादश ह्रस्वो ह्रसतेर्महन्नामान्युत्तराणि पञ्चविंशतिर्महान्कस्मान्मानेनान्याञ्जहातीति शाकपूणिर्महनीयो भवतीति वा तत्र ववक्षिथ विवक्षस इत्येते वक्तेर्वा वहतेर्वा साभ्यासाद्गृहनामान्युत्तराणि द्वाविंशतिर्गृहाः कस्माद्गृह्णन्तीति सतां परिचरणकर्माण उत्तरे धातवो दश सुखनामान्युत्तराणि विंशतिः सुखं कस्मात्सुहितं खेभ्यः खं पुनः खनते रूपनामान्युत्तराणि षोळश[1] रूपं रोचतेः प्रशस्यनामान्युत्तराणि दश प्रज्ञानामान्युत्तराण्येकादश सत्यनामान्युत्तराणि षट् सत्यं कस्मात्सत्सु तायते[2] सत्प्रभवं भवतीति वा[3] अष्टा उत्तराणि पदानि पश्यतिकर्माण उत्तरे[4] धातवश्चायतिप्रभृतीनि च नामान्यामिश्राणि नवोत्तराणि पदानि सर्वपदसमाम्नानायाथात उपमा यदतत्तत्सदृशमिति गार्ग्यस्तदासां कर्म ज्यायसा वा गुणेन प्रख्याततमेन वा कनीयांसं वा प्रख्यातं वोपमिमीतेऽथापि कनीयसा ज्यायांसम् ॥ १३[5] ॥

'बहुनामान्युत्तराणि द्वादश'। ईश्वराणामेव बहु भवतीतीश्वरनामभ्य उत्तराणि बहुनामानि। कियन्ति। द्वादश। द्वे च दश च[6]। कतमानि पुनस्तानि। 'उरु तुवि पुरु' [निघ० ३ । १] इत्येवमादीनि। उरु विस्तारे। यद्धि बहु भवति तद्विस्तीर्णं भवति। तुवि वृद्धौ। यद्धि बहु भवति वृद्धं[7] तद्भवतीति तुवि[8]। पुरु प्राप्तं च सर्वतो भवति। पूरितमिव हि बहुना सर्वं भवतीति पुरु। इत्येवमादि योज्यम्। आह। 'बहु कस्मात्'। उच्यते[9]। 'प्रभवति' ह्येतद्बहुभ्योऽपि दीयमानम्।

---

१ क. ख. षोडश; छ. त. द. षोलश. २ छ. जायते. ३ छ. त. वा । १४। अष्टा°; द. वा । १ । अष्टा°. ४ छ. त. द. 'उत्तरे' नास्ति. ५ क. ख. १; छ. त. १५; द. २. ६ क. ख. घ. ट. ठ. ड. च द्वादश. ७ क. ख. घ. ट. ठ. ड. तद्वृद्धं भव°. ८ ग. ज. °तुवि । प्राप्तं; घ. ठ. ठ. ड. °तुवि । प्राप्त्यर्थं च°. ९ ग. ज. 'उच्यते' नास्ति.

बहुनामसंबन्धेनैव ' ह्रस्वनामान्युत्तराणि ' । कियन्ति । एकादश । कतमानि पुनस्तानि । 'कुवित् रिह्लं[1] ह्रस्वः' [निघ० ३ । २] इत्येवमादीनि । कुत्सितमिव हि तद्विज्ञायतेऽल्पत्वादिति कुवित् । लीढमिव हि तदल्पत्वाद्भवतीति रिढम्[2] । आह । 'ह्रस्वः' कस्मात् । उच्यते । ह्रसितो हि भवति स महतः सकाशात् ।

ह्रस्वसंबन्धेनैव ' महन्नामान्युत्तराणि पञ्चविंशतिः ' । ह्रस्वापेक्षयैव हि महत्त्वं भवति । कियन्ति पुनस्तानि । पञ्चविंशतिः । कानि[3] पुनस्तानि । 'मेहः[4] ब्रध्नः ऋष्वः' [निघ० ३ । ३] इत्येवमादीनि । आह । ' महान् कस्मात् ' । उच्यते । ' मानेनान्यान् ' ह्रस्वान् जहातीति ' शाकपूणिः ' आचार्यो मन्यते । अथ 'वा मंहनीयः' पूजनीयो ' भवतीति ' महान् । बृहत्त्वाद्बृंहणत्वाद्वा ब्रध्नः । ऋष्वः रेषणवानित्यादि योज्यम् । ' तत्र ' तस्मिन् महन्नामगणे[5] ' ववक्षिथ विवक्षसे ' इत्येते आख्याते । ते पुनरेते[6] वक्तेर्वा वहतेर्वा धातोः ' साभ्यासात् ' ।

य एव हि महान्तस्त एव गृहिणो भवन्तीति महन्नामभ्य ' उत्तराणि गृहनामानि' । कियन्ति पुनस्तानि । 'द्वाविंशतिः' । कतमानि पुनस्तानि । 'गयः कृदरः[7] हर्म्यम्' [निघ० ३ । ४] इत्येवमादीनि । गर्म्यत[8] एतदिति गयः । कृदरः[9] कृतदरः । हर्म्यं हरणमित्येवमादीनि । आह । ' गृहाः कस्मात् ' । उच्यते । ते हि यावदेव किंचिदाह्रियते तत्सर्वमेव[10] ' गृह्णन्ति ' दुःपूरत्वात् ।

गृहेष्वेवावस्थिताः परिचर्यन्ते परिचरन्ति वेति[11] गृहनामभ्य ' उत्तरे परिचरणकर्माणो धातवः ' समाम्नाताः । कियन्तः पुनस्त इति[12] । दश । कतमे पुनस्त इति[12] । इरज्यति[13] विधेम सपर्यति [निघ० ३ । ५] इत्येवमादयः ।

---

१ क. ख. रिहं; ग. च. ज. रिल्हं; घ. ट. ठ. ड. लीढं. २ क. ख. रिहम्; घ. ट. ठ. ड. लीढं. ३ क. ख. घ. ट. कतमानि. ४ क. ख. महत्. ५ ग. ज. महर्नामगणे. ६ क. ख. घ. ट. पुनरुभे. ७ घ. ट. ठ. ड. कृदरः मर्तः हर्म्यम्. ८ घ. ट. ठ. ड. 'गम्यते...मादीनि' नास्ति. ९ क. ख. कृतदरः कृदरः; च. कृतन्दरः° द्. १० ग. च. ज. 'तत्' नास्ति. ११ घ. ट. ठ. ड. चेति. १२ क. ख. घ. ट. ठ. ड. 'इति' नास्ति. १३ ग. च. ज. इरध्यति; घ. ट. इरत्यति.

परिचर्यमाणानामेव हि सुखं भवतीति परिचरणकर्मभ्य ‘ उत्तराणि सुखनामानि ’। कियन्ति पुनस्तानि। विंशतिः। कतमानि पुनस्तानि। ‘ शिम्बाता[1] शतरा शातपन्ता ’ [निघ० ३ । ६] इत्येवमादीनि। शिम्बाता। सुखानुबन्धा[2]द्धि ह्रदमग्नानामिव शरीरं शीतीभवति[3]। शतरा। शीतलतरमिव हि जलादपि सुखम्। शातपन्ता। शान्तताप[4]मेव हि सुखमि[5]त्येवमादि। आह। ‘ सुखं कस्मात् ’। उच्यते। सुष्ठु हितमेतत् ‘ खेभ्यः ’ इन्द्रियेभ्यः। ‘ खं पुनः ’ इन्द्रियं ‘ खनतेः ’ धातोः। अवदीर्णमिव हि तस्य श्रोत्रादेः[6] कर्णाद्यायतनं भवति।

‘ रूपनामान्युत्तराणि षोडश ’। य एव हि सुखिनस्त एव[7] रूपवन्तो भवन्तीति[8] सुखनामभ्य उत्तराणि रूपनामानि। कियन्ति पुनस्तानि। षोडश। षट् च दश च[9]। कतमानि पुनस्तानि। ‘निर्णिक्[10] वव्रिः वर्पः’ [निघ० ३। ७] इत्येवमादीनि। निर्णिक्तमिव हि तद्भवति तैजसत्वात्। विवृणोत्याश्रयमिति वव्रिरित्येवमादि। ‘रूपं रोचतेः ’। दीप्यमानमिव हि तत्प्रकाशं[11] भवति।

‘ प्रशस्यनामान्युत्तराणि दश ’। य एव हि रूपवन्तस्त एव प्रशस्या भवन्तीति रूपनामभ्य उत्तराणि प्रशस्यनामानि। कियन्ति पुनस्तानि। दश। कतमानि पुनस्तानि। ‘ अस्रेमा: अनेद्यः अनिन्द्यः ’ [निघ० ३।८] इत्येवमादीनि। अस्रेमाः[12] अपाप इत्यर्थः। अनेद्यः अनिन्दनार्हः। इत्येवमादि योज्यम्।

‘ प्रज्ञानामान्युत्तराण्येकादश[13] ’। य एव हि प्रज्ञावन्तस्त एव[14] प्रशस्या भवन्ति य एव च[15] प्रशस्यास्त एव हि प्रज्ञावन्तो भवन्तीति प्रशस्य-

---

१ घ. ट. शिंवाता. २ क. ख. ध. ट. ठ. ड. °नुसंबन्धा°. ३ घ. ट. ठ. ड. °भवतीति. ४ ग. ज. शान्ततापता (ज. त) पमेव°; च. शान्ततापितमेव° पानामि. ५ क. ख. घ. ट. ‘इति’ नास्ति. ६ क. ख. घ. ट. ठ. ड. ‘श्रोत्रादेः’ नास्ति. ७ क. ख. घ. ट. ठ. ड. एव हि. ८ ग. च. ज. ‘ इति ’ नास्ति. ९ ध. ट. ठ. ड. च षोडश. १० ग. च. ज. निर्निक्तं°; ध. ट. ट. ड. निर्णिक्। निर्णिक्तं°. ११ च. °काशकं. १२ क. ख. घ. ठ. ठ. ड. अस्रेमाः। स्रिवु गतिशोषणयोः (धा०४।३)। न स्रीव्यति गच्छत्यकीर्तिमित्यस्रेमाः। अपाप इत्यर्थः। क्षयरहितो वा। अने°. १३ च. द्वादश. १४ क. ख. ध. ट. ठ. ड. एव हि. १५ क. ख. घ. ट. ठ. ड. हि; च. ‘ च ’ नास्ति.

नामभ्य उत्तराणि प्रज्ञानामानि। कियन्ति पुनस्तानि। एकादश[1]। एकं[2] च दश च[3]। कतमानि पुनस्तानि। 'केतः केतुः चेतः' [निघ० ३। ९] इत्येवमादीनि। कित ज्ञाने [धा० ३। १९]। तस्य केतः। केतुरपि तस्यैव।

'सत्यनामान्युत्तराणि षट्'। य एव हि प्रज्ञावन्तस्त एव हि सत्यवादिनो भवन्तीति प्रज्ञानामभ्य उत्तराणि सत्यनामानि। कियन्ति पुनस्तानि। षट्। कतमानि पुनस्तानि। 'बट् श्रत् सत्रा' [निघ० ३।१०] इत्येवमादीनि। बद्धमिव संबद्धं[4] सद्भूतेनार्थेन भवतीति बट्। श्रवणार्हमेतद्भवतीति[5] श्रत्। एवमादि। आह। 'सत्यं कस्मात्'। उच्यते। 'सत्सु तायते'। सत्स्वेव हि तत्तायते विस्तीर्यते[6]। न हि सतां समीपे शक्यमनृतं वक्तुम्। अथ 'वा सत्प्रभवं भवति[7]'। य एव हि सन्तस्त एव हि सत्यं वदन्ति।

'पश्यतिकर्मणो धातवश्चायतिप्रभृतीनि च नामानि' इत्यस्य द्विविधं विवरणम्

'अष्टौ' यानि 'उत्तराणि पदानि' चिक्यदित्येवमादीनि[8] [निघ० ३। ११] ते पश्यत्यर्थाश्च[9] 'धातवश्चायतिप्रभृतीनि च' तान्येव 'नामानि' भवन्ति। तानि पुनरेतानि 'आमिश्राणि'। संसृष्टानीत्यर्थः। तेषां प्रकरणोपपदाभ्यां विशेषावधारणं भवति तत्र कुत्र[10] किंचिन्नाम कुत्र किंचिदाख्यातमित्येवमेके[11] मन्यन्ते। अन्ये[12] पुनः 'चिकेतत्[13] चन विचर्षणिः विश्वचर्षणिः' इत्येतानि नामानि। यान्यन्यानि परिशिष्टानि ते धातवः। तानि पुनरेतानि पूर्वाचार्यप्रामाण्यादामिश्राणि पठ्यन्त इत्येवं मन्यन्ते।

'नैव[14]' यानि 'उत्तराणि पदानि' 'हिकं सुकं नुकम्[15]' इत्येवमादीनि 'आकृतम्' इत्येवमन्तानि [निघ० ३। १२] सर्वपदसमाम्नानाय।

---

१ च. द्वादश. २ च. द्वे. ३ क. ख. घ. ट. ठ. ड. च एकादश. ४ ग. ज. संबद्धं सत्यभूते°; घ. ट. ठ. ड. संबन्धं सत्यभूते°. ५ च. °र्हमेतद्भ° मेव. ६ च. विस्तार्यते. ७ ठ. भवतीति. ८ च. चिक्यमित्ये°. ९ क. ख. घ. ट. ठ. ड. 'च' नास्ति. १० क. ख. घ. ट. ठ. ड. 'कुत्र' नास्ति. ११ ठ. ड. 'एवं' नास्ति. १२ घ. ट. ठ. ड. अन्ये तु पुनः। किम्। चिक्य°. १३ च. चिक्यत्° त्सं. १४ घ. ट. ठ. ड. नव च. १५ ग. च. ज. 'नुकं' नास्ति.

कथं नाम सर्वं चतुर्विधं पदप्रकारमेतस्मिन्समाम्नाये समाम्नातं स्यादित्येवमर्थम् । एष्वेव हि नवसु समाम्नातेषूभये निपातोपसर्गा दर्शिता भवन्ति ।

‘ अथात उपमाः ’ । अथ इदानीम् अतः अनन्तरमुपमा भवन्ति । तद्यथा । ‘ इदमिव इदं यथा अग्निर्नये चतुरश्चिद्ददमानात् ब्राह्मणा व्रतचारिणः वृक्षस्य नु ते पुरुहूत वयाः जार आ भगम् मेषो भूतोऽभि यन्नयः तद्रूपः तद्वर्णः तद्वत् तथा ’ [निघ० ३ । १३] । एता उपमाः । सामान्यलक्षणमासां ब्रवीति । ‘ यदतत्तत्सदृशमिति गार्ग्यः ’ ।

गार्ग्यकृतमुपमालक्षणम्

यत्किंचिदर्थजातम् अतद्भवति तत्सरूपं च । यथा । अनग्निः खद्योतोऽग्नि[1]सरूपश्च । सोऽग्निनोपमीयतेऽग्निरिव खद्योत इति । एवमे[2]तत्तत्सरूपेण गुणेन गुणसामान्यादुपमीयत इत्येवं गार्ग्य आचार्यो मन्यते । ‘ तदासां कर्म ’ । स आसामुपमानामर्थो यदप्रसिद्धतरगुणस्य कस्यचित्प्रसिद्धतरगुणेनान्येन गुणप्रकाशनम् । क्वचित्पुन[3]रात्मनाप्युपमानं भवत्येव । तद्य[4]था । ‘वायुरात्मोपमगतिः ’ । ‘ तथा करोति सैन्यानि यथा कुर्याद्धनंजयः ’ इति । ‘ ज्यायसा वा गुणेन प्रख्याततमेन वा कनीयांसं वाऽप्रख्यातं वोपमिमीते ’ । ज्यायसा उ[5]त्कृष्टेन गुणेन यो यस्मिन्

तदेव यास्ककृतम्

द्रव्य उत्कृष्टो गुणस्तेन कनीयांसम् अनुत्कृष्टगुणमुप[6]मिमीते । तद्यथा । सिंहो माणवकः । सिंहे शौर्यमुत्कृष्टमनुत्कृष्टं माणवके । तेनोप[7]मिमीते सिंह इव माणवको विक्रान्त इति । प्रख्याततमेन वाऽप्रख्यातमुपमिमीते । तद्यथा । प्रख्याततमश्चन्द्रमा अप्रख्यातो माणवकः । तं तेनोप[8]मिमीते चन्द्र इव कान्तो माणवक इति । ‘ अथापि ’ क्वचित्कनीयसा गुणेन ‘ ज्यायांसम् ’ अपि सन्तमुप[9]मिमीते । तदेतच्छन्दस्येव द्रष्टव्यम् । आह । किमुदाहरणम् । उच्यते ॥ १३[10] ॥

---

१ ग. ज. °ग्निरूप°. २ ठ. ड. एवमेत°. ३ ग. च. ज. पुनआत्म°. ४ क. ख. घ. ट. ठ. ड. ‘ तद्यथा ’ नास्ति. ५ ग. ज. घ. ट. वा उत्कृष्टेन. ६ क. ख. घ. ट. ठ. ड. °पमीयते. ७ क. ख. घ. ट. ठ. ड. °मुत्कृष्टं माणवकमेतेनोप°. ८ घ. ट. ठ. ड. पमीयते. ९ घ. ट. °पमिमीयते. १० क. ख. १; ग. १५ [१७]; च. १७; घ. ज. ट. ड. अङ्को नास्ति; ठ. ॥ १३ ॥ इति । निरुक्तवृत्तौ तृतीयाध्याये त्रयोदशः खण्डः.

तनूत्यजेव तस्करा वनर्गू रशनाभिर्दशभिरभ्यधीताम् । तनूत्यक्तनूत्यक्ता वनर्गू वनगामिनावग्निमन्थनौ बाहू तस्कराभ्यामुपमिमीते तस्करस्तत्करो भवति यत्पापकमिति नैरुक्तास्तनोतेर्वा स्यात्संततकर्मा भवत्यहोरात्रकर्मा वा । रशनाभिर्दशभिरभ्यधीताम् । अभ्यधीतामित्यभ्यधातां ज्यायांस्तत्र गुणोऽभिप्रेतः ॥ १४ ॥

तनूत्यजेव तस्करा वनर्गू रशनाभिर्दशभिरभ्यधीताम् । इयं ते अग्ने नव्यसी मनीषा युक्ष्वा रथं न शुचयद्भिरङ्गैः [ऋ० सं० १० । ४ । ६] ॥ त्रितस्येयमाप्त्यस्यार्षम् । त्रिष्टुप् । प्रातरनुवाकाश्विनयोः शस्यते [आ०सू० ४ । १३] । तनूत्यजा तनूत्यक्ता चौर्याभिप्रायेण हर्तव्यं वा मर्तव्यं वेति कृताध्यवसायौ तस्करौ वनर्गू वनगामिनौ मार्गमोषकौ प्रसृतौ । ताभ्यामुपमिमीते । तौ यथोपमार्थत्वेन सुपुष्टौ भवतो न तथा ग्रामतस्करौ । तौ यथा कंचिदध्वगं बध्नीयातां रज्ज्वैवमेतावस्मद्बाहू रशनाभिरङ्गुलीभिर्दशभिर्दशसंख्यायोगिनीभिरभ्यधीतां प्रतिनिबध्नीतः । अभिनिबध्य चाग्निमन्थनयोक्त्रेणाधरारण्युत्तरारणीभूतं त्वां तस्कराविव कंचिदध्वगं गाढं बद्ध्वा सुभृशमाकर्षतः । किमर्थं पुनरेवं मथ्यसेऽस्माभिः । हे अग्ने इयं यस्मान्नव्यसी नवतरा अन्यैः स्तोतृभिरदृष्टपूर्वा युष्मद्गुणैः संस्कृत्य विवक्षिता तव मनीषा स्तुतिः प्रधानसंयुक्ता । स त्वमेतज्ज्ञात्वा एवमभिमथ्यमानोऽस्माभिर्युक्ष्व योजयात्मानमरणी प्रति अरणिभ्यां शुचयद्भिर्दीप्यमानैः स्वैरङ्गैर्ज्वालाख्यैः । कथंपुनर्योजय । रथं न । यथा कश्चित्कुत-

अस्यामृचि ज्यायांसौ बाहू कनीयोभ्यां तस्काराभ्यामुपमीयेते

---

१ क. ख. छ. त. द. °स्तत्करोति यत्पाप°. २ क. ख. छ. त. द. 'अभ्यधीतामिति' नास्ति. ३ क. ख. २; छ. त. १६; द. ३. ४ ग. ज. °त्यजेव तस्करा । त्रित°; च. ट. °त्यजेव त०रङ्गैः । त्रित°; ठ. ड. °त्यजेव । त्रित°. ५ ग. ज. तन्वं त्यक्त्वा; च. तनूं त्यक्त्वा. ६ ग. ज. °थोपमानं तां (ग. ती) र्थत्वेन. ७ घ. ट. ठ. ड. 'दशभिः' नास्ति. ८ क. ख. घ. ट. ठ. ड. °बध्नीताम्. ९ च. °रेव मथ्य°. १० ग. ज. °प्रदान°. ११ ग. ज. अरणीभ्यां.

श्चिदाजिगमिषुः शीघ्रं रथं योजयेदेवमेवावतरणाय त्वमा[1]त्मानमाभ्यामर[2]णिभ्यां योजय । मा नो यज्ञ[3]विघ्नं कार्षीरित्यभिप्रायः । 'तनूत्यक्तनूत्यक्तौ[4]' इत्यर्थः । 'वनर्गू वनगामिनौ' । तत्र हि तयोश्चौर्यं सिध्यति । एवमस्यामृचि 'अग्निमन्थनौ बाहू' प्रशस्तौ 'तस्कराभ्याम्' अप्रशस्ताभ्यामुपमिमीते' मन्त्रदृक् ।

'तस्करस्तत्' एव करोति यत् एव 'पापकं' भवतीत्येवं 'नैरुक्ताः' मन्यन्ते । वैयाकरणानां पुनरन्यथापि स्यात् । स हि 'संततकर्मा भवति' । रात्रौ ग्रामे मुष्णाति दिवारण्य एवम् 'अहोरात्रकर्मा' । एतदेव च[5] तत्संततकर्मत्वम् । रशनाभिर्दशभिरभ्यधीताम् इति । एवमत्र बाह्वोः 'ज्यायान् गुणोऽभिप्रेतः' तयोः प्रशस्तत्वात् । अप्रशस्तत्वा[6]त्तस्करयोः कनीयान् । द्वितीयमुदाहरणमेतस्मिन्नेवार्थे । 'अथापि कनीयसा ज्यायांसम्' इति ॥ १४[7]॥

कुह स्विद्दोषा कुह वस्तोरश्विना कुहाभिपित्वं करतः कुहोषतुः । को वां शयुत्रा विधवेव देवरं मर्यं न योषा कृणुते सधस्थ आ [ऋ० सं० १० । ४० । २]॥ क्वस्विद्रात्रौ भवथः क्व दिवा क्वाभिप्राप्तिं[8] कुरुथः क्व वसथः को वां शयने विधवेव देवरं देवरः[9] कस्माद्द्वितीयो वर उच्यते विधवा विधातृका भवति विधवनाद्वा विधावनाद्वेति चर्मशिरा अपि वा धव इति मनुष्यनाम तद्वियोगाद्विधवा देवरो दीव्यतिकर्मा मर्यो मनुष्यो मरणधर्मा योषा यौतेराकुरुते स[10]हस्थानेऽथ निपाताः पुरस्तादेव व्याख्याता यथेति

---

१ क. ख. घ. ट. ठ. ड. 'आत्मानं' नास्ति. २ क. ख. ग. ज. व. ट. ठ. ड. °रणीभ्यां. ३ क. ख. घ. ट. यज्ञे विघ्नं. ४ ग. च. ज. °त्यक्तेत्यर्थः. ५ घ. ट. 'च' नास्ति. ६ क. ख. घ. ट. ठ. ड. °शस्तत्वाच्च तस्क°. ७ क. ख. २; ग. १६/१८ ; च. ज. १८; घ. ट. अङ्को नास्ति; ट. ड. ॥ १४ ॥ इति निरुक्तवृत्तौ (ङ. नैरुक्तभाष्ये) तृतीयाध्याये चतुर्दशः खण्डः. ८ छ. त. द. °प्राप्तं. ९ छ. त. 'देवरः कस्माद् द्वितीयो वर उच्यते' नास्ति. १० छ. सधँस्था° ह्य; त. सधँस्था° ह; द. सधस्था°.

कर्मोपमा । यथा वातो यथा वनं यथा समुद्र एजति । भ्राजन्तो अग्नयो यथा । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा । आत्माततेर्वाप्तेर्वापि वाप्त इव स्याद्याव-द्व्याप्तिभूत इति । अग्निर्न ये भ्राजसा रुक्मवक्षसः । अग्निरिव ये मरुतो[1] भ्राजमाना रोचिष्णूरस्का भ्राजस्वन्तो रुक्मवक्षसः ॥ १५[2] ॥

कुह स्विद्दोषेति कक्षीवतो दुहिता घोषा नाम । तस्या इयमार्षम् । आश्विनी । जगती । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १५]। हे अश्विनौ कुहस्विद्दोषा । क्व नु युवां रात्रौ भवथः । कुह वस्तोः । क्व[3] वा दिवा भवथो युवां येन नापि रात्रावस्माकं दर्शनमुपगच्छथो नापि दिवा । स्विदिति परिदेवनायामीर्ष्यायां वा ।

अस्यामृचि देवरेण कनीयसा ज्यायांसावश्विनावुपमीयेते विधवया च यजमानः

क्व वाभिपित्वम् अभिप्राप्तिं[4] स्नानभोजनाद्यर्थं कुरुथः । कुह वोषतुर्वसथः । सर्वथा न विज्ञायते वामागमनप्रवृत्तिः । किंच । को वां शयुत्रा । कतमो युवां यजमानः शयुत्रा शयने । किम् । विधवेव देवरम् । यथा विधवा मृतभर्तृका काचित्स्त्री शयने रहस्यतितरां यत्नवती देवरमुपचरति । स हि परकीयत्वान्नार्यो दुरा-[5]राध्यतरो भवतीति[6] यत्नेनोपचर्यते न तथा निजो भर्ता । तस्मात्तेनोपमीयेते अश्विनौ । मर्यं[7] मनुष्यं देवरं सैव मृतभर्तृका योषा आ कृणुते आभिमुख्येन कुरुते । को वामेवमाभिमुख्येन सहस्थाने समाने सहयोगिनात्मना कृत्वा परिचचार येनेह नोपगतवन्तौ स्थोऽस्मद्दर्शनामिति । एवमस्यामृचि देवरेण कनीयसा ज्यायांसावश्विनावुपमीयेते विधवया च यजमानः ।

'विधवा विधातृका भवति[8]' । धाता धारयिता पोषयिता वा[9] भर्ता ।

---

१ छ. तं. द. 'मरुतो भ्राजमाना रोचिष्णूरस्का' नास्ति. २ क. ख. ३; छ. त. १७; द, ४. ३ घ. झ. ठ. ड. 'क्व' नास्ति; ढ. °वस्तो वा° स्तोः क्व वा; ग. ज. 'वा' नास्ति. ४ ग. ज. °भिप्राप्तं. ५ ग. च. ज. दुराराधतरो. ६ क. ख. घ. झ. ट. 'इति' नास्ति. ७ क. ख. घ. झ. ट. ठ. ड. तथा मर्यं. ८ ग. च. ज. °भवति । धवो भर्ता स तस्या°. ९ ढ. वा भर्ता° धवो.

स तस्या विगत इति विधवा[1] । ' विधवनाद्वा ' । सा हि भर्तृमरणेन विधूता कम्पितेव भवति । ' विधावनाद्वा ' । सा हि भर्तुरभावादननु[2]रुध्यमाना तत्र तत्र विधावतीत्येवं चर्मशिरा[3] आचार्यो मन्यते । ' अपि वा धव इति मनुष्यनाम ' । तद्वियोगाद्विधवा । ' देवरः ' इत्येष शब्दो दीव्यत्यर्थः[4] । स हि भर्तुर्भ्राता नित्यकालमेव[5] तया भ्रातृभार्यया देवनार्थं व्रियत इति देवर इत्युच्यते । ' मर्यो मनुष्यः ' । स हि ' मरणधर्मा '॥ ' योषा यौतेः ' मिश्रणार्थस्य [धा० २ । २३] । सा हि मिश्रयत्यात्मानं पुरुषेण साकम् । ' आकुरुते[6] सहस्थाने ' समानस्थाने[7] । आभिमुख्येनात्मनः कुरुते परिचरणाय ।

'अथ निपाताः' । ज्यायसा कनीयान्कनीयसा च[8] ज्यायानुपमीयत इति सामान्यमुक्तम् । अथानन्तरं ये निपाताः समाम्नाता यथा ' अग्निर्न ये ' इत्येवमादयस्ते स्वावसरप्राप्ताः[9] । ते च पुनः ' पुरस्तादेव व्याख्याताः ' [निरु० १ । ४—११] सामान्यतः । विशेषत इदानीमुदाहरणतो व्याख्यायन्ते । तत्र ' यथेति ' एषा ' कर्मोपमा ' । किमुदाहरणम्[10] ।

यथेति कर्मोपमा। तस्या उदाहरणम्

' यथा वातो यथा वनं यथा समुद्र एजति । एवा त्वं दशमास्य सहावेहि जरायुणा ' [ऋ० सं० ५ । ७८ । ८] ॥ सप्तवध्रिरात्रेयोऽपश्यदेना[11]मनुष्टुभम् । गर्भानुमन्त्रणे विनियुक्ता । यथा वातवनसमुद्रा एजन्ते कम्पन्त एवं त्वं हे दशमास्य दशमाससंभूत गर्भ एतस्मान्मातुरुदराद्दुःखयन्नेतामेजंश्चलन्[12] अवेहि अर्वाङ्[13] एहि सह जरायुणा उल्बेन । प्रजायस्व मा स्थास्त्वमेतस्मिन्नुदर इत्यभिप्रायः ।

अपरमुदाहरणम्[14] । ' अदृश्रमस्य केतवो[15] वि रश्मयो जनाँ अनु ।

---

१ क. ख. घ. झ. ट. ठ. ड. 'विधवा' नास्ति. २ क. ख. ग. ज. °दनुरु°. ३ ठ. ड. चर्मशिरेति । चर्म°. ४ ग. च. ज. दीव्यतीत्यर्थः. ५ ग. ज. °मेवं. ६ ग. च. ज. आकृणुते. ७ घ. ट. ठ. ड. समास्थाने. ८ घ. झ. ट. ठ. ड. 'च' नास्ति. ९ क. ख. घ. झ. ट. °स्ते चत्वारोऽवस°. १० ग. च. ज. °णम् । १९ । यथा°. ११ क. ख. घ. झ. ट. ठ. ड. °श्यत् । एषा अनुष्टुप्. १२ ग. ज. चलयन्. १३ घ. झ. ट. अवाङ्. १४ ग. च. ज. °णम् । २० । अदृ°. १५ ग. च. ज. घ. झ. ट. केतव इति । प्रस्क°.

भ्राजन्तो अग्नयो यथा' [ऋ० सं० १ । ५० । ३] ॥ प्रस्कण्वस्यार्षम् । गायत्री । सौर्यो[1]ऽनयातिग्राह्यो गृह्यते पृष्ठ्यस्य षष्ठेऽहनि [मैत्रा० सं० १ । ३ । ३३] । अदृश्रमस्य केतवः । रश्मयः[2] विविधा दृश्यन्तेऽस्य भगवतः सूर्यस्य । प्रज्ञानसतत्त्वास्ते हि तमोऽपहत्य सर्वप्राणिनां प्रज्ञानमभिव्यञ्जयन्तीति त एव केतव इत्युच्यन्ते लक्षणया । अथवा प्रकाशसतत्त्वास्त इति साक्षादेव केतुशब्दस्तेषु स्यात् । केतुरिति विज्ञानमुच्यते । विज्ञानं च पुनः प्रकाशः । प्रकाशसतत्त्वाश्चैत इति केतव उ[3]च्यन्ते । अथवा केतव ई[4]व सर्वतोदिशमुच्छ्रिता आदित्यमण्डले । ध्वजो हि केतु[5]रित्युच्यते । के पुनस्त इति । रश्मयः । ते किं कुर्वन्ति य एवमुच्छ्रिता इति । उच्यते । जनान् अनु तिष्ठन्ति गच्छन्ति तमांस्यपहन्तुमन्यांश्चोपकारान्कर्तुमोषधिपाकादीन् । कथं पुनरनुतिष्ठन्ति । भ्राजन्तो दीप्यमानाः । कथम् । अग्नयो यथा । येन प्रकारेणाग्नयो भ्राजन्ते तथा भ्राजन्तोऽनुतिष्ठन्ते ।

तस्या एवान्यदुदाहरणम्.

अपरमुदाहरण[6]म् । 'यदिमा वा[7]जयन्नहमोषधीर्हस्त आदधे । आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा' [ऋ० सं० १० । ९७ । ११] ॥ आथर्वणो भिषक् । तेनेयमोषधिसूक्ते दृष्टा । अनुष्टुप् । एतेन पुनरुपतप्तो दीक्षित एकविंशतिभिर्यवदर्भपिञ्जूल[9]मिश्राभिरद्भिरभिषिच्यत उपता[10]पशान्त्यर्थम् [आश्व० श्रौ० ६ । ९] । अनेनैव[11] सूक्तेनाग्निचयने[12]क्षेत्रं ग्राम्यारण्याभिरोषधिभिर्न्युप्यते [मैत्रा० सं० ३ । २ । ९ ॥ तै० सं० ५ । २ । ९] । यद्यदाहमिमा ओषधीर्हस्त आदधे आधाय च संनिकर्षेऽपि तिष्ठामि रोगिण एता ओषधीः वाजयन् पूजय[13]न् । स्तुवन्नित्यर्थः । अथ तदैव तदनन्तरमेव पुरैव तासामोषधीनां

तस्या एव तृतीयमुदाहरणम्

---

१ घ. झ. ट. ठ. ड. सौरी । सौर्योऽ°. २ ग. च. ज. 'रश्मयो विविधाः' नास्ति. ३ क. ख. ग. ज. इत्युच्यन्ते. ४ च. इति. ५ क. ख. घ. झ. ट. ठ. ड. 'इति' नास्ति. ६ ग. च. ज. °णम् । २१ । यदि°. ७ ग. च. ज. घ. ट. °यन्नहमिति । आथ° (ग. ज. अथ°). ८ झ. ठ. अथ°. ९ क. ख. °पिञ्जूलीमिश्रा°; घ. झ. ट. ठ. ड. °पिञ्जूलीभिर्मिश्रा°. १० घ. झ. ट. ठ. ड. उपशान्त्य°. ११ ग. ज. °नैव च. १२ घ. झ. ट. ठ. ड. °चयनादूर्ध्वं क्षेत्रग्राम्या°. १३ च. प्रपूजयन्.

प्रयोगादस्मं[1]स्तुत्युनीतमौष[2]धिवीर्यमसह्यं मन्वान आत्मा यक्ष्मस्य यक्ष्मणो नश्यति रोगस्यापुनरागमनाय । कथं पुनर्नश्यति । यथा जीवगृभो जीवग्राहस्य पुरैव हननादहतस्यैव जीवो नश्येद्विषादादेवैवमात्मा रोगस्यापि पुरैवौषधिप्रयोगान्नश्यतीत्यभिप्रायः ।

निगमप्रसक्तमुच्यते । ‘ आत्माततेर्वा ’ । सर्वमेव हि तेनाततं[3] भवति सर्वगतत्वात्[4] । ‘ आप्तेर्वा ’ । सर्वमेव हि तेन व्याप्तं भवति सर्वगतत्वादेव । ‘ अपि वाप्त इव स्याद्यावद्व्याप्तिभूत इति ’ । अपि चैवमन्यथा स्यात् । आप्तो व्याप्त इव ह्यसौ कार्यकरणेन[5] स्यात् । किं च सर्वगतत्वेऽपि सति यावन्मात्रमेव तस्य कार्यकरणेन व्याप्यते तावन्मात्रभूत एवासौ लक्ष्यते । तावन्मात्रे हि प्रदेशे तस्य चैतन्यशक्तिरभिव्यज्यते तप्तायसि[6] दर्भमुष्टिप्रक्षेपादग्न्यभिव्यक्तिवदिति[7] । सूक्ष्मेण हि स्थूलं[8] व्याप्यते न स्थूलेन सूक्ष्मम् । स्थूलं च कार्यकरणम्[9] । सूक्ष्म आत्मा । तस्मादिवशब्दः ।

‘ यथा ’ ‘ अग्निर्न ये ’ ‘ चतुरश्चिद्ददमानात् ’ इत्येष समाम्नायानुक्रमः [निघ० ३ । १३] । अत्र[10] ‘ अग्निर्न य ’ इत्यस्य निघण्टुसूत्रस्य[11] ‘ दुर्मदासो न सुरायाम् ’ [निरु० १ । ४] इत्यनेनैव गतार्थतेति मन्यमानाः केचिदत्र निगमं नाधीयते । अपरे पुनः समाम्नायानुक्रमोऽयमिति मन्यमाना एतं[12]मत्र निगममधीयते[13] । ‘अग्निर्न ये भ्राजसा रुक्मवक्षसो[14] वातासो न स्वयुजः सद्यऊतयः । प्रज्ञातारो न ज्येष्ठाः सुनीतयः सुशर्माणो न सोमा ऋतं यते [ऋ० सं० १० । ७८ । २] ॥ भार्गवस्य स्यूमरश्मे[15]रियमार्षम् । मारुती । जगती[16] । अग्निरिव ये

उपमावाचकस्य नेतिनिपातस्योदाहरणम्

---

१ क. ख. °दस्मात्सुनीत°; ग. ज. °दस्मान्स्तुत्यु°. २ ग. ज. °रैवौषधि°. ३ च. °नातितं° त; ठ. °नाततं. ४ क. ख. घ. झ. ट. ठ. ड. सर्वगत्वात्. ५ क. ख. घ. झ. ट. ठ. ड. कार्यकारणसंघातेन; च. कार्यकरणेन° संघाते. ६ ग. ज. घ. झ. ट. ठ. ड. तप्तायःशिलादर्भे°. ७ च. °वदिति° द; घ. झ. ट. ठ. ड. °दिति हि। सूक्ष्मेण°. ८ घ. ट. ठ. ड. स्थूलं च व्या°. ९ क. ख. घ. झ. ट. ठ. ड. कार्यकारणम्. १० क. ख. घ. झ. ट. ठ. ड. ‘ अत्र ’ नास्ति. ११ क. ख. घ. झ. ट. ठ. ड. °ण्टुतन्त्रस्य. १२ घ. झ. ट. ठ. ड. एतमेवं. १३ ग. च. ज. °यते ॥ २२ ॥ अग्नि°. १४ ग. च. ज. घ. ट. ठ. ड. °वक्षसः । भार्गवस्य°. १५ क. ख. त्रसदस्योरि°. १६ ग. च. जगती.

भ्राजिष्णुतया रोचनाः[1] । यथा केचित्प्रकर्षेण[2] रुक्मवक्षसो रोचिष्णूरस्काः मरुतः । किं च वातासो न स्वयुजः सद्यऊतयः । वाता इव स्वयुजः । स्वेन स्वेनानुग्रहेणानुरूपेणानुग्राह्याणां स्तोतॄणां योजयितारो ये ते स्वयुजः । किं तेषाम् । वाता इव ते सद्यऊतयः । शीघ्रगतय इत्यर्थः । किंच । प्रज्ञातारो न ज्येष्ठाः सुनीतयः । यथा केचित्प्रकर्षेण ज्ञातारः[3] सुनीतयः स्युः प्रशस्तया नीत्यान्विता एवमेतेऽपि मरुतः । बलप्रधाना हि ते इत्यतः प्रज्ञावद्भिरुपमीयन्ते । सुशर्माणो न सोमा ऋतं यते । सुसुखाः सुबन्धव इव सन्तु सोमाः सोम्याः ऋतं यते ऋतं यज्ञं कर्तुमिच्छते यजमानाय । य एवंगुणयुक्ता मरुतो भवन्ति तान् वयमभिप्रेतार्थसिद्धये स्तुम इति वाक्यशेषः ।

चिदित्ययमपरो निपात उपमार्थीयो भवति । पुरस्तादप्ययमुक्तः दधिचिदित्युपमार्थे[4] ' [निरु० १ । ४] । इदानीं तु समाम्नायविशेषव्याख्यानावसरप्राप्तस्य[5] छान्दसमुदाहरणमस्य प्रदर्श्यते । कतमत्पुनस्तादिति । उच्यते ॥ १५ ॥[6]

चतुरश्चिद्ददमानाद्बिभीयादा निधातोः । न दुरुक्ताय स्पृहयेत् [ऋ० सं० १ । ४१ । ९] ॥ चतुरोऽक्षान्[7] धारयत इति तद्यथा कितवाद्बिभीयादेवमेव दुरुक्ताद्बिभीयान्न दुरुक्ताय स्पृहयेत्कदाचिदा इत्याकार उपसर्गः पुरस्तादेव व्याख्यातोऽथाप्युपमार्थे दृश्यते । जार आ भगम् । जार इव भगमादित्योऽत्र जार उच्यते रात्रेर्जरयिता स एव भासां तथापि निगमो भवति । स्वसुर्जारः शृणोतु न इत्युषसमस्य स्वसारमाह साहचर्याद्रसहरणाद्वापि त्वयं मनुष्यजार एवाभिप्रेतः स्यात्स्त्रीभगस्तथा स्याद्भजतेर्मेष इति भूतोपमा । मेषो भूतो ३ भि यन्नयः । मेषो मिषतेस्तथा पशुः पश्यतेरग्निरिति रूपोपमा । हिरण्यरूपः स हिरण्यसंदृगपान्नपात्सेदु हिरण्यवर्णः । हिरण्यवर्णस्येवास्य

---

१ घ. झ. ट. ठ. ड. रोचमानाः. २ क. ख. घ. झ. ट. ठ. ड. केनाचित्प्रक°. ३ घ. झ. ट. ठ. ड. ज्ञातारः । ज्येष्ठाः पूज्याः सुनी°. ४ घ. झ. ट. ठ. ड. °दित्ययमुप°; च. 'इति' नास्ति. ५ घ. ट. ठ. ड. °सरे प्राप्त°. ६ क. ख. ३; ग. च. ज. २३; घ. ट. अङ्को नास्ति; ठ. ड. १५ । इति निरुक्तवृत्तौ (ड. निरुक्तभाष्ये) तृतीयाध्याये पञ्चदशः खण्डः. ७ छ. त. द. चतुरश्चिद्धारय°.

रूपं था इति च । तं प्रत्नथा पूर्वथा विश्वथेमथा । प्रत्न इव पूर्व इव विश्व इवेम इवेत्ययमेततरोऽमुष्मादसावस्ततरोऽस्मादमुथा यथासाविति व्याख्यातं वदिति सिद्धोपमा । ब्राह्मणवद् वृषलवत् । ब्राह्मणा इव वृषला इवेति वृषलो[1] वृषशीलो भवति वृषाशीलो वा ॥ १६ ॥

चतुर[3]श्चिद्ददमानात् । मित्रावरुणार्यम्णां तृचे घोरपुत्र एतां गायत्रीमपश्यत् । चतुरोऽक्षान्धारयमाणात्कितवात्कितवो[4] बिभीयात्किमपि पतिष्यते[5] तदन्यद्वा किंचिद्येन मामयं जेष्यतीति । निहितेषु न तथा भयं भवति यथा कितवस्य[6] प्राङ् निधानात् । एवं सर्वदैव दुरुक्ताद्बिभीयात् । उद्विजेदित्यर्थः । तथा तथा वर्तेत यथा यथा दुरुक्तं न शृणुयान्न ब्रूयात् । दुरुक्ते हि वरुणो देवता । तस्मान्न दुरुक्ताय स्पृहयेत्कदाचिदपि । किंतु सूक्तमेव हि शृणुयाद्ब्रूयाच्च । तत्र हि मित्रो देवतार्यमा च ।

चित् इत्यस्योपमार्थे उदाहरणम्

' ब्राह्मणा व्रतचारिणः ' इत्येतदुपरिष्टाद्व्याख्यास्यते ' संवत्सरं शशयाना ' इत्येतस्मिन्मन्त्रे चतुर्दशेऽध्याये [निरु० ९ । ६] ।

'वृक्षस्य नु ते पुरुहूत वयाः' इत्येतत्पुरस्ताद्व्याख्यातम् [निरु० १।४] ।

'आ इत्याकार उपसर्गः' । स पुनरेष 'पुरस्तादेव व्याख्यातः' 'आ इत्यर्वागर्थे' [नि० १ । ३] इति । ' अथापि ' अयमेवाकारः[7] कदाचित् ' उपमार्थे ' अपि ' दृश्यते ' । तद्यथा । ' जार आ भगम् ' इति । किमुक्तं भवति । 'जार इव भगम्' इति । आह । कोऽयमत्र जार इत्युच्यते । " आदित्योऽत्र जार उच्यते ' अस्मिन्मन्त्रे ।

आ इत्ययं कदाचिदुपमार्थे

---

१ छ. त. द. ' वृषलो० शीलो वा ' नास्ति. २ क. ख. ४ (१६); छ. त. १८; द. ५. ३ क. ख. चतुर स्पृहयेत् । मित्रा°; घ. ट. चतुराश्चिद्० स्पृहयेत् । मित्रा°; ठ. ड. चतुराश्चिदिति । मित्रा°. ४ क. ख. °वात् योऽन्यः कितवो बिभी°; ग. ज. °वात् यो बिभी°. ५ क. ख. ट. ठ. ड. यति; °च. पिपिति° प. ६ ग. ज. कितवप्राङ्°. ७ क. ख. घ. झ. ट. ' एव ' नास्ति.

स हि 'रात्रेर्जरयिता'। तदुदये हि रात्रिर्जीर्यति[1]। विपरिणमतीत्यर्थः। 'स एव भासाम्'। चन्द्रादीनां या भासस्ता अपि स एव उद्यन् जरयति[2]।

'उदी॑रय पि॒त॑रा जा॒र आ भग॒मिय॑क्षति हर्य॒तो हृ॒त्त इ॑ष्यति। विव॑क्ति वह्निः॑ स्वप॒स्यते॑ म॒खस्त॑विष्य॒ते असु॑रो॒ वेप॑ते म॒ती' [ऋ० सं० १०।११।६]॥

आ इत्यस्योपमार्थे उदाहरणम्

अङ्गपुत्रो[5] हविर्धान एतया जगत्या अग्निमस्तौत्। पितृमेधे विनियुक्ता। हे भगवन्नग्ने सर्वगतं सन्तमविशेषस्थ[6]मात्मानं विशेषात्मलाभाय उदीरय उद्गमयैवारणी पितरौ प्रति। अथवा द्यावापृथिव्यौ पितरौ स्यातामहोरात्रे वा। ते प्रति विशेषात्मलाभायोपज्वलय त्वमात्मानम्। कथं च पुनरुदीरय। जार आ भगम्। जार इव भगम्। जार आदित्यो यथा भगं भजनीयं भौममान्तरिक्षं च रसं स्वं वा ज्योतिरूर्ध्वमीरयत्येवं त्वमात्मानं पितरौ प्रत्युदीरय। कस्मात्पुनरेवमादरवान्ब्रवीमि। यस्मादेष यजमानः इयक्षति यष्टुमिच्छति देवान्हर्यतः हवींषि प्रेप्सतः। न च त्वदृत इज्यां[8] शक्येयम्। त्वमेव हि प्रतिविशिष्टं यज्ञसाधनम्। सर्वमन्यत्त[9]वैव गुणभूतम्। किंच। अयं यजमानो हृत्तः हृदयेन इष्यति इच्छत्यात्मनोऽभिलषितान्कामान्। न च देवाननिष्ट्वा शक्यास्ते प्राप्तुमित्यतो ब्रवीमि देवयागाय यजमानकामप्राप्तये चोदीरय त्वमात्मानमिति। किंच। अयमपि वह्निः यज्ञवोढा होता स्वपस्यते यजमानायाभीष्टकामोपपिपादयिषया देवतितर्पयिषया च तत्तृप्तये[9] जगदनुग्रहाय च ऋत्विग्भिः कर्म क्रियमाणमिच्छते[10] विवक्ति[11]। अतो ब्रवीम्यात्मानमभ्युदीरय पितरौ प्रति विशेषात्मलाभाय। किंच। मखस्तविष्यते[12]

---

१ क. ख. घ. झ. ट. ठ. ड. जीर्यते. २ ग. च. ज. जरयति। २४। उदी°. ३ घ. ट. पितरा०वेपते मती. ४ ग. ज. भगम्। अङ्ग°. ५ क. ख. अङ्गिरःपुत्रो; ठ. ड. आङ्गिरस अङ्ग°. ६ क. ख. घ. झ. ट. ठ. ड. °मशेषस्थ°. ७ च. 'द्यावा' नास्ति. ८ क. ख. घ. शक्येज्येयम्; ग. ज. °दृते ज्या श°; झ. शक्येज्येयम्। इत्या शक्यते पाठः। त्वमे°; ट. शक्येज्येय° इज्या शक्यते इति पाठान्तरम्. ९ क. ख. ग. ज. घ. झ. ट. ठ. ड. 'तत्' नास्ति. १० क. ख. ग. ज. घ. झ. ट. ठ. ड. °मिच्छति विवक्ति च। अतो°. ११ च. विवक्ति मखः सांनाय्यं। अभ्युदीरिते पितरौ प्रति°. १२ च. 'किंच। मखः' नास्ति; ट. मख° मखः सान्नाय्यं इति पाठान्तरम्.

परिसमाप्तिं यास्यत्युपक्रमादारभ्यापवर्गात् । अतो ब्रवीम्युदीरय त्वमात्मानमिति । किंच । अयमप्यध्वर्युः असुरः[1] असुमान्प्रज्ञावान् अतिकुशलोऽस्मिन्यज्ञकर्मणि वेपते मती मत्या वेपते प्रोत्कम्पमानहृदय आस्ते सादरः प्रह्वीभूतोऽपि नामायमुदीरयेदात्मानं ततोऽहमेनं यज्ञकर्म तनुयामिति । अतो ब्रवीम्युदीरय त्वमात्मानमिति । अपि वा असुरो ब्रह्मा । स हि त्रयीविद्योपजनितप्रज्ञानः । अपि वोद्गाता असुरः । स हि प्राणेनासुना तद्वान् । उद्गानस्य[2] प्राणवृत्त्यधीनत्वाद्विशेषणम् । अपि वा यज्ञाधिदैवतैवान्वादिश्येतासुर[3] इत्यनेन तस्या आनन्तर्यात् । अपि वा सर्व एवैते यजमानादयोऽन्वादिश्येरन् सर्वेषां प्रकृतत्वादसुराः[4] । असुरो वेपत इति सर्व एते यजमानादयोऽसुमन्तो मतिभिर्[5]वेपन्ते प्रोत्कम्पमानहृदया आसते युष्मदात्मोदीरणप्रतीक्षा अपि नामायमग्निरुदीरयेदात्मानं ततो नोऽभिप्रेतार्थसाफल्यं स्यादिति । अतो ब्रवीम्युदीरय त्वमात्मानमरण्यादीनां पितॄणामन्यतमौ पितरौ प्रति । अपि वैतावेव पितरौ दम्पती यजमाना[6]वग्न्याधेयेन तव जननसंबन्धेन पितरौ । हे भगवन्नग्ने तावेतौ यज्ञफलविपरिणामकाल एतस्मिन्प्रत्युपस्थिते देवयानेन वा पितृयानेन वा मार्गेणोदीरयोद्गमय यथाप्रार्थितफलप्राप्तये । समानमन्यदृक्शेषं पूर्वेणैवार्थेन ।

असुर इति कोऽभिधीयते

अग्नेः कौ पितरौ

यथादित्यो जारशब्देनोच्यते ‘ तथापि ’ अयं ‘ निगमो भवति ’ इति[7] । अन्येऽपि बहवः इत्यपिशब्दैः[8] । ‘ मातुर्दिधिषुमब्रवं स्वसुर्जारः शृणोतु नः । भ्रातेन्द्रस्य सखा मम ’ [ऋ० सं० ६ । ५५ । ५] ॥ एषा गायत्री । भरद्वाजस्यार्षम् । ‘ एहि वां

अस्यामृच्यादित्यो जारः

१ ग. च. ज. ‘ असुरः ’ नास्ति. २ क. ख. घ. झ. ट. ठ. ड. उद्गावृत्वस्य. ३ क. ख. घ. ट. °दिश्यतेऽसुर°. ४ क. ख. झ. असुरः असुराः वेपते वेपन्त इति । सर्व°; घ. ट. ठ ड. असुरा वेपते वेपन्त इति । सर्व°. ५ ग. ज. सुमतिभि°; च. सुमतिभि. ६ क. ख. घ. झ. ट. ठ. ड. पत्नीयजमाना°. ७ क. ख. घ. °वति । अथान्ये°; झ. °वति । यथान्ये°; ट. °वाते । अथान्ये° इत्य. ८ ग. च. ज. °शब्दः । २५ । मातु°.

विमुचो नपादाघृणे ' [ऋ० सं० ६ । ५५] इत्येतस्मिन्पौष्णे सूक्ते । मातुः दिधिषुम् । माता रात्रिरादित्यस्य । स हि भगवान् रात्र्या जघने प्रातरुदेति कुमार इव स्त्रियाः प्रसवकाले । तेन ज्ञायते रात्रेरेवासौ जायत इति । अतो रात्रिर्माता । तस्याः स एवं धारयिता रोद्धा । तं मातुर्दिधिषुं धारयितारमहम् अब्रवम् उक्तवानस्मि यन्मेऽभिप्रेतम् । स एव चादित्यो मम सखा समानख्यानः । यथैवाहमेतस्मिन्यज्ञे जगदनुग्राहके कर्मण्यभिप्रवृत्त एवमसावपि तापप्रकाशपाकरसादानवर्षादिलक्षणे कर्मणि जगदनुग्राहकेऽभिप्रवृत्त इत्येतस्मादावयोः समानख्यानत्वम् । स य एवं मम समानख्यानो मध्यमस्य च इन्द्रस्य भ्राता उदकभागहर्ता । अथवा मध्यमस्यैवोदकेन भर्तव्यः । तेन ह्यसौ दीप्यते । स पुनः किं करोतु । यच्च पूर्वमहमब्रवं तच्च साधयतु यच्च सांप्रतं वयं ब्रूमस्तच्च शृणोतु नः । श्रुत्वा तदपि साधयत्वित्यभिप्रायः ।

आदित्यस्य होतुश्च कीदृशं सख्यम्

स्वसुर्जार इत्येतस्मिन्मन्त्रे स्वसृशब्देन मन्त्रदृक् ' उषसमाह ' । आह । केन पुनः सामान्येनेति । उच्यते । ' साहचर्याद्रसहरणाद्वा ' । भ्राता स्वसा सार्कं बाल्ये नित्यमेव चरति तथा चोषसा साकमादित्य इत्येतत्सामान्यम् । आदित्यो हि पूषा । ' अथ यद्रश्मिपोषं पुष्यति तत्पूषा भवति ' इति हि वक्ष्यति [निरु० १२ । १६] । तस्मात्पौष्णे एतस्मिन्मन्त्रे जारत्वमेतदादित्यस्य दर्शितम् । रसहरणाद्वोषाः स्वसास्यादित्यस्य । भ्रातृस्वस्रोः सहभोजनाभिप्रायं सामान्यम् ।

आदित्यस्य का स्वसा कथं च

---

१ ग. च. ज. तस्य. २ क. ख. घ. झ. ट. ठ. ड. °त्तम् । यत एवं°. ३ क. ख. घ. झ. ट. ठ. ड. °ख्यानः अतो मध्य°. ४ क. ख. घ. झ. ट. ठ. ड. °णोतु । श्रुत्वा च तद्°. ५ घ. झ. ट. ठ. ड. अथ केन°. ६ ग. च. ज. °चर्याद्वा रस°. ७ घ. झ. ट. ठ. ड. °दित्योऽपि हि°. ८ ट. अथर्वाद्र° य; ठ. ड. अथवा रश्मि°. ९ क. ख. घ. झ. ट. °स्मात्पूष्ण ए°. १० च. °रत्वमित्येतदा°. ११ क. ख. घ. झ. ट. ट. ड. ' अस्य ' नास्ति. १२ क. ख. घ. झ. ठ. ड. संभोज°; ट. संभोज° सह.

'अपि त्वयं मनुष्यजार एवाभिप्रेतः स्यात्' । अप्यादित्यस्त्वपि मनुष्यजारः पारजायिक इत्यपिशब्दः । अयमेवास्मिन्मन्त्रे 'उदीरय पितरा जार आ भगम्' इत्यभिप्रेतो मन्त्रदृशो नैरुक्तानां वा स्यात् । 'तथा' पुनः सति 'स्त्रीभगः' एव 'स्यात्' । भगः 'भजतेः' सेवनार्थस्य [धा० १ । १०२३] । स हि सेव्यते मैथुनार्थिभिः पुरुषैः । जारो मनुष्यः । स हि परकीयां स्त्रियं भोगेन सर्वाङ्गिकेण निर्दयो भूत्वा जरयति विपरिणामयति म्लानरूपां करोति न तथा निजो भर्ता । तं च दृष्ट्वा तद्दर्शनेनैवोदीरितै एव स्त्रिया भग उपस्थः पुरुषशिश्नसंप्रयोगोत्कण्ठतयार्द्रीभवति । तथैवमरणियोक्त्रादिहस्तानस्मान्युष्मन्निममथिषून्दृष्ट्वोदीरय त्वमात्मानं हे भगवन्नग्ने इत्येवं योज्यं जारशब्दे मनुष्यविषये सति ।

अत्र जारशब्देन मनुष्यजार एवाभिप्रेतः स्यान्नादित्यः

'मेष इति भूतोपमा' । मेष इत्येषा भूतशब्देनोपमा । 'मेषो भूतोऽभि यन्नयः' इत्येष निगमः । निगमप्रसक्तमुच्यते । 'मिषो मिषतेः' दर्शनार्थस्य । पर्यायप्रसक्तमुच्यते । 'तथा पशुः पश्यतेः' इति । पश्यति ह्यसौ । 'इत्था धीवन्तमद्रिवः काण्वं मेध्यातिथिम् । मेषो भूतोऽभि यन्नयः' [ऋ० सं० ८ । २ । ४०] ॥ काण्वस्यैव मेधातिथेरार्षम् । ऐन्द्री गायत्री । हे अद्रिवः अद्रिवन् वज्रिन् इत्था अमुना प्रकारेण मेषो भूतः । 'इत्थम्' अनेन शब्देनामुनेत्येतच्छब्दपर्यायवाचिनाभिगमनप्रकारमेतस्मादेव मन्त्रदृग्दर्शनाद्विज्ञायाभिनयेन मन्त्रदृग्वर्तमानः काण्वो मेधातिथिर्दर्शयति । हे अद्रिवन् एवमन्यैकल्पान्त-

भूतोपमाया उदाहरणम् ।

१ क. ख. घ. झ. ट. ठ. ड. 'तु' नास्ति. २ च. °ङ्गिकेन. ३ क. ख. घ. झ. ट. ठ. ड. दृष्टान्नदर्शनेनैवो°. ४ क. ख. घ. झ. ट. °वोदीरय । यथैव स्त्रिया°; ठ. ड. °वोदीरित एव । यथैव स्त्रिया°. ५ ग. ज. ठ. ड. °योगात्कण्ठ°; घ. झ. °योगात् आर्द्री°; ट. योगात् ˇ आर्द्री° कण्ठतया. ६ ग. च. ज. ह्यसौ ॥ २६ ॥ इत्था°. ७ ग. च. ज. °द्रिवः । काण्व°; घ. झ. ट. °द्रिवः० भि यन्नयः; ठ. ड. ऋङ् न पठ्यते. ८ क. ख. ग. ज. मेध्याति°; च. मेध्यौति° धा. ९ क. ख. घ. झ. ट. ठ. ड. °तिथेरियमार्षम्. १० च. कण्वो. ११ ग. ज. मेध्याति°; च. मेध्यौति° धा. १२ घ. झ. ठ. °मन्यत्कल्पा°.

रीणमेव मेध्यातिथिं[1] धीवन्तं[2] कर्मवन्तं प्रज्ञावन्तं वा अभियन्[3] आहूतो याज्ञे कर्मण्याभिमुख्येनाभ्युद्यतैर्महद्भिर्दायैः यन् गच्छन् आह्वानसमनन्तरमेवाविलम्बमानो मेषो भूतो मेष इव किंचिदप्युत्तरमब्रुवन् तं गौरवावनतमित्था अनेन प्रकारेण अयस्त्वम् आप्तवानसि । न च तदस्माकमप्रत्यक्षम् । एतस्मादेव मन्त्रदर्शनादखिलं तद्विजानीमो वयं यतोऽतो[4] ब्रूमः । अपवृत्ते तस्मिन्काण्वे मेध्यातिथौ सहान्यमन्वन्तरीणैरधिकारिभिरिदानीमस्य मनोरन्तरेऽन्य[5]मेधातिथिप्रापकेण कर्मणा मेधातिथि[6]पदं तदहं प्राप्तवान् । सोऽहं ब्रुवे । यास्ताः काण्वमेधातिथि[7]द्वारेण स्तुतयो नित्याः प्रादुर्भवन्ति ता[8] एताः सांप्रतमपि वर्तन्ते । स त्वमेताः शुश्रूषुर्हवींषि चास्मत्प्रत्तानि प्रतिजिघृक्षुः पूर्वकाण्वमेधातिथिवदस्मानप्यभ्येहि किमर्थं वा नाभ्येषीत्यभिप्रायः ।

रूपोपमाया उदाहरणम्

‘ अग्निरिति ’ एषा “ रूपोपमा[9] ” । ‘हिरण्यरूपः स हिरण्यसंदृगपां[10] नपात्सेदु हिरण्यवर्णः । हिरण्ययात्परि योनेर्निषद्या हिरण्यदा ददत्यन्नमस्मै ’ [ऋ० सं० २ । ३५ । १०] ॥ गृत्समदस्येयमार्षम् । त्रिष्टुप् । अपांनपा[11]द्देवता । कुम्भेष्टकोपधानेऽग्निचयने विनियुक्ता [मैत्रा० सं० २ । १३ । १ ।] । हिरण्यरूपः हिरण्यसमानरूपः । अपि च । सः अपांनपात् मध्य[12]स्थानो वैद्युतोऽग्निरादित्यस्य पुत्रोऽपां नप्ता । प्रावृट्काले घर्मार्तानां प्रजानामन्नार्थिनीनां च हिरण्यसंदृक् हिरण्यमिव संदृश्यमानः प्रीतिजनकः । अपि च । स एव हिरण्यवर्णः हिरण्यमिव वरणीयः प्रार्थनीयो भूतानाम् । य एवंगुणयुक्तोऽपांनपात्स किं करोतीति । हिरण्य[13]यात्तेजोमयात् योनेः आदित्याख्या[14]द्विनिर्गम्य परिनिषद्य

---

१ च. मेध्याति° धा. २ ग. ज. धीमन्तं. ३ ठ. ड. अभिनयन्. ४ च. ‘ अतो ’ नास्ति. ५ क. ख. घ. झ. ट. ठ. ड. ‘ अन्य ’ नास्ति. ६ ग. ज. मेध्याति°; च. मेध्याति° धा°. ७ ग. ज. घ. झ. ट. ठ. ड. मेध्याति°; च. मेध्याति° धा. ८ घ. झ. ट. ठ. ड. ‘ ताः ’ नास्ति. ९ ग. च. ज. °पमा ॥ २७ ॥ हिर°. १० ग. च. ज. घ. ट. ठ. ड. °संदृगिति । गृत्स°. ११ क. घ. झ. ठ. अपान्नपात्. १२ घ. ढ. ठ. ड. मध्यमस्था°. १३ घ. ट. ठ. हिरण्मया°; ठ. ड. अस्मात्पदात्प्राक् ‘ हिरण्ययात्परि ’ इत्यर्धर्चं पठ्यते. १४ क. ख. घ. ट. आदित्याद्विनिर्गत्य (घ. ट. °गम्यत्य).

सर्वतो[1] निषद्य मध्यस्थाने व्याप्यान्तरिक्षलोकमभ्रजालेन। हिरण्यदाः इत्येकं पदं विसर्जनीयान्तम् । हिरण्यदाः हिरण्यदाता । सोऽपांनपात् परिनिषद्य ददाति दे[2]दातु अन्नम् अन्नहेतु उदकम् अस्मै यजमानायेति । 'समुद्रादूर्मिर्मधुमाँ उदारदित्यादित्यमुक्तं मन्यन्ते' [निरु० ७ । १४] इत्येतस्माद्दर्शनादपां पुत्र आदित्यः 'आदूतो अग्निमभराद्विवस्वतः' [ऋ० सं० ६ । ८ । ४] इत्यत[3]श्चादित्यस्यापि वैद्युतोऽग्निः पुत्र इत्येवमसावपांनपात् अपां नप्ता ।

'था' इत्ययं चौ[4]पमाशब्दः । आह । किमुदाहरणम् । उच्य[5]ते । 'तं प्रत्नथा पू[6]र्वथा विश्वथेमथा ज्येष्ठतातिं बर्हिषदं स्वर्विदम् । प्रतीचीनं वृजनं दोहसे गिराशुं जयन्तमनु यासु वर्धसे' [ऋ० सं० ९ । ४७ । १] ॥ अवत्सा[7]रः पञ्चदशर्चं सूक्तमपश्यद्वैश्वदेवम् । तस्मिन् वैश्वदेवे सूक्ते प्रथमामेवैतां जगतीमपश्यत् । वैश्वदेवेषु च सूक्तेष्वेकदेवता अपि मन्त्रा भवन्त्येव । बाह्वृच्ये वाजपेये सप्तदशे शस्त्रे विनियुक्तेयम् [आश्व० श्रौ० ९ । ९ । ११]। चरकाध्वर्यवः पुनरनया मन्थिनं गृह्णन्ति [मैत्रा० सं० १ । ३ । ११] । तेषां पुनः श्रुतिः । 'प्रजापतेर्वा एते चक्षुषी यच्छुक्रामन्थिनावसावादित्यः शुक्रश्चन्द्रमा मन्थी' [मैत्रा० सं० ४ । ६ । ३ ॥ काठ० सं० २७ । ८] इति । एवं चन्द्र[8]दैवतोऽयं मन्त्रः । अपि वा 'तस्मै सूर्याय सु[9]तमाजुहोत' [मैत्रा० सं० १ । ३ । १२] इति हवनमन्त्रे सूर्यश्रवणात्सूर्यदै[10]वतोऽयम् । शौनकस्तु दाशतये समाम्नाये मन्त्रदेवता अनुक्रममाणः 'को नु वां मित्रावरुणौ' [ऋ०सं० ५ । ४१] इत्यत आरभ्य 'वैश्वदेवान्येकादशसूक्तानि' [बृहद्दे० ५ । ३६] [11]इत्यवोचत् । तेषां 'तं प्रत्नथा' इत्येतच्चतुर्थं सूक्तम् ।

अस्य मन्त्रस्य तासु तासु शाखासु भिन्ना भिन्ना देवताः

देवताविषये शौनकमतम्

---

१ घ. ट. ठ. ड. 'सर्वतो निषद्य' नास्ति. २ घ. ट. ठ. ड. दद्दाति. ३ घ. ट. ठ. ड. 'च' नास्ति. ४ च. वोपमा°. ५ ग. च. ज. उच्यते ॥ २८ ॥ तं°. ६ ग. च. ज. ठ. ड. पूर्वथा विश्वथेमथेति । अव°; घ. ट. पूर्वथेति । अव°, ७ ठ. ड. °त्सारऋषिः पञ्च°, ८ ग. ज. चन्द्रदेव°. ९ क. ख. घ. झ. ट. ठ. ड. हविराजु°. १० क. ख. ग. ज. सूर्यदेव°. ११ क. ख. घ. ट. ठ. ड. 'इति' नास्ति.

तेन तन्मत्या वैश्वदेव एष मन्त्रः स्यात् । वाजसनेयिनां पुनरनया शुक्रो गृह्यते [वा० सं० ७ । १२ । शत० ब्रा० ४ । १ । ६ । ९] । स च 'सा प्रथमा संस्कृतिः' इत्यनेनैन्द्रेण हूयते [शत० ब्रा० ४ । १ । ६ । २७] । तेन तेषाम[1]प्यैन्द्र एव । चारके पुनराध्वर्यवे श्रुतिः शुक्रामन्थिनोः । 'तस्मा[2]देताव[3]न्यदेवत्यौ गृह्येते अथेन्द्राय हूयेते' [मैत्रा० सं० ४ । ६ । ३] इति । तेन[4] ज्ञायते यद्यपि हवनमन्त्र ऐन्द्रो[5] मन्थिनस्तथापि ग्रहणमन्त्रो नैन्द्र इति । स एष सर्वथाप्येवं दुरवधारदेवतो मन्त्रोऽनिरुक्तदेवतालिङ्गत्वात् । शण्डामर्कयोस्त्वसुरपुरोधसोः संमोहनार्थमनेनानिरुक्तदेवतालिङ्गेन मन्त्रेणान्यतरः शुक्रामन्थि[6]नोर्गृह्यते । 'शण्डामर्कौ वा असुराणां पुरोहितावास्ताम्' इत्युपक्रम्य 'तावेतौ शुक्रामन्थिनावव[7]ृणाताम्' इत्युक्त्वा 'तावपनुद्याथेन्द्रायाजुहवुः' [मैत्रा० सं० ४ । ६ । ३] इत्युक्तम् । तस्मात्तावनेनानिरुक्तदेवतालिङ्गेन मन्त्रेण संमोह्येते । सौम्यो वा स्यादयम् । सोमो ह्युच्यते मन्थिपात्रेण शुक्रपात्रेण गृह्यमाणो गृहीतो वा सप्तदशशस्त्रशंसनाभिप्राये[8]र्ण । हे भगवन् सोम तमिन्द्रं वा वैश्वदेवं गणं वा ज्येष्ठराजं ज्येष्ठदीप्तिम् । अथवा ज्येष्ठः श्रेष्ठः सर्वेषां देवानामिन्द्रः स यस्य राजा सोऽयं ज्येष्ठराट् वैश्वदेवगणस्तं ज्येष्ठराजम् । बर्हिषदम् । बर्हिष्याहूतो यज्वभिर्यः सीदति स बर्हिषत् तं बर्हिषदम् । स्वरिव यो दृश्यते सः स्वर्दृक्[9] तं स्वर्दृशम् । सूर्यसमानदर्शनमित्यभिप्रायः । आशुं शीघ्रं जयन्तं जेतव्यानसुरादीन् । तमेवंगुणसंयुक्तमिन्द्रं वैश्वदेवं वा गणं हे सोम यां[10]सु यास्वनुवर्धसे पुनः पुनः संस्क्रियसे स त्वं क्रियासु तासु तास्[11]ववस्थितस्त्वं गिरा स्तुत्या सहितस्त्वं प्रतीचीनं यज्ञाभिमुखमिन्द्रं वैश्वदेवं वा गणमवस्थाप्य स्ववीर्येण तर्पयित्वास्मै यजमानाय वृजनं[12] धनं दोहसे धोक्षि प्रक्षारयसि । क[13]थं पुनर्धोक्षीन्द्रं वैश्वदेवं वा गणम् । प्रत्नथा

---

१ क. ख. घ. ढ. ठ. ड. °मप्ययमैन्द्र°. २ ग. ज. तस्मादेव तौ अन्य°; ठ. ड. तस्मादेव तावन्य°. ३ क. ख. घ. ट. ढ. ड. °वन्यदेवतौ गृ°; ग. च. ज. °वन्यदैवत्यौ. ४ ग. च. ज. तेन न ज्ञा°. ५ ग. च. ज. °मन्त्र एव ऐन्द्रो. ६ ग. ज. घ. ट. ठ. ड. °मन्थिनो गृह्य°. ७ सर्वेषु पुस्तकेषु 'आवृणेथाम्' इति पाठः । 'अवृणाताम्' इति मैत्रायणीपाठः. ८ ठ. ड. °प्रायेण' इत्यनन्तरं सर्वा ऋक् पठ्यते. ९ ठ. ड. स्वर्दृशः. १० च. 'यासु' सकृदेव. ११ घ. ट. तास्वेव स्थि°. १२ ग. च. ज. वृजिनं. १३ घ. ट. ठ. ड. कथं च पुनः.

चिरन्तना इव । ये महर्षयो भृग्वादयस्तेषां यथा दुग्धवानसि तथास्माकमपि धोक्षि । अपि च । पूर्वेषां स्रष्टॄणां यथा दुग्धवानसि तथास्माकमपि धोक्षि[1] । अपि च । विश्वथा ऋषिपुत्रकाणामृषीणां च सर्वेषां यथा दुग्धवानसि तथास्माकमपि धोक्षि । अपि च । इमथा यथा वर्तमानकालीनानां यजमानानां धोक्षि तथैवास्माकमपीति । एवमेष यथाभिमतदैवतं योज्यः ।

इमथेत्येतस्मात्प्रसक्तमुच्यते । ‘ अयम् ’ इत्यस्य शब्दस्य का व्युत्पत्तिरिति । ‘ एततरः ’ ह्यागततर आसन्नतरो यः[2] ‘ अमुष्मात् ’ दूरस्थाद्भवति सोऽयमित्युच्यते । आह । ‘ असौ ’ इत्यस्य का व्युत्पत्तिरिति । उच्यते । ‘ असावस्ततरोऽस्मात् ’ क्षिप्ततर इव विप्रकृष्टत्वाद्भवति । आह । कुतः क्षिप्ततरः । उच्यते । ‘ अस्मात् ’ एततरात् । असावित्येतस्मात्प्रसक्तमुच्यते । ‘ अमुथा यथासाविति व्याख्यातम् ’ । अमुथेत्येतद्यथासावित्यनेन व्याख्यातम् । य एवार्थोऽसावित्यनेन शब्देनोक्तो भवति स एवार्थोऽमुथेत्यनेनाप्युक्तो भवति ।

‘ वदिति ’ एषा ‘ सिद्धोपमा ’ । सिद्धैवैषोपमा लोके । आह । कथं कृत्वा । उच्यते । ‘ ब्राह्मणवद्वृषलवत् ’ । ब्राह्मणवदधीते वृषलवच्चाक्रोशतीति[3] । छान्दसमुदाहरणं ब्रवीति ॥ १६[4] ॥

प्रियमेधवदत्रिवज्जातवेदो विरूपवत् । अङ्गिरस्वन्महिव्रत प्रस्कण्वस्य श्रुधी हवम् [ऋ० सं० १ । ४५ । ३] ॥ प्रियमेधः प्रिया अस्य मेधा यथैतेषामृषीणामेवं प्रस्कण्वस्य शृणु ह्वानं प्रस्कण्वः कण्वस्य पुत्रः कण्वप्रभवो यथा प्राग्रमर्चिषि भृगुः संबभूव भृगुर्भृज्यमानो न देहेऽङ्गारेष्वङ्गिरा अङ्गारा अङ्कना अञ्चना[5] अत्रैव तृतीयमृच्छतेत्यूचुस्तस्मा-

---

१ क. ख. ग. ज. ‘अपि० धोक्षि’ नास्ति. २ क. ख. च. ट. ठ. ड. ‘ यः ’ नास्ति. ३ क. ख. °शतीति ॥ ४ ॥ छा°; ठ. ड. °शतीति ॥ १६ ॥ इति निरुक्तभाष्ये (ड. नैरुक्तभाष्ये) तृतीयाध्याये षोडशः खण्डः । छा°. ४ ग. च. ज. २९ (१८); इतरेष्वङ्को नास्ति. ५ छ. त. द. ‘ अञ्चना ’ नास्ति.

दत्रिर्न त्रय इति विखननाद्वैखानसो भरणाद्भारद्वाजो विरूपो नानारूपो महिव्रतो महाव्रत इति ॥ १७[1] ॥

इति तृतीयाध्यायस्य तृतीयः पादः ॥[2]

' प्रियमेधवत् ' इति । एषा प्रस्कण्वस्यार्षम् । अनुष्टुप् । आग्नेयी । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १३ । ७] । हे जातवेदः महिव्रत महाव्रत महाकर्मन् । महद्व्रयस्य भगवतोऽग्नेर्जातवेदसः कर्म हविर्वहनादिलक्षणम् । तेनैवमामन्त्र्यते महिव्रतेति । यथैतेषामृषीणां प्रियमेधादीनां श्रुतवानसि पूर्वमाह्वानं शृणोषि वैवं ममापि प्रस्कण्वस्य शृण्वाह्वानमित्याशीः । एष[3] समस्तार्थः ।

सिद्धोपमाया उदाहरणम्

अथैकपदनिरुक्तम् । ' प्रियमेधः प्रिया अस्य मेधाः ' । यज्ञाः इत्यर्थः । यष्टुमिति वाक्यशेषः । ' प्रस्कण्वः कण्वस्य पुत्रः ' । प्रशब्दस्य तद्धितार्थत्वं निराह ' कण्वप्रभवः ' । कण्वस्यापत्यमित्यर्थः । ' यथा ' प्रगतमग्रं ' प्राग्रम् ' इत्युच्यते गतशब्दलोपं कृत्वैवमिहापि ' कण्वप्रभवः ' इति वक्तव्ये भवशब्दलोपं कृत्वा व्यत्ययेन च प्रस्कण्व इत्युक्तम् । ' भृगुर्भृज्यमानो न देहे ' । प्रजापतिना किल शुक्रमात्मीयमादायाग्नौ हुतम् । ततः ' अर्चिषि ' ज्वालायां भृगुः ' नाम महर्षिः ' संबभूव ' । व्यपगतेऽर्चिषि ' यः अङ्गारेषु ' संबभूव सोऽङ्गिरा नामाभवत्[4] । विग्रहप्रसक्तमुच्यते । ' अङ्गारा अङ्कनाः ' । ते हि यत्र निधीयन्ते[5] तदङ्कितं भवति । तस्मिन्नुत्पन्ने द्वितीये ' अत्रैव तृतीयमृच्छतेत्यूचुः ' ये पूर्वोत्पन्नास्ते । ' तस्मात् ' अत्रैव तृतीय इत्येतस्मादनुव्याहारात् ' अत्रिः ' अभवत् । अथवैवमन्यथा स्यात् । अत्रिः । प्रतिषेधार्थोऽत्राकारः । कथम् । ' न त्रयः ' एवात्र । किं तर्हि । खन्यतामेतदग्निस्थानं चतुर्थोऽप्यत्र भविष्यतीत्येवमनुव्याहारादत्रिरभवत् । व्युदुह्याग्निं तस्मिन्नग्निस्थाने खाते य उत्पन्नः सः ' विखननाद्वैखानसः ' एवं[6] नाम्ना अभूत् बभूव । 'अर्चिःषु[7] अङ्गारेषु

---

१ क. ख. द. ५; छ. त. १९. २ ड. थ. ध. ' इति॰ पादः ' नास्ति; छ. इति तृतीयः; त. इति तृतीयाध्याये तृ॰; द. इति नैरुक्तस्य तृ॰. ३ घ. ट. ठ. ड. एवं. ४ च. नामा भवति॰ म. ५ घ. ट. ठ. ड. ' नि ' नास्ति; च. यत्र धीय॰न्ति. ६ क. ख. ग. ज. एव. ७ ग. ज. अर्चिषि.

अत्रैव तृतीयं विखननाद्वैखानसः' इत्यनयैवानुपूर्व्यैतानि निर्वचनान्युपपादयितुं शक्यन्ते । तस्मान्मन्त्रपाठविपर्यासेनैतानि निरुक्तानि । 'विरूपो नाना[1]रूपः' इति[2] ऋज्वेव । 'महिव्रतो महाव्रत इति' अर्थः । व्रतमिति कर्मनाम ॥ १७ ॥

[3]इति निरुक्तवृत्तौ अष्टमाध्यायस्य तृतीयः पा[4]दः ॥

अथ लुप्तोपमान्यर्थोपमानीत्याचक्षते सिंहो व्याघ्र इति पूजायां श्वा काक इति कुत्सायां काक इति शब्दानुकृतिस्तदिदं शकुनिषु बहुलं न शब्दानुकृतिर्विद्यत इत्यौपमन्यवः काकोऽपकालयितव्यो भवति तित्तिरिस्तरणात्तिलमात्रचित्र इति वा कपिञ्जलः कपिरिव जीर्णः कपिरिव जवत ईषत्पिङ्गलो वा कमनीयं शब्दं पिञ्जयतीति वा श्वाशुयायी शवतेर्वा स्याद्गतिकर्मणः श्वसितेर्वा सिंहः सहनाद्धिंसेर्वा [5]स्याद्विपरीतस्य संपूर्वस्य वा हन्तेः संहाय[6] हन्तीति वा व्याघ्रो व्याघ्राणाद्व्यादाय हन्तीति वा ॥ १८ ॥

'अथ लुप्तोपमान्यर्थोपमानीत्याचक्षते' । उपमाधिकारो वर्तते । '[7]यदेतत्तत्सदृशमिति' [निरु० ३ । १३] इत्येतदुपक्रान्तम् । तत्र शब्दवत्यश्चोपमा भवन्ति लुप्तोपमाशब्दाश्चे[8]ति । तत्र 'अग्निर्न ये' इत्येवमादिभिः शब्दैरुपमिस्सि[9]तानामर्थानां समान-

अर्थोपमालक्षणम्

रूपैरर्थैरुपमानं क्रियत इत्येतदनुक्रान्तम् । अथेदानीं येषु पदेषु लुप्यन्ते उपमाशब्दा इवादयस्तान्यवसरप्राप्तानि व्याख्यास्यामः । तानि पुनरे[10]तान्यर्थोपमानीत्येवमा-

---

१ ग. ज. °विरूपो नाम इति°. २ क. ख. ५; ग. १९; इतरेष्वङ्को नास्ति. ३ ग. च. ज. 'इति निरुक्तवृत्तौ' नास्ति; ठ. इति निरुक्तवृत्तौ तृतीयाध्याये सप्तदशः खण्डः ॥ १७ ॥ आदितो निघण्टुमारभ्याष्टमाध्यायस्य तृतीयः पादः. ४ ड. पादः । इति निरुक्तभाष्ये तृतीयाध्याये सप्तदशः खण्डः. ५ छ. त. द. 'स्यात्' नास्ति. ६ क. ख. द. १; छ. त. २०. ७ क. ख. घ. ट. ठ. ड. यदेत°. ८ क. ख. ग. ज. 'इति' नास्ति. ९ ग. °मित्सि–ताना°; ज. °मित्सिनिताना°; च. °मिमीषिताना °त्सि. १० क. ख. घ. ट. ठ. ड. °पुनरिमान्य°.

चक्षत आचार्याः । निरूढा ह्रीयं तेषु संज्ञेत्यभिप्रायः । तानि च पुनरसमाम्नातान्येव निघण्टुसमाम्नाये । तेषु वक्तुरभिप्रायगता एत एवोपमाशब्दा अर्थतो लिङ्ग्यन्त इत्यर्थोपमा इत्युच्यन्ते । तान्येतानि भाष्यस्य विस्तरविषयत्वादसमाम्नातान्यपि सन्त्यवसरप्राप्तानि प्रदर्श्यन्ते । तद्यथा ।

पूज्यवाचकान्युपमानानि

' सिंहो व्याघ्र इति पूजायाम् ' । यो हि पूज्यो भवति स उच्यते सिंहो देवदत्त इति । अत्र न सिंह एव देवदत्तः । किं तर्हि । सिंहगुणस्तत्र कश्चिदस्ति शौर्यादिः[1] । तदभिधानीयं वाक्यं कृत्वोपमाशब्दानामिवादीनामन्यतममनुच्चारयन्नेव[2] ब्रवीति ' सिंहो देवदत्तः ' इति । यत्तदनुच्चारणमुपमाशब्दस्य स एव लोप इत्युच्यते ।

कुत्सावाचकानि च

' श्वा काक इति कुत्सायाम् ' । यो हि लौल्यादिदोषसमन्वयेन कुत्सनीयो भवति स एवमुच्यते श्वायमिति । अत्रापि श्वेवायमितीवशब्दस्य[3] लोपो द्रष्टव्यः । धाष्टर्यादिदोषसमन्वयेन[4] यः कुत्स्यते स काकोऽयमित्युच्यते । काकादिशब्दानुदाहरणप्रसक्तान् निर्ब्रवीति ' काक इति शब्दानुकृतिः ' । अनुकरणमनुकृतिः । शब्दस्यानुकृतिः शब्दानुकृतिः । यादृशमेवासौ शब्दं करोति तयैवानुकृत्या[5] तस्य नामापि भवति ।

काकादिनामानि शब्दानुकृतिमूलानि

स हि काकुकाकिति[6] वाश्यते[7] तस्मात्स काक इत्युच्यते । ' तदिदम् ' एवं शब्दानुकृतिहेतुकं नाम ' शकुनिषु ' एव । नान्येषु सत्त्वविशेषेषु । ' बहुलं ' प्रायेणेत्यर्थः । ' न शब्दानुकृतिर्विद्यत इत्यौपमन्यवः ' । शकुनिष्वपि न शब्दानुकृतिहेतुकं नाम विद्यत इत्यौपमन्यव आचार्यो मन्यते । किं कारणम् । व्यभिचारित्वात् ।

---

१ क. ख. घ. ट. ठ. ड. °र्यादिः । अतस्तदभिधानेनोपमार्थं कृत्वा°; ग. ज. °र्यादिः । तदभिप्राये धानीयं वाक्यं°. २ क. ख. घ. ट. ठ. ड. °न्नेव. ३ ग. ज. शब्दलोपो°. ४ क. ख. घ. ट. ठ ड. °दोषसमुच्चयेन; च. " दोष " नास्ति. ५ क. ख. घ. ट. ठ. ड. तथैवा°. ६ ग. ज. काकु काकि°; घ. ट. काकु काकु इति; ठ. काकुक्काकिति; ड. काकुक्काकिति. ७ ग. च. ज. ड. वाश्यति.

शब्दानुकृतिर्न विद्यत इत्यौपमन्यवः

श्यामा दर्वी पुच्छः प्लवो हंस इत्येवमादिषु शब्दानुकरणहेतुको नामधेयप्रतिलम्भो नास्ति । शकुनिपक्षेऽपि शब्दानुकारो न विद्यते । बहवो ह्येवंप्रकारा अन्यक्रियाजैर्नामभिरन्विताः शकुनयः । तत्र यदुक्तं ‘ तदिदं शकुनिषु बहुलम् ’ इत्येतदयुक्तम् । आह । तर्हि कथं काकस्यान्यक्रियाहेतुको नामधेयप्रतिलम्भ इति । उच्यते । स हि ‘ काकः अपकालयितव्यो भवति ’ उपघातभयात् । स हि यद्यत्स्पृशति तत्तदुपहन्तीत्यपकाल्यते । तस्मात्काक इत्युच्यते । शकुनित्वसामान्यप्रसक्तमुच्यते । ‘ तित्तिरिस्तरणात् ’ । ‘ तॄ प्लवने ’ [धा० १ । ९९४] । उत्प्लुत्यासौ गच्छति । ‘ तिलमात्रचित्र इति वा ’ । अथवा तिलमात्रचित्रः स भवतीति तित्तिरिः । ‘ कपिञ्जलः कपिरिव जीर्णः ’ । यादृशो हि कपिर्मर्कटो जीर्णः सन्वर्णतो भवति तादृशोऽसावपीति कपिञ्जल इत्युच्यते । अथ ‘ वा कापिरिव जवते ’ कपिञ्जलः । ‘ ईषत्पिङ्गलः ’ इति ‘ वा ’ कपिञ्जलः । अथ ‘ वा कमनीयं ’ प्रार्थनीयं मङ्गल्यं मधुरं वा ‘ शब्दं पिञ्जयति ’ अभिव्यनक्तीति कपिञ्जलः । ‘ एवमादीनि शकुनिनामधेयानि ’ एवमादिना प्रकारेणाशब्दानुकृतिपूर्वकत्वे सति निर्वक्तव्यानि । ‘ श्वाशुयायी ’ । शु इति क्षिप्रनाम । क्षिप्रमसौ शीघ्रत्वादेतीति श्वा । ‘ शवतेर्वा गतिकर्मणः ’ । स हि नित्यमेव गच्छति । ‘ श्वसितेर्वा ’ गतिकर्मण एव । ‘ सिंहः सहनात् ’ । अभिभवति ह्यसावन्यान्प्राणिविशेषान् । ‘ संपूर्वस्य वा हन्तेः ’ उपसर्गस्यैवेत्वेनं । ‘ संहाय हन्तीति वा ’ । वैयाकरणानामेषा व्युत्पत्तिः । ‘ व्याघ्रो व्याघ्राणात् ’ । विविधमसौ जिघ्रति व्याघ्रः । तस्य हि घ्राणेन्द्रियं पटु भवति । स हि घ्नन्नाघ्राय हन्ति । घ्राणेन्द्रिये हि तस्य विशिष्टं ज्ञानम् । ‘ व्यादाय हन्तीति वा ’ । स किल व्यादाय वक्त्रं विवृतं कृत्वा ततो हन्ति । अथवा ‘ व्यादाय हन्तीति ’ । यः किल प्रथमे ग्रहे न शंकित-

---

१ क. ख. ग. ज. घ. ट. ठ. ड. °क्रियार्थैर्नाम°. २ क. ख. ग. ज. घ. ट. ठ. ड. कथं तर्हि. ३ घ. ट. ठ. ड. तत्तदुपह°. ४ घ. ट. ठ. ड. °वते योऽसौ कपि°. ५ क. ख. घ. ट. ठ. ड. ‘ एव ’ नास्ति. ६ घ. ट. ठ. ड. °सर्गस्यात इव्यत्ययेन । संहा° ७ क. ख. घ. ट. ठ. ड. जिघ्रतीति. ८ क. ख. ग. ज. भवतीति. त. ९ क. ख. °ग्रहे शङ्कित°; ठ. ड. शंकित°.

स्तेन हन्तुं भवति मृगो वा[1]न्यो वा कश्चित्तमसावमर्षाद्विकृष्य तस्मिन्नेव प्रदेशे प्रथमग्रहस्थान आनीय ततो हन्ति । सिंहो व्याघ्रः श्वा काक इत्येवमनुक्रम्यार्वाचीनान्येतानि पदानि निरुक्तान्ययमपि निर्वचनप्रकारोऽस्तीति प्रदर्शनार्थम् । सिंहव्याघ्रशब्दयोस्त्वनुलोममेव निर्वचनमनुलोमव्याख्[2]योपप्रदर्शनार्थम् । एवं ह्यु[3]भे अपि प्राप्ती दर्शिते भवतः ॥ १८ ॥[4]

अर्चतिकर्माण उत्तरे धातवश्चतुश्चत्वारिंशन्मेधाविनामान्युत्तराणि चतुर्विंशतिर्मेधावी कस्मान्मेधया तद्वान्भवति मेधा मतौ धीयते स्तोतृनामान्युत्तराणि त्रयोदश [5]स्तोता स्तवनाद्यज्ञनामान्युत्तराणि पञ्चदश यज्ञः कस्मात्प्रख्यातं यजतिकर्मेति नैरुक्ता याच्ञो भवतीति वा यजुरुन्नो भवतीति वा बहुकृष्णाजिन इत्यौपमन्यवो यजूंष्येनं नयन्तीति वर्त्विङ्नामान्युत्तराण्यष्टावृत्विक्कस्मादीरण ऋग्यष्टा भवतीति शाकपूणिर्ऋतुयाजी भवतीति वा याच्ञाकर्माण उत्तरे धातवः सप्तदश दानकर्माण उत्तरे धातवो दशाध्येषणाकर्माण उत्तरे धातवश्चत्वारः स्वपितिसस्तीति द्वौ स्वपितिकर्माणौ कूपनामान्युत्तराणि चतुर्दश कूपः कस्मात्कुपानं भवति कुप्यतेर्वा स्तेननामान्युत्तराणि चतुर्दशैव स्तेनः कस्मात्संस्त्यानमस्मिन्पापकमिति नैरुक्ता निर्णीतान्तर्हितनामधेयान्युत्तराणि षट् निर्णीतं कस्मान्निर्णिक्तं भवति दूरनामान्युत्तराणि पञ्च दूरं कस्माद्द्रुतं भवति दुरयं वा पुराणनामान्युत्तराणि षट् पुराणं कस्मात्पुरा नवं भवति नवनामान्युत्तराणि ष[6]ळेव नवं कस्मादानीतं भ[7]वति ॥ १९ ॥

---

१ क. ख. घ. ट. ट. ङ. 'वा' नास्ति. २ च. °व्याख्योपमादर्श°. ३ ग. ज. 'हि' नास्ति. ४ क. ख. १; ग. २०; ठ. ढ. १८ इति निरुक्तवृत्तौ [ढ. निरुक्तभाष्ये] तृतीयाध्याये अष्टादशः खण्डः; इतरेष्वङ्को नास्ति. ५ क. ख. छ. त. द. 'स्तोता स्तवनात्' नास्ति. ६ क. ख. षडेव; छ. त. द. षळेव. ७ क. ख. द. २; छ. त. २१.

‘ अर्चतिकर्माण उत्तरे धातवश्चतुश्चत्वारिंशत् ’ । अर्चतिकर्माणः अर्चत्यर्थाः पूजयत्यर्थाः । उत्तरे उपमाशब्देभ्यः । पूजायामवश्यंभाविन्युपमेत्युपमाशब्देभ्योऽनन्तरमर्चतिकर्माणः समाम्नाताः । कियन्तः पुनस्ते । चतुश्चत्वारिंशत् । कतमे पुनस्ते । ‘अर्चति गायति’ [निघ० ३ । १४] इत्येवमादयः ।

य एतेऽर्चतिकर्माण एतैर्हि मेधाविन एवार्चन्ति । एत एवाधिक्रियन्ते । तैस्त एव हि स्तोतुं शक्नुवन्ति । नेतरेऽमेधसः । तस्मादर्चतिकर्मभ्यः ‘ उत्तराणि मेधाविनामानि ’ । कियन्ति पुनस्तानि । ‘ चतुर्विंशतिः ’ । कतमानि पुनस्तानि । ‘ विप्रः धीरः विग्रः ’ [निघ० ३ । १५] इत्येवमादीनि । विविधानर्थानस्य प्राप्तुं प्रज्ञेति विप्रः । धीः प्रज्ञा । तद्वान्धीरः । रो मत्वर्थे । विगृह्य सदसि कथयतीति विग्रः । इत्येवमादि । आह । ‘ मेधावी कस्मात् ’ । उच्यते । स हि ‘ मेधया तद्वान् भवति ’ । आह । ‘ मेधा ’ कस्मात् । सा हि ‘ मतौ धीयते ’ । मतिर्बुद्धिः । तस्यां या पुरुषशक्तिरभिव्यज्यते सा मेधा इत्युच्यते ।

य एव मेधाविनस्त एव स्तोतुं शक्नुवन्तीति मेधाविनामभ्यः ‘ उत्तराणि ’ स्तोतृनामानि । कियन्ति पुनस्तानि । ‘ त्रयोदश ’ । कतमानि पुनस्तानि । ‘ रेभः जरिता कारुः’ [निघ० ३ । १६] इत्येवमादीनि । रेभो रेभतेः स्तुत्यर्थस्य [धा० १ । ३८५] । जरिता जरतेः स्तुत्यर्थस्यैव । कारुः कर्ता स्तोमानामित्येवमादि योज्यम् । प्रत्यक्षवृत्तित्वादस्य शब्दस्य नोक्तं स्तोता कस्मादिति ।

यज्ञेष्वेव ह्यतिशयेन देवतानां स्तुतयः प्रयुज्यन्त इति स्तोतृनामभ्यः ‘ उत्तराणि यज्ञनामानि ’ । कियन्ति पुनस्तानि । ‘ पञ्चदश ’ । कतमानि पुनस्तानि । ‘ यज्ञः वेनः अध्वरः मेधः ’ [निघ० ३ । १७] इत्येवमादीनि । आह ‘यज्ञः कस्मात्’ । उच्यते । यदेतत् ‘प्रख्यातं यजतिकर्म ’ लोकवेदयोरेतदेव भावसाधनशब्देनोच्यते यजनं यज्ञ इति । अथ वा याच्ञो भवतीति यज्ञः । याच्यते ह्यत्र । ‘ यज्ञो वै देवानामन्नं समभूत्तं भूत्याः समभावयन्निति ह विज्ञायते ’ । तस्माद्याचनाद्यज्ञः । अथ

---

१ ठ. ड. °रिंशदिति । अर्च°. २ ग. च. ज. ‘ उत्तरे’ नास्ति. ३ घ. ट. ठ. ड. तैस्त एवा°. ४ क. ख. घ. ट. ठ. ड. एत एव°. ५ क. ख. ग. ज. घ. ट. ठ. ड.° साधनेन शब्दे.

'वा यजुर्भिः' अयम् 'उन्नः' इव[1] संक्लिन्न इव 'भवति' बहुत्वादत्र यजुषाम् । अथवा 'बहुकृष्णाजिन इत्यौपमन्यवः' । यद्यदत्र दृश्यते प्रतिविशिष्टं साधनं किंचित्तत्तत्कृष्णाजिनमिति यज्ञः । सोमे तावदजिनद्वयं यजमानेऽप्यजिनद्वयमवहन्यमानेषु हि हविःष्वजिनं धर्मपात्रेष्वप्यजिनमेवं[2] बहुकृष्णाजिनम्[3] । अथ 'वा यजूंष्येनम्' उपक्रमादारभ्यान्तं 'नयन्तीति' यज्ञः । वनतिः कान्त्यर्थः । काम्यन्ते हि यज्ञाद्ग्रामपशुस्वर्गादयः । तस्मात्स वेनः यज्ञ इत्युच्यते । ममेदं दास्यतीत्येवं यज्वभिस्तत्फलं[4] प्रार्थ्यत इति मेधः । इत्येवमादि ।

यज्ञसंबन्धेनैव 'ऋत्विङ्नामान्युत्तराण्यष्टौ' । ऋत्विजां नामानि ऋत्विङ्नामानि । कियन्ति पुनस्तानि । अष्टौ । कतमानि पुनस्तानि । 'भरताः कुरवः' [निघ० ३ । १८] इत्येवमादीनि । भ्रियन्ते[5] दक्षिणाभिस्ते[6] इति भरताः । कुर्वन्ति कर्माणीति कुरवः । इत्येवमादि । आह । 'ऋत्विक्कस्मात्' । उच्यते । ईरणः । ईरयिता हि स स्तुतीनां भवतीति ऋत्विक् । 'ऋग्यष्टा भवतीति शाकपूणिः' । ऋग्भिर्ह्यसौ यजतीति ऋत्विक् । 'ऋतुयाजी भवतीति वा' । स हि काले[7] काले देवता यजतीति वा । ऋतौ याजयतीति वा । स हि काले[8] काले एव याजयते नाकाले ।

ऋत्विक्संबन्धेनैव 'याच्ञाकर्माण उत्तरे धातवः सप्तदश' । कतमे पुनस्त इति । 'ईमहे यासि मन्महे' [निघ० ३।१९] इत्येवमादयः ।

याच्ञासंबन्धेनैव 'दानकर्माण उत्तरे धातवो दश' । कतमे पुनस्त इति । 'दाति दाशति दासति[9]' [निघ० ३ । २०] इत्येवमादयः ।

दानसंबन्धेनैव 'अध्येषणाकर्माण उत्तरे धातवश्चत्वारः' । कतमे पुनस्त इति । 'परिस्रव पवस्व' [निघ० ३ । २१] इत्येवमादयः । सत्कृत्य[10] प्रार्थनाध्येषणेत्युच्यते ।

---

१ क. ख. घ. ट. ठ. ड. 'इव' नास्ति. २ क. ख. घ. ट. ठ. ड. घर्मोपार्जितं घर्मपा°. ३ क. ख. घ. ट. ठ. ड. °कृष्णाजिनः. ४ क. ख. घ. ट. ठ. ड. °ज्वभिरस्मात्फलं; ग. ज. °ज्वभिस्तस्मात्फलं. ५ ग. ज. भ्रियन्ति. ६ क. ख. घ. ट. ठ. ड. 'ते' नास्ति. ७ क. ख. ग. ज. 'काले' सकृदेव. ८ क. ख. घ. 'काले' सकृदेव. ९ च. दासते १० क. ख. घ. ट. ठ. ड. °सत्कृत्य दातृभिर्दातुं प्रतिग्रहीतृणां प्रार्थ°.

याच्यमानो हि सर्व एव स्वपितीत्यध्येषणाकर्मभ्य उत्तरौ ' स्वपितिकर्माणौ ' । कतमौ पुनस्ताविति । स्वपिति सस्ति इति [निघ० ३ । २२] । स्वशब्देनैवोच्चार्यं द्विग्रहणमवधारणार्थमेतावेव ' द्वौ ' निगमे न पुनस्तृतीयोऽस्तीति । अल्पत्वाद्वा द्विग्रहणम् ।

कूपमेव ह्याश्रित्य मरौ सुप्यते । सुप्तः कूप इव पतितो भवतीति वा । स्वपितिकर्मभ्यामनन्तराणि कूपनामान्युच्यन्ते । कियन्ति पुनस्तानि । ' चतुर्दश ' । कतमानि पुनस्तानि । ' वव्रः कारुः खातः ' [निघ० ३ । २३] इत्येवमादीनि । व्रियते ह्यसावुदकार्थमिति वव्रः । कमुदकमत्रेति कारुः । इत्येवमादि । आह ' कूपः कस्मात् ' । उच्यते । ' कुपानं भवति ' । यत्र ह्यसौ भवति तत्र कुत्सितं पानं भवति साधनापेक्षत्वात् । ' कुप्यतेर्वा ' । यत्संबन्धात्तत्रोदकार्थिनः कुप्यन्ति ।

' स्तेननामान्युत्तराणि चतुर्दशैव " । कूपमाश्रित्य मुष्णन्ति स्तेना इत्यतः कूपनामभ्य उत्तराणि स्तेननामानि । कियन्ति पुनस्तानि । चतुर्दशैव । कतमानि पुनस्तानि । ' त्रिपुः रिपुः ' [निघ. ३ । २४] इत्येवमादीनि । परेभ्यो धनान्यपहृत्यातिशयेनासावात्मानं भृत्यांश्च तर्पयतीति त्रिपुः । लिम्पत्यसावात्मानं पापेनेति रिपुः । इत्येवमादि । आह । ' स्तेनः कस्मात् ' । उच्यते । ' संस्त्यानं ' संहतम् ' अस्मिन् पापकं कर्म भवति ' इति ' एवं ' नैरुक्ताः ' मन्यन्ते । वैयाकरणानामन्यथापि स्यादित्यभिप्रायः ।

' निर्णीतान्तर्हितनामधेयान्युत्तराणि षट् ' । निर्णीतस्य चान्तर्हितस्य नामधेयानि निर्णीतान्तर्हितनामधेयानि । उत्तराणि प्रकृतेभ्यः स्तेननामभ्यः । स्तेना एवं ह्यन्तर्हिता भवन्तीत्येष संबन्धः स्तेननाम्नामन्तर्हितनाम्नां च । कतमानि पुनस्तानि । 'निण्यं सस्वः सनुतः' (निघ. ३।२५) इत्येवमादीनि । निर्णीतमिव निण्यम् । सुप्तमिव सस्वः । सन्ततमिव सनुताः । इत्येवमादीनि ।

१ क. ख. घ. ट. ठ. ड. अपि. २ ग. च. ज. ' वा ' नास्ति. ३ ग. च. ज. वव्रिः; ट. वब्रः. ४ क. ख. ज. कातुः. ५ च. संबन्धात्त°. ६ ग. च. ज. यस्मिन्. ७ ठ. ड. इव. ८ च. निलीनमिव; ठ. ड. निर्णीतमेव.

‘दूरनामान्युत्तराणि पञ्च’ । अन्तर्हितं यद्भवति दूरे इव हि तद्भवतीत्येष संबन्धः । कतमानि पुनस्तानि । ‘आके पराके पराचैः’ [निघ. ३ । २१] इत्येवमादीनि । आ कियतो देशादेतद्वर्तत इति विज्ञातव्यमेतद्भवतीत्याके । पराके पराक्रान्ते । पराङ्मुखमञ्चितं पराचैरित्येवमादि । यथैव श्रुतानि छन्दसि तथैवैतानि समाम्नातानि । आह । ‘दूरं कस्मात्’ । उच्यते । ‘द्रुतं’ हि तत् ‘भवति’ अध्वनो महत्त्वात् । ‘दुरयं वा’ । दुःखं हि तद्गम्यते । प्राप्यत इत्यर्थः ।

दूरसंबन्धेनैव ‘पुराणनामान्युत्तराणि षट्’ । समानं हि कालाध्वनोर्महत्त्वं दूरपुराणयोः । कतमानि पुनस्तानि । ‘प्रत्नं प्रदिवः प्रवयाः’ [निघ० ३।२७] इत्येवमादीनि । प्राक्तनं प्रत्नम् । प्राग् द्युतिमदासीदिति प्रदिवः । प्रकृष्टवयाः प्रवयाः । इत्येवमादि । आह । ‘पुराणं कस्मात्’ । उच्यते । तद्धि ‘पुरा नवं भवति’ न वर्तमानकाले ।

‘नवनामान्युत्तराणि षडेव पुराणसंबन्धेनैव । कतमानि पुनस्तानि । ‘नवं नूनं नूतनम्’ [निघ० ३ । २८] इत्येवमादीनि । आह । ‘नवं कस्मात्’ । उच्यते । तद्धि सद्य एव कुतश्चित् ‘आनीतं भवति’ । क्षिप्रोत्पन्नं नूतनमित्येवमादि ॥ १९ ॥

द्विश उत्तराणि नामानि प्रपित्वेऽभीक इत्यासन्नस्य प्रपित्वे प्राप्तेऽभीकेऽभ्यक्ते । आपित्वे नः प्रपित्वे तूयमा गहि । अभीके चिदु लोककृदित्यपि निगमौ भवतः । दभ्रमर्भकमित्यल्पस्य । दभ्रं दभ्नोतेः सुदम्भं भवत्यर्भकमवहृतं भवति । उपोप मे परामृश मा मे दभ्राणि मन्यथाः । नमो महद्भ्यो नमो अर्भकेभ्य इत्यपि निगमौ भवतः । तिरः सत इति प्राप्तस्य तिरस्तीर्णं भवति सतः संसृतं भवति । तिरश्चिदर्यया परिवर्तिर्यातमदाभ्या । पात्रेव भिन्दन्त्सत एति रक्षस इत्यपि निगमौ भवतः । त्वो नेम इत्यर्धस्य त्वोऽपततो नेमोऽपनीतोऽर्धं हरतेर्विपरीताद्धारयतेर्वा स्यादुद्धृतं भवत्यृध्नोतेर्वा स्यादृद्धतमो विभागः । पीयति त्वो अनु त्वो

---

१ क. ख. घ. ट. ठ. ड. दूरवत्तद्भ°. २ ग. च. ज. एलेव. ३ क. ख. २; ग. २१; ठ. ड. १९ इति निरुक्तवृत्तौ [ड. निरुक्तभाष्ये] तृतीयाध्याये एकोनविंशः खण्डः; इतरेष्वङ्को नास्ति.

गृणाति । नेमे देवा नेमेऽसुरा इत्यपि निगमौ भवतः । ऋक्षाः स्तृभिरिति नक्षत्राणां नक्षत्राणि नक्षतेर्गतिकर्मणो नेमानि क्षत्राणीति च ब्राह्मणमृक्षा उदीर्णानीव ख्यायन्ते स्तृभिस्तीर्णानीव ख्यायन्ते । अमी य ऋक्षा निहितास उच्चा । पश्यन्तो द्यामिव स्तृभिरित्यपि निगमौ भवतः[1] । वम्रीभिरुपजिह्विका इति सीमिकानां वम्र्यो वमनात्सीमिका स्यमनादुपजिह्विका उपजिघ्र्यः । [2]वम्रीभिः पुत्रमग्रुवो अदानम् । यदत्त्युपजिह्विका यद्वम्रो अतिसर्पतीत्यपि निगमौ[3] भवत ऊर्दरं कृदरमित्यावपनस्योर्दरमुद्दीर्णं भवत्यूर्जे दीर्णं वा । तमूर्दरं न पृणता यवेनेत्यपि निगमो भवति । तमूर्दरमिव पूरयति यवेन कृदरं कृतदरं भवति[4] । समिद्धो अञ्जन्कृदरं मतीनामित्यपि निगमो भवति ॥ २० ॥

‘ द्विश उत्तराणि नामानि ’ । द्वे द्वे द्विशः । उत्तराणि[5] ‘ प्रपित्वे अभीके ’ [निघ० ३ । २९] [6]इत्येवमादीनि[7] । व्याख्यातानि पृथिवीनामभ्य आरभ्य एकैकस्यार्थस्य[8] बहूनि नामधेयानि । इदानीमेकैकस्य द्वे द्वे नामनी वाचके समाम्नाते प्रपित्वे अभीक इत्येवमादीन्याद्यावापृथिवीनामभ्यो यावत् ।

अधुनैवमुक्त्वा सामान्यतो विशेषतः[9] एकैकं व्युत्पाद्य उदाहरणैरेव दर्शयति । तद्यथा । ‘ प्रपित्वे अभीके इत्यासन्नस्य ’ एते नामनी भवत इत्येवमादि । प्रपित्वे प्राप्ते इत्यर्थः । ‘ अभीके अभ्यक्ते ’ । आभिमुख्येनाञ्चिते अभ्यागते । इदानीमुदाहरणे ब्रवीति । ‘ आपित्व नः ’ ‘ अभीके चित्[10] ’ ‘ इति निगमौ भवतः[11] ’ ।

यथा गौरो अपो[12] कृतं तृष्यन्नेत्यवेरिणम् । आपित्वे नः प्रपित्वे

---

१ छ त. भवतः २ २ । वम्री°; द. भवतः । ३ । वम्री.° २ क. ख. छ त. द. ‘वम्रीभिः० अदानं ’ नास्ति. ३ क. ख. छ. त. द. निगमो भवत्यूर्दरं°. ४ क. ख. ३; छ. त. द. अङ्को नास्ति. ५ क. ख. घ. ट. ठ. ड. उत्तराणीति प्रपि°. ६ घ. ट. ठ. ड. ‘इति’ नास्ति ७ घ. ट. °दीनि व्याख्या°; ठ. ड. °दीनि व्याख्यातानि । पृथि°. ८ क. ख. घ. ट. ठ. ड. एकैकार्थस्य. ९ क. ख. घ. ट. ठ. ड. विशेषेण. १० च. चेत्. ११ ग. च. °वतः । २० । यथा°. १२ ग. च. ज. कृतं । ऐन्द्र°; घ. ट. कृतं० सचा पिब.

तूयमा गहि कण्वेषु सु सचा पिब ' [ऋ० सं० ८ । ४ । ३] ॥ प्रपित्वे इत्यस्योदाहरणम् । ऐन्द्र्येषा । बृहती । देवातिथेः काण्वस्यार्षम् । महाव्रते बृहतीसहस्रे शस्यते [ऐ० आ० ५ । २ । ४] । हे इन्द्र यथा येन प्रकारेण गौरः गौरमृगः[1] अवेरिणमपगतार्णमपगतोदकं[2] मरुदेशं हित्वा तृष्यन् तृषा बाध्यमानः अपा कृतमपानीयमापानयोग्यं[3] यत्र नास्ति स्वल्पोदकत्वा[4]त्तत्र कृतमुदकेन वा कृतं जलाशयस्थानं तडागमन्यद्वा शीघ्रमेत्येवं त्वमप्येतस्मिन्नापित्वे आपानकाले[5] प्रपित्वे प्राप्ते तूयं क्षिप्रमागहि आगच्छ । आगत्य च य एष सोमः कण्वेषु एष्वृत्विक्षु वर्तते[6] तमेभिरेव ऋत्विग्भिः सचा साकं सु सुष्ठु सह स्थित्वा पिबेति संयोगेन तृष्यन्[7] ।

' प्रोष्वस्मै पुरोरथमिन्द्राय शूषमर्चत । अभीके चिदु लोककृत्सङ्गे समत्सु वृत्रहास्माकं बोधि चोदिता नभन्तामन्यकेषां ' अभीके ' इत्यस्य ज्याका अधि धन्वसु ' [ऋ० सं० १० । १३३ । १] ॥ सुदासः पैजवनस्येयमार्षम् । अतिच्छन्दाः । सर्वपृष्ठायां मैत्रायणीयके[9] देवताव्यत्यययागे[10] शाक्वरस्यैन्द्रस्य चरोर्याज्यैषा रैवतस्य पुरोनुवाक्या [मैत्रा०सं० २।३।७॥४।१२।४ ।]। बाह्वृच्ये पुनरियमेव षोडशिनः[11] षोडशिशस्त्रे शस्यते [आश्व० श्रौ० ६ । २ । ६ ।]। हे स्तोतारः प्रो प्रकर्षेण सु प्रशस्ताभिः स्तुतिभिः अस्मै इन्द्राय तुष्ट्यर्थं पुरोरथम् अप्रतोरथमेतत् शूषं बलम् अर्चत स्तुत । कं च पुनरर्थमभिसंधायार्चतेति । अभीके चिदु लोककृत् । अभीके अभ्यागते एतस्मिन् सङ्गे सङ्ग्रामकाले प्राप्तेषु समत्सु संभक्षयितृषु उद्यतायुधेषु शत्रुषु लोककृत् स्थानकृत् एषु वृत्रहा शत्रुहन्ता इन्द्रो भविष्यतीत्येतमर्थमभिसंधाय प्रार्चतास्मै यूयमिन्द्राय[12] पुरोरथं शूषमिति । एवमन्यान्स्तोतॄन्संबोध्यात्मनापि प्रववृते वक्तुम् । हे भगवन्निन्द्रास्माकं बोधि बुध्यस्वैताः स्तुतीर्मा परेषाम् । बुद्ध्वा चैताः चोदिता अनुज्ञाता जनस्य भव । नभन्तां

---

१ घ. ट. गौरमृतः. २ ग. ज. अविरणम्. ३ च. कृतं पानीययोग्यं नास्ति. ४ च. °त्वात् । अपानीयमात्रकृतम् उद°. ५ च. अपान°. ६ घ. ट ठ. ड. सह संयोगेनं. ७ ग. तुष्यन् । ३१ । प्रो°; ज. तुष्यन् । २१ । पो°; च. तृष्यन् । ३१ । प्रो°. ८ ग. च. ज. °रथं । सुदासः°; घ. ट. ठ. ड. °रथं० धन्वसु. ९ क. ख. ग. ज. ठ. मैत्रावरुणीयके. १० क. ख. घ. ट. ठ. ड. °व्यत्यये यागे. ११ क. ख. ग. ज. ' षोडशिनः' नास्ति. १२ घ. ट. °मिन्द्रस्य.

मा भूवन्नन्यकेषाम् अन्येषां[1] ज्याकाः ज्याः अविधन्वसु । अवतत-[2] ज्यधनुषो हतसर्वोद्यमा एते अस्मद्द्विषो युष्मदनुग्रहाद्भवन्त्वित्यभिप्रायः ।

‘ दभ्रमर्भकमित्यल्पस्य[3] ’ एते नामनी । ‘ दभ्रं दभ्नोतेः ’ वधार्थस्य तद्धि ‘ सुदभ्रं भवति ’ सुच्छेदं भवत्यल्पत्वात् । ‘ अर्भकमवहृतम् ’ । ह्रस्वमित्यर्थः । ‘ उपोप मे परामृश ’ ‘ नमो महद्भ्यो[4] ’ ‘ इत्यपि निगमौ भवतः[5] ’ ।

‘ उपोप[6] मे परा मृश मा मे दभ्राणि मन्यथाः । सर्वाहमस्मि रोमशा गन्धारीणामिवाविका ’ [ऋ० सं० १।१२६ ।

‘ दभ्रम् ’ इत्यस्य ७ ।] ॥ भावयव्यस्येयमार्षम्[7] । अनुष्टुप् । भावयव्यमेव सा भर्तारं तेनानुपेयमाना ब्रवीति ।

हे राजन् उपगम्य उपश्लिष्य च मे मम परामृश यः प्रदेशः पुरुषेण स्त्रियाः परामर्ष्टव्यः[8] । किंच मा मे दभ्राणि मन्यथाः । अल्पकानि लोमानि[9] मा मन्यथाः । जानेऽहमेतद्यथालोमिकाया उपगमः प्रति[10]षिद्धः स्मृतौ ‘नाजात-लोम्न्योपहासमिच्छेत् ’ [गोभि० गृ० ३ । ५ । ३] इति । यतस्ते[11] वेदयामि सर्वाहमस्मि रोमशा । सर्वेष्वेवावयवेषु ममोत्पन्नानि रोमाणि येषु स्त्रीणामुत्पद्यन्ते । कथं च पुनरहमस्मि रोमशा । गन्धारीणामिवाविका । गन्धारदेशजातानामविकानां मध्ये या सुष्ठु रोमशा भवेत्तथाहमस्मि रोमशा । निःशङ्को मामुपगच्छेत्यभिप्रायः[12] ।

‘ नमो महद्भ्यो नमो अर्भकेभ्यो[13] नमो युवभ्यो नम आशिनेभ्यः । यजाम देवान्यदि शक्नवाम मा ज्यायसः शंसमा

‘अर्भकम् ’ इत्यस्य वृक्षि देवाः’ [ऋ० सं० १ । २७ । १३] ॥ त्रिष्टुप् । शुनःशेपस्यार्षम् । होतृजपे विनियोगः [आश्व० श्रौ० १ । ४ । ९] । नमो महद्भ्यः नमो महत्परिमाणेभ्यो देवेभ्यः । नमो अर्भकेभ्यः अल्पपरिमाणेभ्यः । नमो युवभ्यः यौवनवद्भ्यः । नम आशिनेभ्यः व्यापिभ्यः । यजाम देवानेतस्मिन्नुपस्थिते यागकाले यदि शक्नवाम । अल्पश्रुतविज्ञाना वयमत एव ब्रूमो यदि शक्नवामेति । वयमीदृशाः

---

१ च. ‘अन्येषां’ नास्ति. २ ग. ज. °ततधनु°. ३ ठ. ड. °ल्पस्येति । एते°. ४ ठ. ड. महद्भ्यो नमो अर्भकेभ्य इत्य°. ५ ग. ज. °वतः । ३२ । उपो°. ६ ग. च. ज. मे परामृश । भाव°; घ. ट. मे० विका । भाव°. ७ ठ. ड. °मार्षम् । रोमशा ऋषिका । अनु°. ८ ग. च. घ. परामृष्टव्यः; ज. पराम्रष्टव्यः; ट. परामृष्टव्यः° म. ९ च. लोमकानि. १० च. प्रतिनिषिद्धः. ११ घ. ट. यतोऽतस्ते°. १२ म. °प्रायः । ३३ । नमो°. १३ ग. च. ज. घ. ट. अर्भकेभ्यः । त्रिष्टुप्.

सन्तो युष्मान्ब्रूमहे । हे ज्यायसो देवा[1] युष्माकमेव शंसितारं सन्तमल्पे वा महति वा कस्मिंश्चिद्दुःशस्ते मा वृक्षि मा अस्मान् छिन्त यज्ञफलात्[2] । को हि नाम नापराध्यतीत्यभिप्रायः ।

'तिरः सत' इति प्राप्तस्य एते नामनी भवतः । अप्राप्तस्यैकेऽधीयते । तथापि योग्यम् । 'तिरस्तीर्णं' हि तद् 'भवति' दूरमध्वानम् । 'सतः संसृतं भवति' एकीभूय सृतं भवति । 'तिरश्चिदर्यया परिवर्तिर्यातमदाभ्या' 'पात्रेव भिन्दन्त्सत एति रक्षसः' 'इत्यपि निगमौ भवतः[3]' ।

अश्विनावेह गच्छतं नासत्या[4] मा वि वेनतम् । तिरश्चिदर्यया परिवर्तिर्यातमदाभ्या माध्वी मम श्रुतं हवम् ' [ऋ० सं० ५ । ७५ । ७] ॥

पङ्क्तिराश्विनी । अवस्योरात्रेयस्यार्षम्[5] । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १५ । १] । हे अश्विनौ 'तिरः' इत्यस्य नासत्यौ आगच्छतं युवाम् इह अस्मिन्यज्ञे सोमं पातुं मम । किंच । मा विवेनतं मा विगतकामौ भूतं युवामाहूयमानौ मया । किंच तिरश्चिदर्यया । तिरोऽपि[6] अप्राप्तेऽपि दूर एव स्थाने यद्यवस्थितौ स्थस्तथापि अर्यया ईश्वरयापि स्वगत्या देवगत्या शीघ्रमायातम्[7] । द्विवचनं वा सावग्रहत्वात्पदस्य । किंच परिवर्तिर्यातम् । यद्यपि क्वचिदनिर्वृत्तौ[8] स्थस्तथापि परिवर्तनं कृत्वा तत आयातम् । हे अदाभ्या अहिंस्यौ अनुपहिंसितौ । अथवा अदब्धया[9] अनुपहिंसितया गत्या आयातम् । हे माध्वी मधुसोममिश्रं पेयं ययोः[10] । श्रुतं शृणुतं हवम् आह्वानम् । श्रुत्वा चाविलम्बमानौ शीघ्रमायातमित्यभिप्रायः[11] ।

'इन्द्रो यातूनामभवत्पराशरो हविर्मथीनामभ्या[12] विवासताम् । अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन्त्सत एति 'सतः' इत्यस्य रक्षसः ' [ऋ० सं० ७ । १०४ । २१] ॥

वसिष्ठस्यार्षम् । जगती । इन्द्रो यातूनां यातु-

१ क. ख. घ. ट. ठ. ड. ज्यायसो ज्यायांसो देवा°. २ ठ. ड. °मास्मान्वाच्छितयज्ञ°. ३ ग. °वतः । ३४ । आश्वि°. ४ ग. च. ज. नासत्या । पङ्क्ति°; घ. ट. नासत्या० हवम्. ५ ठ. ड. इयमवस्यो°. ६ क. ख. घ. ट. ठ. ड. 'अपि' नास्ति. ७ क. ख. घ. ट. ठ. ड. शीघ्रयायातम्. ८ च. ट. °वानवृत्तौ° भिन्नस्थितौ पाठः. ९ क. ख. अदाभ्यया, ट. अदब्धया° दाभ्य. १० क. ख. ठ. ड. ययोस्तौ मम°; ट. ययोः ˘ श्रुतं° तौ मम. ११ ग. °प्रायः । ३५ । इन्द्रो°.

धानानाम् अभवत् पराशरः पराशातयिता । कीदृशानां पुनर्यातूनामभव-त्पराशातयितेति । हविर्मथीनां हवींषि ये मथ्नन्ति तेषाम् । अभ्या-विवासतामभ्युद्वासयताम् । यज्ञोत्सादकानामित्यर्थः । अथवा विवा-सतिः परिचर्यायां स्यात् । ये तमिन्द्रं परिचरन्ति तेषां ये यातवस्तेषामेव पराशातयितेति । योऽयमेवंलक्षण इन्द्रः सोऽस्माभिराराधितः परिचर्यया अभ्येति अभ्येतु अस्मान्प्रति । शक्रः शक्तः सर्वयातूनां पातने । कथं पुनरभ्येतु । परशुहस्तो यथा कश्चिद्वनं छिन्दन्नभ्येयाद्यथा पात्राणि कौलालानि लगुडेनाप्रतिषिध्यमानो भिन्दन्कश्चिदभ्येयादेवमभ्येतु रक्षसो भिन्दन् सतः प्रदेशात् । दूरादित्यर्थः ।

'त्वो नेम' इति एते नामनी अर्धस्य । 'त्वः अपततः' । अपेत्य ततः अपततः । 'नेमः अपनीतः' । अपभज्य नीतः । पृथक्कृत इत्यर्थः । 'अर्धं हरतेर्विपरीताद्धारयतेर्वा स्यात्' । 'उद्धृतं' हि तद् 'भवति' । 'ऋध्नोतेर्वा स्यात्' । 'ऋद्धतमः' अभिसंपन्नतमः 'विभागः' भवति । 'पीयति त्वो अनु त्वो गृणाति' 'नेमे देवा नेमेऽसुराः' 'इत्यपि निगमौ भवतः' ।

'त्वः' इत्यस्य — बोधा मे अस्य वचसो यविष्ठ मंहिष्ठस्य प्रभृतस्य स्वधावः । पीयति त्वो अनु त्वो गृणाति वन्दारुस्ते तन्वं वन्दे अग्ने' [ऋ० सं० १ । १४७ । २] ॥ त्रिष्टुप् । दीर्घतमस आर्षम् । आग्नेयी । प्रातरनुवाकाश्विनयोः शस्यते । [आश्व० श्रौ० ४ । १३ । ७] । हे भगवन्नग्ने यविष्ठ युवतम बोध बुध्यस्व मे मम अस्य वचसो मंहिष्ठस्य दातृतमस्य पूजयितृतमस्य वा महत्तमस्य वा प्रकृष्टैर्भवद्गुणैः संभृतस्य । हे स्वधावः अन्नवन् ये गुणा अस्य वचसस्तान्बोध । किंच । इदमपरं शृणु । उभयेषां प्राजापत्यानां देवासुराणां द्वेधा विभक्तानां पीयति त्वः हिनस्त्येकमर्धमसुराख्यम् । अनु त्वः अनुगृणात्येकमर्धं देवाख्यम् । अनुष्टौतीत्यर्थः । तत्रैवं सत्युभयथा विप्रतिपन्नेषु प्राजापत्येषु वन्दारुः वन्दनशीलस्तेऽहं वन्दे देवं पक्षमाश्रितो हित्वासुरं तवैनां

१ ग. ज. °सति परि°. २ ग. च. ज. °ये त्वामिन्द्रं.°. ३ क. ख. ग. ज. यातने. ४ ट. प्रतिषिध्य° ब. ५ ग. ज. °वतः । ३६ । बोधा°. ६ ग. च. ज.
२९ वचसो । त्रिष्टु°; घ. ट. वच० त्रिष्टु°. ४ घ. ट. ठ. ड. °नुस्तौती°.

तन्वं तनूं ज्वलनदहनप्रकाशीकरणसमर्थां नित्यकालमेव प्रातर्मध्यंदिने सायं च वन्दे । स्तौमीत्यर्थः । तथास्य ममैवं भक्तस्य बुध्यस्व । अस्य वचसो ये गुणास्तांश्च बुद्ध्वा प्रसादमभिमतेनार्थेन नः कुरुष्वेत्यभिप्रायः ।

'नेमे' इत्यस्य

'नेमे देवा नेमेऽसुराः' इति ब्राह्मणवाक्यमेवेदं वाजपेये मैत्रायणीयानाम् [मैत्रा० सं० १ । ११ । ९] । अर्धतो देवा अर्धतोऽसुरा आसन्नित्यर्थः ।

'ऋक्षाः स्तृभिरिति नक्षत्राणां' नामनी । नक्षत्रशब्दं पर्यायाभिधानप्रसक्तं निर्ब्रवीति । 'नक्षत्राणि नक्षतेर्गतिकर्मणः' गत्यर्थे वर्तमानस्य । एतानि हि नित्यमेव गच्छन्ति । 'नेमानि क्षत्राणीति च ब्राह्मणम्' । नेमानि क्षत्राणि धनानि । क्षत्रमिति धननाम [निघ० २ । ९ । ९ ।] । किं तर्हि । धनसरूपाण्येतानि सूर्यरश्म्यनुवेधादम्मयानि सन्ति हिरण्मयानीव भ्राजन्त इति तु ब्राह्मणम् । तुशब्दार्थे चशब्दः । 'ऋक्षा उदीर्णानीव' एतानि उदीरितानीव केनचिदूर्ध्वं[1] गमितानीव 'ख्यायन्ते' । दृश्यन्त इत्यर्थः । 'स्तृभिः स्तीर्णानीव ख्यायन्ते' । दृश्यन्ते[2] ।

'ऋक्षाः' इत्यस्य

'अमी य ऋक्षा निहितास[3] उच्चा नक्तं ददृश्रे कुह चिद्दिवेयुः । अदब्धानि वरुणस्य व्रतानि विचाकशच्चन्द्रमा नक्तमेति' [ऋ० सं० १।२४।१०] ॥ शुनःशेपस्यार्षम् । त्रिष्टुप् । वारुणी । वरुणश्चास्यां सूर्य उच्यते ।

अमूनि यानि नक्षत्राणि निहितासः निहितानि अवस्थापितानि उच्चा । उच्चैरित्यर्थः । किंच । तानि नक्तं ददृश्रे । रात्रावेवैतानि दृश्यन्ते । कुह चिद्दिवेयुः । न विज्ञायेते[5] क चिद्दिवैतानि गच्छन्तीति । किमेतत्स्यात् । अदब्धानि अनुपहिंसितानि वरुणस्य आदित्यस्यैतानि व्रतानि कर्माण्याश्चर्यभूतानि स्युः । किमन्यद्भविष्यति । स हि भगवानादित्य एतानि कुतश्चिदानयन्निवास्तं गच्छति पुनश्चैतान्यर्पनयन्निवोदेति[6] । तदेवं दर्शनमदर्शनं वैतेषां सूर्यकृतमेव । यदपि[7] चैतद्विचाकशद्दीप्यमानश्चन्द्रमा नक्तमेति तदप्यस्यैव भगवतः

---

१ ठ. ड. °दूर्ध्वगामिनानीव. २ ग. च. ज. दृश्यन्ते । ३७ । अमी°. ३ ग. च. ज. निहितास उच्चा । शुनः°; घ. ट. निहितासः । शुनः° . ४ ठ. ड. नक्तमेति । अमी य ऋक्षा इत्येषा शुनः°. ५ क. ख. विज्ञायन्ते हि क°; घ. ट. ठ. ड. विज्ञायन्तेऽह्नि क°; च. विज्ञायन्ते क°. ६ ठ. ड. °श्चैतान्यानय°. ७ घ. ट. ठ. ड. यद्यपि.

सूर्यस्य कर्म । अयमेव हि चन्द्रमसि दीप्तिमादधान इवास्तं गच्छति पुनश्चाक्षिपन्निव चन्द्रमसो दीप्तिमुदेति । योऽयमेवंस्वभावो वरुणस्तं वयमभिप्रेतार्थसिद्धये स्तुमः स इदं नामास्माकं करोत्विति[1] ।

‘स्तृभिः’ इत्यस्य

ऋतावानं विचेतसं पश्यन्तो द्यामिव स्तृभिः । विश्वेषामध्वराणां हस्कर्तारं दमेदमे[2] [ऋ० सं० ४ । ७ । ३] ॥ गौतमपुत्रस्य वामदेवस्यार्षम् । अनुष्टुप् । आग्नेयी । ऋतावानं यज्ञवन्तं विचेतसं विभूतप्रज्ञानं[3] विश्वेषां सर्वेषाम् अध्वराणां यज्ञानां हस्कर्तारं हसनकर्तारम् । उपज्वलिते हि तस्मिन्प्रहसित इव यज्ञश्चारुरूपो भवति । अथवा हस्कर्तारं स्पर्धाकर्तारम् । उपज्वलिते हि तस्मिन् भ्रातृव्ययज्ञैः सह संस्पर्धन्त इव यज्ञाः । तमेवंगुणयुक्तमग्निं पश्यन्तो वयमनेकधा विहृतं दमेदमे यज्ञगृहे यज्ञगृहे तासु तासु क्रियासु व्यापृतं स्तुमः । किंच । योऽनेकधा दीप्यमानो द्यामिव स्तृभिः नक्षत्रैः पृथिवीं चित्ररूपां वेदीं वा करोति स नोऽभिष्टुतोऽभिप्रेतानर्थान् साधयत्वित्यभिप्रायः[4] ।

‘ वम्रीभिरुपजिह्विका इति ’ एते ‘ सीमिकानां[5] ’ नामनी भवतः । या एताः पिपीलिका उच्यन्ते[6] लोके ता इमाः सीमिकाः । ‘ वम्र्यो वमनात् ’ । ता हि वमन्त्युदकं येन मृदार्द्रा भवति । ‘ सीमिकाः स्यमनात् ’ । स्यमन्ति हि ताः । नित्यमेव गच्छन्तीत्यभिप्रायः । ‘ उपजिह्विकाः उपजिघ्र्यः ’ । उपजिघ्रन्ति हि ताः । पटु हि तासां घ्राणेन्द्रियं भवति । द्वयोरपि नाम्नोरेकै[7]निगमः[8] ।

‘ वम्रः ’ ‘ उपजिह्विका ’ इत्यनयोः

यदत्त्युपजिह्विका यद्वम्रो अतिसर्पति । सर्वं तदस्तु ते घृतं तज्जुषस्व यविष्ठ्य ॥ तैत्तिरीयके पठ्यते[9] [तै० सं० ४ । १ । १० । १] । यदत्त्युपजिह्विका[10] । भार्गवस्य प्रयोगस्येयमार्षम् । उरव्ये[11]ऽग्नौ समिदनया हूयते [मान० श्रौ० ६ । १ । ३] । यत्

१ ग. ज. °त्विति ।३८। ऋता°. २ ग. च. ज. घ. ट. विचेतसं गौतम°. ३ ठ. ड. विभूतज्ञानं. ४ ग. °प्रायः । २१ । वम्री°. ५ घ. ट. °ह्विकानां । एते नाम°. ६ क. ख. घ. ट. ठ. ड. इत्युच्यन्ते. ७ क. ख. ग. ज. रेक एवं नि°. ८ ग. °गमः । ३८ । यद°. ९ ग. ज. ‘ यदत्ति० पठ्यते ’ नास्ति. १० ट. ड. यदत्तीति । भार्ग°. ११ ग. च. ज. प्रउगस्ये°.

यद्यर्थे । अत्ति भक्षयति उपजिह्विका अन्तरनुप्रविश्य यच्चातिसर्पति आर्द्रया मृदा परिवेष्टयन्नेव वम्रः । बहिर्न शक्नोत्यत्तुं खदिरसारादि । सर्वं तदुभयजातीयमपि तव हे भगवन्नग्ने घृतमस्तु । तच्च त्वं घृतीभूतं जुषस्व संसेवस्व हे यविष्ठ्य युवतमे ।

' ऊर्दरं कृदरमित्यावपनस्य ' एते नामनी भवतः । उप्यते यस्मिन्यवादि धान्यं कुशूलेऽन्यत्र वा वैणवादौ कस्मिंश्चित्तदूर्दरमिति कृदरमिति च । यदावपनमाहुः प्राकृतेन लौकिकास्तदावपनमित्युच्यते । ' ऊर्दरम् ' ऊर्ध्वं हि तद् ' दीर्णं भवति ' । अथ ' वा ऊर्जे ' तदर्थाय ' दीर्णं ' भवति । ऊर्गित्यन्ननाम । तद्गुप्तये हि तच्छुषिरीभूतं भवति । शुषिरमित्यर्थः । ' तमूर्दरं न पृणता ' ' समिद्धो अञ्जन् ' इति निगमौ ।

' अध्वर्यवो यो दिव्यस्य वस्वो यः पार्थिवस्य क्षम्यस्य राजा । तमूर्दरं न पृणता यवेनेन्द्रं सोमेभिस्तदपो वो अस्तु ' [ऋ० सं० २ । १४ । ११] ॥ गृत्समदस्येयमार्षम् । त्रिष्टुप् ।

'ऊर्दरम्' इत्यस्य ऐन्द्री । हे अध्वर्यवो य इन्द्रो दिव्यस्य द्युलोकाश्रयस्य वस्वो वसुनो धनस्य यश्च पार्थिवस्य अन्तरिक्षलोकाश्रयस्य । पृथिवीत्यन्तरिक्षनामसु पठितम् [निघ० १ । ३ । ९ ।] । यश्च क्षम्यस्य भूम्याश्रयस्य राजा अधिपतिस्तमेवंगुणयुक्तमिन्द्रम् ऊर्दरं न ऊर्दरमिव पृणत पूरयत यवेन । यथा कश्चिन्मनुष्य ऊर्दरं यवेन पूरयेत्तथा यूयमिन्द्रं सोमैः पूरयत । तदपो वोऽस्तु । तद्वः कर्मास्तु सर्वमन्यन्मुक्त्वेत्यभिप्रायः ।

' समिद्धो अञ्जन्कृदरं मतीनां घृतमग्ने मधुमत्पिन्वमानः । वाजी वहन्वाजिनं जातवेदो देवानां वक्षि प्रियमा सधस्थम् ' [य० वा० सं० २९ । १ ॥ तै० सं० ५ । १ । ११] ॥ आप्रीसूक्तमाध्वर्यवेऽश्वमेधे । तत्रेयं

'कृदरम्' इत्यस्य

१ ग. च. ज. घ. ठ. ड. °सारादि सर्वं । तद्‍ु°. २ ग. °तम । ३९ । ऊर्द°. ३ घ. ट. ऊर्दनं. ४ घ. ठ. ड. कुसूले; ट. कुसूले° शू. ५ ग. ज. ' तत् ' नास्ति. ६ ग. ज. °र्दरमिति वा यमाहुः प्राकृ° ; च. °र्दरमिति वापमाहुः प्राकृ° आवपन. ७ घ. ट. °दीर्णमेवाति; ठ. ड. °दीर्णमेवेति. ८ ग. ज. तत्सुषि°. ९ ठ. ड. पृणता यवेन. १० ठ. ड. अञ्जन्कृदरं मतीनामिति. ११ ग. च. ज. °गमौ । ४० । अध्व° १२ ग. च. ज. घ. ठ. ठ. ड. वस्वो । गृत्स°. १३ ग. च. ज. °प्रायः । ४१ । समि°. १४ घ. ट. ठ. ड. अञ्जन्नित्याप्रीसूक्त°; च. ऋक् न पठ्यते.

प्रथमा आप्री[1] । हे भगवन्नग्ने[2] समिद्धः संदीप्तस्त्वम् अञ्जन्गमयन्नात्मानं प्रति कृदरम् आवपनं मतीनाम् । देवानां हि सर्वेषां घृतमावपनं मतीनाम् । ते हि तत्र सर्वा[3] मतीः प्रक्षिपन्ति ममेदं[4] स्यादिति । तदेवंगुणयुक्तं घृतं मधुमत् मधुस्वादयुक्तं पिन्वमानः । पिबन्नित्यर्थः । अथवा देवान्प्रति प्रक्षारयन्[5] वाजी[6] आत्मना वेजनवान् चलनवान्[7] परेभ्यो वा भयदाता[8] । हे जातवेदो वहन्नेनमाश्वमेधिकं[9] वाजिनमुच्यसे अस्माभिः । प्रियमेतं वाजिनं देवानां समानं[10] स्थानमाभिमुख्येन शीघ्रतरं वक्षि वह । प्रापयेत्यर्थः[11] ॥२०॥

रम्भः पिनाकमिति दण्डस्य । रम्भ आरभन्त एनम् । आ त्वा रम्भं न जिव्रयो ररम्भेत्यपि निगमो भवत्यारभामहे[12] त्वा जीर्णा इव दण्डं पिनाकं प्रतिपिनष्ट्येनेन कृत्तिवासाः पिनाकहस्तोऽवततधन्वेत्यपि निगमो भवति[13] मेना ग्ना इति स्त्रीणां स्त्रियस्त्यायतेरपत्रपणकर्मणो मेना मानयन्त्येना ग्ना गच्छन्त्येनाः । अमेनांश्चिज्जनिवतश्चकर्थ । ग्नास्त्वाकृन्तन्नपसोऽतन्वतेत्यपि निगमौ भवतः शेपो वैतस इति पुंस्प्रजननस्य । शेपः शपतेः स्पृशतिकर्मणो वैतसो वितस्तं भवति । यस्यामुशन्तः प्रहराम शेपम् । त्रिः स्म माह्नः श्नथयो वैतसेनेत्यपि निगमौ भवतो[14]ऽयैनेत्युपदेशस्य । अया ते अग्ने समिधा विधेमेति स्त्रियाः । एना वो अग्निमिति नपुंसकस्य । एना पत्या तन्वं १ सं सृजस्वेति पुंसः । सिषक्तु सचत इति सेवमानस्य । स नः सिषक्तु यस्तुरः । स नः सेवतां यस्तुरः । सचस्वा नः स्वस्तये । सेवस्व नः स्वस्तये । स्वस्तीत्य-

---

१ घ. ट. ठ. ड. 'आप्री' इत्यस्यानन्तरमृक्पठ्यते. २ क. ख. घ. ट. अग्ने भगवन्. ३ च. सर्वमतीः°. ४ घ. ट. ममेदं ममेदं स्या°. ५ क. ख. घ. ठ. ड. वहन्; ट. वहन्° क्षारय; ग. च. प्रक्षचयन्. ६ ग. ज. वाजी वहन् आत्म°; च. 'वाजी' नास्ति. ७ क. ख. घ. ट. ठ. ड. वलनवान्. ८ घ. ट. भयप्रदाता. ९ च. °मेधिवाजि°. १० क. ख. घ. ट. ठ. ड. समानस्थान°. ११ क. ख. २; ठ. ड. °त्यर्थः । इति निरुक्तवृत्तौ (ड. नैरुक्तभाष्ये) तृतीयाध्याये विंशतितमः खण्डः । २० । (ड. अङ्को नास्ति); इतरेष्वङ्को नास्ति. १२ क. ख. छ. त. द. °वति । आर°. १३ छ. त. भवति । २३ । मेना°; द. भवति । ४ । मेना°. १४ क. ख. छ. त. द भवतः । अयै°.

विनाशिनामास्तिरभिपूजितः स्वस्तीति भ्यसते रेजत इति भयवेपनयोः । यस्य शुष्माद्रोदसी अभ्यसेताम् । रेजते अग्ने पृथिवी मखेभ्य इत्यपि निगमौ भवतः । द्यावापृथिवीनामधेयान्युत्तराणि चतुर्विंशतिस्तयोरेषा भवति ॥ २१ ॥

'रम्भः पिनाकमिति दण्डस्य' एते नामनी । 'रम्भ आरम्भत एनम्' अस्खलनार्थम् । 'आ त्वा रम्भं' 'कृत्तिवासाः पिनाकहस्तः' इति निगमौ ।

आ त्वा रम्भं न जिव्रयो ररम्भा शवसस्पते । उश्मसि त्वा सधस्थ आ' [ऋ० सं० ८ । ४५ । २०] ॥ काण्वस्य त्रिशोकस्यार्षम् । ऐन्द्री । गायत्री । अतिरात्रे महाव्रते [ऐ० आ० ५ । २ । ३] च शस्यते । हे भगवन्निन्द्र आरभामहे वयं त्वां रम्भं न दण्डमिव जिव्रयः । जीर्णा इत्यर्थः । यथा वृद्धाः केचिद्दण्डमारभेरन्नवष्टम्भनार्थमेवमारभामहे त्वां हे भगवन् शवसस्पते बलस्य पते । त्वं नं आश्रय इत्यभिप्रायः । किंच । उश्मसि त्वा कामयामहे त्वां नित्यमेव सधस्थे समान एवैकस्मिन्स्थाने यज्ञायतनेऽवस्थितं त्वामाभिमुख्येन यष्टुं स्तोतुं वेत्यभिप्रायः ।

रम्भ इत्यस्य

'पिनाकं प्रतिपिनष्ट्येनेन' । हन्तीत्यर्थः । 'एष ते रुद्र भागस्तेनावसेन परो मूजवतोऽतीहि । अवततधन्वा पिनाकहस्तः कृत्तिवासाः' ॥ एष ते रुद्र भागस्तेनेति त्रैयम्बकाः पुरोडाशा अनेन मन्त्रेण वृक्ष आसज्यन्ते । हे भगवन् रुद्र एष ते तत्र भागः । तेनावसेन तेन पथ्यदनेन परः

पिनाक इत्यस्य

---

१ छ. त. द. °नाशनामा°. २ क. ख. छ. त. द. सु अस्ती°. ३ क. ख. ४; छ. त. २४; द. ४. ग. च. ज. °गमौ । ४२ । आ°. ५ ग. ज. घ. ट. जिव्रयः । काण्व°. ६ ग. ज. काणबस्य त्रिकोशस्या°; च. भरद्वाजस्यार्षम्. ७ घ. ट. ठ. ड. °न्निन्द्र ररम्भ आर°. ८ ग. ज.° त्यर्थः । ४३ । एष;° घ. ड. च. °त्यर्थः । ४२ । एष°. ९ ठ. ड. भागस्तं जुषस्व तेनाव°. १० ठ. ड. °वतोऽतीह्यवत°.

परस्तान्मूजवतः पर्वतात् अतीहि अतिगच्छ। मात्रैव स्थाः। कथं च पुनरतीहि। पिनाकहस्तो भूत्वा कृत्तिवासाश्चर्मवासा अवततधन्वा चैवमतीहि।

'मेना ग्ना इति' एते 'स्त्रीणां' नामनी। पर्यायाभिधानप्रसक्तमुच्यते। 'स्त्रियः स्त्यायतेः' अपत्रपणार्थस्य लज्जनार्थस्य। लज्जन्ते[1] हि ताः। 'मेना मानयन्त्येनाः' पुरुषाः। 'ग्ना गच्छन्ति हि एनाः' मैथुनेन धर्मेण॥ 'अमेनांश्चिद्' 'ग्नास्त्वा कृन्तन्' इति निगमौ[2]।

मेना इत्यस्य

'आ प्र द्रव हरिवो मा वि वेनः[3] पिशङ्गराते अभि नः सचस्व। नहि त्वदिन्द्र वस्यो अन्यदस्त्यमेनांश्चिज्जनि[4]वतश्चकर्थ [ऋ० सं० ५।३१।२]॥ अवस्योरात्रेयस्यार्षम्। त्रिष्टुप्। ऐन्द्री। हे हरिव आभिमुख्येनास्मान्प्रकर्षेण द्रव। किंच। मा वि वेनः मा विगतकामो भूरस्मत्तः। हे पिशङ्गराते शोभनदान अभिसचस्व नः॥ किंच। नह्यन्यद्देवतान्तरं त्वत्तः प्रतिविशिष्टतरमस्ति यत्प्रतिपद्येमहि हे भगवन्निन्द्र वस्यो वसुमन्। किं कारणम्। अमेनांश्चित् अस्त्रीकानपि स्तोतॄन्जनिवत एव स्त्रीमत एव चकर्थ। करोषीत्यर्थः। यस्मात्त्वमेवंगुणविशिष्टस्तस्माच्च त्वामेव स्तुम इत्यभिप्रायः।

ग्ना इत्यस्य

'देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां प्रतिगृह्णामि ग्नास्त्वा कृन्तन्नपसोऽतन्वत धियो[5]ऽवयन्वरुणस्त्वा नयतु देवि दक्षिणे बृहस्पतये वासस्तेनामृतत्वमशीय मयो दात्रे भूयान्मयो मह्यं प्रतिग्रहीत्रे। क इदं कस्मा अदात्कामः कामायादात्कामो दाता कामः प्रतिग्रहीता कामः समुद्रमाविशत्कामेन त्वा प्रतिगृह्णामि कामैतत्ते'॥ वाससः प्रतिग्रहमन्त्रेऽनुषङ्ग एष मैत्रायणीयके[6] [१।९।४]। तद्वास[7] उच्यते। हे वासः देवस्य सवितुरादित्यस्य प्रसवे तेन प्रसूतोऽभ्यनुज्ञातोऽहं त्वां प्रतिगृह्णामि। अश्विनोर्देवयोर्बाहुभ्यां प्रतिगृह्णामि नैता-

---

१ क. ख. च. लज्जन्ति. २ ग. ज. °गमौ ।४४। आ प्र०; च. °गमौ ।४५। आप्र°. ३ ग. च. ज. घ. ट. वेनः। अवस्यो°. ४ च. जनिमत°. ५ क. ख. ग. ज. °तन्वत वयित्र्योऽवय°; घ. ट. ठ. ड. धियो वयित्र्योऽवय°. ६ क. ख. घ. ट. ठ. ड. °यणीयके ताण्ड्यब्राह्मणे च अन्यास्वपि शाखासु। तद्वा०; ग. ज. मैत्रावरुणीयके तद्वा°. ७ ठ. ड. तत्तद्वास°.

भ्यामेव बाहुभ्यां स्वाभ्याम् । पूष्णो देवस्य हस्ताभ्यां प्रतिगृह्णामि । किंच । ग्नास्त्वा कृन्तन् । स्त्रीभिस्त्वं कर्तितं[1] सूत्रकरणाभिप्रायेण । अपसः अल्पका अनुपजातपुंस्त्वा जननासमर्थाः कुविन्दपुत्रकास्त्वामतन्वत । ते हि कुविन्दानां परिकर्मकराः । धियोऽवयन्धीमन्तो[2] बुद्धिमन्तः कुश[3]-लास्त्वामवयन् । कुविन्दा[4] उतवन्तः । तदेवमभिनिष्पन्नं त्वां मह्यं बृहस्पतये बार्हस्पत्य आत्मन्यवस्थिताय वरुणो देवताविशेषो ददाति उदकपूर्वकं त्वं दीयसे । सोऽहमेवंगुणयुक्तस्त्वां प्रतिगृह्यामृतत्वममृतभावं यथाभिसंहितमेव अशीय अश्नुयाम् । त्वं[5] प्रतिगृह्यमाणं मा[6] मे मानस्यावखण्डनं कार्षीरित्यभिप्रायः । किंच । मयः सुखं दात्रे भूयाद्भवतु । सुखं[7] मह्यं प्रतिग्रहीत्रे[8] । किंच । कः प्रजापतिरयं कस्मै प्रजापतये एवादात् ददाति । योऽप्ययं ददाति सोऽप्ययं[9] यश्चादातायमपि प्रजापतिरेवेत्यभिप्रायः । वक्ष्यति हि ' क ईषते तुज्यते कः ' इति [निरु० १४ । २६] इति । किंच । कामः कामायैवादात्ददाति । पुण्यं भविष्यतीत्यनेन कामेन दाता[10] ददाति आच्छादनं भविष्यतीतीतरः प्रतिगृह्णाति । एवं कामो दाता कामः प्रतिग्रहीता । स[11] काम उच्यते । हे काम एतत्ते वासः सकामो भवेति ।

' शेपो वैतस इति ' एते नामनी ' पुंप्रजननस्य ' । ' शेपः शपतेः ' स्पृशत्यर्थे वर्तमानस्य । स्पृश्यते हि तेन स्त्री । ' वैतसो वितस्तं भवति ' । उपक्षीणं तद्भवति प्रागनुस्मरणास्त्रियाः । 'यस्यामुशन्तः प्रहराम' ' त्रिः स्म माह्नः ' इति निगमौ[12] ।

---

१ क. ख. घ. ट. ठ. ड. कर्तितः तन्तुकरणा°. २ क. ख. धीमत्यो बुद्धिमत्यः कुश°; घ. ट. ठ. ड. धीमन्त्यो । बुद्धिमन्त्यः कुश°. ३ क. ख. घ. ट. ठ. ड. कुशला वयित्र्यस्त्वा°. ४ क. ख. घ. ट. ठ. ड कुविन्दस्त्रियः कृतवंत्यः (क ख. कृतवत्यः); ग. ज. कुविन्दा कृतवन्तः. ५ घ. ट. ठ. ड. त्वं हि प्रतिगृह्यमाणवासः तव प्रसादान्ममैवमेतत्स्यात् । अमृतत्वभावान्मम मा खण्डनं°. ६ ग. ज. मा मे मा मेतस्य मान°. ७ क. ख. घ. ट. ठ. ड. °वतु । मयः सुखं°; च. सुखं मम प्रति° ८ क. ख. घ. ट. ठ. ड. °ग्रहीत्रे च. ९ क. ख. ग. ज. °प्ययं दातायम°; घ. ट. ठ. ड. °प्ययं दाता अयमपि प्रतिग्रहीता प्रजा°. १० ग. ज. 'दाता' नास्ति. ११ क. ख. घ. ट. ठ. ड. स एव काम°. १२ ग. ज. °गमौ । ४५ । तां°.

' तां पूषञ्छिवतमामेरयस्व यस्यां बीजं मनुष्या३ वपन्ति। या न॑ ऊरू उशती विश्रयाते यस्यामुशन्तः प्रहराम शेपम् ' [ऋ० सं० १० । ८५ । ३७] ॥ सूर्याया आर्षम् । कन्याप्रथमोपगमे विनियोगः । हे भगवन् पूषन् तामीरयस्व योनिं यस्यां योनौ बीजं शुक्रं मनुष्या वपन्ति । त्वत्कृतयोनिपोषे बीजमेतस्यामर्थवत्स्यात् । त्वदधीनो हि योनिपोष इत्यभिप्रायः । येयमस्माकमूरू उशती कामयमाना स्त्री विश्रयाते नानाप्रकारमाश्रयते तस्या या योनिस्तामीरयस्व उद्गमय । बीजग्रहणाय सुपुष्टां कुरुष्व । यस्यां योनौ उशन्तः पुत्रजन्म कामयमानाः प्रहराम प्रतिप्रक्षिपेम शेपम् ।

शेप इत्यस्य

त्रिः स्म माह्नः श्नथयो वैतसेनोत स्म मेऽव्यत्यै पृणासि । पुरूरवोऽनु ते केतमायं राजा मे वीर तन्व१ स्तदासीः [ऋ०सं०१०।९५।५]॥ उर्वश्या आर्षम् । त्रिष्टुप् । सा पुरूरवसा मा गास्तिष्ठेत्युक्ता सत्यनयर्चा पुरूरवसं प्रत्यब्रवीत् । हे पुरूरवः त्रिः स्म माह्नः त्रिरह्नो मामवधीस्त्वं वैतसेन शिश्नदण्डेन पूर्वम् । उत स्म मे अपि च यावान् कश्चिदभिलाषो मम मनस्यासीत्तं सर्वमेव त्वमव्यत्यै पृणासि व्यतिपूरितवानेवासि । अतस्तवाहमन्वायमनुगतवती केतम् । चेतसा अनुकूला तवाहमभवमित्यर्थः । किंच । हे वीर तदा तथानुकूलायाः सत्या राजा ईश्वरस्त्वमस्यास्तन्वो अस्य मच्छरीरस्य तदा आसीः नेदानीम् । त्वं संप्रति न तथा वर्तसे यथा पूर्वमतस्त्वयेदानीं नाहं समेष्य इत्यभिप्रायः ।

वैतस इत्यस्य

' अथैनेति ' एते नामनी ' उपदेशस्य ' । स पुनरुपदेशः स्त्रीपुन्नपुंसकेषु भिन्नलिङ्गोऽतस्त्रिष्वपि प्रदर्श्यते ।

---

१ ग. च. ज. °वतमामेरयस्व । सूर्याया°; घ. ट. °वतमा० शेपम्. २ ग. च. ज. शेपम् । ४६ । त्रिः°. ३ ग. च. ज. श्नथयो वैतसेन । उर्वश्या°; घ. ट. श्नथ० स्तदासी°. ४ घ. ट. ठ. ड. मा मामवधी°. ५ क. ख. घ. ट. ठ. ड. °स्तन्वो मच्छरी°. ६ क. ख. घ. ट. ठ. ड. °आसीः तदानीं त्वं । संप्रति न तथा°; ग. ज. °आसीः तदानीं त्वं मां संप्रति प्रति न तथा वर्तसेव यथा°; च. °आसीः । नेदानीं त्वं संप्रति तथा वर्तसे°. ७ क. ख. घ. ट. ठ. ड. भिन्नो भवति । अतस्त्रि°. ८ ग. च. ज. °र्श्यते । ४७ । तत्र°.

तत्र[1] 'अया ते अग्ने समिधा विधेम[2] प्रति स्तोमं शस्यमानं गृभाय । दहाशसो रक्षसः पाह्य१स्मान्द्रुहो निदो मित्रमहो अवद्यात्' [ऋ० सं० ४ । ४ । १९] ॥ इति 'स्त्रियाः' उपदेशः ।

अया इत्यस्य स्त्रियामुपदेशः

वामदेवस्येयमार्षम् । त्रिष्टुप् । राक्षोघ्ने[3] कर्मणि विनियोगः । हे भगवन्नग्ने अया अनया समिधा ते तव विधेम परिचर्यां कुर्मः । स त्वमेवमस्माभिः परिचर्यमाणः शृणु यत्कुरुष्व । प्रतिगृभाय प्रतिगृह्णीष्वेमं[4] स्तोमं स्तोत्रमस्माभिः शस्यमानमुच्चार्यमाणं दह एतान् अशसः अशंसितॄन् अस्तोतॄनात्मनो द्रुहश्च द्रोग्धॄनस्माकमेतान्[5] राक्षसान्निदः निन्दितॄंश्च । किंच । पाहि रक्षास्मान्हे मित्रमहः मित्राणां पूजयितः अवद्यादवदनीयात्कर्मणः । पाहि[6] पापादित्यर्थः[7] ।

'एना वो अग्निं[8] नमसोर्जो नपातमा हुवे । प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम्' [ऋ० सं० ७ । १६ । १] ॥ इति 'नपुंसकस्य' उपदेशः ।

एना इति नपुंसकस्य

वसिष्ठस्यार्षम् । बृहती । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १३] । एना वः अनेन युष्माकं नमसा अन्नेनाभ्युद्यतेन ऊर्जोनपातम् अपां पौत्रम् अथवा अन्नस्यैव[9] पौत्रम् । आहुतिभ्य आपोऽद्भ्योऽग्निरनया प्रणाडिकयान्नस्य पौत्रोऽग्निः । तमूर्जोनपातमग्निमाहुवे आह्वये । किंलक्षणम् । प्रियमिष्टं देवानां च मनुष्याणां च चेतिष्ठमतिशयेन चेतनावन्तम् अरतिम् अलंमतिं[10] पर्याप्तमतिं स्वध्वरं शोभनयज्ञं विश्वस्य यजमानगणस्य एष योऽधिकृतः कर्मणि तस्य दूतम् । हे ऋत्विग्यजमानास्तं व आशासमृद्धयेऽहमाह्वये । स चाहूतो देवान्प्रति दूत्यं[11] करिष्यतीत्यभिप्रायः ।

---

१ ठ. ड. 'तत्र' नास्ति. २ ग. च. ज. घ. ट. विधेमेति स्त्रियाः°. ३ क. ख. रक्षो°; ग. ज. रक्षोघ्नक°; च. राक्षो° र. ४ क. ख. घ. ट. ठ. ड. 'गृहाणेमं°. ५ क. ख. घ. ट. ठ. ड. द्रोग्धॄ°. ६ क. ख. घ. ठ. ठ. ड. 'पाहि' नास्ति. ७ ग. च. ज. °त्यर्थः । ४८ । एना°. ८ ग. च. ज. घ. ट. अग्निमिति नपुंसक°. ९ क. ख. घ. ट. ठ. ड. अन्नानां पौत्रं; ग. ज. अपौत्रं. १० क. ख. घ. ट. ठ. ड. अलमतिं. ११ क. ख. ग. ज. दौत्यं.

'एना पत्या तन्वं संसृजस्वेति पुंसः' उपदेशः। 'इह प्रियं प्रजया ते समृध्यतामस्मिन्गृहे गार्हपत्याय जागृहि। एना पत्या तन्वं संसृजस्वाधा जिव्री विदथ मा वदाथः' [ऋ० सं० १०। ८५। २७]॥ सूर्याया आर्षम्। जगती। वधूरनया गृहान्प्रवेश्यते [आश्व० गृ० १। ८। ८]। सोच्यते। हे वधु इहैतस्मिन्गृहे प्रजया युक्तायाः सत्यास्तव यत्प्रियं तत्समृध्यताम्। किंच। अस्मिन्गृहे त्वं गार्हपत्याय जागृहि। गृहपतिभावायावहिता भवेत्यर्थः। किंच। एना पत्या अनेन भर्त्रा सह स्वां तनुं संसृजस्व मिश्रीकुरु। अथैवं सौमनस्ये वर्तमानौ जिव्री जीर्णौ यावत्तावदवियुज्यमानौ परस्परेण विदथं यज्ञम् अभिमुख्येनावस्थितौ सन्तौ यज्ञसंबद्धानि वचांसि वदतमित्याशीः।

तस्यैव पुंसः

'एना वो अग्निं नमसा' 'एना पत्या' इति समानेऽप्येनाशब्दे स्वरान्ते एतस्मिन्नुपपदविशेषादेकस्य नपुंसकविषयत्वमेकस्य पुरुषविषयत्वम्। एकत्र नम इत्युपपदमेकत्र पतिशब्दः।

'सिषक्तु सचते इति' एते नामनी 'सेवमानस्य'। 'स नः सिषक्तु' 'सचस्वा न' इति निगमौ।

'यो रेवान्यो अमीवहा वसुवित्पुष्टिवर्धनः। स नः सिषक्तु यस्तुरः॥ [ऋ० सं० १। १८। २]॥ मेधातिथेरार्षम्। अग्न्युपस्थाने विनियुक्ता [मान० श्रौ० १। ६। २। ११]। सोमानं स्वरणमित्येस्या ब्राह्मणस्पत्याया इयमनन्तरा। तेनेयमपि ब्राह्मणस्पत्यैव स्यात्। उक्तं चाह्वरकाणां 'ब्राह्मणस्पत्याभिरग्निमुपतिष्ठेत' इति। हे भगवन्ब्रह्मणस्पते यो रेवान्रयिमान्धनवान् अमीवहा अभ्यमनहा रोगहा वसुवित् वसुनो धनस्यापूर्वस्यापि लब्धा यश्च पुष्टिवर्धनः धनपोषस्य वर्धयिता

सिषक्तु इत्यस्य

१ ग. च. ज. °देशः। ४९। इह°. २ ग. च. ज. प्रजया समृध्यतामिति। सूर्या°; घ. ट. प्रजया० वदाथः. ३ ग. ज. त्रिष्टुप्. ४ ग. ज. °या विहिता. ५ क. ख. घ. ट. ठ. ड. तन्वं तनुं. ६ क. ख. घ. ट. ठ. ड. एकस्मि°. ७ ग. च. ज. सिषक्ति. ८ ग. च. ज. गमौ। ५०। यो°. ९ ग. च. ज. घ. ट. अमीवहेति। मेधा°. १० ठ. ड. सोमानं स्वरणमिति सर्वा ऋक् पठ्यते. ११ ठ. ड. 'इति' नास्ति. १२ ठ. ड. 'च' नास्ति.

सोऽस्मान्सिषक्तु सेवतां पुत्रो युष्मत्प्रसादायश्च तुरः तूर्णकारी । पटु-रित्यर्थः[1] ।

' स नः पितेव सूनवेऽग्ने सूपायनो भव । सचस्वा नः स्वस्तये ' [ऋ० सं० १ । १ । ९] ॥ मधुच्छन्दस आर्षम् । अग्न्युपस्थाने विनियुक्ता [मान० श्रौ० १ । ६ । २ । ९] । हे भगवन्नग्ने यं त्वां वयं परिचरामः सोऽस्माकं त्वं[2] पितेव

सचतेरित्यस्य

सूनवे पुत्राय[3] सूपायनः सूपगमनः सूपचारो भव । उपचीर्णश्च सचस्वा नः स्वस्तये सेवस्व नः स्वस्तये स्वस्त्ययनाय ।

निगमप्रसक्तमुच्यते । ' स्वस्तीति एतत् ' अविनाशिनः ' अर्थस्य ' नाम ' । अन्ये त्वधीयते ' अविनाशनाम ' इति । तेषामविनाशस्यैव नाम । तत्त्वमुक्तमधुना व्युत्पत्तिं ब्रवीति । ' अस्तिः ' अयम् ' अभि-पूजितः ' सुपूर्वः सन्नुच्यते स्वस्तीति ।

' भ्यसते रेजते इति ' एते नामनी ' भयवेपनयोः ' । ' यस्य शुष्मा-द्रोदसी ' ' रेजते अग्ने पृथिवी ' इति ' निगमौ[4] ' । यो[5] जात एवेति । उपरिष्टाच्छेषः[6] [निरु० १० । १०] ।

' प्र चित्रमर्कं गृणते तुराय मारुताय स्वतवसे भरध्वम् । ये सहांसि सहसा सहन्ते रेजते अग्ने पृथिवी मखेभ्यः[7] '

रेजते इत्यस्य

[ऋ० सं० ६ । ६६ । ९] ॥ भरद्वाजस्येयमार्षम् । त्रिष्टुप् । चातुर्मास्ये वैश्वदेवे पर्वणि याज्या [आश्व० श्रौ० २ । १६] । ' आग्निमारुतीं पृश्निमालभेत वृष्टिकामः ' [मैत्रा० सं० २ । ५ । ७] इत्यस्य पशोरियं षडर्चे च [मैत्रा०सं० ४ । १० । ३] । हे स्तोतारः प्रभरध्वं चित्रमर्कं चायनीयं स्तोमं गृणते स्तुवते स्तनयित्नुशब्देन कृत्स्नं जगदुपशब्दयते तुराय त्वरमाणाय स्वतवसे स्वात्मबलावष्टम्भिने मारुताय गणाय । कीदृशानां पुनर्मरुतां गणाय[8] प्रभरध्वमिति । ये मरुतः सहसा स्वेन बलेन सहांसि

१ ग. च. ज. °त्यर्थः । ५१ । स°. २ क. ख. घ. ठ. ठ. ड. 'त्वं पितेव' नास्ति. ३ ठ. ड. °पुत्राय पितेव सूपा°. ४ ग. °गमौ ॥ ५२ ॥ यो°. ५ ठ. ड. सर्वा ऋक् पठ्यते. ६ च. ज. °च्छेषः ॥५२॥ प्र°. ७ ग. च. ज. गृणते तुराय । भरद्वा°; घ. ड. गृणते॰ मखेभ्यः. ८ ग. च. ज. गणो यस्मै प्रभ°.

परेषां बलान्यभिभवन्ति रेजते बिभेति कम्पते वा येभ्यो मरुद्भ्यः पृथिवी मखेभ्यः । महद्भ्य[1] इत्यर्थः । य एवंगुणयुक्तो[2] मरुतस्तेषां यो गणस्तस्मै प्रभरध्वं चित्रमर्कम् । त्वमपि हे अग्ने वहैतद् द्रव्यं[3] तेभ्यः । यदा तावन्मारुतमेव केवलं हविस्तद्दैवमग्निप्रधानः । यदा पुनराग्निमारुतं तदा प्रभरध्वं चित्रमर्कमग्नये मारुताय च गणायेति स्तोतॄन्संबोध्य ततोऽग्निं ब्रवीति । हे भगवन्नग्ने शृणु त्वमप्येतमर्कमेवंगुणयुक्तैर्मरुद्भिः सहेति[4] ।

'द्यावापृथिवीनामधेयानि' एभ्यः 'उत्तराणि' द्विसंबन्धेनैवोच्यन्ते । कियन्ति पुनस्तानि । 'चतुर्विंशतिः' । कतमानि पुनस्तानि । 'स्वधे पुरन्धी' [निघ० ३ । ३०] इत्येवमादीनि । सर्वस्यास्य भूतग्रामस्य धारयित्र्यौ[5] स्वधे । पुरन्धी पुरु बहु[6] धारयित्र्यौ इत्येवमादि योज्यम् । द्विवचनेन युक्तानि द्यावापृथिव्योर्नामानि । तयोः साहचर्याख्यापिका[7] 'एषा' ऋग् 'भवति' । साहचर्ये हि सति द्विवचनयोग उपपन्नरूपो भवति नाम्नाम् ॥ २१ ॥[8]

कतरा पूर्वा कतरापरायोः कथा जाते कवयः को वि वेद । विश्वं त्मना बिभृतो यद्ध नाम वि वर्तेते अहनी चक्रियेव [ऋ० सं० १ । १८५ । १] ॥ कतरा पूर्वा कतरापरैनयोः कथं जाते कवयः क एने विजानाति सर्वमात्मना बिभृतो यद्धैनयोः कर्म विवर्तेते चैनयोरहनी अहोरात्रे चक्रयुक्ते इवेति द्यावापृथिव्योर्महिमानमाचष्ट आचष्टे[9] ॥ २२ ॥

[10]इति तृतीयाध्यायस्य चतुर्थः पादः ॥

कतरा पूर्वा कतरेति । अगस्त्यस्यार्षम् । त्रिष्टुप् । पृष्ठ्याभिप्लवयोः षष्ठेऽहनि [आश्व० श्रौ० ७ । ७] महाव्रते च तृतीये सवने

---

१ ग. ज. मरुद्भ्य इ°. २ च. °युता म°. ३ ग. ज. द्रष्टव्यं. ४ घ. ट. ठ. ड. सह गृहाणेति. ५ घ. ट. ठ. ड. धारयित्र्यो. ६ ठ. ड. 'बहु' नास्ति. ७ क. ख. ग. घ. ट. ठ. ड. °ख्यायिका. ८ क. ख. ४; ग. ५३ । २४ खण्डः; च. ज. ५३; घ. ट. अङ्को नास्ति; ठ. ॥ २१ ॥ इति निरुक्तवृत्तौ तृती० एकविंशतिः खण्डः; ड. ॥ २१ ॥ इति ऋज्वर्थायां निरुक्तटीकायां तृतीयाध्याये एकविंशतिः खण्डः. ९ क. ख. ५; छ. त. २५; द. ६ । २५. १० ङ. थ. ब. ठ. ड. 'इति० पादः' नास्ति.

[ऐ० आ० ५ । ३ । ३] वैश्वदेवे शस्त्रे शस्यते । स्वयमेव ताव-द्वितर्कयन्नुत्पन्नसंशयो मन्त्रदृगब्रवीति । कतरा[1]नयोः द्यावापृथिव्योः पूर्वा कतरा त्वपरा । न हि पौर्वापर्यमनयोः स्फुटं लक्षयितुं शक्यते । केन प्रकारेणैते जाते स्याताम् । किं पौर्वापर्येणोत युगपद्भवेताम् । अपि तावत् हे कवयः को विवेद । कः[2]चिद्विस्पष्टं जानाति[3] । अहं त्वेतावच्छक्नुयामागमाद्वक्तुं तस्मादुद्भूतस्य हिरण्मयस्याण्डस्यैते शकले इति । एवं ह्याह । 'ते ऑ[4]ण्डकपाले रजतं च सुवर्णं चाभवतां तद्यद्रजतं सेयं पृथिवी । यत्सुवर्णं सा द्यौः ' [छा० उ० ३ । १९ । १—२] इति । तेन ज्ञायतेयुगपदेवैते उत्पन्ने स्यातामिति । किंच । विश्वं सर्वं त्मना आत्मनैव बिभृतो धारयतः । यद्ध नाम यदर्थमनयोर्नाम नमनं यस्माद्भूतग्रामधारणार्थमेते नैते[5] परिणामत्वेन तत्सर्वमेते बिभृतः । किंच । विवर्तेते च विपर्ययेण वर्तेते चैनयोरेवान्तर्भूते अहोरात्रे चक्रियेव चक्र-युक्ते इव । चक्रयुगलमिव अवियोगेन संयुक्ते संबद्धे इत्यर्थः । मन्त्रव्या-ख्यानेन गतार्थमेतद्भाष्यमिति ' द्यावापृथिव्योर्महिमानमाचष्ट आचष्ट ' इत्येतत् । अनेन मन्त्रेण द्यावापृथिव्योर्महिमानं मा[6]हाभाग्यं मन्त्रदृगाचष्टे ।

द्यावापृथिव्योः साहचर्यख्यापिका ऋक्

एवमेतन्नैघण्टुकं प्रकरणं परिसमाप्तम्[7] । अतःपरमैकपदिकं भवति यस्या[8]-यमादिः ' एकार्थमनेकशब्दमित्येतदुक्तम्[9] ' इत्येवमादि ॥ २२[10] ॥

इति[11] श्रीजम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ
ऋज्वर्थायां निरुक्तवृत्तौ अष्टमोऽध्यायः[12] ॥ ८ ॥

---

१ घ. ट. कतराः अन°; ठ. ड. कतरा अन°. २ क. ख. घ. ट. ठ. ड. कश्चिदपि विस्प°. ३ क. ख. घ. ट. ठ. ड. न जानाति. ४ क. ख. घ. ट. ठ. ड. अण्ड°. ५ क. ख. ग. ज. घ. ट. ठ. ड. °मेतेन विपरिणा°. ६ क. ख. ग. च. ज. ड. महा°. ७ ग. °प्तम् । ५४ । अतः°. ८ ग. ज. तस्या°. ९ ठ. ड. °तदुक्तमथ यान्यनेकार्थान्येकशब्दानि तान्यतोनुक्रमिष्याम इति ॥ २२ ॥ इति श्री°. १० क. ख. ५; ग. २५; च. ज. ५४; इतरेष्वङ्को नास्ति. ११ ग. च. ज. ' इति श्री ' नास्ति. १२ च. ड. °ध्यायः समाप्तः; ठ. °ध्यायः समाप्तः । द्वाविंशतितमः खण्डः । निघण्टुमारभ्याष्टमोऽध्यायः.

[1]कर्मनामानिपरि[2]षेद्यंनहि[3]ग्रभायशा[4]संद्वह्निर[5]भ्रांतेवन[6]जांसयेम[7]नुष्य-नामानित[8]र्द्वद्यद[9]शावनि[10]भ्योऽभीदंत्व[11]यावयंय[12]त्रासुपर्णाबहु[13]नामानित-[14]नूत्यजेवकु[15]हस्विच्च[16]तुरश्चित्प्रि[17]यमेधवदथ[18]लुप्तोपमान्य[19]र्चति[20]द्विशोर[21]म्भः [22]कतरापूर्वा द्वाविंशतिः *।

इति निरुक्ते[1] पूर्वषट्के तृतीयोऽध्यायः[2] ॥ ३ ॥

---

* १ छ. त. द. खण्डशृङ्खला नास्ति.

---

१ ठ. निरुक्तपूर्व; ° ड. नैरुक्तपूर्व°. २ ड. °ध्यायः समाप्तः.

अथ नैगमं काण्डम् ।

चतुर्थोऽध्यायः ।

प्रथमः पादः ।

हरिः ॐ३म् । एकार्थमनेकशब्दमित्येतदुक्तमथ यान्यनेकार्थान्येकशब्दानि तान्यतोऽनुक्रमिष्यामोऽनवगतसंस्कारांश्च निगमांस्तदैकपदिकमित्याचक्षते जह्वा जघानेत्यर्थः ॥ १ ॥

'एकार्थमनेकशब्दमित्येतदुक्तम्' । किमर्थमिदमुच्यते । न हि यद्यद्वृत्तं[1] तत्तद्वक्तव्यमिदं वृत्तमिदं वर्तिष्यत इति । यद्यद्वृत्तं तत्तदनुक्तमपि प्रतीयते यच्च वक्ष्यमाणमिति । आह । संक्षेपतो निगमनाय यदुक्तं यद्वा वक्तव्यं प्रतिजानीष्वे[2] । समासविस्तराभ्यां हि सुखमाधस्त्यं प्रकरणमवधारयिष्यामहे । गृहीतार्थसंक्षेपाच्च[3] विस्तरेणोत्तरग्रन्थमुच्यमानं सुखमवभोत्स्यामहे । अपि चोक्तमन्यत्रापि 'विस्तीर्य हि महज्ज्ञानमृषिः[4] संक्षेपतोऽब्रवीत् । इष्टं[5] हि विदुषां लोके समासव्यासधारणम्' [महाभा० आदि० १।६५] ॥

व्याख्यातस्य विषयस्य संक्षेपेण कथने कारणम्.

शृणु समासतो यदुक्तं यच्च वक्तव्यम् । 'एकार्थमनेकशब्दम्' इत्येतत्पुरस्तात्सूचितम् 'एतावन्तः समानकर्माणो धातव एतावन्त्यस्य सत्त्वस्य नामधेयानि' इत्यनेन वाक्येन [निरु० १ । २०] । यदेतत् 'गौरिति पृथिव्या नामधेयम्' [निरु० २।५] इत्यत आरभ्य नामाख्यातोपसर्गनिपातानां प्रपञ्चनं च तत्त्वपर्यायभेदसंख्यासंदिग्धोदाहरणतन्निर्वचनव्याख्याप्रविभागेनोक्तं[6][7] स एवं[8] नैघण्टुकस्य प्रकरणस्य निगमव्याजेन[9] सर्वथाप्यर्थः संक्षेपत उक्तः । शास्त्रसंबन्धश्चैवमनुसृतो भविष्यति प्रकरणद्वयस्य चास्यैवमपुनरुक्तता प्रदर्शिता भविष्यतीत्यनेनाभिप्रायेणैकार्थमनेकशब्दमित्यु-

---

१ च. °द्वृत्तं ˇ तत्त° यच्च वक्ष्यमाणं. २ क. ख. ग. ज. °जानीथ; घ. ट. ड. °जानीय्य; च. °क्तव्यं ˇ प्रतिजानीज्य [षे]° तत्; ठ. प्रतिजनिष्य समा°. ३ क. ख. ग. ज. ठ. ड. गृहीतार्थं सं°. ४ क. ख. तमज्ञान°; ट. महज्ज्ञान° तमज्ज्ञा. ५ क. ख. इत्थं; ट. इष्टं° त्थं. ६ क. ख. ग. ज. व. ट. ठ. ड. तत्त्वभेदपर्याय. ७ ग. ज. °नोक्तमित्युक्तं । नैव°. ८ क. ख. एव; ट. एवं° व. ९ ग. ज. निगमनव्या°.

कर्म । एकोऽर्थः पृथिव्यादिरनेकेषां गवादिशब्दानां यत्र तत्त्वभूतः कथ्यतेऽनेके च गवादिशब्दाः पृथिव्यादेरेकस्यार्थस्य यत्राभिधायिनः कथ्यन्ते तदिदमेकार्थमनेकशब्दं प्रकरणम् । अत्रैकेनार्थेनानेके शब्दा लक्ष्यन्तेऽनेकैः शब्दैरेकोऽर्थः । ततो लक्षितलक्षणया वृत्त्या प्रकरणं लक्ष्यते । अत्र पुनर्यद्यपि गतिकर्मणां द्वाविंशतिशतसंख्यानामविशिष्टं गमनमेकोऽर्थ उक्तस्तथापि प्रसिद्ध्यनुपरोधाय कसति लोठते श्चोतते इत्येवमादयः प्रतिनियतसत्त्वगमनविषया एव द्रष्टव्याः । तद्यथा य एवोत्कटिक उरसा वा गच्छति स एव कसतीत्युच्यते नेतरो य ऊर्ध्वो गच्छति । तथा च य एव निम्नेन प्रदेशेन कश्चिदचेतनो लोष्टादिरन्यो वा चेतनः पुरुषादिरकामकारेण गच्छति स एव लोठत इत्युच्यते नान्यः । तथा च । यदेव द्रवद्रव्यं किंचित्स्रवति तदेव श्चोतत इत्युच्यते नान्यत् । एवं गच्छतिकर्मणामेकार्थत्वेऽपि सति प्रसिद्धिसामर्थ्याद्गमनविशेषेषु यथार्थं विनिवेशो द्रष्टव्यः । देशान्तरप्राप्तिस्तु चलनपूर्विका सर्वेषां समानं कार्यमित्यत एकार्थत्वमेषामुक्तम् । सामान्यशब्दाश्च क्वचिद्विशेषवाचिनो भवन्ति विशेषशब्दाश्च क्वचित्सामान्यवाचिनस्तदप्युपेक्षितव्यम् ।

एकार्थानामनेकेषां शब्दानां विशिष्टोऽर्थो यथा गत्यर्थानाम्

'एकार्थम्' अनेन समासतो नैघण्टुकं प्रकरणमनुसृतम् । अथेदानीं यद्व्याख्यातव्यं तत्समासतः प्रतिज्ञायते । 'यान्यनेकार्थान्येकशब्दानि' पुरस्तात्समासतः सूचितान्येतावतामर्थानामिदमभिधानमित्येवं [निरु० २।५] 'तान्यतः' परम् 'अनुक्रमिष्यामो' व्याख्ययेत्यभिसंबन्धः । किंलक्षणया पुनरिह व्याख्येति । तदुच्यते 'तत्त्वं पर्यायशब्देन व्युत्पत्तिश्च द्वयोरपि । निगमो निर्णयश्चेति व्याख्येयं नैगमे पदे' ॥ यान्येतानि दयत्यकूपारादीनि पदान्यनेकैरर्थैरुपदयादानदहनहिंसादिभिरर्थवन्ति यानि चैतान्यर्थजातान्युपदयादानदहनहिंसादीन्येकशब्दवाच्यानि तान्येवमितरेतरविशेषणविशेष्यभावलक्षणोपलक्षितान्येकप्रकरणतामुपगतान्येवंप्रकारयैकपदिकप्रकरणव्याख्ययानुक्रमिष्यामः । वर्णयिष्याम इत्यर्थः । अत्रार्थ-

व्याख्याया लक्षणम्

१ ग. ज. 'इत्युक्तं' नास्ति. २ घ. ट. ठ. ड. ज. लोष्ठादि°. ३ ग. ज. स एवं; च. सँ एवं. ४ ग. ज. प्रसिद्धसा°. ५ ग. ज. °नुस्रुतं; च. °नुस्रुतं° सू. ६ घ. ट. यातान्येता°.

स्याप्रतीयमानस्य पर्यायाभिधानेन विभज्य प्रतिपादनं व्याख्या । शब्दस्यापि व्युत्पादनं व्याख्या । एवमेते द्वे व्याख्ये । तयोरर्थपरिज्ञानमेकस्याः कार्यं शब्दपरिज्ञानमेकस्याः । तदेतदुभयमप्येकैकस्मिन्नैगमे पदे यथासंभवं व्याख्यास्यते । आह । किमनेकार्थान्येव केवलान्यस्मिन्प्रकरणे व्याख्यायन्ते । नेत्युच्यते । अनवगतसंस्कारांश्च निगमान् । अनवगतसंस्कारान् अविज्ञातसंस्कारानित्यर्थः । येषां प्रकृतिप्रत्ययादिसंस्कारो न साकल्येन ज्ञापितस्तांश्च निगमांस्तत्रैव व्याख्यास्यामः । पूर्वाणि चानेकार्थान्यनवगतसंस्कारांश्चेति चशब्दः । तदेतदेवंप्रकारं प्रकरणं यत्रैतदुभयं व्याख्यायते 'तदैकपदिकमिति' अनेन नाम्नान्येऽप्याचार्या 'आचक्षते'। निरूढा हीयमस्मिन्प्रकरणे संज्ञेत्यभिप्रायः। पूर्वस्मिन्प्रकरणे गणशः पदानां विरचनामपेक्ष्यैतदैकपदिकमुच्यते । अत्र ह्येकैकमेव पदं समाम्नातम् । तद्यथा । 'जहा निधा' इत्येवमादीनि । यत्र पुनः क्वचिदनेकान्यपि समाम्नातानि तद्यथा 'देवो देवाच्या कृपा' 'सोमो अक्षाः' इत्येवमादीनि तत्रैव तत्प्रयोजनं वक्ष्यामः ।

ऐकपदिकप्रकरणविषयः

ऐकपदिकमित्यस्य नाम्नः प्रयोजनम्

एवं प्रकरणार्थं संक्षेपतः प्रतिज्ञाय क्रमेण वर्णवृत्तित्वाच्च प्रथमं यत्पदं तदुपादीयते 'जहा' [निघ० ४ । १ । १] इति । आह । किमेतदनवगतसंस्कारमुतानेकार्थम् । उच्यते । अनवगतसंस्कारम् । कथम् । शृणु । जघानेत्येवमवस्थितेनावगतसंस्कारेण योऽर्थ उच्यते स च जहेत्यनेनानुपपन्नसंस्कारेणोक्तो भवति । अत्र हन्तेर्जहातेश्च संदेह इति भाष्यकारेणावधृतं 'जघानेत्यर्थः' इति । आह । कुतः पुनर्विशेषावधारणं हन्तेरेवात्र रूपं न पुनर्जहातेरिति । उच्यते । निगमात् । कतमः पुनरसौ निगम इति ॥ १ ॥

---

१ क. ख. °ज्ञायते; च. ट. ज्ञापित° यते. २ क. ख. व. ठ. ड. °मान् अत्रैव; च. °मान् तत्रैव° अ; ट. °मानत्रैव° मान् त. ३ ग. च. ज. क्रमवर्णवृ°. ४ ग. ज. 'शृणु' नास्ति; च. कथं °जघाने° शृणु. ५ ठ. ड. ॥ १ ॥ इति नैरुक्तटीकायां चतुर्थाध्याये प्रथमः खण्डः.

को नु मर्या अमिथितः सखा सखायमब्रवीत् । जहा को अस्मदीषते [ऋ० सं० ८ । ४५ । ३७] ॥ मर्या इति मनुष्यनाम मर्यादाभिधानं वा स्यान्मर्यादा मर्यैरादीयते मर्यादा मर्यादिनोर्विभागो मेथतिराक्रोशकर्मापापकं जघान कमहं जातु कोऽस्मद्भीतः पलायते निधा पाश्या भवति यन्निधीयते पाश्या पाशसमूहः पाशः पाशयतेर्विपाशनात् ॥ २ ॥

को नु मर्येति । त्रिशोकस्येयमार्षम् । गायत्री । महाव्रते महदुक्थे तृचाशीतिषु शस्यते [ऐ० आ० ५ । २ । ३] । अस्यामृचि जहेत्यस्य शब्दस्य पूर्वोत्तरपदाविरोधप्रकरणशब्दसारूप्यार्थोपपत्तिभिः संस्कारानवगमेऽपि सति हन्तेरेव विशेषेणार्थोऽवतिष्ठते न जहातेः । कथमिति । शृणु । मा[3] न एकस्मिन्नागसि वधीः हे शूर मा द्वयोरागसोर्वधीः । अपि च त्रिष्वप्यागस्सु मा वधीः । भूरिष्वपि च बहुतरेष्वप्यपराधेषु मा वधीरित्येतस्मिन्प्रकरणे ब्रवीति 'को नु मर्याः' इति । हे मर्या मनुष्या युष्मानेव तावत्पृच्छामि अमिथितः अनाक्रुष्टः परुषमपि वा किंचिदनुक्तः अपि च सखा समानख्यानः सखायमेव समानख्यानमेवं सन्तं यथा भवतामहं यज्ञे समानख्यान एवं सन्तमब्रवीत् । को न्वेवमाह अमिथितः अनाहतः अनाक्रुष्टो ब्रूयात् कश्चिद्यथा यूयमनाहताः सन्तो मां ब्रूत मा वधीरिति । जहा को अस्मदीषते । अपापकशब्दोऽत्र भाष्यकारेणाध्याहृतः प्राग्जहाशब्दस्यार्थोपद्योतनार्थम् । अपापकं सन्तं कमहं जघान हतवान् जातु । कदाचिदित्यर्थः । 'अपापकं कमहं जातु' इति सर्वमेतदध्याहृतं भाष्यकारेण जहाशब्दस्य निराकाङ्क्षीकरणार्थमधस्ताच्चोपरिष्टाच्च । एवं हि जहाशब्दः परिसमाप्तार्थो भवति । न कदाचिदपि कश्चिदपापको मया हतपूर्व इति पापकारिणं तु हन्मीत्यभिप्रायः । ते यूयमपापा एवाजस्त्रं

'जहा' इत्यनवगतसंस्कारम्

---

१ छ. त. द. ' मर्यैरादीयते ' नास्ति. २ क. ख. ठ. ड. ' शृणु ' इत्यस्यानन्तरं 'मा न एकस्मिन् ' [ऋ० सं० ८ । ४५ । ३४] इत्यृक्पठ्यते. ३ ठ. ड. हे शूर इन्द्र नोऽस्मान् एकस्मिन्नागसि अपराधे मा वधीः मा हिंसीः । मा द्वयोः°. ४ ग. ज. ब्रवीरिति; च. ब्रवीरिति. ५ ठ. ड. °मेवं सन्तं. ६ ग. ज. ' अमिथितः ' नास्ति. ७ ग. ज. हतः पूर्व°; च हतः पूर्व° त.

भूयास्थ न वो हनिष्यामि । यत्पुनरेतदुक्तं भवद्भिः 'भूरिष्वप्यागस्सु मास्मान्वधीः' इति कथमागस्कारी न हन्यते । श्वा पुरोडाशं समवलिह्यान्न च कस्यचित्कस्मिंश्चिदपि स्वता[1] स्यात्सर्वं वासमञ्जसमेव स्याद्यदि पापकारिणो न हन्येरन् । अथ मनुष्यानपापानपि त्वं हंस्येवेत्यत्र ब्रूमः । कोऽस्मदस्मत्तोऽपापकारी सन् भीतः ईषते । पलायत इत्यर्थः । न कश्चिदप्यपापकारी मत्त उद्विजमानः पलायते । स हि शुद्धेन चेतसाभिमुख एव मामभ्येति । य एव तु पापकारी भवति स एवात्मापराधशङ्कितया बुद्ध्यास्मत्तो भीतः पलायत इत्यभिप्रायः । अत्रापि कोऽस्मदित्येतस्मात्पञ्चमीयोगादीषतेर्गमनमात्रसामान्यवाचिनः सतो गमनविशेषे[2] पलायनेऽवस्थानम् । यो हि यस्माद्बिभेति स तस्मात्पलायते । भीतशब्दश्चात्राध्याहृतो न ह्यभीतः कश्चित्पलायत इति । एष समस्तार्थः ।

अथैकपदनिरुक्तम् । 'मर्या इति' मनुष्यनामसु पठितम् (निघ० २ । ३ । १२) । इहापि चैतत् 'मनुष्यनाम' एवं । तस्योक्ता व्युत्पत्तिः 'मर्यो मनुष्यो मरणधर्मा' (निरु० ३ । १५) इति । अथ 'वा मर्यादाभिधानम्' एतदत्र 'स्यात्' न मनुष्यनाम । यदा मर्यादाभिधानमेतदभिप्रेतं भवति तदैवमर्थवत्तास्य योजयितव्या । 'मर्यादा मर्यैरादीयते' । कां[3] न्वेषा मर्यादा यतो धर्मज्ञाः सन्तो यूयमनाहता अनाक्रुष्टाश्चासदभियोगं सखायः[4] सन्तो मम सख्युर्दत्तं मा वधीरिति । नैतन्न्याय्यमित्यभिप्रायः । 'मर्यादा मर्यादिनोर्विभागः' । मृता[5] या भूमिरुपक्षीणा सा मर्येत्युच्यते । विषयान्त इत्यर्थः । आदिरन्यस्य विषयस्योपक्रम उच्यते । मृताया[6]श्च भूमेरादेश्च विभागकारिणी या भूमिः सा मर्यादेत्युच्यते । 'मेथतिराक्रोशकर्मा' । चतस्रः पत्न्योऽश्वमभिमेथन्तीति प्रसिद्धमश्वमेधे मेथतेराक्रोशकर्मत्वम् । लोकेऽपि च ईंयालो[7] मेथनक इत्युच्यते । स ह्यभीक्ष्णमाक्रुश्यते आक्रोशति च सः ।

'अपापकम्' इत्यस्य भाष्यपदस्यापरो व्याख्यामार्गः । को न्वेवं ब्रूयादपापकं सन्तं मा वधीरिति । जघान कमहं जातु पापकमपापकं वा ।

---

१ क. ख. घ. ट. ठ. ड. श्वता; च. स्वता° श्व. २ घ. ट. ठ. ड. °विशिष्टे. ३ ग. ज. त्वेषा. ४ ग. सख्याय; च. सखायः° खा; ज. संख्यायः. ५ क. ख. ठ. ड. संश्रिता; च. ट. मृता° संश्रि. ६ क ख. संश्रिताया°; ट. मृता° श्रि; ठ. ड. श्रिताया°. ७ क. ख. ग. ज. शालो; घ. ठ. ड. स्यालो; च. स्यालो° श्या; ट. स्यालो °शा.

कोऽस्मद्भीतः पलायते । न कश्चिदपि । सौम्योऽहमित्यभिप्रायः । बलकृतिसंबन्धादिन्द्र एवायं त्रिशोकः स्याद्यस्येयमार्षम् ।

'जहा' इत्यस्य निर्वचने निर्णयः

एवमेतस्मिन्मन्त्रे प्रकरणपूर्वोत्तरपदाविरोधशब्दसारूप्यार्थोपपत्तिभिर्हन्तेरेव विशेषेणार्थोऽवतिष्ठते न जहातेः । जहातौ ह्येतस्मिन्कल्प्यमाने प्रकरणं पूर्वोत्तराणि च पदानि विरुध्यन्ते शब्दसारूप्येऽपि सति । तस्मान्नात्र जहातेरवकाशोऽस्ति । पारिशेष्याद्धन्तेरेतद्रूपमित्युपपन्नं भवति । एवमेव सर्वेष्वेवानवगतसंस्कारेषु योज्यम् ।

'निधा' (निघ० ४ । १ । २) इत्येतत्पदमनवगतसंस्कारावसरप्राप्तं व्याख्यानीयमैकपदिकव्याख्याधर्मेण । प्रकृतानुवृत्त्या 'स व्याख्यातव्यः' (निरु० १ । १) इति तदभिधानाभिधेयनिगमनिर्वचनानुक्रमप्रवृत्त्या ब्रूमः । 'निधा पाश्या भवति' इति पर्यायेण तत्त्ववचनम् । यो वालमयः स्नायुमयो वा पाशसमूहः पक्षिग्रहणार्थः स पाश्येत्युच्यते । अधुना

निधाशब्दस्य पाश्याशब्दस्य च निर्वचनम्

द्वावप्येतौ शब्दौ निर्वक्ति निधाशब्दं पाश्याशब्दं च । 'यत्' यस्मादियं 'निधीयते' नीचैर्धीयते[1] पक्षिग्रहणार्थं तस्मान्निधिरिति वा[2] प्राप्ता निधानीति वा । सेयमेवं प्राप्ता सती निधेत्यनवगतसंस्कारेणोच्यते । पाश्याशब्दं पर्यायाभिधानप्रसक्तं निर्ब्रवीति प्रत्ययोत्पादनार्थं 'पाश्या पाशसमूहः' इति । पदान्निष्कृष्य तद्धितार्थो निरुक्तः । अधुना पदार्थं निर्वक्ति । 'पाशः पाशयते[3]र्विपाशनात्' । तेन हि विविधमतिशयेन वा पाश्यते । बध्यत इत्यर्थः । अधुना यस्मिन्मन्त्रे निधाशब्दः पाशसमूहवाची तमानीय[5] ब्रवीति निधाशब्दनिर्गम[4]नार्थम् । कतमः पुनरसौ मन्त्र इति ॥ २ ॥

वयः सुपर्णा उप सेदुरिन्द्रं प्रियमेधा ऋषयो नाधमानाः । अप ध्वान्तमूर्णुहि पूर्धि चक्षुर्मुमुग्ध्य१स्मान्निधयेव बद्धान् (ऋ०

---

१ क. ख. घ. ट. ठ ड. धार्यते. २ क. ख. ग. ज. 'वा' नास्ति. ३ ग. ज. °यतेर्बन्धनार्थस्य विपा°; च. °यतेर्बन्धनार्थस्य विपा°. ४ क. ख. ग. °निगमार्थं; च. °निगमार्थं° मना. ५ ठ. ड. २॥ इति ऋज्वर्थायां निरुक्तटीकायां चतुर्थाध्याये द्वितीयः खण्डः.

सं० १० । ७३ । ११] । वयो वेर्बहुवचनं सुपर्णाः सुपतना आदित्यरश्मय उपसेदुरिन्द्रं याचमाना अपोर्णुह्याध्वस्तं चक्षुश्चक्षुः ख्यातेर्वा चष्टेर्वा पूर्धि पूरय देहीति वा मुञ्चास्मान्पाशैरिव बद्धान् पार्श्वतः श्रोणितः शितामतः पार्श्वं पर्शुमयमङ्गं भवति पर्शु स्पृशतेः संस्पृष्टा पृष्ठदेशं पृष्ठं स्पृशतेः संस्पृष्टमङ्गैरङ्गमङ्गनादञ्चनाद्वा श्रोणिः श्रोणतेर्गतिचलाकर्मणः श्रोणिश्चलतीव गच्छतो दोः शिताम भवति दोर्द्रवतेर्योनिः शितामेति शाकपूणिर्विषितो भवति श्यामतो यकृत्त इति तैटीकिः श्यामं श्यायतेर्यकृद्यथाकथा च कृत्यते शितिर्मांसतो मेदस्त इति गालवः शितिः श्यतेर्मांसं माननं वा मानसं वा मनोऽस्मिन्त्सीदतीति वा मेदो मेद्यतेः ॥ ३ ॥

वयः सुपर्णा इति । शाकल्यस्य गौरिवीतेरियमार्षम् । त्रिष्टुप् । अग्निष्टोमे मरुत्वतीयस्य शस्त्रस्य परिधानीयैषा निविद्धानीये सूक्ते [आश्व० श्रौ० ५ । १४] । वय आदित्यरश्मयः । वेतेर्गत्यर्थस्य नामीभूतस्य बहुवचनं विः वी वयः इति । सुपर्णाः सुपतनाः एत एव उपसेदुः उपसीदन्ति व्युष्टायां रात्रावहन्यहनि । कमुपसेदुः । इन्द्रम् आदित्यम् । प्रियमेधाः प्रिययज्ञास्त एव यज्ञसहचारित्वात् । उद्गतेषु हि तेषु यज्ञास्तायन्ते । ऋषयस्त एव अर्षणात्प्रकाशकत्वात् । नाधमाना आदित्यमुपसेदुः । कमर्थं याचमाना इति । अपोर्णुहि अपावृणु जनानामेतद् ध्वान्तम् आध्वस्तमाच्छादितं तमसा चक्षुः । पूर्धि पूरय । युष्मदननुगृहीतमसकलमिवैतेषां जनानामेतच्चक्षुः । तत्पूर्धि । सकलं कुर्वित्यर्थः । अथवा पूर्धि देहीति यदुक्तं स्यात् । अस्तं हि गच्छता त्वयैतेषां जनानामात्तमिव यच्चक्षुस्तत्पुनरुद्यंस्त्वमेतेभ्यो जनेभ्यो देहि । कथं च पुनर्देहि । मुमुग्ध्यस्मान्मुञ्चास्मान्निधया पाशसमूहेन पक्षिण इवैतस्मिन्मण्डले बद्धान्यावदेतदशेषं

(निधाशब्दयुक्तो निगमः)

---

१ ठ. ड. °मङ्गना°. २ ठ. ड. शाकस्य. ३ क. ख. घ. ट. ठ. ड. °त्वतीयशस्त्रस्य. ४ क. ख. घ. ट. ठ. ड. उद्गतेषूदितेषु हि°; च. उद्गतेषु ˇ हि° उदितेषु. ५ ग. घ. ज. ऋषणात्; च. ट. ऋषणात्° अर्ष. ६ क. ख. घ. °मानास्त आ°; ट. नाधमानाः° याच. ७ क. ख. घ. ट. ठ. ड. °मासमि°. ८ क. ख. घ. ट. ठ. ड. °देतत्तावदशे°; च. °देतˇदशे° त्ताव.

तमो नाशयित्वैतेषां जनानामेतच्चक्षुर्दद्मः सकलं वा कुर्मः । एवं ह्येतत्त्वयैव दत्तं भविष्यतीत्यभिप्रायः । एतमर्थं याचमाना उपसेदुः ।

'चक्षुः ख्यातेर्वा' दर्शनार्थस्य 'चष्टेर्वा' दर्शनार्थस्यैव । एवमेतस्मिन्मन्त्रे 'मुमुग्ध्यस्मान्निधयेव बद्धान्' इत्येतेषां पदानां मध्ये वर्तमानस्य तृतीयान्तस्य निधाशब्दस्य पाशसमूहादन्यः कोऽर्थः स्यात् । 'मुमुग्धि बद्धान्' इत्येतौ शब्दौ येन बद्धा यस्माच्च मुच्यन्ते तदर्थाभिधायिनं शब्दमाकाङ्क्षतः । तत्रैवं सति वरमविद्यमानस्याध्याहाराद्विद्यमानस्य निधाशब्दस्यानयोः शब्दयोर्मध्ये वर्तमानस्याकाङ्क्षितार्थाभिधायित्वकल्प[1] नेतिनिधाशब्दः पाशसमूहाभिधायित्वेऽवतिष्ठते । इतरथा ह्ययमितरैः पदैरसंबध्यमानोऽनर्थक एव स्यात् । तस्मादेवं सर्वत्रानवगतसंस्काराणामप्रसिद्धार्थानां पदानां सामर्थ्यादाकाङ्क्षितरूप एवार्थेऽवस्थानं भवति । तदुपपाद्यं सर्वत्र । ग्रन्थातिगौरवभयात्तु संक्षेपतोऽत्र दर्शयिष्यामः ।

'शिताम' [निघ० ४ । १ । ३] इत्येतदनवगतम् । अनुपन्यस्यैव पदमभिधेयं चानुक्त्वैव निगममेव प्रथमं पठत्याचार्यो विप्रतिपत्त्यानेकार्थत्वमस्येति । 'पार्श्वतः श्रोणितः शितामतः' इति निगमः । पशुहविषः प्रैषो[2]ऽयं मन्त्रशेषः । कतमः पुनरसौ प्रैषः[3] । 'होता यक्षदिन्द्राग्नी[4] छागस्य हविष आत्तामद्य मध्यतो मेद उद्धृतं[5] पुरा द्वेषोभ्यः पुरा पौरुषेय्या गृभो घस्तां नूनं घासे अज्राणां यवसप्रथमानाꣳ सुमत्क्षराणाꣳ शतरुद्रियाणामग्निष्वात्तानां पीवोपवसनानां पार्श्वतः श्रोणितः शितामत उत्सादतोऽङ्गादङ्गादवत्तानां करत एवेन्द्राग्नी जुषेताꣳ हविर्होतर्यज' [तै० ब्रा० ३ । ६ । ११] इति । सर्व एव गद्यः । वामदेवस्यार्षम् । मैत्रावरुणो ब्रवीति । होता यक्षत् । होता यजत्वित्यर्थः । तेन चेज्यमानाविन्द्राग्नी अस्माद्धविषः पश्चाख्यात् यदेतन्मेद उद्धृतम् उद्धृतम् अस्यां स्रुच्याहितम् । 'तस्मान्मेदः पर्यस्यति श्रपयति त्रेधा मेदः करोति' इति ह्युक्तम् । एतन्मेदोऽद्य एतास्मिन्नहनि सद्यः उद्धृतम्[6] आत्तां भक्षये-

शिताम इति

1 क. ख. घ. झ. ट. °धायकत्वक°; च. धायित्वक° वक. 2 क. ख. ज. घ. झ. ट. ठ. ड. प्रैषेयं. 3 ग. च. ज. प्रैषः । ३ । होता°. 4 ग. च. ज. घ. ट. ठ. ड. °दिन्द्राग्नी इति । सर्व°. 5 क. ख. झ. 'उद्धृतं' नास्ति. 6 ग. ज. उद्धृतं.

ताम् पुरा द्वेषोभ्यः हविर्मथिभ्यः पिशाचादिभ्यः पुरा पौरुषेय्या गृभः अर्वागिडावदानात् । इडा हि पुरुषार्थं गृह्यते । प्राक्तस्माद् ग्रहणादिन्द्राग्नी घस्तां भक्षयेतां नूनं निश्चयेन एतस्मिन् घासे घसनकाले भक्षणकाले प्राप्ते अज्राणाम् अनभिभूतानां रक्षोभिः । आदरेण प्रति[1]विशिष्टैर्मन्त्रैः संस्कृतानाम् । अथवा घासेअज्राणाम् इत्येकं पदम् । तदायमर्थः । घासे हि सति पशवो न जीर्यन्त इति घासेअज्राः । यवसप्रथमानाम् । यवसः अशनम् । तस्यानेकप्रकारस्य श्रेष्ठत्वादेतान्येव देवतृप्तये प्रथमानि । तेषां यवसप्रथमानाम् । सुमत्क्षराणाम् । स्वयमेवैतानि भक्ष्यमाणानि स्वादुत्वादुदरं प्रति क्षरन्तीति सुमत्क्षराणि । एषां सुमत्क्षराणाम् । शतरुद्रियाणां बहुस्तुतीनाम् । अथवा शतरुद्रियाणां बहुशो रुग्णा[2]नाम् । अग्निष्वात्तानाम् अग्निपाकेन मृदुत्वात्स्वादूकृतानाम् । पीवोपवसनानां पीव्ना छागेनोपवस्तानाम् । अथवा पीवानं छागमुपगम्योषितानाम् । पार्श्वतोऽङ्गादवत्तानां श्रोणितोऽवत्तानां शितामतोऽवत्तानाम् उत्सा[3]दतश्चोच्छेद[4]नस्थानात् अङ्गादङ्गादवत्तानाम् । करतः कुरुतामिन्द्राग्नी तृप्तिमेतेषामेवंलक्षणानामवदानानाम् । हे होतः यथैताविन्द्राग्नी जुषेताम् आसेवेतामेतद्धविस्तथा त्वमपि यज ।

निगमप्रसक्तमुच्यते । " पार्श्वं पर्शुमयमङ्गं भवति " । पर्शवो वङ्क्रय उच्यन्ते । तन्मयं हि तद्भवति पार्श्व[5]पटलम् । आह । पर्शुः कस्मात् । उच्यते । ' पर्शुः स्पृशतेः ' । आह । किमनया स्पृष्टमिति । उच्यते । " संस्पृष्टा पृष्ठदेशं ' प्रति भवति । आह । " पृष्ठं ' कस्मात् । उच्यते । ' स्पृशतेः ' एव । तद्धि " संस्पृष्टमङ्गैः ' । आह । अङ्गं कस्मात् । उच्यते । अङ्कितं हि तत्का[6]येन भवति । गतमित्यर्थः । 'अञ्चनाद्वा' । अञ्चतिरपि गत्यर्थ एव । धात्वन्यत्वमर्थैकत्वम् । पार्श्वशब्दप्रसक्तानुप्रसक्तमुक्तम् । अधुना श्रोणिशब्दं निगमप्रसक्तं निर्ब्रवीति । " श्रोणिः श्रोणतेः " धातोः गतिचलाकर्मणः । गतिनिमित्तं चलनं यस्य कर्म सोऽयं गतिचलाकर्मा । तस्य गतिचलाकर्मणः । किं कारणम् । ' श्रोणिश्चलतीव ' स्थानात्पशोः ' गच्छतः ' ।

---

१ ग. ज. प्रवितिष्टैर्म°; च. प्रविशिष्टैर्म°. २ च. रुग्णाना° द्रा. ३ ग. ज. उछाद°; च. उछाद° त्सा. ४ ग. ज. °श्चोच्छेदस्था°. ५ च. °वति पार्श्व॰माह° पटल. ६ क. ख. झ. कालेन; घ. ठ. ड. कालन; ट. कालन° ये; ग. ज. कार्येण; च. कार्येण° येन.

शितामशब्दस्य तत्त्वमाचष्टे । 'दोः शिताम भवति ' । बाहुरित्यर्थः । आह । दोः कस्मात् । उच्यते । ' दोर्द्रवतेः ' ।

शितामशब्दस्य बाहुरित्यर्थः

तस्य हि प्राणेन पशुर्द्रवति । श्रितमंसभावेनैतत्काये[1] भवतीति शिताम ।[2] यदा दोर्विषयः शितामशब्दस्तदैवं निर्वक्तव्यः । आह । कयोपपत्त्या दोः शितामशब्देनोच्यते । शृणु । पशोर्हि बाह्यानि चावदानान्याभ्यन्तराणि च भवन्तीति । तत्र पार्श्वे श्रोण्यावंसाविति बाह्यानि जिह्वाहृदयकृदादीन्याभ्यन्तराणि । तत्रैवं सति पार्श्वतः श्रोणित इत्येतयोरन्तरा वर्तमानः शितामशब्दः किमन्यद्दोष्णोऽभिदध्यात् । प्रायोऽपि हि नियामको भवति । एवं बाह्यावदानप्राये च शितामशब्दो वर्तत इति दोर्विषयः कल्प्यते । ' योनिः शितामेति शाकपूणिः ' आचार्यो मन्यते । तत्र योनिरनवदानीयैव । योनिसमानदेशस्तु गुदो नामावदानमस्ति स योनिशब्देनोच्यते । स च गुदो ' विषितो भवति ' । ' विष्लृ व्याप्तौ ' । (धा० ३ । १३) । व्याप्तः स पुरीषेण भवति । अथवा विषितमांसो विपुषितमांसो विस्रस्तमांसः स भवति । आह । कयोपपत्त्या शाकपूणेर्मते योनिः शितामशब्देनोच्यत इति । शृणु । स हि श्रोण्यनन्तरो भवति । श्रोण्यनन्तरं च शितामशब्द उच्यते ' श्रोणितः शितामतः ' इति । शब्दसारूप्यमपि च किंचिदस्ति विषितो भवति शितामेति । अनयोपपत्त्यानेन च शब्दसारूप्येण योनिः शितामेति शाकपूणिर्मन्यते ।

योनिरिति शाकपूणिः

' श्यामतो यकृत्त इति तैटीकिः ' आचार्यो मन्यते । यदुक्तं भवति श्यामत इति तदुक्तं भवति शितामत इति । एवं हि बहुतरं शब्दसारूप्यं लक्ष्यते । एवं च सति यकृत्त एतदवदानं चोदितं स्यादिति गम्यते । किं कारणम् । तद्धि श्यामम् । '[3] श्यामं श्यायतेः ' [धा० १ । ९८८] धातोः । तद्धि संपर्कादुपपद्यते । आह । ' यकृत् ' कस्मात् । उच्यते । तद्धि मृदुत्वात् ' यथाकथंचित् ' अयत्नेनैव ' कृत्यते ' । छिद्यत इत्यर्थः ।

यकृदिति तैटीकिः

---

१ क. ख. घ. झ. ट. ठ. ड. °तत्कार्ये. २ ग. ज. 'शिताम यदा दोर्विषयः' नास्ति. ३ क. ख. च. ' श्यामं ' नास्ति.

१९

' शितिमांसतो मेदस्त इति गालवः ' आचार्यो मेद इति गालवः मन्यते । श्वेतान्मांसात् शितिमांसतः । कतमत्पुनस्तच्छ्वेतं मांसमिति । उच्यते । मेदः । तस्माद्यदुक्तं भवति शितिमांसत इति तदेवोक्तं भवति शितामत इति । एवमपि[1] बहुतरं शब्दसारूप्यमस्ति । 'शितिः श्यतेः ' तनूकरणार्थस्य (धा० ४ । ३९) । परो हि विवेकस्तेजसो मेदस्येवावतिष्ठते । ' मांसं माननं वा ' । य एव हि मान्यो भवति तदर्थमेतत्संस्क्रियते । ' मानसं वा ' । सुमनसा हि तदुपादीयते । अथवा य एव हि मनस्विनो भवन्ति तैरुपादीयते । ' मनोऽस्मिन्सीदतीति वा ' । सर्वस्यैव हि मांसे मनः सीदति । ' मेदो मेद्यतेः ' स्नेहनार्थस्य [धा० ४ । १३७] ।

एवमेष शितामशब्दोऽनवगताभिधेयोऽनवगतसंस्कारो भवति । एवमेतस्मिन्प्रकरणेऽन्यान्यप्यनवगतसंस्काराण्युपेक्षितव्यानि[2] । उक्तं हि

अनेकार्थस्य कारणानि प्रकारा वा

' शब्दरूपं पदार्थश्च व्युत्पत्तिः प्रकृतिर्गुणः ।
सर्वमेतदनेकार्थे दशानवगमे गुणाः '
[बृहद्दे० २ । १०८] ॥

अनवगतपदानां दश कारणानि प्रकारा वा । ईदृशानामभिधेयमपेक्ष्य निर्वचनं कर्तव्यम्

कतमे पुनस्त इति । पदजात्यभिधेयस्वरसंस्कारगुणविभागक्रमविक्षेपाध्याहारव्यवधानानि । तेषु चाभिधेयमपेक्ष्य निर्वचनं कर्तव्यम् । उक्तं हि

' धातूपसर्गावयवगुणसत्त्वं द्विधातुजम् ।
बह्वेकधातुजं वापि पदं निर्वाच्यलक्षणम्' [बृहद्दे० २ । १०३] ॥

' धातुजं धातुजाज्जातं समर्थार्थजमेव वा ।
वाक्यजं व्यतिकीर्णं च निर्वाच्यं पञ्चधा पदम् ' [बृहद्दे०२।१०४] इति ॥

पदजात्यनवगतं ' त्व ' इति यथा नाम निपातो वेति । अभिधेयान-

१ क. ख. ग. ज. 'अपि' नास्ति. २ च. °तव्यानि° मीति.

अनवगतपदवर्गाणामुदाहरणानि

वगतं 'शिताम' इति यथा । स्वरानवगतं 'वने न वायो' इति यथा । संस्कारानवगतम् 'ईर्मान्तासः' इति यथा । गुणानवगतम् 'करूळती'[1] इति यथा । विभागानवगतं 'मेहना' इति यथा । क्रमानवगतम् 'उपरमध्वं मे वचसे' इति यथा । विक्षेपानवगतं 'द्यावा नः पृथिवी' इति यथा । अध्याहारानवगतं 'दानमनसो[2] नो मनुष्यान्' इति यथा । व्यवधानानवगतं 'वायुश्च नियुत्वान्' इति यथा । एकमपि पदं पदद्वितयं क्रियते 'पुरुषादः पुरुषानदनाय' इति यथा । पदद्वितयमपि चैकं पदं क्रियते 'गर्भनिधानीं सवितुः' इति यथा । आख्यातमपि च नाम क्रियते 'सर्वाणीन्द्रस्य धनानि विभक्ष्यमाणाः' इति यथा ।

एवमेषु निगमेषु शब्दार्थसंकरोऽनेकप्रकार उपेक्ष्यः । दृष्टानुविधानाच्छन्दसि यथासंभवमनुविधेयः । 'मेहना' [निघ० ४।१।४] इत्यनवगतम् । मंहनीयमित्यवगमः ॥ ३[3] ॥

यदिन्द्र चित्र मेहनास्ति त्वादातमद्रिवः । राधस्तन्नो विदद्वस उभयाहस्त्या भर [ऋ० सं० ५।३९।१] ॥ यदिन्द्र चित्र[4] चायनीयं मंहनीयं धनमस्ति यन्म इह नास्तीति वा त्रीणि मध्यमानि पदानि त्वया नस्तद्दातव्यमद्रिवन्नद्रिरादृणात्येनेनापि वात्तेः स्यात्ते सोमाद इति ह विज्ञायते राध इति धननाम राध्नुवन्त्येनेन तन्नस्त्वं वित्तधनोभाभ्यां हस्ताभ्यामाहरोभौ समुब्धौ भवतो दमूना दममना वा दानमना वा दान्तमना वापि वा दम इति गृहनाम तन्मनाः स्यान्मनो मनोतेः ॥ ४ ॥

यदिन्द्र चित्र मेहनेति निगमः । अत्रेर्भौमस्यार्षम् । अनुष्टुप्[5] । हे इन्द्र

१ ट. करूळती°. २ ग. ज. दानमसो नो°. ३ ग. ज. ४; च. अङ्को नास्ति; ठ. ड. ।३। इति निरुक्तटीकायां चतुर्थाध्याये तृतीयः खण्डः. ४ छ. त. द. 'चित्र' नास्ति. ५ क. ख. घ. ट. ठ. ड. अनुष्टुप् । ऐन्द्री । स्वरपृष्ठानां स्वरसाम्नां प्रथमे स्वरसाम्नि यज्ञायथा अपूर्व्येति स्तोत्रियः स्वरपृष्ठानां यदिन्द्र चित्र मेहनेति द्वे या इन्द्र भुजेति तृतीयानुरूपस्येति विनियोगः । हे इन्द्र°; च. पुस्तके 'ऐन्द्री० विनियोगः' इति सर्वं पत्रस्योपरिप्रान्ते लिखितम्.

शाकल्यमतेन 'मेहना' इत्येकं पदम्

चित्रं चायनीयं पूजार्हं यन्मेहना यन्मंहनीयं पूजार्हं तव राधो धनमस्ति किंचित् त्वादातं त्वया च यद्दातव्यमेवावश्यं सुचिरमपि स्थित्वास्मभ्यं तद्यतोऽतो ब्रूमः । हे अद्रिवः वज्रिन् तन्नो राधः हे विदद्वसो प्राप्तधन सांप्रतमेवोभाभ्यां हस्ताभ्याम् अकृपणमाभर आहर। मा चिरायेत्यभिप्रायः। अथ 'वा यन्म इह नास्तीति' एतस्मिन् वाक्यैकदेशे 'त्रीणि पदानि मध्यमानि'।

गार्ग्यमतेन त्रिपदयुक्ता संहिता

मध्ये भवन्तीत्यर्थः । कथम्। मेहना इत्येषा संहिता। मे इह न इत्येतान्यस्याः संहितायाः पदानि। एवमेष वाक्यावयवः पञ्चपदो भवति। अत्र 'यत्' इति प्रथमं पदम्। अतः परं 'मे इह न' इत्येतानि त्रीणि मध्यमानि पदानि। 'अस्ति' इति पञ्चमं पदम्। एवमभिप्रेत्य 'इन्द्रचित्र'-शब्दावपकृष्योक्तं 'त्रीणि मध्यमानि पदानि' इति। आह। यदेवं पदविभागस्तदा कोऽर्थ इति। उच्यते। यन्मे मम इह गृहे नास्ति धनं तव च तदस्ति धनं दातव्यं च त्वया तावत्तोतृभ्यस्तद्धस्ताभ्यामस्मभ्यमाभरेति । बह्वृचानां 'मेहना' इत्येकं पदं छन्दोगानां त्रीण्येतानि पदानि 'म इह न' इति। तदुभयं पश्यता भाष्यकारेणोभयोः शाकल्यगार्ग्ययोरभिप्रायावत्रानुविहितावेवंजातीयनिर्वचनोपप्रदर्शनार्थमुभयोश्च प्रामाण्यख्यापनार्थम् ।

पदविकल्पे शाकल्यस्याभिप्रायः

आह। पदकारयोः पदविकल्पे कोऽभिप्राय इति। उच्यते। विद्यावान् विद्यमानधनो वा प्रतिविशिष्टतरं प्रार्थयते। यच्च यस्य गृहे नास्ति स तद्विशिष्टमविशिष्टं वा प्रार्थयेत। न चानयोरुभयोरपि विशेषलिङ्गमस्ति तस्मान्मंहनीयमित्येतयार्थमत्या मेहनेत्येवमेकं पदमभिप्रेतं शाकल्यस्य। गार्ग्यस्य पुनर्यन्म इह गृहे नास्ति तदाहरेत्यभिप्रायः। एवमत्र विशेषलिङ्गाभावाद्विप्रतिपत्तिः। एवमन्येष्वपि शाखान्तरपदविकल्पेष्वनुविधानमर्थाविरोधेन कर्तव्यम्। एवमयं मेहनाशब्दो राधःशब्दसामाना-

गार्ग्यस्य च

१ ग. ज. चित्र चायनीय पूजा°; च. चित्रं (त्र) चायनीयं (य) पूजार्हं (र्हे). २ ग. ज. तंद्दाति°. ३ क. ख. घ. झ. ट. ठ. ड. °शब्दादपकृ°. ४ ठ. °स्तद्ध° स्तत्त्वं ह. ५ ग. ज. यद्वा; च. यच्चे द्वा. ६ ग. ज. °मवशिष्ट°.

धिकरण्ये वर्तमानौ यन्महनीयं राधो यद्वा मद्गृहे नास्तीति धनविशेषणत्वात्कमन्यमर्थं ब्रूयात् । तस्मान्मेहनेति सामर्थ्याद्धनविशेषणमेतदित्युपपत्तिः ।

अधुना निगमप्रसक्तानि निरुच्यन्ते । ' अद्रिरादृणात्यनेन ' । अद्रिसारमयमेव ह्यायुधं भवतीति । अद्रिर्वज्र उच्यते । आह । अद्रिः कस्मात् । उच्यते । आदृणाति । आदारयतीत्यर्थः । अथवा सोमाभिषवग्रावभिस्तद्वान्, अद्रिवान् स्यात् । तैरपि हि सोम आदार्यते । ' अपि वा अत्तेः स्यात् ' अद्रिः । कुतः एतत् । निगमात् । कतमोऽसौ निगम इति । ' ते सोमाद इति ह विज्ञायते ' । ' ते सोमादो हरी इन्द्रस्य निंसते ' [ऋ० सं० १० । ९४ । ९] इत्येतस्मिन्मन्त्रे विचार्यमाणे ज्ञायतेऽत्तेरद्रिः स्यादिति । व्याख्यात एव शेषः [निरु० २ । ५] । ' राधः इति ' एतद् ' धननाम ' स्मारयति । व्यभिचारित्वाद्वा शब्दानां धननामसु पठितमपि सदेतदवधारयतीहाप्येतद्धननामैव नात्र व्यभिचारोऽस्तीति । पठिताभिधाननिरूपणेषु सर्वेष्वेतौ समाधी योज्यौ । ' वित्तधन ' इति प्राप्तधनः । ' उभौ समुब्धौ भवतः ' । संपूर्णावित्यर्थः ।

राधःशब्दव्युत्पत्तौ पुनरुक्तिस्तस्याः कारणम्

' दमूनाः ' [निघ० ४ । १ । ५] इत्यनवगतम् । ' दममनाः ' दमूनाः स्यात् । दमे हि नित्यमस्य मनः । अक्रूरमना इत्यर्थः । ' दानमना वा ' । दातव्यं मयेति यस्य मनसि स वा दमूनाः । ' दान्तमना वा ' । दमेषु दान्तेषु यमनियमवत्सु पुरुषेषु यस्य मनः स वा दमूनाः । अथवा ' दम इति ' एतद् ' गृहनाम ' । एतद्यस्य मनसि ममेदमिति स दमूनाः ' स्यात् ' । गृहपतिरग्निः । निगमः ॥ ४ ॥

दमूना इत्यस्य व्युत्पत्तिः

जुष्टो दमूना अतिथिर्दुरोण इमं नो यज्ञमुप याहि विद्वान् । विश्वा अग्ने अभियुजो विहत्या शत्रूयतामा भरा भोजनानि [ऋ० सं०

---

१ ग. ज. °णात्यनेन. २ च. अद्रि लोह. ३ च. °णाति दार°. ४ च. समुब्धौ उभ उभणे. ५ ग. च. ज. ५; ठ. ड. °रग्निः । अत्र निगमः ॥ ४ ॥ इति निरुक्तटीकायां चतुर्थाध्याये चतुर्थः खण्डः.

५।४।५]॥ अतिथिरभ्यतितो गृहान् भवत्यभ्येति तिथिषु [1]परकुलानीति वा परगृहाणीति वा[2] दुरोण इति गृहनाम दुरवा भवन्ति दुस्तर्पा इमं नो यज्ञमुपयाहि विद्वान्त्सर्वा अग्ने अभियुजो विहत्य शत्रूयतामाभर[3] भोजनानि निर्हत्य[4]ान्येषां बलानि शत्रूणां भवनात्[5]दाहर भोजनानीति वा धनानीति वा मूषो मूषिका इत्यर्थो मूषिकाः पुनर्मुष्णातेर्मूषोऽप्येतस्मादेव ॥ ५ ॥

जुष्टो दमूना इति । वसुश्रुतस्यात्रेयस्येयमार्षम् । त्रिष्टुप् । आग्नेयी । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १३] । स्विष्टकृत्पुरोनुवाक्या चेयं चातुर्मास्येषु साकमेधे [आश्व० श्रौ० २ । १८] । हे भगवन्नग्ने जुष्टः आसेवितस्त्वमस्माभिः स्तुतिभिः दमूनाः

दमूना इत्यस्यार्थः
दममना अक्रूरमना भूत्वा तत उपयाहि । अथवा गृहं ममेदमिति चेतोऽवस्थाप्य तत उपयाहि । अथवा[6]
दानमना भूत्वा दातव्यमेभ्यो मयेत्येवं चेतोऽवस्थाप्य तत उपयाहि ।

अथवा दान्तेष्वेव हि तव मनो वयं च दान्ता अतिथिश्च त्वमग्निहोत्रिणां दान्तमनसां प्रातः सायं चोद्बोध्यमानो भवसि । स्वभाव एवैष तवाग्निहोत्रिणामतिथित्वेनोपस्थातव्यमिति । अतो ब्रूमो वयमपि दान्तमनसोऽग्निहोत्रिणश्च । अस्माकमपि य एष दुरोणे यज्ञगृहे यज्ञस्तन्यते तं त्वमुपयाहि तमागच्छ विद्वान् जानानः स्वमधिकारं भक्ततां चास्माकम् । किंच । विश्वाः सर्वा अभियुजः अभितः सर्वतो युजः अभियोक्त्र्यः शत्रुसेनास्त[7]वागमनप्रतिबन्धेन वर्तमाना विहत्य नानाप्रकारं हत्वा तत उपयाहि । किंच । एवमागच्छंस्त्वं शृणु[8] यत्कुरुष्व । शत्रूयतां येऽस्माकं शत्रुत्वं कामयन्ते कर्तुं तान्विहत्य तेषां बलानि ततो यानि तेषां भोजनानि अन्नानि धनानि वा तान्यस्मभ्यमाहरेति समस्तार्थः ।

निगमप्रसक्तोऽतिथिशब्दो दुरोणशब्दश्च । आह । 'अतिथिः' कस्मात् । उच्यते । 'गृहान्' आभिमुख्येनासौ 'अतितो भवति' ।

---

१ क. ख. छ. त. द. 'पर' नास्ति. २ क. ख. वा अयपीतरोऽतिथिरेतस्मादेव दुरो°. ३ छ. त. द. °माहर. ४ क. ख. छ. त. द. विहत्या°. ५ छ. त. द. भवतामाह°. ६ ठ. ड. 'अथवा० चेतोऽवस्थाप्य तत उपयाहि' नास्ति. ७ क. ख. झ. °नास्त्वदागम°; घ. ट. ठ. ड. °नास्त शात्वदागम°. ८ ग. ज. शृणुहि.

गत इत्यर्थः । 'अतति पतति' इति गतिकर्मसु पठितम् [निघ० २ । १४ ।] । अथवैवमन्यथा स्यात् । 'अभ्येति' अभ्यागच्छति 'तिथिषु' पौर्णमास्याद्यासु 'परकुलानि' यजमानकुलानीत्यतिथिः । अयमपीतरोऽतिथिरेतस्मादेव । 'दुरोण इति' एतत् 'गृहनाम' । आह । किं कारणम् । उच्यते । ते हि गृहाः 'दुरवा भवन्ति' । अवतिस्तर्पणार्थः [धा० १ । ६०१] । 'दुस्तर्पा' इत्यर्थः । उक्तं च ।

दमूनाःशब्दस्यान्वयेऽर्थे च निर्णयः

'कुटुम्बतन्त्राणि हि दुर्भराणि' इति । एवमेतस्मिन्मन्त्रे जुष्टो दमूना अतिथिर्विद्वान् हे अग्ने यज्ञमुपयाहि इत्येतस्मिन्नधिकारे वर्तमानो दमूनाःशब्दः कमन्यमग्निविशेषणत्वादर्थं ब्रूयात् । न कंचिदपि । परिशेषाद्दमूना इत्येतदग्निविशेषणमेवेति सिद्धम् ।

'मूषः' [निघ० ४ । १ । ६] इत्यनवगतम् । बहुवचनं चैतत् मूट् मूषौ मूषः इत्येवम् । आह । कुत एतत् । उच्यते । 'व्यदन्ति' इत्येतस्मिन्नाख्याते[1] बहुवचननिर्देशात् 'मूषो

मूषः इत्यस्य तत्त्वं व्युत्पत्तिश्च

व्यदन्ति' इत्येतत्संबध्यते । 'मूषिका इति' अनेनावगतसंस्कारेण यः 'अर्थः' उक्तः स्यात्स एव मूष इत्युक्तो भवति । प्रसिद्धार्थेनाभिधानेन मूषःशब्दस्य तत्त्वमाख्यातम् । अधुनाख्यानप्रसक्तस्य[2] मूषिकाशब्दस्य निर्वचनं करोति । 'मूषिकाः पुनर्मुष्णातेः' । 'मुष स्तेये' [धा० ९ । ५८] इत्यस्य । 'मूषोऽपि' च 'एतस्मादेव' । ते हि हरन्ति धान्यादीनि[3] । सं मा तपन्तीति निगमः ॥ ४[4] ॥

सं मा तपन्त्यभितः सपत्नीरिव पर्शवः । मूषो न शिश्ना व्यदन्ति माध्यः स्तोतारं ते शतक्रतो वित्तं मे अस्य रोदसी [ऋ० सं० १ । १०५ । ८] ॥ संतपन्ति मामभितः सपत्न्य इवेमाः पर्शवः कूपपर्शवो मूषिका इवास्नातानि सूत्राणि व्यदन्ति

---

१ ठ. ड. °नाख्याने बहु°. २ क. ख. घ. झ. ट. ठ. °ख्यातप्रस°. ३ ग. ज. °दीनि । ६ । सं०; च. °दीनि । छ । सं°. ४ ठ. ड. ५ (ठ. पुस्तके '५' नास्ति)

इति निरुक्तटीकायां चतुर्थाध्याये पञ्चमः खण्डः.

स्वाङ्गाभिधानं वा स्याच्छिश्नानि व्यदन्तीति संतपन्ति माध्यः कामाः स्तोतारं ते शतक्रतो वित्तं[1] मे अस्य रोदसी जानीतं मेऽस्य द्यावापृथिव्याविति त्रितं कूपेऽवहितमेतत्सूक्तं प्रतिबभौ तत्र ब्रह्मेतिहासमिश्रमृङ्मिश्रं गाथामिश्रं भवति त्रितस्तीर्णतमो मेधया बभूवापि वा संख्यानामैवाभिप्रेतं स्यादेकतो द्वितस्त्रित इति त्रयो बभूवुः ॥ ६ ॥

सं मा[2] तप० रोदसी इति । आप्त्यस्य[3] त्रितस्य कुत्सस्य वेयमार्षम् । पङ्क्तिः । ऐन्द्रीयेषा[4] । संतपन्ति मामभितः सर्वतोऽवस्थिताः कूपे पतितस्यैताः कूपपर्शवः कूपेष्टकाः संकटेऽवस्थितम् । कथं पुनः संतपन्ति मामभितः । सपत्नीरिव । यथा समानभर्तृका योषिते[5] एकं भर्तारमभिसंत[6]-पेयुर्दुर्वचोभिरिदमस्यास्त्वया कृतमिदं मम न कृतमित्येवं मामेताः कूपपर्शवः संतपन्ति । ताभिः कूपेष्टकादिभिरहं पीड्ये । किं च । मूषो न मूषिका इव शिश्ना शिश्नानि व्यदन्ति अदन्ति[7] । तान्यन्नमिश्राण्यन्नमिश्रोदकं[8] पायितानि सूत्राणि व्यदन्ति । सूत्रशब्दोऽध्याहृत उपपत्तिशिश्नशब्दस्यार्थः दृष्ट्वा भाष्यकारेण । विविधमदन्ति भक्षयन्ति । अथ 'वा स्वाङ्गाभिधानम्'[9] एतत् 'स्यात्' । स्वाङ्गमिति शेपोऽभिप्रेतः[10] । भवति हि तिरश्चामेष स्वभावो यच्छेपं भक्षयन्ति । अथवा लाङ्गूलमपि सादृश्याच्छिश्नमुच्यते । भवति हि मूषिकाणामेष स्वभावः । स्नेहभाण्डे स्वलाङ्गूलं मुक्त्वा तदुद्धृत्य व्यदन्ति आस्वादयन्ति । उपपद्यत उपमार्थ एवायमपीति शिश्नशब्दो विकल्प्यते ।

---

१ छ. त. द. 'वित्तं० रोदसी' नास्ति. २ ग. च. ज. मा तः रोदसीति; घ. झ. ट. मा तपं० रोदसीति; ठ. ड. 'सं० मा रोदसी' इति नास्ति. ३ ग. ज. 'आप्त्यस्य० मार्षं नास्ति; च. पुस्तक इदमुपरितनप्रान्ते लिखितम्. ४ ग. च. ज. 'ऐन्द्री' नास्ति; ठ. ड ऐन्द्र्येषा । सं मा तपन्तीति । सर्वतोऽवस्थि°. ५ ट. °षितः° परस्परं वा पीडयन्ते. ६ च. भर्तारं° परस्परं वा पीड्यन्ते; ठ. ड. भर्तारं परस्परं वा पीड्यन्ते अभिस°. ७ क. ख. घ. झ. ट. ठ. ड. °दन्ति तान्यन्नवेष्टितान्यन्नमि°; च. °दन्ति 'तान्यन्नमिश्रा' तानि अन्नवेष्टि°. ८ क. ख. ग. ज. घ. झ. ट. ठ. ड. °दकपायि°; च. °दकं पीयितानि°. ९ क. ख. ग. ज. स्वाङ्गाभिधानमिति. १० ग. च. ज. शेषोऽ°.

एवमेते मदुक्था[1]: संतपन्ति मा आध्यः आधयः कामाः। सोमेन यक्ष्ये दास्ये भोक्ष्य इत्येवमादयो मां भक्षयन्ति पीडयन्त्यसंपूर्यमाणाः। आधिरिति मानसं दुःखमुच्यते। स्तोतारं ते शतक्रतो। हे शतक्रतो तव नाम स्तोतारं सन्तमेते कामा एताश्च कूपपर्शवो मामुभयपार्श्वीकृतं सबाह्यान्तरं संतापयन्ति। न च नाम त्वमस्मानेतस्या आपदस्त्रायसे समर्थः सन्। अहो न युक्तम्[2]। भक्तपरित्यागो हि सतां सर्वेभ्यः पापेभ्यः पापिष्ठ इत्यभिप्रायः। यदैवमर्थ्यमानो न शुश्रावेन्द्रस्तदा द्यावापृथिव्यावाह। यदि नायमिन्द्रः शृणोति मन्दभागधेयत्वादस्माकं युवामपि तावत् हे रोदसी वित्तं जानीतमस्य वचसः श्रुत्याख्यस्य[3] यत्प्रयोजनं यदर्थमहं रोरवीमि। युवामपि चैतस्मात्प्रतिभयाकारात्[4]कूपादुद्धरतं यदि नायमिन्द्रोऽभ्युद्धरति। युवयोरपि स्तोतैवाहमित्यभिप्रायः।

आह। पर्शव इत्येतावति श्रूयमाणे कुत एतत्कूपपर्शव एता इति।

पर्शव इति शब्देन कूपपर्शवः कथं सूच्यन्ते

उच्यते। 'त्रितः कूपेऽवहितः' [ऋ० सं० १। १०५। १७] इत्येतस्मिन्[5] सूक्ते विशेषलिङ्गात्। तदेव भाष्यकारेण ख्यापितमत एव सूक्तगताद्विशेषलिङ्गादुपलभ्य 'त्रितं कूपेऽवहितमेतत्सूक्तं प्रतिबभौ' यत्रेयमृक् तस्मात्कूपपर्शव एता इति।

सूत्रशब्दाध्याहारस्य प्रयोजनम्

सूत्राणि व्यदन्तीति सूत्रशब्दो भाष्यकारेणाध्याहृतः शिश्न इत्यस्य शब्दस्य शेषभूतो मूषक[6]संबन्धेन। ते ह्यङ्गगन्धेन सूत्राणि व्यदन्तीति। स्वाङ्गाभिधानपक्षे त्वध्याहारो नास्त्येवेति।

'तत्र ब्रह्मेतिहासमिश्रम्'। तत्र तस्मिन् सूक्ते ब्रह्मेतिहासमिश्रम्। इतिहासयुक्तमित्यर्थः। तद्यथा। 'त्रितः कूपेऽवहितो देवान् हवत ऊतये' [ऋ० सं० १। १०५। १७] इत्येवमादि।

सूक्तेषु ऋङ्मिश्रो गाथामिश्रश्चेतिहासोऽप्युपलभ्यते

'ऋङ्मिश्रं गाथामिश्रं' च 'भवति'। स पुनरितिहास ऋग्बद्धो गाथाबद्धश्च। ऋक्प्रकार एव कश्चिद्गाथेत्युच्यते। 'गाथाः शंसति नाराशंसीः शंसति' इति ह्युक्तम्। 'गाथानां कुर्वीत' इति।

---

१ क. ख. ग. मदुक्ताः. २ च. युक्तं °क्तो. ३ क. ख. घ. झ. स्तुत्या॰; ग. ज. श्रुत्या° स्तु; ज. स्तुत्या°. ४ ठ. ड. °भयाकरा°. ५ च. इत्येत° त्यृच्ये. ६ ग. ज. मूषिक°; च. मूषकासं°.

स एष सूक्तानां स्वभावः प्रदर्शितः । इतिहाससंबद्धान्यपि सूक्तानि भवन्ति । तेषु प्रकरणादपि संदिग्धस्य पदस्यार्थोऽध्यवसेयो यथेह पर्शुशब्दो भाष्यकारेणाध्यवसित इति ।

भाष्यप्रसक्तं त्रितशब्दं निर्ब्रवीति । ‘ त्रितस्तीर्णतमो मेधया ’ एकतद्वितयोः सकाशात् ‘ बभूव ’ । अपि वा संख्यानिमित्तमेवैतत् ‘ नामाभिप्रेतं स्यात् ’ । कथम् । ‘ एकतो द्वितस्त्रित इति त्रयो ’ हि ते भ्रातरो ‘ बभूवुः ’ । तस्मात्संख्यानिमित्तमप्युपपद्यत एव । उक्तं च । ‘ भार्यागारेणाभ्युपादयत्तत एकतोऽजायत द्वितीयं ततो द्वितस्तृतीयं ततस्त्रितः ’ इति ॥ ६[1] ॥

इषिरेण ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव रायः । सोम राजन्प्र ण आयूंषि तारीरहानीव सूर्यो वासराणि [ऋ०सं० ८ । ४८ । ७] ॥ ईषणेन वैषणेन वार्षणेन वा ते मनसा सुतस्य भक्षीमहि पित्र्यस्येव धनस्य प्रवर्धय च न आयूंषि सोम राजन् । अहानीव सूर्यो वासराणि । वासराणि वेसराणि विवासनानि गमनानीति वा कुरुतनेत्यनर्थका उपजना भवन्ति कर्तन हन्तन यातनेति जठरमुदरं भवति जग्धमस्मिन् ध्रियते धीयते वा ॥७॥

‘ इषिरः ’ [निघ० ४ । १ । ७] इत्यनवगतम् । ‘ ईषणेन वा एषणेन वा ऋषणेन वा ’ इत्येताः शब्दसमाधयः ।

इषिरशब्दस्य व्युत्पत्तिः

‘ इषिरेण ते मनसा ’ इति समानविभक्त्यन्तत्वादिषिरशब्दस्य प्रतीयत एव मनोविशेषणत्वमित्यभिधेयमनुक्त्वा निगममेव पठति[2] । इषिरेण ते मनसा[3]०वासराणीति । प्रगाथस्येयमार्षम् । त्रिष्टुप् । सौमी । हे भगवन् सोम इषिरेण मनसा । त्वां प्रति सर्वात्मना

अर्थश्च

गतेनेत्यर्थः । ‘ ईषति फणति ’ इति गतिकर्मसु पठितम् [निघ० २ । १४] ।

---

१ ग. च. ज. घ. ट. अङ्को नास्ति; ठ. ड. इति । इति चतुर्थाध्याये षष्ठः खण्डः. २ ग. °ठति । ७ । इषि°. ३ ग. च. ज. मनसा० सराणि; ठ. ड. मनसेति । प्रगा°.

'एषणेनेति वा' स्यात् । इच्छावता । फलप्रार्थनावतेत्यर्थः । 'ऋषणेनेति वा' । दर्शनवता । ईदृशेन मनसा किं कुर्मः । ते तव योऽस्माकं स्वांशस्तं भक्षीमहि तं भक्षयेमहि । कथं पुनर्भक्षयेमहि । पित्र्यस्येव रायः । यथा पित्र्यो धनांशोऽविघ्नेन भक्ष्यते भक्षितश्च सुखपरिणामो भवत्येवं तव वयं स्वमंशमविघ्नेन भक्षयेमहि भक्षितश्च सुखपरिणामो मेऽस्तु । मातीव भियेमहीत्यभिप्रायः । किंच । हे सोम राजन् प्र ण आयूंषि तारीः । प्रतारय च प्रवर्धय च न आयूंषि । कथं पुनः प्रवर्धय । अहानीव सूर्यो वासराणि । यथा सूर्यो वासराणि वासन्तिकान्यहानि । 'वासराणि' इति 'वेसराणि' द्विसराणि । शीतोष्णाभ्यां हि द्वाभ्यां तानि सरन्ति । तेषु हि शीतोष्णं भवति रात्रौ शीतं दिवोष्णम् । अथवा 'विवासनानि' स्युः । तानि हि तच्छीतं विवासयन्ति । नाशयन्तीत्यर्थः । 'गमनानीति वा' । विसृतानि विस्तीर्णानि सन्ति वासराणीत्युच्यन्ते । यथा तानि सूर्यो वर्धयति मन्दगतित्वादेवमस्माकं त्वमायुः प्रवर्धयेत्याशीः ।

'कुरुतन [निघ० ४ । १ । ८] इत्यनर्थका उपजना भवन्ति' । य एवार्थः कुरुतेत्युक्ते भवति स एव कुरुतनेति । नात्र नकारस्यार्थोऽधिकोऽस्ति । अधुनैवमुक्त्वान्यान्यपि दर्शयति 'कर्तन हन्तन यातनेति' ।

शुनं सुफाला विर्नुदन्तु भूमिं शुनं कीनाशा अभि यन्तु वाहैः । शुनासीरा हविषा तोशमाना सुपिप्पला ओषधीः कर्तनास्मे' इति । अभिचयने क्षेत्रकर्षणे विनियुक्ता ।

कर्तनेत्यस्य प्रयोगः

त्रिष्टुप् । सुखं शोभनाः फाला विनुदन्तु विकृषन्तु भूमिम् । सुखं कीनाशाः भूमिकीणनाशाः खिलोत्कर्तारः कर्षुकाः अभियन्तु वाहैः अनडुद्भिः ॥ अयं तावदेवं कृषीवलः कृषिं करोतु । युवामपि हे शुनासीरौ हविषा उदकेन तोशमानौ निघ्नन्तौ भूमिं सुपिप्पलाः सुफलाः एता ओषधीः कर्तन कुरुतम् अस्मे । अस्मभ्यमित्यर्थः ।

---

१ घ. झ. ट. ऐत्र° च. ऐव° ए. २ च. योऽस्माकं०ऽभिषुतोऽ. ३ ग. ज. मा चास्तानभिपावी तारय°; च. मा चास्माननितियाती° प्रता. ४ च. विसराणि. ५ क. ख. घ. झ. ट. ठ. ड. 'द्विसराणि' नास्ति. ६ घ. झ. ट. ठ. ड. विवाःसृतानि; च. विवाऽसृतानि°. ७ ग. °नेति । ८ । शुनं°. ८ क. ख. वितुदन्तु; ठ. °सुफाला विनु° नः. ९ च. तोशमाना° ष. १० ग. ज. 'विकृषन्तु' नास्ति, ११ क. ख. भूमिं कीण°; ग. ज. भूमिं क्किण°.

यो नो मरुतो अभि दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसति । द्रुहः पाशान्प्रति स मुचीष्ट तपिष्ठेन हन्मना हन्तना तम् [ऋ० सं० ७ । ५९ । ८] इति ॥

हन्तनेत्यस्य

वसिष्ठस्येयमार्षम् । सांतपनस्य चरोः याज्यैषा [आश्व० श्रौ० २ । १८] । योऽस्माकं हे मरुतः दुर्हृणायुः पापक्रोधनः तिरःचित्तानि अन्तर्हितानि चित्तानि कृत्वा संमोह्य ततो हन्तुमस्मानिच्छति हे वसवः सर्वभूतवासयितारः तस्येदंलक्षणस्य द्रुहः अस्मद्द्रोग्धुरुपरि पाशान् प्रतिसमुचीष्ट प्रतिसंमोचयत । पाशैरेनं बध्वा तपिष्ठेन तापयितृतमेन हन्मना हननेन वधेन हन्तना । हन्तेत्यर्थः ।

'को न्वत्र मरुतो मामहे वः प्र यातन सखींरच्छा सखायः । मन्मानि चित्रा अपिवातयन्त एषां भूत नवेदा म ऋतानाम्' [ऋ० सं० १ । १६५ । १३] इति ॥

यातनेत्यस्य

इन्द्रागस्त्यमरुतां संवादः । कयाशुभीयं सूक्तम् । तत्रेयमगस्त्यस्यार्षम् । महाव्रते [ऐ० आ० ५ । १ । १] व्यूढस्य च दशरात्रस्य सप्तमेऽहनि सूक्तं शस्यते । हे मरुतः कोऽन्यः युष्मानेवमेतस्मिन् जगति मामहे पुनः पुनर्महयति पूजयति यथाहम् । न कश्चिदित्यभिप्रायः । यत एवमतो मरुतो ब्रवीमि । अस्मानेव सखीनाभिमुख्येन प्रयातन आयात हे सखायः । किं च मन्मानि मननानि स्वानि चेतांसि चित्राः चित्राणि अस्मान्प्रति अपिव्रातयन्तः निगमयन्तः एषामृतानां यज्ञानां प्रापयितारो भवत हे नवेदाः । मेधाविन इत्यर्थः ।

---

१ क. ख. घ. झ. ट. ठ. ड. यो नोऽस्माकं. २ क. ख. ग. °रेवं; ज. °रेतं. ३ ग. ज. ततेत्य°. ४ घ. ट. मरुतो० वेदा म ऋतानां । इन्द्रा°. ५ ग. ज. °र्महेति पूजाति. ६ क. ख. घ. झ. ट. ठ. ड. °थाहं तथा न क°; च. °थाहं न क° तथा. ७ क. ख. ग. ज. 'मरुतो' नास्ति. ८ क. ख. घ. झ. ठ. ड. प्रयात; च. आयात° प्र; ट. प्रयात° आ. ९ ग. ज आत्मानं गमयन्तः. १० क. ख. घ. झ. ट. ठ. ड. भूत भवत.

जठरमित्यस्य निर्वचनम्

'जठरम्' [निघ० ४।१।९] इत्यनवगतम् । 'उदरं भवति' इत्यभिधेयवचनम् । 'जग्धं' भुक्तमन्नम् 'अस्मिन्' अवस्थितं 'ध्रियते' इति जठरम्[1] । अन्नं 'वा' जग्धम् 'अस्मिन्' 'धीयते' इति जग्धधानं वा स्यात्[2] । एते शब्दसमाधी । मरुत्वाँ इन्द्रेति निगमः ॥ ७ ॥

मरुत्वाँ इन्द्र वृषभो रणाय पिबा सोममनुष्वधं मदाय । आ सिञ्चस्व जठरे मध्व ऊर्मिं त्वं राजासि प्रदिवः सुतानाम् [ऋ० सं० ३ । ४७ । १] ॥ मरुत्वानिन्द्र मरुद्भिस्तद्वान् वृषभो वर्षितापां रणाय रमणीयाय संग्रामाय पिब सोममनुष्वधमन्वन्नं मदाय मदनीयाय जैत्रायासिञ्च स्वजठरे मधुन ऊर्मिं मधु सोममित्यौपमिकं माद्यतेरिदमपीतरन्मध्वेतस्मादेव त्वं राजासि पूर्वेष्वप्यहःसु सुतानाम् ॥ ८ ॥

इति[3] चतुर्थाध्यायस्य प्रथमः पादः ।

मरुत्वाँ इन्द्र वृषभो रणायेति । विश्वामित्रस्येयमार्षम् । त्रिष्टुप् । महाव्रते पृष्ठ्यस्य चतुर्थेऽहनि शस्यते [ऐ० आ० ५ । १ । १] । मरुत्वान्[4] मरुत्संयुक्तो भूत्वा पिब हे इन्द्र यस्त्वं वृषभो वर्षिता । 'अपाम्' इत्यध्याहृतं भाष्यकारेण वृषभसंबन्धात् । यस्त्वमेवंकर्मकारी[5] तं त्वां ब्रवीमि । रणाय रमणीयाय संग्रामाय रमणीयं संग्रामं[6] करिष्यामीत्येतमर्थमुद्दिश्य पिबैतं सोममस्मत्प्रत्तम् अनुष्वधम् । स्वधेत्यन्ननाम [निघ० २ । ७ । १७] । सवनीयपुरोडाशाद्यभिप्रायेण अनुष्वधम् अनु अन्नम् । मदाय मदनीयाय पानाय युष्मदर्थमस्माभिः संस्कृतम् । 'जैत्राय' इत्यध्याहृतं भाष्यकारेण । द्विविधो हि मदः संमोहकरो जैत्रश्च । तयोर्जैत्र इष्टः संग्रामे । कथं च पुनः पिब । किमीषत् । नेत्युच्यते । आसिञ्च स्वजठरे[7] ये मध्वः

---

१ ग. ज. जग्धधरं; ट. जठरं °जग्धधरं. २ ग. ११ (७); च. ज. ११; ट. ८. ३ ड. थ. ध. ठ. ड. 'इति ००० पादः' नास्ति. ४ क. ख. घ. झ. ट. ठ. ड. 'मरुत्वान्' नास्ति. ५ क. ख. घ. झ. ट. ठ. ड. यस्त्वामे°. ६ ट. संग्रामे °मं; ठ. ड. संग्रामे. ७ च. ट. जठरे॰मध्वः° उद्रे; ठ. ड. जठरे उद्रे मध्वः°.

मधुनः । 'मधु सोममित्यौपमिकम्' इत्येतदुक्तं सोमस्य मधुत्वं 'माद्यतेः' धातोः । तृप्तिर्हि समाना सोमेन मध्वा चेत्यौपमिकत्वम् । 'इदमपीतरन्मधु' माक्षिकम् 'एतस्मादेव' माद्यतेः । यत्तु सोमस्योपचारत्वेन [1]तन्माध्वीकम् । [2]ऊर्मिः संघातः । [3]तावत्त्वं सोममासिञ्च स्वजठरे यावता जैत्रो मद उपजायते । कस्मात्पुनरेवं ब्रवीमि[4] । इतो यस्मात् 'त्वं राजासि प्रदिवः सुतानाम्' । त्वमेव राजा ईश्वरः पूर्वेष्वप्यहःसु सुतानामभिषुतानां न केवलमाधुनिकानाम् । उचितः सोमपान [5]एवं त्वमित्यभिप्रायः ॥ [6]८ ॥

नवमा[7]ध्यायस्य प्रथमः पादः ।

तितउ परिपवनं भवति ततवद्वा तुन्नवद्वा तिलमात्रतुन्नमिति [8]वा ॥ ९ ॥

'तितउ' [निघ० ४ । १ । १०] इत्यनवगतम् । 'परिपवनं भवति' इत्यभिधेयवचनम् । सक्तवः परिपूयन्ते येन द्रव्येण तत्परिपवनमुच्यते । ततेन चर्मणा [9]नेद्धं तितउ । तुन्नैर्वा छिद्रैस्तद्वत् तितउ । तिलमात्राणि वा तुन्नानि तस्मिन्निति तितउ । यथासंभवमेताः शब्दसमाधयः । निगमः[10] ॥ ९ ॥

तितउ इत्यस्य निर्वचनम्

सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत । अत्रा सखायः सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि [ऋ० सं० १० । ७१ । २] ॥ सक्तुमिव परिपवनेन पुनन्तः सक्तुः सचतेर्दुर्धावो भवति कसतेर्वा स्याद्विपरीतस्य विकसितो

---

१ क. ख. घ. झ. ट. ठ. ड. तस्मान्माध्वीकं; ग. ज. तन्मार्द्वीध्वीकं. २ च. ऊर्मिसंघा°. ३ ठ. ड. तावत्त्वं. ४ घ. झ. ड. ब्रवीषि; ट. ब्रवीषि° मि; च. ब्रवीमि° षि. ५ ग. ज. घ. झ. ट. एव. ६ घ ट. ठ. ड. च. ज. अङ्को नास्ति. ७ ठ. ड. इति निरुक्तटीकायां चतुर्थाध्याये अष्टमः खण्डः । इति निघण्टुसहितनवमाध्यायस्य प्रथ°. ८ क. ख. द. ५. ९ च. नेद्धं° तद्वति. १० क. ख. १(९); ग. १२(९); च. ज. १२; ठ. ड. °धयः । अत्र निगमः । इति निरुक्तटीकायां चतुर्थाध्याये नवमः खण्डः.

भवति यत्र धीरा मनसा वाचमकृषत प्रज्ञानं धीराः प्रज्ञानवन्तो ध्यानवन्तस्तत्र सखायः सख्यानि संजानते भद्रैषां लक्ष्मीर्निहिताधि वाचीति[1] भद्रं भगेन व्याख्यातं भजनीयं भूतानामभिद्रवणीयं भवद्रमयतीति वा भाजनवद्वा लक्ष्मीर्लाभाद्वालक्षणाद्वा लप्स्यनाद्वा लाञ्छनाद्वा[2] लषतेर्वा स्यात्प्रेप्साकर्मणो लग्यतेर्वा स्यादाश्लेषकर्मणो लज्जतेर्वा स्यादश्लाघाकर्मणः शिप्रे इत्युपरिष्टाद्व्याख्यास्यामः ॥ १०[3] ॥

सक्तुमिव तितउनेति । विद्यासूक्ते बृहस्पतेरार्षम् । 'सक्तुः सचतेः' । स हि सूक्ष्मत्वात्सचति संश्लिष्यत्यङ्गे । तता 'दुर्धावो भवति' इत्युपपत्तिः । दुःखं धाव्यते प्रक्षाल्यत इत्यर्थः । 'कसतेर्वा स्याद्विपरीतस्य' । स हि 'विकसितो' विपुष्पितः 'भवति' । यथा सक्तुं कश्चित्परिपवनेन पुनात्येवं मनसा परिपवनस्थानीयेन परिपूय विनिश्चित्य शब्दार्थं न्याययुक्तां वाचं यत्र यस्मिन् समाजे यज्ञे वा धीराः धीमन्तो मेधाविनः अक्रत अकृषत । कुर्वन्तीत्यर्थः । अत्र केचिदकृषत प्रज्ञानमित्यभिधीयते प्रज्ञानार्थत्वाद्वाचः । तत्र किमिति । तत्र सखायः समानख्यानाः समानख्यानानामेव समानेषु शास्त्रेषु कृतश्रमाणाम् । तद्यथा । वैयाकरणानां वैयाकरणा एव नैरुक्तानां नैरुक्ता एव । सख्यानि सखिभावान् जानते[4] । विज्ञानानि संजानते । इतरेतरस्य यो विज्ञानप्रकर्षस्तं जानते । किं कारणम् । यस्मात् भद्रा भन्दनीया एषां लक्ष्मीर्विज्ञानाख्या निहिताधि वाचि । वाचः अधि उपरि निहिता अवस्थापिता । तया लक्ष्म्या इतरेतरस्य विज्ञानश्रमं जानते । इतरो ह्यविद्वान् किं[6] विज्ञास्यत इत्यभिप्रायः ।

तितउशब्दस्योदाहरणम्

'भद्रं भगेन व्याख्यातं' 'स्त्रीभगस्तथा स्याद्भजतेः' [निरु० ३ ।

---

१ क. ख. छ. त द. 'इति' नास्ति. २ क. ख. छ. त. द. लंछना°. ३ क. ख. २ (१०); द. २. ४ क. ख. संज्ञानते; ग. ज. जायते; च. जायंते° न. ५ च. विज्ञानस्य संजानते. ६ ठ. ठ. किंचिज्ञास्य°. ७ व. ड. ठ. ड. 'भजतेः इति' नास्ति; च. भजतेरितिमं° भं.

भद्रशब्दस्य व्युत्पत्तिः

१६] इति । 'भजनीयम्'[१] इति । 'भूतानामभिद्रवणीयम्' । अभिगमनीयमित्यर्थः । 'भवद्रमयतीति वा' । यस्य हि तद्भवति स रमते । 'भाजनवद्वा' । सन्ति हि कल्याणरूपाः पुरुषा ये तस्य भाजनम् । तैस्तद्वत् । 'लक्ष्मीर्लाभाद्वा' । लक्ष्मीवन्त एव लभन्ते नेतरे । 'आलक्षणाद्वा' । आलक्षित एव हि लक्ष्मीवान् । 'लाञ्छनाद्वा'[२] । तया हि लञ्छित[३] इव भवति । 'लषतेर्वा स्यात्प्रेप्साकर्मणः' [धा० १ । ८१३] । सर्व एव हि तामभिलषन्ति । 'लग्यतेर्वा स्यादाश्लेषकर्मणः' [धा० १।७८७] । आश्लिष्येव हि सा वर्तते पुरुषम् । 'लज्जतेर्वा स्यादश्लाघाकर्मणः' [धा० ६ । ११] । ये हि लक्ष्मीवन्तो भवन्ति ते स्वयमात्मानं न श्लाघन्ते ।

लक्ष्मीशब्दस्य च

'शिप्रे [निघ० ४ । १ । ११] इति' एतद् 'उपरिष्टाद्व्याख्यास्यामः' । 'शिप्रे हनू नासिके वा' [निरु० ६ । १७] इत्यत्र ह्येतन्निगमप्रसक्तमायास्यतीति लाघवार्थमुत्कृष्टम् । 'मध्या' [निघ०[४] ४ । १ । १२] इत्येतदनवगतम् । 'मध्ये' इत्यवगमः ॥ १० ॥

तत्सूर्यस्य देवत्वं तन्महित्वं मध्या कर्तोर्विततं सं जभार । यदेदयुक्त हरितः सधस्थादाद्रात्री वासस्तनुते सिमस्मै [ऋ० सं० १ । ११५ । ४] ॥ तत्सूर्यस्य देवत्वं तन्महित्वं मध्ये यत्कर्मणां क्रियमाणानां विततं संह्रियते यदासावयुक्त[५] हरणानादित्यरश्मीन् हरितोऽश्वानिति वाथ रात्री वासस्तनुते सिमस्मै वेसरमहरवयुवती सर्वस्मादपि वोपमार्थे स्याद्रात्रीव वासस्तनुत इति तथापि निगमो[६] भवति । पुनः समव्यद्विततं वयन्ती । समनात्सीत् ॥ ११ ॥

---

१ ग. ज. 'भजनीयमिति' नास्ति. २ क. ख. ग. ज. लंछना°; च. ट. लांछना° लं. ३ च. लांक्षित इ° लां(लं)छि. ४ क. ख. २ (१०); ग. १३ (१०); च. ज. १३; घ. ट. ठ. ड. अङ्को नास्ति. ५ क. ख. छ. द. °वयुक. ६ क. ख. ३ (११); द. ३.

तत्सूर्यस्य देवत्वं तन्महित्वम् । आङ्गिरसस्य कुत्सस्येयमार्षम् । त्रिष्टुप् । सौर्यस्य पशोः षडर्चे वपाया याज्या । सूत्रितं च ' चित्रं देवानामिति पुरोनुवाक्यास्तिस्र उत्तरा याज्याः सौर्यस्योपांशु ' इति । तदहं सूर्यस्य भगवतो देवत्वं देवताभावं तन्महित्वं तच्च महत्त्वं माहाभाग्यं मन्ये जाने । यत्किमिति । मध्या मध्ये यत्कर्मणां क्रियमाणाना-मनेकेषामवगणय्य सर्वान् कर्मकर्तॄन् मिषतां तेषां विततमेतत्प्रकाश-जालमेवमतिमहत् । महतापि कालेन तद्गुरुपसंहार-मन्यैः । यदेकेन मुहूर्तेनायत्नेनैव भगवता सूर्येण संह्रियते तदस्य देवत्वं तच्च महत्त्वमहं मन्ये । किंच । यदासौ भगवान् सूर्यः अयुक्त युनक्ति हरितः रसहरणान् रश्मीन् आत्मनि अस्तं गच्छन् सधस्थात् पृथिवी-लोकादाकृष्य । पृथिवी हि तेषां रसादानार्थं सहस्थानम् । इतो हि ते सर्व एव रसानाददते । आत् अथेत्यर्थः । अथ तदैवोपसंहृतसर्वरश्मिजाले भगवति सूर्ये रात्रिर्वासः वेसरमहरवयुवती अवमिश्रयन्ती सिमस्मात्सर्व-स्माल्लोकात् अहरपकृष्य सा तमस्तनुते । तदेवमेतदपि सूर्यस्यैव माहाभाग्यं यदस्य संनिधौ तमो नश्यति यश्चानेनोत्सृष्टो देशः स तमसा छाद्यत इत्य-भिप्रायः । ' हरितोऽश्वानिति ' ऐतिहासिकपक्षमतेन ।

मध्या इत्यस्योदाहरणम्

' अपि वोपमार्थे स्याद्रात्रीव वासस्तनुत इति ' । वास इव रात्री तमस्तनुत इत्यर्थः । पूर्वत्र वेसरमहरवयुवती तमस्तनुत इति नास्त्युपमा । इह पुनर्वास इव तमस्तनुत इत्येवमुपमा । यथा चोपमार्थोऽपि युज्यते 'तथा' च ' निगमोपि ' अयं 'भवति' ।

उपमार्थोऽप्यस्यामृचि स्यात्

१ क. ख. घ. ढ. देवत्वं० सिमस्मै । आङ्गि°; ठ. ड. तत्सूर्यस्येति । आङ्गि°. २ घ. झ. षलर्चे; ढ. षळर्चे. ३ ग. ज. 'वपाया......स्योपांशु' इति नास्ति; च. षडर्चे । तदहं° वपाया०० स्योपांशु इति. ४ घ. झ. ट. ठ. ड. च. महाभाग्यं. ५ क. ख. घ. ट. ठ. ड. च. विततं. ६ घ. ठ. ठ. ड. °जलतमेव°. ७ घ. ठ. ठ. ड. ' महत् ' नास्ति. ८ ठ. ड. रसदाना°. ९ ग. ज. हरितो विवास इव रात्री तमस्त इत्यश्वानित्यैति°; घ. ट. ठ. ड. हरितोऽश्वा इत्यै°. १० ग. ज. ' च ' नास्ति; च. यथोपमा° था चो. ११ ग. च. ज. °वति । १४ । पुनः°.

पुनः समव्यद्विततं वयन्ती मध्या कर्तोर्न्यधाच्छक्म धीरः । उत्संहायास्थाद्व्यृ[1]तूँरदर्धररमतिः सविता देव आगात् । [ऋ० सं० २।३८।४] ॥ गृत्समदस्येयमार्षम् । सावित्री । त्रिष्टुप् । पृष्ठ्यस्य षष्ठेऽहनि वैश्वदेवशस्त्रे शस्यते तृतीयसवने [आश्व० श्रौ० ८।८]। 'पुनः समव्यद्विततं वयन्ती । समनात्सीत्' इति निर्वचनम् । समवेष्टयदित्यर्थः । यथा योषित्काचिद्वासो वयन्ती पुनः संवेष्टयत्यस्तमयकाले पुनश्च वितनोत्यादित्य उदित एवमियं रात्रिः पुनरेव तमः संवेष्टयति योषिदिव वासो वयन्ती । कदा पुनः संवेष्टयति । यदा मध्या मध्ये कर्तोः कर्मणां क्रियमाणानां लौकिकवैदिकानां विततमेतद्रश्मिजालं शक्म स्वात्मप्रसवादपत्यभूतं न्यधात् नीचैर्धत्ते लोकानां प्रकाशनाय । अथवा शक्मेति कर्मनाम स्यात् [निघ० २ । १ । ९] । यदा स्वं प्रकाशं पुनः कर्म निधत्ते निदधाति उदेति धीरो धीमानादित्यस्तदाहन्यभ्युपस्थिते पुनः संवेष्टयति रात्रिस्तम इति । अस्तमयं प्रति पुनर्वास इव तनोतीति । एवमेतस्मिन्नपि मन्त्रे सामर्थ्याद्सत्युप[2]माशब्दे वाससा तम उपमीयते । यथेह तथा पूर्वस्मिन्नपि निगमेऽपीत्येवमेके मन्यन्ते । अपरे पुनः 'अपि वोपमार्थे स्यात्' इत्यत्रैवं वर्णयन्ति । रात्रीव वासस्तनुत इत्यत्र वासःशब्दोऽहःशब्दपर्यायवाची । तस्योक्ता व्युत्पत्तिः वेसरमहरिति [निरु० ४ । ७] । सा रात्रिर्वासस्तनुते । अहस्तनुत इत्यर्थः । रात्रिप्रान्ते हि शुक्लमहर्लक्ष्यते तेन ज्ञायते रात्र्ये[3]वेदं ततमिति । एवमुपमार्थत्वमेके मन्यन्ते । यदा चायमर्थस्तदा 'पुनः समव्यद्विततं वयन्ती' इत्यत्र पुनः समवेष्टयदहो रात्रिर्विततमिव वासो वयन्ती । कदा । यदा मध्ये कर्मणां न्य[4]धात् निदधात्यस्तं गच्छन्नादित्यः स्वमण्डले शक्म रश्मिजालम् । यदा च उदस्थात् उत्तिष्ठति स्वरश्मीनुपसंहृत्य व्यदर्धः[5] व्यधात्[6] विदधाति ऋतून् अहो-

तादृगुपमार्थेऽन्या ऋक्

अत्रोपमाशब्दं विनापि सामर्थ्यादुपमार्थः

अपि वोपमार्थे स्यादित्यादेरन्योऽर्थः

---

१ ग. ज. वयन्ती । गृत्स;° घ. ट. वयन्ती° सविता°. २ ग. ज. °सत्यप्युपमा°. ३ क. ख. घ. झ. ट. ठ. ड. रात्र्यैवेदं.° ४ ग. ज. 'नि' नास्ति; च. निअधात्. ५ ग. ज. घ. झ. ट. ठ. ड. 'व्यदर्धः' नास्ति. ६ ग. व्यदाधात्; ज. व्यवदधात्.

रात्रलक्षणान् । यदैवमेष सविता देवोऽल्पमतिः पर्याप्तमतिः आगात् आगच्छति तदा रात्रिस्तनुते वासोऽहर्लक्षणं पुनः संवेष्टयतीत्येवं मन्यन्ते । यदत्रार्थाविरोधि तत्प्रतिपत्तव्यम् । 'मन्दू' [निघ० ४ । १ । १३] इत्यनवगतम् । 'मदिष्णू मन्दुना' इति वा शब्दसमाधी ॥ ११ ॥

इन्द्रे॑ण॒ सं हि दृक्ष॑से संजग्मा॒नो अबि॑भ्युषा । म॒न्दू स॑मा॒नव॑र्चसा [ऋ० सं० १ । ६ । ७]॥ इन्द्रेण हि संदृश्यसे संगच्छमानोऽबिभ्युषा गणेन मन्दू मदिष्णू युवां स्थोऽपि वा मन्दुना तेनेति स्यात्समानवर्चसेत्येतेन व्याख्यातम् ॥ १२ ॥

इन्द्रेण सं हीति निगमः । मधुच्छन्दस इयमार्षम् । महाव्रते महदुक्थे तृचाशीतिषु शस्यते । सात्रिकेषु चाहःसु स्तोमातिवृद्धौ प्रातःसवने ब्राह्मणाच्छंसिनः शस्त्रे । इन्द्र उच्यते । हे भगवन्निन्द्र त्वम् इन्द्रेण ईश्वरेण दीप्तेन वा मरुद्गणेन नित्यमेव संगच्छमानः संदृश्यसे अबिभ्युषा अभयवता । 'गणेन' इत्यध्याहारः । तौ च युवां मरुद्गणस्त्वं चैकत्र संगतौ मदिष्णू हर्षशीलौ । नित्यप्रमुदिताविस्यर्थः । समानवर्चसौ च । समानदीप्तौ इत्यर्थः । एवं 'मन्दू समानवर्चसा' इत्येतेन द्विवचनेन मरुद्गणेनेन्द्रविषयेण निगमो व्याख्यातः । 'अपि वा' एवमन्यथा 'स्यात्' ।

मन्दूशब्दस्यान्वयोऽर्थश्च

मन्दू इत्यस्य तृतीयैकवचनत्वेन विपरिणामः । एवं च सति मरुद्गणविशेषणमेतद्भवति । कथम् । मन्दुना मरुद्गणेन हे इन्द्र संदृश्यसे संगच्छमानः । 'समानवर्चसेति' एतत्पदं मन्दुनेति 'एतेन' पदेन 'व्याख्यातम्' । यथैव हि मन्दू इत्येतद् द्विवचनमेकवचनं वैवमेतदपि । समानवर्चसाविन्द्रमरुद्गणाविति द्विवचनमथवा मन्दुना समानवर्चसा च मरुद्गणेनेत्येवं तृतीयैकवचनम् । अपि वैवं मरुद्गण उच्यते । त्वमिहेन्द्रेण संगच्छमानो

---

१ च. यद॑र्थां° त्रा. २ क. ख. ३ [११]; ग. १५(११); च. १५; घ. ट. अङ्को नास्ति; ठ. ड. °माधी इति निरुक्तटीकायां चतुर्थाध्याये एकादशः खण्डः. ३ क. ख. ४ (१२); द ४. ४ ठ. ड. हि दृक्षस इति. ५ च. चैं. ६ च. °अपि चैव°. ७ च. °श्यते.

नित्यमेव संदृश्यस इति । समानमन्यत् । 'ईर्मान्तासः' [निघ० ४ । १।१४] इत्यनवगतम् । 'समीरितान्ताः पृथ्वन्ता वा' इति यथासंभवं शब्दसमाधी ॥ १२[1] ॥

ईर्मान्तासः सिलिकमध्यमासः सं शूरणासो दिव्यासो अत्याः । हंसा इव श्रेणिशो यतन्ते यदाक्षिषुर्दिव्यमज्ममश्वाः [ऋ०सं० १। १६३।१०] ॥ ईर्मान्ताः समीरितान्ताः सुसमीरितान्ताः[2] पृथ्वन्ता वा सिलिकमध्यमाः संसृतमध्यमाः शीर्षमध्यमा वापि वा शिर आदित्यो भवति यदनुशेते सर्वाणि भूतानि मध्ये चैषां तिष्ठतीदमपीतरच्छिर एतस्मादेव समाश्रितान्येतदिन्द्रियाणि भवन्ति । सं शूरणासः दिव्यासो[3] अत्याः । शूरः शवतेर्गतिकर्मणो दिव्या दिविजा अत्या अतनाः । हंसा इव श्रेणिशो यतन्ते । हंसा हन्तेर्घ्नन्त्यध्वानं श्रेणिश इति श्रेणिः श्रयतेः समाश्रिता भवन्ति यदाक्षिषुर्यदापन् दिव्यमज्ममजनिमाजिमश्वा अस्त्यादित्यस्तुतिरश्वस्यादित्यादश्वो निस्तष्ट इति । सूरादश्वं वसवो निरतष्टेत्यपि निगमो भवति ॥ १३[4] ॥

ईर्मान्तास इति निगमः[5] । दीर्घतमस आर्षम् । 'यमेन दत्तम्' [ऋ०सं० १।१६३।२] इतीयं च । द्वे अप्येते अश्वस्तोमीये सूक्ते । तेन चाश्वः स्तूयतेऽश्वमेधे [आश्व०श्रौ०१०।८] । आदित्यस्य रथे येऽश्वा युक्तास्त उच्यन्त ईर्मान्तासः । तेषां सतानां येऽश्वाश्चत्वारस्ते समीरितान्ताः विक्षिप्तान्ताः प्रसृतान्ताः[6] । प्रविरला इत्यर्थः । पृथ्वन्ता वा । तेषामेवाश्वानां पृथवोऽन्ताः । पृथूरस्काः । पृथुजघना वेत्यर्थः । सिलिकमध्यमाः संसृतमध्यमाः । संश्लिष्टमध्यमा इत्यर्थः । तेषां हि सतानां ये मध्यमास्त्रय इतरेतरमुत्पीड्य संश्लेषेणावस्थिताः । अथवा पृथुजघनोरस्कानां सतां मध्यमाः शरीरप्रदेशाः सतानामपि संश्लिष्टाः संलग्नास्तनवः । निरुदरास्तेऽश्वा

ईर्मान्तास इत्यस्योदाहरणम्

---

१ क. ख. ४ (१२); ग. १६ । १२; च. १६; इतरेष्वङ्को नास्ति. २ छ. त. द. 'सुसमीरितान्ताः' नास्ति. ३ छ. त. द. 'दिव्यासो अत्याः' नास्ति. ४ क. ख. ५ (१३); द. ५.५ ठ. ड. 'निगमः' नास्ति. ६ ग. ज. विसृताः; च. विसृताः° प्र.

इत्यर्थः । तथापि हि[1] स्तुतिरुपपद्यत एव । शीर्षमध्यमा वा सिलिकमध्यमा[2] वा[3] । एवमपि हि शब्दे[4]सारूप्यमस्ति । यो हि तेषां सप्तानां मध्यमः स शिरोभूतः । प्रधान इत्यर्थः । 'अपि वा' एवमन्यथा स्यात् । 'शिर आदित्यः' एव 'भवति' सर्वभूतप्राधान्यात् । 'मूर्धा राजेति वा अहमेतमुपासे' इति ह विज्ञायते [बृह० उप० २ । १ । २] । यस्माच्चासौ 'अनु'प्रविश्य प्राणभावेन सर्वभूतानि ' शेते ' आस्ते तस्मात्सर्वभूताश्रयणात् शिर आदित्यः । स 'च' एतेषामश्वानां 'मध्ये तिष्ठति' इति शीर्षमध्यमाः । त एते शीर्षमध्यमा इत्युक्ताः सन्तः सिलिकमध्यमा इत्युच्यन्ते । ' इदमपीतरच्छिर एतस्मादेव' इति प्रासङ्गिकम् । ' समाश्रितानि ' हि ' एतत् ' उत्तमाङ्गम् ' इन्द्रियाणि ' चक्षुरादीनि 'भवन्ति' इति शिरउपपत्तिः । संशूरणासः । संगताः शूरेण[5] भगवतादित्येन संशूरणाः । ' शूरः शवतेर्गतिकर्मणः ' । स हि परानभिमुखो गच्छत्येव न पर्यावर्तते । दिव्यासः । ते हि दिव्याः दिवि जाताः । अत्याः अतनाः । ते ह्यतन्त्येव मुहूर्तमपि नावतिष्ठन्ते । य एवंलक्षणा अश्वास्ते किं कुर्वन्तीति । उच्यते । हंसा इव श्रेणिशो यतन्ते । हंसा इव श्रेणीकृताः पङ्क्तीकृता यतन्ते गच्छन्ति । ' हंसा हन्तेः ' । ते हि ' घ्नन्त्यध्वानम् ' । कदा पुनरेवं यतन्ते । यदाक्षिषुः । यदा[7] यस्मिन् काले आक्षिषुः आपन् आप्नुवन्ति । किम् । दिव्यमज्मम् । अजनिम् । अज्यतेऽस्यां गम्यत इति अजनिर्वीहिका । स्वर्गपथ इत्यर्थः । यदा त आप्नुवन्ति उदयादारभ्य यावदस्तमिति तदैवं यतन्ते । के पुनस्त इति । उच्यते । अश्वाः । एवमेतानि ' ईर्मान्तास ' इत्येवमादीन्यश्वविशेषणान्यश्वशब्देन समानविभक्त्यन्तत्वात् । ' आत्मैवैषां रथो भवत्यात्माश्वा[8] ' इत्येवं प्रक्रमेण सूर्यदैवत एष मन्त्रः[9] । स पुनरयमश्वस्तुतौ विनियुक्तस्तदसमञ्जसमिति मन्यमानो भाष्यकारः प्रतिसमाधित्सुराह । ' अस्त्यादित्यस्तुति-

---

१ च. हि. २ ग. ज. शिलिक°; च. सिलिक° संलग्न. ३ च. वा. ४ क. ख. घ. झ. ट. ठ. ड. शब्दे सा°; च. शब्दे सा° ब्द्. ६ च. °अपि चैव°. ५ ग. ज. शूरणेन शूरेण. ७ क. ख. घ. झ. ट. ठ. ड. यत् यदा. ८ ग. ज. त्माश्व इ°; च. °त्माश्वा इ° श्व. ९ क. ख. घ. झ. ट. ठ. ड. मन्त्र उक्तः; च. मन्त्रः । स° उक्तः.

अत्राश्व आदित्य इति स्तूयते

रश्वस्य ' इति । अश्वोऽपि ह्यादित्यात्मना स्तूयत इत्यर्थः । आह । कयोपपत्त्येति । उच्यते । ' आदित्यादश्वो निस्तष्ट इति ' अनयोपपत्त्या सूर्यात्मनाश्वः स्तूयते । आह । कुत एतत्सूरादश्वो निस्तष्ट इति । उच्यते । 'सूरादश्वं वसवो निरतष्ट ' इत्यपि निगमो भवति ।

अस्यामृच्यादित्याद्श्वो निस्तष्ट इत्युच्यते

यमेन दत्तं त्रित एनमायुनगिन्द्र एणं प्रथमो अध्यतिष्ठत् । गन्धर्वो अस्य रशनामगृभ्णात्सूरादश्वं वसवो निरतष्ट [ऋ० सं० १ । १६३ । २] ॥ यमेन एनम् अस्माकं दत्तम् अश्वं त्रितः त्रिस्थानो वायुर्युनक्ति यत्रायं योक्तव्यस्तत्र । वायुना युक्तमेनमिन्द्र एणम् एनमश्वं प्रथमः सर्वदेवानां मुख्योऽध्यतिष्ठत् । कोऽन्य एवमास्थातुं शक्नुयादित्यभिप्रायः । वायुना युक्तस्येन्द्रेणाधिष्ठितस्यास्य गन्धर्वराजः रशनामगृह्णात् नियमनरज्जुं गृह्णाति । कुतः पुनरयमश्व इति । उच्यते । सूरात् सूर्यादेतमेवंलक्षणमश्वं वसवो निरतष्ट निःकृष्टवन्तः । एवमेतस्मिन्मन्त्रे सूर्यप्रभवोऽश्व इति स्तूयते । कारणाच्च कार्यमनन्यदित्युपपद्यते सौर्येण मन्त्रेणाश्वस्य स्तुतिरिति ।

' कायमानः ' [निघ० ४ । १ । १५] इत्यनवगतम् । ' चायमानः ' इत्यवगमः ' कामयमान इति वा ' ॥ १३ ॥

कायमानो वना त्वं यन्मातॄरजगन्नपः । न तत्ते अग्ने प्रमृषे निवर्तनं यद्दूरे सन्निहाभवः [ऋ० सं० ३ । ९ । २] ॥ कायमा-

---

१ च. निस्तष्टत्यन° ष्ट इ. २ ग. च. ज. °वति । १७ । यमे°. ३ ग. च. ज. घ. ट. °मायुनगिति । यमे°. ४ घ. झ. ट. ड. एतम्. ५ ग. ज. °स्थातुमाप्नुयादि°; च. ट. °स्थातुं शक्नुं° आप्नु; ठ. ड. °स्थातुं शक्नुमाप्नुयादि°. ६ क. ख. घ. झ. ट. ठ. ड. गन्धर्वः गन्धर्वराजः. ७ ठ. ड. °गृभ्गात्. ८ क. ख. घ. झ. ट. ठ. ड. नियमेन रज्जुं; च. ज. नियमन° भे. ९ क. ख. घ. झ. ट. निस्तष्टवन्तः; ठ. ड. °तष्ट । स्तुवन्त । एव°; च. निःकृष्ट° निस्त. १० ग. ज. ' मन्त्रेण ' नास्ति; च. सौर्येणाश्व° ण मन्त्रेणा. ११ क. ख. ५ [१३] ग. १८ । १३; च. ज. १८; घ. ट. ठ. ड. अङ्को नास्ति.

नश्चायमानः कामयमान इति वा वनानि त्वं यन्मातृरपोऽगम उपशाम्यन् न तत्ते अग्ने प्रमृष्यते निवर्तनं दूरे यत्सन्निह भवसि जायमानः । लोधं नयन्ति पशु मन्यमानाः । लुब्धमृषिं नयन्ति पशुं मन्यमानाः । शीरं पावकशोचिषम् । पावकदीप्तिम् । अनुशायिनमिति वाशिनमिति वा ॥ १४ ॥

काय[1]मानो वना त्वमिति निगमः । विश्वामित्रस्येयमार्षम् । बृहती । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १३] । हे भगवन्नग्ने कायमानः चायमानः । पश्यन्नित्यर्थः । अथवा कामयमानः । किम् । स्वां योनिम् । कतमाम् । वना वनानि दारूणि । दारुभ्योऽग्निर्जायते च[2] ।

कायमान इत्यस्योदाहरणम्

तदेतत्प्रसिद्धमेव । उक्तं च[3] । 'यदा चाग्निरनुगच्छति अरणी वाव सं गच्छति ' इति । मातर्वा सर्वभूतनिर्मात्रीरपः । सापि योनिरेवाग्नेः[4] । ' आपो वा अग्नेर्योनिः ' [मैत्रा० सं० ३ । २ । २ ॥ ३ । २ । ३ ॥ ३ । ४ । १०] इति ह विज्ञायते । अनयोर्योन्योरन्यतरां योनिं यत्[5] यदा अजगन् अगमस्त्वम् । कदा पुनरगमः । उपशाम्यन् इत्यध्याहृतं भाष्यकारेण । अनुगच्छन्नित्यर्थः । तस्य तवैवमनुगच्छतः किमिति । उच्यते । न तत्ते अग्ने प्रमृषे निवर्तनं न प्रमृष्यते न प्रमृज्यते निवर्तनं वर्त्म । मार्गो न लुप्यत इत्यर्थः । कथं गम्यते न प्रमृज्यते मार्ग इति । दूरेऽपि सन् अदृश्योऽपि भूत्वा यस्मादिह पुनर्भवस्येव । कदा । जायमानो यत्[6] यदाद्भ्यो जायसे वैद्युतात्मना यदा वारणिभ्यां जायसे मथ्यमानस्तदा ।

न[7] सायकस्य चिकिते जनासो लोधं नयन्ति पशु मन्यमानाः । नावाजिनं वाजिना हासयन्ति न गर्दभं पुरो अश्वान्नयन्ति [ऋ० सं० ३ । ५३ । २३] ॥ लोधम् [निघ० ४ । १ । । १६] इत्यनव-

---

१ क. ख. ६ (१४); द. ६. २ ठ. ड. कायमान इति । विश्वा°. ३ क. ख. घ. झ. ठ. ठ. ड. 'च' नास्ति; च. चँ. ४ ग. च. ज. वाग्नि°. ५ च. सँ. ६ ग. ज. ' यत् ' नास्ति. ७ ग. ज. ' न साय००नयन्ति ' नास्ति. ८ घ. ट. °किते ज० अश्वान्नयन्ति.

गतम् । ' लुब्धम् ' इत्यवगमः । यस्मिन्निगम एष शब्दः सा वासिष्ठद्वेषिणी ऋक् । अहं च कापिष्ठलो वासिष्ठः । अतस्तां न निर्ब्रवीमीति ।

' शीरम् ' [निघ० ४ । १ । १७] इत्यनवगतम् । अग्निरभिधेयः । ' अनुशायिनमिति वा ' इति । अनुप्रविश्य सर्वभूतानि शेत इत्यनुशायी तमनुशायिनम् । अश्नोति व्याप्नोति वा सर्वभूतानीति ' आशिनम्[1] ' ।

शीरमित्यस्य

शीरं पावकशोचिषं ज्येष्ठो[2] यो दमेष्वा[3] । दीदाय दीर्घश्रुत्तमः [ऋ० सं० ८ । १०२ । ११] ॥ इति[4] निगमः ।

भार्गवस्य प्रयोगस्येयमार्षम्[5] । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १३] । शीरम् अनुशायिनं व्यापिनं वा अग्निमहं स्तौमि । पावकशोचिषं पावयित्री यस्य शोचिर्दीप्तिस्तं पावकशोचिषम् । किंच । ज्येष्ठः श्रेष्ठो यः प्रधानो यो[6] दमेषु यज्ञगृहेषु आदीदाय आदीप्यते परिचर्यमाणोऽग्निहोत्रिभिः । किंच । दीर्घश्रुत्तमो यः । दीर्घश्रोतृभ्यो[7] यो दीर्घश्रुत्तमस्तमहं[8]मग्निं स्तौमि ।

' विद्रधे ' [१८] ' द्रुपदे ' [१९] इत्येते पदे एकनिगमे । द्वे अप्यनवगते । पक्षेण चानेकार्थे । ' विद्रधे[9] विद्धे द्रुपदे द्रुममये पदे ' इत्यवगमः । दारुपादौ[10] वा एताभ्यां शब्दाभ्यां विशेष्येते । कन्ययोर्वा पादपीठप्रवचने सप्तम्येकवचनान्ते एते । द्वयोरपि पदयोरेक एव निगमः ॥ १४[11] ॥

कनीनकेव विद्रधे नवे द्रुपदे अर्भके । बभ्रू यामेषु शोभेते [ऋ० सं० ४ । ३२ । २३] ॥ कनीनके कन्यके

---

१ ग. च. ज. °शिनम् । १९ । शीरं. २ घ. ट. °चिषं ज्ये० श्रुत्तमः. ३ ग. ज. °ष्वा० श्रुत्तमः. ४ ठ. ड. ' इति निगमः ' नास्ति. ५ ग. ज. प्रउगस्ये°; च. प्रउैगस्ये° यो. ६ क. ख. घ. झ. ट. ठ. ड. ' यः ' नास्ति. ७ ग. ज. °श्रोत्रिभ्यो°. ८ क. ख. घ. झ. ट. ठ. ड. ' अहं ' नास्ति. ९ ग. विद्रधे द्रुममये; च. विव्यृद्धये दिगिमतऋद्धिकयोः द्रुप° दध्रे विद्धे; ज. विदद्धे द्रुममये°. १० घ. झ. ट. ठ. ड. दारुपादूद्दौ; च. दारुपारूद्दौ. ११ क. ख. ६ (१४); ग. २० (१४); च. ३०; ज. २०; घ. ट. अङ्को नास्ति; ठ. ड. १४ इति निरुक्तटीकायां चतुर्थाध्याये चतुर्दशः खण्डः ।

कन्या कमनीया भवति क्वेयं नेतव्येति वा कमनेनानीयत इति वा कनतेर्वा स्यात्कान्तिकर्मणः कन्ययोरधिष्ठानप्रवचनानि सप्तम्या एकवचनानीति शाकपूणिर्विद्धयोर्दारुपाद्धोर्दारु दृणातेर्वा द्रूणातेर्वा तस्मादेव द्रु नवे नवजाते अर्भके अवृद्धे ते यथा तदधिष्ठानेषु शोभेते एवं बभ्रू यामेषु शोभेते बभ्रोरश्वयोः[3] संस्तव इदं च मेऽदादिदं च मेऽदादित्यृषिः प्रसंख्यायाह। सुवास्त्वा अधि तुग्वनि। सुवास्तुर्नदी तुग्व तीर्थं भवति तूर्णमेतदायन्ति। कुविन्नंसन्ते मरुतः पुनर्नः। पुनर्नो नमन्ते[4] मरुतो नसन्त इत्युपरिष्टाद् व्याख्यास्यामः। ये ते मदा आहनसो विहायसस्तेभिरिन्द्रं चोदय दातवे मघम्। ये ते[6] मदा आहननवन्तो वचनवन्तस्तैरिन्द्रं चोदय दानाय मघम् ॥ १५ ॥

कनीनकेव विद्रधे इति। वामदेवस्यार्षम्। 'कन्या कमनीया भवति'। सर्व एव हि तां प्रार्थयन्त एव। अथवा 'क्वेयं नेतव्येति वा' दानायेत्येवं तां प्रति पिता चिन्तयतीति कन्या। 'कमनेनानीयत इति वा'। 'कनतेर्वा स्यात्कान्तिकर्मणः'। 'कनति कानिषत्' इति कान्तिकर्मसु पठितम् [निघ० २ । ६]। इवेत्युपमायाम्। विद्रधे नवे द्रुपदे अर्भके इत्येतानि चत्वारि पदानि 'कन्ययोरधिष्ठानप्रवचनानि सप्तम्या एकवचनानीति' एवं 'शाकपूणिः' आचार्यो मन्यते। एकस्मिन्दारुमये पादपीठे यस्मिन्नधिरूढे कन्यके शालभञ्जिके वा। तदेतैश्चतुर्भिः पादैरुच्यत इति शाकपूणिराचार्यो

विद्रधे इत्यादिपदानि सप्तम्येकवचनानीति शाकपूणिः

१ छ. त. द. 'कमनेनानीयत इति वा' नास्ति. २ छ. °पूणिर्व्यूद्धयोर्दारूपाद्वोर्दारु°; त. द. पूणिर्व्यूद्धयो°. ३ छ बभ्रूवो रश्मयोः सं°; त. बभ्रूरश्मयोः सं°; द. बभ्वोरश्मयोः सं°. ४ छ. त. द. नवन्ते. ५ क. ख. छ. त. द. नसत°. ६ क. ख. ७ (१५); द. ७. घ. ट. विद्रधे० शोभेते इति. ८ च. 'कमनेनानीयत इति वा' प्रान्ते लिख्यते. ९ च. सप्तम्येकव°. १० क. ख. ग. ज. घ. झ. ट. ठ. ड. यस्मिन् समधिरूढेषु (ग. ज. यस्मिन्नाधिरूढेषु यस्मिन् समधि°) पादुकाख्येष्वधिष्ठानेष्वधिरूढे शोभेते यथा एवं बभ्रू बभ्रुवर्णौ अश्वे (घ. झ. ट. ठ. ड. अश्व) यामेषु आजिस्थानेषु (ग. ज. 'आजिस्थानेषु' नास्ति) यमनस्थानेषु कन्य°. ११ च. °रूढे ॱ कन्य° 'षु पादुका००यमनस्थानेषु' अयं १० पाठश्चिन्हद्वहिर्गत प्रान्ते लिख्यते.

मन्यते । यास्कस्तु 'विद्वयोः' विकुषिताधोभाग—'दारुपाद्वोः' अधिरूढयोः कन्ययोरभिधानपदान्यभिधायकान्येतानि द्विवचनानीति मन्यते । ताभ्यां ह्यश्विन्योः खुराकारत्वेन सारूप्यमस्तीत्येवमुपमानम् । दारुपाद्वोरित्येतस्मिन् व्याख्यानप्रसक्ते पदे विग्रहप्रसक्तो दारुशब्दो निरुच्यते । 'दारु दृणातेर्वा' विदारणार्थस्य [धा० ९।२१] द्रूणातेर्वा हिंसार्थस्य । तस्मादेव धातुद्वयादन्यतरस्य ' द्रु ' इत्येतदभिधानं भवति । द्रुपदे इत्येतदपेक्ष्य ' एतस्मादेव द्रु ' इत्येतदुक्तम् । द्रुम इत्यर्थः । ' नवे नवजाते ' । ' अर्भके अवृद्धे ' । अल्पके इत्यर्थः । ते कन्यके एवंप्रकारेषु तदधिष्ठानेषु तेषु पादुकाख्येष्वधिष्ठानेष्वधिरूढे शोभेते यथा एवं बभ्रू बभ्रुवर्णे अश्वे यामेषु आजिस्थानेषु यमनस्थानेषु वा बन्धनस्थानेषु मन्दुराख्येषु वर्तमाने शोभेते ते । एवमेव 'बभ्रोरश्वयोः संस्तवः' ।

कन्ययोर्विशेषणानीति यास्कः

' तुग्वनि ' [२०] इत्यनवगतम् । ' तूर्णमेतदायन्ति ' इति शब्दसमाधिः । ' तीर्थम् ' अभिधेयम् । ' सुवास्त्वा अधि तुग्वनि ' [ऋ० सं० ८ । १९ । ३७] इति निगमः । अस्य ऋक्पादस्य ऋक्छेषापेक्षो निर्णयः । सर्वस्या अपि च तस्या ऋचो यस्यामयं पादस्तस्या याऽन्याधस्त्या ऋक्तदपेक्षो निर्णयो यतोऽतस्तस्या ऋच आधस्त्यायाः संक्षिप्यार्थमाह भाष्यकारः 'इदं च मेऽदादिदं च मेऽदादित्यृषिः प्रसंख्यायाह' इति । इदं च द्रव्यजातं मम दत्तवानसौ राजेत्येवं प्रसंख्याय परिसंख्यानं कृत्वा ऋषिराह । उक्तवानित्यर्थः । कतमा पुनरसावाधस्त्या ऋग्यस्याँ अयमर्थसंक्षेप इति । उच्यते ।

अदान्मे पौरुकुत्स्यः पञ्चाशतं त्रसदस्युर्वधूनाम् । मंहिष्ठो अर्यः सत्पतिः [ऋ० सं० ८ । १९ । ३६] ॥ सोभरेः काण्वस्येयमार्षं परा च । दानप्रशंसा । योऽदात् मे मम पौरुकुत्स्यः बहुशत्रुकर्तितुः पुत्रः त्रसदस्युः दस्युत्रासनः । किमदात् । पञ्चाशतं वधूनां

कतमा साधस्त्या ऋग्यस्या इदं च मेऽदादिति संक्षिप्तार्थः

---

१ क. ख. घ. झ. ट. ठ. ड. °भागयोर्दारु°. २ ग. ज. पाद्वधिरूढ°; च. पाद्वधिरूढ° द्वोर. ३ क. ख. घ. ट. ठ. ड. °मुपादानम्; च. °मुपमानं° पादा. ४ ग. च. ज. बन्धस्था°. ५ च. °भेते तं एव°. ६ ठ. ड. ऋक्शेषा° ७ घ. झ. ऋक् ययायमर्थः संक्षे°; च. ऋक् ययाँ (ऋचा) यमर्थ(र्थः)संक्षेपं (पत) इति; ट. ऋक् ऋचा ययायमर्थः संक्षे°. ८ ग. च. ज. °च्यते । २१ । अदा°.

पञ्चाशतं वोढव्यानां कन्यानाम् । मंहिष्ठः पूज्यतमः अर्यः ईश्वरः सत्पतिश्च सतां पालयिता च । एवंलक्षणः पौरुकुत्स्यस्त्रसदस्युर्मम दत्तवान् पञ्चाशतं वधूनाम् । आह । किमेतदेवादात् । नेत्युच्यते । इदं च यदुक्तमुत्तरं च यद्वक्ष्यते । कतरा पुनरसावुत्तरा ऋगिति । उच्यते ।

' उत मे' प्रयियोर्वयियोः सुवास्त्वा अधि तुग्वनि । तिसृणां सप्ततीनां श्यावः प्रणेता भुवद्वसुर्दियानां पतिः ' [ऋ० सं० ८ । १९ । ३७]॥ अप्येतद्यदुक्तमपि च यदेतद्वक्ष्यमाणमिति ' उत–'शब्द एवमुभयं संभावयति । मे मम. प्रयियोः । प्रगम्यते येन तत्प्रयियु धनमश्वादि । तस्य प्रयियोर्धनस्य बहुदात् ताभिः कन्याभिः सह । वयियोः । ऊयत इति वयियु वस्त्रादि तस्य च[2] बहुदात् । तिसृणां सप्ततीनां गवां श्यावः श्यामवर्णः वृषः श्यामवर्णानां प्रणेता प्रकर्षेण नेता अग्रतोगामी भुवद्वसुः भावयिता वसूनां प्रशस्तः पूजितलक्षणः दियानां दानार्हाणां देया यास्तासां पतिः । ताश्च गा एतत्संख्यायुक्ता एतद्गुणयुक्ताश्च मह्यमदात् । क पुनरसावदात् । सुवास्त्वा सुष्टु निवासाया नद्या अधि तुग्वनि तीर्थेऽधि एतददान्मह्यम् ।

सुवास्तुतुग्वशब्दयोरर्थः

'सुवास्तुर्नदी तुग्व तीर्थं भवति' । ' तूर्णं ' हि ' एतत् ' अवगाहनार्थम् ' आयन्ति ' । अत्र दानसंबन्धात्सुवास्तुशब्दो नद्यभिधाने । प्रसिद्धं हि नद्यां दानम् । नदीसंबन्धाच्च तुग्वशब्दोऽपि तीर्थाभिधायक इत्युपपत्तिः । निगमार्थप्रकाशनायैवं सूक्तगतोऽप्यन्वीक्षितव्य एवार्थ इत्येतत्प्रदर्शितमाचार्येण ।

' नंसन्ते ' [२३] इत्यनवगतम् । ' नमन्ते ' इत्यवगमः । ' कुविन्नंसन्ते ' इति निगमः[3] ।

ताँ आ रुद्रस्य मीळ्हुषो[4] विवासे[5] कुविन्नंसन्ते मरुतः पुनर्नः । यत्सस्वर्ता जिहीळिरे[6] यदाविरव तदेन ईमहे तुराणाम् । [ऋ० सं० ७ । ५८ । ५] ॥ वसिष्ठस्येयमार्षम् । तानहं मीळ्हुषो[7] मरुतो वर्षस्य सेक्तॄन् धनवतो बलवतो वा आविवासे आभिमुख्येन स्थित्वा परि-

१ ग. च. ज. °च्यते । २२ । उत°. २ च. चं. ३ ग. च. ज. °गमः । २३ । ताँ°. ४ क. ख. ग. च. ज. घ. मील्हुषो. ५ ग. ज. विवासे इति । वासि°; घ. ट. विवासे कुवि० ईमहे तुराणाम्. ६ क. ख. च. जिहीलिरे. ७ ग. च. ज. मीढुषो; घ. झ. मील्हुषो.

चरामि । किंलक्षणान् पुनर्मरुत आविवासे । रुद्रस्य इन्द्रस्य स्वभूतान् आप्तत्वात् । अथवा 'मीळ्हुषः' इति रुद्रविषयं षष्ठ्येकवचनान्तं स्यात् । मीळ्हुषो रुद्रस्य स्वभूतानिति । कस्मात्पुनस्तानहं परिचरामि । यस्मात्ते मरुतः कुवित् बहु नंसन्ते नमन्ते । पुनः वर्षाद्युपकारेणास्मान्प्रति नमन्ते प्रह्वीभवन्ति । किंच । यत्सस्वर्ता यच्छरीरगतम् एनः जिहीळिरे लज्जयन्ति यच्च आविः प्रकाशम् । तदेवंप्रकारमुभयलक्षणमप्येनोऽस्मान् जिहीळिरे लज्जयन्ति । तदेषां मरुतां तुराणां त्वरमाणानां प्रसादेनोभयलक्षणमवयजेमहि निर्णुदेमहीत्येतदीमहे याचामहेऽनेन परिचारेणाराध्यैतान् मरुत इति । 'नसन्त' इत्येतदुपरिष्टाद् द्वादशाध्याये व्याख्यास्यामः 'अभि प्रवन्त समनेव योषाः' इति व्याख्याने 'नसतिराप्नोतिकर्मा वा नवतिकर्मा वा' [निरु० ७ । १७] ।

नसन्ते इत्यस्योदाहरणम्

'आहनसः' (२३) इत्यनवगतम् । 'आहननवन्तः' इत्यवगमः । 'ये ते मदा आहनसः' इति निर्गमः ।

परि सोम प्र धन्वा स्वस्तये नृभिः पुनानो अभि वासयाशिरम् । ये ते मदा आहनसो विहायसस्तेभिरिन्द्रं चोदय दातवे मघम् [ऋ० सं० ९ । ७५ । ५] इति ॥ पावमानी सौमी । कवेर्भार्गवस्येयमार्षम् । जगती । हे भगवन् सोम परिप्रधन्व परिप्रक्षर एतस्माद्दशापवित्रात् स्वस्तये स्वस्त्ययनायास्माकं नृभिरेतैर्ऋत्विग्भिः पुनानः पूयमानः । किंच । अभिवासय अभिप्रच्छादय अभिभावय आशिरं तृतीयसवने । किंच । ये ते मदा आहनसः । ये ते मदास्तव आहननवन्तः पटवो वचनवत्त्वेन संमोहयितारः

आहनस इत्यस्य

१ क. ख. घ. झ. ट. ठ. ड. आप्तान्वा । अथ°; च. आप्तान्वा° प्तत्वात्. २ ग. च. ज. मीढुषो; घ. मील्हुषो. ३ क. ख. घ झ. जिहीलिरे; ग. च. ज. जिहीडिरे. ४ ग. लज्जयति; च. लज्जयते° न्ति; ज. लज्जयन्त. ५ च. त्वरमा°. ६ ग. च. ज. °गमः । २४ । परि°. ७ ग. ज. स्वस्तये इति पाव°; घ. ट. स्वस्तये नृ० दातवे मघम्. ८ घ. भार्गवस्य कवेरार्षम्; ट. भार्गवस्य कवेरार्षम्° कवेर्भार्गवस्या. ९ घ. झ. ट. परिधन्व; च. परि॰धन्व° प्र. १० ग. परयवश्चनवत्वेन; च. पटवः वचन°; ज. परत्ववश्चनवत्वेन; घ. पटवः वश्चनव°; ट. पटवः वश्चावत्वेन° पर; ठ. ड. पटुवचनेन संमो°.

विहायसो महान्तस्तैरिन्द्रं चोदय प्रेरय दातवे दानाय मघं धनम् । यथास्माकं तैर्मदैरनभिहतचेताः सन् दद्यान्मघं धनमित्यर्थः ।

'अद्मसत्' (२४ [3]) इत्यनवगतम् । अ[1]द्मसादिनीति वा[2]न्नसानिनीति वा' शब्दसमाधी ॥ १५ ॥

उपो अदर्शि शुन्ध्युवो न वक्षो नोधा इवाविरकृत प्रियाणि । अद्मसन्न ससतो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणाम् ॥ (ऋ० सं० १ । १२४ । ४) । उपादर्शि शुन्ध्युवः शुन्ध्युरादित्यो भवति शोधनात्तस्यैव वक्षो भा[4]सोध्यूढमिदमपीतरद्वक्ष एतस्मादेवाध्यूढं[5] काये शकुनिरपि शुन्ध्युरुच्यते शोधनादेवोदकचरो भवत्यापोऽपि शुन्ध्यव उच्यन्ते शोधनादेव नोधा ऋषिर्भवति नवनं दधाति स यथा स्तुत्या कामानाविष्कुरुत एवमुषी[6] रूपाण्याविष्कुरुतेऽद्मसदद्मान्नं भवत्यद्मसादिनीति वा[7]न्नसानिनीति वा । ससतो बोधयन्ती शश्वत्तमागात्पुनरेयुषीणाम् । स्व[8]पतो बोधयन्ती शाश्वतिकतमागात्पुन[9]रागामिनीनाम् । ते वाशीमन्त इष्मिणः । ईषाणिन इति वैषणिन इति वार्षणिन इति वा वाशीति वाङ्नाम वाश्यत इति सत्याः । शंसावाध्वर्यो प्रति मे गृणीहीन्द्राय वाहः कृणवाव जुष्टम् । अभिवहनस्तुतिमधि[10]षवणप्रवादां स्तुतिं[11] मन्यन्त ऐन्द्री त्वेव शस्यते परितक्म्येत्युपरिष्टाद् व्याख्यास्यामः ॥१६॥

इति[12] चतुर्थाध्यायस्य द्वितीयः पादः ॥

---

१ ग. च. ज. अन्नसा°. २ घ. ट. ठ. ड. 'अन्नसानिनीति वा' नास्ति. ३ क. ख. ७ (१५); ग. २५ । १५; च. ज. २५; ठ. ड. °समाधी । इति निरुक्तटीकायां चतुर्थाध्याये पञ्चदशः खण्डः. ४ क. ख. भासाध्यूढ इद°; छ. त. द. भासाध्यूळ्ह इद° [सायन. °ध्यूळ्हमिद]. ५ छ. त. द. °ध्यूळ्हं (सायन. °ध्यूळ्हं). ६ छ. °मुखा रू°. ७ छ. त. द. वाद्मसा°. ८ छ. त. द. 'स्वपतो बोधयन्ती' नास्ति. ९ छ. त. द. °त्पुनरेयुषीणाम्. १० छ. त. द. °मभिषव°. ११ क. ख. ८ (१६); छ. त. १६; द. ८. १२ ङ. थ. ध. 'इति पादः' नास्ति; छ. इति द्विती°; त. चतुर्थाध्याये द्वि°; द. इति नैरुक्तस्य चतु°.

उषो अदर्शि शुन्ध्युव इति । कक्षीवत आर्षम् । औषसी । त्रिष्टुप् । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १४] । उषो अदर्शि उपश्लिष्टा दृश्यत इयमुषाः । कस्य । शुन्ध्युवः शोधयितुरादित्यस्य । आदित्यो हि यदप्यशुचिर्भवति तदपि रश्मिभिः स्पृष्ट्वा शुचीकरोति । 'सूर्यः पवित्रमुच्यते' इति वक्ष्यति [निरु० ५। ६] । तमांसि वा शोधयतीति शुन्ध्युः । तस्य शुन्ध्युवः । कथं पुनरुपश्लिष्टा दृश्यते । वक्षो न वक्ष इव । यथा तस्य स्वभासः स्वं प्रकाशजालं वक्षोभूतमेतस्मिन्मण्डलेऽध्यूढमेवमियमुषा एतस्मिन्मण्डले उपश्लिष्टा दृश्यते संनिकर्षात् । प्रासङ्गिकमुच्यते शब्दसामान्यात् । 'इदमपीतरत्' पुरुषवक्षः पशुवक्षो वाङ्गम् 'एतस्मादेव' वहतेर्धातोः । इदम् 'अध्यूढम्' अधिप्रवेशितमेव 'काये' शरीरे भवति । 'शकुनिरपि' य एष मद्गुर्नामायमपि 'शुन्ध्युरुच्यते शोधनादेव'। य 'उदकचरो भवति' नित्यशुद्ध एवेति शुन्ध्युः । 'आपोऽपि शुन्ध्यव उच्यन्ते' । ता अपि हि शोधयन्ति । एवं तावदियमुषा आदित्यस्य वक्ष इवोपश्लिष्टा दृश्यते । किंच । इयमेवोषा नोधा इवाविरकृत प्रियाणि । 'नोधा ऋषिर्भवति' । स हि 'नवनं' स्तोत्रं देवताः प्रति 'दधाति' । स यथा स्वमुखोद्गीर्णया स्तुत्या प्रियाण्यात्मनः स्वानि कामाख्यानि प्रकाशयति आविष्कृणोति देवताः प्रति एवमियमुषाः स्वात्मन एवोद्गीर्णेन प्रकाशेन रूपाणि जनानामाविष्कुरुते प्रकाशीकुरुते । किंच । इयमेवोषाः अद्मसन्न ससतो बोधयन्ती । 'अद्म अन्नम्' । तत्प्रतिकर्तव्यतया सीदति तद्वा सनोति संभजत इति अद्मसत् गृहाधिकारे नियुक्ता अन्नसाधिका स्त्री । सा यथा प्रातरेव क्षीराद्युपादानार्थं ससतः स्वपतो जनान् दोहकादीन् बोधयत्यन्नं साधयिष्यन्तीत्येवमुषा अपि जनान् बोधयन्ती । तत्काले हि ते इतिकर्तव्यतार्थे जनाः प्रतिबुध्यन्ते । तेनैतयैव बोधिता भवन्ति । आह । कदा पुनरेतद्भवतीति । उच्यते । यदा शश्वत्तमागात् शाश्वति-

अद्मसदित्यस्य

शुन्ध्युशब्दस्यार्थः

---

१ क. ख. ग. ज. इति निगमः। कक्षी°; च. इति ˇ । कक्षी° निगमः. २ च. °मधिऊढ°. ३ च. एवमुखा. ४ घ. झ. ट. ठ. ड. स्वात्म एवो°; च. स्वात्मˇ एवो° न. ५ घ. ट. हितकर्तव्य°; ठ. ड. हि तत्कर्तव्य°. ६ ग. ज. घ. झ. ट. ठ. ड. °बुध्यन्ति; च. बुध्यन्ति° न्ते.

कतमा नित्यतमा आगात् आगच्छति तदैव जनानवबोधयति । एवमुषा रूपाण्याविष्कुरुते । एवं च वक्ष इवोषाः श्लिष्टादित्यस्य दृश्यते । आह । कासां शश्वत्तमा इयमुषा इति । उच्यते । पुनरेयुषीणाम् । पुनरागामिनीनामित्यर्थः । या एताः काश्चिद्गत्वा पुनरागच्छन्ति ताः पुनरेयुष्यो गावोऽन्या वा । तासां पुनरेयुषीणामिति निर्धारयति । एषैव शश्वत्तमा शाश्वतिकतमा । एवमेतस्मिन् मन्त्रे सामर्थ्यादम्नसदित्यन्नसाधिका स्त्री उच्यते ।

अम्नसदित्यस्यार्थः सा हि तत्काले जनान् दोहकादीन् बोधयति । उषा अपि च तत्काल एवागच्छतीत्येवमुपमानमुपपद्यत इत्युपपत्तिः । अन्ये तु मक्षिकामम्नसदं मन्यन्ते । सापि ह्यन्ने सीदति सनोति चान्नं तत्काले च प्रतिबुध्यमानान्यान् बोधयतीति ।

‘ इष्मिणः’ (२५) इत्यनवगतम् । ‘ ईषणिन इति वा एषणिन इति वा आर्षणिन इति वा ’ इति शब्दसमाधयः । ‘ श्रियसे कं भानुभिः संमिमिक्षिरे ते रश्मिभिस्त ऋक्वभिः सुखादयः । ते वाशीमन्त इष्मिणो अभीरवो विद्रे प्रियस्य मारुतस्य धाम्नः [ऋ० सं० १ । ८७ । ६]॥ इति निगमः । राहूगणस्य गोतमस्येयमार्षम् । जगती । मारुतस्य प्रैयङ्गवस्य चरोरियं याज्या [मैत्रा०सं०४।११।२] । तत्र ह्युक्तं ‘ प्रियवती याज्यानुवाक्ये भवतः’ [मैत्रा०सं०२।१।८] इति । श्रियसे कं श्रियोऽर्थाय यजमानाय आत्मने वा । कमित्यनर्थकं एव । कामायेति वास्यार्थवत्त्वम् । भानुभिः दीप्तिभिः सूर्यरश्मिभिर्येऽन्तरिक्षलोके मरुतः संमिमिक्षिरे संगच्छन्ते त एव रश्मिभिः सर्वलोकनियन्तृभिः ‘संमिमिक्षिरे’ इत्येतदेवानुवर्तते । त एव च ऋक्वभिः रसहर्तृभिः संमिमिक्षिरे । सुखादयः सुखदातारो जनानाम् । शोभनानां वा हविषां खादितारः सुखादयः ।

इष्मिण इत्यस्य त एव वाशीमन्तो वाग्मिनः । इष्मिणः ईषणिनः उपगमनवन्तः । एषणिनो वा इच्छावन्तः । आर्षणिनो वा आभिमुख्येन सर्वार्थानां द्रष्टारः । अभीरवो विद्रे विदारयितव्ये शत्रौ प्राप्ते विगतभयाः । अथवा विद्रे वेद्मि जाने । य एवंलक्षणा मरुत-

---

१ ग. ज. °साम्नका. २ ग. च. ज. घ. ट. °धयः । २६ । श्रिय°. ३ ग. ज. भानुभिरिति । राहू°; घ. ट. भानुभिः संमिमिक्षिरे० मारुतस्य धाम्नः. ४ क. ख. च. घ. झ. ट. राहुग°. ५ क. ख. घ. झ ट. ठ. ड. °र्थकमेव कामये इति°. ६ व. झ. ट. ठ. ड. °देव चानुव°.

स्तेषां मरुतां यत्स्थानमन्तरिक्षलोकस्तस्य प्रियस्येष्टस्य मारुतस्य मरुतां स्वभूतस्य धाम्नः स्थानस्य प्राप्तये तानेव मरुतः स्तौमीत्यध्याहारः । एवमेतस्मिन्मन्त्रे 'वाशीमन्त इष्मिणः' इत्येतस्मादेकवाक्यसंबन्धात् 'इष्मिणः' इत्येतन्मरुद्विशेषणम् । 'वाशीति वाङ्नाम' । 'वाशी वाणी' इति पठितं वाङ्नामसु (निघ० १ । ११) । 'वाश्यत इति' कारकावधारणम् ।

'वाहः' (२६) इत्यनवगतम् । पक्षेण चानेकार्थम्[1] । 'शंसावाध्वर्यो प्रति मे गृणीहीन्द्राय वाहः कृणवाव जुष्टम् । एदं बर्हिर्यजमानस्य सीदाथा च भूदुक्थमिन्द्राय शस्तम्' [ऋ० सं० ३ । ५३ । ३] ॥

विश्वामित्रस्येयमार्षम् । त्रिष्टुप् । होता ब्रवीति । हे अध्वर्यो एहि प्रतिगृणीहि[2] । शंसावावामुभावपि । न ह्यप्रतिगीर्यमाणं शस्यते नाप्यशस्यमानं प्रतिगीर्यते । एवमितरेतरोपकारकत्वमभिप्रेत्योक्तं द्विवचनं 'शंसाव' इति । एवमितरेतरगुणसंपन्नमेतत् वाहः स्तोत्रं कृणवावावाम् । स्तोम एव हि देवानां वोढा भवति । 'वाहिष्ठो वां हवानां स्तोमः इति वोढृतमः स्तोमः' [निरु० ५ । १] इति हि वक्ष्यति । एवमियमभिवहनस्तुतिः ।

वाह इत्यस्य

एवमेतच्छस्त्रमाभिमुख्यगामि[3] इन्द्राय[4] इन्द्रार्थम् जुष्टं प्रियं तस्य यथा स्यात्तथा कुर्वः[5] । अन्ये त्वेनामभिषवणप्रवादिनीं[6] स्तुतिं मन्यन्ते वाहशब्दो ह्युदकवाहाभिधानसारूप्यात्तत्र युक्तरूपतर[7] इति कृत्वा । यदा पुनरेवं तदैवमर्थो योज्यः । इन्द्रायेदं वाहः[8] सोमोदकपूर्णमधिषवणफलकाख्यं वाहो जुष्टं प्रियं यथा स्यात्तथा कुर्वः । तद्धि सुशस्तं सुप्रतिगीर्णं चेन्द्रस्य प्रीतिजनकं भवति । एतदेव कर्तव्यमावाभ्यां यतो[9] ब्रवीमि । एदं बर्हिर्यजमानस्य सीद । एतद्बर्हिर्यदेतदग्रतः स्तीर्णमग्रेण होतारं बर्हिः सीद । 'सं[10] प्रतिगरायोपविशति' इति ह्युक्तम् । यजमानस्याभिप्रेतकामावाप्तय आसीद ।

---

१ ग. च. ज. °र्थम् । २७ । शंसा°. २ ग. ज. °गृणीहीति । विश्वा°. ३ ग. ज. °माभिवोढृ आभिमु°; घ. ट. ठ. ड. °माभिमुख्यागामि. ४ क. ख. घ. झ. ठ. ड. °गामि इदं इन्द्रा°; च. °गामि ˇ इन्द्राय° इदम्. ५ ठ. ड. कुर्मः. ६ क. ख. घ. झ. ट. ठ. ड. °त्वेनामधिषवणप्रवादां सोमाभिष°; ग. ज. °त्वेनामभि (धि) षव°; च. °त्वेनामभिषवण ˇप्रवा° प्रव दां सोमाभिषवण. ७ ठ. ड. युक्ततर°. ८ घ. झ. ट. ठ. ड. वाहं. ९ क. ख. घ. ट. ठ. ड. यतोऽतो ब्र°. १० च. झ. 'सः' नास्ति.

मावमंस्थाश्चिरेणैतच्छस्यत इति । उपविष्टश्चेत्त्वं ममाग्रतोऽथानन्तरमेव भूत् भवति उक्थं शस्त्रमेतदिन्द्राय इन्द्रार्थं शस्तम् । नात्र मम वाङ्[1] मृषेत्यभिप्रायः । एवमियमभिवहनस्तुतिरथवाधिषवणप्रवादा स्तुतिः । उभयथापि त्वियम् ' ऐन्द्री त्वेव शस्यते ' । इदमेवैकमभिधानमत्र व्युत्पाद्यत इत्यभिप्रायः ।

' परितक्म्या [२७] इति ' एतत् ' उपरिष्टाद्व्याख्यास्यामः ' षोडशाध्याये [निरु० ११ । २५] । तत्र ह्येतत् 'किमिच्छन्ती सरमा प्रेदं[2] मानट्' इत्येतस्मिन्मन्त्रे प्रसक्तमायास्यतीति व्याख्यार्थमुत्कृष्टमिति ॥ १६ ॥

नवमो[3]ऽध्यायस्य द्वितीयः पादः[4] ।

सुविते सु इते सूते सुगते प्रजायामिति वा । सुविते मा धा इत्यपि निगमो भवति । दयतिरनेककर्मा । नवेन पूर्वं दयमानाः स्यामेत्युपदयाकर्मा । य एक इद्विदयते वस्विति दानकर्मा वा विभागकर्मा वा । दुर्वर्तुर्भीमो दयते वनानीति दहतिकर्मा दुर्वर्तुर्दुर्वारः । विदद्वसुर्दयमानो वि शत्रूनिति हिंसाकर्मा । इमे सुता इन्दवः प्रातरित्वना सजोषसा पिबतमश्विना तान् । अयं हि वामूतये वन्दनाय मां वायसो दोषा दयमानो अबूबुधत् । दयमान इति । नूचिदिति निपातः पुराणनवयोर्नूचेति च । अद्या चिन्नु चित्तदपो नदीनाम् । अद्य च पुरा च तदेव कर्म नदीनाम् । नूच पुरा च सदनं रयीणाम् । अद्य च पुरा च सदनं रयीणां रयिरिति धननाम रातेर्दा[6]नकर्मणः ॥ १७ ॥

सुँविते (२८) इत्यनवगतमनेकार्थं च । ' सु इते सूते ' इति वा

---

१ ग. ज. वावसंगोस्तीत्यभि°; च. वाक्सधर्यंगोस्तीत्यभि° क्मृषे. २ क. ख. ८ (१६); ग. २७ (?); इतरेष्वङ्को नास्ति. ३ ग. ज. नवमाध्यायद्विती°; ठ. ड. इति निरुक्तटीकायां चतुर्थाध्याये षोडशः खण्डः । इति नवमा°. ४ च. पादः समाप्तः. ५ क. ख. छ. त. द. अहं. ६ क. ख. १ (१७); द. १. ७ ठ. ड. सुविते सु इत इति सुविते इत्य°. ८ क. ख. घ. झ. ट. ठ. ड. इत इति सूते.

शब्दसमाधी । अत्र यदा ' सु इते ' इति विपरिणामस्तदा ' सुगते ' इत्यर्थः । यदा ' सूते ' इति तदा ' प्रजायाम् ' । सूते देवदत्ता पुत्रमिति प्रजायत इत्यर्थः । एवं ' सुविते ' इत्यस्य 'सु इते सूते ' शब्दसमाधी । तयोरेतद्यथासंख्येनार्थवचनं 'सुगते प्रजायामिति ' । ' सुविते मा धाः ' इत्यपि निगमः । अनाधृष्टमस्यनाधृष्यं देवानामोजः । अभिशस्तिपा अनभिशस्ते-न्यम् । अनु म इदं व्रतं व्रतपतिर्मन्यतामनु दीक्षां दीक्षापतिरञ्जसा सत्य-मुपागाँ सुविते मा धाः [मैत्रा० सं० १ । २ । ७] इति । अनेन तानूनप्त्रं संस्पृश्यते । हे तानूनप्त्र अनाधृष्टमसि अनाधर्षितमसि । त्वयि स्पृष्टे समयोपयन्त्रिता ह्येते नान्योन्यस्मै द्रोहमुपयास्यन्त्यृत्विजः । कुतः पुनरेतत्सामर्थ्यं तवेति । इतो यस्मात् अनाधृष्यं देवानामोजः । अनाध-र्षणीयं त्वमोजः । बलमित्यर्थः । किंच । अभिशस्तिपाः अभिशंसनात्पासि । अनभिशस्तिं हे घृत आत्मना वानभिशंसनीयं केनचित् । अनवद्यमित्यर्थः । अनु मे इदं व्रतं व्रतपतिर्मन्यताम् । अनुमन्यतामिदं व्रतं कर्म व्रत-पतिरग्निः । स च मयोपेयमानामनु दीक्षाम् । अनुमन्यतामेनां दीक्षां दीक्षापतिः सोमः । किंच । अञ्जसा अनन्तर्हितमहं सत्यमुपागाम् उपगत-वान् योऽहमेतदस्पृशम् । स त्वं हे तानूनप्त्र एवमुपगतवन्तं मां सुविते सुगते स्थाने यत्र गतानां शोभनं गतं भवति तत्र धेहि । अथवा प्रजायां जनयितव्यायां धेहि । यथा बह्वपत्याः स्याम तथा कुर्वित्यर्थः ।

सुविते इत्यस्य

' दयति ' (२९) इत्येष शब्दः ' अनेककर्मा ' अनेकार्थः । न

---

१ ग. ज. इति परिणा°; च. इति परिणा° वि. २ ग. च. ज. °गमः । २८ । अना°. ३ ग. च. ज. °नाधृष्यमित्यनेन तानू°. ४ क. ख. घ. झ. ट. अन-भिशस्त्यञ्जसा सत्यमुपगेषं (ट. °मुपगेषं° पागां)सुविते°; ठ. ड. अनभिश-स्तेन्यमनु मे दीक्षां दीक्षापतिर्मन्यतामनु तपस्तपस्पतिरञ्जसा सत्यमुपगेषं सुविते°. ५ क. ख. घ. झ. ट. ठ. ड. नान्योन्यस्मिन्. ६ ग. ज. पासि नन्. आत्मना वा°. ७ च. ट. °शस्ति° स्ते. ८ च. घृत आ° त्वं. ९ च. वान° चा. १० ग. ज. सत्यमुपाग—उप°; ९ च. ट. सत्यमुपागा उप° पगेषं; झ. सत्यमुप गा उप°. ११ ग. ज. °स्पृश स°; च. स्पृशं त्वं° शत् । स; घ. ट. ठ. ड. °मेतदभिस्पृशत् । स°; झ. मेतदगेषं स्पृश त्वं हे°.

त्वनेकविकल्पप्रकृतिः । यथा सुवितेशब्दस्यान्येनान्येन धातुना विगृह्यानेकार्थत्वमुक्तम् । इणा विगृह्य ' सु इते ' इति गत्यर्थत्वं सूतिना च विगृह्य ' सूते ' इति प्रजार्थत्वम् । नैवमिह । किं तर्हि । एकप्रकृतिरेवायं शब्दोऽनेकार्थो भवतीत्यस्य विशेषस्योपद्योतनार्थमुदाहरति । एवमुच्यमानेऽप्यनेकार्थत्वे दयतिरनेककर्मैवेत्येवमुक्तम् । अन्ये तु ब्रुवते । यथा ' सुविते ' शब्दोऽनेकार्थोऽनवगतसंस्कारश्च नैवमयम् । किं तर्हि । अनेकार्थ एवायमिति । एवमनेकार्थत्वं प्रतिज्ञायोदाहरणेनैवोपपादयति ।

' अनेककर्मा ' इत्यस्य द्वावर्थौ

' नवेन पूर्वं दयमानाः स्याम इति ' एतस्मिन्मन्त्रे दयतीत्येष शब्दः ' उपदयाकर्मा ' । उपदयेति रक्षणमुच्यते । नवेन धान्येन पूर्वं पुराणं रक्षन्तः स्याम पुराणेन च नवम् । इष्टं हि नवेन पुराणस्य च रक्षणं पुराणेन च नवस्य । प्रसिद्धं च लोके । तस्मादिहायमुपपद्यत उपदयाकर्मा । चतुर्दशेऽध्यायेऽस्य शेषः [निरु० ९ । ४३] ।

दयतिरुपदयाकर्मा

'य एक इद्वि दयते वस्विति' एतस्मिन्मन्त्रे दानकर्मा वा विभागकर्मा वा ।

' य एक इद्वि दयते वसु मर्ताय दाशुषे । ईशानो अप्रतिष्कुत इन्द्रो अङ्ग [ऋ० सं० १ । ८४ । ७] ॥

दानकर्मा विभागकर्मा वा

राहूगणस्य गोतमस्यार्षम् । य इन्द्र एक एव स्वतन्त्रो विदयते विविधं वसु धनं दयते ददाति । कस्मै । मर्ताय मनुष्याय । किंलक्षणाय । दाशुषे दत्तवते हवींषि । अथवा विभागकर्मा ।

---

१ च. सुवितश° . २ क. ख. घ. ट. ठ. ड. °सूतिना वि°; च. सूविना च बि°. ३ क. ख. ग. ज. घ. ट. ठ. ड. इति च प्र°. ४ क. ख. घ. झ. ट. ड. °प्रकृतेरे° ५ ग. सुविते° त; च. सुवितेश° ते; ज. सुवितश°. ६ ग. ज. पुराणेनवस्य; च. पुराणेन नवस्य° च. ७ क. ख. घ. झ. ट. ठ. ड. °ध्याये इत्यस्य; च. °ध्यायेऽस्य° इत्य. ८ ग. च. ज. वा । २१ । य°; ठ. ड. वा । मन्त्रस्तु । य°. ९ क. ख. च. राहुगण°. १० क. ख. घ. ट. ठ. ड. स्यार्षम् । ऐन्द्री उष्णिक् । य°; च. °स्यार्ष । य° ऐन्द्री उष्णिक्.

दाशुषे वसु विदयते । विभजते[1] इत्यर्थः । किंलक्षणः पुनरिन्द्रो ददाति विभजते[2] वेति । उच्यते । ईशान ईश्वरः अप्रतिष्कुतः अप्रतिस्खलितः[3] संग्रामेषु । इन्द्रः अङ्ग क्षिप्रं धनं[4] ददाति विभजति वा दाशुषे यजमानाय । तमहं स्तौमि । सोऽस्माकमेतत्करोत्वित्यभिप्रायः । ईशान इन्द्रोऽन्यत्र दानविभागाभ्यां दाशुषे यजमानाय वस्वेकवाक्ये[5] श्रूयमाणः[6] किमन्यत्कुर्यात् । तस्माद्वाक्यसामर्थ्यादत्र 'दानकर्मा वा विभागकर्मा वा' इत्युपपद्यते ।

'दुर्वर्तुर्भीमो दयते वनानीति दहनकर्मा' । एतस्मिन्मन्त्रे 'दहतिकर्मा' । निगमप्रसक्तं निर्ब्रवीति । 'दुर्वर्तुर्दुर्वारः' । दुर्वारणीय इत्यर्थः[7] । अध जिह्वा पापतीति प्र वृष्णो[8] गोषुयुधो नाशनिः सृजाना । शूरस्येव प्रसितिः क्षातिरग्नेर्दुर्वर्तुर्भीमो दयते वनानि

दहतिकर्मा [ऋ० सं० ६ । ६ । ५] ॥ आग्नेयी । भरद्वाजस्यार्षम् । त्रिष्टुप् । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १३] । उपज्वलितस्याग्नेः अध अथानन्तरमेव तस्य जिह्वा ज्वाला दारुषु पापतीति पुनः पुनः पतति । प्रवृष्णः प्रवर्षितुः इन्द्रस्य गवार्थं देवपणिभिः सह असुरैर्युध्यतः । अथवा गोषु अप्सु मेघेन सह युध्यत इत्यर्थः । नेत्युपमा । इन्द्रस्य गोषु युध्यत इव अशनिः सृजाना सृज्यमाना यथा पतति तेनैव सृज्यमाना तथाग्नेर्ज्वाला[9] दारुषु पापतीति । किंच । शूरस्येव प्रसितिः क्षातिरग्नेः । यथा कस्यचिद्विक्रान्तस्येन्द्रस्य[10] वाप्रतिहतगतेः प्रसितिः प्रसहनं[11] संग्रामानुप्रवेशमार्गैश्छिन्नभिन्नावरुग्णैः शत्रुभिराकीर्णः[12] स्यादेवमस्याग्नेः क्षातिर्दहनमार्गः पुष्टार्ध-[13]

१ ज. विभजाति° ते. २ ग. ज. विभजति; च विभजाति° ते. ३ क. ख. ग. ज. घ. ट. ठ. ड. °तिस्खलि°. ४ ग. ज. धन्वं. ५ ग. ज. °नाय स्वेववाक्ये; च. °नाय वंच (सं) स्वेकं (व) वाक्ये. ६ क. ख. घ. ट. ठ. ड. श्रूयमाणं; च. श्रूयमाणः° णं. ७ ग. च. ज. °त्यर्थः । ३० । अध°. ८ ग. वृष्णो० । आग्नेयी°; घ. ट. वृष्णो० दुर्वर्तु°. ९ क. ख. घ. झ. ठ. ठ. ड ° सृजाना तेनैव सृज्यमानो यथा पतति । अशनिर्वज्रः । तथा°; च. सृज्यमाना यथा पतति तेनैव सृज्यमाना. १० ग. ज °न्द्रस्यान्यस्य वा°; च. °न्द्रस्यं वा° स्यान्यस्य. ११ ग. ज. प्रसयं. १२ क. ख. घ. ट. ठ. ड. °भिः प्रकीर्णः°; च. °भिः आकीर्णः° प्रं; ट. °भिः प्रकीर्ण.° रा. १३ क. ख. घ. झ. ट. ठ. ड. ईषत्पुष्टा°; च. °मार्गः पुष्टा° ईषत्.

दग्धभस्मीभूतैर्वृक्षैर्गुल्मादिभिराकीर्यते । कदा पुनरेतद्भवति । दुर्वर्तुर्दुर्वारो दावाग्नीभूतः भीमः सर्वप्राणिभयंकरो यदायमग्निर्दयते दहति । किम् । वनानि । एवमयमाग्नेये मन्त्रे वनशब्दसंनिकर्षे श्रूयमाणो दयतिशब्दो दह॰ नादन्यात्किमभिदध्यात् । तस्मात्सामर्थ्यादिहायं 'दहनकर्मा' इत्युपपत्तिः ।

'विदद्वसुर्दयमानो वि शत्रूनिति हिंसाकर्मा। इन्द्रः पूर्भिदातिरद्दासमर्कै-र्विदद्वसुर्दयमानो वि शत्रून् । ब्रह्मजूतस्तन्वा वावृधानो भूरिदात्र आपृणद्रोदसी उभे [ऋ० सं० ३ । ३४ । १] ॥ विश्वामित्रस्येयमार्षम् । त्रिष्टुप् । उद्भिद्बलभिदोर्निष्केवल्ये निविद्धानीयस्य सूक्तस्य [आश्व० श्रौ० ९ । ८] प्रथमैवेयम् । इन्द्रः पूर्भित् असुरपुरां मेघानां वा भेत्ता । अद्भिः पूर्णा अपो वा पालयन्तीति मेघाः पुरः 'पॄ पालनपूरणयोः' [धा० ९ । १७] इत्येतस्य । आतिरत् आभिनत् दासं दासयितव्यं मेघम् । कैः सहायैः सह । अर्कैः वृक्षैर्वा देवैर्माध्यमिकैर्वा । किंलक्षणः पुनरसाविन्द्रो य आतिरत् । विदद्वसुः प्राप्तधनः । किं कुर्वन्नातिरद्दासम् । विदयमानो विविधं हिंसन् शत्रून् ये मेघवधप्रतिबन्धिनः ।

हिंसाकर्मा

आह । किं विदद्वसुत्वेनैवैकेन गुणेन युक्तो य इन्द्रः स एतदकरोत् । नेत्युच्यते । ब्रह्मजूतश्च ब्रह्मणा स्तुतिलक्षणेन जूतः प्राप्तः प्रीतो वा ब्रह्मणा । तन्वा शरीरेण वावृधानो वर्धमान आपृणत् आपूरयति रोदसी द्यावापृथिव्यावुभे अपि । भूरिदात्रश्च बहुदानो य इन्द्रो दासमातिरत् । एवमत्र 'विदद्वसुर्दयमानो वि शत्रून्' इति शत्रुसंनिधौ दयतेः किमन्यत्सामर्थ्यमुपपद्येतान्यत्र वधात् ।

'इमे सुता इन्दवः प्रातरित्वना सजोषसा पिबतमश्विना तान् । अहं हि वामूतये वन्दनाय मां वायसो दोषा दयमानो अबूबुधत् । 'दयमान इति' । अत्र दयतिर्ग-त्यर्थः । दयमानो डीयमानः काकोऽन्तरिक्षेणाधस्तान्मां सुप्तं दोषा दोषायामबोधयत् । मृग्योऽत्र शेषः ।

गतिकर्मा

१ ग. च. ज. °कर्मा । ३१ । इन्द्रः°. २ ग. ज °मर्कैरिति । विश्वा°; घ. ट. मर्कैः० भूरिदात्र°. ३ ग. वधात् । ३२ । इमे°. ४ ग. °न्द्रवः० श्रुवर्त्; ठ. ड. °न्द्रव इति । दयमान इति°. ५ क. ख. ठ. ड. °मान उड्डीय°; घ. ट. °मानोड्डीय°; च. °मानो डीय° ड्डी.

'नूचित्' (३०) इति एष 'निपातः' अनेकार्थत्वेनेह समाम्नातः। न हि निपातानां प्रकृतिप्रत्ययादिः संस्कारोऽस्ति यस्यानवगमः स्यात्। स च पुनरयं 'पुराणनवयोः' अर्थयोर्वर्तते। प्रकरणोपपदवशात्पुराणतां कस्यचिदर्थस्यावद्योतयति नवतां च कस्यचित्। 'नूच (३१) इति च'[1]। अयमपि पुराणनवयोर्वर्तते[2]। अयं तु नूचिदित्येतस्यैवार्थसामान्यप्रसङ्गादसमाम्नात एवोदाहृतः। नूचिदित्यस्योदाहरणम्[3]।

नूचित् नूच इत्येतौ पुराणनवयोः

'अद्या चिन्नू चित्तदपो नदीनां[4] यदाभ्यो अरदो गातुमिन्द्र। नि पर्वता अद्मसदो न सेदुस्त्वया दृळ्हानि[5] सुक्रतो रजांसि' [ऋ० सं० ६ । ३० । ३] ॥ भरद्वाजस्येयमार्षम्। त्रिष्टुप्। उक्थपर्यायेष्वच्छावाकस्य शस्त्रे माध्यंदिने सवने विनियुक्ता [आश्व० श्रौ० ५।१६]।

अस्यामृचि नूचिदित्यस्य 'पुरा' इत्यर्थः

अद्य च पुरा च तदेव कर्म नदीनां वर्तते। कतमद्यत्। उद्दिश्य वहनं कर्म। कथं नामास्य लोकस्योपकारायाजस्रमेता वहेयुरिति। गातुं गमनमार्गमाभ्यो नदीभ्योऽर्थाय त्वमरदः अखनस्त्वम्। किम्। गमनम्। गच्छन्त्यनेनेति[6] गमनम्। हे इन्द्र तदेव कर्माद्यापि वर्तते तासां नदीनां यथाव्यादिष्टमेव त्वया। ताभिरद्यापि तदनुष्ठीयत इत्यभिप्रायः। तदुक्तं पुरस्तादपि 'इन्द्रो अस्माँ अरदत्' इत्यत्र[7] [निरु० २। २६]। एवं तावदयं त्वयैव नद्यधीनेनोपकारेणानुगृह्यते लोकः। किंच। नि पर्वता अद्मसदो न सेदुः। य एते पर्वताः पर्ववन्तो मेघा अद्मसदः। निष्पादयितव्यमन्नमस्माभिरित्येतदर्थमुद्दिश्यान्तरिक्षलोके सीदन्त्यवतिष्ठन्ते गच्छन्ति वा। तेऽपि युष्मद्वीर्योपमर्दिता[8] एवोदकभूता नीचैर्भूम्यामन्ननिष्पत्त्यर्थं सेदुः। सीदन्तीत्यर्थः। तदेवं कृत्वा किं बहुना सर्वथाप्युदकप्रदानद्वारेण त्वयैवैतानि[9] हे सुक्रतो सुकर्मन्[10] सुदृढानि दृढीकृतानि रजांसि। लोका इत्यर्थः। त्वं चेदेषामेवमन्नमुदकं च न व्यधास्यः सर्व एवैते लोका

१ च. 'इति च' नास्ति. २ क. ख. घ. ट. ठ. ड. °नवयोरर्थयोर्व°; च. नव° °योर्व° रर्थयो. ३ ग. च. ज. °हरणम्। ३२। अद्या°. ४ ग. नदीनां० सि। भर°; घ. ट. नदीनां० त्वया दृ°. ५ क. ख. च. दृढानि; ग. ज. घ. झ. दृळ्हानि. ६ च. गच्छत्यने°. ७ ठ. ड. °रदद्दत्यवाहुरित्य°. ८ घ. झ. ट. ठ. ड. °पम्रर्दि°. ९ च. °तानि सुक्र° हे. १० क. ख. घ. ट. ठ. ड. हे सुक°; च. °क्रतो सुक° हे.

नाभविष्यन्नित्यभिप्रायः । इहाद्येत्यस्य संनिधौ वर्तमानो नूचिदित्येष पुराणाभिधायीत्युपपद्यते । इह पुराणनवयोरित्युक्तम् । तत्र पुराणाभिधायित्वस्यैतदुदाहरणम् । नवाभिधायिनो 'नू चिन्न वायोरमृतं वि दस्येत्' (ऋ० ६।३७।३)।अत्र हि वक्ष्यति 'नवं च पुराणं च' इति [निरु१०।३] ।

नूचेत्यस्योदाहरणम्[1] । 'नू च॑ पुरा च सद॑नं र॒यी॒णां जा॒तस्य॑ च॒ जाय॑मानस्य च॒ क्षाम् । स॒तश्च॑ गो॒पां भव॑तश्च॒ भूरे॑र्दे॒वा अ॒ग्निं धा॑रयन्द्रवि॒णो॒दाम्'[2] [ऋ० सं० १ । ९६ । ७] ॥ कुत्सस्येयमार्षम्[3] । षष्ठेऽहन्याग्निमारुते शस्त्रे जातवेदस्ये सूक्ते शस्यते [आश्व० श्रौ० ८ ।८] । नू च पुरा च सदनम् । अद्य च पुरा[4] च सदनम् । तस्यैव 'अद्य च' इत्यर्थः कस्य । रयीणां धनानाम् । किंच । जातस्योत्पन्नस्य जायमानस्य चाभिनिष्पद्यमानस्य भूतजातस्य क्षाम् । निवासमित्यर्थः । 'तस्मात्सर्वानृतून् पशवोऽग्निमभिसर्पन्ति' इति विज्ञायते [मैत्रा०सं० १ ।८ । २] । 'यत्र गां शयानां निर्जगाति मृतामेतामविद्वान् मन्यतेऽन्वग्नौ ह्येवैते प्रविशन्ति' इति च विज्ञायते [मैत्रा० सं० १ । ८ । २] । तस्मादुपपद्यते स्थानत्वं निवासत्वं चाग्नेः । सतश्च निष्पन्नस्य[5] भूतजातस्य गोपां गोप्तारम् । भवतश्चोत्पद्यमानस्य भूरेर्बहुनो गोप्तारमित्यनुवर्तते । य एवंलक्षणोऽग्निस्तं द्रविणोदां धनस्य दातारं देवा धारयन् । धृतवन्त इत्यर्थः । क्व । हविर्वहनकर्मणि । 'अथा देवा दधिरे हव्यवाहम्' इति वक्ष्यति [निरु० ६ । ३९] । एवमिह 'पुरा च' इत्यस्य संनिधौ 'नूच' इत्येष शब्दो वर्तमानो नवाभिधायीत्युपपद्यते । पुराणाभिधायित्वे पर्येष्यमस्योदाहरणम् ।

'दावने '(३२) इत्यनवगतम् । 'दानस्य' इत्यवगमः । 'अकूपारस्य '(३३) इत्यनवगतमनेकार्थं च । '[6]अकुत्सितपरणस्य' इत्यवगमः । द्वयोरप्येतयोरेक एव निगमः ॥ १७[7] ॥

---

१ ग. च. ज °हरणम् । ३३ । नू°. २ ग. रयीणां० द्रविणोदाम्; घ. ट. रयीगां० देवा अग्निं°. ३ क. ख. °मार्षम् । पृष्ठ्यस्य षष्ठे°; च. °मार्षं ˇ षष्ठे° पृष्ठस्य. ४ घ. ट. ठ. ड. 'पुरा च' नास्ति. ५ घ. ट. ठ. ड. निष्पन्नभूत°. ६ क. ख. अकुपरणस्य; घ. झ. ट. ठ. ड. अकुत्सितं पर°. ७ क. ख. १ (१७); ग. २८। ३४; च. ज. ३४; ठ. ड. °गमः । इति निरुक्तटीकायां चतुर्थाध्याये सप्तदशः खण्डः.

विद्याम तस्य ते वयमकूपारस्य दावने । विद्याम तस्य ते वयमकुपू[1]रणस्य दानस्यादित्योऽप्यकूपार उच्यतेऽकूपारो भवति दूरपारः समुद्रोऽप्यकूपार उच्यतेऽकूपारो भवति महापारः कच्छपोऽप्यकूपार उच्यतेऽकूपारो न कूपमृच्छतीति कच्छपः कच्छं पाति कच्छेन पातीति वा कच्छेन पिबतीति वा कच्छः खच्छः खच्छदोऽयमपीतरो नदीकच्छ एतस्मादेव कमुदकं तेन छाद्यते । शिशीते शृङ्गे रक्षसे विनिक्षे । निश्यति शृङ्गे रक्षसो विनिक्षणनाय रक्षो रक्षितव्यमस्माद्रहसि क्षणोतीति वा रात्रौ नक्षत इति वा । अग्निः सुतुकः सुतुकेभिरश्वैः । सुतुकनः सुतुकनैरिति वा सुप्रजाः सुप्रजोभिरिति वा[2] । सुप्रायणा अस्मिन्यज्ञे विश्रयन्ताम् । सुप्रगमनाः ॥ १८ ॥

' यन्मन्यसे वरेण्य[3]मिन्द्र द्युक्षं तदा भर । विद्याम तस्य[4] ते वयमकूपारस्य दावने ' [ऋ० सं० ५ । ३९ । २] ॥ अत्रेर्भौमस्येयमार्षम् । अच्छावाकस्य तार्तीयसवनिके[5] आवापे नियुक्ता ' यदिन्द्र चित्र ' इतीयं च (आश्व० श्रौ० ७ । ८) । हे इन्द्र यन्मन्यसे जानीषे त्वं वरेण्यं वरणीयमेतद्धनमिति द्युक्षं च यत् द्युतिनिवासभूतम् । द्युतिमदित्यर्थः । तदस्मभ्यमाहर । कदाचित्त्वमाहृत्या[6]पि न दद्या अतो[7] ब्रूमः । तस्य त्वयाहृतस्य धनस्य विद्याम लभेमहि वयं ते तव स्वभूतस्य । किंलक्षणस्य ।

अकूपारस्येत्यस्यार्थः

अकूपारस्य अकुपरणस्य । अकुत्सितपूरणस्येत्यर्थः । येन[8] लब्धेन सुपूर्णमात्मानं मन्येमहि[9] । पर्याप्तमैहिकाय च श्रेयसे आमुष्मिकाय चेत्यर्थः । दावने दानस्येत्यर्थः । ईदृशस्य भावत्कस्य[10] दानस्य[11] वयमेव[12] लब्धारः स्यामेत्यभिप्रायः । एवमिह यन्मन्यसे वरेण्यं

---

१ ङ. ठ. ड. °कुपर्णस्य; छ. द. °मकूपरणस्य. २ क. ख. २ [१८]; द. २. ३ ग. ज. वरेण्यमिति । अत्रे°; घ. ट. वरेण्य०मकूपा°. ४ ठ. ड. तस्य त इति । अत्रे°. ५ ग. ज. °सवनियके°. ६ ग ज. °हृत्यानपि न दद्या°. ७ ग. ज. यतो; घ. झ. ट. ठ. ड. अयतो. ८ ठ. ' येन लब्धेन० दानस्येत्यर्थः ' नास्ति. ९ क. ख. घ. झ. ट. ठ. ड. मन्यामहे; च. मन्येमहि° मन्यामहे. १० च. भाव° ता. ११ क. ख. धनस्य; च. दानस्य० ध. १२ घ. ट. ठ. ड. बलमेव°.

[1]द्युक्षं तदाभरेतीन्द्र उच्यमानो धनसंनिधानाद्दानादन्यत्किमुच्यते । धनमेव हि प्रायेण मनुष्यैः प्रार्थ्यते । तस्मादत्राश्रूयमाणोऽपि धनशब्दोऽध्याहृतः । तच्च पुनः प्रार्थ्यमानं बहु प्रार्थ्यते । तस्मादकूपारस्येत्येष शब्दोऽतिपरोक्षवृत्तिः ‘ अकुपरणस्य ’ इत्येवं परोक्षवृत्तित्वेनावस्थाप्य ततः ‘ अकुत्सितपूरणस्य ’ इत्येवं प्रत्यक्षवृत्तित्वेन व्याख्यायते । अत्र कुरिति कुत्सार्थः । परणम् पूरणमुच्यते । कुत्सितं परणं कुपरणम् । न कुत्सितं परणम् [2]अकुपरणम् । तस्य अकुपरणस्य । प्रभूतस्येत्यर्थः । [3]धनसंबन्धादेव ‘दावने’ इत्येष शब्दो दानार्थे इत्युपपत्तिः । एतस्मिन्मन्त्रे ‘अकूपारस्य दावने’ इत्ययमनयोः पदयोरनुक्रमः । [4]समाम्नाये पुनः ‘ दावने अकूपारस्य ’ इति मन्त्रपाठव्यतिक्रमेणानुक्रमः । तेन ज्ञायतेऽन्यैरेवायमृषिभिः समाम्नायः समाम्नातोऽन्य एव चायं भाष्यकार इति । एको हि समाम्नानं भाष्यं च कुर्वन् प्रयोजनस्याभावादेकमन्त्रगतयोः पाठानुक्रमं नाभङ्क्ष्यत् । अविवक्षितस्वा[5]र्थाश्चैते मन्त्रे निगमाः । तेषु संपत्त्या काकतालीयन्यायेन कस्मिंश्चिदेकस्मिन्नेव निगमे द्वे पदे आगच्छतस्ते [6]यथोपागते एव भाष्यकारो व्याचष्टे इत्यदोषः ।

अकूपारशब्दस्यादित्यादयोऽन्येऽर्थाः

‘ आदित्योऽप्यकूपारः उच्यते ’ । किं कारणम् । स ह्यकुत्सितस्य महतोऽध्वनः पारयिता भवत्युदयादारभ्य यावदस्तमिति । ‘ समुद्रोऽप्यकूपार उच्यते ’ । असावपि ह्यकुत्सितपार आत्मनैव भवति । ‘महापारः’ इति पर्यायेणार्थवचनम् । विस्तीर्णपार इत्यर्थः । ‘कच्छपोऽप्यकूपार उच्यते ’ । स हि ‘न कूपमृच्छति’ अल्पोदकत्वात् । किं तर्हि । यत्र बहु प्रकीर्णमुदकं [7]तत्तत्स्थानं गन्तुमिच्छति समुद्रं नदीं वा । आख्यानप्रसक्तमुच्यते । ‘कच्छपः कच्छम्’ आत्मनो मुखसंपुटं ‘ पाति ’ रक्षति ।

कच्छकच्छपशब्दयोर्व्युत्पत्तिः

स हि [8]किंचिद्दृष्ट्वा शरीर एव मुखसंपुटं प्रवेशयति । संपुटे हि कच्छशब्दः प्रसिद्धः । ‘ [9]प्राणिवाच्यः कच्छपुटः ’ इति च । ‘ कच्छेन ’ कटाहेनेतराण्यङ्गानि ‘ पातीति वा ’ । स हि

१ क. ख. ग. ज. द्युक्षं च तदा°. २ घ. ट. ठ. ड. न्यकुपरणं. ३ क. ख. घ. ट. ठ. ड. दानस°; च. धनस° दा. ४ घ. ठ. ठ. ड. समाम्नायेषु दाव°. ५ क. ख. घ. झ. ट. क्षिताथश्चै°; च. °क्षितस्वार्थाश्चै° ता. ६ घ. ट. यथापानते; ठ. ड. यथापाते. ७ क. ख. ग. ज. ठ. ड. ‘तत्’ सकृदेव; च. तत्तत्स्था° त. ८ ठ. ड. कंचि°. ९ ग. ज. पाणिकच्छपुट°; च. पाणिकच्छपुट° प्राणिवाच्यः.

किंचिद्दृष्ट्वा सर्वाण्यङ्गानि कटाह एवानुप्रवेश्य कूर्मबन्धे[1]नैवावतिष्ठते । अथ 'वा कच्छेन' मुखसंपुटेन 'पिबतीति' कच्छपः । विग्रहप्रसक्तः कच्छ-शब्दो निरुच्यते । य एष 'कच्छो' मुखसंपुटः कटाहो वायं 'खच्छः[2]' । आह । किमुक्तं भवति[3] 'खच्छः' इति । उच्यते । स हि 'खच्छदः' । खमाकाशं छादयति । स हि मध्ये सुषिरो[4] भवति । 'अयमपीतरो नदी-कच्छ एतस्मादेव' । कसंज्ञकेनोदकेन 'छाद्यते' इति कच्छः ।

'आदित्योऽप्यकूपारः समुद्रोऽप्यकूपारः कच्छपोऽप्यकूपार' इत्ये-तेषु निगमाः पर्येष्याः[5] ।

'शिशीते' (३४) इत्यनवगतम् । 'निश्यति' इत्यवगमः[6] ।

'वि ज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुते महित्वा । प्रादेवी-र्मायाः सहते दुरेवाः शिशीते शृङ्गे रक्षसे विनिक्षे [ऋ० सं० ५ । २ । ९]॥ वृशो नाम जनपुत्रस्तस्येयमार्षमात्रेयस्य वा कुमारस्योभयोर्वा । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १३] । विभा-त्यग्निर्नानाप्रकारं भाति । केन । बृहता ज्योतिषा । स एवं विभासमानः किं करोति[9] । आविर्विश्वानि कृणुते । आविःकरोति विश्वानि सर्वाणि भूतानि महित्वा । महत्त्वेनेत्यर्थः । किं च प्रादेवीर्मायाः सहते । प्रसहते प्रकर्षेणाभिभवति । किम् । अदेवीर्मायाः । आसुरीरित्यर्थः । दुरेवा दुर्वा[10] दुस्तर्पा वा । न ह्यग्नेस्तृप्तिरस्ति । किं च शिशीते शृङ्गे । यथा हि वृषभस्त-

शिशीते इत्यस्य निगमोऽर्थश्च

टान्निघ्नन् शृङ्गे[11] तीक्ष्णीकरोत्येवमग्निरपि दारूणि दहंस्तीक्ष्णीकरोति ज्वालाः । कमर्थं पुरस्कृत्य । रक्षसो विनिक्षणनाय । विहिंसनायेत्यर्थः । अत्र शृङ्गशब्दसंनिधानात् 'शिशीते' इत्यस्य ती-क्ष्णार्थत्वं तीक्ष्णीकृतैर्ह्यर्चिर्भिर्विनिक्षणनमुपपद्यत इति । निगमप्रसक्तमुच्यते ।

---

१ क. ख. घ. झ. ठ. ड. कूर्मत्वेनैवा°; ट. कूर्मत्वनैवा° बन्धे. २ क. ख. ग. ज. व. झ. ट. ठ. ड. कच्छः; च. खच्छः° क. ३ क. ख. ग. ज. घ. ट. ठ. ड. भवति । खच्छ इत्युच्यते । स°. ४ क. ख. घ. झ. ट. ठ. ड. सुस्थिरो; च. सुषिरो° स्थि. ५ ग. ज. पर्यवेश्या. ६ ग. च. ज. °गमः । ३५ । वि°. ७ ग. ज. भातीति । वृशो; °घ. ट. भात्यग्निः० शिशीते. ८ च. बृहता ज्यो° महता. ९ क. ख. घ. झ. ट. ड. °करोति प्रकाशीकरोति विश्वा°; च. °करोति विश्वा° प्रकाशीकरोति. १० ठ. ड. 'दुरवाः' नास्ति. ११ ठ. ड. शृङ्गेन.

'रक्षो रक्षितव्यं' हि शरीरम् 'अस्मात्' भवति।[1]तद्धि रक्षो मानुषान् भक्षयति। 'रहसि वा' विविक्ते प्रदेशे रक्षः 'क्षणोति'। हिनस्तीत्यर्थः। 'रात्रौ नक्षते' गच्छति 'इति वा' रक्षः।

'सुतुकः' (३५) इत्यनवगतम्। पक्षेण चानेकार्थम्। 'सुतुकनः' इत्यवगमः 'सुतुकनैरिति वा[2]'।

'स आ वक्षि महि न आ च सत्सि[3] दिवस्पृथिव्योररतिर्युवत्योः। अग्निः सुतुकः सुतुकेभिरश्वैरभस्वद्भी रभस्वाँ एह गम्याः [ऋ० सं० १०। ३। ७] ॥ त्रितस्येयमार्षमाप्त्यस्य। प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४। १३]। यस्त्वं दिवस्पृथिव्योः युवत्योः संमिश्रीभवन्त्योर्यानि भूतान्य[4]न्तरा वर्तन्ते तेषां सर्वेषामरा[5]तिः। पर्याप्तमतिरित्यर्थः। स एवंलक्षणस्त्वमस्माकमावक्षि आह्वयसि देवान् महि। महत इत्यर्थः।[6]स एवम् आसत्सि च आसीदासि च होतृ[7]त्वे। 'अग्निः' इत्येतत्पदं संबोधनार्थत्वेन विपरिणम्यते 'आवक्षि' '[8]आसत्सि' इति मध्यमपुरुषयोगान्मन्त्रस्य। हे अग्ने यस्त्वमेवंगुणयुक्तः

सुतुक इत्यस्य

सुतुकनः। सुगमन इत्यर्थः। अथवा 'सुप्रजाः'। तुगित्यपत्यनामसु पठितम् [निघ० २। २। १]। 'हिरण्यमपत्यमभिप्रेतमग्नेः'। 'हिरण्यरेता अग्निः' इति श्रूयते 'अग्नेरपत्यं प्रथमं सुवर्णम्' इति च। सुतुकैरेव सुगमनैरश्वैः। अथवा सुप्रजोभिः कुलजैरित्यर्थः। अथवा शोभना प्रजा येषां ते सुप्रजाः। शो[9]भनानामेवाश्वानां शोभनाः प्रजा भवन्तीति प्रजाद्वारेण चाश्वा एवैते श्रूयन्ते। अश्वद्वारेण [10]चाग्निः। स्तूयतेऽथवा स एवाग्निः 'सुतु[11]कैः सुप्रजाः'।

---

१ क. ख. °वाति। रक्षो हि मानु°; च. °वाति। तद्धि रक्षो मानु° रक्षो हि. २ ग. च. ज. वा।३६। स°. ३ ग. ज. सत्सि। त्रित°: घ. झ. ट. सत्सि० रभस्वद्धी°. ४ ग. °तानितरा; ज. °तानिंऽतरा°; च. °तानिंऽतरा० न्यं. ५ क. ख. ग. ज. °रतिः त्वमेवालमतिः पर्या°; च. °रति ˇ पर्या° स्त्वमेवालमति. ६ च. स एवम्. ७ ग. च. ज. घ. ट. ठ. ड. होतृत्वेऽग्निरित्ये°. ८ क. ख. घ. झ. ट. आ च सत्सि; च. आˇसत्सि° च. ९ घ. ट. ठ. ड. शोभमानामेवा°; च. °प्रजाः। ˇशोभ° अथवा. १० क. ख. ग. ज. ठ. ड. °चाग्निः स्तूयते। अथ°; घ. झ. ट. °चाग्निः स्तूयते अथ°; च. स्तूयते अथवा स एवाग्निः. ११ घ. झ. ट. ठ. ड. सुतुकप्रजाः, च. सुतुक ˇप्रजाः° :सु.

अपत्यं चास्य सर्वाः प्रजाः । ताश्च प्रति कल्याण इति सुप्रजाः । रभस्वद्भिः त्वरितैः रभस्वान् स्वयं च त्वरित एह गम्याः आगच्छेस्त्वमिह मम कर्मणि नित्यं हवींषि वोढुम् । कर्मैव तवेदमित्यभिप्रायः । एवमेतदिह ' सुतुकः ' इत्यग्निविशेषणं सुतुकैरश्वैरित्येतस्मात्तृतीयासंबन्धादित्युपपत्तिः ।

' सुप्रायणाः ' (३६) इत्यनवगतम् । ' सुप्रगमनाः ' इति शब्दप्रतीतिः । यज्ञगृहद्वारोऽभिधेया[1] यास्कमतेन शाकपूणेस्त्वर्चिषः । होता यक्षद्दुर ऋष्वा[2] कवष्योऽकोषधावनीरुदाताभिर्जिहतां वि पक्षोभिः श्रयन्तां सुप्रायणा अस्मिन्यज्ञे विश्रयन्तामृतावृधो व्यन्त्वाज्यस्य होतर्यज इति[3] (प्रैषः ६) । मैत्रावरुणो ब्रवीति । होता यक्षत् होता यजतु । किम् । एताः दुरः यज्ञगृहद्वारः । अथवैता अग्न्यर्चिषः । ऋष्वाः महत्यः । अथवा हिंस्राः । द्वार्येव हि यो निवारणीयः स हिंस्यते । अर्चिषां तु हिंस्रत्वमुपपद्यत एव । कवष्यः विकुषिताः[4] । सुषिरा[5] इत्यर्थः । कपाटवत्यो वा यज्ञगृहद्वारः । अकोषधावनीः अकोशधावनीः । तासु हि संवृतासु द्रव्यकोशाः सुरक्षा भवन्ति । अर्चिःष्वपि हविः प्रक्षिप्तं नान्यतो धावति । किं तर्हि । देवानेव प्राप्नोति । एतदकोशधावनीत्वमर्चिषाम् । एवंलक्षणा एता द्वारो अर्चिषो वा उदाताभिर्जिहताम् उज्जिहताम् उत्तिष्ठन्तु आताभिः दिग्भिः । विश्रयन्तां च पक्षोभिः । विव्रियन्तां कपाटसंवरणै[6]र्द्वारः । अर्चिषस्तु हविषोऽनुप्रवेशार्थं पक्षोभिः स्वैरेवावयवैर्विश्रयन्ताम् । सुप्रायणा इत्यस्य विवृताश्च सत्यः सुप्रायणाः सुप्रगमना भवन्तु ऋत्विजां[7] यदि द्वारः । अथ पुनरर्चिषस्ततो हविषः सुप्रगमनाः सन्तु । सामान्यमेवेदमाशास्तम् । यत्पुनस्तस्मिन्नेव वर्तमाने कर्मण्याशास्ते । अस्मिन्यज्ञे विश्रयन्तां विव्रियन्ताम् ऋतावृधः यज्ञवर्धयित्र्यः । या एता एवंलक्षणा द्वारोऽर्चिषो वा ता अस्याज्यस्य व्यन्तु । य आसां स्वां शस्तं पिबन्तु । हे होतस्त्वमपि मया प्रेषितो यजैताः । एवमेष ' सुप्रा-

---

१ ग. ज. °धेयाः । ३७ । होता°; च. °वेयाः ४ । ३७ । होता° यास्क ०००° र्चिषः; झ. °धेयाः । होता°. २ ग. च. ज. व. झ. ट. ऋष्वा इति । मैत्रा°. ३ ठ. ड. इति प्रैषः । मैत्रा°. ४ क. ख. घ. झ. ट. ठ. विकर्तिताः. ५ क. ख. कुषिताः; घ. झ. ट. ठ. कषिताः. ६ क. ख. घ. ट. ठ. ड. °संवरणै°. ७ क. ख. ऋत्विजं प्रति द्वारः; घ. झ. ठ. ड. ऋत्विजः प्रति द्वारः ; च. ऋत्विजां यदि द्वार° जः प्रति.

यणाः ' इति दुरामर्चिषां वा संनिधौ श्रूयमाणः सुप्रगमनाभिधायीत्युपपद्यते[1] ।

' अप्रायुवः ' (३७)[2] इत्यनवगतम् । ' अप्रमाद्यन्त ' इत्येवमर्थप्रतीतिः ॥ १८ ॥

देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे । देवा नो यथा सदा वर्धनाय स्युरप्रायुवोऽप्रमाद्यन्तो रक्षितारश्चाहन्यहनि च्यवन ऋषिर्भवति च्यावयिता स्तोमानां च्यवानमित्यप्यस्य निगमा भवन्ति । युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः । युवां च्यवनं सनयं पुराणं यथा रथं पुनर्युवानं चरणाय ततक्षथुर्युवा प्रयौति कर्माणि तक्षतिः करोतिकर्मा रजो रजतेर्ज्योती रज उच्यत उदकं रज उच्यते लोका रजांस्युच्यन्तेऽसृगहनी रजसी उच्येते । रजांसि[3] चित्रा विचरन्ति तन्यव इत्यपि निगमो भवति हरो हरतेर्ज्योतिर्हर उच्यते उदकं हर उच्यते लोका हरांस्युच्यन्ते[4]ऽसृग[5]हनी हरसी उच्येते । प्रत्यग्ने हरसा हरः शृणीहीत्यपि निगमो भवति । जुहुरे वि चितयन्तः । जुह्विरे विचेतयमाना व्यन्त इत्येषोऽनेककर्मा पदं देवस्य नमसा व्यन्त इति पश्यतिकर्मा वीहि शूर पुरोळाशमि[6]ति खादतिकर्मा । वीतं पातं पयस उस्रियायाः । अश्नीतं पिबतं पयस उस्रियाया उस्रियेति गोनामोस्राविणोऽस्यां भोगा उस्रेति[7] च । त्वामिन्द्र मतिभिः सुते सुनीथासो वसूयवः । गोभिः क्राणा अनूषत गोभिः कुर्वाणा अस्तोषत[9] । आ तू षिञ्च हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः । आसिञ्च हरिं द्रोरुपस्थे द्रुममयस्य हरिः सोमो हरितवर्णोऽयमपीतरो हरिरेतस्मादेव । वाशीभिस्तक्षताश्मन्मयीभिः । वाशीभिरश्ममयीभिरिति वा वाग्भिरिति वा । स शर्धदर्यो विषु-

---

१ क. ख. °पद्यते। २ (१८); ठ. °पद्यते । इति निरु० टी० चतुर्थाध्याये अष्टादशः खण्डः. २ क. ख. घ. ट. ठ. ड. अङ्को नास्ति; ग. १९ (३८); च. ज. ३८. ३ छ. त. द. 'रजांसि० भवति' नास्ति. ४ छ. त. द. हरा उच्यन्ते. ५ छ. त. द. 'असृग० भवति' नास्ति. ६ क. ख. पुरोडाश°; छ. त. द. पुरोलाश°. ७ छ. त. द. ' उस्रेति च ' नास्ति. ९ छ. त. °षत ॥ १९ ॥ आ°; द. °षत ॥ ३ ॥ आ°.

णस्य जन्तोर्मा शिश्नदेवा अपि गुर्ऋतं नः । स उत्सहतां यो विषुणस्य जन्तोर्विषमस्य मा शिश्नदेवा अब्रह्मचर्याः शिश्नं श्नथतेः । अपि गुर्ऋतं नः । सत्यं वा यज्ञं वा ॥ १९ ॥

'आ नो भद्राः क्रतवो यन्तु विश्वतोऽदब्धासो अपरीतास उद्भिदः । देवा नो यथा सदमिद्वृधे असन्नप्रायुवो रक्षितारो दिवेदिवे' [ऋ० सं० १ । ८९ । १ ॥ गोतमस्यैयमार्षम् । अग्निष्टोमे [आश्व० श्रौ ५।१८] महाव्रते च तृतीयसवने [ऐ० आ० ५ । ३ । २] वैश्वदेवे शस्त्रे शस्यते । अप्रायुव इत्यस्य

आयन्तु उपयन्त्वस्माकं भद्राः भन्दनीयाः स्तुत्याः क्रतवः सोमक्रतवः कामा वा विश्वतः सर्वतः सर्वदैव यथाविहितेषु कालेषु अदब्धासः अनुपहताः अविगुणाः कैश्चिदपि दस्युभिः अपरीतासः अपरिप्राप्तपूर्वा अस्मच्छत्रुभिः उद्भिदश्च उद्भेत्तार एषां त्रयाणामपि लोकानाम् । येषां फलेनैतांस्त्रीनपि लोकान्विन्देमहि तेँ आगच्छन्तु । किंच । तथा च तेऽस्यर्थमविगुणा आगच्छन्तु यथा तैः परितोषिताः सन्तो देवाः सदैव नित्यमेवास्माकं वर्धनायोद्यता असन् । स्युरित्यर्थः । भाष्येऽपि 'स्युः' इत्येष एव पाठः । 'असन्' इत्येष प्रमादपाठः । अप्रायुवः अप्रमाद्यन्तः प्रमादमकुर्वाणाः । असंमुह्यमाना इत्यर्थः । वर्धयितारो रक्षितारश्च दिवेदिवे अहन्यहनि यथा स्युस्तथा ते सोमक्रतवः सगुणाः कामा वागच्छन्तु । अत्र 'अप्रायुवो रक्षितारः' इति रक्षितृशब्देन समानार्थसंनिवेशादप्रायुवशब्दस्याप्रमादार्थत्वम् । रक्षणे हि सत्यप्रमादस्येष्टत्वात् ।

'च्यवनः' (३८) इत्यनवगतम् । 'च्यावनः' इत्येवमर्थप्रतीतिः । 'ऋषिर्भवति' इत्यभिधेयवचनम् । 'च्यवानमिति' एवम् 'अप्यस्य' ऋषेर्भृगुपुत्रस्य छन्दसि 'निगमाः' सन्ति । च्यवन इति प्रसिद्धमेवेति

---

१ क. ख. ३ (१९); छ. त. २०; ह्. ४. २ म. च. ज. भद्राः क्रतवो यन्त्विति । गोत°; घ. ट. भद्राः० दिवेदिवे. ३ ठ. ड. °द्वृध इति । गोत°. ४ च. एषां° वं. ५ क. ख. घ. झ. ट. °कानुद्भिन्दीमहि; ठ. ड. °कानुद्भिद्वीमहि. ६ ग. ज. तत्र. ७ क. ख. घ. झ. ट. ठ. ड. 'एव' नास्ति. ८ क. ख. घ. झ. ट. ठ. ड. 'असन्नि ०००० पाठः' नास्ति; च. असन्नित्येष प्रमादपाठः. ९ ग. ज. 'अपि' नास्ति; च. °त्येवम॑स्य° प्य.

कृत्वा निगमं न पठति । इतरथा त्वप्रसिद्धमल्पप्रयोगं चैतदिति कृत्वा पठति ।

'युवं च्यवानं सनयं यथा रथं पुनर्युवानं चरथाय तक्षथुः । निष्टौग्र्यमूहथुरद्भ्यस्परि विश्वेत्ता वां सवनेषु प्रवाच्या ' [ऋ० सं० १० । ३९ । ४] ॥ काक्षीवत्या घोषाया इयमार्षम् ।

च्यवान इत्यस्य प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १५] । अश्विनावुच्येते । हे अश्विनौ युवां च्यवानमृषिं च्यावयितारं स्तोमानां वृद्धं गमनासमर्थं सन्तं यथा सनयं चिरंतनं रथं गमनासमर्थं कश्चिच्छिल्पी गमनसमर्थं कुर्यादेवं पुनर्युवानं च्यवनमृषिं चरथाय चरणाय गमनार्थं ततक्षथुः । कृतवन्तौ स्थ इत्यर्थः । किंच । निष्टौग्र्यमूहथुः निरूहथुः निर्हृतवन्तौ स्थः तौग्र्यं तुग्र्याणामपां संघातं मेघम् । क्व पुनः निरूहथुः । अद्भ्यस्परि चिरंतनीनामन्यासामपामुपरि । अनुपक्षीणास्वेवान्यासु वार्षिकास्वप्सु तासामेवोपरि लोकानुग्रहार्थमन्यमुदकसंघातं निरूहथुः । तान्येवमादीनि कर्माणि विश्वा विश्वानि सर्वाणि युवयोः सवनेषु यज्ञेषु प्रातःसवनादिषु वा प्रवाच्या प्रकर्षेण वचनीयानि स्तोतृणाम् । एवमेतस्मिन्मन्त्रे च्यवानशब्देन च्यवन एव ऋषिरुक्तः । स हि श्रूयते सौकन्ये आख्याने [महा० भा० वनप० १२४] जीर्णः सन्नश्विभ्यां पुनर्युवाकृत इति । तस्मादुपपद्यते । निगमप्रसक्तमुच्यते । ' युवा प्रयौति कर्माणि ' मिश्रयति । ' तक्षतिः करोतिकर्मा ' । करोत्यर्थः ।

' रजः ' (३९) इत्यनेकार्थम् । ' रजतेः ' इति व्युत्पत्तिः । ' ज्योती रज उच्यते ' । तद्ध्यनुरञ्जयति द्रव्याणि स्वेन प्रकाशेन । ' या ते अग्ने रजःशया तनूः ' [वा० सं० ५ । ८] इत्येवमाद्युदाहरणं

१ ग. च. ज. °ठति । ३९ । युवं°. २ घ. ट. च्यवानं० प्रवाच्या. ३ ग. ज. रथमिति । काक्षी°. ४ घ. ट. ठ. °ना उच्ये°. ५ ठ. ड. °तारं देवान्प्रति प्रापयितारं स्तो°. ६ क. ख. घ. झ. ट. ठ. ड. सनयं वृद्धं; च. °मानां वृद्धं° सनयं. ७ क. ख. घ. झ. ट. ठ. ड. ' सनयं ' नास्ति; च. सनयं. ८ ग. ज. तुग्रियाणां; च. तुग्रियाणां °ग्र्या. ९ क. ख. ग. ज. मेघानां; च. मेघानां° घं; ठ. ड. मेवं तुग्रपुत्रं भुज्युं समुद्रस्योपरीति वा । क्व°. १० क. ख. च. घ. झ. ट. ठ. ड. करोतीत्यर्थः.

द्रष्टव्यम् । भाष्यकारस्तु प्रचुरत्वादेतेषु निगमान्न पठति ।

' उदकं रज उच्यते ' । [1]तदपि स्वेन स्नेहाख्येन गुणेनानुरञ्ज[2]यति ।

उदकवाचिरजःशब्दस्य निगमः

' भुवो [3]यज्ञस्य रजसश्च नेता यत्रा नियुद्भिः सचसे शिवाभिः । दिवि मूर्धानं दधिषे स्वर्षां जिह्वामग्ने चकृषे हव्यवाहम् ' [ऋ० सं० १० । ८ । ६] । हे अग्ने त्वमेवास्य यज्ञस्य भुवः पृथिवी[4]लोकादन्तरिक्षलोकं नेता । रजसः उदकस्य च नेता । ' अग्निर्वा [5]इतो वृष्टिं समीरयति ' इति हि वक्ष्यति [निरु० ७ । २४] । क पुनर्नेता । यत्र यस्मिन् लोके नियुद्भिः अश्वजातिभिः शिवाभिः सुखतमाभिः सहितं वायुम् अन्तरिक्षस्थानं सचसे [6]संसेवसे त्वं तत्र नेता मध्यस्थानानां देवानां स्थितये । किंच । त्वमेव दिव्यवस्थितं सर्वभूतमूर्धानं दधिषे धारयसि यज्ञाभिनिष्पन्नेनेतो लोका[7]दूढेन हविषा [8]स्वःसां स्वराख्यमादित्यम् । किंच । त्वमेवैतां जिह्वां ज्वालामत्यद्भुतामात्मनः सकाशाच्चकृषे [9]पुनः पुनः करोषि यास्मत्प्रत्तानि हवींष्युपक्ष[10]यति । यस्त्वमेवंगुणयुक्तस्तं त्वां वयमेतस्मिन् कर्मणि हव्यवाहं हविषां वोढारमनेनं पुरोडाशाख्येन हविषा यजामः । पौर्णमा[11]सस्याग्नेयस्य[12] हविषो याज्यैषा ।

रजःशब्दस्यान्येऽर्थाः

'लोका रजांस्युच्यन्ते' । तेष्वपि हि प्राणिनो रज्यन्ते । ' त्वया दृ[13]ळ्हानि सुक्रतो रजांसि ' इति व्याख्यातो निगमः' [निरु० ४ । १७] । ' असृगहनी रजसी उच्येते' । असृग् रुधिरम् [14]अहश्च असृगहनी । ते अपि रजसी उच्येते । ' मासि मासि रजो ह्यासां दुष्कृतान्यपकर्षति ' (वासि० धर्म० २८ । ४) इति रुधिरस्योदाहरणम् । ' अहश्च कृष्णमहरर्जुनं च ' इत्यह्न उदाहरणम् [निरु० २ । २१] ।

---

१ क. ख. घ. झ. ट. ठ. ड. तदपि हि स्वेन. २ ग. च. ज. °यति । ४० । भुवो°. ३ ग. ज. घ. ट. ठ. ड. यज्ञस्येति निगमः । हे अग्ने°; च. यज्ञस्येति निगमः ˇ । हे अग्ने° त्रिशिरास्त्वाष्ट्रः । अग्निस्त्रिष्टुप्. ४ क. ख. घ. झ. ट. ठ. ड. °लोकादमुं लोकं. ५ ग. च. ज. इमां. ६ ग. ज. संवससे; च. संसवसे. ७ क. ख. लोकाद्धृतेन; च. लोकादूढेन° ह. ८ ग. ज. ' स्वःसां ' नास्ति. ९ घ. झ. ट. ठ. ठ. ड. 'पुनः' सकृदेव. १० ठ. ड. °क्षयति. ११ ग. ज. °मास आग्ने°. १२ ग. च. ज. °ग्नेयहवि°. १३ क. ख. ग. च. ज. दृढानि; घ. दृळ्हानि. १४ क. ख. घ. झ. ट. ठ. ड. °धिरं असृक्च अह°; च. °धिरं ˇ अहश्च अ° असृक्च.

'हरः' (४०) इत्येतदप्यनेकार्थम्। 'हरतेः' इति व्युत्पत्तिः। 'ज्योतिर्हर उच्यते'। तद्धि ह्रियते हरति वा स्नेहं विरूक्षीकरोति हरति वा तम इति हरः। 'या ते अग्ने हरःशया तनूः' 'अग्ने यस्ते हरस्तेन तं प्रति हर' इत्येवमादयः प्रचुरा एव निगमा इत्यत्रापि भाष्यकारो न पठति। 'उदकं हर उच्यते'। तद्धि ह्रियते प्राणिभिः जीवनाय। 'लोका हरांस्युच्यन्ते'। तेभ्यो हि क्षीणपुण्याः प्राणिनो ह्रियन्ते।

हरःशब्दस्यार्थाः

'जुहुरे' (४१) इत्यनवगतम्। 'जुह्विरे' इत्यवगमः।

'जुहुरे वि चितयन्तोऽनिमिषं नृम्णं पान्ति। आ दृळ्हां पुरं विविशुः' [ऋ० सं० ९।१९।२]॥ वव्रेरात्रेयस्यार्षम्। जुह्विरे जुह्वति येऽग्निं विचितयन्तो विचेतयमानाः कर्मकर्तृसाधनानां याथात्म्यं वेदान्तदर्शनेन जानाना ये च अनिमिषम् आदरवदवस्थानमात्मनः कृत्वा युक्तात्मानो नृम्णं योगबलमात्मनः कर्मणि वर्तमाने पान्ति। रक्षन्तीत्यर्थः। आह। य एवंगुणयुक्ताः किं तेषामिति। उच्यते। आ दृळ्हां पुरं विविशुस्ते। दृढां नित्यामनावृत्तये परब्रह्ममयीं पुरम्। इमामदृढां शरीरपुरं पापिष्ठां हित्वेत्यभिप्रायः। विचेतयमाना हि वेदप्रामाणिकाः सन्तो हवनादृते किमन्यत्कुर्युर्येन दृढां पुरमाविशेयुः। शब्दसारूप्यमपि च 'जुहुरे' इत्येतस्मिञ्छन्देऽस्त्येव। प्रकरणाच्चेयमाग्नेयी ऋक्। तस्मात् 'जुहुरे' इत्येष शब्दो हवनार्थ एवेत्युपपद्यते।

जुहुरे इत्यस्य निगमोऽर्थश्च

'व्यन्तः' (४२) इत्येषोऽनेककर्मा। यस्माद्धातोरयं शब्दोऽभिनिष्पद्यते स धातुरनेककर्मानेकार्थः। 'वी गतिप्रजनकान्त्यसनखादनेषु' (धा० २।३८) इति। तद्यथा। 'पदं देवस्य नमसा व्यन्तः श्रवस्यवः श्रव आपन्नमृक्तम्। नामानि चिद्दधिरे यज्ञियानि भद्रायां ते रणयन्त संदृष्टौ' (ऋ० सं० ६।१।४)॥ अत्र 'पश्यतिकर्मा'।

१ क. ख. ठ. ड. विरुक्षी°. २ ग. ज. हरा उच्य°. ३ ग. च. ज. °गमः। ।४१। जुहुरे°. ५ क. ख. च. दृढां; ग. ज. दृल्हां. ४ घ. ट. चितयन्तो० विविशुः. ६ क. ख. घ. ट. ठ. ड. जुहुरे जुह्विरे°; च. °स्यार्षम्। जुहुरे° जुह्विरे. ७ घ. ट. जानामाः; ठ. ड. जानीमाः. ८ क. ख. च. ज. दृढां; ग. झ. ट. दृल्हां. ९ ठ. ड. °न्त्यशन°. १० ग. च. ज. °यथा।४२। पदं°. ११ ग. व्यन्तः श्रवस्यवः०। अत्र°; घ. ट. व्यन्तः ०संदृष्टौ. १२ क. ख. घ. झ. ट. इत्यत्र; च. दृष्टौ। भरद्वा° इत्यत्र पश्यतिकर्मा.

पश्यत्यर्थे व्यन्त इत्यस्य निगमः

भरद्वाजस्येयमार्षम् । प्रातरनुवाकाश्विनयोः शस्यते (आश्व० श्रौ० ४ । १३) । पशौ च विनियुक्ता (आश्व० श्रौ० ३ । ६) । पदं स्थानमवस्थानं याथात्म्यमग्नेः देवस्य दानादिगुणयुक्तस्य व्यन्तः पश्यन्तो जानानाः । केन । नमसा नमस्कारेण स्तुत्या । मन्त्रेणेत्यर्थः । मन्त्रार्थपरिज्ञानादेव ह्यग्नेर[1]ध्यात्माधिदेवाधिभूताधियज्ञे[2]ष्ववस्थानं याथात्म्यतो दृश्यते । पदशब्दो हि स्थाने प्रसिद्धः । पदस्थोऽयमिति हि वक्तारो भवन्ति लोके । अथवा नमसा अन्नेन हविराख्येनाभ्युद्यतेनेति योज्यम् । श्रवस्यवः श्रव इच्छमाना अन्नमात्मनः प्रार्थयमानाः । य एवमग्नेः[3] स्तुतिभिर्विद्वांसो याथात्म्यमन्नैर्वाभ्युद्यतैः श्रव इच्छमानाः पश्यन्तोऽग्निमुपासते किं तेषामिति । उच्यते । श्रव आपन् । किंलक्षणं पुनराप्नुवन्ति । अमृक्तम्

अमृदि[4]तमनुपभुक्तमन्यैः । किंच । नामानि चित् ये चैते ग्रन्थमात्राध्येतारः केवलच्छान्दसा नामान्यपि च मन्त्रभावेनावस्थितानि धारयन्त्यनर्थज्ञा यज्ञियानि यज्ञार्हाणि तेऽपि भद्रायां भन्दनीयायामग्नेः संदृष्टौ संदर्शने रणयन्त रमयन्त्यात्मानम् । तानपि भद्रेण चक्षुषा पश्यत्येवाग्निरित्यभिप्रायः ।

एवमेतस्मिन्मन्त्रे 'पदं[5] नमसा व्यन्तः श्रवस्यवः श्रव आपन्' इत्येतेषां पदानामेकवाक्ययोगात् 'व्यन्तः' इत्य[6]स्य शब्दस्य पश्यत्यर्थ[7]तोपपद्यते[8] ।

वीहि शूर पुरोलाशमित्यत्र खादतिकर्मा[9] । 'इमा ब्रह्म ब्रह्मवाहः[10] क्रियन्त आ बर्हिः सीद । वीहि शूर पुरोळाशम्[11]' [ऋ० सं० ३ । ४१ । ३] ॥ विश्वामित्रस्येयमार्षम् । रात्रिपर्यायेषु महारात्रिके पर्याये ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्ता [आश्व० श्रौ० ६ । ४] । इमानि[12]

---

१ ग. ज. °ग्नेरध्या°. २ घ. ट. ठ. ड. °दैवाधियज्ञे°. ३ ग. ज. ठ. ड. °मग्नेस्तुति°; च. °मग्निस्तुति° ग्ने. ४ च. °दितं अनुपहतं अनुप°. ५ क. ख. घ. झ. ट. ठ. ड. पदं दवस्य नम°; च. पदं ˇ नम° देवस्य. ६ च. इत्येतस्य. ७ क. ख. घ. झ. ट. ठ. ड. °त्यर्थोऽप्युप; च. °त्यर्थतो° र्थोऽप्यु. ८ क. ख. घ. झ. ट. ठ. ड. °पद्यते । इमा ब्रह्म°. ९ ग. च. ज. °कर्मा । ४३ । इमा°. १० ग. ज. °वाहः इति विश्वा°; घ. ट. °वाहः० पुरो°. ११ क. ख. पुरोडाशम्; घ. च. पुरोलाशम्; घ. ट. ठ. ड. पुस्तकेषु ऋचोऽनन्तरं 'इत्यत्र खादतिकर्मा' इति वर्तते. १२ क. ख. घ. झ. ट. ठ. ड. इमा इमानि; च. °युक्ता । ˇ इमानि° इमा.

अस्यामृचि व्यन्त इत्येष खादतिकर्मा

ब्रह्म ब्रह्माणि ऋग्यजुःसामाख्यानि स्वरसौष्ठवादियुक्तान्यस्माभिर्ब्रह्मणोऽस्य हविषो वहनसमर्थानि त्वां प्रति क्रियन्ते । उच्यन्त इत्यर्थः । यतो ब्रवीमि । हे इन्द्र आ बर्हिः सीद । आसीदेदं बर्हिः प्रति । आसीनश्चैतस्मिन् बर्हिषि वीहि भक्षयैतमस्मत्प्रत्तं हे शूर पुरोडाशम्[1] । एवमेतस्मिन् मन्त्रे ' वीहि पुरोळाशम्[2] ' इत्येतस्मादेकवाक्यर्थयोगात्[4] ' वीहि ' इत्येष शब्दः खादनार्थ इति प्रतीयात्[5] । किमन्यद्बर्हिष्यासीन इन्द्रः पुरोडाशस्यान्यत्र भक्षणात्कुर्यात् । प्रसिद्धं च कठिनद्रव्यस्य[6] लोके भक्षणं भक्षयति मोदकादीनिति[7] । तस्मात्सामर्थ्याद्भक्षणार्थोऽयमित्युपपद्यते ।

वीतं पातमित्यत्राशनार्थः

' वीतं पातं पयसः ' इत्यत्राशनार्थः[8] । ' उत वां विक्षु मद्यास्वन्धो गाव आपश्च पीपयन्त देवीः । उतो नो अस्य पूर्व्यः पतिर्दन्वीतं पातं पयस उस्रियायाः[9] ' [ऋ० सं० १ । १५३ । ४] ॥ मैत्रावरुण्येषा । त्रिष्टुप् । दीर्घतमस आर्षम् । मित्रावरुणावुच्येते । उत[10] वाम् अपि युवयोरेतासु विक्षु मद्यासु एतेषु मनुष्येषु मदयितृषु वर्तमानमेतत् अन्धो हविर्लक्षणं यदेतत्[11] देतस्मिन्नहनि एभिर्मनुष्यैर्भवद्भ्यां देयं पयस्याख्यमाज्याख्यं च तदेता गावः एताश्चापः देवीः दानादिगुणयुक्ता आसां गवामुपकारं कुर्वन्त्यः पीपयन्त । वर्धयन्तीत्यर्थः । यदेतदशनपानयोग्यमाज्यसांनाय्यलक्षणमाभिरद्भिर्गोभिश्च युवयोरन्धो वर्ध्यते उतो नो अस्य अध्यस्य हविषोऽस्मत्पूर्वो यजमानः पतिः । पूर्वं हि द्रव्यस्य यजमानः पतिर्भवति । ततः[12] स तद्दात्विग्भ्यः समर्पयति देवतायै संस्कुरुतैतदिति । ततस्ते तस्य हविषः पतयो भवन्ति ।

---

१ च. पुरालाशम्. २ क. ख. घ. झ. ट. ठ. ड. वीहि शूर पुरो°; च. वीहि पुरो° शूर. ३ क. ख. ग. च. ज. घ. ट. पुरोडाशम्. ४ क. ख. घ. ट. ठ. ड. °वाक्यसंयो°. ५ घ. झ. ट. ठ. ड. °नार्थः प्रतीयते. ६ क. ख. घ. झ. ट, ठ. ड. °लोके कठिनद्रव्यस्य भ°. ७ क. ख. घ. झ. ट. ठ. ड. मोदकादीनि । तस्मा°; ग. ज. मोदकानिति. ८ ग. च. ज. °नार्थः । ४४ । उत. ९ ग. ज. °स्वन्ध इति; घ. ट. °स्वन्धः ० उस्रियाया. १० ठ. ड. उत अपि वां युव°. ११ क. ख. घ. झ. ट. ठ. ड. ' एतत् ' नास्ति; च. यदेतद्देत°. १२ क. ख. घ. झ. ट. ठ. ड. तदनन्तरं.

तानपेक्ष्य यजमानः पूर्व्यः पतिः । तदपेक्षयैव ऋत्विज आहुः । सोऽस्मत्तः पूर्व्यः पतिरस्य हविषः अपि[1] स दन् भवति । ददादित्यर्थः । तेनाप्येतद्भवन्तावेवोद्दिश्यास्मान्प्रत्युत्सृष्टम् । एवमपि स दन्भवति[2] । अपि वयं यथाव्यादिष्टमेव तेन पूर्वेण हविष्पतिना[3] भवद्भ्यामेतद्दद्मः । तौ युवामस्य हविषः पयस्याख्यस्य उस्रियायाः पयसा[4] निष्पन्नस्य नातिकठिनस्याशनयोग्यस्य स्वं भागमस्माभिर्दीयमानं वीतम् । अश्नीतं युवामित्यर्थः । पिबतं[5] च यदेतदाज्यस्य स्वं भागमुपस्तरणाभिघारणसंबद्धम् ।

व्यन्तोऽशनार्थ इति निर्वचनस्य कारणम्

एवमस्मिन् मन्त्रे 'उस्रियायाः[6] पयसा निष्पन्नस्य' इति श्रूयमाणे पयस्याज्ये प्रतीयेते । तयोराज्यं पेयं तत् 'पातम्' इत्यनेन संबध्यते । पारिशेष्यात् 'वीतम्' इत्यस्य शब्दस्य पयस्यया सह संबन्धः । सा च नातिकठिना नातिद्रवाशनयोग्या । तस्मात् 'वीतम्' इत्येष शब्दोऽशनार्थ इत्युपपद्यते । लोकेऽपि हि नातिकठिने नातिद्रवेऽशनशब्दः[7] प्रसिद्धोऽश्नाति पायसमिति । निगमप्रसक्तमुच्यते । 'उस्रियेति गोनाम' । 'उस्राविणो[8]' हि तस्याः सकाशात्क्षीरादयो 'भोगाः' भवन्ति ।

'क्राणाः' (४३) इत्यनवगतम् । 'कुर्वाणाः' इत्यर्थप्रतीतिः । 'गोभिः क्राणा अनूषत' इति निगमः । 'गोभिः कुर्वाणा अस्तोषत' इति निर्वचनम् । त्वामिन्द्रेति शेषः[9] । 'त्वामिन्द्र मतिभिः सुते सुनीथासो वसूयवः । गोभिः क्राणा अनूषत' ॥ हे इन्द्र त्वामस्मिन्सोमे मतिभिः[10] सुते

क्राणा इत्यस्य प्रयोगोऽर्थश्च

मेधाविभिरभिषुते सोमे । य एव हि मतिमन्तस्त एव हि सोममभिषोतुं शक्नुवन्ति नेतरे मतिहीनाः । सुनीथासः । सुष्टु ये स्तोतुं शक्नुवन्ति ते सुनीथाः । वसूयवो वसुकामाः[11] । आह । किमेते कुर्वन्ति

---

१ क. ख. घ. झ. ट. ठ. ड. 'अपि' नास्ति; च. अपि. २ घ. ट. दत् भद्भवति; झ. दन् भद्भवति; ठ. ड. दद्भवति. ३ क. ख. घ. झ. ट. ठ. ड. हविःप°. ४ ठ. ड. पयसां. ५ घ. झ. ट. ठ. ड. पातं पिब°. ६ ग. च. ज. उस्रियापय°. ७ क. ख. घ. झ. ट. ठ. ड. °द्रवेऽश्नातिशब्द°; च. द्रवेऽशनशब्द° श्नाति. ८ क. ख. घ. ट. ड. उत्स्रावि°. ९ ग. च. ज. शेषः । ४५ । त्वा°. १० क. ख. ग. ज. घ. ट. ठ. ड. मतिभिः मतिमद्भिः सुते°; च. मतिभिः सुते° मतिमद्भिः. ११ च. धनकामाः°.

मतिभिः सुते मेधाविभिरभिषुते सोमे । उच्यते । गोभिर्वाग्भिः स्तुतिलक्षणाभिः अस्मिन्नभिषुते सोमे आभिमुख्येन कुर्वाणा अनूषत अस्तोषत । स्तुवन्तीत्यर्थः । अभिषुतेषु सोमेषु किमन्यदाभिमुख्यकरणादिन्द्रस्य गोभिः सुनीथाः स्तुवन्तः कुर्युः । तस्मात् 'क्राणाः' इत्येष शब्दः 'कुर्वाणाः' इत्येवमुपपद्यते ।

'वाशीभिः' (४४) इत्येतदनवगतं पक्षेण चानेकार्थम् । 'वाशीभिरश्ममयीभिरिति वा वाग्भिरिति वा' इति शब्दसमाधी । 'वाश्यः' एवाभिधेया 'वाचो' वा । 'आ तू षिञ्च हरिमीं द्रोरुपस्थे वाशीभिस्तक्षताश्मन्मयीभिः । परि ष्वजध्वं दश कक्ष्याभिरुभे धुरौ प्रति वह्निं युनक्त (ऋ० सं० १० । १०१ । १०) ॥ बुधस्य सोमपुत्रस्येयमार्षम् । आसिञ्च प्रक्षिपैतं हारितवर्णं सोमम् । क । द्रोरुपस्थे । द्रुममयस्याधिषवणफलकद्वयस्योपरि । एवं तावदध्वर्युरुक्तः । स हि सोममुपावहरति । अधुनेतरानभिषवकर्तॄन् ब्रवीति । यूयमप्यनेनाध्वर्युणोपावहृतमेनं सोममधिषवणफलकयोरुपरि वाशीभिः एताभिरश्ममयीभिः तक्षत कुट्टयत । अभिषुणुतेत्यर्थः । 'ग्रावभिरभिषुण्वन्ति' इति ह्युक्तम् । अथवाऽयमन्योऽस्यार्धर्चेस्यार्थः । हे उन्नेतः आसिञ्च प्रक्षारय तं हारितवर्णं सोमममनेन कलशेन । क । द्रोरुपस्थे । द्रोणकलशस्योपरि । यूयमपि च हे होतार आसिच्यमानमेनं सोमं वाशीभिः वाग्भिः स्तुतिलक्षणाभिः तक्षत संस्कुरुत । यदस्यायज्ञियमपूतं तत्स्तुतिभिः पुनीतेत्यभिप्रायः । अश्मन्मयीभिः व्यापनसमर्थाभिरित्यर्थः । यूयमपि च[10] हे अध्वर्यवः पूतमेतमुद्गातृभिः सोमं परिष्वजध्वं ग्रहेषु

वाशीभिरित्यस्य

वाशीभिरश्मन्मयीभिरित्यस्यार्थविकल्पे 'आसिञ्च' इत्यस्याप्यर्थविकल्पः

---

१ ग. ज. °षुतेषु तेषु सो°. २ ग. ज. °श्मन्मयी°; च. °श्मन्मयी° म. ३ ग. घा । ११/४६ । आ°. ४ ग. ज. हरिर्मी द्रोरुपस्थे इति । बुध°; च. हरिर्मी द्रोरिति । बुध°; घ. ट. हरि० युनक्त. ५ क. ख. घ. झ. ट. ठ. ड. 'इयं' नास्ति. ६ क. ख. ग. ज. ठ. ड. °श्मन्मयी°. ७ क. ख. घ. झ. ट. ठ. ड. संस्कुरुत; ग. ज. संस्कुरुत कुट्टयत; च. °क्षत ˘ कुट्टयत° संस्कुरुत. ८ घ. ट. ठ. ग्रावभिषुण्व°; ड. ग्रावभिः षुण्व; च. ग्रावभिः षुण्व° भिरभि. ९ क. ख. ग. ज. °स्यार्धस्यार्थः. १० क. ख. ग. ज. 'च' नास्ति.

स्थालीषु च कक्ष्याभिः अङ्गुलीभिः । अङ्गुलीभिरेव हि पात्रस्थः सोमो गृह्यते । यदेष चेदं ग्रहणमेष एव तस्य परिष्वङ्गः । परिष्वज्य च गृहीत्वैनं सोममुभे हविर्धानधुरौ प्रति वह्निमिव वोढारमिवानड्वाहं युनक्ति । एतं सोमं सादयतेत्यर्थः । स हि सोमो हविर्धानधुरोरधस्तात्खरे साद्यते । एतस्मादेव चानुडुद्योजनप्रदेशसामान्याद्वह्निमिव युनक्तेति लुप्तोपमत्वमुपपद्यते । अत्र 'वाशीभिस्तक्षत' इति तक्षणयोगादश्ममय्यो वाश्य एता ग्रावाख्या इति प्रथमस्यार्थस्योपपत्तिः । एतस्मिन्नर्थे 'आ तू षिञ्च' इत्यासेकशब्दो गौणः । न हि सोमांशूनामनभिषुतानामासेकोऽस्ति कठिनत्वात् । तस्मादेतस्मिन्नर्थे प्रक्षेपणमात्रमेव सिञ्चतेरर्थः । अथवा 'आसिञ्च हरिमीं द्रोरुपस्थे' इत्यतोऽनन्तरं वाशीशब्दः श्रूयमाणो वाङ्नामधेयत्वेनाप्युपपद्यत एव । सोमो हि द्रोणकलशस्योपर्यासिच्यमानो वाग्भिः स्तूयते । एवमर्थद्वयमभिप्रेत्योभयथा भाष्यकारेणोक्तं वाशीभिरश्ममयीभिरिति वा वाग्भिरिति वा' इति ।

'अयमपीतरो हरिः' मर्कटः 'एतस्मादेव' इति हरितवर्णत्वाद्धरिरुच्यते । 'शिरीषकुसुमप्रख्याः केचित्पिङ्गलकप्रभाः । वानरा' इति श्रूयन्ते रामायणे ।

'विषुणस्य' (४५) इत्येतदनवगतम् । 'विषमस्य' इत्यवगमः ।

'न यातव इन्द्र जूजुवुर्नो न वन्दना शविष्ठ वेद्याभिः । स शर्धदर्यो विषुणस्य जन्तोर्मा शिश्नदेवा अपि गुर्ऋतं नः' इति [ऋ० सं०७।२१।५] ॥ वसिष्ठस्येयमार्षम् । त्रिष्टुप् । उन्नीयमानसूक्ते माध्यंदिने सवने शस्यते [आश्व० श्रौ० ५।५] । हे भगवन्निन्द्र तथा कुरु यथा

विषुणस्येत्यस्य प्रयोगोऽर्थश्च

नैनमस्मद्यज्ञं यातवो यातयितारो यज्ञविघ्नकर्तारः केचिदपि जूजुवुः । आगच्छेयुरित्यर्थः । किंच । हे शविष्ठ बलिष्ठ य एते वन्दनाः वन्दितारः लाडगौडादयो जानपदीभिर्वेद्याभिः वेदितव्याभि-

---

१ ग. ज. 'अङ्गुलीभिः' नास्ति; च. °क्ष्याभिर ङ्गुलीभिरेव° ङ्गुलीभिः । अ. २ ट. खरे° स्थण्डिले; ठ. ड. स्थण्डिले. ३ क. ख. घ. झ. ठ. ड. °जनदेशं प्रति सामा°; ट. °जनदेशं प्रति सामा° प्रदे. ४ क. ख. घ. झ. ट. ठ. ड. °पममुप°. ५ घ. ठ. कठिणत्वात्; ट. कठिणत्वात्° न. ६ क. ख. घ. झ. ट. ठ. ड. आसिञ्चत; च. आसिञ्च ह° त. ७ ग. च. ज. °प्रभा इति वानराः स्तूयन्ते रामा° (च. स्तूय° श्रू). ८ घ. ट. श्रूयन्ते० रामायणे; ठ. ड. श्रूयन्ते इति रामायणे. ९ ग. °गमः । ४७ । न या°. १० ग. ज. °वुर्न इति । वासि; °व. ट. जूजुवु० ऋतं नः. ११ क. ख. घ. झ. ट. ठ. ड. नेममस्म°; च. नैनमस्म° नेम.

राकृतिभिर्युक्ताः किं ब्राह्मणा एते स्युरुतान्यजातीयाः केचिदिति । अथवा वेदितव्याभिः प्रवृत्तिभिर्युक्ताः । न हि तासां प्रवृत्तीनामन्तोऽस्ति याभिस्ते प्रवर्तन्ते चपलत्वात् । किंच । येऽपि चैते श्रोत्रिया अपि सन्तः शिश्नदेवाः शिश्नेन नित्यमेव प्रकीर्णाभिः स्त्रीभिः साकं क्रीडन्त आसते श्रौतानि कर्माण्युत्सृज्य तेऽपि युष्मदनुग्रहादिदमस्माकम् ऋतं यज्ञं मा अपिगुः मा आगच्छन्तु । नास्माकं तैरपि यज्ञमभिगच्छद्भिरर्थोऽस्तीत्यभिप्रायः । आह । कीदृशास्तर्हि तं[1] यज्ञमागच्छन्त्विति । उच्यते । स शर्धत् स एवोत्सहतामिममस्मद्यज्ञमागन्तुं य एव अर्यः ईश्वर आत्मीयानामिन्द्रियाणाम् । जितेन्द्रिय इत्यर्थः । यश्च विषुणस्य विषमस्य यज्ञविध्वंसयितुः जन्तोः मनुष्यस्य निग्रहाय समर्थः । येन परिपाल्यमाना एतं यज्ञमविघ्नेन समापयेमहीत्यभिप्रायः । एवमेतस्मिन्मन्त्रे 'यातवो वन्दनाः शिश्नदेवाश्च मा आगच्छन्तु' इति प्रतिषेधेष्वेतेष्व[2]निष्टत्वादेतेषां 'स शर्धदर्यः' इति श्रूयमाणमर्यवृत्तमनुष्याभ्यागमनविषयमेतद्भवति तस्येष्टत्वात् । स चाभ्यागतः सन्नवश्यं विषुणस्य विषमस्य मनुष्यस्य निग्रहं करोति । तस्मात् 'विषुण'शब्दो विषमस्येत्युपपद्यते । यदा

ऋतशब्दस्य सत्यार्थे 'अपिगुः' इत्यत्र गमिर्ज्ञानार्थः

तु ऋतशब्दस्य 'सत्यं वा' इत्येतदर्थवचनं भवति तदाऽस्माकमर्थसतत्त्व[3]मेवंलक्षणाः पापकर्माणो मा विर्दुरि[4]त्येवं योज्यम् । अपिगुरिति चैष गमिस्तदा ज्ञानार्थः । एवमप्युपपद्यत इत्यतो भाष्यकारेणोक्तं 'सत्यं वा यज्ञं वा' इति[5] ।

'जामिः' (४६) इत्येतदनेकार्थम् । 'भगिनी बालिशः पुनरुक्तं' चास्याभिधेयानि । प्रकरणादेवैतेषामन्यतम[6]स्मिन्नवतिष्ठते । यथा तावद्[7]नेन भागिन्युच्यते तथेदमुदाहरणम्[8] ॥ १९ ॥

---

१ क. ख. घ. झ. ट. ठ. ड. 'तं' नास्ति; च. तं. २ क. ख. घ. झ. ट. ठ. ड. प्रतिषिद्धेष्वेतेष्व°; ग. प्रतिनिषिद्धेष्वेतेष्व°; ज. °च्छान्त्वाति निषिद्धेष्वेतेष्व°; च. प्रतिनिषधष्वनि° षिद्धेष्वेते. ३ क. ख. घ. झ. ठ. ड. °स्माकमृतं सत्यमेवंल°; च. °स्माकमर्थसतत्त्वमे° मृतं सत्य. ४ क. ख. घ. झ. ट. ठ. ड. मा अपि गुरि°. ५ ठ. ड. इति १९ इति निरुक्तटीकायां चतुर्थाध्याये एकोनविंशतिः खण्डः । जामि°. ६ क. ख. °तममास्मि; च. °तम°स्मि° म. ७ क. ख. घ. झ. ट. ठ. ड. यथानेन तावज्जागि°. ८ क. ख. १ (१९); ग. २० । ४८; इतरेष्वङ्को नास्ति.

आ घा ता गच्छानुत्तरा युगानि यत्र जामयः कृणवन्नजामि । उप बर्बृहि वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मत् (ऋ० सं० १० । १० । १०] ॥ आगमिष्यन्ति तान्युत्तराणि युगानि यत्र जामयः करिष्यन्त्यजामिकर्माणि जाम्यतिरेकनाम बालिशस्य वासमानजातीयस्य वोपजन उपधेहि[1] वृषभाय बाहुमन्यमिच्छस्व सुभगे पतिं मदिति व्याख्यातम् ॥ २० ॥

आ घा ता[2] गच्छानुत्तरा युगानीति । यमी किल यमं प्रार्थयांचकारेहि मैथुनाय संगच्छावहा इति । तामकामयमानोऽसावनयर्चा प्रत्युवाच । आ घा ता गच्छान् । 'घा' इत्यनर्थक एव । आगच्छान् आगमिष्यन्तीत्यर्थः । आह । कानि । उच्यते । तान्युत्तराणि युगानि । आगमिष्यन्ति तेऽपि कालाः । न तावत्सांप्रतं वर्तन्ते[3] इत्यभिप्रायः । येषु किम् । येषु जामयो भगिन्यो भ्रातॄणाम् अजामियोग्यानि मैथुनसंबन्धानि कर्माणि करिष्यन्ति । कलियुगान्ते हि तादृशः संकरो भवति । न चेदं कलियुगं वर्तत इत्यभिप्रायः । यतो न तावदद्यापि संकीर्णो वर्णसंकरधर्मः स्वाचारा एव तावत्प्रजा अतो ब्रवीमि । उपबर्बृहि उपधेहि । कस्मै । वृषभाय यैस्[4]तवोपरि रेतः सेक्तुमन्यकुलजो योग्यस्तस्मै । किमुपबर्बृहीति । बाहुं शयनीये । सर्वथा प्रार्थ्यमानोऽप्यहं तव पतिर्न भविष्यामीति[5] । यतो ब्रवीमि । अन्यमिच्छस्व अन्यमन्वेषयस्व हे सुभगे पतिं मत् । मत्त इत्यर्थः । एवमेतस्मिन्मन्त्रे सूक्ते वा संवादाधिकाराज्जामिशब्देन भगिन्युच्यते इत्युपपद्यते ।

'जामि' इत्येतदेव स्वरान्तशब्दरूपम् 'अतिरेकनाम' भवति । पुनरुक्तनामेत्यर्थः । तदुत्तरत्र लक्षणतो वक्ष्यति ।

जामिशब्दस्यार्थाः 'तद्यत्समान्या[6]मृचि समाना[7]भिव्याहारं भवति तज्जामि भवति' (निरु० १० । १६) इति ।

पुनरुक्ताभिधान[8]त्वे जामिशब्दस्य पर्येष्यो निगमः । 'बालिशस्य वा' ।

---

१ क. ख. ४ (२०); छ. त. २१; द. ५. २ क. ख. ता० मत् । इतीयं यमी°; घ. ट. ता गच्छा० पतिं मत् । इतीयं यमी°; ठ. ड. ता गच्छेति । इतीयं यमी । ऋषिका यमं°. ३ ग. च. ज. वर्तते. ४ क. ख. घ. झ. ट. 'यः' नास्ति. ५ क. ख. घ. झ. ट. भविष्यति. ६ च. °द्यत्सामान्या°. ७ ग. च. ज. समना°. ८ क. ख. घ. झ. ट. °नत्वेन जा°

बालिशस्यैतदेव नाम । बालिशो मूर्खः । स हि बाल इव शेते प्रमादित्वाद्धर्मकार्येषु । एतस्यापि पर्येष्यो निगमः । असमानजातीयो हि पुरुषस्य भगिन्याख्यो भ्राता । सा हि स्त्रीत्वादेवातुल्यजातीयैव पुरुषस्य भवति । जामिरित्येतस्मिञ्शब्दे 'मिः' इत्येष 'उपजनः'। यदेवोक्तं भवति 'जा' इति तदेव जामीति । उभयथापि मन्त्रेषु[1] प्रयोगो द्रष्टव्यः । अन्यमिच्छस्व सुभगे पतिं मदिति व्याख्यातम् । निगदसिद्धमेवैतदित्यर्थः । अथवैतानि पदान्यधस्तात्तत्र तत्र व्याख्यातानि । तद्यथा । 'अन्यो नानेयः' [नि० १ । ६] इत्येवमाद्युपेक्षितव्यम् ।

'पिता' इत्यनवगतम् । 'पाता वा पालयिता वा' इत्यवगमः । २०[3] ।

द्यौर्मे पिता जनिता नाभिरत्र बन्धुर्मे माता पृथिवी महीयम् । उत्तानयोश्चम्वो[4] र्योनिरन्तरत्रा पिता दुहितुर्गर्भमाधात् (ऋ० सं १ । १६४ । ३३) ॥ द्यौर्मे पिता पाता वा पालयिता वा जनयिता नाभिरत्र बन्धुर्मे माता पृथिवी महतीयं बन्धुः संबन्धनान्नाभिः संनहनान्नाभ्या संनद्धा गर्भा जायन्त इत्याहुरेतस्मादेव ज्ञातीन् सनाभय इत्याचक्षते संबन्धव इति च ज्ञातिः संज्ञानात् । उत्तानयोश्चम्वो[4] र्योनिरन्तः । उत्तान उत्ततान ऊर्ध्वतानो वा तत्र पिता दुहितुर्गर्भं दधाति पर्जन्यः पृथिव्याः शंयुः सुखंयुः[5] । अथा नः शंयोररपो दधात (ऋ० सं० १० । १५ । ४) । रपो रिप्रमिति पापनामनी भवतः शमनं च रोगाणां यावनं च भयानामथापि शंयुर्बार्हस्पत्य उच्यते । तच्छंयोरावृणीमहे गातुं यज्ञाय गातुं यज्ञपतय इत्यपि निगमो भवति । गमनं यज्ञाय गमनं यज्ञपतये ॥ २१[6] ॥

ईति[7] चतुर्थाध्यायस्य तृतीयः पादः ॥

द्यौर्मे पितेति[8] । अस्यवामीये दीर्घतमस आर्षम् । तृतीयसवने[9] वैश्वदेवे

---

१ क. ख. घ. झ. ट. ठ. ड. मन्त्रे; च. मन्त्रेषु. २ च. निगमप्रसिद्ध° द. ३ क. ख. ४ (२०); ग. २१ ४१; इतरेष्वङ्को नास्ति. ४ ठ. ड. २. ५ क. ख. छ. त. द. सुखंयुः. ६ क. ख. ५ (२१); छ. त. २२; द. ६. ७ ङ. थ. ध. 'इति० पादः' नास्ति; छ. इति तृती°; त. चतुर्थाध्याये तृती°; द. इति नैरुक्तस्य चतु°.
 ८ क. ख. घ. झ. ट. °पितेतीयमस्यवा°. ९ च. °तीये स°.

शस्यते [ऐ० आ० ५ । ३ । २] । द्यौर्मे पिता । येयं द्यौरुपरिस्थितलोकाख्या एषैव मम पिता । 'द्यौरहम्' [आश्व० गृ० १ । ७ । ६] इत्येवं वैवाहिके कर्मणि द्युलोकभावेन पित्रात्मानमभिसंपाद्यमानं दृष्ट्वैवमाह मन्त्रदृक् 'द्यौर्मे पिता' इति । जनिता जनयिता । उत्पादयितेत्यर्थः । आह । कथम् । उच्यते । नाभिरत्र । नहनमेव नाभिः । अत्र एतस्मिन् द्युलक्षणे पितर्युदकदानेनानुग्रहीतरि सति संतानोत्पत्त्यनुग्रहक्रमेणैव शुक्रात्मनोत्पत्तिरुपपद्यत इत्येवमभिसमीक्ष्योक्तं 'द्यौर्मे पिता जनिता नाभिरत्र' इति । बन्धुर्मे । अङ्गसंबन्धकारणाद्बन्धुः । मे माता पृथिवी मही । 'पृथिवी त्वम्' [आश्व० गृ० १ । ७ । ६] इति मातुर्मन्त्रेण पृथिवीत्वं संपाद्यमानं दृष्ट्वैवमाह 'बन्धुर्मे माता पृथिवी महीयम्' इति । उदकं हि द्युलोकात्पतितं पार्थिवेन धातुना संपृक्तमोषधिभावमागम्य शरीरभावेनावतिष्ठत इत्येतदपेक्ष्य सर्वभूतानां द्यावापृथिव्यौ मातापितरावुच्येते तत्र तत्र । तद्यथा । 'यदन्तरा पितरं मातरं च' [ऋ० सं० १० । ८८ । १५] । इत्येवमादि । तत्कृतस्य ह्युपकारस्याभावे सतीतरौ मातापितरावकिंचित्करावेव भवतः । तस्माद्युपपद्यते द्यावापृथिव्योर्मातापितृभावः । आह । किमेते द्यावापृथिव्यावन्यत्किंचिदनपेक्ष्यैव सर्वभूतानां मातापितृभावं बिभृत उतान्यदपि किंचिदपेक्षेते इति । उच्यते । अनयोः चम्वोः द्यावापृथिव्योः उत्तानयोः । ऊर्ध्वमेव ह्यनयोरन्तरा च प्रविधारणीयः 'अन्तः' प्राणस्तत इत्युत्ताने द्यावापृथिव्यौ । 'प्राणेन हीमे वायुना सूत्रभूतेन विधृते तिष्ठतः' । एतयोर्द्यावापृथिव्योरुत्तानयोर्य एषोऽन्तरिक्षाख्योऽन्तर्मध्ये योनिरत्रैतस्मिन्नवकाशदानोपकारत्वे प्रवृत्ते सति पिता पर्जन्यो द्युलोकाख्यः ।

'पिता' इत्यस्य निगमः

द्यावापृथिव्योर्मातापितृभावस्योपपत्तिः

अयं मातापितृभावोऽन्तरिक्षायत्तः

१ क. ख. घ. झ. ट. ठ. ड. स्थिता द्युलोका°; च. स्थितलो° ता द्यु. २ ग. च. ज. °संपद्य°. ३ क. ख. घ. झ. ट. ठ. ड. द्युलोकलक्ष°; च. द्यु॰लक्ष° लोक. ४ क. ख. घ. झ. ट. ठ. ड. °महीयमिति मातु°; च. °मही पृथिवी त्वं° य. ५ च. इति॰ तद° ए. ६ च. °दपक्ष्येते. ७ च. °नयोश्च॰द्यावा° म्वोः. ८ क. ख. घ. ट. ठ. ड. ह्यनयो°; च. ह्यनयो° ह्ये. ९ क. ख. घ. ट. ठ. ड. प्रतिधा°. १० च. °णीयोः अन्तः. ११ क. ख. ग. ज. °पकारम°; च. °पकारत्वे प्र°.

द्यौरेव हि रसान् प्रार्जयति तस्मात्सैवात्र पर्जन्यशब्देन भाष्यकारेणोक्ता ॥ दुहितुः पृथिव्या उपरि गर्भं सर्वभूतगर्भोत्पत्तिहेतुभूतोदकम् आधात् आदधाति । ददातीत्यर्थः । अत्र पृथिव्येव दुहितृशब्देनोक्ता । सा हि द्युलोकाद्दूरे निहिता । दोग्धेर्वा । सा हि दोग्धि द्युलोकमिति[1] दुहिता । सा हि द्युलोकात्पतितमुदकमुपजीवत्येव । द्यावापृथिवीभ्यामन्तरिक्षेण चावकाशदानेनानुगृह्यमाणान्येतान्यस्मदादीनि भूतान्युत्पद्यन्त इत्येतदनेन[2] मन्त्रेण मन्त्रदृशा ख्यापितम् । अत्र मातृसंबन्धात्पितृशब्दः[3] पितर्येवेत्युपपत्तिः । पिता माता चायम् । एतदाशासनं मन्येते[4] ।

अस्मिन्मन्त्रे शंयोरित्यस्य पञ्चम्यर्थे षष्ठ्यर्थे वा न काप्युपपत्तिः

'शंयोः' [४८] इत्यनवगतं[5] पञ्चम्यन्तं वा[6] षष्ठ्यन्तं वा सत्[7] । न चैवं यजमानोऽर्थात्तस्माद्बृहस्पतिपुत्रादर्थमपेक्षते[8] ममैते पितरः किंचिदर्थं विदध्युरिति[9] । किं कारणम् । स्वत एव हि ते विधातुं समर्थाः । न च बृहस्पतिपुत्रस्य शंयोः[11] किंचिदेभिः पितृभिर्विधीयेतेति[10] । एवं पञ्चम्यर्थासंभवं षष्ठ्यर्थासंभवं[12] च पश्यन् भाष्यकारः शंयोरित्येकं पदं द्वितीयान्ते द्वे पदे चकार शमिति योरिति च । शमित्यस्य 'शमनम्'

---

१ क. ख. घ. झ. ट. ठ. ड. द्युलोकं दोग्धीति. २ क. ख. ग. ज. घ. ट. ठ. ड. एवं द्यावा° ३ क. ख. घ. झ. ट. मातृपितृसंब°. ४ ग. ज. मन्येत । पञ्च°; च. मन्येते । पञ्च° त. । शंयोरित्यनवगतं; ठ. ड. मन्येत । अथा नः शंयोरपो दधातेति । शंयोः. ५ ठ. ड. °गतं बर्हिषदः पितर इति सर्वा ऋक् पठ्यते तदनन्तरं शंयोरिति पञ्च°. ६ घ. झ. ट. ठ. ड. 'वा' नास्ति. ७ घ. ट. ठ. ड. सन्; च. सन्° त. ८ च. यजमानेनार्थ्ये (र्थ्यं ?) नाप्येतस्माद् बृहस्पतिपुत्रकस्य शंयोर्ममैते पितरः किंचिदर्थं विदध्युरिति किं कारणं । स्वत एव हि ते विधातुं समर्थाः । षष्ठ्यर्थमर्थी तस्य किंचिदेभिः पितृभिर्विधीयेतेति (ट. सदृशपुस्तकानुरोधेनायं पाठः परिवर्तितः). ९ ग. ज. °स्पतिपुत्रीकयोर्ममैते पितरः किंचिदर्थं विदध्युरिति किं कारणे । स्वत एव हि ते विधातुं समर्थास्ताप्यमर्थी तस्य किंचिदेभिः पितृभिर्विधीयेतेति. १० क. ख. घ. झ. ट. ठ. ड. ' ममैते.............दध्युरिति ' नास्ति. ११ क. ख. घ. झ. ट ठ. ड. शंयोर्मम पितरः किंचि°. १२ ग. ज. 'षष्ठ्यर्थासंभवं' नास्ति.

तस्मात् 'शं योः' इति द्वे पदे

इत्यर्थं निराह यास्कोऽस्य 'यावनम्' इति । एवं द्वितीयान्तेन विपरिणामं कृत्वार्थं निराह तथाहि वाक्येन संबध्यत इति । कस्य शमनं कस्य वा यावनमिति पुनः पर्यनुयोगे प्राप्ते 'रोगाणां भयानां च' इत्यध्याजहार भाष्यकारः । रोगशमनं च दधात भययावनं च । शान्तरोगाश्च यथा स्याम प्रहीणसर्वभयाश्च तथा कुरुतेत्यभिप्रायः । किमेतावदेव । नेत्युच्यते । यदपि चान्यत्किंचित् अरपः अपापं तदपि चास्मभ्यमेव दधात । दत्तेत्यर्थः । एवमेतत्पदमेकमर्थासंभवाद्द्विधा प्रविभज्य भाष्यकारेण निरुक्तमियमप्यर्थासंभवे सति निर्वचनप्राप्तिरस्तीत्यर्थस्य ख्यापनाय । ब्राह्मणेऽपि चेयं निर्वचनप्राप्तिरस्त्येव । तद्यथोद्गीथशब्दे । 'प्राण एवोत्प्राणेन ह्युत्तिष्ठति वाग्गीर्वाचो ह गिर इत्याचक्षतेऽन्नं थमन्ने हीदꣳ सर्वं स्थितम्' [छा० उ० १ । ३ । ६] इत्येवमादि । तस्मादुपपद्यते प्रथमान्तमेवं सत् । कस्माद्द्वितीयान्तत्वेन विपरिणम्यते शं युमित्येवमिति । न निरुच्यते । तथापि हि न कश्चिदर्थ उपपद्यते तस्मादयुक्तमिति । 'रपो रिप्रम्' इत्यत्र रिप्रशब्दस्य रपःशब्देनार्थसामान्यात्तत्त्वमुक्तम् । 'यदेवास्य रिप्रममेध्यं तच्छुध्यति' इति ह विज्ञायते ।

'अथापि शंयुर्बार्हस्पत्य उच्यते' । अपि शं योरित्यनेन पदद्वयेन शमनयावने रोगभययोरुच्येते द्वेधा प्रविभक्तेन । अपि यथावस्थितेनैवाविभक्तेन बार्हस्पत्यो बृहस्पतेः पुत्र उच्यते ।

बार्हस्पत्यार्थे एकं पदम्

तस्याप्येतदेव नामेत्यपिशब्दः । 'तच्छंयोरावृणीमहे गातुं यज्ञाय' [तै० ब्रा० ३ । ५ । ११ ॥ मैत्रा० सं० ४ । १३ । १०] ॥ इति । इयं शक्करी । शंयोरेव बृहस्पतिपुत्रस्यार्षम् । शंयोर्वाके विनि-

---

१ क. ख. घ. झ. ट. ठ. ड. 'इति' नास्ति; च. शमनामित्यं° म. २ च. 'योरित्यस्य यावनमिति । एवं०० कृत्वार्थं निराह' नास्ति. ३ ग. च. रोगानां. ४ च. 'एतावदे.........त्यर्थः । एवं' नास्ति. ५ च. इति चक्षते अन्ने हीदं°ऽन्ने धं. ६ क. ख. घ. झ. ट. ठ. ड. °मेव सत. ७ ग. ज. °णम्य शं°; च. °णम्य शं° ते. ८ क. ख. घ. झ. ट. ठ. ड. °शयुमिति । एवमपि न विरुध्यते तथा°; च. °शंयुमिति । एवमिति न निरुच्यते° मपि न विरुध्य. ९ ग. °शब्दः । ५० । तच्छं°. १० घ. ट. ठ. ड. शंयुवाके; झ. शंयुवाक्ये.

युक्ता। शंयोरात्मानमभिसंपाद्याथवा शंयोः सकाशादिति केचिन्मन्यन्ते। अनेन कर्मणा शंयोर्वाकाख्येन तत्तदाभिमुख्येन वृणीमहे। किं पुनस्तत्। गातुं यज्ञाय। गमनमस्मै यज्ञाय देवान्प्रति। गमनं चास्मै यज्ञपतये देवान्प्रति। किंच। दैवी स्वस्तिरस्तु नः। देवानुप्रहादस्माकं स्वस्तिरस्तु। मा नो देवाः कांचिदापदमुत्पादयन्त्वित्यभिप्रायः। स्वस्तिर्मानुषेभ्यः। मनुष्येभ्योऽपि सकाशान्मा नः काचिदापदस्तु। ऊर्ध्वं जिगातु भेषजम्। गच्छत्वेतद्भेषजं भयसादयितृ कर्म। यावज्जीवमनवच्छिन्नमविगुणं चोर्ध्वगमनयोग्यमस्माकमस्त्वित्यभिप्रायः। किंच। शं नो अस्तु। शं सुखं नोऽस्माकं द्विपदे मनुष्यादिकाय चतुष्पदे गवादिकाय च। शंयुर्बृहस्पतिपुत्र इति नास्मिन्मन्त्रे विशेषलिङ्गमस्ति। तदन्यस्माच्छ्रुतिलिङ्गात्कुतश्चिदुपलभ्यमाख्यानाद्वा। एतावदेव त्वेतस्मान्मन्त्रात्सिद्धमेकमेवेदं पदमविभक्तं निरुच्यते पञ्चम्यन्तं वा षष्ठ्यन्तं वा न यथा पूर्वस्मिन्मन्त्रेऽर्थासंभवाच्छंयुशब्दो विभक्त इति ॥२१॥

अस्मिन्मन्त्रे शंयुर्बृहस्पतिपुत्र इति विशेषलिङ्गं नास्ति। तथापि शंयुरित्यत्रैकं पदम्

इति नवमस्याध्यायस्य तृतीयः पादः।

चतुर्थः पादः।

अदितिरदीना देवमाता ॥ २२ ॥

'अदितिः' (४९) इत्यनवगतम्। 'अदीना' इत्यवगमः। 'देवमाता' अभिधेयैतिहासिकपक्षेण। नैरुक्तपक्षेण पुनर्यान्येतस्यामृचि वक्ष्यमाणायां द्यौरित्येवमादीनि श्रूयन्त एतान्येवादितिशब्देनोच्यन्ते ॥२२॥

---

१ ग. ज. मातः का°. २ च. °पदमास्तु. ३ क. ख. घ. झ ट. ठ. ड. °इति एतस्मिन्; च. °इति नास्मिन्° एत. ४ क. ख. घ. झ. ट. °न्मन्त्रार्था°. ५ क. ख. ६ (२१); ग. २२।२१; ठ. ड. विभक्त इति इति निरुक्तटीकायां चतुर्थाध्याये एकविंशतिः खण्डः इति नवमा°; इतरेष्वङ्को नास्ति. ६ घ. झ. ट. 'इति' नास्ति. ७ क. ख. १ (२२); छ. त. २३; द. १. ८ ठ. ड. अदितिरदीना देवमातेति अदिति°. ९ क. ख. घ. झ. ट. ठ. ड. °दीति पदानि श्रू°. १० क. ख. १ (२२); ग. २३। ५१; ठ ड. इति निरुक्त (ठ. नैरुक्त) टीकायां चतुर्थाध्याये द्वाविंशतिः खण्डः; इतरेष्वङ्को नास्ति.

अदि॑ति॒र्द्यौरदि॑ति॒रन्तरि॑क्ष॒मदि॑तिर्मा॒ता स पि॒ता स पु॒त्रः । विश्वे॑ दे॒वा अदि॑तिः॒ पञ्च॒ जना॒ अदि॑तिर्जा॒तमदि॑ति॒र्जनि॑त्वम् [ऋ० सं० १ । ८९ । १०] ॥ इत्यदितेर्विभूतिमाचष्ट एनान्यदीनानीति वा । यमेरिरे भृगवः । एरिर इतीर्तिरुपसृष्टोऽभ्यस्तः ॥ २३ ॥

अदितिर्द्यौरदितिरन्तरिक्षमिति । राहूगणस्य गोतमस्येयमार्षम् । तृतीयसवने सर्वस्तोमेष्वेव वैश्वदेवशस्त्रस्य परिधानीयेषा [आश्व० श्रौ० ५ । १८] । अदितिरेव देवमाता द्यौः । अदितिरेव चान्तरिक्षम् । अदितिरेव माता सर्वभूतनिर्मात्री । स एव च पिता पालकः । स एव च पुत्रः । सैव हि परितुष्टा सती स्तोतारं पुरुणो बहुनः पापात्त्रायते । अथवा सैव निपृणाति सर्वभूतानां यन्निपर्तव्यम् । दातव्यमित्यर्थः । येऽपि चैते विश्वे देवाः सर्वे देवा एतेऽप्यदितिरेव । पञ्च जनाः गन्धर्वादयः अदितिरेव । सर्वथापि किं बहुना यावदेतत्किंचिज्जातं च जनित्वं च जनिष्यमाणं च सर्वमप्येतददितिः । एवमनेन मन्त्रेण मन्त्रदृग् 'अदितेर्विभूतिमाचष्टे'। देवमातुस्तदेतत्सर्वमप्युपपद्यत एव माहाभाग्याद्देवतायाः । तदुत्तरत्र वक्ष्यामः [निरु० ७ । ५] । एवमैतिहासिकपक्षेण । नैरुक्तपक्षेण पुनः 'एतानि' द्युलोकादीनि सर्वाणि 'अदीनानि' अनुपक्षीणानीति योज्यं न ह्येषां क्षयोऽस्तीति ।

(अदितिर्द्यौरित्यस्या ऋच ऐतिहासिकपक्षेणार्थः)

(तस्या एव नैरुक्तपक्षेणार्थः)

'एरिरे' (५०) इत्यनवगतम् । 'आ ईरिरे' इत्यवगमः । 'यमेरिरे भृगवो विश्ववेदसं नाभा पृथिव्या भुवनस्य मज्मना । अग्निं तं

---

१ क. ख. २ (२३); छ. त. २४; द. २. २ क. ख. घ. झ. ट. °द्यौरदिति० जनित्वं । राहू°; ठ. ड. °द्यौरिति । राहू°. ३ ठ. ड. राहुगण°. ४ ग. च. ज. सर्वसोमे°. ५ क. ख. घ. झ. ट. °देवस्य श°. ६ ग. ज. 'स एव च पिता पालकः' नास्ति; च. °निर्मात्री । स एव च पुत्रः° स एव च पिता पालकः. ७ च. सैदे (सै) व हि पुं (परितु) ष्टा°. ८ क. ख. यन्निवर्तव्यं; ग. यन्निपर्वर्तव्यं; घ. ट. ठ. ड. च. निवर्तव्यं. ९ क. ख. घ. झ. ट. ठ. ड. °दितिरेव । एव°; च. °दितिरेवमने° वेव. १० क. ख. घ. झ. ट. ठ. ड. 'एतत्' नास्ति; च. तदेतत्स°. ११ ग. °गमः । ५२ । यमे°. १२ ग. ज. भृगवो विश्ववेदसमिति । दीर्घ°; घ. ट. भृगवो० न राजति.

गीर्भिर्हिनुहि स्व आ दमे य एको वस्वो वरुणो न राजति '[ऋ० सं० १ । १४३ । ४] ॥ दीर्घतमस इयमार्षम् । जगती । प्रातरनुवाकाश्विनयोः [आश्व० श्रौ० ४ । १३] आग्निमारुते च शस्यते [आश्व० श्रौ० ५ । २०] । यमग्निमाभिमुख्येन ईरितवन्तः

ईरिरे इत्यस्य निगमोऽर्थश्च

प्रेरितवन्त आत्माभिप्रेतार्थसिद्धये भृगवः विश्ववेदसं सर्ववेदसं सर्वस्य वेत्तारं सर्वधनं वा । क्व पुनरेरिरे । नाभा पृथिव्याः । नाभाववस्थितमुत्तरवेदिमध्यगतायाम् । पृथिव्यां वेद्या उपरि । केन पुनरेरिरे । भुवनस्य उदकस्य मज्मना मननीयेन वीर्येणान्नेन हविर्लक्षणेन । किं तस्य । तमग्निं हे यजमान त्वमपि गीर्भिर्वाग्भिः स्तुतिलक्षणाभिराभिमुख्येन स्थित्वा हिनुहि प्रेरय तस्मिंस्तस्मिन्कर्मणि वर्तमानम् । अग्निहोत्रादौ यथा भृगव ईरितवन्तस्तथा स्वे दमे स्व एव गृहे । मा कस्यचिदार्त्विज्येऽवस्थित इत्यभिप्रायः । किंलक्षणं पुनरग्निमाहिनुहि । य एको वस्वः । एक एव यो वसुनो धनस्य दाता वरुणो न वरुण इव । यथा वरुणः समुद्रान्तर्गतानां धनानामीष्ट एवं यः सर्वस्यैव धनस्य राजति । ईष्ट इत्यर्थः । राजतिरैश्वर्यकर्मसु पठितः ' क्षियति राजति ' [निघ० २ । २१]इति । ' एरिर इतीर्तिः ' अयं धातुर्गतिकर्मा । ' ईर्ते त्रयति ' इति हि गतिकर्मसु पठितम् [निघ० २ । १४] । स पुनरयमाङोपसर्गेण ' उपसृष्टोऽभ्यस्तः ' । पुनः पुनरीरितवन्त इत्यर्थः । ' जसुरिः ' (९१) इत्यनवगतम् । ' जस्तम् ' इत्यवगमः ॥२३॥

उत स्मैनं वस्त्रमथिं न तायुमनुक्रोशन्ति क्षितयो भरेषु । नीचायमानं जसुरिं न श्येनं श्रवश्चाच्छा पशुमच्च यूथम् (ऋ० सं० ४ । ३८ । ५) ॥ अपि स्मैनं वस्त्रमथिमिव वस्त्रमाथिनं वस्त्रं वस्तेस्तायुरिति स्तेननाम संस्त्यानमस्मिन्पापकमिति नैरुक्तास्तस्यतेर्वा स्यादनुक्रोशन्ति क्षितयः संग्रामेषु भर इति संग्रामनाम भरतेर्वा हरतेर्वा नीचायमानं नीचैरयमानं नीचैर्निचितं भवत्युच्चैरु-

---

१ क. ख. व. झ. ट. ठ. ड. °वन्तः । स्थापितवन्त इति यावत् । आत्मा°; च. °वन्त ˇ आत्मा °स्थापितवन्त इति यावत्. २ ग. ज. पृथिव्यां. ३ क. ख. व. झ. ट. ठ. ड. °भ्यस्तश्च; च. भ्यस्तः ˇ । पु° च. ४ क. ख. °त्यर्थः । २ (२३); ठ. ड. °त्यर्थः । इति निरुक्तटीकायां चतुर्थाध्याये त्रयोविंशतिः खण्डः । २३ । उत स्मैन°; ग. वर्जमितरेष्वत्रैव खण्डसमाप्तिः. ५ ग. २४/५३; इतरेष्वङ्को नास्ति.

चितं भवति जस्तमिव श्येनं श्येनः शंसनीयं गच्छति । अव-श्वाच्छा पशुमच्च यूथम् । अवश्वापि पशुमच्च यूथं प्रशंसां च यूथं च धनं च यूथं चेति वा यूथं यौतेः समायुतं भवति । इन्धान एनं जरते स्वाधीः । गृणाति । मन्दी मदन्तेः स्तुतिकर्मणः । प्र मन्दिने पितुमदर्चता वचः । प्रार्चत मन्दिने पितुमद्वचो गौर्व्या-ख्यातः ॥ २४ ॥

उत स्मैनं[2] वस्त्रमथिमिति निगमः । वामदेवस्येयं[3]मार्षम् । त्रिष्टुप् । दधिक्राव्णे सूक्ते । दधिक्रावा चेन्द्र एव वायुर्वा मध्यस्थानत्वात् । उत स्मैनम् अप्येनमिन्द्रम् अनुक्रोशन्ति आभिमुख्येन क्रन्दन्ति आह्वयन्ति क्षितयो मनुष्याः । क्व । भरेषु संग्रामेषु । कथं पुनरभिक्रन्दन्ति । वस्त्र[4]मथिनं वस्त्रापहर्तारमिव तायुम् । यथा केचिज्जनाः कंचिद्वस्त्रापहर्तारं तायुं दृष्ट्वा कंचिदन्यमात्मनस्त्राणार्थमभिक्रन्देयुरेवमेतमिन्द्रमभिक्रन्दन्ति संग्रामेषु परैर-भ्यर्द्यमाना आत्मनस्त्राणार्थमात्मनः । किंच । अपि चैनं[5] नीचायमानं नीचैर्गच्छन्तं जसुरिं न जसुरिमिव श्येनं जस्तमिव बद्धं स्नायुतन्तुना । य एष पा[6]शिक इति प्रसिद्धो र[7]ाज्ञाम् । स हि बद्धत्वादुत्पतितुमत्यर्थं न शक्नोति नीचैरेव गच्छति गत्वा च शशकादीनि हिनस्ति सत्त्वानि । स यथा जनैरभिक्रन्द्यते तथा चैनमभिक्रन्दन्ति । आह । कमर्थमभिसं[8]धायेति । उच्यते । श्रवश्चाभिसंधाय । कथं नाम श्रूयेमहि प्रशस्येमहि जितमेभि[9]रित्येवमर्थमभिसंधाय । पशुमच्च यूथम् । अनेकपशुजातिसंयुक्तं पशुयूथमभिसंधायैतदस्माकं स्यादित्येवमभि-क्रन्दन्तीत्येष समस्तार्थः ।

जसुरिरित्यस्य

अथैकपदनिरुक्तम् । ‘ वस्त्रं वस्तेः ’ आच्छादनार्थस्य [धा० २ । १३] । तद्ध्याच्छाद्यते । ‘ तायुरिति ’ एतत् ‘ स्तेननाम ’ । ‘ संस्त्यानं ’

---

१ क. ख. ३ [२४]; छ. त. २५; द. ३. २ घ. ट. स्मैनमिति निग°; ठ. ड. स्मैनमिति । वामदे°. ३ क. ख. घ. झ. ट ठ. ड. ‘इयं’ नास्ति. ४ क. ख. घ. ट. ठ. ड. वस्त्रमथिं न वस्त्र°; ग. ज. वस्त्रमथिं न वस्त्राप°; च. °न्दन्ति । वस्त्र° वस्त्रमथिं न. ५ क. ख. घ. ट. ठ. ड. चैनं तायुं नीचा°; च. चैनं नीचा° तायुं. ६ क ख. ग. ज. घ. झ. ट. ठ. ड. याज्ञिकः. ७ ठ. ड. ‘ राज्ञां ’ नास्ति. ८ ग. च. ज °संद्धाये°. ९ क. ख. घ. झ. ट. ठ. ड. रित्येतम°; च. °रित्येवम° त.

हि[1] संहतम् ‘ अस्मिन् पापकं ’ भवति ‘ इति ’ एवं ‘ नैरुक्ताः ’ मन्यन्ते । ‘ तस्यतेर्वा स्यात् ’ क्षयार्थस्य [धा० ४ । १०६] । उपक्षीणो ह्यसौ भवत्यधार्मिकत्वात् । परलोकमनपेक्ष्य कल्पयति कर्माणि । क्षितयो मनुष्याः । ‘ भर इति संग्रामनाम ’ । भ्रियन्तेऽस्मिन् योधाः[2] । हरतेर्वा । ह्रियन्ते हि तस्मिन् जीवितानि वसूनि च । ‘ श्येनः शंसनीयं गच्छति ’ शीघ्रत्वात् । ‘ यूथं यौतेः ’ । तद्धि ‘ समायुतं भवति ’ एकत्र मिश्रीभूतं स्त्रीपुरुषबालवृद्धैः पशुभिः । एवमिह नीचायमानं श्येनमित्यनेन संबन्धाज्जसुरिर्बद्ध इत्युपपद्यते । न ह्यबद्धः श्येनो नीचैरयते ।

‘ जरते’ (५२) इत्यनवगतम् । धातोरस्वार्थे प्रवृत्तिरैत्रानवगमः[3][4] ।

जरते इत्यस्य — ‘ दिवस्परि[5] प्रथमं जज्ञे अग्निरस्मद्द्वितीयं परि जातवेदाः । तृतीयमप्सु नृमणा अजस्रमिन्धान एनं जरते स्वाधीः ’ [ऋ० सं० १० । ४५ । १] इति ॥

वत्सप्रिर्नाम[6] भालन्दनस्तस्येयमार्षम् । उख्यस्याग्नेरुपस्थाने विनियुक्ता [तै० सं० ४ । २ । २ । १ । मै० सं० २ । ७ । ९ । कात्या० श्रौ० १६ । ५ । ३१] । दिवस्परि दिवः । द्युलोकादित्यर्थः । प्रथममयमग्निर्जज्ञे आदित्यात्मना । द्वितीयमस्मत्परि अस्मदधि अस्मत्तो जायते पार्थिवात्मना । तृतीयमप्सु अन्तरिक्षलोके वैद्युतात्मना जायते । ‘ आपः ’ इति ह्यन्तारिक्षनामसु पठितम् [निघ० १ । ३] । नृणां मनस्यवस्थितो नृमणाः । नृषु वा मनोऽस्य नृमणाः । योऽयमेक एव त्रिषु स्थानेषु जायते तमेवंगुणयुक्तमग्निमिन्धानोऽजस्रं नित्यं जरते स्तौति यः स एव स्वाधीः शोभनधीः । सुप्रज्ञ इत्यर्थः । इन्धानो हि किमन्यत्[10] स्तुतेरन्यत्कुर्यात् । तस्मात् ‘ जरते ’ इत्यस्य शब्दस्य गृणात्यर्थं[11] उपपद्यते ।

‘ मन्दिने ’ (५३) इत्यनवगतम् । ‘ मन्दतेः ’ स्तुत्यर्थस्य

---

१ क. ख. घ. झ. ट. ठ. ड. ‘ हि ’ नास्ति. २ क. ख. घ. झ. ट. ठ. ड. योद्धारः; च. योधाः° द्धारः. ३ क. ख. घ. झ. ट. ड. °वृत्तिरेवानव°; च. °वृत्तिरैत्रानव° रेवा. ४ ग. °गमः । ५ । दिव°. ५ ग. च. ज. °स्परि प्रथममिति । वत्स°; घ. ट. °स्परीति । वत्स°. ६ ग. च. ज. वत्सप्रीर्ना°; ठ. ड. वत्सप्रि ० दिवस्परि ’ नास्ति. ७ ग. मुख्य°; ज. मुखस्या°. ८ घ. झ. ट. ठ. ड. °त्मना जातवेदाः । तृ°. ९ क. ख. घ. झ. ट. ठ. ड. °स्य स नृ°. १० क. ख. घ. झ. ट. ठ. ड. °मन्यत्स्तुतेः कु°; च. °मन्यत्र (त्) स्तुतेर (:) न्यत्कु (कु)°. ११ च. गृणार्थत्वमु° उ.

[धा० १ । १३] । मन्दनीयः स्तुतिमान् वेत्यर्थप्रतीतिः । ' मन्दति शंसति 'इति स्तुतिकर्मसु पठितम्[1] [निघ० ३ । १४] । ' प्र मन्दिने पितुमदर्चता[2] वचो यः कृष्णगर्भा निरहन्नृजिश्वना । अवस्यवो वृषणं वज्रदक्षिणं मरुत्वन्तं सख्याय हवामहे ' [ऋ० सं० १ । १०१ । १] ॥ कुत्सस्येयमार्षम् । छन्दोमेषु तृतीयेऽहनि मरुत्वतीये शस्त्रे निविद्धानीयस्य[3] सूक्तस्य प्रथमैषा [आश्व० श्रौ० ८ । ७] । हे स्तोतारः प्रार्चत प्रकर्षेणोच्चारयत पूजयत[4] मन्दिने मन्दनीयाय स्तुत्याय स्तुतिमते वा इन्द्राय पितुमत् अन्नसंयुक्तं वचः । य इन्द्रः किं करोति । कृष्णस्य मेघस्य गर्भभूता अपो निरहन् नीचैरहन् । निरगमयदित्यर्थः । केन । ऋजिश्वना । ऋजुरेवावक्षिप्तो लक्ष्ये यः श्वयति[5] गच्छति वज्रस्तेन निरगमयत् । हे[6] अवस्यवः । अवनमात्मनो रक्षणमिच्छन्तस्तर्पणं वा । योऽयमेवंप्रभाव इन्द्रस्तमिमं वृषणं वर्षितारं वज्रदक्षिणं वज्रेण हननायोत्साहवन्तमथवा वज्रदक्षिणं वज्रबाहुं मरुत्वन्तं मरुत्सहितं सख्याय सखिभावाय हवामहे । तासु तासु क्रियास्वाह्वयाम[7] इत्यर्थः । एवमेतस्मिन् मन्त्रे ' मन्दिने पितुमद्वचः प्रार्चत ' इत्येतस्माद्वाक्यसंबन्धादिन्द्रविशेषणमेतदित्युपपद्यते ।

मन्दिने इत्यस्य

'गौः' (५४) इत्येतदनेकार्थत्वादिह समाम्नातम्[8] । यथा चैतदनेकार्थं तथा पुरस्ताद्व्याख्यातम् [निरु० २।५] । यत्तूक्तम् ' अथाप्यस्यैको रश्मिश्चन्द्रमसं प्रति दीप्यते सोऽपि गौरित्युच्यते । अत्राह गोरमन्वतेति तदुपरिष्टाद्व्याख्यास्यामः '[निरु० २ । ६] इति तदिदमुच्यते । २४[9] ।

अत्राह[10] गोरमन्वत नाम त्वष्टुरपीच्यम् । इत्था चन्द्रमसो गृहे (ऋ० सं० १ । ८४ । १५) ॥ अत्र ह गोः सममंसतादित्यरश्मयः [11]स्वं नामापीच्यमपगतम[12]पचितमपिहितमन्तर्हितं वामुत्र चन्द्र-

१ ग. °ठितम् । ५५ । प्र°. २ ग. पितुमदर्चता वचो० हे । कुत्स°; घ. ट. पितुम० हवामहे. ३ क. ख. घ. झ. ट. ठ. ड. °नीयसूक्त°. ४ ग. ज. 'पूजयत' नास्ति. ५ क. ख. घ. झ. स्वनति; ट. स्विनाति° शव. ६ क. ख. ' हे ' नास्ति; च. °मयत् । ˇ अव° हे. ७ क. ख. घ. झ. ट. ठ. ड. °ह्वयामह इ°. ८ च. ' एतत् ' नास्ति. ९ क. ख. ३ (२४); ग. २५। ५६; इतरेष्वङ्को नास्ति. १० छ. अत्राह. ११ छ. त. द. सुन्नामा°. १२ क. ख. छ. त. द. ध, °च्यमपचितमपगतमपि°.

मसो गृहे गातुर्व्याख्यातः । गातुं[1] कृणवन्नुषसो जनायेत्यपि निगमो भवति । दंसयः कर्माणि दंसयन्त्येनानि[2] । कुत्साय मन्मन्नह्यश्च दंसय इत्यपि निगमो भवति । स तूताव नैनमश्नोत्यंहतिः । स तुताव[3] नैनमंहतिरश्नोत्यंहतिश्चांहश्चांहुश्च हन्तेर्निरूढोप[4]धाद्विपरीतात् । बृहस्पते चयस इतिपयारुम् । बृहस्पते यच्चातयसि देवपीयुं पीयतिर्हिंसाकर्मा[5] वियुते द्यावापृथिव्यौ वियवनात्[6] । समान्या वियुते दूरेअन्ते । समानं संमानमात्रं भवति मात्रा मानाद्दूरं व्याख्यातमन्तोऽतते ऋधगिति पृथग्भावस्य प्रवचनं भवत्यथाप्यृध्नोत्यर्थे दृश्यते । ऋधगया ऋधगुताशमिष्ठाः । ऋध्नुवन्नयाक्षीर्ऋध्नुवन्नशमिष्ठा इति चास्या इति चास्येति चोदात्तं प्रथमादेशेऽनुदात्तमन्वादेशे तीव्रार्थतरमुदात्तमल्पीयोऽर्थतरमनुदात्तम्[7] । अस्या ऊ षु ण उप सातये भुवोऽहेळमानो[8] ररिवाँ अजाश्व श्रवस्यतामजाश्व[9] । अस्यै नः सातय उपभवाहेळमानोऽक्रुध्यन्ररिवान्रातिरभ्यस्तोऽजाश्वेति पूषणमाहाजाश्वाजा अजना अथानुदात्तम् । दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् । दीर्घायुरस्या यः पतिर्जीवतु स शरदः शतं शरच्छृता अस्यामोषधयो भवन्ति शीर्णा आप इति वाऽस्येत्यस्या इत्येतेन व्याख्यातम् ॥ २५[10] ॥

गोरमन्वतेति । राहूगणस्य[11] गोतमस्येयमार्षम्[12] । अग्निचयने इष्टकोपधाने विनियुक्ता [तै० ब्रा० १ । ५ । ८] । अत्राह गोरित्यस्य अत्रैव एतस्मिंश्चन्द्रमण्डले गोः सुषुम्नस्यैकस्य सूर्यरश्मेरितरे सूर्यरश्मयः अमन्वत अमन्यन्त ।

१ छ. त. द. ' गातुं कृणवन्नुषसो जनायेत्यपि निगमो भवति ' नास्ति. २ क. ख. छ. त. द. दंसयन्त एनानि. ३ छ. त. द. तूताव. ४ छ. त. द. निरूल्होप°. ५ छ. त. पीयुति°. ६ छ. त. द. वियमनात्. ७ छ. त. °दात्तम् । ।२०। अस्या°; द. °दात्तम् । ४ । अस्या°. ८ क. ख. छ. त. द. ङ. °हेलमा°. ९ छ. त. द. ' श्रवस्यत मजाश्व ' नास्ति. १० क. ख. ४ [२५]; छ. त. २७; द. ५. ११ क. ख. घ. झ. ट. ठ. ड. गोतमस्य राहू° (ठ. ड. राहु°); च. राहुग°. १२ च. ' इयं ' नास्ति.

समनुज्ञातवन्त इत्यर्थः । किं पुनस्तत्सममन्यन्त[1] । नाम नमनं प्रह्वत्वम् । अवस्थानमित्यर्थः । कुतः । त्वष्टुरादित्यस्य मण्डलात् । अथवा त्वष्टुरादित्यस्य स्वभूता रश्मयः सममन्यन्त । कथं तस्य नमनं तत्सममन्यन्तेति । अपीच्यमपगतम् । तत्रैव चन्द्रमण्डलेऽनुप्रविष्टस्य यदवस्थानान्तरं तत्सममन्यन्त । अथवा अपीच्यमिति अपेत्य सूर्यमण्डलाच्चन्द्रमण्डले चितमपीच्यम् । अथवा अपीच्यमन्तर्हितमित्यर्थः । 'प्रतीच्यम् अपीच्यम्' इति ह्यन्तर्हितनामसु पठितम् [निघ० ३ । २५] । क पुनरन्तर्हितस्यान्यत्रावस्थानमिति । इत्था चन्द्रमसो गृहे । अमुष्मिंश्चन्द्रमण्डल इत्यर्थः ।

'गातुः' [५'५] इति व्याख्यातो 'गमनं यज्ञपतये' इत्यत्र [निरु० ४ । २१] ।

दंसय इत्यस्य

'दंसयः' इत्येतदनेकेषां कर्मणामभिधानम् । तानि हि दंसयन्त्युपक्षयन्ति कर्मकरा[2]ः । 'तव त्य इन्द्र सख्येषु[3] वह्नय ऋतं मन्वाना व्यदर्दिरुर्बलम् । यत्रा दशस्यन्नुषसो रिणन्नपः कुत्साय मन्मन्नह्यश्च दंसयः' [ऋ० सं० १० । १३८ । १]॥ अङ्गस्यौरवस्येयमार्षम् । हे इन्द्र तव त्ये ते वह्नयो वोढारोऽश्वाः सख्येषु समानख्यानेषु कर्मसु वर्तमानाः । इदमेव हि भवतः कर्म मेघो विदारयितव्य इति । एतदेव तेषामपि । एतत्समानख्यानत्वम् । ऋतमुदकमस्मिन्नस्तीत्येवं[4] मन्वानाः । किमकुर्वन् । व्यदर्दिरुः विदारितवन्तः बलं मेघं काले काले । यत्र यस्मिन्मेघे विदारिते दशस्यन् दर्शन्ति[5] उषसो माध्यमिकाः । एकस्या एव पूजनार्थे बहुवचनम् । किं दशस्यन् । अपः । अह्नः च अह्नौ[6] निवासिन्यः आपः[7] । मेघनिवासिनीरित्यर्थः । ताश्च दीर्यमाणाः रिणन् आगच्छन् पृथिवीलोकम् । तदेतत्सर्वमपि युष्मदश्वैः क्रियते । किं पुनरर्थमुद्दिश्य ते[8] एवं कुर्वन्ति । मन्मन् मन्यमानाः कुत्साय पृथिवीं कृन्तते कृषीवलाय[9] दंसयः कृषिकर्माणि सफलानि कर्तुम् । अत्र

---

१ म. ज. °मन्यन्ते. २ ग. °कराः । ५७ । तव°. ३ ग. ज. सख्येषु वन्हय इति । अङ्ग°; घ. ट. सख्येषु० श्च दंसयः. ४ क. ख. घ. झ. ट. ठ. ड. °त्येषमेतं म°. ५ क. ख. घ. झ. ट. ठ. ड. दशस्यन्ति; च. दर्शन्ति° स्य. ६ क. ख. घ. झ. ट. ठ. ड. अहिनि°; च. अह्नौ° हि. ७ क. ख. घ. झ. ट. ठ. ड. 'आपः' नास्ति; च. आपः. ८ च. एत. ९ क. ख. ग. च. ज. कृषीवलाय.

'दंसयः' इत्यनेन शब्देन 'कर्माणि' उक्तानि दासैः कर्मकरैर्दंस्यन्ते इति । कर्मकरा दासा इति बाहुल्याद्भाष्यकारेण निगमोऽत्र नोदाहृतः ।

'तूताव' (१७) इत्यनवगतम् । 'तुताव' इत्यवगमः । 'यस्मै त्वमायजसे स साधत्यनर्वा क्षेति दधते सुवीर्यम् । स तूताव नैनमश्नोत्यंहतिरग्ने सख्ये मा रिषामा वयं तव' (ऋ० १ । ९४ । २) ॥ — तूतावेत्यस्य — कुत्सस्येयमार्षम् । महाव्रते आग्निमारुते शस्त्रे जातवेदस्ये सूक्ते शस्यते (ऐ० आ० १ । ५ । ३) । हे भगवन्नग्ने यस्मै यजमानाय त्वमाहूय यजसे देवान् होतृत्वेऽवस्थितः स एव साधति साधयत्यात्मनोऽभिप्रेतार्थम् । किंच । स एव अनर्वा अप्रत्यृतः अनाश्रितः कंचिदन्यं स्वेनैव महिम्ना युक्तः क्षेति निवसति युष्मदनुग्रहात् । स एव दधते धारयते सुवीर्यं शोभनमात्मनो वीर्यम् । स एव तूताव वर्धते प्रजाधनयशोभिः । न चैनम् अंहतिः अपि पापमपि समश्नोति व्याप्नोति । हे भगवन्नग्ने यस्त्वमेवमतिमहानुभावस्तस्य तव वयं सख्ये सखिभावे परिचरणकर्मणि वर्तमानाः मा रिषाम मा केनचिच्छिद्येमहि । एवमयमत्र 'तूताव' इति शब्दो 'यस्मै त्वमायजसे' इत्येवमादीनां मध्ये श्रूयमाणो वृध्द्यर्थ उपपद्यते । 'अंहतिश्चांहश्चांहुश्च' इत्येते शब्दा 'हन्तेः' धातोः 'निरूढोपधात्' । अकारमुपधातो निष्कृष्यादौ कृत्वा ततो हकारनकारौ विपर्ययेण भवतः ।

'चयसे' (५८) इत्यनवगतम् । 'चातयसि'[11] इत्यर्थप्रतीतिः[12] । 'ये त्वा देवोस्रिकं[13] मन्यमानाः पापा भद्रमुपजीवन्ति पज्राः । न दूढ्ये ३ अनु ददासि वामं बृहस्पते चयस इत्पियारुम्' (ऋ० सं० १ । १९० । ५) ॥ — चयसे इत्यस्य — अगस्त्यस्य मैत्रावरुणस्येयमार्षम् । हे बृहस्पते देव

---

१ क. ख. घ. झ. ट. ठ. ड. इत्येतेन. २ °कानि । दासैः (ग. दासी) इति सर्वेषु पुस्तकेषु. ३ ग. ज. करैर्दृश्यत इ°; च. करैर्दृश्यन्त इ° दंसं. ४ क. ख. ग. ज. घ. झ. ट. ठ. ड. इति कृत्वा कर्म°. ५ ग. °गमः ।५८। यस्मै°. ६ ग. ज. यजसे इति । कुत्स°; घ. ट. यजसे० वयं तव. ७ ठ. ड. 'आहूय' नास्ति. ८ च. °एव साधयत्या° साधाति. ९ ग. च. ज. केन विछिद्ये°. १० क. ख. घ. झ. ट. ठ. ड. °दीनां पदानां मध्ये°; च. °दीनां मध्ये° पदानां. ११ च. चातयस इत्य°. १२ ग. °तीतिः । ५९ । ये°. १३ ग. ज. °स्रिकं मन्यमाना इति । अग°; घ. ट. °स्रिकं० इत्पियारुम्°.

दानादिगुणयुक्ता ये यजमानास्तेषाम् उस्त्रिकम् उस्राविणं भोगानां मन्यमाना दातेव केवलं भोगानामयमार्जयिता[1] न प्रत्युपकारार्थीत्येवं मन्यमानाः पापा अप्रत्युपचिकीर्षव उपजीवन्त्येव केवलं न क्रियया प्रत्युपकारं कुर्वन्ति भद्रं भन्दनीयं स्तुत्यम् अपि च पज्राः प्रार्जितधनाः सन्तो न दरिद्राः । किं तेभ्य इति । न दूढ्ये न तेभ्य एवंलक्षणेभ्यो दुर्धीभ्यः पापबुद्धिभ्यः स्वार्थप्रधानेभ्यस्त्वमनुददासि वामं वननीयं धनम् । किं तर्हि । यस्तादृशो जनः पियारुः देवपीयुः देवहिंसिता स्वभोगप्रधानो न यष्टा देवानां तं चातयसि नाशयसि । य एव श्रद्दधानो यष्टा तस्मै देवान्यजतेऽनुददासि वामम् । यस्मात्त्वमेवं करोषि तस्मान्न ते पापबुद्धयस्त्वां सम्यक्पश्यन्तीत्यभिप्रायः । यो हि दुर्बुद्धिर्देवपियारुस्तस्य किमन्यच्चातनादृते स्यात् । चात एवास्मै । तस्मात् 'चयसे' इत्येष शब्दः 'चातयतिर्नाशने' इत्येवमत्रस्थापिते नाशनार्थो[3] भवतीत्युपपद्यते । 'चातयतिर्नाशने' इति हि वक्ष्यति (निरु० ६ । ३०) । लोकेऽपि च प्रसिद्धं देशादुच्चातित इति । तस्मादुपपद्यते ।

'वियुते' (५९) इत्येतदेकमेव समस्तयोर्द्वयोरपि द्यावापृथिव्योरभिधानम् । 'वियवनात्' इति निर्वचनम् । 'यौतिर्मिश्रणार्थः '[धा० २।२३]। तस्योपसर्गसामर्थ्याद्विपर्ययेणार्थो भवति । विमिश्रीभूते[4] इत्यर्थः । 'इमे वै सहास्तां ते शम्यामात्रं व्यैताम्[5]' इति ह विज्ञायते[6] [मैत्रा० सं० ४ । १ । ७] ।

वियुते इत्यस्य

'समान्या वियुते[7] दूरेअन्ते ध्रुवे पदे तस्थतुर्जागरूके । उत स्वसारा युवती भवन्ती आदु ब्रुवाते मिथुनानि नाम' (ऋ० सं० ३ । ५४ । ७) ।। विश्वामित्रस्येयमार्षम् । वैश्वदेवे सूक्ते ।

समान्यावेते द्यावापृथिव्यौ समानपरिमाणे । वियुते च विमिश्रीभूते च[8] । महत्त्वात्[9] दूरेअन्ते च । न हि द्यावापृथिव्योरन्तोपलब्धिरस्ति । 'ध्रुवे पदे' सप्तम्येकवचनमन्तरिक्षविषयम् । ध्रुवं शाश्वतम् । एतस्मिन् पदे

---

१ ग. ज. °मार्जनो न प्र°. २ ग. ज. °न्यक्ष्यते; च. °न्यक्ष्यते° ज. ३ ग. ज. नार्थगमातार्थो भ°; च. नवैश°. ४ ब. झ. ट. ठ. ड. भूत इ°; च. °भूते इ° स. ५ सर्वेषु पुस्तकेषु 'न्यैताम्'. ६ ग. °यते । ६० । समा°. ७ ग. ज. वियुते दूरेअन्ते इति । विश्वा; च. ट. वियुते० मिथुनानि नाम. ८ क. ख. ग. ज. च. झ. ट. ठ. ड. 'च' नास्ति. ९ क. ख. घ. ट. ठ. ड. 'महत्वात्' नास्ति; च. महत्वाद्दूरे अन्ते च.

आधारभूतेऽन्तरिक्षाख्ये। अन्तरिक्षस्य क्षयो नास्ति प्रतिद्वन्द्वय[1]भावात्। तच्चैतयोर्द्यावापृथिव्योः प्रतिष्ठा। तस्मिन्नेते तस्थतुः स्थितवत्यौ सर्गादारभ्य जागरूके जागरणशीले स्वं स्वमधिकारं प्रति। उत अपि चैते स्वसारा स्वसारौ भगिन्यौ सहोत्पत्तित्वात्। युवती भवन्ती संमिश्रीभवन्त्यौ[2] परस्परसंभोगेन। आदु ब्रुवाते मिथुनानि नाम इति। अथैवमेते वियुते च संमिश्रीभूते च सत्यौ द्यावापृथिव्यौ ब्रुवाते इव प्रकथयत इव स्तोतॄणां नामानि आत्मनो मिथुनानि द्विवचनसंबद्धानि स्तुतिनामभिः ‘स्वधे पुरन्धी’ इत्येवमादिभिरिति। एवमेतस्मिन् मन्त्रे ‘वियुते’ इत्यस्य पदस्य द्यावापृथिवीविशेषणत्वम्। द्यावापृथिवीशब्दश्चात्राध्याहार्यो ‘दूरेअन्ते’ इत्येवमादीनां तथोपपत्तिदर्शनात्।

‘ऋधक्’ [६०] इत्यनेकार्थम्। ‘ऋधगिति पृथग्भावस्य[3] प्रवचनं भवति’। पृथक्त्वमेव पृथग्भावः। तस्येदं प्रवचनं भवति। सोऽनेनं प्रोच्यते इत्यर्थः[4]। ‘यदिन्द्र दिवि पार्ये यदृधग्यद्वा स्वे सदने

ऋधक् इत्यस्य

यत्र वासि। अतो नो यज्ञमवसे नियुत्वान्त्सजोषाः पाहि गिर्वणो मरुद्भिः’ [ऋ०सं०६।४०।५]॥

भरद्वाजस्येयमार्षम्। पृष्ठ्यस्य पञ्चमेऽहनि मरुत्वतीये शस्त्रे निविद्धानीये सूक्ते शस्यते [आश्व० श्रौ० ७ । १२]। हे भगवन्निन्द्र यदि त्वं दिवि द्युलोके पार्ये पारणीये स्थानेऽवस्थितः यदृधक्[6]। पृथग्दिव इत्यर्थः। यद्वा यदि वा स्वे सदनेऽन्तरिक्षलोकेऽवस्थितः। यत्र वासि क्वचिदन्यत्रैव स्थानेऽवस्थितः। को हि तत्त्वतो वेद तव स्थानं यत्रासीति। किं बहुना। यत्र यत्रास्यवस्थितस्ततत आगत्य यज्ञमवसे रक्षसि [7]त्वं नियुत्वान् वायुर्भूत्वा। यस्त्वमेवंप्रभावस्तं त्वां ब्रवीमि। हे गिर्वणः [8]गीःसंभजितः। स हि स्तुतीः संभजति स्तुतिभिर्वा संभज्यते। सजोषाः सहजोषणः सहप्रीतो मरुद्भिः पिबैतं सोममस्मत्प्रत्तम्। एवमेके पृथग्भावोदाहरणमेतामृचं व्याचक्षते॥

---

१ क. ख. घ. झ. ट. ठ. ड. °द्वन्द्वाभा°; च. °द्वन्द्वभा° द्वा. २. घ. झ. ट. ठ. ड. °भवत्यौ. ३ ग. °स्य नु प्रव°; ज. °स्य सु प्रव°. ४ ग. °त्यर्थः। ६१। यदि.° ५ ग. ज. यदृधगिति । भर°; घ. ट. यदृधक् ० मरुद्भिः. ६ क. ख. झ. ट. ठ. ड. °धक् यदि ऋधक् पृथ°; च. °धक् पृथ° यदि ऋधक्. ७ क. ख. घ. झ. ट. ‘ त्वं ’ नास्ति. ८ क. ख. ग. ज. घ. झ. ट. गीर्भिः संभ°.

अस्यामृचि 'ऋधक्' इत्यस्य द्वावप्यर्थौ दृश्येते इति केचित्

अपरे पुनर्य एवैष भाष्यकारेण निगमः पठितः 'ऋधगयाः' इति तत्रैवैतौ[1] द्वावप्यर्थाविति मन्यन्ते । तथापि दर्शयिष्यामस्तस्यामेवर्चि । 'अथापि' अयमृधगिति[2] शब्दः कदाचित् 'ऋध्नोत्यर्थे' अपि 'दृश्यते' । तद्यथा[3] । 'ऋधगया ऋधगुताशमिष्ठाः' इत्यस्मिन् मन्त्रे[4] । 'यदद्य त्वा प्रयति यज्ञे[5] अस्मिन्नग्ने होतारमवृणीमहीह । ऋधगया ऋधगुताशमिष्ठाः प्रजानन्यज्ञमुप[6] याहि विद्वान्[7]' [तै० सं० १ । ४ । ४४ । २ ॥ मैत्रा० सं० १ । ३ । ३८]॥ समिष्टयजुःषु सौमिकेषु विनियुक्ता [मान० श्रौ० २ । ५ । ४] । तत्र चोक्तम् 'एतौ विश्वामित्रो[8] यज्ञस्यारणी अपश्यत्' [मै० सं० ४ । ८ । ४ ।] इति । हे भगवन्नग्ने[9] यत्प्रयोजनमुद्दिश्य अद्य प्रयति प्रोत्सर्पत्येतास्मिन्यज्ञे वयमवृणीमहि वृतवन्तो होतारं त्वाम् । 'अग्निर्देवो दैव्यो होता' इति श्रूयते [शत० १ । ५ २ । ५] । किं पुनस्तत्प्रयोजनमिति । कथं नामाल्पमप्यवदानमात्रं हुतं देवतातृप्तिसमर्थं बहु कुर्यादशान्तमपि च यद्विगुणं यज्ञस्य किंचित्तच्छमयित्वा समृद्धमेव कुर्यादिति । तच्चोभयमपि यथाशास्त्रमेवास्माकं त्वया कृतम् । अत[10] इदानीं परिसमाप्त एतस्मिन्यज्ञे प्रत्याभाष्यसेऽस्माभिः । ऋधगयाः । त्वमल्पमपि हुतमस्माभिः सद्भिः[11] ऋधगेव ऋद्धमेव देवतातृप्तिसमर्थं बहु कुर्वन् अयाः । त्वं यागमकार्षीरित्यर्थः । किंच ऋधगुताशमिष्ठाः । अपि च यदपि किंचिद्विगुणमकार्ष्म वयमस्मिन्यज्ञे[12] तदपि सर्वमेवासमृद्धं[13] समृद्धं सगुणमेव कुर्वन् पापमस्य यज्ञस्या-

अत्र द्वावपि ऋधक्छब्दौ ऋध्नोत्यर्थौ इत्येके

१ क. ख. घ. झ. ट. ठ. ड. अत्रै°; च. तत्रैवैनौ ह्य° अ. २ क. ख. घ. झ. ट. ठ. ड. अयमेव ऋध°; ग. ज. °वर्चि । यथाप्ययं ऋध°. ३ क. ख. घ. झ. ट. ठ. ड. 'तद्यथा' नास्ति. ४ ग. मन्त्रे । ६२ । यद्°. ५ ग. च. ज. घ. ट. यज्ञे इति । समिष्ट°; ठ. ड. यज्ञे अस्मिन् होतश्चिकित्वो वृणी°. ६ ठ. ड. प्रजानन्विद्वानुपयाहि सोमम् । समिष्ट°. ७ क. ख. विद्वान् स्वाहा । समिष्ट°. ८ च. °मित्रस्यौ यज्ञस्या°. ९ घ. झ. ट. ठ. ड. °ग्ने हे चिकित्वः (घ. ट. त्विः) कर्मविषयकज्ञा (ठ. ड. विषयज्ञा°) नवन् यत्प्रयो°; च. °ग्ने यत्प्र° हे चिकित्वः कर्मविषयकज्ञानवन्°. १० ग. ज. यत इ°. ११ क. ख. घ. झ. ट. ठ. ड. 'सत्' नास्ति; च. सत्. १२ क. ख. घ. झ. ट. ठ. ड. वयमेतस्मि°. १३ क. ख. घ. झ. ट. ठ. 'असमृध्दं' नास्ति; च. असमृद्धं.

शमिष्ठाः । स्विष्टकृद्रूपेण शमितवानसि । यस्त्वमेतदकार्षीरस्माकमेतस्मिन्यज्ञे तं त्वां ब्रवीमि । एतदेव मयैतेषां कर्तव्यमित्येतद्विद्वान् प्रजानन् प्रकर्षेण जानन्नस्माकमात्मन उपरि भक्तिं पुनः पुनः उपयाहि उपागच्छ यज्ञम् । एवं तावदेकेषाम् ' ऋधगयाः ऋधगुताशमिष्ठाः ' इत्येतौ द्वावप्यृधक्छब्दावृध्नोत्यर्थावेव । एतस्मिन्नर्थे ऋधक्छब्दस्य पृथग्भावार्थत्वे ' यदिन्द्र दिवि पार्ये' इत्येतदुदाहरणम् ।

भिन्नार्थावित्यपरे

ततो देवानयाक्षीः । न

प्रथम एवार्थः साधीयान्

अन्ये पुनर्मन्यन्ते । ' ऋधगया ऋधगुताशमिष्ठाः ' इत्येतयोरेव ऋधक्छब्दयोः पूर्वः पृथग्भावार्थ उत्तर ऋध्नोत्यर्थ इति । तदेतदुपपद्यते । मिश्राण्यपि हवींषि हुतानि सन्ति । त्वमग्ने ऋधगेषु च कृत्वा ते संमोहोऽस्तीत्यभिप्रायः । 'ऋधगुताशमिष्ठाः ' इत्येष यथाव्याख्यात एव । पूर्वस्त्वर्थः साधीयान् यत्र द्वावप्येतावृध्नोत्यर्थावेव ' ऋधगयाः ऋधगुताशमिष्ठाः ' इति । किं कारणम् । ' अथाप्यृध्नोत्यर्थे दृश्यते ' इत्येवमुपन्यस्य भाष्यकारेण ततोऽयमुपात्तो निगमः ' ऋधगया ऋधगुताशमिष्ठाः ' इति । एवं च निरुक्तम् । न पुनः पृथक्कुर्वन्नयाक्षीरृध्नुवञ्शमिष्ठा इति । तस्माद्द्वावप्येतावृध्नोत्यर्थावित्येतदेव साधीयः ।

'अस्याः (६१) इति अस्य (६२) इति च' एतत्पदद्वयं स्त्रीपुंसविषये

'अस्या' 'अस्य' इत्यनयोर्गौणमुख्यार्थयोर्वाक्ये स्थानं स्वरश्च

स्वरकृताद्विशेषात्प्रधानाभिधायि वा भवति गुणाभिधायि वा । आह । कथमिति । उच्यते । ' उदात्तं प्रथमादेशे ' । प्रथम इति मुख्यनाम । मुख्यश्च प्रधानमित्युच्यते । प्रधानं कंचिदर्थमभिदधदेतत्पदद्वयमुदात्तं भवति । ' अनुदात्तमन्वादेशे ' । प्रधानमर्थमनु यो वर्तते गुणभावेन तस्यैतत्पदद्वयमन्वादेशे वर्तमानमनुदात्तं

१ क. झ. ट. सोमं यज्ञम्; ठ. ड °गच्छसेमं यज्ञम्; च. °गच्छ° यज्ञम्° सोमं. २ क. ख. घ. झ. ट. ठ. ड. पार्ये यदृधगित्ये°. ३ क. ख. घ. झ. ट. ठ. ड. ऋधक् पृथगेव कृत्वा; ग. ऋधगेषु व कृत्वा; च. ऋधगेषु च कृ° व पृथगेव; ज. ऋधघयेषु व कृ°. ४ क. ख. घ. झ. ट. ठ. ड. ' एतत् ' नास्ति. ५ च. मुख्यस्य प्र. ६ ग. ज. प्रधान इत्यु°; घ. झ. ट. ठ. ड. प्रधानमुच्य°. ७ ग. ज. °त्पदद्-मन्वा;° च °त्पदद्-मन्वा° इय.

भवति । आह । कस्मादेतत्पुनरुदात्तं प्रधाने वर्तमानमनुदात्तमप्रधाने[1] इति । उच्यते । लोकेऽपि हि यत् 'तीव्रार्थतरम्' उत्कृष्टार्थं[2] प्रधानतरं तत् 'उदात्तम्' इति प्रसिद्धम् । तद्यथा । उदात्तमेतत्कुलमिति । 'अल्पीयोऽर्थतरमनुदात्तम्' । अल्पीयसार्थेन यदुक्तं[3] भवति तदनुदात्तमुच्यते । अप्रधानमित्यर्थः । उदाहरणैरेवानयोर्विभागं दर्शयति[4] ।

अस्या इत्यस्य मुख्यार्थः

'अस्या ऊ षु ण उप सातये भुवोऽहेळमानो[5] ररिवाँ अजाश्व श्रवस्यतामजाश्व । ओ षु त्वा ववृतीमहि स्तोमेभिर्दस्म साधुभिः । नहि त्वा पूषन्नतिमन्य आघृणे न ते सख्यमपह्नुवे' (ऋ० सं० १ । १३८ । ४) ॥ परुच्छेपस्यार्षम् । अतिच्छन्दाः । 'उ' इति 'सु' इति 'न' इति पदानि । अस्या अस्यै सातये लब्धये । कथं नाम वयमर्थमभिप्रेतं लभेमहीत्येतमर्थमुद्दिश्य हे पूषन्नस्माकं सुष्ठु उप समीपे भव[7] । त्वयि संनिकृष्टे त्वदनुग्रहादेतमर्थं लभेमहीत्यभिप्रायः । कथं पुनरुपभव । अहेळमानः[8] अक्रुध्यन् । सर्वो ह्यभ्यर्थ्यमानः क्रुध्यतीत्यभिप्रायः । ररिवान् दानवान्[9] । दानाभिप्रायसंयुक्तेन चेतसोपभव । अजाश्व अजनाश्व गमनाश्व छागाश्व वा । श्रवस्यतामस्माकं धनमिच्छतां भवाजनाश्व । छागाश्वेत्यर्थः । किंच ओ षु त्वा ववृतीमहि । 'आ' 'उ' 'सु' इति पदानि । आ ववृतीमहि त्वां सुष्ठु आभिमुख्येनात्मनो वर्तयामहे । केन । स्तोमेभिः स्तोत्रैः । दस्म[10] । हे दस्म दर्शनीय अथवा दान्त । साधुभिः । शोभनैरित्यर्थः । किंच न हि त्वामतीत्य[11] साधुतरां कांचिदप्यन्यामहं देवतां मन्ये हे आघृणे आगतदीप्ते । त्वद्भक्त एवाहमस्मीत्यभिप्रायः । किंच । न ते तवाहं सख्यं सखिभावं कदाचिद-

---

१ घ. ट. ठ. ड. °मप्रधानं इति. २ क. ख. घ. झ. ट. ठ. ड. °ष्टार्थप्रधा°; च. °ष्टार्थ प्रधा° र्थं. ३ च यदुक्तं भ° यु; झ. यदुक्तं. ४ ग. °यति । ६३/२६ । अस्या°. ५ ग. ज. उप सातये भुव इति । परु°; घ. ट. उप० मपन्हुवे. ६ क. ख. च. ड. हेलमा. ७ क. ख. घ. झ. ट. ठ. ड. भुवः भव; च. °मीपे भव° भुवः. ८ क. ख. ग. च. ज. झ. ड. °हेलमा°. ९ ग. ज. °वान् अजाश्व दाना°; च °वान् । अजाश्वं दाना°. १० ग. ज. 'दस्म' नास्ति. ११ क. ख. घ. झ. ट. ठ. ड. त्वा नैव त्वां (ठ. ड. त्वा) दर्शनीयमतीत्य; च. त्वामती° नैव त्वां दर्शनीय.

प्यपन्हुवे । कृतज्ञो ह्यहमित्यभिप्रायः । एवमत्र सातिः प्रधानेति कृत्वा 'अस्याः' इत्येतत्पदमन्तोदात्तम् । अन्तोदात्तमपि च[1] सदुदात्तमित्युक्तं भाष्यकारेणैकदेशस्योदात्तत्वात् ।

'अथ' पुनर्यस्मिन् 'अनुदात्तम्' एतत्पदं गुणभूतार्थाभिधायि भवति तस्यैष निगमः[2] । 'पुनः पत्नीमग्निरदादायुषा सह वर्चसा ।[3]
दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम्'

अस्यामृचि 'अस्य' अनुदात्तम्

(ऋ० सं० १० । ८५ । ३९) ॥ सूर्याया आर्षम् । विवाहे विनियुक्ता (आश्व० गृ० १ । ८ । १३) । पित्रा पूर्वमेतां दत्तां सतीं कन्यां पत्नीं[4] पुनरग्निरदात् आयुषा सह वर्चसा अन्नेन सहैतस्मिन् वैवाहिके कर्मणि । अग्निसंनिधिसंस्काराद्धि भार्यात्वमुपजायत इत्येतदपेक्ष्य पूर्वदाना-त्पुनर्दातृत्वमुच्यते । तदेवमस्या दत्ताया एतदाशास्महे योऽस्याः पतिः स दीर्घायुरस्त्विति । यतो विशेषयन् ब्रवीति जीवातु[5] शरदः शतमिति । शराद्धि दुर्जीवा रोगभूयस्त्वात् । अत एवमाशास्यते शरच्छतं जीवत्विति । एतस्मिन्मन्त्रे भर्तृकन्यासंयोगे सति भर्तैव प्रधानम्[6] । तस्य ह्यायुराशास्यते । तस्य लक्षणार्था पत्नी । तस्मात् 'दीर्घायुरस्या यः पतिः' इत्येतदनुदात्तम् ।

निगमप्रसक्तमुच्यते । 'शरत् अस्यां' हि 'शृताः' पक्काः 'ओष-धयो भवन्ति' इति । 'शीर्णा आप इति वा' । वर्षासु हि प्रवृद्धानि स्रोतांसि शरदि विशीर्यन्ते[7] । 'अस्येति' एतत्पदं पुंविषयं षष्ठ्यन्तम् 'अस्याः इति' अनेनैव स्त्रीविषयेण पदेन[8] 'व्याख्यातम्' । यदेवोक्तम् 'उदात्तं प्रथमादेशेऽनुदात्तमन्वादेशे' इति तदेवात्रापि लक्षणमित्य-भिप्रायः । उदाहरणमात्रं प्रदर्श्यते । २५[9] ।

अस्य वामस्य पलितस्य होतुस्तस्य भ्राता मध्यमो अस्त्यश्नः । तृतीयो भ्राता घृतपृष्ठो अस्यात्रापश्यं विश्पतिं सप्तपुत्रम् (ऋ० सं० १ । १६४ । १) ॥ **अस्य वामस्य वननीयस्य पलितस्य**

---

१ च. 'च' नास्ति. २ ग °गमः । ६४ । पुनः°. ३ ग. ज. पत्नीमग्निरदा-दिति । सूर्या°; घ. ट. पत्नीमग्निरदात् ०शरदः शतम्; ठ. ड. पत्नीमिति । सूर्या°. ४ ग. ज. 'पत्नीं' नास्ति. ५ ट. जीवातु° ति; ठ. ड. जीवाति. ६ ग. ज. प्रधानः. ७ ग. ज. विशीर्यच्छिद्यन्ते; च विच्छिद्यन्ते° शीर्य. ८ क. ख. घ. झ. ट. ठ. ड. पदेनैव; च. पदेन° नैव. ९ क. ख. ४ [२५]; ग. २७.

पालयितुर्होतुर्ह्वातव्यस्य तस्य भ्राता मध्यमो अस्त्यशनो भ्राता भरतेर्हरतिकर्मणो हरते भागं भर्तव्यो भवतीति वा तृतीयो भ्राता घृतपृष्ठोऽ[1]स्यायमग्निस्तत्रापश्यं सर्वस्य पातारं वा पालयितारं वा विश्पतिं सप्तपुत्रं सप्तमपुत्रं सर्पणपुत्रमिति वा सप्त सृप्ता संख्या सप्तादित्यरश्मय इति वदन्ति । २६[2] ।

अत्र प्रथमार्धे 'अस्य' उदात्तं द्वितीयार्धेऽनुदात्तम्

अस्य वामस्येति[3] । अस्यवामीयमेवेदं सूक्तम् । दीर्घतमस आर्षम् । तार्तीयसवने[4] महाव्रते वैश्वदेवे[5] शस्त्रे शस्यते (ऐ० आ० ५ । ३ । २) । अस्य सूर्यस्य वामस्य वननीयस्य स्तुतिभिः पलितस्य पालयितुः । अयं हि सर्वमेवेदं जगत्पालयति । होतुः ह्वातव्यस्य आह्वानार्हस्य । आह । अस्य[6] किमिति । उच्यते । योऽयमेवंलक्षणस्तस्य भ्राता भागहर्ता भर्तव्यो वा उदकेन मध्यमो मध्यमस्थानः अस्ति विद्यते । कतमः[7] । योऽयम् अश्नः अशनो व्यापनः । वायुरित्यर्थः । स हि द्युलोकादादित्येनोदकेन भ्रियते हरति चोदकं[8] द्युलोकात् । तृतीयः अस्य[9] वायोर्भ्राता हविर्भागहर्ता वा ऐन्द्राग्ने हविषि संस्तुतो वा । घृतपृष्ठो घृतेन स्पृष्ट आज्यस्पृष्टः अयमेवाग्निः पृथिवीस्थानः सहस्रिणो वायोः । सर्वस्माद्धि वायुर्बलवान् । अथवा सहस्रमस्य नियुतमश्वानामस्तीति सहस्री वायुः । 'आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिः' (ऋ० सं० १ । १३५ । ३) इति हि श्रूयते वायव्ये मन्त्रे । वायुरादित्योऽग्निरित्येवं परिसंख्याय वायोस्तृतीयोऽग्निर्भवति । वायुरपि च ज्योतिरेव । 'वायुना ज्योतिषा' इति हि[10] विज्ञायते । तत्रैतस्मिंस्त्रेधा विभक्ते ज्योतिषि प्रधानत्वेनैतमेवाहमपश्यमिति । विश्पतिं विश्वस्य सर्वस्य जगतः पालयितारम् । कतमम् । य एष सप्तपुत्रः सूर्य एतमेवाहमत्र प्रधानत्वेनापश्यमिति । एवमेतस्मिन्मन्त्रे सूर्यः प्रधानः सूक्ते सूर्याधिकारात् । तस्मात् 'अस्य वामस्य इत्येषः

---

१ क. ख. छ. त. °पृष्ठो अस्या.° २ क. ख. ५ (२६); छ. त. २८; द. ६. ३ क. ख. घ. झ. ट. वामस्य००सप्तपुत्रम्; ग. ज. वामस्य पलितस्येति । अस्य°. ४ च. °सवनीये. ५ ग. ज. °दैवशस्त्रे. ६ क. ख. घ. झ. ट. ठ. ड. तस्य; च. अस्य° त. ७ घ. ट. ठ. ड. कतमश्वः अशनो°. ८ घ. ट. वोदकं; ठ. ड. °हरते वोदकं. ९ ठ. ड. सहस्रिणीभिरुपयाहि यज्ञमिति श्रू°. १० घ. ट. ठ. ड. हि.

'अस्य'शब्दोऽन्तोदात्तः । वायुरत्राप्रधानम् । तस्मात् 'तृतीयो भ्राता घृतपृष्ठो[1] अस्य' इत्येषः 'अस्य' शब्दोऽनुदात्तः ।

स्वरभेदे कारणम्

एवमेकस्मिन्[2]मन्त्र उदात्तानुदात्तावेतौ 'अस्य'शब्दौ प्रधानाप्रधानविषयावित्येकमेवोदाहरणम् । आह । 'तृतीयो भ्राता घृतपृष्ठो अस्य' इत्यनेन 'अस्य' शब्देन सूर्य एव कस्मान्न संबध्यते । अपि च तृतीयशब्दस्य प्रकृतानुक्रमाविरोधेनैवमेव सुखतरौ[3] योजना भविष्यति । उच्यते । 'अस्य वामस्य' इत्येतदन्तोदात्तं पदम् । इतरदन्यत्[4] ।

अनेन द्वितीय-'अस्य' पदेन सूर्यस्य निर्देशो न भवति यस्मात्स्वरकृताद्विशेषादर्थकृतेनापि विशेषेण भवितव्यम्

'तृतीयो भ्राता घृतपृष्ठो अस्य' इति समानरूपमेव सत्पूर्वेणानुदात्तमिति स्वरकृताद्विशेषादर्थकृतेनापि विशेषेण भवितव्यमित्यप्रधानार्थाभिधायितो[5]विशेषः प्रतीयते । आदित्यसंस्तवात्सूक्ते वायुश्चात्राप्रधानः प्रकृतादादित्यात् । तस्माद्वायुविषयमेवेदम् 'अस्य' इति द्वितीयपदमनुदात्तं संपद्यते । अतः सुतरामुपपन्नं भवति 'उदात्तं प्रथमादेशेऽनुदात्तमन्वादेशे' इत्यत्र प्रथमादेशान्वादेशशब्दाभ्यां प्रधानाप्रधानावुच्येते इति ।

'उदात्तं प्रथमादेशेऽनुदात्तमन्वादेशे' इत्यस्यान्यो व्याख्यामार्गः

अन्ये तु मन्यन्ते । प्रथमादेशो नाम प्रारम्भः । तत्र यद्वर्तते तदुदात्तं भवति 'प्रधानार्थतरमुदात्तम्' इत्यनेनैव लक्षणेन । तद्यथा 'अस्या ऊ षु णः' 'अस्य वामस्य' इति । अन्वादेशो नामास्य[7]पदस्य पश्चादादेशः । तत्र वर्तमानमनुदात्तं भवति । 'पदात्परस्य निघातो भवति' इति हि लक्षणविदोऽपि ब्रुवते । तथानुदात्तत्वेनैव[6] लक्षणेनाल्पीयोऽर्थतरमप्रधानार्थतरं भवति । तद्यथा । 'दीर्घायुरस्या यः पतिः' 'तृतीयो[8] भ्राता घृतपृष्ठो अस्य' इति ।

---

१ ग. च. ज. °पृष्ठोऽस्ये°. २ क. ख. ग. ज. घ. झ. ट. ठ. ड. °कस्मिन्नेवास्मिन्मन्त्रे°. ३ च. °सुखतमौ° रा. ४ क. ख. ग. च. ज. घ. ट. पुस्तकेषु विरामो नास्ति. ५ क. ख. घ. झ. ट, ठ. ड. °धायिना वि°. ६ क. ख. घ. ट. ठ. ड. °मुदात्तत्वेनैव ल;° ग. च. ज. °मुदात्तमित्यनैव ल°. ७ क. ख. ग. ज. घ. ट. ठ. ड. नामान्यस्य; च. नामा॑स्य° न्य. ८ क. ख. घ. झ. ट. ठ. ड. तच्चानु°; च. तथा° चा.

आदित्यः कथं सप्तपुत्रः

आह । कथं सप्तमपुत्र आदित्य इति । उच्यते । 'सप्तमो ह्यसावादित्यः पुत्रः' इत्येवमैतिहासिका मन्यन्ते । ब्राह्मणेऽपि च 'मृतमितरमाण्डमवापद्यत[1] (मैत्रा० सं० १ । ६ । १२) तस्मिन्नादित्यः सप्तम इन्द्रोऽष्टमः' इति ह[2] विज्ञायते । अथवा सप्तसंख्याका युक्ता अस्य रश्मयः पुत्राः तेनासौ सप्तपुत्रः । अथवा नैव संख्याभिप्रायमेतत्सप्तपुत्र इति । आह । कथं तर्हीति । उच्यते । 'सर्पणपुत्रमिति' एवम् । सर्पणा हि तस्य रश्मयः । मुहूर्तमप्यनवस्थायिनो यस्य पुत्राः सोऽयं सप्तपुत्रः । 'सप्त सृप्ता संख्या' षड्भ्यः सकाशात् । एवं सप्तसंख्योपेताः सर्पणक्रियायोगिनो वैत एव 'आदित्यरश्मयः' अस्यादित्यस्य पुत्राः 'इति' मन्त्रविदो मन्यन्ते । यथा चायं सप्तभिः सर्पणैर्वा रश्मिभिर्युज्यते तथेयमपरा ऋगेतस्मिन्नेव सूक्ते[3] ॥ २६ ॥

सप्त युञ्जन्ति रथमेकचक्रमेको अश्वो वहति सप्तनामा । त्रिनाभि चक्रमजरमनर्वं यत्रेमा विश्वा भुवनाधि तस्थुः (ऋ० सं० १ । १६४ । २) ॥ सप्त युञ्जन्ति रथमेकचक्रमेकचारिणं चक्रं चकतेर्वा चरतेर्वा क्रामतेर्वैको अश्वो वहति सप्तनामादित्यः सप्तास्मै रश्मयो रसानभिसंनामयन्ति सप्तैनमृषयः स्तुवन्तीति वेदमपीतरन्नामैतस्मादेवाभिसंनामात्संवत्सरप्रधान उत्तरोऽर्धर्चस्त्रिनाभिचक्रं त्र्यृतुः संवत्सरो ग्रीष्मो वर्षा हेमन्त इति संवत्सरः संवसन्तेऽस्मिन् भूतानि ग्रीष्मो ग्रस्यन्तेऽस्मिन्रसा वर्षा वर्षत्यासु पर्जन्यो हेमन्तो हिमवान् हिमं पुनर्हन्तेर्वा हिनोतेर्वाजरमजरणधर्माणमनर्वमप्रत्यृतमन्यस्मिन्यत्रेमानि सर्वाणि भूतान्यभिसंतिष्ठन्ते तं संवत्सरं सर्वमात्राभिः स्तौति । पञ्चारे चक्रे परिवर्तमान इति पञ्चर्तुतया[4] पञ्चर्तवः संवत्सरस्येति च ब्राह्मणं हेमन्तशिशिरयोः[5] समासेन षळर[6] आहुरर्पितमिति षळृतुतयारा[7]ः प्रत्यृता नाभौ षट् पुनः सहतेः । द्वादशारं

१ क. ख. घ. ट. ड. मृतपितरमण्ड°; ग. ज. मृतामितरमण्ड°; मृतमितरमण्ड° पि. २ ग. ज. 'ह' नास्ति; च. इति विज्ञापयति' यते. ३ क. ख. ५ (२६); ग. ६६/२८; ठ. ड. °मन्यन्ते । इति निरुक्तटीकायां चतुर्थाध्याये षड्विंशतिः खण्डः; इतरेष्वङ्को नास्ति. ४ छ. त. द. पञ्चर्तुतायाः. ५ छ. त. द. °शिशिरसमासेन. ६ क. ख. छ. त, द. ड. षलर. ७ क. ख. षडृतु°; छ. त. द. षलृतुताया अराः°.

नहि तज्जराय । द्वादश प्रधयश्चक्रमेकमिति मासानां मासा मानात्प्रधिः प्रहितो भवति । तस्मिन्त्साकं त्रिशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः । षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहोरात्रा इति च ब्राह्मणं समासेन । सप्त शतानि विंशतिश्च तस्थुः । सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रा इति च ब्राह्मणं (ऐ० आ० ३ । २ । १) विभागेन विभागेन ॥ २७ ॥[1]

इति चतुर्थाध्यायस्य चतुर्थः पादः ॥[2]

आदित्यस्य सप्तरश्मित्ववाचिनी ऋक्

' सप्त युञ्जन्ति[3] रथमेकचक्रमिति । सप्तसंख्योपेताः सर्पणा वा युञ्जन्ति योजयन्त्यात्मना रश्मयो रथं रंहणमादित्यम् । उद्यन्नेव ह्यसावादित्यो रश्मिभिः युज्यते रंहणश्चासौ मुहूर्तमप्यनवस्थायित्वात् । एकचक्रम् । एक एव ह्यसावन्तरिक्षे चरति । इतराणि ज्योतींषि नाशयत्येव स्वेन तेजसा प्रकाशेन । एकोऽश्वः । एक एवाश्वः अशनो व्यापनः सर्वभूतानां वहति गच्छति सप्तनामा सप्तस्तुतिः । सप्तपुत्र इत्येवमाद्याः सप्तसंख्यायुक्ताः[4] स्तुतयोऽस्य । अथवा ' सप्तास्मै रश्मयो रसानभिसंनामयन्ति ' एतस्मिन्मण्डल इति सप्तनामा । अथवा ' सप्तैनमृषयः ' नमन्ति ' स्तुवन्तीति वा[5] ' सप्तनामा । ' इदमपीतरत् ' शब्दनामैतस्मादेवाभिसंनामात् । तदपि स्वमर्थं प्रत्याययितुं[6] क्रियापदस्य वा गुणभावेनाभिमुख्येन संनमति । स एवंलक्षण एकचारी व्यापनः सप्तनामा सर्पणैः सप्तभिर्वा रश्मिभिर्युक्तो यदा वहत्युदयादारभ्य यावदस्तमिति तदेवं वहन्किमभिनिर्वर्तयतीति । उच्यते । त्रिनाभिचक्रमजरमनर्वम् । त्रिनाभिसंयुक्तं कालचक्रं चकनधर्मि । चकनं चलनमुच्यते । चरणधर्मि क्रमणधर्मि[7] वा । अजरमजरणधर्माणम्[8] । अनर्वमप्रत्यृतमन्यस्मिन् । अनाश्रितमित्यर्थः । त्रिनाभिचक्रम् । ' त्र्यृतुः ' हि ' संवत्सरो ग्रीष्मो वर्षा हेमन्त इति ' अनेन ऋतुप्रविभागेन[9] । एतदेवास्य त्रिनाभित्वमभिप्रेतम् ।

---

१ क. ख. ६ (२७;) छ. त. २९; द. ७. २ लिखितपुस्तकेषु ' इति० पादः ' नास्ति. ३ क. ख. घ. झ. ट. युञ्जन्ति रथ० भुवनाधितस्थुः । स°; ठ. ड. युञ्जन्तीति । सप्तसंख्यो°. ४ क. ख. घ. झ. ट. ठ. ड. °संख्याकाः; च. संख्यायुक्ताः. ५ क. ख. घ. झ. ट. ठ. ड. ' वा ' नास्ति. ६ च. प्रत्यापयितुं. ७ च. क्रामण°. ८ ग. च. ज. °जरममरणध°. ९ क. ख. घ. झ. ट. ठ. ड. ' प्र ' नास्ति.

ऋतुभिर्ह्य[1]सौ संवत्सरो नह्यते । संनह्यत इत्यर्थः । संवत्सरप्रधान उत्तरोऽर्धर्चो नादित्यप्रधानः । 'संवत्सरः संवसन्त्यस्मिन्' इति प्रसक्तानुप्रसक्तम् । समस्तानि हि 'भूतानि' एतस्मिन् संवसन्ति । मैथुनाभिप्रायो वा स्यात्संवासः । 'ग्रीष्मो ग्रस्यन्तेऽस्मिन् रसाः' सूर्येण । 'वर्षा वर्षत्यासु पर्जन्यः' । तदेतत्प्रत्यक्षमेव । 'हेमन्तो हिमवान्' । त[2]त्र हिमं बहु भवति । 'हिमं पुनर्हन्तेर्वा' । तद्धि हन्त्योषधिवनस्पतीन्[3] । 'हिनोतेर्वा' तर्पणार्थस्य । तेन हि पुष्यन्ति यवादयः । गमनार्थस्य वा[4] हन्तेः । तद्धि गमयति क्षयं भूतानि । अजरं तत्संवत्सरचक्रमजरणधर्मि । न हि संवत्सरस्य जरा नाम धर्मोऽस्ति । अनर्वं च तत् । अप्रत्यृतम् अप्रतिगतमनाश्रितमन्यत्र क्वचित् । आह । यत्र किमिति । उच्यते । यत्र यस्मिन्निमानि विश्वा विश्वानि भुवनानि भूतानि अधि उपरि तस्थुः अभिसंतिष्ठन्ते । आ[5]श्रितानि विनाशमुपयान्ति । विनाशोऽपि हि संस्थोच्यते । संस्थितः पि[6]ता ममेत्युक्ते मृत इति गम्यते । तदेवंलक्षणं त्रिनाभि कालचक्रमजरं य आदित्योऽभिनिर्वर्तयति यच्चेदमभिनिर्वर्त्यते कालचक्रं तदेतदुभयमप्यहं स्तौमीत्येवमस्य मन्त्रस्य पूर्वोऽर्धर्च आदित्यप्रधान उत्तरः संवत्सरप्रधानः ।

संवत्सरप्रधानत्वे प्रमाणम्

आह । कथं गम्यते संवत्सरप्रधान उत्तरोऽर्धर्च इति । न हि संवत्सरग्रहणमत्रास्ति । उच्यते । त्रिनाभिचक्रमित्येतस्मादृ[7]तुसंबन्धात् । आह । एतदपि विशेषलिङ्गमत्र नास्त्येव । अ[8]त्र न ऋतवो नाभिशब्देनोच्यन्त इति । तस्मादेतदप्ययुक्तमेवेति । उच्यते । य एष पूर्वस्मिन्नर्धर्चे प्रकृतेन सूर्येणाभिनिर्वर्त्यते संवत्सरो य[9]स्मिंश्च सर्वाण्येतानि भूतान्यभिसंतिष्ठन्ते तमेतं संवत्सरमुत्तरस्मिन्नर्धर्चे प्रकृत्य मन्त्र-

---

१ क. ख. घ. झ. ट. ठ. ड. 'असौ' नास्ति. २ क. ख. घ. झ. ट. ठ. ड. तत्र हि बहु भवति हिमम्. ३ क. ख. घ. झ. ट. ठ. ड. °तीन् प्राकिराति । हि°; च. °तीन्र । हि° प्रकिति. ४ घ. ट. ठ. ड. वा ह्रस्य वा हन्तेः°. ५ ठ. ड. अनाश्रितानि. ६ च. श्वाँ ममे° पिता. ७ क. ख. घ. ट. ठ. ड. °स्मादनुसं°. ८ क. ख. ग. ज. घ. झ. ठ. ठ. ड. त्रय ऋत°; च. अत्र न° त्रय. ९ क. ख. घ. ट. ठ. ड. अस्मिंश्च.

इक् त्रिनाभिचक्रमित्येवमाद्याभिः ‘ सर्वमात्राभिः ’ सर्वैरवयवैः ‘ पञ्चारे चक्रे’ ‘षडरे’ ‘ त्रीणि शतानि षष्टिश्च’ ‘सप्त शतानि विंशतिश्च’ इत्येवंप्रकारैः ‘ स्तौति ’ । तस्मात्सूक्ते संवत्सरस्यावयवस्तुतिप्रायदर्शनादिहापि त्रिनाभिशब्द ऋतुविषय इत्युपपद्यते । षण्णामृतूनां द्वौ द्वावृतू समानस्वभावावित्यनेनाभिप्रायेण त्रित्वम् । अथैवमुक्त्वा ‘ तं संवत्सरं सर्वमात्राभिः स्तौति ’ अधुना यथैतं सर्वमात्राभिः स्तौति तथोपपादयति ।

पञ्चारे चक्रे परिवर्तमाने[1] तस्मिन्ना तस्थुर्भुवनानि विश्वा[3] । तस्य नाक्षस्तप्यते भूरिभारः सनादेव न शीर्यते सनाभिः ’ [ऋ० सं० १ । १६४ । १३]

‘ पञ्चारे चक्रे ’ इत्यत्र पञ्चर्तुतया संवत्सरस्य स्तुतिः

‘ इति पञ्चर्तुतया[2] ’ संवत्सरस्य स्तुतिः । पञ्चारे चक्रे । ऋतवोऽत्रारत्वेनाभिप्रेताः । परिवर्तमाने परिगृह्येदं सर्वं जगद्वर्तमाने । आह । किमिति । उच्यते । तस्मिन्नातस्थुः । तस्मिन्नवस्थितानि उपर्यधिरूढानि । कानि । भुवनानि भूतानि विश्वानि सर्वाणि । कालचक्रे हि सर्वमेवेदं जगदधिरूढं बंभ्रमीति[4] । अथैवमतिमहतापि सर्वभूतचक्रेणाक्रान्तस्य कालचक्रस्यैवमपि भूरिभारो बहुभारः सन्नैवायमक्षः संवत्सराख्यस्तप्यते । न संतापयति । नापयास्यतीत्यर्थः[5] । अपि च सनादेव चिरंतन एव सोऽक्षस्तथापि न तप्यते न वा तप्तोऽपि सन्सहसैव विशीर्यते नश्यति । आह । यद्यक्षो न तप्यते शीर्यते वा किमेवमतिबलीयसाक्षेण घृष्यमाणा नाभिस्तप्यते शीर्यते वेति । नेत्युच्यते । सनाभिरक्षो न शीर्यते न तप्यते । नाभिरादित्य एवाभिप्रेतः । आह । कथमेतद्गम्यते ‘ पञ्चारे चक्रे ’ इत्यत्र अरशब्देन ऋतवोऽभिप्रेता इति । न ह्यत्र विशेषलिङ्गमृतूनामरत्वेऽस्ति । अपि च षड्[6]ऋतवः प्रसिद्धा इह च पञ्चार इति श्रूयते तस्मादनुपपन्नमिति । उच्यते । सूक्ते संवत्सरस्यावयवस्तुतिप्रायदर्शनादुपपद्यते । ‘ पञ्चर्तवः संवत्सरस्येति च ब्राह्मणम् । हेमन्तशिशिरसमासेन ’ । एकत्वेनेत्यर्थः । तस्मादुपपद्यत एवं पञ्चत्वमृतूनामरत्वं चावयवस्तुत्यभिसंबन्धादिति ।

---

१ म. ज. °वर्तमान इति । पञ्च°; व. ट. °वर्तमाने० शीर्यते सनाभिः. २ च. °र्तुताया. ३ क. ख. व. ट. ठ. ड. विश्वा विश्वानि. ४ ठ. ड. बभ्रमीति. ५ क. ख. घ. झ. ट. ठ. ड. नापि संतापं यास्य°; च. नापैया° पि संतापं. ६ क. ख. घ. झ. ट. ठ. ड. ऋतवः षट्.

‘पञ्चपादं पितरं द्वादशाकृतिं दिव आहुः परे अर्धे पुरीषिणम् । अथेमे अन्य उपरे विचक्षणं सप्तचक्रे षळर आहुरर्पितम्’ (ऋ० सं० १ । १६४ । १२] ॥ ‘षळर आहुरर्पितमिति षळृतुतया ’ संवत्सरस्य स्तुतिः ।

अत्र षडृतुतया संवत्सरस्य स्तुतिः

पञ्चपादं संवत्सरम् । ऋतवो हि संवत्सरस्य पादाः । तैरसौ पतति गच्छति । पितरं पालकं सर्वभूतानामुत्पादयितारं वा । द्वादशाकृतिं द्वादशमासप्रविभक्तविग्रहम् । ‘द्वादश मासाः संवत्सरस्य’ इति च ब्राह्मणम् । दिवे द्युलोकस्य परे परमेऽर्धे स्थाने योऽयमवस्थित आदित्य एतस्मिन्पञ्चपादं पितरं द्वादशाकृतिं पुरीषिणम् उदकवन्तं संवत्सरम् अर्पितमाहुः अविशेषेणान्ये ब्राह्मणाः । ‘तस्मात्सर्व ऋतवो वृष्टिमन्तः’ इति ह विज्ञायते [मैत्रा० सं० ३ । १ । ५] । तस्मात्संवत्सरस्योदकवत्त्वमुपपद्यते । अथ पुनरिमेऽन्ये य एते उपरे उपर्यवस्थिताः सप्त ऋषय एते विचक्षणं विविधानां सर्वभूतकर्मणां द्रष्टारमेतमादित्यं चक्रे षडरे एतस्मिन् संवत्सराख्ये अर्पितमाहुः । अथवा सप्तचक्र आदित्यः । स हि सप्तभीरश्मिभिश्चकते दीप्यते । ‘सप्तचक्रे’ इत्येकं पदं तस्मादेवमपि भवति । एवमेके संवत्सरमादित्यप्रविष्टमाहुः । अपरे पुनरादित्यं संवत्सरप्रविष्टमिति । एष समस्तार्थः । एवमेतस्यामृच्यादित्यसंवत्सरौ संस्तूयेते । वक्ष्यति हि ‘चन्द्रमसा वायुना संवत्सरेणेति संस्तवः’ [निरु० ७ । ११] । संवत्सरस्य चक्ररूपकेण नाभ्यादिभिः स्तुतिरुपपद्यते । ‘अराः प्रत्यृता नाभौ’ । प्रतिगता इत्यर्थः । षट् पुनः सहर्तवः । ते हि पञ्चसंख्यामभिभूय वर्तन्ते ।

‘द्वादशारं न हि तज्जराय’ ‘द्वादशप्रधयश्चक्रमेकमिति’ ‘मासानाम्’ एतौ पादौ भवत इति वाक्यशेषः । ‘द्वादश प्रधयश्चक्रमेकं त्रीणि नभ्यानि क उ तच्चिकेत । तस्मिन्त्साकं त्रिशता न शङ्कवोऽर्पिताः षष्टिर्न चलाचलासः’ [ऋ० सं० १ । १६४ । ४८] ॥ ‘मासा मानात्’ ।

---

१ ग. ज. पितरमिति । षडर आहु°; घ. ट. पितरं० रर्पितम्. २ क. ख. घ. झ. ड. षळर; च. षडर. ३ क. ख. घ. झ. ड. षळर; ग. च. ज. षडर. ४ क. ख. ग. च. ज. षडृतु°; घ. झ. ड. षळृतु°. ५ च. ‘पालकं’ नास्ति. ६ च. °दयितुं वा° तारं. ७ क. ख. घ. झ. ट. ठ. ड. °रे तस्मिन्; च. एतस्मिन्. ८ ग. ज. प्रतिष्ठ°. ९ क. ख. ग. घ. झ. ट. ठ. ड. ‘सं’ नास्ति; च. सं. १० क. ख. घ. झ. ट. ठ. ड. रूपेण. ११ क. ख. घ. झ. ट. ठ ड. जरायेति द्वा°. १२ ग. च. ज. °मेकमिति । मासा°; घ. ट. °मेकं० न चलाचलासः.

मीयते हि तैः संवत्सरः । ‘ प्रधिः प्रहितः ’ । प्रश्लेष्य चक्रे निहितः ‘ भवति ’ । गण्डपृष्ठः प्रधिरित्युच्यते । द्वादशप्रधयो मासाख्याः संहताः सन्तश्चक्रमेकं भवति । तत्र च पुनस्त्रीणि नभ्यानि फलकानि भवन्ति । त्रयं ऋतवो ग्रीष्मो वर्षा हेमन्त इति । यदेतदेवंलक्षणं चक्रं क उ तच्चिकेत । कस्तु तद्याथात्म्येन विजानाति । तस्मिंश्चक्रे साकं सह त्रिशता न शङ्कवोऽर्पिताः । त्रिशतान्यहोरात्राणि शङ्कव इवार्पिताः । षष्टिर्न षष्ट्यधिकानि त्रीण्यहोरात्रशतानि शङ्कव इवार्पितानि प्रक्षिप्तानि । द्वितीयो नकारः समुच्चयार्थे । चलाचलासः चलान्यचलानि च । चलान्यनवस्थायित्वात् । अचलान्यहोरात्रात्मभावं न मुञ्चन्ति । आह । कथं गम्यते अहोरात्राण्येतानीति । उच्यते । संवत्सरस्तुतिप्रायसंबन्धाच्च । ‘ षष्टिश्च ह वै त्रीणि च शतानि संवत्सरस्याहोरात्रा इति च ब्राह्मणम् । समासेन ’ । अहोरात्रयोरेकत्वेनेत्यर्थः ।

अत्र द्वादशमासत्वेन षष्ट्यधिकत्रिशतदिवसत्वेन च

‘ द्वादशारं नहि तज्जराय वर्वर्ति चक्रं परि द्यामृतस्य । आ पुत्रा अग्ने मिथुनासो अत्र सप्त शतानि विंशतिश्च तस्थुः ’ (ऋ० सं० १ । १६४ । ११)॥ न हि तज्जीर्यते । किं तर्हि । अन्यानि भूतानि जरयत् वर्वर्ति चक्रं पुनःपुनर्वर्तते । परि द्यां परिगृह्य द्यां च पृथिवीं च ततो वर्वर्ति । ऋतस्य उदकस्य संपूर्णम् । अथवा ऋतस्य आदित्यस्य स्वभूतम् । अथवा ऋतस्य यज्ञस्याङ्गभूतम् । आतस्थुः पुत्रा एतस्मिंश्चक्रे मिथुनाः । द्वन्द्वा इत्यर्थः । कस्य । अग्ने । अग्निशब्दोऽस्मिन्मन्त्रे संबोधनान्तः षष्ठ्या विपरिणम्यतेऽग्नेः पुत्रा आतस्थुरिति । अग्निश्चात्रादित्य एवाभिप्रेतः । तस्याहोरात्राण्येव पुत्रत्वेनोच्यन्ते तत्कृतत्वादहोरात्राणाम् । आह । कियन्तस्ते पुत्रा इति । उच्यते । सप्त शतानि विंशतिश्च । ब्राह्मणमपि चैतस्मिन्नर्थे भवति । ‘ सप्त च वै शतानि विंशतिश्च संवत्सरस्याहोरात्रा इति च ब्राह्मणमहोरात्रयोर्विभागेन विभागेन ’ इति । एवमेतस्मिन्सूक्ते संवत्सरं ‘ सर्वमात्राभिः ’ सर्वैरवयवैः

अत्र द्वादशमासत्वेन विंशत्यधिकसप्तशताहोरात्रत्वेन च

---

१ ट. ड. मण्डपृष्ठः. २ ठ. ड. तत्र. ३ क. ख. °थार्थ्यतो; घ. झ. ट. ट. ड. °थात्म्यतो; च. °थात्म्येन° तम्यतो. ४ क. ख. घ. झ. ट. चलानि च अच°. ५ ग. च. ज. °रायेति। न°; घ. ट. °राय०श्च तस्थुः. ६ ग. च. ज. जरयन्. ७ क. ख. घ. झ. ट. ‘ सं ’ नास्ति. ८ ग. ‘च’ नास्ति; च. इति ^ ब्रा° च. ९ घ. ट. ‘विभागेन’ सकृदेव

'स्तौति'। तस्मादुपपद्यते 'सप्त युञ्जन्ति' इत्येतस्यामृचि संवत्सरप्रधानस्त्रिनाभिचक्रमित्येषोऽर्धर्चः । तदेतत्सर्वमपि सप्तपुत्रसर्पण[1]पुत्रमित्येतस्मात्पदात्प्रसक्तानुप्रसक्तमुक्तम्। प्रकृतमिदानीं वर्णयिष्यामः। किंच पुनः प्रकृतम्। ऐ[2]कपदिकसमाम्नायव्याख्यान[3]म्। तत्र यदुक्तं तदुक्तमेव यदनुक्तं तद्वक्तव्यमितीदमारभ्यते 'सस्निमविन्दच्चरणे नदीनाम्' इति ॥२७॥[4]

नवमाध्याय[5]स्य चतुर्थः पादः।

इति[6] जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ ऋज्वर्थायां निरुक्तटीकायां[7] नवमोऽध्यायः समाप्तः[8]।

※ एकार्थको[1]नु[2]वयः[3]सुपर्णा[4]यदिन्द्र[5]जुष्टोदे[6]मूनाःसंमीतपन्तीषि[7]रेणमरु[8]त्वाँ[9]तितउसक्तुं[10]मिवतत्सू[11]र्यस्येन्द्रे[12]णसमी[13]मान्तास[14]कायमानःकनीन[15]के वोपो[16]अदर्शि[17]सुविते[18]विर्धामदे[19]वानआँ[20]घा[21]द्यौर्मे[22]दितिरादिति[23]रुतेस्मा[24]त्राहो[25] स्यवामस्य[26]सप्तयुञ्जन्ति[27] सप्तविंशतिः।

इति[9] निरुक्ते पूर्वषट्के चतुर्थोऽध्यायः समाप्तः।

---

१ ग. ज. °पुत्रसर्पणामित्ये°; च. °पुत्रं सर्पर्णमित्ये° पुत्र. २ ग. ज. एकपदि°. ३ च. °ख्यातम्. ४ क. ख. ६ (२७); ग. २९; इतरेष्वङ्को नास्ति. ५ थ. इति चतुर्थः पादः; च. ज. ठ. ड. 'नव...पादः' नास्ति. ६ ध. ट. नवमाध्यायश्च समाप्तः श्रीमज्जम्बूमार्गाश्रमवासिनो भगवद्दुर्गकृतवृत्तौ; झ. नवमाध्यायश्च समाप्तः°. ७ म. °रुक्तवृत्तौ टी;° ट. ड. टीकायां निघण्टुव्याख्यायसहनवमोऽध्यायः समाप्तः। समाप्तश्चतुर्थः पादः. ८ ग. 'समाप्तः' नास्ति; च. °माप्तः। चतुर्थः पादः समाप्तः; ज. °माप्तः। चतुर्थः पादः. * इयं खण्डशृङ्खला छ. त. द. पुस्तकेषु नास्ति. ९ ङ. इति. नै. पू. च. यः; थ. 'समाप्तः' नास्ति; ठ. ड. 'इति निरुक्तपूर्वषट्के चतुर्थोऽध्यायः' इदं शृङ्खलायाः प्राग्वर्तते; छ. त. इति चतुर्थोऽध्यायः समाप्तः (छ. 'समाप्तः' नास्ति); द. इति नैरुक्तस्य चतु°.

अथ पञ्चमाध्यायस्य
प्रथमः पादः।

स्निमविन्दच्चरणे नदीनाम्। संस्नातं मेघम्। वाहि-ां स्तोमो दूतो हुवन्नरा। वोळ्हृतमो ह्वानानां स्तोमो नरा मनुष्या नृत्यन्ति कर्मसु दूतो जवतेर्वा द्रवतेर्वा दूतो देवानामसि मर्त्यानामित्यपि निगमो भवति। र्वा वारयतेर्वा। सप्त स्वसॄररुषीर्वावशान इत्यपि ः वार्यं वृणोतेरथापि वरतमम्। तद्वार्यं वृणीमहे यम्। तद्वार्यं वृणीमहे वर्षिष्ठं गोपायितव्यं गोपायि-। युष्मभ्यमिति वान्ध इत्यन्ननामाध्यानीयं भवति। श्वता मद्यमन्धः। आसिञ्चतामत्रैर्मदनीयमन्धोऽ-अस्मिन्नदन्त्यमा पुनरनिर्मितं भवति पात्रं पाना-उच्यते नास्मिन्ध्यानं भवति न दर्शनमन्धंतम ऽयमपीतरोऽन्ध एतस्मादेव। पश्यदक्षण्वान्न विचे-निगमो भवति॥ १॥

(निघ० ४।२।१) इत्यनवगतम्। अर्थप्रतीति-च्यते। लक्षणासंपन्नैः संस्कारः खल्वप्यविज्ञानमित्युच्यते।

तत्रैवं सति क्वचित्प्रकृत्यादेः संस्कारस्यानवगमः क्वचिदर्थाप्रतीतिरेव क्वचिदुभयस्याप्यनवगमो यथास्मिन्नेव सस्निमिति। न विज्ञायते किमप्युक्तं भवति। प्रकरणादत्र मेघोऽभिधेयः। अन्यत्रा-ाद्यप्रकरणविशेषादेव। एवं सर्वत्रैवोपेक्षितव्यम्। प्रकरण-र्थान्तरं भजते।

वोहृतमो;० छ. त. द. वोल्हृतमो. २ छ. त. द. 'दूतो० भवति' ह. गोपितारो. ४ ठ. ड. सस्निमविन्दच्चरणे नदीनामिति। सस्नि-ग. ज. घ. ट. ठ. ड. °पन्नश्च सं°; च. °पन्नः सं° च. ६ च. घ. झ. ट. ठ. ड. °कद्योऽप्यर्था;° च. °कद्योत्यर्था° झ. ८ ग.

'सास्निमविन्दच्चरणे नदीनामपावृणोद्दुरो अश्मव्रजानाम्। प्रासां गन्
अमृतानि वोचदिन्द्रो दक्षं परि जानादहीनां

'सास्निम्' इत्यस्य प्रयोगोऽर्थश्च (ऋ० सं० १० । १३९ । ६) ॥ विश्व सोर्देवगन्धर्वस्येयमार्षम्। घर्मोत्सादने विनि(मैत्रा० सं० ४ । ९ । ११)। त

'परिषिक्ते गन्धर्वनामभिरुपतिष्ठन्त ऋत्विजो यजमानश्च' [मा श्रौ० ४ । ४ । २६] इति । तासामुपस्थानर्चामियं मध्येमैत्रायणी [मैत्रा० सं० ४ । ९ । ११] । सस्नि संस्नातम् अद्भिः परिवे सर्वतः परिप्लुतं धौतं वा मेघमविन्दत् अलभतेन्द्रः । क्व पुनरलभत । च नदीनाम् । यत्र नदना आपश्चरन्ति गच्छन्ति तत्रालभत । अन्तरिक्ष इत्यर्थः । आह । लब्ध्वानन्तरं किमकरोदिति । उच्यते । अपावृणोत् अ तवान् । उद्घाटितवानित्यर्थः । दुरः द्वारः । आह । कस्य । उच्यते । अ जानाम् अपाम् । अश्मा मेघस्तमधिरूढा या व्रजन्ति स वा यासां भूतो गोष्ठभूतस्ता अश्मव्रजा आपः । तासां निर्गमनद्वाराण्यपावृणो या एता एवंलक्षणा आपस्तासामस्य चेन्द्रस्य गन्धर्वो विश्वा प्रावोचदमृतानि नामानि च्छान्दसस्तुतियुक्तानि । तानि हि नित्य मृतानि । आह । कस्मात्पुनरस्येन्द्रस्यामृतान्यवोचदासां चापामिति । उच्य इतो यस्मादसाविन्द्रो दक्षं दातारं मेघमयमासाम् अहीनाम् अयनानामपां ष्वपावृतेषु दानाय समर्थो भविष्यतीत्येवं परिजानात् परिज्ञातवान् ज्ञाय चापावृणोद्दुरोऽश्मव्रजानां तस्मादस्येन्द्रस्यामृतानि नामानि प्रावो द्भिश्चानेन प्रकारेणेन्द्रेण दत्ताभिः सर्वमेवेदं जगद् ध्रियत इत्यासामप्यपा हेतुना प्रावोचदिति । एवमेतस्मिन्मन्त्रे 'चरणे नदीनामविन्ददपाव दुरो अश्मव्रजानां दक्षं च परिजानात्' इत्येकवाक्यतार्थसंबन्धात् 'सा शब्दो मेघविशेषणमुपपद्यते ।

---

१ घ. झ. ट. ठ. ड. द्वाराणि; च. द्वारः° राणि. २ क. ख. घ. पुस्तकेषु 'वा' स्थाने 'च' वर्तते; ट. च° वा. ३ घ. झ. ट. ठ. ड. च. प्रावो° प्र. ४ क. ख. घ. झ. ट. ठ. ड. °तानि प्रावो°; च. °तानि प्रा. ५ ग. ज. 'परिज्ञातवान्' नास्ति. ६ घ. झ. ट. ठ. ड. परिज्ञा ना च. जगन्नितयं इ° द् ध्रियत. ८ ग. ज. प्रवो°. ९ क. ख. घ. ट. दुरोऽश्म

सन्निमविन्ददित्यस्य मन्त्रस्यान्योऽर्थः

अथवायमस्य मन्त्रस्य पादव्यत्ययेनार्थः स्यात् । संस्नातं मेघमविन्ददलभतेन्द्रः पर्येष्यमाणः । क्वाविन्दत् । चरणे नदीनामपामन्तरिक्षलोके । लब्ध्वा च स एवेन्द्रस्तं मेघं दक्षं दातारमहीनामपां परिजानात् । परिज्ञाय च समर्थोऽयमिति ततस्तस्य द्वारमपावृणोदस्मत्रजानामपामधोनिर्गमनाय । तत एतानि निर्गमय्यामृतान्युदकानि सस्यसंपत्कराणि प्रावोचदिव प्राकथयदिवासाविन्द्रो गन्धर्वे आसां प्रजानां जीवध्वमेभिरुदकैरस्मद्दत्तैरिति । 'इन्द्रो गन्धर्वस्तस्य मरुतोऽप्सरसः' [मैत्रा० सं० २ । १२ । २] इति श्रूयते । तस्मादिन्द्रस्यापि गन्धर्वत्वमुपपद्यत एव । स च गोर्वज्रस्य धारयितेति गन्धर्वः ।

'वाहिष्ठः' [२] इत्यनवगतम् । 'वोढृतम' इत्यवगमः । 'वाहिष्ठो वां हवानां स्तोमो दूतो हुवन्नरा । युवाभ्यां भूत्वश्विना' [ऋ० सं० ८ । २६ । १६] ॥ गायत्री । विश्वमनसो वैयश्वस्येयमार्षं पितुर्वा व्यश्वस्य । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १५] । हे नरौ सर्वेषामेव वोढॄणां स्तोमानामाह्वातॄणां च य एष वाहिष्ठः अतिशयेन वोढा आह्वातृतमोऽयमेव दूत इव युवां हुवत् । आह्वयदित्यर्थः । योऽयमेवंलक्षणः स्तोमोऽस्मत्प्रेरितः स नित्यकालमेव युवाभ्यां भूतु । भवत्वित्यर्थः । हे अश्विनाविति संबोधनम् । 'स्तोमो दूतः' इत्येताभ्यां समानविभक्त्यन्तत्वात् 'वाहिष्ठ' शब्दः स्तोमविशेषणमित्युपपद्यते ।

निगमप्रसक्तमुच्यते । 'मनुष्या' अपि हि 'नराः' उच्यन्ते । ते हि 'नृत्यन्ति' गात्राणि पुनः पुनः प्रक्षिपन्ति 'कर्मसु' उपस्थितेषु तान्यनुतिष्ठमानाः ।

तस्यामेव ऋचि दूतशब्दः

'दूतो [३] जवतेर्वा' गत्यर्थस्य । स हि गच्छति । 'द्रवतेर्वा' गत्यर्थस्यैव [धा० १ । ९७०) । 'वारयतेर्वा' । स हि वारयत्यनर्थान् ।

---

१ क. ख. घ. झ. ट. ठ. ड. °यमप्यस्य. २ क. ख. घ. झ. ट. ठ. ड. द्वाराण्यपा°. ३ क. ख. घ. झ. ट. ठ. ड. निर्गतान्यमृ°. ४ घ. झ. ठ. ठ. ड. प्रक°. ५ च. गोर्व्रज्र°. ६ ग. °गमः ।२। वाहि°. ७ ग. वां हवानाम् । गायत्री°; घ. ट. वां० भूत्वश्विना. ८ ठ. ड. नरा नरौ. ९ क. ख. घ. झ. ट. ठ. ड. य एव एष. १० क. ख. घ. झ. ट. ठ. ड. इत्येताभ्यां.

‘वावशानः’ [४] इत्यनवगतम् । ‘वष्टेर्वा’ कान्त्यर्थस्य [धा० २ । ७०] ‘वाश्यतेर्वा’ शब्दार्थस्य [धा० ४ । ५७] वावशानः स्यात्[1] ।

‘वावशानः’ इत्यस्य प्रयोगोऽर्थश्च

‘सप्त स्वसॄररुषीर्वावशानो[2] विद्वान्मध्व उज्जभारा दृशे कम् । अन्तर्येमे अन्तरिक्षे पुराजा इच्छन्वव्रिमविदत्पूषणस्य’ [ऋ० सं० १० । ५ । ५]॥ त्रितस्याप्त्यस्ये[3]यमार्षम् । आग्नेयी । त्रिष्टुप् । प्रातरनुवाकाश्विनयोः शस्यते [आश्व०श्रौ०४।१३]। सप्त स्वसारो भगिन्य इव । या ह्यर्चिषः समानजन्मत्वादथवा सह सर्पणात्स्वसारस्ता हि सह सर्पन्ति । अरुषीः आरोचना[4]ः । दीप्ता इत्यर्थः । या एवंलक्षणा अर्चिषस्ता अग्निर्वावशानः कामयमानो वा[5] वाश्यमानो[6] वा शब्दं कुर्वाणो विद्वान् आत्मीयमधिकारं जानानो मध्वो घृतस्य हविषः पूर्णा[7] उज्जभार ऊर्ध्वं हृतवानेषां लोकानां दृशे कम् । दर्शनायेत्यर्थः । ता[8] एता ऊर्ध्वं हृत्वा दर्शनमभि व्यञ्जयित्वा जनानामन्तः आदित्यस्य मध्ये यदन्तरिक्षं तत्र येमे तत्रोपनियमितवान् तद्धविः पुराजाः अग्निः । स हि सर्वदेवेभ्यः प्रथम एव जातः । इच्छन् वव्रिं रूपम् । कस्य । पूषणस्य पूष्णो[9] आदित्यस्य । कथं नामासावादित्यो दीप्तरूपः स्यादतोऽन्तरादित्यस्य येमे । तं चासावेतमर्थम् अविदत् । अलभतेत्यर्थः । स एवं[10] दीप्तरूप आदित्यः संवृत्त इत्यभिप्रायः । एवमत्र ‘स्वसॄर्वावशान[11]’ इत्यनेन सामानाधिकरण्याच्छब्दसारूप्याच्च ‘वावशानः’ इत्यस्य कान्त्यर्थत्वं शब्दार्थत्वं वोपपद्यते ।

‘वार्यम्’ [५] इत्यनवगतम् । ‘वृणोतेः’ धातोः । यद्वरयितव्यं भवति तद्वार्यमित्युच्यते । ‘अथापि’ कदाचिद्वार्यशब्देन यत् ‘वरतमं’ श्रेष्ठतमं किंचिद्भवति तदुच्यते[12] । ‘तद्वार्यं वृणीमहे[13] वरिष्ठं

वार्यमित्यस्य

गोपयत्यम् । मित्रो यत्पान्ति वरुणो यदर्यमा’ [ऋ० सं० ८ । २५ । १३]॥ विश्वमनस इयमार्षं मैत्रावरुणे सूक्ते । तद्वार्यं वृणीमहे । वर-

१ ग. स्यात् । ३ । सप्त°. २ ग. ‘वशानो० । त्रित°; घ. ट. °वशानो० पूषणस्य. ३ क. ख. घ. झ. ट. ठ. ड. °स्याप्तस्ये°. ४ ठ. ड. ‘रोचमाना’. ५ ग. ज. ‘वा.’ नास्ति. ६ घ. झ. ट. ठ. ड. ‘वाश्यमानो वा’ नास्ति. ७ क. ख. ग. ज. पूर्ण उ°. ८ क. ख. घ. झ. ट. ठ. ड. एवं ता ऊर्ध्वं°. ९ ग. ज. पूष्ण चादि°; च. पूष्णो णो।दि° ष्णः आ. १० क. ख. घ. झ. ट. ठ. ड. एव; च. एवं° व. ११ ठ. ड. सप्त स्वसॄ°. १२ ग. °च्यते ।४। तद्वा°. १३ ग. ज. वृणीमहे वरिष्ठमिति । विश्व°; घ. ट. वृणीमहे० यदर्यमा.

यितव्यं वरणार्हं धनं वृणीमहे हे स्तोतारो वरिष्ठं गोपायत्यं गोपायितव्यम् । यद्रक्षणार्हमित्यर्थः । अथवा गोपयत्यं गोपा[1]यितारो यस्य धनस्य यूयं भविष्यथ तद्वृणीमहे । अथवा युष्मभ्यं यौष्माकीणं यद्भवति तद्वृणीमहे । किंच । नित्यकालमेव मित्रावरुणार्यमाणो यत्पान्ति । रक्षन्तीत्यर्थः । तद् वृणीमहे । एवमत्र मित्रावरुणार्यमाणो यत्पान्तीत्यनेन संबन्धात् 'वार्य'—शब्दो धनविशेषणमित्युपपद्यते ।

'अन्धः' [६] इत्यनेकार्थमनवगतं च । 'आध्यानीयम्' इत्यर्थप्रतीतिः । प्रार्थनीयमन्नं भवति सर्वस्यैवं । 'अध्वर्यवो[2] भरतेन्द्राय

अन्ध इत्यस्य — सोम[3]मामत्रेभिः सिञ्चता मद्यमन्धः । कामी हि वीरः सदमस्य पीतिं जुहोत वृष्णे तदिदेष वष्टि' [ऋ० सं० २ । १४ । १] ॥ गृत्समदस्येयमार्षम् । रात्रिपर्याये शस्यते । होतुः शस्त्रे विनियुक्ता [आश्व० श्रौ० ६ । ४] । अस्यैव च शस्त्र[4]स्य याज्यैषा (तथैव) । हे अध्वर्यवो भरत प्रापयतेमं सोमम् एतस्माद्धविर्धानादुत्तरवेदिम् इन्द्राय इन्द्रार्थम् । अथवा भरत धारयताग्नेरुपरि । ततश्चैनम् अमत्रेभिः अमत्रैः पात्रैरेभिः सोमचमसैः वषट्कारे प्राप्ते आसिञ्चत एतस्मिन्नग्नौ मद्यं मदनीयमेतत्सोमाख्यमन्धः । कस्मात्पुनरेवं ब्रवीमि । इतो यस्मात् कामी हि वीरः । कामयत एव वीर इन्द्रः अस्य[5] सोमस्य सदं सदैव नित्यकालमेव पीतिम् । पानमित्यर्थः । तस्मात्कारणात् जुहोत तस्मै वृष्णे वर्षित्रे इन्द्रायैतं सोमम् । किमेतमेव केवलं सोममेष कामयते । नेत्युच्यते । तदिदेष वष्टि । तत्तत्सोमप्रदानमेष इन्द्रो वष्टि । कामयत इत्यर्थः । न केवलं रात्रिपर्यायेष्वित्यर्थः । तस्मादासिञ्चतेमं सोमं मा विलम्बध्वमित्यभिप्रायः । एवमत्र दानसंबन्धात् 'अन्धः' शब्दोऽन्नार्थ उपपद्यते । पठितमपि चान्ननामसु (निघ० २ । ७] । अनेकार्थत्वात्तु संदिह्यत इत्येष निगम उपात्तः ।

निगमप्रसक्तमुच्यते । 'अमत्रं पात्रम् । अमा अस्मिन्नदन्ति' । अश्नन्तीत्यर्थः । 'अमा' शब्देन 'पुनः' यदनिर्मित[6]परिमाणं किंचिद्भवति तदुच्यते । न हि तेषां परिमाणमस्ति यावन्तस्तस्मिन्नदन्ति । 'पात्रं

---

१ क. ख. गोपितारो; घ. झ. ट. ठ. ड. गोपयितारो. २ ग. °स्यैव । ५ । अध्व°. ३ ग. ज. सोममिति । गृत्स°; घ. ट. सोमं० देष वष्टि. ४ च. शस्त्रस्य° सोम. ५ ग. च. ज. यस्य. ६ घ. झ. ट. ठ. ड. °मितं अपरि°.

पानात्'। पीयते हि तेन। तमोऽप्यन्ध उच्यते'। किं कारणम्। 'नास्मिन् ध्यानं' दर्शनंकृतं 'भवति' चक्षुषो दृष्टिनिरोधात्। लौकिका अपि दर्शननिरोधे सति 'अन्धंतम इत्यभिभाषन्ते'। स्त्रियः सतीस्ताँ उ मे पुंस आहुः पश्यदक्षण्वान्न वि चेतदन्धः। कविर्यः पुत्रः स ईमा चिकेत यस्ता विजानात्स पितुष्पितासत्' [ऋ० सं० १। १६४। १६)॥ अस्यवामीये। त्रायतेः पालनार्थस्यात्र स्त्रीशब्दो निरुच्यते। पालयिन्त्य एवैताः सत्यः कृत्स्नस्य जगत एत एव रश्मयो नाडीभिराध्यात्मिकीभिरनुप्रविश्य प्राणिनां शरीराण्यन्नपक्तिं कुर्वन्ति ततः स्थितिरुपजायते। एत एव वर्षप्रदानेन कृत्स्नं जगत्त्रायन्ते तस्मात्त्राणात्स्त्रिय एताः। 'तान्' इति नकारान्तं पदम्। 'उ' इति पदपूरण एव। तानेवंलक्षणान्रश्मीन् पालयितॄन् सतः। मे ममेति मन्त्रदृगात्मानं निर्दिशति। मेमैतान् पुंस आहुः। एत एव रश्मयो बहुप्रज्ञाना इत्येवं ब्रह्मविद आहुः। एत एवान्नपक्त्यादिनोपकारेणोपकुर्वन्तो जगत्त्रायन्ते। एत एव बुद्धेः सर्वार्थप्रकाशित्वेनोपकुर्वन्तीत्यभिप्रायः। आदित्यान्तरपुरुषो हि बुद्ध्यधिदेवता। तदवयवभूताश्च रश्मयः। ते नाड्यन्तर्गता अध्यात्मपुरुषस्य विज्ञानमुपहरन्ति। अतस्तेषां बहुप्रज्ञानत्वमुपपद्यते। आह। कः पुनरेतान्रश्मीनेवंगुणयुक्तान् पश्यतीति। पश्यदक्षण्वान्न विचेतदन्धः। यो ह्यक्षण्वान्भवति दर्शनवान् विज्ञानवान् वेदार्थविज्ञानेनोपजनितप्रज्ञः स एव ताभ्यां गुणाभ्यां युक्तान् पश्यन्नास्ते नित्यकालं नित्ययुक्तत्वात्। इतरस्तु योऽन्धः अध्यानवान् अश्रुतवेदोपनिषत्कः स मन्दबुद्धित्वान्न विचेतत् नैतान्याथात्म्यतः पश्यति। न विजानातीत्यर्थः। यः पुनरेवमेतान्याथात्म्यतः पश्यति स एव कविः क्रान्तदर्शनो भवति। परिनिष्ठितविद्य इत्यर्थः। स च परिनिष्ठितविद्यत्वादेव पुत्रः पुरुणो बहुनोऽहसस्त्राता। यश्चायमेवंगुणयुक्तः

अदर्शनलक्षणतमोऽर्थे 'अन्ध'शब्दस्य प्रयोगः

---

१ क. ख. घ. झ. ट. ठ. ड. दर्शनं कृतं. २ ग. °षन्ते। १६। स्त्रियः°. ३ ग. ज. मे पुंस आहुरिति। अस्य°; घ. ट. मे० ष्पितासत्. ४ घ. झ. ट. मामेतान्; ज. मानैतान्. ५ घ. झ. ट. इत्येव. ६ क. ख. ब. झ. ट. कुर्वन्ति ज°. ७ घ. झ. ट. ठ. ड. अत ए°. ८ ग. ज. तेऽत्यन्तर्ग°. ९ क. ख. घ. झ. ट. ठ. ड. आध्या; च. अध्या° आ.

स ईम् आचिकेत । 'ईम्' इति पदपूरणः । आचिकेत । स एवैतानेवमाभिमुख्येन यथावत्पश्यति नेतरो मूढः । यश्चैतानेवं पश्यति स एव पितुरपि पिता भवतीत्यर्थः । स ह्याधिदैविकमात्मानमभिसंपन्नो भवति । न हि तस्य पिता नाम कश्चित् । स एव हि सर्वेषां जनानां पिता भवतीत्यभिप्रायः । एवमेतस्मिन् मन्त्रे य एवाक्षण्वान् भवति स एव पश्यतीत्यस्य संनिधौ 'न विजानात्यन्धः' इत्यस्य प्रयोगाददर्शनलक्षणं तमः 'अन्धः' शब्देनोच्यत इत्युपपद्यते ।

'असश्चन्ती' (७) इत्यनवगतम् । 'असज्यमाने इति वा' इत्यर्थप्रतीतिः । 'अव्युदस्यन्त्याविति वा' इति ॥ १ ॥

असश्चन्ती भूरिधारे पयस्वती । असज्यमाने इति वाव्युदस्यन्त्याविति वा बहुधारे उदकवत्यौ वनुष्यतिर्हन्तिकर्मानवगतसंस्कारो भवति । वनुयाम वनुष्यत इत्यपि निगमो भवति । दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः । दीर्घप्रततयज्ञमभिजिघांसति यो वयं तं जयेम पृतनासु दूढ्यं दुर्धियं पापधियं पापः पातापेयानां पापत्यमानोऽवाङेव पततीति वा पापत्यतेर्वा स्यात्तरुष्यतिरप्येवंकर्मा । इन्द्रेण युजा तरुषेम वृत्रमित्यपि निगमो भवति भन्दना भन्दतेः स्तुतिकर्मणः । पुरुप्रियो भन्दते धामभिः कविरित्यपि निगमो भवति । स भन्दना उदियर्ति प्रजावतीरिति च । अन्येन मदाहनो याहि तूयम् । अन्येन मदाहनो गच्छ क्षिप्रमाहंसीव भाषमाणेत्यसभ्यभाषणादाहना इव भवत्येतस्मादाहनः स्यादृषिर्नदो भवति नदतेः स्तुतिकर्मणः । नदस्य मा रुधतः काम आगन् । नदनस्य मा रुधतः काम आगमत्संरुद्धप्रजननस्य ब्रह्मचारिण इत्यृषिपुत्र्या विलपितं वेदयन्ते ॥ २ ॥

'असश्चन्ती भूरिधारे पयस्वती घृतं दुहाते सुकृते शुचिव्रते । राजन्ती

---

१ घ. झ. ट. ठ. ड. पाद°; च. पद° पा. २ घ. झ. ट. ठ. ड. इत्यन्धःशब्दप्रयो°. ३ ठ. ड. °पद्यते । इति नैरुक्तटीकायां पञ्चमाध्याये प्रथमः खण्डः । अस°. ४ ठ. ड. असश्चन्ती इति । अस°. ५ क. ख. १; ग. ७।१; इतरेष्वङ्को नास्ति. ६ त. द. पापच्यमानो°.

अस्य भुवनस्य रोदसी

अस्मे रेतः सिञ्चतं यन्मनुर्हितम्' (ऋ० सं० ६ । ७० । २] ॥ भरद्वाजस्येयमार्षम् । अभि-

असश्चन्ती इत्यस्य

प्लवस्य षडहस्य पञ्चमेऽहनि तृतीयसवने वैश्वदेवे शस्त्रे द्यावापृथिवीये निविद्धानीये सूक्ते शस्यते [आश्व० श्रौ० ७ । ७] । असज्यमाने असंश्लिष्यमाणे परस्परत एते द्यावापृथिव्यौ । भूरिधारे बहुधारे बहूदकप्रक्षरणस्वभावे एव । अथवा बहु भूतं धारयित्र्यौ । पयस्वती उदकवत्यौ । घृतम् उदकं द्वे अप्येते दुहाते प्रपूरयेते इतरेतरसंभोगेन । सुकृते शोभने कृते सुकृते । अथवा शोभनानां स्वाधिकारप्रयुक्तानां कर्मणां कर्त्र्यौ । शुचिव्रते शुक्लकर्माणावित्यर्थः । राजन्ती दीप्यमाने स्वैः स्वैस्तेजोभिः । अस्य भुवनस्य भूतजातस्य रोदसी रोधसी रोधयित्र्यौ । ये एते एवंलक्षणे द्यावापृथिव्यौ ते अस्मे अस्मभ्यं रेत उदकं सिञ्चतम् अभिमते काले । किंलक्षणं पुनः सिञ्चतम् । यन्मनुर्हितं मनुष्यहितम् । अक्षारं सस्यसंपत्करमित्यभिप्रायः । एवमेतस्मिन्मन्त्रे भूरिधारे इत्येवमादिभिः समानविभक्त्यन्तत्वात् 'असश्चन्ती' इति द्यावापृथिवीविशेषणमित्येतदुपपद्यते 'असज्यमाने इति' । न हि ते सज्येते परस्परतः । 'अव्युदसन्त्यौ वा' । अनुपक्षियन्त्यौ अविपर्यस्यन्त्यौ वा । न हि ते उपक्षीयेते विपर्यस्येते वेति ।

'वनुष्यतिः [८] हन्तिकर्मा' हन्त्यर्थे वर्तमानः 'अनवगतसंस्कारो भवति' । यदिन्द्राग्नी जना इमे विह्वयन्ते तना

वनुष्यतिर्हन्तिकर्मा इत्यस्य

गिरा । अस्माकेभिर्नृभिर्वयं सासह्याम पृतन्यतो वनुयाम वनुष्यतो नभन्तामन्यके समे' [ऋ० स० ८ । ४० । ७] ॥ नाभाकस्यार्षम् । महाव्रते महदुक्थे शस्यते [ऐ० आ ५ । ३ । १] । अस्याः पुनरष्टाक्षराः षट् पादाः । छन्दसां पुनरनुक्रमण्यां शौनकेनाग्निमस्तोषीत्यत आरभ्य जागतानि त्रीणि सूक्तानि अनुक्रान्तानि [छन्दोनुक्रमणी ८ । २५] । तेषामपीयं मध्ये । हे इन्द्राग्नी यत् यदा इमे जनाः येऽस्मदीयाः परकीयाश्च

---

१ घ. ये भूरि°; ट. ये भूरि°. २ क. ख. घ. झ. ट. ठ. ड. 'सुकृते' नास्ति. ३ क. ख. ग. ज. घ. झ. ट. ठ. ड. °कर्मणी इत्य°; च. °कर्माणावित्य° भणी इ. ४ क. ख. घ. झ. ट. ठ. ड. 'एतत्' नास्ति. ५ ग. °वति । ८ । यद्दि°. ६ ग. ज. इमे इति । नाभा°; ध. ट इमे० न्यके समे.

ते उभयेऽपि विह्वयन्ते व्यत्ययेनेतरेतरमाह्वयन्ते विजिगीषु[1]तया तना संततया गिरा वाचा । अथवा तना धनेन निमित्तभूतेन जेतव्येन पुरस्कृतेन विह्वयन्ते । तदा युवाम् अस्माकेभिः अस्मदीयैः नृभिः मनुष्यैः सहितौ भूयास्तम् । ते वयं युवाभ्यां सहिताः सासह्याम पुनःपुनरभिभवेम । कान् । य एते पृतन्यतः पृतनामस्माभिः सह कर्तुमिच्छन्ति तानभिभवेम । किंच । वनुयाम वनुष्यतः । ये चैतेषामस्माभिः सह संयत्ता[2] एवं[3] संप्रहारीभूता वनुष्यन्त्यस्मान् घ्नन्त्येव एतांश्च वनुष्यतो वनुयामः । वयं हन्म इत्यर्थः । कथं पुनर्हन्मे[4] इति । उच्यते । यथा नभन्तामन्यके समे । मा भूवन्नन्यके सर्वे । युवयोरनुग्रहाद्धन्मे[5] इत्यभिप्रायः । एवमेतस्मिन्मन्त्रे सासह्याम पृतन्यतः इत्येतस्मिन्[6]संग्रामाधिकारे वनुष्यतेर्हन्त्यर्थत्वमुपपद्यते । न हि संग्राममेत्य[7] हननादन्यत्कर्तव्यमस्ति यत्क्रियते[8] ।

' इन्द्रावरुणा युवमध्वराय नो विशे जनाय महि शर्म यच्छतम् । दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः' (ऋ० सं० ७ । ८२ । १] ।। वसिष्ठस्येयमार्षम् । जगती ।

तस्यैव द्वितीयमुदाहरणम् तार्तीयसवनिकीये मैत्रावरुणस्य शस्त्रे विनियुक्ता । [आश्व० श्रौ० ६ । १] हे इन्द्रावरुणौ युवम् । युवामित्यर्थः । अध्वराय नो यज्ञायास्माकं विशे जनाय सर्वस्मै मनुष्यजनायास्मत्संत्ताकाय[9] महि महत् शर्म सुखं यच्छतम् । दत्तमित्यर्थः । दीर्घप्रयज्युं दीर्घप्रततयज्ञं नित्यं[10] यायजूकम् अग्निहोत्रिणम् अति यो वनुष्यति अभि[11]जिघांसति योऽभिहन्तुमिच्छति । किं तस्येति । उच्यते । वयं जयेम पृतनासु संग्रामेषु दूढ्यः[12] दुर्धियः[13] पापधियः । पापया धिया हि दीर्घप्रततयज्ञं[14]भिजिघांसेत्युच्यते । एवमत्रापि

---

१ ग. ज. विजगीषुया; ध. झ. ठ. ड. °गीषतया; ट. °गीषतया° षु. २ ग. ज. संयत्ता ए°. ३ च. °एष सह संप्र°. ४ ग. च. ज. °र्हन्मेति° ५ ग. च. ज. °द्धन्मेत्य°. ६ घ. ट. ठ. ड. °स्मिन्त्संग्रा°. ७ क. ख. घ. झ. ट. ठ. ड. संग्रामे हन°; च. एत्य. ८ ग. °यते; ।९। इन्द्रा;° च. क्रियते° यते. ९ क. ख. ग. ज. °स्मत्सर्वकामाय महि°; ट. °स्मत्सत्ताकाय° र्षकामा. १० क. ख. घ. झ. ट. ठ. ड. नित्ययाय°. ११ घ. झ. ट. ठ. ड. अभि यो जिघां°. १२ च. दूढ्यः° ढ्यं. १३ क. ख. घ. झ. ट. ठ. ड. दुर्धियं पापधियं; च. दुर्धियः [यं] पापधियः [यं]. १४ क. ख. घ. झ. ट. ठ. ड. °यज्ञमभिजिघांसति । एव°; ग. ज. °यज्ञोऽभिजिघांस्यते; च. यज्ञाभिजिघांसेति उच्यते° ज्ञोऽभिजिघांस्यते° ज्ञं भिजिघांसति.

प्रकरणात् ‘ वनुष्यतिः ’ हन्त्यर्थः । अल्पप्रयोगविषयत्वाद्भाष्यकारेण निगमद्वयं पठितम् ।

व्याख्यानप्रसक्तमुच्यते । ‘ पापः पाता पेयानाम् ’ । अपेयान्यलेह्यानि यानि तान्यसौ पिबति । विषयप्रसक्त इत्यर्थः । ‘ पापैत्यमानः ’ पुनः पुनः पैत्यमानस्तेनैव पापेन कर्मणा ‘ अवाङेव ’ नरकमेव प्रति ‘पतति’ असौ तस्मात् ‘ वा ’ पापः ।

‘ तरुष्यतिः [९] अप्येवंकर्मा ’ । हन्तिकर्मेत्यर्थः । ‘ ऋभुर्ऋभुभिरभि वः स्याम विभ्वो विभुभिः शवसा शवांसि । वाजो अस्माँ अवतु वाजसाताविन्द्रेण युजा तरुषेम वृत्रम् ’ (ऋ० सं० ७ । ४८ । २] ॥ वसिष्ठस्येयमार्षम् । त्रिष्टुप् । अविवाक्ये तृतीयसवने वैश्वदेवे शस्त्रे आर्भवे सूक्ते निविद्धानीये शस्यते [आश्व० श्रौ० ८ । १२] । हे शत्रव ऋभव उरुभासो वयम् उरुभाभिः ऋभुभिः देवैः सहिता अभि वः स्याम अभिभवेम युष्मान्वयम् । हे विभ्वः विभुभिः विभूतबलैर्युष्माभिः सहिताः शवसा स्वेन बलेनैतेषामभिभवितॄणां शवांसि बलान्यभिभवेम । किंच । वाजो अस्मानवतु रक्षतु । कस्मिन् । वाजसातौ संग्रामे । इन्द्रेण च युजा संयुक्ताः सन्तो वयं तरुषेम हन्मैनं वृत्रम् । शत्रुमित्यर्थः । अभिभवाधिकारात्तरुष्यतिर्हन्त्यर्थ उपपद्यते ।

तरुष्यतिरित्यस्य प्रयोगोऽर्थश्च

‘ भन्दना [१०] भन्दतेः स्तुतिकर्मणः ’ स्तुत्यर्थे वर्तमानस्य । ‘पिता यज्ञानामसुरो विपश्चितां विमानमग्निर्वयुनं च वाघताम् । आ विवेश रोदसी भूरिवर्पसा पुरुप्रियो भन्दते धामभिः कविः ’ [ऋ० सं० ३ । ३ । ४] ॥ विश्वामित्रस्येयमार्षम् । पृष्ठ्यस्य प्रथमेऽहन्याग्निमारुते शस्त्रे वैश्वानरीये सूक्ते निविद्धानीये शस्यते [ऐ० ब्रा० २० । २] । पिता यज्ञानां पालयिता यज्ञानाम् अग्निः

भन्दतेः स्तुतिकर्मण इत्यस्य

---

१ ग. ज. पापच्यमान. २ ग. ज. पात्य°. ३ ग. °त्यर्थः । १० । ऋभु°. ४ ग. स्याम० वृत्रं; घ. ट. स्याम० तरुषेम वृत्रं. ५ क. झ. ट. ठ. ड. ‘ शत्रवः ’ नास्ति; च. शत्रव उरुभा° ऋभ. ६ ट. °भूतबलै°.; ठ. विभूतैर्युक्तैः यु° ति; ड. विभूतवक्तैः यु°. ७ ठ. ड. ‘ च ’ नास्ति. ८ ग. °नस्य । ११ । पिता. ९ घ. झ. ट. ठ. ड. °मार्षं जगती । पृ°; च. °मार्षं पृ° जगती. १० क. ख. घ. झ. ट. ठ. ड. °शस्त्रे निविद्धानीये वैश्वानरीये सूक्ते शस्य°; च. वैश्वानरीये सूक्ते निविद्धानीये.

असुरः प्रज्ञावान् विपश्चितां प्रज्ञावतामपि मध्ये प्रज्ञावान् । विमानं विनिर्माणं कृत्स्नस्य जगतः । अग्निनैव ह्यग्निहोत्रादिकर्मद्वारेण कृत्स्नं जगद्विनिर्मीयते । वयुनं च प्रज्ञानम् अयमेव वाघताम् ऋत्विजाम् । ऋत्विजो ह्ययमेवाग्निर्विशिष्टं यज्ञसाधनमित्येवं मन्यन्ते । योऽयमेवंलक्षणोऽग्निः आविवेश रोदसी द्यावापृथिव्यौ भूरिवर्पसा बहुरूपत्वेन[1] तमेवंगुणयुक्तमग्निं पुरुप्रियो बहुकामप्रियः स्तोता भन्दते स्तौति धामभिर्नामभिरनेकप्रकारैः कविः । क्रान्तदर्शन इत्यर्थः । पुरुप्रियो हि स्तोता धामभिरग्नेः किमन्यत्स्तुतेः कुर्यात् । तस्मादुपपद्यते स्तुत्यर्थत्वमस्य[2] ।

'स भन्दना उदियर्ति[3] प्रजावतीर्विश्वायुर्विश्वाः सुभरा अहर्दिवि[4] । ब्रह्म प्रजावद्रयिमश्वपस्त्यं पीत इन्दविन्द्रमस्मभ्यं याचतात्' (ऋ०सं०९।८६ ।

भन्दना इत्यस्य ४१] ॥ भौमोऽत्रिस्तस्येयमार्षम्[5] । जगती । प्र त आशवः पवमान धीजवः इत्यष्टाचत्वारिंशके महासूक्ते [ऋ० सं० ९ । ८६] एकचत्वारिंशत्तमी पावमानी सौमी । यदि मम याज्ञं[6] कर्मोपनमेत्सुनुयामहमेतं[7] सोमं तत्रेति य एवं नित्यकालमाशास्ते स एव[8] सांप्रतमस्मिन्सोमकर्मण्युपनते[9] हे सोम तव भन्दनाः स्तुतीः उदियर्ति उदीरयति प्रजावतीः[10] प्रजासंयुक्ताः । प्रजालिङ्गा इत्यर्थः । विश्वायुः । विश्वमयतीति विश्वायुः । सर्वत्राप्रतिहतप्रज्ञान इत्यर्थः । सर्वतो वा विश्वायुः । विश्वाः सर्वप्रकाराः । नामबन्धुकर्मरूपसंबद्धा स्तुतिः[11] ।

---

१ घ. झ. ट. ठ. ड. °र्पसा पार्थिववैद्युतादिबहु°; च. बहुरूपत्वेन° पार्थिववैद्युतादिरूपेण. २ ग. °मस्य । १२ । स°. ३ ग. उदियर्ति प्रजावती० । वासिष्ठो इत्यादि । यदि°; घ. ट. उदियर्ति० भ्यं याचतात्. ४ ज. अहर्दिवि । वासिष्ठो इत्यादि । यदि. ५ ग. ज. वासिष्ठो मृडीको नामाष्टमस्तस्येयमार्षं महासूक्ते जगती पावमानी सौमी वा । यदि°; च. वासि ·०० सौमी वा यदि° भौमोऽत्रि०० मानी सौमी. ६ ठ. ड. याज्ञकर्मोप्युपस्थितं भवेत् अहमेतत्स्तुनुयामहमेतं°. ७ क. ख. °मेत्तत्सुयामह°; ग. ज. घ. ठ. ड. °त्तत्स्तुयामह°; च. मेत्तत्सुन्या° नु; ट. °मेत्तत्स्तुया° त्सुनुया° पाठः. ८ घ. ट. एव. ९ क. ख. झ. °स्मिन्स्तोम°. १० घ. झ. ट. प्रजाः प्रजाव°. ११ ग. ज. ठ. ड. °द्धा स्तुतीः । ना°; च. संबन्धा (द्धा) स्तुतिः । (तीः) ना; °घ. ट. °द्धा स्तुतिः.

'नाम्ना बन्धुभिः कर्मणा रूपेण' इति ह्युक्तम्। सुभराः सुभृताः सुपुष्टाः स्थानकरणानुप्रदानवत्यो युष्मद्गुणैरलंकृताः। अहर्दिवि अहनि च रात्रौ च। रात्रिपर्यायाभिप्रायेण दिवि च[1] दिवैव। नित्यकालमेवेत्यभिप्रायः। कं पुनरर्थमुपेत्य स्तुतीरुदीरयति। ब्रह्म प्रजावत् अन्नं प्रजासंयुक्तं भोक्तृसहितं रयिं च धनं च[2] गोहिरण्यादि अश्वपस्त्यम् अश्वैः पतनसमर्थैः शाघ्रैः संयुक्तं पीतस्त्वमस्माभिरस्मिन्कर्मणि हे इन्दो सोम इन्द्रमस्मदर्थे[3] याचतात्। याचस्वेत्यर्थः। एतमर्थमभिप्रेत्य स्तुतीरुदीरयति। भन्दना उदियर्तीत्युदीरणसंबन्धात्स्तुतय एता भन्दनाशब्देनोच्यन्त इत्युपपद्यते। पूर्वमाख्यातपदसंबद्धमुदाहरणं 'पुरुप्रियो भन्दते धामभिः' इति। इदं तु नामपदसंबद्धं 'स भन्दना उदियर्ति प्रजावतीः' इति च। उभयथा[3] प्रयोगोऽस्तीत्युभयमुपप्रदर्शितमल्पप्रयोगविषयत्वाच्च।

'आहनः' [११] इत्येतदर्सतः संबोधनमनवगतमप्रतीयमानार्थत्वात्। 'आहंसि'[4] इत्यर्थप्रतीतिः। 'न तिष्ठन्ति न नि मिषन्त्येते देवानां स्पश इह ये चरन्ति। अन्येन मदाहनो याहि तूयं तेन वि वृह रथ्येव चक्रा'[6] [ऋ० सं० १० । १० । ८]॥ आहनः इत्यस्य यमस्य यम्याश्च संवादसूक्तं तत्र यमस्येयमार्षम्। स यमीं मैथुनाय प्रार्थयमानां ब्रवीति। हे यमि मा मंस्थाः सांप्रतं रहो वर्तत इति। किंतु न तिष्ठन्ति मुहूर्तमप्येते। जनानां रन्ध्रान्वेषणतत्परा इत्याभिप्रायः। अपि च। न निमिषन्ति अनिमिषाः। आद्रवन्त इत्याभिप्रायः। के पुनस्त इति। उच्यते। एते देवानां स्वभूता य इहैतास्मिँल्लोके स्पशः स्पाशयितारः कृताकृतानां कर्मणां चिह्नयितारः। 'ब्रह्मानध्वर्युः स्पाशयेत' [काठ० सं० ३५ । १७] इत्यत्रापि स्पाशयतिश्चिह्नार्थः[7] श्रूयते। कतमे। पुनरत्त इति। उच्यते। 'अहश्च रात्रिश्च

१ क. ख. घ. झ. ट. ठ. ड. 'दिवि च दिवैव' नास्ति; च. दिवि च दिवैव. २ च. धनं च; इतरेषु 'च' नास्ति. ३ घ. झ. ट. 'यथापि प्र°. ४ ञ. झ. ट. °तदसभ्ये सं;° ठ. ड. °तदस्तभ्यं सं°; च. तदनेवतः सं° सम्यं. ५ ग. °तीतिः। १३। न°. ६ म. °न्त्येते० चक्रा; घ. ट. °न्त्येते० स्थ्येव चक्रा. ७ म. ज. चिन्हनार्थः; च. चिन्हार्थः° न्हना.

उभे च संध्ये' [याज्ञ०मिताक्षरा०दिव्य प्रक०१०२] 'सूर्याचन्द्रमसौ' 'वायुश्चान्तरपुरुषः' इत्येवमादयः । न ह्येतेषां किंचिदविदितं परोक्षमस्तीत्यभिप्रायः । यतो ब्रवीमि । अन्यकुलजेन केनचित्पुरुषेण मत्तस्त्वं हे आहनः मैथुनं याहि तूयं क्षिप्रम् । 'आहंसीव' असभ्यमेतत् 'भाषमाणा' त्वम् । नाहमेतदसभ्यं श्रोतुमप्युत्सहे तव किं पुनः कर्तुम् । तस्मान्मत्तोऽन्येन मैथुनार्थं चर । तेनैव सह विवृह अभ्युद्यच्छस्वात्मानं मैथुनकर्मणि । रथ्येव चक्रौ[1] । यथा रथचक्रे द्वे अभ्युद्यच्छत एवमेकमनस्त्वमुपपाद्य तेनैकभूतेन मनसा अक्षेणेवोभे अपि शरीरे । त्वं च तस्य कामिनः सेक्तं[2] स च तव । तेनैव सह तवैतस्मिन्नर्थे एकमनस्त्वमस्त्विति न मया सार्धम् । एतस्मिन्नर्थेऽभ्युद्यच्छमाना न मां शक्ष्यसे कम्पयितुमित्यभिप्रायः । एवमेतस्मिन्मन्त्रेऽनिष्टत्वान्मैथुनसमाचारस्य 'आहनः' इत्येतद्यमीविषयं[3] संबोधनम् । आहन्यत इव हि स यमस्तयाऽनेन दुर्वचनेन । तस्मात्सैवं संबोध्यते आहन इति । 'एतस्मात्' एव कारणात् 'आहनः स्यात्' । योऽयमसत्प्रदेशः स्त्रिया असावपि हि यस्य संनिधौ संकीर्त्यते स आहन्यत इवासभ्यत्वात्तस्य । 'अयज्ञियो वै पुरुषोऽमेध्य आहनस्याज्जायते[4]' इति विज्ञायते [मैत्रा० सं० १ । ६ । ४] ।

'नदः' [१२] इत्यनवगतम् । 'ऋषिर्नदो भवति' इति शब्दस्य पर्यायेण तत्त्ववचनम् । 'नदतेः स्तुतिकर्मणः' इति व्युत्पत्तिः । नन्दिता[5] वा नर्दनो[6] वेत्यर्थप्रतीतिः[7] । 'नदस्य मा रुधतः कामं[8] आगन्नित आजातो

अमुतः कुतश्चित् । लोपामुद्रा वृषणं नी रिणाति

नदः इत्यस्य धीरमधीरा धयति श्वसन्तम्' (ऋ० सं० १ ।

१७९ । ४) ॥ अगस्त्यलोपामुद्राब्रह्मचारि-

सूक्तसंवादे लोपामुद्राया इयमार्षम् । साब्रवीदगस्त्यं भर्तारमभिप्रेत्य । नदस्य नदनस्य नन्दितुर्वा[9] देवतास्तोतुरस्यागस्त्यस्य रुधतः संरुद्धवतः इन्द्रियग्रामं मामयं कामः आगन् आगतवान् येनाहं सांप्रतं पीडये । सा

१ क. ख. ग. ज. घ. झ. ट. ठ. ड. चक्रा रथचक्रे इव । यथैकमक्षं रथचक्रे° (ग. ज. 'रथचक्रे इव' नास्ति); च. चक्रा यथा रथचक्रे द्वे° रथचक्रे इव । यथैकमक्षं. २ च. सक्तं° क्तौ (क्तं). ३ च. °यमि वि°. ४ ग. ज. °स्या जाय°; घ. 'स्याः जाय°; ट. °स्याःजाय° स्याज्जा. ५ क. ख.ग. ज. घ. ट. नदिता. ६ ग. नदितो वे°; ज. नदतो वे°. ७ ग. °तीतिः । १४ । नद°. ८ ग. काम आगन्नित० श्वसन्तम् ; घ. ट. कामः० धयति श्वसन्तम्. ९ क. ख. ग. ज. घ. ट. ठ. ड. नदितुर्वा.

पुनरेवं न जाने किमित एवास्मच्छरीराज्जातो ममोपरि ह्यभिव्यक्तोऽस्मत्पीडनायाथवा अमुतः अगस्त्यस्य[1] शरीरात् । पुरुषगुणानुस्मरणाद्धि स्त्रियाः कामो जायतेऽभिव्यज्यते पुरुषस्य च ह्यनुस्मरणात् । अत एव स्मर इति काम उच्यते । तस्मादुपपद्यत इतो वास्मच्छरीरादमुतो वा नदशरीरात्कुत आजात इति । अथवान्यत एव कुतश्चिदयमागतः स्यादित्येतदपि तत्त्वतो न जान इति । एवं विलपमाना कामार्ता लोपामुद्रा राजर्षिपुत्रिका वृषणं रेतसो वर्षितारमगस्त्यं नीरिणाति निश्चयेनाधिकं वा दोषेण गच्छति । यदि न ममासावुपरि प्रजननं न्यरोत्स्यत्ततो नायं कामो मैमागमिष्यदित्येवं[2] दोषेण गच्छति । 'रिणाति' इति गतिकर्मसु पठितम् (निघ० २ । १४ । ५८) । अथवा चेतसा नीरिणाति । उपगच्छतीत्यर्थः । इष्टपुरुषानुचिन्तनं[3] हि कामार्तायाः स्त्रियाः स्वभाव एव । तस्मादेवमप्युपपद्यते । धीरं स्थिरबुद्धिं ब्रह्मचर्ये अधीरा संक्षुब्धसर्वेन्द्रियग्रामा धयति पिबतीव चेतसा । चक्षुर्भ्यां वा पश्यन्ती[4] श्वसन्तं चेतसा व्यावर्तमानं तस्याः सकाशाद्ब्रह्मचर्ये कृतबुद्धिं तथापि धयत्येव । 'श्वसिति नभति'[5] इत्येतद्गतिकर्मसु पठितम् । एवं लोपामुद्रावाक्ये 'नदस्य रुधतो मामागन्कामः'[6] इति प्रकरणादृषिर्नदशब्देनोच्यत इत्युपपद्यते । 'संरुद्धप्रजननस्य ब्रह्मचारिण इत्यृषिपुत्र्या विलपितं वेदयन्ते' इति निदानप्रख्यापनम् ।

'सोमो अक्षाः' (१३) इत्येते द्वे पदे । अत्र 'अक्षाः' इत्येतत्पदमनवगतं पक्षेण चानेकार्थं । अस्यैव च संबन्धादुपलक्षणार्थं सोमशब्दोऽत्र समाम्नातः कथं नाम 'न यस्य द्यावापृथिवी'[7] इत्येतदेवोदाहरणमत्रोपलक्षितं[8] स्यात् । अत्र ह्यक्षा इत्येष शब्दः सोमशब्देन संबद्धो यथा भूतशब्देन मेषशब्दो 'मेषो भूतो ३ भि यन्नयः' इत्यत्र यथा च 'अग्निर्नय' इत्यत्राग्निशब्दः । अत्र चाश्नोतिपक्षे अक्षा इत्यस्य शब्दस्य सुपुष्टतर उदाहरणार्थो भवति तस्मादय-

---

१ क. ख. घ. झ. ट. ठ. ड. °गस्त्यश°. २ क. ख. घ. झ. ट. ठ. ड. मामागमि°; च. मैमाग.° ३ च. इष्टपुरु°. ४ क. ख. घ. झ. ट. ठ. ड. पश्यति; च. पश्यंती° ति. ५ क. ख. घ. झ. ट. ठ. ड. श्वसाति नदतीत्येवं गति°; च. श्वसिति नभवति° द. ६ क. ख. घ. झ. ट. ठ. ड. माम.गमत्कामः; च. मामागन्कामः °मत्का. ७ ठ. ड. द्यावेत्येत°. ८ च. °लक्षिते. ९ क. ख. घ. झं. ट.

२१ ठ. ड. वा.

मनन्तर उपलक्ष्यते । अल्पप्रयोगविषयत्वादस्य मन्त्रस्य प्रतिपत्त्यर्थं सोमशब्दः समाम्नात एकपदसमाम्नाने प्राप्ते सति ॥ २ ॥[1]

न यस्य द्यावापृथिवी न धन्व नान्तरिक्षं नाद्रयः सोमो अक्षाः। अक्षोतेरित्येके । अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः । लोपाशः सिंहं प्रत्यञ्चमत्साः । क्षियतिनिगमः पूर्वः क्षरतिनिगम उत्तर इत्येकेऽनूपे गोमान् गोभिर्यदा क्षियत्यथ सोमो दुग्धाभ्यः क्षरति सर्वे क्षियतिनिगमा इति शाकपूणिः श्वात्रमिति क्षिप्रनामाशु अतनं भवति । स पतत्रीत्वरं स्था जगद्यच्छ्वात्रमग्निरकृणोज्जातवेदाः । स पतत्रि चेत्वरं स्थावरं जङ्गमं च यत्तत्क्षिप्रमग्निरकरोज्जातवेदा ऊतिरवनात् । आ त्वा रथं यथोतय इत्यपि निगमो भवति ह्रासमाने इत्युपरिष्टाद्व्याख्यास्यामो[2] वम्रकः पड्भिरुपसर्पदिन्द्रम् । पानैरिति वा स्पाशनैरिति वा स्पर्शनैरिति[3] वा। ससं न पक्वमविदच्छुचन्तम् । स्वपनमेतन्माध्यमिकं ज्योतिरनित्यदर्शनं तदिवाविदज्ज्वल्यमानम् । द्विता च सत्ता स्वधया च शंभुः । द्वैधं सत्ता मध्यमे च स्थान उत्तमे च शंभुः[4] सुखभूः। मृगं न व्रा मृगयन्ते । मृगमिव व्रात्याः प्रैषाः ॥ ३ ॥

'न यस्य द्यावापृथिवी न धन्व नान्तरिक्षं नाद्रयः सोमो अक्षाः । यदस्य मन्युरधिनीयमानः शृणाति वीळुं[6] रुजति स्थिराणि' [ऋ० सं० १० । ८९ । ६] ॥

सोमो अक्षाः इत्यस्य रेणुर्नाम विश्वामित्रस्य पुत्रस्तस्येयमार्षम् । ऐन्द्रे सूक्ते सूर्यस्तुन्नामैकाहस्तत्रेयं निष्केवल्यशस्त्रे निविद्धानीये शस्यते [आश्व० श्रौ० ९ । ८] । न यस्य द्यावापृथिवी। न यस्येन्द्रस्य द्यावापृथिव्यौ महिमानमश्नुवाते । व्याप्नुत इत्यर्थः ।[7] न धन्व

---

१ ग. १५ । २; घ. ट. च. ज. अङ्को नास्ति; ठ. ड. २ इति निरुक्तटीकायां पञ्चमाध्याये द्वितीयः खण्डः. २ क. ख. °स्यामः । वम्र°; छ. त. द. °स्यामः ॥ ३ ॥ वम्र°. ३ छ. त. द. ' स्पर्शनैरिति वा ' नास्ति. ४ छ. त. द. अङ्को नास्ति. ५ ग. °पृथिवी० स्थिराणि; घ. ट. °पृथिवी० रुजति स्थिराणि. ६ क. ख. ग. ज. वीळु; च. विळ्हु. ७ ग. ज. °त्यर्थः । धन्वोदकम्.

नोदकम् । तद्धि धन्वत्यन्तरिक्षलोकात् । नान्तरिक्षं नाप्यद्रयः पर्वता अश्नुवन्ति महिमानम् । किं तर्हि । सोम एवाक्षाः । महिमानमश्नोतीत्यर्थः । कथं पुनर्गम्यते सोम एवेन्द्रस्य महिमानमश्नोतीति । इतो यदस्य मन्युरधिनीयमानः । यस्मादस्येन्द्रस्य मन्युः क्रोधः सोमेन पीतेन सता मदसामर्थ्यादुपरि शत्रूणां नीयमानः प्राप्यमाणः शृणाति वीळु । यदपि वीळु दृढं संस्तब्धं वीर्योत्सिक्तं शत्रुबलं भवति तदपि शृणात्येव । हिनस्तीत्यर्थः । रुजति स्थिराण्यपि । दृढानि मेघवृन्दानि भिनत्तीत्यर्थः । एवमेतस्मिन्मन्त्रे व्याप्त्यर्थस्य 'अश्नोतेः' अक्षाः इत्येष शब्दो निरुच्यते 'इत्येवमेके' मन्त्रार्थविदो मन्यन्ते ।

'अश्नाः' इत्यस्य 'अश्नोति' इत्यत्रार्थः

'अनूपे गोमान्गोभिरक्षाः सोमो दुग्धाभिरक्षाः । समुद्रं न संवरणान्यग्मन्मन्दी मदाय तोशते' [ऋ० सं० ९ । १०७ । ९] ॥ सप्तर्षीणामार्षम् । बृहती । पावमानी सौमी । अनूपे देशे गोमान् गोभिः सहितो यदा क्षियति निवसत्यथ तदा सुयवसत्वात्तस्य देशस्य सोमो दुग्धाभ्यः पुनः पुनर्दुग्धाभ्योऽपि गोभ्यः क्षरत्येव । कथं पुनः क्षरतीति । उच्यते । समुद्रं न संवरणानि । समुद्रमिव संवरणान्युदकानि । तानि हि देशान्तरात्संवृण्वन्ति । तानि यथा सर्वेभ्यो देशेभ्यः संस्रुत्य समुद्रमाभिमुख्येन अग्मन् गच्छन्त्येवं दुग्धाभ्यः सोमः सर्वेभ्यो गात्रेभ्यः संस्रुत्योधः प्रतिक्षरति मदायेन्द्रस्य । अथ यदैवं प्रक्षरति तदा तेन

'गोभिरक्षाः' इत्यत्र 'क्षियति' इत्यर्थः 'सोमो अक्षाः' इत्यत्र 'क्षरति' इति

---

१ ग. ज. 'नान्तरिक्षं' नास्ति; च. °लोकान्ना॰ द्रयः °न्तरिक्षं नाप्य. २ क. ख. ग. ज. घ. ट. ठ. ड. 'अपि' नास्ति. ३ ग. ज. महिमा नान्तरिक्षं नमश्नो°. ४ क. ख. ग. च. ज. घ. झ. वीलु. ५ क. ख. घ. वीलु; ग. ज. वीडु; च. वीडु° डु. ६ क. ख. घ. ठ. ड, संनद्धं शत्रु°; झ. °शृणाति वीलु स्तब्धं वीर्योत्सिक्तं दृढं संनद्धं शत्रु°; ट. संनद्धं शत्रु° स्तब्धं वीर्योत्सिक्तं. ७ क. ख. घ. झ. ट. ठ. ड. °जति च स्थि°; च. °जति॰स्थि° च. ८ घ. झ. वृल्हानि; ट. ठ. ड. वृळ्हानि. ९ ग. न्यन्ते । १६ । अनू°. ९ क. ख. घ. झ. ट. ठ. ड. दुग्धाभिः. १० क. ख. घ. झ. ट. ठ. ड. उदकानि हि°. ११ क. ख. घ. झ. ट. ठ. ड. संसृत्य; च. संस्रुत्य° सृ. १२ क. ख. घ. झ. ट. ठ. ड. संसृत्य ऊधः; च. सश्रुत्यो° सु.

सोमेनामावास्यायां सांनाय्येन तृप्त इन्द्रो मन्दी हर्षशीलो यजमानस्य शत्रून् तोशते। हिनस्तीत्यर्थः। 'नितोशयति निबर्हयति' इति हन्तिकर्मसु पठितम् (निघ० २।१९)। एवमेतस्मिन्मन्त्रे 'क्षियतिनिगमः पूर्वः' 'अनूपे गोमान् गोभिरक्षाः' इत्येषः। 'क्षरतिनिगम उत्तरः' 'सोमो दुग्धाभिरक्षाः' इत्यत्र। एवम् 'एके' मन्त्रार्थविदो मन्यन्ते। तच्चैतत्तथैवोपव्याख्यातम्।

सर्वे क्षियतिनिगमा इति शाकपूणिः

'सर्वे' एवैते त्रयोऽपि 'क्षियतिनिगमाः' निवासार्था इति 'शाकपूणिः' आचार्यो मन्यते। न यस्य द्यावापृथिव्यौ निवासौ[1] न धन्व नान्तरिक्षं निवासः। किं तर्हि। सोम एव यस्य निवासः। सर्वे एव ह्येन[2]माश्रित्य निवसन्तीत्येतेना[3]भिप्रायेण सोम इन्द्रस्य निवासः। तस्य सोमस्य किमिति। उच्यते। यदस्य मन्युः अधि शत्रूणां नीयमानः शृणाति वीळु[4] रुजति स्थिराणि। समानमेतत्पूर्वे[5]णैवार्थेन। 'अनूपे गोमान् गोभिरक्षाः' इत्यत्र निवासार्थतैव[6]। पूर्वस्मिन्नेवार्थे। अथ सोमो दुग्धास्वपि गोषूधःसु निवसति। न निर्दुग्धाः कर्तुं शक्यन्ते इत्यभिप्रायः। एवमेते पूर्वे त्रयोऽपि 'क्षियतिनिगमाः' इति 'शाकपूणिः' आचार्यो मन्यते।

ध्मात्रमित्यस्य प्रयोगोऽर्थश्च

'ध्मात्रम्' (१४)इत्यनवगतम्। 'आशु अतनं[7] भवति' इति शब्दसमाधिः। 'क्षिप्रनाम' इत्यभिधेयवचनम्[8]। 'यो होतासीत्प्रथमो[9] देवजुष्टो यं समाञ्जन्नाज्येना वृणानाः। स पतत्रीत्वरं स्था जगद्यच्छ्वात्रमग्निरकृणोज्जातवेदाः' (ऋ० सं० १०।८८।४)॥ इयं हविष्पान्तीये सूक्ते[10]। तत्पुनर्मूर्धन्वताङ्गिरसेन दृष्टं वामदेव्येन वा। पृष्ठ्यस्य पञ्चमेऽहन्याग्निमारुते शस्त्रे निविद्धानीयं तद्भवति

---

१ ग. ज. निवासौ. २ घ. झ. ठ. ड. ह्येनमा°; ट. ह्येनैमा° ह्यष; च. °ह्येन्न° ह्य (ह्यं). ३ क. ख. ग. ज. घ. ट. ठ. ड. °न्तीत्यनेनाभि° ष; °त्येतेना° त्यने. ४ क. ख. घ. झ. वीलु; ग. ज. वीड्डु; च. विळ्ह° वी. ५ क. ख. घ. झ. ट. ठ. ड. °मानमन्यत्पू°; च. °मानमतन्पू° मन्य. ६ च. °सार्थता इत्येव° तै. ७ ष. अतन्तीति° नं भव. ८ ग. °नम्। १७। यो°. ९ ग. °थमो० जातवेदाः; घ. ट. °थमो० रकृणोज्जातवेदाः. १० ग. ज. °क्ते। तत्रेयमेवैका जगती तत्पु°; च. °क्ते। तत्रे ००० ती। तत्पु°.

(आश्व० श्रौ० ८ । ८) । यः अग्निः होतासीत् आह्वाता देवानां प्रथमः प्रधानो मनुष्यहोतुः सकाशात् देवजुष्टो देवैरासेवितः । यं समाञ्जन् समुक्षितवन्तः । केन । आज्येन । वृणानाः । संभजमाना इत्यर्थः । तस्य किमिति । उच्यते । स पतत्रि सोऽग्निः पतत्रि च यदेतदितश्चेतश्च पतति इत्वरं च पक्ष्यादि स्थाः स्थावरं च वृक्षादि जगत् यत्र[1] यदेतज्जङ्गमं गवादि । तस्य किमिति । उच्यते । तत्सर्वं प्रलयकाले श्वात्रं क्षिप्रमात्मसात् अकरोज्जातवेदा अग्निः । एवमेतस्मिन्मन्त्रे श्वात्रमित्येतत्क्षिप्रनाम । पतत्रिस्थावरजङ्गमानां क्षिप्रदहनादग्निः किमन्यत्कुर्यात् । तस्मादुपपद्यते क्षिप्रनामेति ।

'ऊतिः' (१५) इत्यनवगतम् । 'अवनम्' इत्यर्थप्रतीतिः । अवनात् । रक्षणादित्यर्थः[2] । 'आ त्वा रथं यथोतये[3] सुम्नाय वर्तयामसि । तुविकूर्मिमृतीषहमिन्द्र शविष्ठ सत्पते' (ऋ० सं० ८ । ६८ । १) ॥ 'ऊतिः' इत्यस्य

प्रियमेधस्यार्षम्[4] । मरुत्वतीये शस्त्रे प्रतिपदेषा । (आश्व०श्रौ० ५।१४) । हे इन्द्र आवर्तयामहे त्वां वयं स्तुतिभिरात्मन ऊतये अवनाय । रक्षणायेत्यर्थः । सुम्नाय च सुखाय[5] । कथं पुनरावर्तयामह इति । उच्यते । रथं यथा । शक्तो हि कश्चिद्यथा रथमावर्तयेदेवमावर्तयामहे वयं त्वां स्तुतिभिः । किंलक्षणं पुनर्भवन्तमावर्तयामहे । उच्यते । तुविकूर्मिं बहूनामनेकप्रकाराणां कर्मणां कर्तारम् । ऋतीषहं च आर्तीनामभिभवितारम् । हे इन्द्र शविष्ठ बलिष्ठ सत्पते सतां पते । एवमावर्तनेनैकवाक्याभिसंबन्धेन[6] 'ऊति' शब्दो रक्षणार्थ इत्युपपद्यते ।

'हासमाने' (१६) इत्येतत्पदमुपरिष्टाद्व्याख्यास्यामः 'प्र पर्वतानामुशती उपस्थात्' इत्यत्र (निरु० ९ । ३९) ।

'पड्भिः' इत्यनवगतम् । 'पानैरिति वा स्पाशनैरिति वा' शब्दसमाधी[7] । 'एवा महो असुर वक्षथाय वम्रकः पड्भिरुप सर्पदिन्द्रम् । स इयानः[8]

---

१ क. ख. घ. झ. ट. ठ. ड. 'यत्र' नास्ति; च. °गत् यत्र यदे°. २ ग. °त्यर्थः ॥ १८ ॥ आ°. ३ ग. °तये० । प्रिय°; व. ट. °तये० शविष्ठ सत्पते. ४ च. °मेधसमार्षं° आ; झ. मेधमार्षं. ५ क. ख. घ. झ. ट. ठ. ड. °खाय च; च. °खाय० । कथं° च. ६ क. ख. घ. झ. ट. ठ. ड. °संबद्धेन; च. संबन्धेन° द्धं. ७ ग. °माधी । १९ । ३ । एवा°. ८ ग. ज. असुर वक्षथाय० । वम्रो°; व. ट. असुर० विश्वमाभाः०.

करति स्वस्तिमस्मा इषमूर्जं सुक्षितिं विश्वमाभाः'

'पङ्क्भिः' इत्यस्य [ऋ०सं०१०।९९।१२]॥ वम्रो नाम वैखानसस्त[1]-स्येयमार्षम् । ऐन्द्री । य एव एतस्मिन्सूक्ते स्तुतिप्रकारोऽधिकृतः एवमनेन प्रकारेण हे वर्तमान इन्द्र[2] असुर असुमन् प्रज्ञानवन् बलवन्वा वक्षथाय स्तुतिवक्त्रे महते वा[3] यजमानाय पूर्वकल्पान्तरीणाय पूर्वकल्पान्तरीण एव वम्रकः पङ्भिः सोमपानैरभ्युदितैरथवा गुणस्पाशनैः स्तुतिगतैः उपसर्पत् उपसृप्तवानन्यकल्पान्तरीणमिन्द्रम् । स तेन यथा[4] ईयमानः अनुसृप्यमाणः[5] करति कृतवान् । किम् । स्वस्ति स्वस्त्ययनम् । तस्मै यजमानाय । यतो ब्रवीमि । सांप्रतमहमेतस्मिन्कल्पे वम्रकस्त्वं चेन्द्रस्ता एव चैताः स्तुतयो याभिरहमुपासर्पं सांप्रतं भवन्तम् । स त्वमेवं विज्ञायास्मै वर्तमानाय यजमानाय स्वमधिकारं[6] जानानः कुरु स्वस्त्ययनम् । किंच । इषमूर्जम् इषमन्नं व्रीहियवादि ऊर्जं क्षीरादि सुक्षितिं च शोभननिवासं च विश्वमेतत्सर्वम् आभाः आभिमुख्येनास्मै यजमानाय भावयस्व । एवमेतस्मिन्मन्त्रे शब्दसारूप्यात्प्रकरणाच्च पङ्भिरित्येतत्पानाभिधानं स्पाशनाभिधानं वेत्युपपद्यते ।

'ससम्' (१८) इत्यनवगतम् । 'स्वपनम्' इत्यवगमः[7] । 'प्र मातुः प्रतरं गुह्यमिच्छन्कुमारो[8] न वीरुधः सर्पदुर्वीः ।

'ससम्' इत्यस्य ससं न पक्वमविदच्छुचन्तं रिरिह्वांसं रिप उपस्थे अन्तः' [ऋ० सं० १० । ७९ । ३] ॥

अग्नेर्वैश्वानरस्याग्नेर्वा सूचीकस्य सप्तेर्वा वाजम्भरस्येयमार्षम् । आग्नेयी । त्रिष्टुप् । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १३] । प्र मातुः प्रतरं प्रकर्षेण गततरं गह्वरं[9] मातुः सर्वनिर्मातुर्भूमेः अग्निः वीरुधो दग्धुम् उपसर्पत् उर्वीः ऊर्णुवत्यः प्रच्छाद्य भूमेर्निर्झरप्रदेशं तस्मिन्[10] निर्झरप्रदेशे वर्तमानाः । तत्र हि ताः सुविवृद्धाश्च[11] भवन्ति । कथं पुनरुप[12]-

---

१ च. वैषान° खा. २ क. ख. घ. ट. ठ. ड. वर्तमान हे; च. हे वर्तमान. ३ क. ख. घ. झ. ट. ठ. ड. 'वा' नास्ति; च. वा. ४ क. ख. घ. झ. ट. ठ. ड. तथा इयानः ईय°; च. यथा ईय° त. ५ क. ख. घ. झ. ट. ठ. ड. अनुस्रियमाणः; च. अनुसृप्यमाणः° स्रिय. ६ ग. च. ज. स्वप्रामि°. ७ ग. °गमः । २० । प्र मा°. ८ ग. गुह्यमिछन्० । अग्ने°; घ. ट. गुह्यं० उपस्थे अन्तः. ९ घ. ट. ठ. ड. गुह्यं गह्वरं; च. °तरं गह्वरं° गुह्यं. १० ग. ज. 'निर्झरप्रदेशं तस्मिन्' नास्ति. ११ ठ. ड. सुवृद्धाश्च. १२ ग. ज. °रुपास°.

२१

सर्पदिति । उच्यते । प्र मातुः प्रतरं गुह्यमिच्छन् कुमारो न । मातुर्यथा कुमारः प्रकर्षेण गुह्यतरं सर्वाङ्गेभ्यः स्तनप्रदेशं स्तनपानमिच्छन्नुपसर्पेदेवं योऽग्निर्बह्वोषधीके भूमेर्निर्झरप्रदेशे कुमार इव मातुः स्तनपानाय स्तनप्रदेशमिवोपासर्पत् । तत्रैव च निर्झरप्रदेशे रिरिह्वांसं पुनःपुनरास्वादयमानमोषधीः रिपः अस्या एव भूमेः उपस्थे उपस्थाने निर्झरे । निर्झरे हि भूमेः प्रदेशे आप उपतिष्ठन्त इति निर्झर एवोपस्थो भूमेः । तस्यान्तः । मध्य इत्यर्थः । तस्मिन्नेवंलक्षणे प्रदेशे तमग्निम् अविदत् कश्चिदृषिरन्यो वौषधीरास्वादयन्तम् । कथं पुनरविदेदिति । उच्यते । ससं न पक्कमविदत् । यथैव स्वपनशीलं माध्यमिकं ज्योतिर्वैद्युताख्यं पक्कमभिव्यक्तं वर्षासूपर्यवस्थानादयत्नेनैव दृश्यत एवं निर्झरान्तःप्रविष्टमपि सन्तमग्निमतिमहत्त्वादर्चिषोऽविददेवापश्यत् शुचन्तम् । दीप्यमानमित्यर्थः । निर्झरेऽन्योऽनुप्रविष्टो न विज्ञायते । अग्निस्तु निर्झरस्थोऽपि स्वया दीप्त्या विज्ञायत एवेत्यभिप्रायः । य एवंगुणयुक्तोऽग्निः स इदं नाम करोत्वित्येवमाशीर्योज्या । तद्यदष्टौ मासान् माध्यमिकं ज्योतिर्न दृश्यते तस्मादनित्यदर्शनात् 'स्वपनम्' इत्युच्यते । पक्किनामाभिव्यक्तिरित्युच्यते । एवमिह शब्दसारूप्यादर्थोपपत्तेश्च 'ससम्' इत्यनेन शब्देन 'स्वपनम् उच्यते' इत्युपपद्यते ।

'द्विता' (१९) इत्यनवगतम् । 'द्वैधम्' इत्यवगमः ।

'यस्त्वद्धोता पूर्वो अग्ने यजीयान्द्विता च सत्ता

'द्विता' इत्यस्य स्वधया च शंभुः । तस्यानु धर्म प्र यजा

चिकित्वोऽथा नो धा अध्वरं देववीतौ' [ऋ० सं० ३ । १७ । ५] ॥ कतस्य वैश्वामित्रस्येयमार्षम् । त्रिष्टुप् । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १३] । हे भगवन्नग्ने

१ घ. झ. ट. ठ. ड. बह्वौषधिके. २ घ. ट. ठ. ड. °पानीयः स्त°. ३ च. निर्झरे भूमेः प्रदेशे. ४ क. ख. घ. झ. ट. ढ. ड. 'निर्झरे' नास्ति. ५ ठ. ड. °विन्द°. ६ ग. ज. स्वमशी°; च. स्वर्मं° पन. ७ ग. ज. माध्यमकं. ८ घ. झ. ठ. ड. तध्यष्टौ; च. तर्यदृष्टौ° ध्य; ट. तध्यैष्टौ° यद्. ९ क. ख. ग. ज. घ. ट. ठ. ड. पक्कं नामा°; च. पक्किर्नो° कं ना. १० क. ख. ग. ज. घ. ट. ठ. ड.
२८ °व्यक्तमित्यु°; च. °व्यक्तिरित्यु° कमि. ११ ग. °गमः । ११ । य°.

पृथिवीस्थान त्वत्तो यः पूर्वो होता मध्य्[1]स्थानो वायुः । असावपि हि दूतो देवानामिति श्रूयते ' आ दूतो अग्निमभरद्विवस्वतः ' [ऋ० सं० ६ । ८ । ४] इति । वैद्युतोऽग्निरिति केचिन्मन्यन्ते । यजीयान् यष्टृतरः । द्विता च सत्ता । द्वैधं च[2] यस्य विद्यमानता मध्यमे च[3] स्थाने वैद्युतभावेन उत्तमे च स्थाने सूर्यभावेन । स्वधया च अन्नेन सर्वभूतानां व[4]र्षणद्वारेण यः शंभुः सुखस्य भावयिता । तस्य किमिति । उच्यते । तस्यानु धर्म तस्य वायोर्वृत्तिलाभमनु आत्मनो दीप्तिलक्षणां वृत्तिं प्रति लाभमाप्नुवन् । ' वायुर्वा अग्नेस्तेजस्तस्माद्वायुरग्निमन्वेति ' [मैत्रा० सं० ३ । १ । १०] इति ह विज्ञायते । हे अग्ने प्रयज प्रकर्षेण यज देवान् हे चिकि[5]त्वन् । ज्ञानवन्नित्यर्थः । अथ एवमस्माकं यागं कुर्वंस्त्वं शृणु यत्कुरुष्व । धा अध्वरं धारय यज्ञं देववीतौ । देवतर्पणायेत्यर्थः । एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च ' द्विता ' इ[6]ति शब्दो द्वैधमित्ये[7]वमुपपद्यते ।

' व्राः ' (२०) इत्यनवगतम् । ' व्रात्याः ' इत्यवग[8]मः । 'गोभिर्यदीमन्ये अस्मन्[9]मृगं न व्रा मृगयन्ते[10] । अभित्सरन्ति धेनुभिः ' [ऋ० सं० ८।२।६]॥ काण्वश्च मेधातिथिः प्रियमेधश्चाङ्गिरस ऐन्द्रं सूक्तं ददृशतुः ।

व्रा इत्यस्य

तत्रैषा । अभिप्लव[11]स्य द्वितीयेऽहनि मरुत्वतीये शस्त्रेऽनुचरतृचे शस्यते [आश्व० श्रौ० ७ । ११] । हे भगवन्निन्द्र यद्यपि त्वाम् अन्ये यजमानाः गोभिः वाग्भिः स्तुतिलक्षणाभिः धेनुभिः च तर्पयित्रीभिराहुतिभिः अभित्सरन्ति अभिगच्छन्ति अभिव्याप्नुवन्ति तथाप्यस्मानेव प्रत्यभ्येहि । किं कारणम् । अ[12]तो यस्मादेतेऽस्माभिरतिरिक्तया भक्त्याऽन्येभ्यो यजमानेभ्यः सकाशात् व्रात्याः प्रैषाः युष्मत्संरक्त[13]वियुक्तास्त्वां प्रति प्रहिता मृगमिव इतरे लुब्धका व्रा व्रात्याः मृगयन्ते मा[14]र्गयन्ते त्वाम् । तस्माद्भ-

---

१ क. ख. घ. झ. ट. ठ. ड. मध्यमस्था°. २ क. ख. घ. झ. ट. ठ. ड. ' च ' नास्ति. ३ च. °ध्यमे॰ स्था° च. ४ च. वषट्कारेण° षणद्वा; ठ. ड. वर्षद्वा°. ५ क. ख. घ. झ. ट. ठ. ड. चिकित्वः चिकि°; च. हे॰ चिकि° चिकित्वः. ६ क. ख. घ. झ. ट. ठ. ड. °द्वितेत्ययं द्वे°. ७ ग. ज. ' एवं ' नास्ति. ८ ग. °गमः । २२ । गोभि°. ९ ग. अस्मत् ० । काण्व°; घ. ट. अस्मत्० न्ति धेनुभिः. १० ज. °गयन्ते । काण्व°. ११ क. ख. घ. झ. ट. ठ. ड. °प्लवस्य षडहस्य द्वि°. १२ क. ख. घ. झ. ट. ठ. ड. इतो; च. अतो° इ. १३ क. ख. घ. झ. ट. ठ. ड. °स्तवसंयुक्ता°. १४ च. मार्ग॰न्ते° य.

त्यतिरेकाद्विशेषहेतोरस्मानेव प्रत्यश्येहि । एवमेतस्मिन्मृगसंबन्धाद्व्रात्यशब्देन लुब्धका उच्यन्त इत्युपपत्तिः[2] ।

‘ वराहः ’ (२१) इत्येतदनवगतमनेकार्थं च । ‘ मेघः ’ तावद् ‘ वराहः ’ उच्यते । स हि ‘वराहारो भवति’ । तस्य हि वरमुदकमाहारः । ‘वरमाहारमाहार्षीरिति[3] च ब्राह्मणम्’ । निर्वचनस्य दृढप्रतीत्यर्थं ब्राह्मणमाचार्येण प्रदर्शितम्[4] । यथा मेघो वराहशब्देनोच्यते तथैष निगमः ॥ ३ ॥

वराहो मेघो भवति वराहारः । विध्यद्वराहं तिरो अद्रिमस्तेत्यपि निगमो भवत्ययमपीतरो वराह एतस्मादेव[6] वरमाहारमाहार्षीरिति च ब्राह्मणं वृहति[7] मूलानि वरं वरं मूलं वृहतीति वा । वराहमिन्द्र एमुषमित्यपि निगमो भवत्यङ्गिरसोऽपि[8] वराहा उच्यन्ते । ब्रह्मणस्पतिर्वृषभिर्वराहैः । अथाप्येते माध्यमका देवगणा वराहव उच्यन्ते । पश्यन्हिरण्यचक्रानयोदंष्ट्रान्वि धावतो वराहून्[9] । स्वसराण्यहानि भवन्ति स्वयंसारीण्यपि वा स्वरादित्यो भवति स एनानि सारयति । उस्रा इव स्वसराणीत्यपि निगमो भवति शर्या अङ्गुलयो भवन्ति[10] शर्या इषवः शरमय्यः शरः शृणातेः । शर्याभिर्न भरमाणो गभस्त्योरित्यपि निगमो भवत्यर्को देवो भवति यदेनमर्चन्त्यर्को मन्त्रो भवति यदनेनार्चन्त्यर्कमन्नं भवत्यर्चति भूतान्यर्को वृक्षो भवति स वृतः कटुकिम्ना[11] ॥ ४ ॥

‘अस्येदु मातुः सवनेषु[12] सद्यो महः पितुं पपिवाञ्चार्वन्ना[13] । मुषायद्विष्णुः पचतं सहीयान्विध्यद्वराहं तिरो अद्रिमस्ता ’ [ऋ० सं० १ । ६१ । ७] ॥ नोधा नाम गोतमपुत्रस्तस्येयमार्षम् । ऐन्द्री । त्रिष्टुप् । अभिजिद्विश्वजिन्महाव्रतादिष्वाहीनिकेष्वहःस्वहीनसूक्ते माध्यंदिने सवने ब्राह्मणाच्छंसिनः

मेघार्थे वराह इत्यस्य

1 क. ख. घ. झ. ट. ठ. ड. °स्मिन्मन्त्रे मृग°. 2 क. ख. °पत्तिः । ३ । वरा°. 3 ग. ज. °र्षीदिति; च. र्षीदिति° रि. 4 ग. २३; इतरेष्वङ्को नास्ति. 5 क. ख. छ. त. द. °हारो वरमाहारमाहार्षीरिति च ब्राह्मणम् । विध्य°. 6 क. ख. छ. त. द. ‘ वरमाहारमाहार्षीरिति च ब्राह्मणं ’ नास्ति. 7 क. ख. छ. त. द. बृह°. 8 ठ. ड. भवाति । अङ्गि°. 9 क. ख. छ. त. द. वराहून् ।४। स्वस°. 10 क. ख. छ. त. द. °वन्ति सृजन्ति कर्माणि शर्या°. 11 क. ख. छ. त. द. ५. 12 ग. १२ सवनेषु० । नोधा°; घ. ट. सवनेषु सद्यो० वराहं तिरो°. 13 ज. °र्वन्ना । नोधा°.

शस्त्रे विनियुक्ता [आश्व श्रौ० ७ । ४] । अस्येदु मातुः । अस्य जगन्निर्मातुर्यज्ञस्य प्रातःसवनमाध्यंदिनतृतीयसवनेषु महतो यज्ञस्य महान्तं सोमभागं पपिवान् । पीत्वा चार्वन्ना चारूणि च शोभनान्यन्नानि अन्यान्यपि हवींषि भक्षयित्वा तैर्हविर्भिस्तेन च सोमेन विवृद्धबलः सद्य एव पचतं परिपक्वमुदकदानसमर्थं मेघं विष्णुः इन्द्रः सर्वभूतानां वेष्टा प्राणभावेन मुषायत् । अमुष्णादित्यर्थः । सहीयान् अभिभवितृतमः । कथं पुनरमुष्णादिति । उच्यते । विध्यद्वराहं तिरो अद्रिमस्ता । मेघं वराहम् । कथं पुनर्विध्यद्वराहमिति । उच्यते । तिरो अद्रिमस्ता । दूरादेव स्थितस्य अद्रिं वज्रमस्ता । क्षेप्तेत्यर्थः । एवमेतस्मिन्मुषायच्छन्दसंबन्धाद्वराहो मेघ इत्युपपत्तिः ।

‘ अयमपीतरो वराह एतस्मादेव ’ । असावपि हि वरं मूलाख्यमाहारमाहरत्येव । वरं वरं मूलं वृहति । उद्गच्छतीत्यर्थः ।

यथायमपीतरो वराहशब्दश्छन्दसि वराह इत्युच्यते तथैवं निगमः ।

पश्वर्थे बराहनाम

विश्वेत्ता विष्णुराभरदुरुक्रमस्त्वेषितः । शतं महिषान्क्षीरपाकमोदनं वराहमिन्द्र एमुषम् । [ऋ० सं० ८ । ७७ । १०] ।। काण्वस्य कुरुसुतेरार्षम् । ऐन्द्री[12] । विश्वेत् विश्वानि तानि विष्णुराभरत् उरुक्रमो बहुविक्रान्तः त्वेषितः संदीपित इन्द्रवाक्येन[13] ‘ दुर्गाद्वा[14] आहर्ता[15]वोचथा एतमाहर[16] ’ [मै० सं० ३ । ८ । ३] इत्यनेन । ‘ त्वा इषितः ’ इति

---

१ घ. झ. ट. ठ. ड. °दिनसवनतृती°. २ घ. झ. ट. ठ. ड. °ज्ञस्य महः पितु महा°; च. यज्ञस्य˅ महा° महः पितुं. ३ क. ख. घ. ट. ठ. ड. °वान् पीतवान् । पीत्वा°; च. °वान्˅ । पीत्वा° पीतवान्. ४ क. ख. घ. झ. ट. ठ. ड. °मेघं हि विष्णुः°; ग. ज. विविष्णु°; च. विविष्णुः. ५ ग. ज. वेवेष्टा°. ६ घ. झ. ट. ठ. ड. अदूर एवावस्थित°; च. दूरात् एव स्थित° अदूरे. ७ ग. ज. ‘ वरं ’ सकृदेव; च. °त्येव ।˅ वरं मूलं° दरं. ८ ग. च. ज. ट. बृह°. ९ क. ख. घ. झ. ट. ठ. ड. तथैष; च. तथैवं˅ ष. १० ग. °गमः । २४ । विश्वे°. ११ ग. °राभर० एमुषम्; घ. ट. °राभरत्० वराह°. १२ घ. झ. ट. ठ. ड. ऐन्द्री बृहती । विश्वे°; च. ऐन्द्री˅ । विश्वे° बृहती. १३ क. ख. ग. ज. इन्द्रो वाक्येन. १४ ग. ज. दुर्गाद्दा; च. दुर्गात्त्वां आ° ट. दुर्गात्वांत् आ°; ठ. ड. दुर्गाद्यत्वा. १५ च. हर्ता˅वोचत् यथा एत° इत्य. १६ घ. ट. ठ. ड. एतदाहरे°; च. एतमाहरे° दा.

पदविभागः । तथापि तु ' त्वेषितः ' इत्येकं पदं कृत्वैवं[1] निरुक्तम् । परोक्षकृतत्वान्मन्त्रस्य नान्यथार्थ उपपद्यते । कानि पुनस्तानि वसून्याहरदिति । उच्यते । शतं महिषान् बहून् महतो यज्ञानाहरत् । किंलक्षणानिति । उच्यते । क्षीरपाकमोदनं प्रायणीयाख्यमादितः कृत्वा ये क्रियन्ते तान् । सोमक्रतूनित्यभिप्रायः । कुतः पुनराहरदिति । उच्यते । असुरं वराहरूपेणावस्थितं सर्वेषामसुराणां व्यामोहस्थानीयं मायया यमिन्द्रो जघान तस्य मध्यादाहरत् । यत् 'अयं वराहमिन्द्र एमुषमेकविंशत्याः पुरां पार इत्युच्यते' इत्येवं ब्राह्मणं मैत्रायणीयके (मैत्रा० सं० ३ । ८ । ३] तदनुवादिनी चैषा ऋक् । तस्मादत्र वराहशब्देन वराह एवोच्यत इत्युपपद्यते ।

' अङ्गिरसोऽपि वराहा उच्यन्ते ' । ' स ईं सत्येभिः सखिभिः शुचद्भिर्गोधायसं वि धनसैरदर्दः । ब्रह्मणस्पतिर्वृषभिर्वराहैर्घर्मस्वेदेभिर्द्रविणं व्यानट् ' [ऋ० सं० १० । ६७ । ७] ॥ अयासस्याङ्गिरसस्येयमार्षम् । ब्राह्मणस्पत्यस्य काम्यस्य पशौ षड्र्चे विनियुक्ता मैत्रायणीयके (मैत्रा० सं० २ । ५ । ७ ॥ ४ । १४ । १०) ॥ स ब्रह्मणस्पतिः सत्येभिः सत्यवादिभिः सखिभिः समानख्यानैः शुचद्भिः दीप्तिमद्भिः विधनसैः विविधधनवद्भिः वृषभिः वर्षितृभिः वराहैः घर्मस्वेदेभिः घर्मतापयितृभिः प्रवर्ग्यकर्मणि । अथवा । यज्ञस्वेदेभिः यज्ञस्वादयितृभिः । यज्ञसद्भिर्वा । एवंगुणविशिष्टैरङ्गिरोभिः सहितो ब्रह्मणस्पतिः गोधायसं गोः वाचो धारयितारमपां वा मेघम् अदर्दः अदारयदिति विपरिणामः परोक्षकृतत्वान्मन्त्रस्य । दारयित्वा च द्रविणम् उदकं व्यानट् । व्याप्नोतीत्यर्थः । एतस्यामृच्यङ्गिरसां विशेषलिङ्गं नास्ति वराहशब्दवाच्यत्वे । सूक्ते त्वेतस्मिन्नङ्गिरसो लिङ्गमस्ति[12] ।

अङ्गिरोवाचिवराह इत्यस्य

१ क. ख. घ. झ. ट. ठ. ड. कृत्वैव. २ क. ख. घ. झ. ट. ठ. ड. °राणां मध्ये व्या° च. °राणां ^व्या° मध्ये. ३ ग. ज. पर°; च. पैर° पा. ४ घ. झ ट. ठ ड. तदर्थानु°; च. तद्^नु° र्थ. ५ ग. °च्यन्ते । २५ । स°. ६ ग. सखिभिः शु० नट्; ज. सखिभिः । अया°; घ. ट. सखिभिः० द्रविणं व्यानट्. ७ क. ख. घ. झ. ट. ठ. ड. काम्यपशौ°. ८ घ. झ. षळंर्चे; ट. ठ. ड. षळर्चे. ९ च. दीप्तिभिः. १० च. यज्ञछाद° स्वा. ११ ठ. ड. धारयितृभिः यज्ञसद्भिर्वा अपां°. १२ ग. °मस्ति । २६ । ऋतं°.

सूक्तेऽङ्गिरसो लिङ्गं तस्मादङ्गिरसोऽपि वराहा उच्यन्ते

' ऋतं शंसन्त ऋजु दीध्याना दिवस्पुत्रासो असुरस्य वीराः । विप्रं पदमङ्गिरसो दधाना यज्ञस्य धाम प्रथमं मनन्त ' (ऋ० सं० १० । ६७ । २) ॥ ऋतं शंसन्तः यज्ञं वा सत्यं वा प्रशंसन्तः । अपि च । ऋजु अकुटिलमजिह्मं नित्यकालमेव दीध्याना ध्यायमानाः । सर्वभूतानामुपरि समचेतस इत्यभिप्रायः । दिवस्पुत्रासः द्योतनवतोऽग्नेः असुरस्य प्रज्ञावतः पुत्राः । वीरा विविधानामर्थानां वक्तार ईरयितारो वा मेधावित्वात् । विप्रं पदमङ्गिरसो दधानाः । विप्राप्तं सर्वतः प्राप्तमङ्गिरसो दधाना यत्पदं स्थानं ज्ञानसहितस्य कर्मणः परा फलकाष्ठा तामङ्गिरसो दधाना धारयन्तश्चेतसा विवृद्धप्रज्ञत्वात् । यज्ञस्य धाम प्रथमं मनन्त । यज्ञस्य यत्प्रथमं मुख्यं परमात्माख्यमनावृत्तिलक्षणं धाम स्थानं तत्त्वेन मनन्त । जानत इत्यर्थः । एतदेवैतस्यामृच्यङ्गिरोलिङ्गं दृष्ट्वैष निगमो भाष्यकारेणोदाहृतः 'अङ्गिरसोऽपि वराहा उच्यन्ते ' इति ।

' अथाप्येते माध्यमका देवगणा वराहव उच्यन्ते ' मरुतो रुद्रा इत्येवमादयः । अङ्गिरसो ह्यृषिसमाख्यामपि लभन्ते । तस्मान्माध्यमकत्वेऽपि सति पृथगुद्धृत्योक्ताः । यथा तावन्मरुतो वराहशब्देनोच्यन्ते तथैष निगमः । ' एतत्त्यन्न योजनमचेति सस्वर्ह[६] यन्मरुतो गोतमो वः । पश्यन्हिरण्यचक्रानयोदंष्ट्रान्वि धावतो वराहून् ' इति

अस्यामृचि मरुतो वराहशब्देनोच्यन्ते

(ऋ० सं० १ । ८८ । ५) ॥ राहूगणस्य गोतमस्येयमार्षम् । 'आ विद्युन्मद्भिर्मरुतः '[ऋ० सं० १ । ८८ । १] इतीयं चैतस्मिन्नेव सूक्ते । हे मरुत एतत्तद्बलं यौष्माकीणं न योजनमचेति न योगमागच्छति । विजितारित्वाद्भवतां न युज्यत इत्यर्थः । तस्य बलस्य किमिति । उच्यते । सस्वर्ह यन्मरुतो गोतमो वः । अन्तर्हितं यत्सर्वेषां मनुष्याणां

---

१ ग. ऋजु० मनन्त; ज. ऋजु० ऋतं°; घ. ट. ऋजु दीध्या० प्रथमं मनन्त°. २ ग. ठ. ड सत्यं वा यज्ञं वा प्रशं°. ३ क. ख. घ. झ. ट. ट. ड. 'अङ्गिरसो दधानाः' नास्ति; च. अङ्गिरसो दधानाः. ४ ग. ज. तमोगिर°. ५ ग. °गमः । २७ । एत°. ६ ग. चेति० हून्; घ. ट. चेति० वि धावतो वराहून्. ७ ब. झ. ट. राहु°.

यस्य च मर्व्यं युष्मान् वराहून् परेषां शत्रूणामुद्धन्तॄन्[१] उद्बर्हणान् हिरण्यचक्रान् सुवर्णविकृतचक्रान् अयोदंष्ट्रान् अयोमयेषान्[२] रथानधिरूढान् विधावतो नानाप्रकारं[३] धावतः पश्यन् स्तौति गोतमस्तदेवं[४] न योजनमचेति । अचेतीति गत्यर्थोऽञ्चतेर्गत्यर्थस्य[५] सारूप्यात् । एवमत्र प्रकरणे मरुतो वराहव उच्यन्ते[७] इत्युपपत्तिः । मरुदादयो हि सर्व एव माध्यमका देवगणा वराहव उच्यन्ते । तेषां शाखान्तरेषु मृग्या निगमाः । निगमानुपलब्धौ वा[८] 'माध्यमका देवगणा वराहव उच्यन्ते' इत्येतद्बहुवचनं मरुत्स्वेव योज्यम् । तेषां सप्तसप्तका गणा[१०] ब्राह्मणे हि श्रूयन्ते[११] " ते सप्त सप्त मरुतां गणाः " इति । तस्मादेवमप्युपपद्यत एव बहुवचनं भाष्यकारस्य । एकदेवतादिविषयोऽपि कदाचिद्वराहशब्दो भवत्येव । तदप्युपेक्षितव्यम् । तद्यथा । " दिवो वराहमरुषं कपर्दिनम् " (ऋ० सं० १ । ११४ । ५) इति रुद्र उक्तः[१२] ।

" स्वसराणि " (२२) इत्यनवगतम् । ' स्वयंसारीणि ' इत्यवगमः । ' अहानि ' इत्यभिधेयवचनम् । तानि हि स्वयमेव सरन्ति गच्छन्ति । ' अपि वा स्वरादित्यः ' अत्रोच्यते । ' स एनानि[१३] सारयति ' गमयति । तेनैतानि[१४] स्वसराणीत्युच्यन्ते[१५] । 'विश्वे देवासो अप्तुरः[१६] सुतमा गन्त तूर्णयः ।

उस्रा इव स्वसराणि ' (ऋ० सं० १ । ३ । ८) ॥ मधुच्छन्दस इयमार्षम्[१७] । अग्निष्टोमे प्रउगे शस्त्रे गायत्रे तृचे वैश्वदेवे शस्यते (आश्व० श्रौ० ४ । १५ ऐ० ब्रा० ११ । १) । हे विश्वेदेवा अप्तुरः कर्म प्रति त्वरमाणाः । ते हि यज्ञं[१८] कर्म प्रत्या-

'स्वसराणि' इत्यस्य प्रयोगोऽर्थश्च

१ क. ख. घ. ट. ठ. ड. °मुद्धर्तॄन्; ग. °णां द्वर्तॄन्; ज. णां द्वर्तॄन्; च. °णामुद्धन्तॄन्° तॄं. २ क. ख. झ. अयोमयान् रथा°; घ. ट. ठ. ड. 'अयोम०००योजनमचेति' नास्ति; च. अयोमयेषान्. ३ ग. ज. °कारान्; च. °कारान्° रं. ४ क. ख. °देतन्न°; ग. ज. °देवं न°; च. °देवं न° तन्न. ५ क. ख. घ. झ. ट. ठ. ड. अचेतिर्गत्यर्थ°. ६ ग. ज. °त्यर्थसा°; च. °त्यर्थ°सा° स्य. ७ घ. झ. ट. ठ. ड. इत्युच्यन्ते; च. °हव उच्य° इत्यु. ८ क. ख. ग. ज. घ. झ. ट. ट. ड. च; च. वा° च. ९ क. ख. घ. झ. ट. ठ. ड. ' इति ' नास्ति. १० ग. ज. गणाः । आ°. ११ ग. ज. श्रूयते. १२ ग. उक्तः । ४ । स्वस°. १३ क. ख. ग. ज. एतानि; च. एतानि° ना. १४ घ. झ. ट. °नैनानि. १५ ग. °च्यन्ते । २८ । विश्वे°. १६ ग. ज. अप्तुरः । मधु°; घ. ट. अप्तुरः° उस्रा°. १७ क. ख. घ. झ. ट. ठ. ड. 'इयं' नास्ति. १८ क. ख. घ. ट. ठ. ड. याज्ञिकं.

गन्तुं त्वरन्ते । अत एवमामन्त्र्यन्ते[1] । सुतमागन्त । अस्माभिरभिषुतमेतं सोमं प्रति आगन्त आगच्छत । हे तूर्णयः त्वरणशीलाः । कथं पुनरागच्छत । उस्रा इव स्वसराणि । यथा उस्रा रश्मयोऽहानि प्रति शीघ्रमागच्छन्त्ये-वमागच्छत । एवमस्मिन्नश्मिसंबन्धात्स्वसराण्यहानीत्युपपद्यते ।

'शर्या' (२३)इत्यनवगतम् । 'शरमय्य' इत्यवगमः । 'इषवः' अभिधेयाः । 'शरः शृणातेः' हिंसार्थस्य (धा० ९ । १६) । हिंस्यते हि तेन[3] । 'अभ्यभि हि श्रवसा ततर्दिथोत्सं न कं चिज्जनपानमक्षितम् । शर्याभिर्न भरमाणो गभस्त्योः' (ऋ० सं० ९ । ११० । ५) ॥ 'शर्याः' इत्यस्य

त्र्यरुणत्रसदस्युश्च 'पर्यू षु प्र धन्व वाजसातये' इति पावमानं सौम्यं सूक्तं (ऋ० सं० ९ । ११०) ददृशतुः । पिपीलिकमध्यास्ति-स्रोऽनुष्टुभः षडूर्ध्वबृहत्यस्तासामियं द्वितीया । अभिततर्दिथ एतं सोमं हे अभिषोतारः । पुनः पुनरभिहतेत्यर्थः । श्रवसा श्रवणीयेन मन्त्रेण । कथं पुनरभिततर्दिथेति । शर्याभिर्न भरमाणः । शरमयीभिरिषुभिर्यथा कश्चित् कंचिदभितर्दयेद्धनुर्धारयमाण एवमेतं[11] सोममेभिर्ग्रावभिः[12] गभस्त्योः बाह्वो-रवस्थितैरभिततर्दिथ यूयम् । किंच । एवमेतं सोममभितर्दयन्तो यूयं वसती-वरीभिरद्भिराप्याय्याप्याय्य[13] उत्सं न कंचित् कूपमिव कंचित् जनपानं महतो देवजनौघस्य[14] पानार्हम् अक्षितमक्षीणं कुरुत । महतो देवजनौघस्य पानार्हं प्रभूतं कुरुतेत्यभिप्रायः । एवमिहाभितर्दनक्रियासंबन्धात् 'शर्या' शब्देन 'इषवः' उच्यन्त इत्युपपद्यते ।

---

१ क. ख. म. ज. °न्त्र्यते. २ क. ख. हिंस्यन्ते; च. हिंस्यंते° स्य. ३ ग. तेन । २९ । अभ्य°. ४ ग. श्रवसा ततर्दिथो० स्त्योः; घ. ट. श्रवसा० भरमाणौ गभ-स्त्योः. ५ ज. °क्षितम् । त्र्यरु°. ६ म. ज. 'पर्यू० ० ०सातय इति' नास्ति; च. °दस्युश्च पाव° पर्यू० ० ०सातय इति. ७ च. ज. सोम्यं. ८ ग. ज. तस्यान्ते विराजस्तिस्र स्तासामियं; च. तस्यान्ते विराजस्तिस्रः° पिपीलिकमध्यास्तिस्रोऽनुष्टुभः षडूर्ध्व-बृहत्यः. ९ घ. ट. षलूर्ध्व°; झ. ठ. ड. षलूर्ध्व°. १० ग. ज. °भिघ्नते°. ११ घ. झ. ट. ठ. ड. °मेनं; च. °मेतं° नं. १२ घ. ट. ठ. ड. 'ग्रावभिः' नास्ति. १३ क. ख. ग. ज. 'आप्याय्य' सकृदेव. १४ म. ज. 'देव' नास्ति; च. देवं.

'अर्कः' (२४) इत्यनेकार्थम् । 'देवः' तावत्सर्व एव 'अर्कः' इत्युच्यते । आह । किं कारणमिति । उच्यते ।

अर्कशब्दस्यार्थाः यस्मात् 'एनं' देवम् 'अर्चन्ति' स्तोतारः । 'अर्को मन्त्रो भवति' । किं कारणम् । यस्मात् 'अनेन' मन्त्रेण 'अर्चन्ति' तस्मादर्कः । 'अर्कमन्नं भवति' । किं-कारणम् । तद्धि 'अर्चति भूतानि' । यो हि पूज्यस्तस्यान्नसंस्कारविशेषेण पूजा क्रियते । पूज्यं च सर्वस्यैवान्नम् । 'अर्को वृक्षो भवति' य एष प्रसिद्धः । आह । किं कारणम् । उच्यते । 'सं वृतः' । स वृक्षो हि संगतः संव्याप्तः 'कटुकिम्ना' कटुकभावेन भवति । यथा तावद्देवोऽर्कशब्देनोच्यते तथैव निगमः । ४ ।

गायन्ति त्वा गायत्रिणोऽर्चन्त्यर्कमर्किणः । ब्रह्माणस्त्वा शतक्रत उद्वंशमिव येमिरे (ऋ० सं० १ । १० । १) ॥ गायन्ति त्वा गायत्रिणः प्रार्चन्ति तेऽर्कमर्किणो ब्राह्मणास्त्वा शतक्रत उद्येमिरे वंशमिव वंशो वनशयो भवति वननाच्छ्रूयत इति वा पवी रथनेमिर्भवति यद्विपुनाति भूमिम् । उत पव्या रथानामद्रिं भिन्दन्त्योजसा । तं मरुतः क्षुरपविना व्ययुरित्यपि निगमौ भवतो वक्षो व्याख्यातं धन्वान्तरिक्षं धन्वन्त्यस्मादापस्तिरो धन्वातिरोचत इत्यपि निगमो भवति सिनमन्नं भवति सिनाति भूतानि । येन स्मा सिनं भरथः सखिभ्य इत्यपि निगमो भवतीत्थामुथेत्येतेन व्याख्यातं सचा सहेत्यर्थः । वसुभिः सचाभुवा । वसुभिः सह भुवौ । चिदिति निपातोऽनुदात्तः पुरस्तादेव व्याख्यातोऽथापि

---

१ ठ. ड. 'इति' नास्ति. २ क. ख. घ. झ. ट. ठ. ड. 'इति' नास्ति. ३ घ. झ. ट. एनेन. ४ घ. झ. ट. ठ. ड. पूज्यस्तस्यान्नमपि संस्कारविशेषेण संस्कृतं पूजायां क्रियते । पूज्य°; च. पूज्यस्त°ज्य. ५ च. °षेण पूजा क्रि° संस्कृतं पूजायां. ६ च. पूज्यं° ज्यं. ७ क. ख. घ. झ. ट. ठ. ड. °रणमिति. ८ च. 'स वृतः' नास्ति. ९ ग. ज. 'स वृक्षः' नास्ति. १० घ. झ. ट. ठ. ड. कटुभा°. ११ क. ख. ५; ग. ३० । ५; ठ. ड. ४ । इति नैरुक्तटीकायां पञ्चमाध्याये चतुर्थः खण्डः° १२ क. ख. छ. त. ब. °क्तः । वक्षो°. १३ क. ख. छ. त. द. °स्मादापः । तिरो°. १४ क. ख. त. द. वति । इत्था°.

पशुनामेह भवत्युदात्ताश्चिदसि मनासि चितास्त्वयि भोगाश्चेतयस इति वा । आ इत्याकार उपसर्गः पुरस्तादेव व्याख्यातोऽथाप्यध्यर्थे दृश्यते । अभ्र[1] आँ अपः । अभ्रे आ अपः[2] । अपोऽभ्रेऽधीति द्युम्नं द्योततेर्यशो वान्नं[3] वा । अस्मे[4] द्युम्नमधि रत्नं च धेहि । अस्मासु द्युम्नं च रत्नं च धेहि ॥५॥

इति पञ्चमाध्यायस्य प्रथमः पादः ।[5]

गायन्ति त्वा गायत्रिणं[6] इति । मधुच्छन्दस आर्षम् । अनुष्टुप् । ऐन्द्री । हे[7] भगवन्निन्द्र गायन्ति त्वा गायत्रिणः । अस्यामृच्यर्को देवः स्तुवन्ति त्वां सामगाः सामभिः । अर्चन्त्यर्कमर्किणः । पूजयन्ति त्वामृग्भिर्होतारो मन्त्रिणः । एवमनेन प्रकारेण सर्वे एवं ते ब्रह्माणो[8] ब्राह्मणाः यज्ञकर्मणि[9] हे शतक्रतो उद्वंशमिव येमिरे । उद्येमिरे वंशमिव त्वां स्तुतिभिर्हविर्भिश्च । यज्ञेषु तवैव महिमानं वर्धयन्तीत्यर्थः । ‘वंशो वनशयो भवति’ । वने शयितं[10] इवास्ते । ‘वननाच्छ्रूयत इति वा’ । संभजनाद्वा[11] वर्तिभिः । एवमत्र देवोऽर्कशब्देनोच्यते । मन्त्रस्यार्कशब्दवाच्यत्वे ‘अर्चन्त्यर्कमर्किणः’ इत्येष एव

‘अर्किणः’ इत्यत्रार्को मन्त्रः

निगमः । अर्किणो हि मन्त्रिण एवाभिप्रेताः । वृक्षस्तु[12] प्रसिद्ध एव । तेन निगमस्तदभिधायको नैवास्ति ।

‘पविः’ (२५) इत्यनवगतम् । ‘रथनेमिर्भवति’ इत्यभिधेयवचनम् ।

---

१ छ. त. द. अभ्र आ°. २ छ. त. द. अपोऽभ्रेऽध्यप इति द्यु°. ३ क. ख. छ. त. द. वा अन्नं. ४ क. ख. ६ (५); छ. त. ६; द. अङ्को नास्ति. ५ ड. थ. ध. ‘इति० पादः’ नास्ति; छ. प्रथमः पादः; त. पञ्चमाध्याये प्रथमः पादः; द. इति नैरुक्तस्य पञ्च°. ६ ग. ज. °त्रिणः० । मधु°; घ. ट. °त्रिणो० वंशमिव येमिरे । इति°. ७ ग. ज. ‘हे’ नास्ति; च. °आर्ष भग° अनुष्टुबैन्द्री । हे. ८ क. ख. घ. झ. ट. ठ. ड. एते ब्रह्मा°; च. एवं ते. ९ क. ख. घ. झ. ट. ठ. ड. याज्ञे क°; च. यज्ञ° याज्ञे. १० ग. ज. शैत इ°; च. शेत इ°. ११ ग. ज. घ. ट. °नाद्वावर्ति°. १२ ग. ज. वृक्षः सुप°.

'[1]यद्विपुनाति भूमिम्' । सा हि विपुनाति भूमिमिति पविः । 'उत स्म ते परु[2]ष्ण्यामूर्णा वसत शुन्ध्य[3]वः । उत पव्या रथानामद्रिं भिन्दन्त्योजसा' [ऋ०सं०५।५२।९] ॥ श्यावाश्वस्येयमार्षम् । हे मरुतो येषां वस्तिरोभवितुमाविर्भवितुं च काले[4] शक्तिरस्ति ते यूयम् उत स्म अपि क[5]स्मिंश्चित्काले शुन्ध्यवः मद्व इव परुष्ण्यां नद्यां माध्यमिकायां वा [6]वाचि पर्ववत्यां यूयमेव शुन्ध्यवः शोधयितारः ऊर्णाः छि[7]न्नास्तिरोहिता वसथ[8] एतस्मिन्नन्तरिक्षलोके । अपि च । कस्मिंश्चिदभ्युद्[8]गमकाले प्राप्ते युष्माकं रथानां पव्याः यो[9] रथनेमयस्ता एव अद्रिं भिन्दन्ति ओजसा बलेन । किमुत यूयमित्यभिप्रायः ॥

'पविः' इत्यस्य प्रयोगोऽर्थश्च

एवमेतस्मिन्नथसंयोगात्पविशब्देन रथचक्रनेमिरभिसं[10]बध्यते । ब्राह्मणमपि चैतस्मिन्नेवार्थे चातुर्मास्येषु सान्तपनं हविरधिकृत्य 'देवा वै वृत्रस्य मर्म नाविन्दंस्तं मरुतः क्षुरपविना व्ययुः[11] स वा एनं तदतपंस्तस्मात्सान्तपनाः' (मैत्रा०सं०१।१०।१४) इति ॥

पविशब्दस्य रथनेम्यर्थे ब्राह्मणवचनम्

एतस्मिन्नपि च ब्राह्मणे चक्रनेमिः[12] क्षुरधाराकृतिस्तीक्ष्णः[13] पविरित्युच्यते तस्मादुपपद्यते । अल्पप्रयोगविषयत्वादुदाहरणद्वयम् ।

'वक्षः' (२६) इति व्याख्यातम् 'उपो अदर्शि शुन्ध्यवः' इत्यत्र (निरु० ४ । १६) ।

---

१ ग. ज. यद्वि पुनाति भूमिमिति पविः (ग. पविः । ३१ ।). २ ग. परुष्ण्यामूर्णा व० । श्यावा°; घ. ट. परुष्ण्या० भिन्दत्योजसा. ३ ज. शुन्ध्युवः । श्यावा°. ४ घ. ट. ठ. ड. काले काले श°; च. काले॰शक्ति° काले. ५ क. ख. घ. झ. ट. ठ. ड. अपि च कस्मिंश्चन का°. ६ क. ख. °वा विपर्व°; ग. ज. घ. ट. ठ. ड. 'वा' नास्ति; च. वा वाचि. ७ ग. ज. छिन्ना°; च. छिन्ना° छ. ८ ट. वसथ° त. ८ क. ख. घ झ. ट. ठ. ड. °द्गमनका°; च. °द्गम॰काले° न. ९ घ. ट. ठ. ड. यः. १० घ. झ. ठ. ड. °संपद्यते. ट. संपद्यते° बध्य. ११ क. ख. घ. झ. ट. ठ. ड. सांतपनं समतपं°; च. °व्ययुः सं वा एनं तदं° व्ययुः सांतपनं सम. १२ ग. ज. चक्रमेनिः; च. चक्रमनिः° नेमिः. १३ क. ख. घ. झ. ट. ठ. ड. °स्तीक्ष्णपवि°.

'धन्व' (२७) इत्यनवगतम् । 'धन्वनम्'[1] इत्यवगमः । 'अन्तरिक्षम्' इत्यभिधेयवचनम् । 'धन्वन्त्यस्मादापः' इति नामप्राप्तौ[2] हेतुनिर्देशः[3] । 'यः परस्याः परावतस्तिरो धन्वातिरोचते । स नः पर्षदति द्विषः' (ऋ०सं० १० । १८७ । २) ॥ अग्निपुत्रस्य वत्सस्येयमार्षम् । व्यूढस्य दशरात्रस्य नवमेऽहन्याग्निमारुतस्य शस्त्रस्य जातवेदस्ये सूक्ते निविद्धानीये शस्यते (आश्व०श्रौ० ८ । ११) । यः अग्निरादित्यात्मनावस्थितः परस्याः पराबतः परस्यामपि परावति वर्तमानः तिरः तीर्णमस्यै[6]तन्महदन्तरिक्षं धन्व स्वेन प्रभावेन दीप्त्या अतीत्यास्मान्प्रति रोचत एव प्रकाशत एव । नानेनैनमतिमहताऽपि तिरोधीयत इत्यभिप्रायः । तस्य किमिति उच्यते । स नः सोऽस्माकं पर्षदति सर्वतः सादयतु नाशयतु द्विषः । द्वेष्टॄनित्यर्थः । एवमस्मिन्नादित्यस्तुतिसंबन्धाद्धन्वशब्दोऽन्तरिक्षाभिधानमित्युपपद्यते ।

'धन्व' इत्यस्य प्रयोगोऽर्थश्च

'सिनम्' (२८) इत्यनवगतम् । 'सिनाति' इति शब्दयुक्तिः । 'अन्नं भवति' इत्यभिधेयवचनम् । 'सिनाति भूतानि' । बध्नातीत्यर्थः । अन्नेन हि सर्वाणि भूतानि बध्यन्ते[10] । 'इमा उ वां भृमयो मन्यमाना[11] युवावते न तुज्या अभूवन् । क्व त्यदिन्द्रावरुणा यशो वां येन स्मा सिनं भरथः सखिभ्यः' । (ऋ० सं० ३ । ६२ । १) ॥ विश्वामित्रस्यार्षम्[12] । तार्तीयसवनिके[13]षूक्थपर्यायेषु स्तोमातिशंसने[14] मैत्रावरुणस्य शस्त्रे

'सिनम्' इत्यस्य

१ क. ख. ग. ज. ब. झ. ठ. ड. धन्वन्तीत्यव॰; च. धन्वंतमि॰ न्वन; ट. धन्वन्तीत्य॰ नमि. २ क. ख. प्राप्तौ; च. ठ. प्राप्तो॰ प्तौ. ३ ग. ॰देशः । ३२ । यः॰. ४ ग. ज. परावतः । अग्नि॰; घ. ट. परावतः० स नः पर्ष॰. ५ घ. झ. ठ. ड. ॰मार्षं । गायत्र्याग्नेयी । व्यू॰; च मार्षं व्यू॰ गायत्र्याग्नेयी. ६ क. ख. घ. झ. ग. ठ. ड. तीर्णतममेतन्म॰; ग. ज. तीर्णमस्येतन्म॰; च. तीर्णमस्यैतन्म॰ तममे. ७ क. ख. घ. झ. ट. ठ. ड. महतापि ति॰. ८ च. ट. पर्षत्॰ परिष. ९ ग. ज. 'इति' नास्ति. १० ग. ॰न्ते । ३३ । इमा॰. ११ ग. ज. ॰माना इति । वि॰; घ. ट. मन्यमानाः० भरथः सखिभ्यः. १२ घ. ट. ॰स्येयमार्षं । ऐन्द्रावरुणी त्रिष्टुप् । तार्ती॰; च. स्येयं तार्ती॰ आर्षं ऐन्द्रावरुणी त्रिष्टुप्. १३ क. ख. घ. झ. ट. ॰सव-नेषु॰; च. ॰सवनिकेषू॰ ने. १४ क. ख. स्तोमाभिशं॰; ग. ज. स्तोमातिशंसस्य; च. स्तोमाति॰ भि.

विनियुक्ता (आश्व० श्रौ० ७ । ९) । हे इन्द्रावरुणौ इमा एव वां युवयोः भृमयः स्तुतयः[1] या यास्तैस्तैः[2] स्तोतृभिरुदीरिता युवामेव मार्गमाणा भ्रमन्तीव । ता एता यथापूर्वमेवास्माकमभिमतफलदायिन्यो भविष्यन्तीति मन्यमाना वयमुदीरयामहे । ताः पुनरेता अस्मै युवावते युष्मद्वते भवद्भ्यां तद्वते यजमानाय न यथापूर्वं तुज्या दात्र्यो[3]ऽभिमतानामर्थानाम् अभूवन् बभुवुः । यतो ब्रवीमि । हे इन्द्रावरुणौ क त्यत् क तद्युवयोः यशो मा[4]हाभाग्यं गतं येन माहाभाग्येनैताभिः स्तुतिभिरभिष्टुतौ सन्तौ सिनम् अन्नं भरथः दत्थः सुपूज्यं वा कुरुथः सखिभ्यः समानख्यानेभ्यो यजमानेभ्यः[5]। अन्नमेव हि प्रायेण यजमानैः प्रार्थ्यत इति ' सिन' शब्देनात्रान्नमभिधीयत इत्युपपत्तिः । व्यभिचारित्वादभिधानानां धन्व सिनमित्येवमादीनि[6] स्वे स्वेऽभिधानवर्गे पठितान्यपि सन्ति नैघण्टुके प्रकरणे समाम्नातान्येतस्मिन्न[7]प्यैकपदिके प्रकरणेऽनवगतसंस्काराभिप्रायेण । कानिचिदनेकार्थाभिप्रायेण ।

' इत्था ' (२९) इत्येष निपातः ' अमुथा ' इत्यनेन व्याख्यातोऽष्टमेऽध्याये (निरु० ३ । १६) ।

' सचा ' (३०) इत्यप्रतीतार्थो निपातः । ' सह ' इत्यर्थप्रतीतिः[8] ।

' सचा ' इत्यस्य

' अग्निनेन्द्रेण वरुणेन[9] विष्णुनादित्यै रुद्रैर्वसुभिः सचाभुवा । सजोषसा उषसा सूर्येण च सोमं पिबतमश्विना' (ऋ० सं० ८ । ३५ । १) ॥

श्यावाश्वस्यात्रेयस्यार्षम्[10] । त्रिष्टुप् ज्योतिष्मती[11] । हे अश्विनौ एताभिरग्न्यादिभिर्देवताभिः सचाभुवौ सहितौ भूत्वा सजोषसौ[12] सहप्रीतौ इमं सोमं पिबतं युवाम् । पीत्वा चैतं नामास्माकमर्थमभिप्रेतं कुरुतमित्येवमाशीर्योज्या । एवमिहाग्न्यादिदेवताभिसंबन्धात् ' सचा ' इत्येष सहयोगे भवतीत्येतदुपपद्यते ।

' चित् ' (३१) इत्येष ' निपातोऽनुदात्तः पु[13]रस्तादेव व्याख्यातः ' ।

---

१ घ. ट. 'स्तुतयः' नास्ति. २ घ. झ. ट. ठ. ड. 'तैः' सकृदेव. ३ घ. झ. ट. ठ. ड. दात्र्यः दातायाभिमता°. ४ सर्वेषु लिखितपुस्तकेषु 'महाभा°'. ५ घ. झ. ट. ठ. ड. धत्थः सुपूजां वा; च. दत्थः° घ. ६ क. ख. घ. झ. ट. ठ ड. °मित्यादीनि. ७ क. ख. घ. झ. ट. ठ. ड. 'अपि' नास्ति; ग. च. ज. °न्प्यैक°. ८ ग. °तीतिः । ३४ । अग्नि°. ९ ग. ज. वरुणेन विष्णुना । श्यावा°; घ. ट. वरुणेन० पिबतमश्विना. १० क. ख. घ. झ. ट. ठ. ड. °श्वस्येयमार्षं. ११ घ. झ. ट. °त्रिष्टुप् । उपरिष्टाज्ज्यो°; च. °त्रिष्टुप्ज्यो° उपरिष्टात्. १२ क. ख. घ. झ. ट. ठ. ड. °सौ च सह°; षसौ सह° च. १३ क. ख. घ. ट. ठ. ड. 'पुरस्तादेव व्याख्यातः' नास्ति.

तद्यथा । 'सद्यश्चिद्यः शवसा पञ्च कृष्टीः' [ऋ० सं १० । १७८ । ३] इति । स पुरस्तादेव व्याख्यातः 'चिदित्येषोऽनेककर्मा' (निरु० १ । ४) इत्यत्र । 'अथापि' अयमेवाद्युदात्तो भवति । ततः 'पशुनाम भवति' । तद्यथा । 'चिदसि मनासि धीरसि' इति राजक्रयणीगोस्तुतौ [मैत्रा० सं० १ । २ । ४ ।] सैवोच्यते 'चिदसि मनासि' इति । अतः पुनरेतद्ब्राह्मणे व्याख्यायते 'चिदसीति यद्धाव चिकित्सते' इत्येवमाद्याध्वर्यवे [मैत्रा० सं० ३ । ७ । ५] ।

पश्वर्थे 'चित्' इत्यस्य प्रयोगः

'आ [३२] इत्याकार उपसर्गः पुरस्तादेव व्याख्यातः' 'आ इत्यर्वागर्थे' इति [निरु० १ । ३] । अथापि चोपमार्थे दृश्यते निपातत्वेन 'जार आ भगम्' इति [निरु० ३ । १६] । अथायमेव कदाचित् 'अभ्यर्थे दृश्यते' 'अधीत्युपरिभावमैश्वर्यं वा' इति [निरु० १ । ३] । यथायमभ्यर्थेऽपि भवति तथा 'अभ्र आँ अपः' इत्येष निगमः । 'कदु प्रियाय धाम्ने मनामहे स्वक्षत्राय स्वयशसे महे वयम् । आमेन्यस्य रजसो यदभ्र आँ अपो वृणाना वितनोति मायिनी' (ऋ० सं० ९ । ४८ । १) ॥ अधुना पदविभागमस्य भाष्यकारः करोत्युपसर्गविभागोपप्रदर्शनार्थम् 'अभ्रे आँ अपः' इति । अधुना आङर्थं ब्रवीति । 'अपोऽभ्रेऽधीति' यदुक्तं स्यात्तदेवोक्तं भवति 'अभ्र आँ अपः' इति । प्रतिभानोरात्रेयस्येयमार्षम् । वैश्वदेवस्य प्रथमैव । जगती । अत्र पुनः प्रायेणाप एव स्तूयन्ते । 'आपो वै विश्वेदेवाः सर्वा एव वा देवताः' इत्यनेन ब्राह्मणदर्शनेनापां वैश्वदेवत्वमुपपद्यते । तत्पुनः सूक्तमभिप्लवस्य षडहस्य पञ्चमेऽहनि तृतीयसवने वैश्वदेवे शस्त्रे शस्यते (आश्व० श्रौ० ७।७) । कदु प्रियाय । कत्प्रियाय सुखाय च प्रियाय च धाम्ने स्थानाय वैश्वदेवाय तत्प्राप्त्यर्थं

अभ्यर्थे 'आ' इत्यस्य

१ घ. झ. ट. ठ. ड. चिचित्सते; च. चिकित्सते° चि. २ क. ख. अथाप्युष°. ३ ग. °गमः । ३५ । कदु°. ४ ग. धाम्ने० मायिनी; घ. ट. धाम्ने मनामहे० वितनोति मायिनी. ५ ग. च. ज. ट. अभ्र आँ अपः; घ. अभ्र आ अपः. ६ क. ख. घ. झ. ट. 'एव' नास्ति. ७ ग. ज. वैश्वदे°; च. विश्वदे°. ८ क. ख. घ. झ. ट. ठ. ड. °याय धाम्ने मनामहे । कंतिम°. ९ च. °याय सु° च. १० ग. ज. 'तत्' नास्ति; च. °वाय प्रा° तत्.

तानेव च विश्वान्देवान् अपो मनामहे । ता एव ह्युपास्यमानास्तत्[1]स्थानं प्रापयितुं समर्था इत्येवं[2] मनामहे । स्थानविशेषणान्येवोत्तराण्यपि स्वक्षत्रादीनि । स्वक्षत्राय च धाम्ने । स्वबलायेत्यर्थः । यत्र स्वमेव[3] बलं भवति न यत्र परकीयं बलमाशास्यते यथेह[4] लोके । स्वयशसे । यत्र स्वमहिमकृतमेव यशो भवति न सांयौगिकद्रव्यकृतम् । महे महते धाम्ने तत्[5]प्राप्त्यर्थं ता एवापो मनामहे मत्वा चोपास्मह इत्यभिप्रायः । आमेन्यस्य । मेना माध्यमिका वाक् तस्या यद्रजो लोकः । अन्तरिक्षलोक इत्यर्थः । तस्य । आ उपरि यदभ्रं यो मेघस्तत्र या अध्यपो[6]ऽवस्थिता वृणाना[7] संभजमाना वितनोति विस्तृणाति वर्षभावेन मायिनी प्रज्ञावती माध्यमिका वाक् ता अपो वयमेवमादिगुणयुक्तास्तासामेव सर्वगतस्य धाम्नः प्राप्त्यर्थं मनामहे याचामहे । अत्र एवा[8]ध्यापो वर्तन्त इति आङ्व्यर्थ उपपद्यते[9] ।

अस्या ऋचोऽन्योऽर्थः

अथवैवमन्यथास्य[10] मन्त्रस्यार्थः स्यात् । कदु प्रियाय सुखाय प्रियाय चैतस्मै धाम्ने स्थानाय । यत्र वयं वर्तामहे कथं नामैतत्स्थानं सुखं च प्रियं च स्वक्षत्रं च स्वयशश्च महच्च स्यादित्येवमर्थं वयं[11] विश्वान् देवान् अपो मनामहे । 'मदेमहि मनामहे' इति याच्ञाकर्मसु पठितम् [निघ० ३।१९] । कतमाः पुनरपो याचामह इति । उच्यते । आमेन्यस्य रजसः । आभिमुख्येन[12] मननीयस्य रजसोऽन्तरिक्षलोकस्य यदभ्रमुपरि[13] वर्तते[14] तस्मिन्नभ्रेऽपो[15] वृणाना[16] संभजमाना मायिनी माध्यमिका वाक् वितनोति वृष्टिभावेन तां[17] मनामहे याचामहे कदु प्रियाय ।

---

१ घ. झ. ट. ठ. ड. °स्तत्तस्था°. २ क. ख. घ. ट. ठ. ड. इत्यर्थं. ३ च. मनामहे᳚ । स्था° जामीमहे. ४ ग. ज. स्वयमे°; च. स्वयमे°. ५ घ. ट. ठ. ड. तथेह. ६ ग. च. ज. ' तत् ' नास्ति. ७ ग. च. ज. ठ. ड. अध्यापो°. ८ ग. च. ज. °णानाः संभजमानाः वित°. ९ क. ख. घ. झ. ट. ठ. ड. एव ह्यध्या° च. एवाध्या° व ह्य. १० क. ख. घ. झ. ट. ठ. ड. इत्युप°. ११ च. अथैवम°. १२ क. ख. घ. झ. ट. ठ. ड. ' वयं ' नास्ति. १३ ग. ज. याः आभि°; च. याः आभि°. १४ ग. ज. पदमुप°; च. पदमुप° यदभ्र. १५ ग. ज. वर्तन्ते; च. °रि यदभ्रं वर्तन्ते° वर्तते. १६ च. तस्मिन्न᳚ पो° भ्रेऽ. १७ ग. ज. °णाना । सं°; च. णानाः. १८ च. तां.

'द्युम्नम्' [३३] इत्यनेकार्थम् । 'यशो वान्नं वा' इत्यभिधेयवचनम्[1] । शतं ते शिप्रिन्नूतयः[2] सुदासे सहस्रं शंसा उत रातिरस्तु । जहि वधर्वनुषो मर्त्यस्यास्मे द्युम्नमधि रत्नं च धेहि ' [ऋ० सं० ७ । २५ । ३] ॥ 'द्युम्नम्' इत्यस्य वसिष्ठस्यार्षम् । त्रिष्टुप्[3] । महाव्रते महदुक्थे दक्षिणे पक्षे शस्यते [ऐ० आ० ५ । २ । २] । हे शिप्रिन् इन्द्र शतं ते तव ऊतय आगमनानि सन्तु । क । सुदासे सुदाने कल्याणदान एतस्मिन्यजमाने । तथैनमनुगृहाण यथा नित्ययज्ञैवायं यजमानः स्यादित्यभिप्रायः । आगतस्य च सतस्तव सहस्रं शंसा बहूनि स्तोत्राणि सन्तु । उत रातिरस्तु । अपि च हविर्दत्तिरस्त्वित्येतदेवानुवर्तते । एवं च त्वमागत उपसृप्तः सञ्छृणु यत्कुरुष्व । हे वधः वधयितः वनुषो मर्त्यस्य योऽस्मान् हन्तुमिच्छति मर्त्यो मनुष्यस्तस्य यद्वीर्यं तज्जहि । हत्वा च तस्य वीर्यं निरुद्यमं तं[4] कृत्वा अस्मे अस्मासु द्युम्नमन्नं यशो वा[5] रत्नं च धेहि । निधेहीत्यर्थः[6] । रत्नं च[7] धनम् । एवमेतस्मिन्मन्त्रे[8] शत्रुवधसंबन्धात् द्युम्नशब्देन यशो वान्नं वोच्यत इत्युपपत्तिर्हते हि शत्रौ यशोऽन्नं च भवतीति । 'द्युम्नं द्योततेः' इति । अन्नमेव हि भुञ्जानस्य दीप्तिर्भवतीति द्युम्नमन्नं[9] द्योतयितृत्वाद्यशस्तु दीप्तं प्रकाशस्वभावादिति ॥ ५ ॥

दशमाध्यायस्य[10] प्रथमः पादः[11] ॥

द्वितीयः पादः ॥

पवित्रं पुनातेर्मन्त्रः पवित्रमुच्यते । येन देवाः पवित्रेणात्मानं पुनते सदेत्यपि निगमो भवति रश्मयः पवित्रमुच्यन्ते ।

---

१ ग. °चनं । ३६ । शतं°. २ ग. ज. °न्नूतयः । वसि°; व. ट. °न्नूतयः सुदासे० स्मे द्युम्न°. ३ घ. झ. ट. °ष्टुवैन्द्री; च. °ष्टुप् । म° ऐन्द्री. ४ क. ख. घ. झ. ट. ठ. ड. 'तं' नास्ति;च. तं. ५ घ. झ. ट. ठ. ड. वा महि महत् रत्नं. ६ घ. झ. ट. ठ. ड. 'निधेहि' नास्ति. ७ क. ख. घ. झ. ट. ठ. ड. 'च' नास्ति. ८ क. ख. ग. ज. 'मन्त्रे' नास्ति. ९ क. ख. घ. झ. ट. ठ. ड. 'अन्नं' नास्ति. १० ग. ज. घ. झ. ट. दशमस्य प्रथ°; ठ. ड. इति दशमस्य प्रथ°. ११ च. पादः समाप्तः; ठ. ड. पादः इति निरुक्तटीकायां पञ्चमाध्याये पञ्चमः खण्डः.

गभस्तिपूतो नृभिराद्रिभिः सुत इत्यपि निगमो भवत्यापः पवित्रमुच्यन्ते । शतपवित्राः स्वधया मदन्तीर्बहूदकाः । अग्निः पवित्रमुच्यते वायुः पवित्रमुच्यते सोमः पवित्रमुच्यते सूर्यः पवित्रमुच्यते इन्द्रः पवित्रमुच्यते । अग्निः पवित्रं स मा पुनातु वायुः सोमः सूर्य इन्द्रः । पवित्रं ते मा पुनन्त्वित्यपि निगमो भवति । तोदस्तुद्यतेः ॥ ६ ॥

'पवित्रम्' [३४] इत्यनेकार्थम् । 'पुनातेः' इति धातुनिर्देशो निर्वचनाभिप्रायः । 'मन्त्रः पवित्रमुच्यते' इत्यभिधेयवचनम् । येन देवाः पवित्रेणात्मानं पुनते सदा । तेन सहस्रधारेण पावमान्यः पुनातु माम्'॥ मन्त्रस्य पवित्रत्वप्रख्यापको निगमः।

मन्त्रार्थे पवित्रशब्दः

पवित्रस्य वसिष्ठसहितस्य वा आर्षम् । पावमानी सौमी । येन पावयित्रा मन्त्रेण देवा ऋत्विग्यजमाना आत्मानं पुनते सदा सततमेव । प्रस्तुते कर्मणि यस्य मन्त्रस्यैतत्सामर्थ्यं तेन मन्त्रेणैवं वीर्यवता सहस्रधारेण बहुप्रक्षरेण प्रविर्चलेन पवमानः पूयमानः सोमो मां पुनातु । मन्त्रेणैव देवा ऋत्विग्यजमाना आत्मानं पुनन्ति तस्मादुपपद्यते तेषां देवत्वमिति । न हीतरेषां देवानां पापमस्ति यत्पूयेत । "न ह वै देवान्पापं गच्छति" (बृह० उ० १ । ५ । २०) इति विज्ञायते । तस्माद्देवशब्देनात्र ऋत्विग्यजमाना उच्यन्ते । ते हि हविषां दातारः पावनेन चार्थिनस्तस्मादुपपद्यते तेषां देवत्वम् ।

'रश्मयः पवित्रमुच्यन्ते' । ते हि स्पर्शनेनैव पावयन्ति । 'वाचस्पतये

रश्म्यर्थे पवित्रशब्दः

पवस्व वृष्णो अंशुभ्यां गभस्तिपूतः । देवो देवानां पवित्रमसि येषां भागोऽसि' (मैत्रा०सं० १।३।४) इति ॥ एषा उपांशुग्रहणे विनियुक्ता [मान० श्रौ० २ । ३ । ३ । १२] । हे सोम वाचस्पतिरिन्द्रस्त्वां पौस्यतीत्ये-

---

१ क. ख. छ. त. द. 'नृभिराद्रिभिः सुतः' नास्ति. २ छ. द. वति । आपः°; त. °वत्यापः° ति । आ. ३ ड. थ. विरामो नास्ति. ४ क. ख. १ (६); छ. त. ७; द. १. ५ घ. ट. पवित्रेण० पुनातु मा. ६ घ. झ. ट. ठ. ड. °पकोऽयं नि°; च. °पको॰ नि° यं. ७ च. प्रक्षरेण° रणेन. ८ क. ख. घ. झ. ठ. ड. प्रविरलेन; ट. प्रविरळेन; च. प्रविर्चलेन° र. ९ च. पावनेऽन चा°; ० झ. पावमानेन. १० ग. च. ज. पवस्वेत्येषा°. ११ क. ख. घ. झ. ट. ठ. ड. °देवो देवेभ्यः पवस्व येषां°. १२ क. ख. घ. झ. ट. पश्यती°; च. पौस्य° पश्य.

तमर्थं पुरस्कृत्य वृष्णः कर्त्तुः[1] पवस्व पूयस्व । यावेतावंशू अन्तर्हितौ[2] [3] निषिच्यमानस्यैव ताभ्यां पवस्व । अपि च । त्वं प्रागप्यभिषवात् गभस्तिपूत एव रश्मिपूतः । किंच । देवस्त्वं दानादिगुणयुक्तो देवानामेव दानादिगुणयुक्तानां पवित्रमसि पावयितासि । किं सर्वेषामेव । नेत्युच्यते । येषां भागोऽसि । ये त्वामभिषवादिक्रियया भजन्ते[4] ऋत्विग्यजमानाः । ते ह्यत्र देवत्वेनाभिप्रेताः पावनसंबन्धात् । न हीतरेषां देवानां पापमस्ति पूर्ववत् किंचित्[5] ।

रश्म्यर्थेऽन्यदुदाहरणम्

'पवमान मह्यर्णो[6] वि धावसि सूरो[7] न चित्रो अव्ययानि पव्यया । गभस्तिपूतो नृभिरद्रिभिः सुतो महे वाजाय धन्याय धन्वसि '[ऋ० सं० ९ । ८६ । ३४]॥

एतं[8] मन्त्रं व्याचक्षते । ऋषिगणैस्त्रिभिर्दशर्चमे-[9] तत्सूक्तं दृष्टं तत्रैषा । हे पवमान पूयमान सोम अव्ययानि पव्यया अविमयेन ऊर्णेन[10] पवित्रेण पूयमानस्त्वं महि महत् अर्णः उदकम्[11] आत्मत्वेनाभिसंपन्नस्तत्स्वभावमुपगतः निर्व्याजीषः स्वच्छो[12] भूत्वा ततो द्रोणकलशं प्रति विधावसि । कीदृशः पुनः पूर्वं भूत्वैतां रसावस्थामापद्यसे त्वमिति । उच्यते । पूर्वं तावदरण्येऽवस्थितः गभस्तिपूतः सन्[13] रश्मिपूतः तत आहृत्य क्रीत्वा सोमक्रयविक्रय[14]विधानेन नृभिः ऋत्विग्यजमानैः अद्रिभिः ग्रावभिः सुतः अभिषुतः[15] । ततो महे वाजाय अन्नाय धन्याय धन्वसि कृत्स्न[16]जगद्धारयित्रेऽर्थाय । कथं नाम कृत्स्न[17]जगदुपकारिता-[18]

---

१ क. ख. घ. झ. ट. ठ. ड. °तुः अग्नौ प्रास्ताहुत्या वृष्टिकर्तुरादित्यस्य चार्थे पव°; च. °तुः ˇ पव° अग्नौ○○○ चार्थे. २ च. °तावन्त° शू अ. ३ क. ख. घ. झ. ट. ठ. ड. °तौ सन्तौ सकलयज्ञं व्याप्नुवानौ निषि°; च. °तौ ˇनि° सकलयज्ञं व्याप्नुवानौ. ४ क. ख. घ. झ. ट. ठ. ड भजन्ति. ५ ग. °चित् । ३७ । पव°. ६ ग. ज. मह्यर्णो○ । ऋषि°; घ. ट. मह्यर्णो वि धावसि○ धन्याय धन्वसि. ७ च. शूरो. ८ घ. झ. ट. ठ. ड. एवं. ९ क. ख. घ. ट. ठ. ड. °गणैरकृष्टामाषादिभिर्व्यस्तैः समस्तैश्च त्रिभिः प्र त आशव इत्येतस्याष्टाचत्वारिंशदृचस्य सूक्तस्य चत्वारिंशतामृचां दशर्चो (क. ख. दश दशर्चो) दृष्टाः । तत्रैषा चतुस्त्रिंशत्तमी; च. °गणैस्त्रिभि° रकृष्टामाषा○○○○ चतुस्त्रिंशत्तमी. १० ग. चीर्णेन; ज. मर्णोन. ११ क. ख. घ. ट. ठ. ड. उदकमुदकत्वेनाभि°; च. °र्ण उदकˇत्वेनाभि° मात्म. १२ च. स्वस्थो° छो. १३ क. ख. घ. झ. ट. ठ. ड. रश्मिपूतः सन् तत°. १४ ज. सोमक्रयविधा°. १५ च. °भिस्तुतः° षु. १६ क. ख. ग. च. ज. घ. झ. ट. ड. कृत्स्नं ज°; ठ. कृत्स्नजगद्धारणार्थाय. १७ ग. ज. ड. कृत्स्नं ज°. १८ क. ख. घ. झ. ट. °कारित्वमभि°. ३

भिनिष्पद्येत वृष्टिनिमित्तेनेत्येतमर्थं पुरस्कृत्य रसभावमापन्नो द्रोणकलशं प्रति धन्वसि । प्राप्नोषीत्यर्थः[1] । एवमत्र 'गभस्तिपूतः' इत्येतस्मात्[2]पावनसंबन्धाद्रश्मीनां पवित्रत्वमुपपद्यते । केश्चित् ' पवित्रवन्तः परि वाचमासते ' [ऋ० सं० ९ । ७३ । १३] इत्येष निगमो[3] विधीयते ।

' आपः पवित्रमुच्यन्ते ' । ता अपि हि पावयन्ति । ' शतपवित्राः

अबर्थे स एव

स्वधया मदन्तीर्देवो देवानामपि यन्ति[4] पाथः ।
ता इन्द्रस्य न मिनन्ति व्रतानि सिन्धुभ्यो हव्यं
घृतवज्जुहोत '[ऋ० सं० ७ । ४७ । ३]॥

अब्देवत्या । त्रिष्टुप् । वसिष्ठस्यार्षम् । बहुपावयित्र्यो या देव्यः स्वधया अन्नेन सहिता भूत्वा मदन्तीः[6] देवीः दानादिगुणयुक्ता देवानां दानादिगुणयुक्तानामेव पाथः पानं सोमाख्यम् अपियन्ति अपिगच्छन्ति ता एवंलक्षणा आप इन्द्रस्य न मिनन्ति न हिंसन्ति व्रतानि कर्माणि । येनाभ्रवधानन्तरमविलम्बमाना वर्षभावेन प्रक्षरन्तीत्यभिप्रायः । या एता एवंगुणयुक्ता आपस्ताभ्योऽद्भ्यः सिन्धुभ्यः स्यन्दमानाभ्यो[7] हव्यं हविः घृतवत् घृतमिश्रं जुहोत हे ऋत्विजः । अर्हन्ति ता हविरित्यभिप्रायः । एवमत्रापः पवित्रशब्देनोच्यन्तेऽब्देवतत्वादस्य मन्त्रस्य[8] ॥

अग्न्यादयोऽपि ह्येतेनोच्यन्ते[9] । एतेऽपि[10] हि सर्व एव पावयन्ति ।

अग्न्यादयोऽपि पवित्रशब्देनोच्यन्ते

' अग्निः पवित्रं स मा पुनातु[11] वायुः सोमः सूर्य इन्द्रः[12] । पवित्रं ते मा पुनन्त्वित्यपि निगमो भवति ' । निगद[13]प्रसिद्ध एवैष निगमः ।

---

१ क. ख. घ. ट. ठ. ड. °त्यर्थः । सूरो न चित्रः । सूर्य इव पूजनीयः । एव°; च. °त्यर्थः । ᵛ एव° सूरो न०..०० पूजनीयः. २ ग. ज. झ. °त्पावमानसं°. ३ च. °मो ᵛ वि°ऽमि. ४ ग. °यन्ति ।३८। शत°. ५ ग. मदन्तीर्देवो देवाना० । अब्दे°; घ. ट. मदन्तीः० घृतवज्जुहोत. ६ घ. ट. मदन्तीर्दानादि°; ठ. ड. 'मदन्तीः ' नास्ति. ७ क. ख. घ. झ. ट. स्पन्द्मानाभ्यः; ठ. ड. स्यन्दनमानाभ्य°; ग. च. ज. स्पन्दनाभ्य. ८ क. ख. घ. झ. ट. ठ. ड. °न्तेऽब्दैव°. ९ क. ख. घ. झ. ट. ठ. ड ह्येते पवित्रशब्देनोच्य°; च. ह्येते ᵛनो° पवित्रशब्दे. १० क. ख. घ. झ. ट. ठ. ड. तेऽपि. ११ ठ. ड. पुनात्विति । निगद°. १२ घ. च. विरामो नास्ति. १३ ग. ज. °गदसिद्ध°.

'तोदः' (३४) इत्यनवगतम् । 'तुदः' इत्यवगमः । 'तुदतेः' व्यथनार्थस्येति [धा० ६ । १] धातुनिर्देशः । भूमेर्बिलं तोद इत्युच्यते । तद्धि तुन्नं भवति दीर्णत्वात् । कूप इत्येके ॥ ६ ॥

पुरु त्वा दाश्वान्वोचेऽरिरग्ने तव स्विदा । तोदस्येव शरण आ महस्य (ऋ० सं० १।१५०।१) ॥ बहुदाश्वांस्त्वामेवाभिह्वयाम्यरिरमित्र ऋच्छतेरीश्वरोऽप्यरिरेतस्मादेव यदन्यदेवत्या अग्नावाहुतयो हूयन्त इत्येतद् दृष्ट्वैवमवक्ष्यत् । तोदस्येव शरण आ महस्य । तुदस्येव शरणोऽधि महतः स्वश्वाः सु अश्वनः । आजुह्वानो घृतपृष्ठः स्वश्वा इत्यपि निगमो भवति शिपिविष्टो विष्णुरिति विष्णोर्द्वे नामनी भवतः कुत्सितार्थीयं पूर्वं भवतीत्यौपमन्यवः ॥ ७ ॥

'पुरु त्वा दाश्वान् वोचे' इति दीर्घतमस आर्षम् । उष्णिक् । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १३] । पुरु त्वा दाश्वान् । बहुदानवानहं भूत्वा हे अग्ने त्वामहं वोचे । त्वामाह्वयामीत्यर्थः । किं पुनः कारणमन्या देवता उत्सृज्य त्वामाह्वयामीति । उच्यते । इतो यस्मात् अरिरग्ने तव स्विदा इति । एतद्विवक्षार्थे । सुचिरमपि विचार्य तवाहमरिरेव स्तोमानामुच्चारणे । अयं ईश्वर एव । समर्थोऽहमाह्वयामि त्वां स्तोतुं बहु च दातुमित्यभिप्रायः । किं पुनः कारणमन्या देवता उत्सृज्य त्वामेवाभिह्वयामि । उच्यते । इतो यस्मात् तोदस्येव शरणं आ महस्य । तुन्नस्येव विदीर्णस्य कस्यचि-

तोद इत्यस्य प्रयोगोऽर्थश्च

---

१ क. ख. ग. ज. दीर्घत्वात्; ट. दीर्णत्वा °र्थः. २ क. ख. २ (६); ग. ज. ७ । ३९; ठ. ड. ६ इति निरुक्तटीकायां षष्ठः खण्डः; इतरेष्वङ्को नास्ति. ३ छ. त. द. °वक्षत्. ४ क. ख. २ (७); छ. त. ८; द. २. ५ ग. ज. दाश्वान् वोचे । दीर्घ°; घ. झ. ट. °दाश्वान्००० आ महस्य । दीर्घ°; ठ. ड. दाश्वानिति । दीर्घ°. ६ घ. ठ. ड. °आर्षं । आग्नेयी । उष्णिक्; ट. °आर्षं । उ° आग्नेयी. ७ घ. ट. ठ. ड. दाश्वान्वोचे । बहु°. ८ घ. ट. ड. विचार्य. ९ क. ख. ठ. ड. °वाह्वयामीति; घ. ट. °वाभिह्वयामीति.

च्छ्वभ्रस्य कूपस्योपरि । आङ् अध्यर्थे । महस्य महत इत्यर्थः । शरणे बिले । ' शॄ हिंसायां ' (धा० ९ । १६) । तस्य शरणं बिलम् । तद्विदारितं भवति । यथा[1] हि श्वभ्रे बिले कस्मिंश्चिद्द्रुह्य आपो गच्छन्ति न च तस्य श्वभ्रस्य महतो ग्रहणे[2]शक्तिपरिहाणं भवत्येवं तवानेकाश्चानेक-देवताश्चाहुतीरस्माभिः प्रत्ताः प्रतीच्छतो न सामर्थ्यपरिहाणमस्ति । अतो देवतानामस्माकं त्वमेवातिविशिष्टोपकारप्रवृत्तोऽतस्त्वामेवाभिह्वयामि । एवमत्र शब्दसारूप्यादुपमार्थोपपत्तेश्च[3] ' तोद ' शब्दस्तुन्नस्य भूप्रदे[4]शस्याभिधाय-क इत्युपपद्यते । तथा चोक्तं ' तोदमध्येऽतिर्हृ[5]त्यार्धचतुर्दशसु शँङ्कुं[6] निख-न्यात् ' इति सदसो निर्माणे । स्त्रिया अपि चासत्प्रदेशस्तोद इत्युच्यते । तस्मादेतदपि तुन्नस्य भूप्रदेशस्याभिधायकमित्युपपद्यते ।'अरिरमित्र ऋच्छतेः' इति निगमप्रसक्तम् । ' ऋच्छतेर्हिंसार्थस्य ' (धा० ६ । १६) । ' ईश्वरोऽप्यरिरेतस्मादेव ' धातोः । 'यदन्यदेवत्या अग्नावाहुतयो हूयन्ते' । यस्मादन्यदेवत्याश्चान्यदेवत्याश्चापरिसंख्येया अग्नावाहुतयो हूयन्ते न चाग्नेस्तासां ग्रहणशक्तिपरिहाणमस्ति न च ज्ञायते श्वभ्रबिल इव निषिक्ता आपः क्वापि गच्छन्ति ता आहुतय इति । ' एतात् ' सामान्यं 'दृष्ट्वा एवम्' अवोचन्मन्त्रदृक् ' तोदस्येव शरण आ महस्य ' इति[7] । ' तुदस्येव शरणेऽधि महतः ' इत्यर्थः ।

ईदृगुपमायाः प्रयोजनम्

' स्वश्वाः ' (३६) इत्यनवगतम् । ' सु अश्वनः ' इत्यवगमः[8] ।

'स्वश्वाः' इत्यस्य

' सं भानुना यतते सूर्यस्याजुह्वानो घृतपृष्ठः स्वश्वाः । तस्मा अमृध्रा उषसो व्युच्छान्य इन्द्राय सुनवामेत्याह ' (ऋ० सं० ५ । ३७ । १)[9] ॥ अत्रेरार्षम् । ऐन्द्री । त्रिष्टुप् । यस्य यजमानस्य नित्ययायजूकत्वात्तेषु[10]

---

१ घ. ट. ठ. ड. 'यथा००० हाणं भवति' नास्ति. २ च. ग्रहणे श°. ३ ग. च. ज. 'च' नास्ति. ४ ग. ज. °देशाभि°; च. °देशाभि° शस्या. ५ क. ख. घ. झ. ट. ठ. ड. °ध्ये निर्हन्या°. ६ ग. ज. °शसु संकु निरव-यादि°; ठ. ड. शंकु नि°. ७ ट. ड. इति । तुदस्येव शरण आ महस्येति । तुदस्येव°. ८ ग. गमः । ४० । सं. ९ ग. ज. यतते । अत्रे°; घ. ट. यतते सूर्यस्य० सुनवा-मेत्याह. १० क. ख. घ. ट. ट. ड. °त्तेषु तेषु क°; च. °त्तेषु क० तेषु.

कर्मसूज्ज्वलितोऽग्निः आजुह्वानः आहूयमानोऽभिहूयमानो वा घृतपृष्ठः[1] स्वञ्चाः घृतस्पृष्टः शोभनगमनः स्वेन प्रकाशेन भानुना भास्वता[2] सूर्येण संयतते संगच्छते संस्पर्धते वा सूर्येणातिदीप्तत्वात् । तस्य यजमानस्य किमिति । उच्यते। तस्मा ऐव[3] अमृध्रा अमृता अम्लाना उषसो व्युच्छान्। विभान्तीत्यर्थः। यस्यैवमभिहूयमानोऽग्निर्नित्यकालमेव सूर्येण संयतते तस्यैव पुण्यकृतः सुप्रभाता रात्रयो भवन्ति नेतरस्यायज्वन इत्यभिप्रायः । अपि च । य एवमाह[4] ब्रवीति अपि श्रद्धाद्वितीयो दरिद्रः कश्चित् इन्द्राय इन्द्रार्थं सुनवाम अभिषुणुमः सोमामिति तस्यापि कल्याणाभिव्याहारिणः सुप्रभाता एवोषसः। किमुत यः सुनोतीत्यभिप्रायः। एवमस्मिन् ' सूर्येण संयतते ' इत्यनेन संबन्धात् ' स्वञ्चाः सु अञ्चनः ' अञ्चतेः (धा० १ । ८८७) गत्यर्थस्य रूप[5]दर्शनादित्युपपद्यते ।

' शिपिविष्टो विष्णुरिति ' एते ' विष्णोः ' एव ' द्वे नामनी भवतः' । अत्र ' शिपिविष्टः ' [३७] इत्येतद्गुणपदमनवगतं पक्षेण चानेकार्थम् । शिपिविष्टः 'शेप इव निर्वेष्टितः' इत्यर्थप्रतीतिः। अस्य संबन्धादत्र विष्णुशब्दः समाम्नातो यथा ' अक्षाः ' इत्यस्य संबन्धात्सोमशब्दः ' सोमो अक्षाः' इति [निरु० ५ । ३]। न ह्यत्र प्राधान्येन विष्णुशब्दः समाम्नातो देवतापदत्वात् । अनयोर्द्वयोरपि नाम्नोर्यत् ' पूर्वं ' तत् ' कुत्सितार्थीयं भवतीत्यौपमन्यवः ' आचार्यो मन्यते[6] । यथा च कुत्सितार्थीयं तथोदाहरणार्थमेव निर्ब्रुवन् दर्शयिष्यति । ७ ।

किमित्ते विष्णो परिचक्ष्यं भूत्प्रयद्ववक्षे शिपिविष्टो अस्मि। मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ (ऋ० सं० ७ । १०० । ६)॥ किं ते विष्णो[7]ऽप्रख्यातमेतद्भवत्यप्रख्यापनीयं यन्नः प्रब्रूषे शेप इव निर्वेष्टितोऽस्मीत्यप्रतिपन्नरश्मिरपि वा प्रशंसानामै-

---

१ क ख. ब. झ. ट. ठ. ड. °पृष्ठः घृताक्तपृष्ठः स्वञ्चाः शो°; च. °पृष्ठः स्वैञ्चाः घृतैस्पृष्टः शो° ताक्त. २ ब. झ. ट. ठ. ड. °ना सता सूर्येण सह सं°. ३ ग. ज. तस्मायेव; च. तस्मायैव° ए. ४ क. ख. °माह अयज्वापि श्रद्धा°; ब. झ. ट. ठ. ड.° माह अयज्वापि ब्रवीति°. ५ च. रूपंद°. ६ क. ख. १ (७); ग. ८ ४१/४२; ठ. ड. °ष्यति । इति निरुक्तभाष्ये सप्तमः खण्डः; इतरेष्वङ्को नास्ति. ७ ङ. थ. छ. त. द. विष्णो प्रख्या°.

वाभिप्रेतं स्यात्किं ते विष्णो प्रख्यातमेतद्भवति प्रख्यापनीयं यदुत प्रब्रूषे शिपिविष्टोऽस्मीति प्रतिपन्नरश्मिः शिपयोऽत्र रश्मय उच्यन्ते तैराविष्टो भवति । मा वर्पो अस्मदप गूह एतत् । वर्प इति रूपनाम वृणोतीति सतो यदन्यरूपः समिथे संग्रामे भवसि संयतरश्मिस्तस्योत्तरा भूयसे निर्वचनाय ॥ ८ ॥

'किमित्ते विष्णो' [ऋ० सं० ७ । १०० । ६] 'प्र तत्ते अद्य' इति [ऋ० सं० ७ । १०० । ५] । वसिष्ठस्यैते आर्षम् । विष्णोः शिपिविष्टस्यान्वारम्भणीये चरुस्तस्यैते याज्यानुवाक्ये (मान० श्रौ० १ । ५ । ६ । ५) । वाजपेये च सप्तदशे शस्त्रे शस्यते । (आश्व० श्रौ० ९ । ९) । सोमातिरेके तृतीयसवने च [आश्व० श्रौ० ६ । ७] । किंरूपस्त्वमिति पृष्टः शिपिविष्टोऽस्मीत्युक्तेऽनन्तरं प्रक्रियते किमित्ते विष्णोरिति । किमेतदेवैकं विगतरश्मिरूपं परिचक्ष्यं परिख्यापनीयं भूत् भवति नान्यानि रूपाणि तव सन्ति येनैवं प्रब्रवक्षे पुनःपुनर्ब्रूषेऽस्माकमग्रतः शिपिविष्टोऽस्मीति 'शेप इव निर्वेष्टितोऽस्मीति' ।

शिपिविष्टनाम्नः कुत्सितार्थः

'अप्रतिपन्नरश्मिः' हि सूर्य उदयकाले निर्वेष्टितः शेपरूपो भवति । तस्य तद्रूपगुणयोगि तन्नाम कुत्सितार्थीयमुपपद्यते । 'अपि वा' प्रशंसागुणयुक्तमेवैतन्नाम स्यात् 'शिपिविष्टः' इति । आह । कथमिति । उच्यते । 'शिपयः अत्र' अस्मिन् प्रशंसानामपक्षे 'रश्मय उच्यन्ते' । स च सूर्यो मुहूर्तोदितः शिपिसंज्ञैर्बालरश्मिभिः 'आविष्टो भवति' तस्मात् 'शिपिविष्टः' इत्युच्यते ।

अथवा तत्प्रशंसानाम स्यात्

एवमेतद्व्युत्पाद्यमानं प्रशंसानामैव भवति नाश्लीलोपमासंबद्धमित्यभिप्रायः । हे विष्णो किमेतदेवैकं रूपं तव परिचक्ष्यं प्रख्यापनीयमस्ति यदेतदुदयकाले प्रतिपन्नमात्रेषु रश्मिषु । नान्यानि रूपाणि प्रख्यापनीयानि

---

१ क. ख. ३ (८); छ. त. ९; द. ३. २ च. °शस्त्रे च सामा°. ३ क. ख. ग. ज. °रेकशस्त्रे च तृती°; व. ट. ठ. ड. °रेकशस्त्रे तृती°. ४ क. ख. शेपस्वरू°; घ. झ. ट ठ. ड. शेषसरूपो°; च. शेप रूपो° स. ५ च. °योगि नाम° तत्. ६ क. ख. घ. झ. ट. ठ. ड. °तार्थमित्युप°. ७ घ. झ. ट. ठ. ड. °शंसायुक्तमे°; च. प्रशंसागुण°.

सन्ति ‘ यदुत ’ एवं ‘ प्रब्रूषे शिपिविष्टोऽस्मीति प्रतिपन्नरश्मिः ’ प्रतिपन्नमात्रेषु रश्मिष्विति । विजानीमस्तवैतद्रूपद्वयं यतो ब्रूमः । मा वर्पो अस्मदप गूह एतत् । मा एतत् वर्पो रूपमस्मत् अस्माकमग्रतः प्रख्यापय । किं तर्हि । अपगूह एतत् । संवृतं कुरुष्वैतच्छिपिविष्टशब्द-वाच्यमुपमेयं रूपमथवा बालरश्मिसंयुक्तम् । किं तर्हि । यदन्यरूपो येना-न्येन रूपेण समिथे संग्रामे भवसि संयतरश्मिः संबद्धानेकरश्मिजालस्तदेव नो माध्यंदिनं रूपमनेकरश्मिविकचं प्रकाशयस्वेत्यभिप्रायः । तद्धयनाधृष्यं संग्रामेषु भवति । ‘ तस्य ’ एवार्थस्य प्रकृतस्य यथा प्रशंसानामैतदिति ‘ उत्तरा ’ ऋक् अस्या एव प्रकृताया ऋचो[3] ‘ भूयसे निर्वचनाय ’ । अत्र हि स्वशब्देनैवास्य प्रशंसानामत्वमुच्यते । ८ ।

प्र तत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान् । तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके (ऋ० सं० ७ । १०० । ५) ॥ तत्तेऽद्य शिपिविष्ट नामार्यः प्रशंसाम्य-र्योऽहमस्मीश्वरः स्तोमानामर्यस्त्वमसीति वा तं त्वा स्तौमि तवस-मतव्यां[5]स्तवस इति महतो नामधेयमुदितो भवति निवसन्तमस्य रजसः पराके पराक्रान्ते[6] । आघृणिरागतहृणिः । आघृणे सं सचावहै । आगतहृणे संसेवावहै पृथुज्रयाः पृथुजवः । पृथुज्रया अमिनादा-युर्दस्योः[7] । प्रामापयदायुर्दस्योः ९ ॥

अत्र शिपिविष्टनाम प्रशंसापरमेव

प्र तत्ते ऽद्य शिपिविष्टेति । हे शिपिविष्ट विष्णो तदहं ते तव नाम प्रशंसामि । तत्प्रशंसार्थीयमेव पश्यामि यदन्ये कुत्सितार्थीयं पश्यन्ति । वयुनानि युष्मद्विषयाणि प्रज्ञानानि विद्वान् जानानः । किंच । अर्योऽहमस्मि यस्मादीश्वरः स्तुतीनामुदीरणे युष्मद्गुणाभिज्ञस्तस्मादहं प्रशं-सामि । अथ ‘ वा । अर्यस्त्वमसि ’ ईश्वरो

---

१ ग. ज. संबन्धानेक°; च. संबन्धा° द्धा. २ क. ख. घ. झ. ट. ठ. ड. नाधृष्टं. ३ क. ख. ३ (८); ठ. ड. ८ इति नैरुक्तटीकायां पञ्चमाध्याये अष्टमः खण्ड ; इतरेष्वङ्को नास्ति. ४ छ. त. द. तत्ते अद्य. ५ त. तवसमतव्यांस्तवस°. ६ क. ख. छ. त. द. °क्रान्त आघृ°. ७ क. ख. ४ (९); छ. त. १०; द. ४. ८ क. ख घ ट. ठ. ड. अद्येति । वसि°. ९ ग. ज. °सामि तत्ते नामेति यस्त्व-मसि अर्य ईश्वरो मद°. १० घ. झ. ट. ठ. ड. °अथवा यतस्त्वमसि अर्य ईश्वरो; च. ४ अर्यस्त्वमसि ईश्व° यतः.

मदनुग्रहार्यं[1] समर्थस्तस्मादहं[2] प्रशंसामि तत्ते नामेति [3]स्फुटतरं प्रशंसानामत्वमिति । यस्त्वं सर्वगुणसंपन्न ईश्वरस्तं त्वामहं गृणामि स्तौमि तवसं महान्तम् अतव्यान् अमहान् अहम्। आत्मनिन्दया स्तूयते । क वर्तमानम्। निवसन्तमस्य रजसः अन्तरिक्षलोकस्य पराके पराक्रान्ते स्थाने। दूराद्दूरतरे निवसन्तं स्तौमि ।

'आघृणिः' इत्यस्य

'आघृणिः' (३९) इत्यनवगतम् । 'आगतहृणिः' इत्यवगमः । आगतदीप्तिरागतक्रोधो वाभिधेयः[4] । 'एहि वां विमुचो नपादाघृणे[5] सं संचावहै[6] । रथीॠतस्य नो भव' (ऋ० सं० ६ । ५५ । १) ॥ भरद्वाजस्येयमार्षं[7] पौष्णे सूक्ते । एहि आगच्छ हे विमुचो विमोचयितः प्रजानां तमोभ्यः पूषन् सूर्य नपात् [8]अपां नपात् हे[9] नप्तः। अद्भ्योऽग्निर्जायते अग्नेरादित्य इत्यनयापेक्षयापां नपात्त्वं सूर्यस्य । अथवा मनुष्याणामेव नप्ता स्यात्। नृभ्य ऋत्विग्भ्यो मनुष्येभ्यो जायतेऽग्निरग्नेरपि च सूर्यो जायते यदुक्तमग्न्युपस्थाने 'एष प्रातः प्रसुवति' (मैत्रा० सं० १ । ५ । ७) इति । आघृणे आगतदीप्ते संसचावहै[10] संसेवावहै आवां[11] परस्परतः । रथीॠतस्य रंहयिता गमयिता प्रोत्सर्पयिता नस्त्वं यज्ञस्य भव । त्वदुदयप्रतीक्ष एवाहं यज्ञप्रारम्भं प्रत्याशासे । स त्वमुदेहि[12]। त्वय्युदिते प्रोत्सर्पतामयं यज्ञ इत्यभिप्रायः। एवमयमत्र सूर्यसंबन्धात् 'आघृणि'शब्दो दीप्तिवाचकः। दीप्तिकर्मसु च पठित एवायं 'हरः घृणिः' (निघ० १ । १७) । इति । क्रोधोऽपि घृणिरित्युच्यते 'हेडः[13] हरः घृणिः' (निघ० २ । १३) इति । तदपि प्रकरणवशादुपेक्षितव्यम् ।

---

१ च. °ग्रहाय प्रवृत्तः सम°. २ च. वर्जमितरेषु 'अहं' नास्ति. ३ क. ख. घ. झ. ट. ठ. ड. विस्फुट°. ४ ग. °धेयः । ४३ । एहि. ५ ग. नपा० । भर°; घ. ट. नपा० स्य नो भव. ६ ज. सचावहै । भर°. ७ क. ख. घ. झ ट. ठ. ड. °मार्षं गायत्री पौष्णे°; च. °मार्षं । ^ पौष्णे° गायत्री. ८ ठ. ड. 'अपां नपात्' नास्ति. ९ ग. ज. 'हे नप्तः' नास्ति. १० ग. ज. संसवावहै; च. संसचावहै ^आवां° संसेवावहै वां. ११ क. ख. घ. झ. ट. ड. वां आवां. १२ क. ख. घ. झ. ट. ठ. ड. °मुदिहि. १३ ठ. ड. हेळः.

‘पृथुज्रयाः’ (४०) इत्यनवगतम् । ‘पृथुजवः’ इत्यवगमः[1] ।

‘पृथुज्रयाः’ इत्यस्य ‘यं[2] नु नकिः पृतनासु[3] स्वराजं द्विता तरति नृतमं हरिष्ठाम् । इनतमः सत्वभिर्यो ह शूषैः पृथुज्रया अमिनादायुर्दस्योः’ [ऋ० सं० ३ । ४९ । २] ॥ विश्वामित्रस्यार्षम्[4] । त्रिष्टुप् । ऐन्द्रे सूक्ते । व्यूढस्य दशरात्रस्य द्वितीयेऽहनि मरुत्वतीये शस्यते[5] [आश्व० श्रौ० ८ । ७] । यं[6] नु नकिः । यमिन्द्रं न कश्चिदपि पृतनासु संग्रामेषु स्वराजम् अपराधीनराज्यं द्विता द्विविधेनापि बलेन सांयौगिकेनौरसेन च तरति जयति । सर्वथा[7] जेतुं न शक्यत इत्यभिप्रायः । अथवा । द्विता तरति द्विधैकधा वा बहुधा वा वर्तमानं पृतनासु यं[9] न कश्चिद्धन्तुं[10] शक्नोति नृतमं मनुष्यतमं हरिष्ठां हर्योरास्थातारम् । इनतम ईश्वरतमश्च यः सर्वेभ्य ईश्वरेभ्यः । सत्वभिर्यो ह शूषैः । अनेकसत्त्वसंयुक्तैर्हस्त्यश्वरथपदातिलक्षणैः सांयौगिकैर्बलैः शूषैश्च बलविशेषैरेव । अथवा । सत्त्वशब्दविशेषणमेव शूषशब्दः स्यात्सत्त्वयुक्तैः शूषैर्बलैरिति । पृथुज्रया विस्तीर्णजवः । अमिनादायुः । कस्य । दस्योः मेघस्यासुरस्य । तमहं स्तौमि । स इदं नाम[11] करोतीत्यभिप्रायः । एवमत्र शब्दसारूप्याद्वधाधिकाराच्च ‘पृथुज्रयाः पृथुजवः’[12] इत्युपपद्यते । ‘अथर्युम्’ इत्यनवगतम् । ‘अतनवान्’ इत्यवगमः ॥ ९ ॥

अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयन्त प्रशस्तम् । दूरेदृशं गृहपतिमथर्युम् (ऋ० स० ७ । १ । १) ॥ **दीधितयोऽङ्गुलयो भवन्ति धीयन्ते कर्मस्वरणी प्रत्यृत एने अग्निः समरणा-**

---

१ ग. °गमः । ४४ । यं. २ घ. झ. ट. च. यंन्नु न°. ३ ग. ज. °नासु स्वराजं । विश्वा°; घ. ट. °नासु० दायुर्दस्योः. ४ क. ख. घ. झ. ट. °त्रस्येयमार्षम्. ५ क. ख. घ. झ. ट. ठ. ड. °त्वीये शस्त्रे शस्यते. ६ घ. झ. ट. च. ज. यंन्नु न°. ७ क. ख. घ. झ. ट. ठ. ड. °था यो जेतुं°; च. °था ˇ जेतुं° यो. ८ क. ख. ध. झ. ट. ठ. ड. इत्यर्थः; च. इत्यभिप्रायः° र्थः. ९ ग. ज. यन्न; च. यंन्न. १० ठ.ड. कश्चित् हन्तुं. ११ च. इदं ˇक° नाम. १२ क.ख. ४ (९); ग. ४५ । १०; ठ. ड. गमः । इति निरुक्तटीकायां पञ्चमाध्याये नवमः खण्डः.

ज्जायत इति वा हस्तच्युती हस्तप्रच्युत्या जनयन्त प्रशस्तं दूरेदर्शनं गृहपतिमतनवन्तम् ॥ १० ॥

अग्निं नर इति । वसिष्ठस्येयमार्षम् । महाव्रत आग्नेये सूक्ते प्रथमैवेयम् (ऐ० आ० ५ । १ । १) । व्यूढस्य दशरात्रस्य चतुर्थेऽहन्याग्निमारुते शस्त्रे जातवेदस्ये सूक्ते प्रथमैव (आश्व० श्रौ० ८।८) । नरो मनुष्या दीधितिभिः अङ्गुलीभिः योक्त्रं परिगृह्योत्तरारणिं वा हस्तच्युती हस्तप्रच्युत्या हस्ताभ्यां प्रच्यावयन्तः अरण्योः 'अथर्युम्' इत्यस्य सकाशादग्निं जनयन्त प्रशस्तम् । प्रशस्यमित्यर्थः । दूरेदृशं दूरेदर्शनं गृहपतिम् अथर्युम् अतनवन्तम् । गमनवन्तमित्यर्थः । एवमत्राततेर्गत्यर्थस्य सारूप्यादग्न्यधिकाराच्च 'अथर्युः अतनवान्' इत्युपपद्यते । 'दीधितयोऽङ्गुलयो भवन्ति' । ता हि 'धीयन्ते कर्मसु' अनुष्ठीयमानेषु । 'अरणी प्रत्यृतः' प्रतिगतः 'एने अग्निः' तात्स्थ्यादग्नेः । 'समरणाज्जायते इति वा' । अरण्योर्हि समरणात्समागमादग्निर्जायते ।

'काणुका' (४२) इत्यनवगतमनेकार्थं च । 'कान्तकानीति वा क्रान्तकानीति वा' इत्येवमाद्याः शब्दसमाधयः ॥ १० ॥

एकया प्रतिधा पिबत्साकं सरांसि त्रिंशतम् । इन्द्रः सोमस्य काणुका (ऋ० सं० ८ । ७७ । ४) ॥ एकेन प्रतिधानेनापिबत्साकं सहेत्यर्थ इन्द्रः सोमस्य काणुका कान्तकानीति वा क्रान्तकानीति वा कृतकानीति वेन्द्रः सोमस्य कान्त इति वा

---

१ क. ख. ५ [१०]; छ. त. ९ द. ५. २ क. ख. घ. झ. ट. ठ. ड. 'इयं' नास्ति. ३ घ. झ. ट. ठ. ड. °र्षम् । विराळ (ट. ड. °राळनु;° ठ. °राजनु°) नुष्टुप् । महा°; च. °र्षं । महा° विरालनुष्टुप्. ४ घ. झ. ट. ट. ड. सूक्ते वाजपेये चाज्यशस्त्रे प्रथ°; च. सूक्ते प्र° वाजपेये चाज्यशस्त्रे. ५ क. ख. ग. ज. 'वा'स्थाने 'च;' घ. झ. ट. ठ. ड. 'वा' नास्ति; च. वा. ६ ग. ज. °वन्तमित्यर्थः । गम°; च. वन्तमित्यर्थः । एव° न्तं गमनव°. ७ क. ख. घ. झ. ट. ठ. ड. °गमनादग्नि°; च. गमाँद° मना. ८ क. ख. ५ (१०;) ग. ४५ । ११; ठ. ड. °माधयः । इति निरुक्तटीकायां पञ्चमाध्याये दशमः खण्डः; इतरेष्वङ्को न विद्यते. ९ क. ख. छ. त. द. °त्यर्थः । इन्द्रः°.

कणेघात इति वा कणेहतः कान्तिहतस्तत्रैतद्याज्ञिका वेदयन्ते त्रिंशदुक्थपात्राणि माध्यंदिने सवन एकदेवतानि तान्येतस्मिन्काल एकेन प्रतिधानेन पिबन्ति तान्यत्र सरांस्युच्यन्ते त्रिंशदपरपक्षस्याहोरात्रास्त्रिंशत्पूर्वपक्षस्येति नैरुक्तास्तद्या एताश्चान्द्रमस्य आगामिन्य आपो भवन्ति रश्मयस्ता अपरपक्षे पिबन्ति तथापि निगमो भवति यमक्षितिमक्षितयः पिबन्तीति तं पूर्वपक्ष आप्याययन्ति तथापि निगमो भवति यथा देवा अंशुमाप्याययन्तीत्य[1]ध्रिगुर्मन्त्रो भवति गव्यधिकृतत्वादपि वा प्रशंसनमेवाभिप्रेतं[2] स्यात्तच्छब्दवत्त्वादध्रिगो शमीध्वं सुशमि[3] शमीध्वं शमीध्वमध्रिगक्रियाग्निरप्यध्रिगुरुच्यते । तुभ्यं श्चोतन्त्यध्रिगो शचीवोऽ[4]धृतगमन कर्मवन्निन्द्रोऽप्यध्रिगुरुच्यते । अध्रिगव ओहमिन्द्रायेत्यपि निगमो भवत्याङ्गूषः स्तोम आघोषः । एनाङ्गूषेण[5] वयमिन्द्रवन्तः । अनेन स्तोमेन वयमिन्द्रवन्तः ॥ ११[6] ॥

एकया प्रतिधा[7] । काण्वस्य कुरुसुतेरियमार्षम्[8] । एकया प्रतिधा एकेन प्रणिधानेन[9] सकृत्प्रणिहितेनैव[10] चेतसा पिबतीन्द्रः साकम् । सहेत्यर्थः । कानि पुनः पिबति । सरांसि । कियन्ति । त्रिंशतम् । कस्य पूर्णानि पिबति । सोमस्य । किंगुणयुक्तानि । काणुका कान्तकानि । प्रियाणीत्यर्थः । अथवा । सोमस्य क्रान्तकानि । आबिलानि[12] सोमस्य पूर्णानीत्यर्थः । अथवा । कृतकानि संस्कृतानि ऋत्विग्भिरिन्द्रार्थमेव[11] । अथवा । इन्द्रो

‘काणुका’ इत्यस्य

---

१ क. ख. द. °यन्तीति ॥ ६ ॥. अध्रि°; छ. त. °यन्तीति ॥ १२ ॥ अध्रि°. २ छ. त. द. प्रशंसानामैवाभिप्रेतं. ३ छ. सुशमी° मि; द. सुशमी. ४ छ. त. द. शचिवः । अधृ°. ५ छ. भवति । आङ्गू° त्या; त. भवति । आङ्गू. ६ क. ख. ७ (११); छ. त. १३; द. ७. ७ क. ख. प्राति ०काणुका; ग. ज. प्रतिधापिबत्; घ. ट. प्रतिधा० सोमस्य काणुका; ठ. ड. प्रतिधेति. ८ क. ख. घ. झ. ट. ठ. ड. मार्षम् । गायत्री । ऐन्द्री एक°; च. °मार्षं ४ । एक °गायत्री ऐन्द्री. ९ च. प्रणिधा° ति; इतरेषु ‘प्रतिधा’°. १० क. ख. घ. झ. ट. ठ. ड. प्रतिहि°; च. प्रणिहि° ति. ११ ज. ‘अथवा० रिन्द्रार्थमेव’ नास्ति. १२ घ. झ. ट. ठ. ड. आबिलं सो°.

यस्मात् सोमस्य कान्तः तस्मादपिबत् । अथवा । एवमन्यथेन्द्रविशेषणमेव स्यान्न सरोविशेषणम् । आह । कथमिति । उच्यते । आकर्णेघातं पिबतीति । यावत्कर्णे हन्यत इत्यर्थः । 'कर्णेहतः कान्तिहतः' । कान्तिरभिलाष इत्यर्थः । कामः प्रार्थना कर्ण इति समानार्थाः । कामे योऽभिहतः सः 'कर्णेहतः' इत्युच्यते । हतपानाभिलाष इत्यर्थः । एवमेतत्काणुकेति सरोविशेषणमिन्द्रविशेषणं पानविशेषणं वा सर्वेषामस्मिन्मन्त्रे प्रकृतत्वात् । एवं चास्य विकल्प्यमानस्यानेकार्थतापि दर्शितैव भवति ।

यदेतदुक्तमस्मिन्मन्त्रे 'सरांसि त्रिंशतम्' इत्यस्याभिधेयविषयप्रख्यापनप्रसक्तमिदमुच्यते । 'तत्रैतद्याज्ञिका वेदयन्ते' । तत्रैतस्मिंस्त्रिंशच्छब्द एतदभिधेयमर्थवस्तु याज्ञिका वेदयन्ते कथयन्ति । 'त्रिंशदुक्थपात्राणि माध्यंदिने सवन एकदेवत्यानि तानि' इति । तत्र हि माध्यंदिने सवन उक्थपर्यायास्त्रयोऽथैन्द्रा एव भवन्ति । त्रिष्वपि चैतेषु दश दश चमसाः । तदभिप्रायेण त्रिंशत्सरांसीत्युक्तं मन्त्रदृशा । ते ह्यत्रेन्द्रस्य सरका अभिप्रेताः सीधुसरका इवेतरस्य कस्यचित्क्षत्रियस्य । यानि तान्युक्थसंबद्धानि च सोमपात्राणि 'एकेन प्रणिधानेन' पीयन्ते 'तान्यत्र सरांस्युच्यन्ते' इत्येष याज्ञिकानामभिप्रायः । 'त्रिंशदपरपक्षस्याहोरात्रास्त्रिंशत्पूर्वपक्षस्येति नैरुक्ताः' । नैरुक्तानामपि त्रिंशत्संख्यापूरणं पक्षगताहोरात्रयोः पृथग्भावेन पानात् । तत्रैवं सति 'या एताश्चान्द्रमस्यः' । चन्द्रमसि भवाश्चान्द्रमस्यः । 'आगामिन्यः' प्रतिपद्द्वितीयाद्यासु तिथि-

'सरांसि त्रिंशत्' इत्यस्य याज्ञिकपक्षेणार्थः

१ घ. झ. ट. अथ चैवमन्य°. २ ग. ज. प्रार्थनकर्णे°; च. प्रार्थनं क °ना. ३ क. ख. घ. झ. ट. ठ. ड. °षणं वा पान°. ४ व. झ. ट. ठ. ड. °विषये प्रख्या°; च. °विषयप्र° ये. ५ ठ. ड. °धेयमन्त्रवस्तु. ६ ग. ज. घ. झ. ट. ठ. ड. °यास्त्रयस्त्रयोऽ°; च. °या॰स्त्रयोऽ° स्त्रय. ७ क. ख. व. झ. ट. ठ. ड. °योऽप्यैन्द्रा°; च. °योऽथैन्द्रा° प्यै. ८ क. ख. व. झ. ट. ठ. ड. प्रतिधा°. ९ क. ख. ग. ज. 'नैरु ००० पानात्' नास्ति. १० घ. °मस्य आगामिन्यः । चन्द्र°; झ. °मस्य आप आगामिन्यः । चन्द्र°; ट. °मस्य आप आगामिन्य । चन्द्र°; ठ. ड. °मस्य आगामिन्य आपः । चन्द्र°. ११ च. ट. °मिन्यः ॰ प्रति° आपः.

ष्वागच्छन्तीति । किं तासामिति । उच्यते । 'रश्मयस्ता अपरपक्षे पिबन्ति' । यथा चैतदेवं 'तथापि' तथैव 'निगमः' 'यमक्षिति[1]-मक्षितयः पिबन्ति' इति । चन्द्रमसमपरपक्षे

तस्यैव नैरुक्तपक्षेणार्थः

पीत्वा ते सूर्यरश्मयः 'पूर्वपक्षे' प्राप्ते पुनः 'आप्याययन्ति' आपूरयन्ति । यथा चैतदेवं तथैषः 'निगमः' 'यथा देवा अंशुमाप्याययन्ति' इति ।

'यथा देवा अंशुमाप्याययन्ति यथा क्षितिमक्षितयः पिबन्ति । तेन नो[3] इन्द्रो वरुणो बृहस्पतिराप्याययन्तु भुवनस्य गोपाः' ॥ राजयक्ष्मगृहीतस्य वैश्वदेवश्चरुर्निरूप्यते (मैत्रा० सं० २ । २ । ७) । तत्र प्राक् स्विष्टकृतोऽनयाज्याहुतिर्हूयते । यथा येन प्रकारेण देवाः सूर्यस्य[4] रश्मयः अंशुं सोमम् आप्याययन्ति पूर्वपक्षे एवमनेन प्रकारेण हे यजमान त्वामिन्द्रो वरुणो बृहस्पतिश्चैते भुवनस्य भूतजातस्य गोप्तार आप्याययन्तु आयुषा धनेन[5] । किंच । यथा येन प्रकारेण 'अक्षितिम्' अक्षीणं सोमम् अक्षितयः सूर्यरश्मयः पिबन्ति तथा त्वामपि हविर्दातारं सन्तं पिबन्तु उपजीवन्तु एते देवा इति । येषां तु 'यमक्षितिम्' इति पाठस्तेषां यमक्षितिमक्षितयः पिबन्ति स च त्वामाप्याययत्वित्येवं योज्यम् ।

नैरुक्तपक्षानुकूलो निगमः

आह । 'एकया प्रतिधापिबत्' इत्येतस्मिन्मन्त्रे 'साकं सरांसि त्रिंशतमिन्द्रः' पिबतीत्युक्तम् । नैरुक्तपक्षेण चोक्तं[6] 'तदा एताश्चान्द्रमस्य आगामिन्य आपो भवन्ति रश्मयस्ता अपरपक्षे पिबन्ति' इति । तदेतद्रश्मिषु पात्रेषु[7] चन्द्रमसि च पीयमाने[8] सर्वमेवेदमसंबद्धं भवतीति । 'एकया प्रतिधापिबत्' इत्येतस्य मन्त्रस्यैन्द्रत्वात् । इतरस्मिन् 'यमक्षितिमक्षितयः पिबन्ति' इति रश्मीनां पानसंयोगादादित्य[9] उच्यते । उच्यते[10] । आदित्योऽपि हीन्द्रशब्देनोच्यत एव । 'असावादित्य

नैरुक्तपक्षीयोऽर्थोऽसंबद्ध इति पूर्वपक्षः

---

१ ठ. ड. °क्षितम°. २ क. ख. ग. च. ज. यमक्षिति°. ३ ग. ज. नो; ठ. ड. 'नः' नास्ति. ४ क. ख. घ. झ. ञ. ढ. ड. सूर्यर°. ५ क. ख. घ. झ. ट. ठ. ड. धनेन च; च. धनेन^ । किं° च. ६ क. ख. घ. झ. ट. ठ. ड. 'च' नास्ति; च. चोक्तं° ञ. ७ क. ख. ग. ज. घ. ट. पात्रषु. ८ च. पीतेषु पीते° यमाने. ९ क. ख. घ. झ. ट. ठ. ड. पानसंबन्धादादि°. १० क. ख. घ. झ. ट. ठ. ड. 'उच्यते' नास्ति.

इन्द्रः' इति ह[1] विज्ञायते (काठ० सं० २२ । २ । तै० सं० १ । ७ । ६ ।)। तदवयवभूताश्च रश्मयोऽत्रादित्येन सह समासव्यासस्तुतिभाजः । सरःशब्दः खल्वप्युदक एव वर्तते । ' पयः सरः भेषजम् ' इत्युदकनामसु पठितम् (निघ० १ । १२) । तत्रैवं सति यानि तान्युदकानि सरांसि

तस्यार्थस्योपपत्तिः

पञ्चदशाहःसंभृतानि साकमवस्थितानि भवन्ति चन्द्रमसि तानि सूर्य इन्द्रो रश्मिभिरपरपक्षे पिबतीत्येवमेतत्सर्वमुपपद्यत एव नैरुक्तपक्षे[2] । ' अध्रिगुः ' (४३) इत्यनवगतमनेकार्थं च[3] ।

अध्रिगुर्मन्त्रो भवति

'अध्रिगुर्मन्त्रो[4] भवति' । आह । किं कारणम् । उच्यते । 'गवि अधिकृतत्वात्' । सोऽयमधिगुः सन् अध्रिगुरि-त्यर्थः । गवि योऽधिकृतो मन्त्रः सोऽध्रिगुः । 'अपि वा' गोरनित्यत्वात् ' प्रशासनमेव[5] ' एतत् 'अभिप्रेतं स्यात्' । अध्रिगुर्नाम कश्चिदस्ति दैव्यः शमिता । तस्यैतत्प्रशासनं स्यात् । संप्रेषणमित्यर्थः । किं

अध्रिगुशब्देन प्रशासनमभिप्रेतं स्यात्

कारणम् । ' तच्छब्दवत्त्वात् ' । तथा ह्यस्य मन्त्र-स्याध्रिगुशब्दवत्त्वम् । तदेतदुपपद्यते[6] तद्वतैनैव-निगमेन 'अध्रिगो शमीध्वम्' इति [मैत्रा० सं० ४ । १३ । ४] । हे अध्रिगो सर्व एव यूयं शमीध्वं शमयध्वमेनं पशुमिति । 'दैव्याः शमितार उत मनुष्या आरभध्वमुपनयत मेध्यादुर आशासाना[7] मेधपतिभ्यां[8] मेधं प्रास्मा अग्निं भरत स्तृणीत बर्हिरन्वेनं माता मन्यतामनु पितानु भ्राता सगर्भ्योऽनु सखा सयूथ्य उदीचीनाँ अस्य पदो निधत्तात्सूर्यं चक्षुर्गमयताद्वातं प्राणमन्ववसृजतादन्तरिक्षमसुं पृथिवीँ शरीर-मेकधास्य त्वचमाच्छयतात्पुरा नाभ्या अपिशसो वपामुत्खिदतादन्तरेवोष्माणँ वारयतात्श्येनमस्य वक्षः कृणुतात्प्रशसा बाहू शला दोषणी कश्यपेवाँसा-च्छिद्रे श्रोणी कवषोरू स्रेकपर्णाष्ठीवन्ता षड्विँशतिरस्य वङ्क्रयस्ता अनुष्ठुयो-

---

१ क. ख. घ. झ. ट. ठ. ड. 'ह ' नास्ति. २ क. ख. च. °पक्षे । ६ । अध्रि°. ३ ग. च । १२ । अध्रि°. ४ च. °र्मन्त्रो हि भव°. ५ ग. ज. प्रशंसानाम वेत°. ६ क. ख. घ. झ. ट. ठ. ड. °त्वं यत्तदेतदुक्तमुप°; च. त्वं तँ (यत्त) देतदुप° क्तमु. ७ ग. च. ज. °शमितार आशासाना°; घ. ट. ठ. ड. शमितार (घ. ट. शशितार) आरभ°. ८ क. ख. घ. ट. ठ. ड. मेधपतिभ्यां. ९ ग. च. ख. घ. ट. ठ. ड. मेधं नेद्रस्तोके°.

च्च्यावयताद्गात्रं गात्रमस्यानूनं कृणुतादूवध्यगोहं पार्थिवं खनतादस्ना रक्षः सँसृजताद्वनिष्ठुमस्य मा राविष्टोरूकं मन्यमाना नेद्वस्तोके तनये रविता

अध्रिगुप्रैषः

रवैदध्रिगो शमीध्वँ सुशमि शमीध्वँ शमीध्वमध्रिगो' [मैत्रा० सं० ४ । १३ । ४] इति प्रैषः । हे दैव्याः शमितारः अपि च हे मनुष्याः आरभध्वम् । उपनयत च एनं पशुमेता मेध्याः दुरः । यज्ञगृहद्वार इत्यर्थः । आशासानाः प्रार्थयमाना मेधपतये[2]ऽस्मै यजमानाय मेधम् एनं पशुं शमयितुम् । किंच । प्रास्मा अग्निं भरत । प्रभरतास्मै पशवे संज्ञप्यमानाय अग्निम् । उल्मुकं पुरस्ताद्धारयतेत्यर्थः । किंच । स्तृणीत बर्हिः । अस्मै पशवे संज्ञप्यमानाय उपाकरणमे[3]तं दर्भमपास्यतेत्यर्थः । किंच । अन्वेनं माता मन्यताम् । एनं संज्ञप्यमानं माता अनुमन्यताम् । अनुमन्यतां पिता । भ्राता सगर्भ्यः अनुमन्यताम् । सहगर्भीयः । सहोदर इत्यर्थः । अनुमन्यतां चैनं सखा सयूथ्यः सहयू[4]थचारी । अनुमतमेनमेभिः संज्ञपयतेत्यभिप्रायः । किंच । उदीचीनाँ[5] अस्य पदो निधत्तात् । उदक्पादमेनं संज्ञपयतेत्यर्थः । किंच । सूर्यप्रभवमस्य चक्षु[6]स्तत्सूर्यमेव गमयतात् । वातमनु प्राणमनुसृजत । असुं शरीरविधारकं प्राणमन्तरिक्षम[7]न्वसृजत । दिशः श्रोत्रमन्ववसृजत । किंच[9] । उपाकरणेन दर्भेण स[10]ह साकमेकधास्य त्वचमाच्छयतात् । आच्छयतेत्यर्थः । ततोऽनन्तरमेव पुरा नाभ्या अपिशसः तस्माच्छसः प्रशस्तात्प्रदेशात् वपामुत्खिदता[11]त् उद्धरत । किंच । अन्तरेव अभ्यन्तरत एवोष्माणमस्य शम्यमानस्य वारयध्वात् । श्येनमस्य श्येनाकृति[12] श्येनवर्णं वा पाकेन वक्ष उरः कुरुत । प्रशसा बाहू

१ ग. च. ज. घ. ट. ठ. ड. रवच्छमितारः । अध्रिगो शमीध्वमिति प्रैषः°. २ क. ख. ग. घ. ट. ठ. ड. ज. मेधपतिभ्यामाभ्यामग्नीषोमाभ्यां मेध°; च. मेधपतयेऽस्मै यजमानाय मेध° तिभ्यामाभ्यामग्नीषोमाभ्यां. ३ क. ख. घ. झ. ट. ठ. ड. मेनं; च. मेतं° नं. ४ च. सहपूर्वचारी° यूथ. ५ च. °चीनां° नान. ६ क. ख. घ. झ. ट. ठ. ड. °क्षुस्ततः सू°. ७ क. ख. घ. झ. ट. ठ. ड. °मन्ववसृजत; च. मनुसृज° न्वव. ८ क. ख. घ. झ. ट. ठ. ड. °मन्ववसृ°; च. °म°° वसृ° न्व. ९ घ. झ. ट. ठ. ड. °सृजत । शरीरं यागोपयुक्ताच्छेषं पृथिवीमन्ववसृजत । किंच; च. °सृजत किंच °शरीरं...सृजत. १० ग. ज. घ. झ. ट. 'सह' नास्ति. ११ ग. ज. °मुत्खिदतन; च. °मुत्खिद°त° ता. १२ घ. झ. ट. ठ. ड. °कृतिं.

शला दोषणी इति बाह्वोरेवैतदभिधानमवयवशः । अत्र बाहुशब्दः प्रायेणावगंसयोर्वर्तते । आ अरत्निसंधितौ[1] बाहू प्रशस्तौ कुरुत । स्वधित्याकृती इत्येके । शलाशब्दोऽरत्न्योरेव वर्तते । तौ च शल्यदोषणी द्रवणसमर्थौ प्रशस्तौ कुरुत । शलाकाकृती निर्मांसौ कुरुतेत्येके । 'श्येनशलाकश्यपाकवषास्रेकपर्णेष्वाकृतिविशेषवचनं[2] प्रसिद्धिसामर्थ्यात्[3]' इति हि नैयायिकाः पठन्ति (जै० न्या० ९ । ६) । कश्यपेवांसा कच्छपाविवांसौ कुरुत[4] । अच्छिन्द्रे श्रोणी अविकले कुरुत । कवषोरू[5] पिण्डिकाख्ये[6] अच्छिद्रे एव कुरुत । स्रेकपर्णा[7] करवीरपत्राणीव अष्ठीवन्ता अस्थिसंयुक्तौ[8] । या एता वङ्क्रयः पर्शवस्ता अनुष्ठया अनुष्ठानक्रियया प्रच्यावनसमर्थयैव प्रच्यावयत[9] । किंच । गात्रं गात्रमस्य[10] अविकलं कुरुत[11] । किंच । 'ऊवध्यगोहम्' ऊवध्यं यः पार्थिवो गर्तः प्रसृष्टं[12] संवृणोति तमुत्तरतश्चात्वालस्य खनत[13] । अस्ना रक्षः संसृजतात् । असृग्भाञ्जि रक्षांसि कुरुतेत्यर्थः । किंच । वनिष्टुं[14] दृष्ट्वा मा राविष्ट मा शब्दं करिष्यथ उरूकं[15] मन्यमाना उलूकवत्तं वनिष्टुं[14] मन्यमानाः । उलूको[16] हि भयंकरत्वात्तं[17] दृष्ट्वा जनैर्विरौ[18]त्यतेऽयमुलूकोऽयमुलूक इति । तदाशङ्क्यो-

---

१ क. ख. घ. ट. ठ. ड. °संधानौ; ग. ज. संधिनौ; च. संधितौ° धानौ. २ ग. ज. °स्रेकवर्गे°; च. °वषे(षा) स्रि (स्रे) कवे(प)र्गे°. ३ क. ख. घ. झ. ठ. ड. °चनं सिद्धसाधनं स्यादिति°; च. प्रसिद्धिसामर्थ्यात्° सिद्धसाधनं स्या; ट. सिद्धसाधनं स्यात्° प्रसिद्धिसामर्थ्या°. ४ क. ख. ग. ज. घ. ट. ठ. ड. °कुरुत । किंच । अच्छिद्रे° ५ क. ख. ग. ज. घ. ट. ट. ड. कवषोरू कवषा (ग. ज. 'कवषा' नास्ति) कवषे गतिसमर्थे ऊरू कुरुत । कवतिर्गत्यर्थः । च्यवते कवते मवते इति गतिकर्मसु पाठात् । पिण्डि°; च. कवषोरू॰पिण्डि॰कवषा कवषे गतिसमर्थे ऊरू कुरुत । कवतिर्गत्यर्थः. ६ क. ख. ग. ज. घ. ट. ठ. ड. पिण्डिकाख्ये ऊरू अच्छि°; च. पिण्डिकाख्ये॰अच्छि° ऊरू. ७ च. °पर्णा॰र्णे. ८ क. ख. घ. ट. ठ. ड. संयुक्तौ कुरुत । षड्विंशतिरस्य वङ्क्रयस्ता अनुष्ठयो (ठ. ड. अनुष्टयो) च्यावयतात् । या:°; ग. ज. संयुक्ता. ९ घ. झ. ट. ठ. ड. प्रच्यावयतात् । प्रच्या°. १० क. ख. घ. ठ. ठ. ड. °मस्यानूनं अविक°; ग. ज. मस्या । अविक°; च °मस्या अविक. ११ क. ख. घ. झ. ट. ठ. ड. कृणुतात् कुरुत. १२ घ. झ. ट. ठ. ड. प्रवृद्धं अवशिष्टं गूहति संवृणो°; च. प्रसृष्टं संवृणो° वृद्धं अवशिष्टं गूहति. १३ घ. झ. ट. ठ. ड. खनतात् खनत. १४ क. ख. ट. वानिष्टुं; च. वानिष्टुं°ष्टुं. १५ ग. ज. उरुकं. १६ ग. ज. अलूको; च. अलूको° उ. १७ क. ख. घ. झ. ट. ठ. ड. 'तं' नास्ति. १८ ग. ज. विराव्यते.

लूकसारूप्याद्वनिष्ठोर्मा[1] रविष्टेत्युच्यते[2]। नेद्वः युष्माकं नैतत्कर्म[3] रवितृवत्पुत्रेषु च[4] पौत्रेषु च[5] स्यात् । अरवणशीलं वः[6] पुत्रपौत्रं भविष्यतीत्य[7]भिप्रायः। हे अध्रिगो शमीध्वमेतं[8] पशुम् । सुशमि शमीध्वम् । यथा चायं सुशमितः स्यात्तथैनं शमीध्वम्। हे अध्रिगो मा प्रमादं करिष्यथ। एवमेतस्मिन् दैव्यस्य शमितुरध्रिगोः प्रशासनमित्येतदुपपद्यते तस्य संबोध्यत्वात्। अस्मिंश्च प्रैषे यथासंभवं प्रशासनानि द्रष्टव्यानि 'प्रास्मा अग्निं भरत'[9] इत्येवमादीनि।

अस्मिन्प्रैषे बहूनि प्रशासनानि

'अग्निरप्यध्रिगुरुच्यते'[10]। अधृतगमनोऽसावित्यध्रिगुः। 'तुभ्यं श्चोतन्त्यध्रिगो[11] शचीवः स्तोकासो अग्ने मेदसो घृतस्य। कविशस्तो बृहता भानुना गा हव्या जुषस्व मेधिर' (ऋ० सं० ३।२१।४)॥

अग्निरप्यध्रिगुः

गाथिनः कुशिकपुत्रस्यार्षम्[12]। स्तोकसूक्ते विनियुक्ता [आश्व० श्रौ० ३।४]। हे अध्रिगो अधृतगमन हे[13] शचीवः कर्मवन् तुभ्यं त्वदर्थमेते स्तोकाः बिन्दवो वपामतीत्य श्चोतन्ति क्षरन्ति मेदसश्च घृतस्य च। यस्य तवैतद्वर्तते स त्वं कविशस्तः प्रैक्षारणे[14] कविभिरभिष्टुतो बृहता महता भानुना भासा आगाः आगच्छ। आगत्य चेमानि हव्या[15] हवींषि

---

१ क. ख. ग. ज. ट. वनिष्ठोर्मा°. २ क. ख. घ. झ. ट. ड. °च्यते। हे शमितारः नेद्वस्तोके तनये रविता रवच्छमितारः। नैत°; च °च्यते। ^ नैत° नेद्वः (हे शमितारः ने°); ग. °च्यते। नेद्वरवितृ°; ज. °च्यते। नेमवरवितृ°. ३ क. ख. घ. झ. ट. ठ. ड. °त्कर्म कुर्वतां रवि°; च. °त्कर्म^रवि° कुर्वतां. ४ क. ख. घ. झ. ट. ठ. ड. रवितारवत्. ५ क. ख. घ. झ. ट. ठ. ड. 'च' नास्ति; च. चँ. ६ क. ख. घ. झ. ट. ड. वः; च. चँ° वः. ७ च. भवेत्विति भवि°. ८ क. ख. घ. झ. ट. ठ. ड. °मेनं; च. °मेतं° नं. ९ ग. ज. प्रास्माग्निं; च. प्रास्मा^ग्निं° अ. १० ग. °ध्रिगुः। ४.७। तुभ्यं°. ११ ग. ज. ध्रिगो शचीवः स्तोकासो। गाथि°; घ. ट. °ध्रिगो० जुषस्व मेधिर. १२ घ. झ. ट. ठ. ड. °र्षम्। विराड्रूपा त्रिष्टुप्। स्तो°; च. °स्यार्षम्। स्तोक०विराड्रूपा त्रिष्टुप्. १३ क. ख. घ. झ. ट. ठ. ड. 'हे' नास्ति १४ क. ख. घ. ट. प्रक्षरणे प्रक्षरणे कवि°; ठ. ड. प्रक्षरणे; च. प्रक्षा (क्ष) रणे कवि° प्रक्षरणे. १५ घ. झ. ट. ठ. ड. हव्यानि; च. हव्या^ हवीं० नि.

यानि स्तोकाख्यानि त्वदर्थमेव क्षरन्ति तानि जुषस्व संसेवस्व हे मेधिर । यज्ञवन्नित्यर्थः । एवमत्र ' अध्रिगो ' इत्यग्निरुक्तः । तस्मादग्नेरध्रिगुत्वमुपपद्यते ।

' इन्द्रोऽप्यध्रिगुरुच्यते ' । तस्यापि न कश्चिद्गमनधारयितास्ति[1] ।

' अस्मा इदु प्र तवसे तुराय प्रयो न हर्मि
इन्द्रोऽप्यध्रिगुः स्तोमं माहिनाय । ऋचीषमायाध्रिगव ओहमि-
न्द्राय ब्रह्माणि राततमा (ऋ० सं० १ । ६१ । १) ॥

नोधस इयमार्षम्[3] । अहीनसूक्ते शस्यते (आश्व० श्रौ० ७।४)। अस्मै इन्द्राय प्रहर्मि प्रहरामि स्तोमं प्रयो न प्रय इव । अन्नमिव यः स्तोमस्तृप्तिं करोति तं प्रहरामि । तवसे महते तुराये त्वरमाणाय । माहिनाय मंहनाय दात्रे । किंच । ऋचीषमाय ऋक्समाय[6] स्तुतिसमाय । यावती स्तुतिरुदीर्यते तावानेवासौ भवति माहाभाग्यात् । अध्रिगवे अधृतगमनायाप्रतिहतगमनाय । एवंलक्षणायेन्द्राय ओहम् अहं प्रापयामि ब्रह्माणि हवींषि राततमा दातव्यतमानि । यान्यसावेवार्हति तानीत्यभिप्रायः । एवमस्मिन्नध्रिगुशब्द इन्द्रविशेषणत्वादिन्द्राभिधानमित्युपपद्यते ।

' आङ्गूषः ' (४४) इत्यनवगतम् । ' स्तोमः ' अभिधेयः । ' आघोषः ' इति शब्दसमाधिः । ' एनाङ्गूषेण वयमिन्द्रवन्तो[10]ऽभि
ष्याम वृजने सर्ववीराः । तन्नो मित्रो वरुणो
'आङ्गूषः' इत्यस्य मामहन्तामदितिः सिन्धुः पृथिवी उत द्यौः '
(ऋ० सं० १ । १०५ । १९) ॥

त्रिष्टुप् । कुत्सस्य त्रितस्य वा कूपे पतितस्यार्षम् । वैश्वदेवस्य चरोर्भ्रातृव्यवतो याज्यैषा । (मैत्रा० सं० २ । ३ । २ ॥ ४ । १२ । ४) अनेन[11] वयम् आघोषणीयेन स्तोमेन इन्द्रवन्त इन्द्रसंयुक्ताः स्याम ।

---

१ ग. °तास्ति । ४८ । अस्मा°. २ ग. ज. तुराय । नोध°; घ. ट. तुराय० राततमा. ३ घ. ट. ट. ड. °मार्षम् । त्रिष्टुप् । अही°. ४ क. ख. घ. ट. ठ. ड. प्रभरामि; च. प्रहरामि° भ. ५ क. ख. घ. झ. ट. ठ. ड. ग. प्रभरामि; च. प्रहरामि° भ. ६ च. ऋक्सामाय. ७ घ. झ. ट. ठ. ड. यानि यान्य°. ८ ग. तान्यतानि इत्य°; ज. नान्यतानि इत्य°; च. तानीत्य० नान्य इ; घ. झ. ट. ठ. ड. नान्य इत्य°. ९ ग. °माधिः ।४९। एना°. १० ग. ज. °द्रवन्तोऽभि ष्याम । त्रिष्टु°; घ. ट. °द्रवन्तो०पृथिवी उत द्यौः. ११ ठ. ड. एनाङ्गूषेण अनेन°.

वयं च ततो विश्वे सर्व एवानवखण्डिताः सन्तः सर्वान् भ्रातृव्यानभिभवेम । तदेतन्नः सर्वमपि मित्रो वरुणश्च मामहन्तां पुनःपुनर्महयन्तां पूजयन्तु । अदितिश्च पूजयतु । सिन्धुश्च पूजयतु । पृथिवी च पूजयतु । उत द्यौः पूजयत्वित्येतदेवानुवर्तते । एवमत्र स्तोमोऽयमाङ्गूषशब्देनोक्तः शब्दसारूप्यादर्थोपपत्तेश्च ।

'आपान्तमन्युः' (४५) इत्यनवगतं पक्षेण चानेकार्थम् । 'आपातितमन्युः' इत्यवगमः ॥ ११ ॥

आपान्तमन्युस्तृपलप्रभर्मा धुनिः शिमीवाञ्छरुमाँ ऋजीषी । सोमो विश्वान्यतसावनानि नार्वागिन्द्रं प्रतिमानानि देभुः (ऋ० सं० १० । ८९ । ५) ॥ आपातितमन्युस्तृप्रप्रहारी क्षिप्रप्रहारी सृप्रप्रहारी सोमो वेन्द्रो वा धुनिर्धूनोतेः शिमीति कर्मनाम शमयतेर्वा शक्नोतेर्वर्जीषी सोमो यत्सोमस्य पूयमानस्यातिरिच्यते तदृजीषमपार्जितं भवति तेनर्जीषी सोमोऽथाप्यैन्द्रो निगमो भवत्यृजीषी वज्रीति हर्योरस्य स भागो धानाश्चेति धाना भ्राष्ट्रे हिता भवन्ति फले हिता भवन्तीति वा बब्धां ते हरी धाना उप ऋजीषं जिघ्रतामित्यपि निगमो भवत्यादिनाभ्यासेनोपहितेनोपधामादत्ते बभस्तिरत्तिकर्मा सोमः सर्वाण्यतसानि वनानि नार्वागिन्द्रं प्रतिमानानि दभ्नुवन्ति यैरेनं प्रतिमिमते नैनं तानि दभ्नुवन्त्यर्वागेवैनमप्राप्य विनश्यन्तीतीन्द्रप्रधानेत्येके नैघण्टुकं सोमकर्मोभयप्रधाने-

---

१ घ. झ. ट. ठ. ड. सन्तः संग्रामे सर्वान्; च. सन्तः˘ सर्वान्° संग्रामे. २ घ. झ. ट. ठ. ड. °व्यानभिष्याम अभिभ°; च. °व्यानभि˘भ° ष्याम अभि. ३ ग. ज. °वेम जितीश्च (ज. ज़ितीऊ) इत्येव गमनमात्रेणैव तदे°. ४ च. पुनर्मह°र्म. ५ क. ख. °पत्तेश्च । ७ (११) । आपा°; च. अपोन्त °आपा; ज. झ. अपान्त; ठ. ड. °पत्तेश्च । इति निरुक्तटीकायां पञ्चमाध्याये एकादशः खण्डः । आपा°. ६ ग. १३/१०. ७ छ. त. द. 'क्षिप्रप्रहारी सृप्रप्रहारी' नास्ति. ८ छ. त. द. भवति ऋजीषी वज्रीति । हर्यो°. ९ छ. त. द. भवन्ति । फले°. १० छ. त. द. वा । बब्धां°.

त्यपरं श्मशाशु अश्नुत इति वा श्माश्रुत[1] इति वा । अवं श्मशा रुधद्वाः । अवारुधच्छ्मशा वारिति ॥ १२ ॥

इति पञ्चमाध्यायस्य द्वितीयः पादः ।[2]

'आपान्तमन्युः' इत्यस्य

आपान्तमन्युरिति[3] । वैश्वामित्रस्य[4] रेणोरियमार्षम् । त्रिष्टुप् । सूर्यस्तुत्येकाहे निष्केवल्ये विनियुक्ता (आश्व० श्रौ० ९ । ८) । आपादितदीप्तिरु[5]त्पादितमन्युर्वा शत्रुभिः संग्रामे तृपलप्रभर्मा तृप्रप्रहारी[6] तप्तप्रहारी[7] क्षिप्रप्रहारी[8] वा सोमो वेन्द्रो वा धुनिः धूनयिता कम्पयिता शत्रूणां पात्राणां वा शिमीवान् स्वाधिकारविनियतेन[9] कर्मणा कर्मवान् शरुमान् हिंसावान् ।

क ऋजीषी

ऋजीषी यदि सोमोऽभिप्रेतस्तस्य ऋजीषित्वमुप[10]पद्यते । अथेन्द्रोऽभिप्रेतस्तस्य हर्योरश्वयोः ऋजीष[11]भाग इत्यनयापेक्षया ऋजीषित्वम् । एवमयमर्धर्चोऽस्य[12] सोमस्येन्द्रस्य वा । यस्मिंस्तु पक्षे सौम्य एषोऽर्धर्चस्तस्मिन्[13] पक्षेऽयं तृतीयः पाद एवं सोमेनाभिसंबन्धयितव्यः । य एवंगुणयुक्तः सोमः स एतानि सर्वाणि अतसा[14] अनुपक्षीणानि वनानि उदकानीतराणि वा वनस्पत्याख्यानि[15] स्वेन महिम्ना व्याप्नोति । स हि तेषामधिपतिः । एवमेते त्रयोऽपि पादाः सौम्या भवन्ति ।

आद्यास्त्रयः पादाः सौम्या ऐन्द्रा वा चतुर्थस्त्वैन्द्र एव

उत्तर ऐन्द्र एव 'नार्वागिन्द्रं प्रतिमानानि देभुः' इति । नैनमिन्द्रं प्रतिमानानि । यैः प्रतिमीयते स्तोत्रा नैनं तानि दभ्नुवन्ति नाभिभवितुं शक्नुवन्ति । किं तर्हि । अर्वागेव तानि ऊनान्येव तस्मादिन्द्राद्भूत्वा तमिन्द्रमप्राप्यैव विनश्यन्ति । नोपमार्थं कुर्वन्ति । स हि तेषां विनाशः । एवमेष पाद ऐन्द्रः । एवमुभयप्रधानत्वमस्या ऋचः ।

---

१ क. ख. ८ (१२); छ. त. १४; द. ८. २ ङ. थ. ध. 'इति॰पादः' नास्ति; छ. द्वितीयः पादः; त. पञ्चमाध्याये द्वितीयः पादः; द. इति नैरुक्तस्य पञ्च°. ३ च. ड. अपा°. ४ च. ठ. ड. विश्वा°. ५ च. अपा°; ठ. ड. आपातित°. ६ च. तृप्रहारी° क्षिप्र; ट. तृप्र° क्षि. ७ ठ. ड. तृप्तप्र°. ८ घ. झ. ट. ठ. ड. 'क्षिप्रप्रहारी' नास्ति; च. क्षिप्रप्रहारी वा. ९ घ. झ. ट. ठ. ड. विनिहितेन; च. विनियं° हि. १० ग. ऋजीषीत्वं. ११ ग. ज. ऋजीषं भा°. १२ क. ख. घ. झ. ट. ठ. ड. 'अस्य' नास्ति. १३ घ. झ. ट. ठ. ड. अस्मिन्; च. तस्मिन्° अ. १४ घ. झ. ट. ठ. ड. अतसानि. १५ क. ख. ध. झ. ट. ठ. ड. °वा वनानि वनस्प°.

अथवैवमन्यथास्या ऋचं उभयप्रधानत्वम् । द्वौ प्रथमौ पादावैन्द्रत्वेन व्याख्यायेते । तृतीयपादमुत्क्रम्य चतुर्थः पाद आद्याभ्यामभिसंबन्धयितव्यः ।

अथवास्या ऋच एवमुभयप्रधानत्वम्

योऽयमेवंगुणविशिष्ट इन्द्र आपादितमन्युस्तृप्रप्रहारी धुनिः शिमीवान् शरुमान् ऋजीषी च तमेतैमिन्द्रमेवंप्रभावं न प्रतिमानानि दम्नुवन्ति । किं तर्हि । अर्वागेवैनमप्राप्य मानोनि विनश्यन्ति । एवमेते त्रय ऐन्द्राः पादा द्वावद्यौ चतुर्थश्च । अयं तृतीयः सौम्यः ' सोमो विश्वान्यतसा वनानि ' इति । यः सोमः सर्वाण्यतसानि वनानि महिम्ना व्याप्नोति यं चैवं न प्रतिमानानि दम्नुवन्ति तौ सोमेन्द्राविदं नाम कुरुतामित्याशीर्योज्या ।

' एके ' पुनः ' इन्द्रप्रधाना ' एवेयमृक् ' इति ' एवं मन्यन्ते ' नैघण्टुकम् ' अस्यां ' सोमकर्म ' इति । तेषामियं योजना । य

' इन्द्रप्रधाना ' इत्येके

इन्द्र आपादितमन्युस्तृप्रप्रहारी धुनिः शिमीवान् शरुमान् ऋजीषी च स सोम इवातसानि वनानि इदं सर्वं व्याप्नोति । न चैनं प्रतिमानानि दम्नुवन्ति । किं तर्हि । ऐनमिन्द्रमप्राप्यैव विनश्यन्ति । एवमिन्द्रप्रधानैव भवति । एवमस्या ऋचस्त्रिधा समासार्थो बोद्धव्यः । तथा हि भाष्यकारेण दर्शितम् । सोमस्य ऋजीषित्वोपपादनार्थमाह

सोमस्य कथमृजीषित्वम्

भाष्यकारः । ' यत्सोमस्य पूयमानस्यातिरिच्यते ' रसादन्यदसारमतिरिच्यते ' तदृजीषम् ' इत्युच्यते । तद्धि ' अपार्जितं भवति ' किण्वभूतत्वात् । ' तेन ' संयोगात् ' ऋजीषी सोमः ' उच्यते ।

' अथ ' यस्मिन्पक्षे ' ऐन्द्रः ' ऐन्द्रोऽर्धर्चो भवति तस्मिन्पक्षे इन्द्रस्य ऋजीषित्वाभिधायक एष ' मन्त्रो भवति ' । इन्द्रस्य ऋजीषित्वमनुपात्तं मन्यमानो निगमं पठति । ' ऋजीषी वज्री वृषभस्तुराषाट् शुष्मी राजा

१ क. ख. घ. झ. ठ. ग. ड तमेनामि°. २ क. ज. व. झ. ट. ठ. ड. वर्तमा°; च. प्राप्यमाना° वर्त ३ क. ख. ग. ज. घ. झ. ट. ठ. ड. चेन्द्रं; च. चैवं° चेन्द्रं. ४ क. ख. च. शमी°. ५ च. एवाने°. ६ क. ख. घ. झ. ट. ठ. ड. °र्जितं अपार्जितं भवति; च. °र्जितम्° आपार्जितं. ७ घ. झ. ट. ठ. ड. 'ऐन्द्रोऽर्धर्चो भवत्येव एतस्मि°. ८ ग. पठति । ५१ । ऋजी°. ९ ग. ज. वृषभस्तुराषाट् । अर्धे°; घ. ढ. वृषभ.० मन्त्रे मन्त्रादिन्द्रः.

इन्द्रस्य ऋजीषित्वे निगमः

वृत्रहा सोमपावा । युक्त्वा हरिभ्यामुप यासदर्वाङ् माध्यंदिने सवने मत्सदिन्द्रः ' (ऋ० सं० ५ । ४० । ४) ॥ अत्रेरियमार्षम् । त्रिष्टुप् । ऋजीषेण तद्वान् ऋजीषी वज्रेण तद्वान् वज्री वृषभः वर्षिता तुराषाट् तूर्णमभिभविता शत्रूणां शुष्मी बलवान् राजा अधिपतिः वृत्रहा शत्रुहा सोमपावा । सोमस्य पातेत्यर्थः । य एवंगुणयुक्त इन्द्रः स युक्त्वा हरिभ्याम् अश्वाभ्यां रथं तमधिरुह्य उपयासत् उपागच्छत् अर्वाक् अस्मानाभिमुख्येन माध्यन्दिने सवने एतस्मिन् प्राप्ते । उपागम्य च मत्सत् । माद्यतामस्मत्प्रत्तेन सोमेनेत्यर्थः । एवमेतस्मिन्मन्त्रे ऋजीषीन्द्र उक्तः । तत्पुनरेतदृजीषित्वमिन्द्रस्य न विज्ञायते केन का[1]रणेनेत्यतस्तदुपपादनार्थमाह ' ह[2]र्योरस्य स भा[3]गः ' इति । हर्योरेवाश्वयोरस्येन्द्रस्य स

इन्द्रस्य ऋजीषित्वे कारणम् । लक्षितलक्षणयेन्द्रस्य ऋजीषित्वम्

भागो यदृजीषम् । ' धानाश्च ' । प्रसङ्गादत्र धाना उक्ताः । तदुक्तं ' हर्योर्धाना हरिवतीः ' (मैत्रा० सं० १ । ३ । ३०) इति । तेन हरिसं[4]ङ्गेन ऋजीषेण लक्षितलक्षणया वृत्त्येन्द्रस्य ऋजीषित्वम् । आह । ' धानाः ' कस्मात् । उच्यते । ता हि ' भ्राष्ट्रे हिता ' निहिताः ' भवन्ति ' । अथ ' वा ' भ्राष्ट्रादवतार्य ' फले ' फलके निहिताः ' भवन्ति ' । अ[5]थवा खले हिता भवन्ति । तत्र हि ता विसार्यन्तेऽतिदाहभयात् । यथा ऋजीषं धानाश्च हर्योरश्वयोरिन्द्रस्य च भागस्तथैव ' निगमो बब्धां ते हरी धाना उप ऋजीषं जिघ्रतामिति ' । अत्र ' बब्धाम् ' इत्येतस्मिन् पदे य एषः ' बभस्तिः ' धातुः ' अत्तिकर्मा ' भक्षणार्थः ' स आदिनाभ्यासेनोपहितेनोपधामादत्ते ' । आ[6]दावभ्यासेनोपश्लेषितेनोपधामादत्ते । तकारेण निमित्तभूतेनोपधामकारमादत्ते लुम्पति । ' घसिभसोर्हलि च ' (पा० ६ ।

' बब्धाम् ' इति क्रियारूपस्योपपत्तिः

१ ग. ज. प्रक [ज. का] रणेने°; च. कारणेनेति यत° नेत्य. २ ग. ज. ' हर्योरस्य स भाग इति ' नास्ति. ३ च. भागो धाना हर्यो ग इति. ४ क. ख. घ. झ. ट. ठ. ड. °संयोगेन; च. °संगेन° यो. ५ घ. झ. ट. ठ. ड. °भवन्ति । हिता भवन्ति । तत्र°; च. अथवा खले हिता भवन्ति. ६ ग. ज. अदा°; च. अदा° आ.

४ । १००) इत्यकारलोपः । ततो धत्वे[1] जश्त्वे च कृते बब्धामित्येतद्रूपं भवति[2] । ' धाना[3]सोमानामिन्द्राद्धि च पिब च बब्धां ते हरी धाना उप ऋजीषं जिघ्रतामा रथचर्षणे[4] सिञ्चस्व । यत्त्वा पृच्छादृषन् पत्नी का[5]मीमदथा इत्यस्मिन् सुन्वति यजमाने तस्मै किमरास्थाः सुष्ठु सुवीर्यं यज्ञस्यागुरं[6] उद्वृचं[7] यद्यदचीकमतो[8]तो तत्तथाभूद्धोतर्यज'(कुन्तापाध्याये प्रैषः ६६) । हारियोजनास्यायं प्रैषः ।

अस्मिन्निगमे ऋजीषं धानाश्च हर्योरश्वयोरिन्द्रस्य च भागः

हे इन्द्र धानासोमानामेतेषामाद्धि भक्षय । पिब चास्य हारियोजनस्य सोमस्य । किंच । बब्धां भक्षयेतां ते तव एतावश्वौ हरी ए[9]ता धानाः । उप ऋजीषं जिघ्रताम् । उपजिघ्रतामृजीषं च । आ रथचर्षणे सिञ्चस्व जठरे सोममेतं[10] हे रथचर्षणे रथगमनं[11] । किंच । यत्त्वा पृच्छात् यदि त्वां पृच्छेद्गृहमनुप्राप्तमस्मद्यज्ञात् हे वृषन् वर्षितः पत्नी कामीमदथाः क पीतवांस्त्वम् अतो ब्रूयास्त्वमस्य यजमानस्य नाम गृहीत्वा अस्मिन् सुन्वति सोममभिषुण्वति यजमाने । ततः सा यदि पुनरपि पृच्छेत्तस्मै परितुष्टस्त्वं किमरास्थाः किं दत्तवानसि ततस्त्वं तां प्रति ब्रूयाः । सुष्ठु[12] सुवीर्यं सुष्ठु शोभनं[13] वीर्यमहमस्मै दत्तवान् । यज्ञस्य आगुरं[14] उद्वृचम्[15] । यदसावनेन यज्ञेन आगूर्णवान् प्रार्थितवानभूत्तत्सर्वमहमदां यज्ञस्य[16] चोत्कृष्टां रुचं दीप्तिमहमदामस्मै । किं बहुना । यद्यदचीकमत यद्यत्कामितवानयं यजमानः फलमस्य कर्मणः सर्वमेव तत्[17]थाप्रार्थितमेवाभूत् । न कश्चिदप्यस्य मृषा कामो बभूवेत्यभिप्रायः । हे होतस्त्वमपि योऽयमेवंगुणविशिष्ट इन्द्रस्तं सहहरिभ्यां यजेति । एवमत्र ' हरी उपजिघ्रताम् ' इत्येतस्माद्विशेषलिङ्गात् ऋजीषित्वमश्वयोरश्वयोगाच्च ऋजीषित्वं लक्षितलक्षणयेन्द्रस्योपपद्यते ।

---

१ क. ख. घ. झ. ट. ठ. ड. धत्वे कृते जश्त्वे कृते. २ ग. भवति । ५२ । धानाः°. ३ क. ख. धानाः सो°. ४ च. चर्म्मणे०र्ष. ५ घ. ट. ठ. ड. कामी. ६ च. °स्यागुरुं उ° र; झ. स्यागुरु. ७ ग ज. उदृचं; च. उद्वृचं° द्रु; च. ट. उदृचमिति वा पाठः. ८ च. °मतोतो°; घ. ट. ठ. ड. °मतोऽतो°. ९ च. एतां(ना) धानां नाः. १० क. ख. घ. झ. ट. ठ. ड. मेनं; च. मेतं° नं. ११ क. ख. घ. झ. ट. ट. ड. °गमन आसिञ्चस्व । किंच; च. °गमन । ^किंच° आसिञ्चस्व. १२ घ. झ. ट. ठ. ड. सुष्ठु निःसीमातिशयवत् सुवीर्यं शो°; च. सुष्ठु^सुवीर्यं सुष्ठु शो° निःसीमातिशयवत्. १३ घ. झ. ट. ठ. ड. शोभनवीर्यं. १४ ड. आगुरु. १५ ग. ज. झ. ठ. ड. उद्वृचं; च. उदृचं° द्रु. १६ च. यज्ञस्योचोत्कृ°. १७ च. °थाऽप्रा°.

‘ श्मशा ’ (४६) इत्यनवगतम् । ‘ श्मशिनी ’ इत्यवगमः

‘ श्मशा ’ इत्यस्यार्थः

‘ श्माशिनीति वा ’ । श्मशिनी शीघ्राशिनी शीघ्रव्यापिनी कुल्या नदी वा । श्माशिनी पुनर्नाडी । सा हि श्म शरीरं व्याप्नोति । एवमेतदिह विगृह्यमाणमनेकार्थमपि भवत्येवं । ‘ कदा वसो

प्रयोगश्च

स्तोत्रं हर्यत आवं श्मशा रुधद्वाः । दीर्घं सुतं वाताप्यार्य ’ (ऋ० सं० १० । १०५ । १) ॥

कुत्सपुत्रस्य दुर्मित्रस्यार्षम् । उष्णिक् । ऐन्द्रस्य सूक्तस्य प्रथमैवेयम् । हे वसो वसुमन इन्द्र कदा कस्मिन् काले स्तोत्रम् एतन्मयोदीरितमस्य यजमानस्य हर्यतः कामान प्रार्थयतस्त्वामुपरोत्स्यति श्मशेव वाः । कुल्येवोदकं विसर्पमाणं नदी वा । अथवाध्यात्मिकी नाडी शरीराश्रितं रसम् । आह । कतमत्स्तोत्रमिति । उच्यते । यदेतत् दीर्घं सुतं सोमं सत्राख्यं सुतमभिषुतं प्रवर्तते वाताप्याय उदकार्थम् । एवमत्र श्मशेत्येतन्नद्यभिधानं कुल्याभिधानं वा नाड्यभिधानं वा शब्दोपपत्तेरर्थोपपत्तेश्चेति । १२ ॥

दशमस्य द्वितीयः पादः ।

उर्वश्यप्सरा उर्वभ्यश्नुत ऊरुभ्यामश्नुत उरुर्वा वशोऽस्या अप्सरा अप्सारिण्यपि वाप्स इति रूपनामाप्सातेरप्सानीयं भवत्यादर्शनीयं व्यापनीयं वा स्पष्टं दर्शनायेति शाकपूणिर्यदप्स इत्यभक्षस्याप्सो नामेति व्यापिनस्तद्रा भवति रूपवती तदनयात्तमिति वा तदस्यै दत्तमिति वा तस्या दर्शनान्मित्रावरुणयो रेतश्चस्कन्द तदभिवादिन्येषर्ग्भवति ॥ १३ ॥

---

१ च. श्माशि°. २ ग. °त्येव ।५३। कदा°. ३ ग. ज. हर्यत आ । कुत्स°; घ. ट. हर्यत० । कुत्स°. ४ क. ख. °प्याय । इति । कु°; च. °प्याय । इति । कु°. ५ घ. ट. ठ. ड. अग्मिन्. ६ क. ख. ग. ज. घ. झ. ट. ट. ड. हर्यतः कामयतः कामा°; च. हर्यत ‹कामा° कामयतः. ७ क. ख. घ. झ. ट. ठ. ड. नाडीवा; च. नद्यां वा०नाडी. ८ ग. ज. सोमं सुतं; च सोमं. सुतं ९ घ. झ. ट. ठ. ड. एवमेतत् श्म°. १० क. ख. घ. झ. ट. त्येतन्नाड्यभि°. ११ क. ख. घ. झ. ट. ठ. ड. ‘ नाड्यभिधानं ’ नास्ति. १२ क. ख. ८ (१०) । इति निरुक्तवृत्तौ दशमाध्यायस्य द्वि°; ग. १४; ठ. ड. श्चेति । इति दशमाध्यायस्य द्वितीयः पादः । इति निरुक्तटीकायां पञ्चमाध्याये द्वादशः खण्डः; घ. झ. ट. °श्चेति दशमाध्यायस्य द्वि°; च. ज. अङ्को नास्ति. १३ च. पादः समाप्तः १४ क. ख. १ (१३); छ. त. १५; द. १.

'उर्वशी' (४७) इत्यनवगतम् । 'अप्सराः' इत्यभिधेयवचनम् ।

'उर्वशी' इत्यस्य-व्युत्पत्तयः

'उर्वभ्यश्नुते' इति व्युत्पत्तिः । उरु महद्यशोऽभिव्याप्नोतीति । अथवा 'ऊरुभ्यां' मैथुने धर्मे पुरुषम् 'अश्नुते' व्याप्नोतीति ऊर्वोशिनी सती उर्वशीत्युच्यते । अथ 'वा उरुः' महान् अस्याः 'वशः' कामः । सेयमुरुवशिनी सती उर्वशीत्युच्यते । एते शब्दसमाधयः । अधुना 'अप्सराः' इत्येतं शब्दं समाख्यानप्रसक्तं निर्ब्रवीति । आह । 'अप्सराः' कस्मात् ।

अप्सरा इत्यस्य च

उच्यते । सा हि 'अप्सारिणी' भवति । अपः प्रति नित्यमेव सरति तत्प्रभवत्वात् । तदेव तस्याः प्रियमुदकं तस्मादप्सराः । अथवा अद्भ्यः सृतेत्यप्सराः । 'अपि वा' एवमप्यन्यथा स्यात् । 'अप्स इति' एतत् 'रूपनामाप्सातेः' प्रतिषेधपूर्वस्य प्सातेः भक्षणार्थस्य । तद्यथा । 'अप्सानीयम्' अनदनीयं 'भवति' । न हि तद्भक्ष्यते । किं तर्हि । 'आदर्शनीयं' तदाभिमुख्येन स्थित्वा द्रष्टव्यमेव भवति चक्षुषा । न पुनर्मुखेन भक्षयितव्यमित्यर्थः । 'व्यापनीयं वा' । व्यापनमर्हति । 'आप्लृ व्याप्तौ' (धा० ५ । १४)। तस्य वा अप्सः । तद्धि नायनेन रश्मिनात्मनः प्रत्ययाधानार्थं व्यापयितव्यं भवति । 'स्पष्टं दर्शनायेति शाकपूणिः' आचार्यो मन्यते । न ह्येतदस्पष्टं दर्शनाय । किं तर्हि । स्पष्टमेवेत्यर्थः । 'यदप्सः इत्यभक्षस्य' । पुरस्तादुक्तम् 'अपि वाप्स इति रूपनामाप्सातेः' । न हि तद्भक्ष्यते । किं तर्हि । दृश्यते तदिति । तत्र 'अभक्षस्य' अप्सशब्दवाच्यत्वप्रख्यापक एष निगमो 'यदेनश्चकृमा वयं यदप्सश्चकृमा वयम्' इति । 'यद् ग्रामे यदरण्ये यत्सभायां यदिन्द्रिये । यदेनश्चकृमा वयं

अप्स इत्यभक्षस्य

यदप्सश्चकृमा वयम् । यदेकस्यापि धर्मण्येतत्तदवयजामहे स्वाहा' (काठक सं० ९ । ४) इति वरुणप्रघासेषु करम्भपात्रहवने पत्नीयजमानयोर्मन्त्रः (मान० श्रौ० १ । ७ ४) । यद् ग्रामे वयं किंचिदेनश्चकृम यच्चारण्ये यच्च सभायां यच्चेन्द्रिये प्रजनने निमित्तभूते सति यच्चान्यत्रापि क्वचिद् ग्रामादिभ्यो वयमेनश्चकृम कृतवन्तो यच्चाप्सश्चकृम यदभक्ष्यभक्षणं कृतवन्तो वयं किंचित्तत्तदेनोऽनेक-

---

१ क. ख. च. उर्वा°. २ क. ख. घ. झ. ट. ठ. ड. एता. ३ क. ख. घ. झ. ट. ठ. ड. तद्धयप्सा°; च. तद्यथाऽप्सा° द्धय. ४ च पुनर्भक्ष° मुखेन भ. ५ ग. च. ज. आप्तृ. ६ घ. झ. ट. °त्यभक्ष्यस्य. ७ च. °भक्षभक्ष° क्ष्य.

प्रकारमेकैकस्याप्यावयोश्चेतसि निमित्तभूतमुत्पन्नं किंचित् यदेकस्यापि धर्माणि यदघं तदनेकप्रकारमेकै[1]स्यावयोः धर्माणि कर्माणि निमित्तभूतं यच्च सहकृतं यच्च पृथक् कृतं यच्च मानसं यच्च शारीरं तस्य सर्वस्याप्येनसोऽस्माकमवयजे[2]नं कृत्वा ततोऽवयजै[3]नमसि मरुतां हे हविः करम्भपात्राख्यं[4] । 'प्रघासौ[5]न् हवामहे मरुतः' इत्यतो विशेषलिङ्गान्मारुतत्वमस्याध्यै[6]वस्येत् । यत् 'अप्सः' इत्येष शब्दोऽभक्षै[7]स्याभिधायको दृष्टस्तस्मात्साधूक्तम् 'अपि वाप्स इति रूपनामाप्सातेः' इति ।

अधुना यदुक्तं 'व्यापनीयं वा' इति 'आप्लृ[8] व्याप्तौ' इत्यस्य वाप्स इति तस्यार्थ[9]प्रख्यापकं निगमं ब्रवीति 'अप्सो नामेति व्यापिनः' इति । यथाप्नो[10]तिरभिव्याप्त्यर्थस्तस्याप्स इत्येतद्रूपनाम भवति[11] तथैव निगमः ।

अस्मिन्निगमे व्यापिन्यर्थेऽप्सः

'पृथिव्याः पुरीषमस्यै[12]प्सो नाम तां त्वा विश्वे अभि[13]गृणन्तु देवाः । स्तोमपृष्ठा घृतवतीह सीद प्रजावदस्मे द्रविणा यजस्वाश्विनाध्वर्यू सादयतामिह त्वा' [मैत्रा० सं० २ । ८ । १] इति ।

अग्निचयने द्वितीयायां चितावाश्विन्यो नामेष्टकास्तासामेकस्यामयमुपधानमन्त्रः [मान० श्रौ० ६ । २ । १] । पृथिव्याः पुरीषमसि पूरयित्र्यसि हे इष्टके अप्सो नाम । तां त्वाम् एवंगुणयुक्तां सतीं विश्वे सर्वे अभिगृणन्तु अभिष्टुवन्तु देवाः । किंच । सा त्वं स्तोमपृष्ठा देवैरुदीरितेन स्तोमेन स्पृष्टा घृतवती उदकवती उदकेन संश्लेषिता इहाग्निचयने आसीद । किंच[14] । अश्विनौ देवौ अध्वर्यू सादयतामिह त्वाम् । तौ हि विजानीतो यथा त्वं

---

१ च. मेकैस्या' कैक. २ ग. ज. व. ट. ठ. ड. °यवनं. ३ च. 'यजैनमसि' अवयजामहे विनाशयामः । अवपूर्वो यजिर्नाशनार्थः. ४ व. झ. ट. ठ. ड. 'पात्राख्य । अवयजामहे विनाशयामः । अवपूर्वो यजिर्नाशनार्थः । प्रघा°. ५ व. झ. ट. प्रघास्यान्. ६ क ख. व. झ. ट. ठ. ड. °स्यावसीयते; च. °साध्यवस्येत्स्यते. ७ क. ख. व. झ. ट ठ. 'भक्ष्यस्या°. ८ ग. च. ज. आप्लृ. ९ क. ख. घ. झ. ट. °र्थस्य ख्या°; च. 'र्थप्र' स्य; ठ. ड. °र्थस्य व्यापकं. १० ग. ज. °प्नोतेर°. ११ ग. भवति । ५४ । पृथिव्याः°; ज. भवति । पृथिव्याः. १२ ग. ज. °मस्याप्सो°; च. 'मस्याप्सो° स्य. १३ ग. ज. °श्वेभि°; च. °श्वेऽअभि°. १४ व. झ. ट. ट. ड. किंच । अस्मै अस्मभ्यं प्रजावत् पुत्रपौत्रादियुक्तानि द्रविणा द्रविणानि धनानि आयजस्व सर्वतो देहि । यजतिर्दानार्थः । किंच । अश्वि°; च. किंच । ४ अश्वि° अस्मै० ० दानार्थः । किंच.

सादयितव्येत्यभिप्रायः । एवमत्र व्यत्ययार्थस्याप्स इत्युपपद्यत इह भक्षणार्थासंभवात् ।

एवं तावदप्सरा इत्यस्याभिधानस्याप्स इत्ययमेकदेश उपपादितः । अधुना 'रा' इत्येतमेकदेशमुपपादयिष्यन्नाह ।

मत्वर्थे रा

'तद्रा भवति रूपवती' । रो मत्वर्थे । तेनाप्सः-शब्दवाच्येन रूपेण तद्वती सा भवत्यप्सराः ।

'तद्रा भवति' इत्येवमुक्तेऽपि सति रेफस्य मत्वर्थता न गृह्यत इति मन्यमानो भाष्यकारः स्पष्टमेव मत्वर्थमाह 'तद्रा भवति रूपवती' इति । रूपसंयुतेत्यर्थः । तस्या एव सर्वयोषिद्भ्यः प्रतिविशिष्टं रूपमित्यभिप्रायः । अथ 'वा' एवमन्यथा स्यात् । 'तदनया' अप्सःशब्दवाच्यं

अथवा 'आदाने'

रूपम् 'आत्त' गृहीतमेव कुतश्चित् । एतस्मिन् पक्षे 'रा' इत्ययमादानार्थः । अथ 'वा' एवमन्यथा स्यात् । 'तत्' अप्सःशब्दवाच्यं रूपमतिरिक्तमिव तस्यै दत्तं विधात्रा । तथाहि तत्तस्यामतिशयेनानपायि च लक्ष्यते ।

अथवा 'दाने'

एतस्मिन्पक्षे 'रा' इत्ययं दानार्थः ।

'तस्याः' एवंगुणविशिष्टाया उर्वश्या अप्सरसो 'दर्शनान्मित्रावरुणयो रेतश्चस्कन्द' स्कन्नम्[10] । 'तत्' तस्यार्थस्य 'अभिवादिन्येषा ऋग्भवति' ॥ १३ ॥

उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽधि जातः । द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददन्त [ऋ० सं० ७ । ३३ । ११] ॥ अप्यसि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽधिजातो द्रप्सं स्कन्नं ब्रह्मणा दैव्येन द्रप्सः संभृतः

---

१ क. ख. घ. झ. ट. ठ. ड. °मत्रापेर्व्या°; च. °मत्रे व्यों° त्रापेर्व्या. २ क. ख. घ. झ. ट. ठ. ड. 'एतं' नास्ति. ३ क. ख. घ. झ. ट. ठ ड. तेनाप्सश°. ४ क. ख. घ. झ. ट. ठ. ड. °वाच्यन्वेन; च. °वाच्येनं° च्यत्वे. ५ क. ख. °माह यदुक्तं रूप°; घ. झ. ट. °माह यदुत रूप°; च. °माह । तद्रा भवति° यदुत. ६ क. ख. घ. झ. ट. ठ. ड. च. अप्सश°. ७ सर्वेषु पुस्तकेषु 'अप्सशब्द°' इति. ८ घ. झ. ट. ठ. ड. अस्यै; च तस्ये° अ. ९ ठ. ड. स्कन्नं स्खलितम्. १० क. ख. १ (१३); ग. ५५।१५; ठ. ड. १३ (ठ. अङ्को नास्ति) इति नैरुक्तभाष्ये पञ्चमाध्यायस्य [ड. 'पञ्चमाध्यायस्य' नास्ति] त्रयोदशः (ड. १३) खण्डः.

प्सानीयो भवति सर्वे देवाः पुष्करे त्वाधारयन्त पुष्करमन्तरिक्षं पोषति भूतान्युदकं पुष्करं पूजाकरं पूजयितव्यमिदमपीतरत्पुष्कर-मेतस्मादेव पुष्करं वपुष्करं वा पुष्पं पुष्पतेर्वयुनं वेतेः कान्तिर्वा प्रज्ञा वा ॥१४॥

‘ उतासि मैत्रावरुणः’ इति । वसिष्ठस्य सपुत्रस्येयमार्षम् । तस्यैव स्तुतिरिन्द्रस्य वा । ‘उत’ इत्ययम् ‘अपि’ शब्दार्थे वर्तमानोऽधस्त्यायामृचि ये जन्मनी वसिष्ठस्योक्ते ते संभावयति । सा पुनरियमृक् । ‘ विद्युतो ज्योतिः परि संजिहानं मित्रावरुणा यदपश्यतां त्वा । तत्ते जन्मोतैकं वसिष्ठागस्त्यो यत्त्वा विश आजभार ’ (ऋ० सं० ७।३३।१०)॥ विद्युतो ज्योतिषः प्रकाशः । तस्मात्परितः अधिकं संजिहानम् उत्तिष्ठन्तम् । जायमानमित्यर्थः । मित्रावरुणौ देवौ यदपश्यतां त्वा तत्ते तव जन्मैकं हे वसिष्ठ । अपि च । यत्त्वामगस्त्यो विश आजभार । अगस्त्य ऋषिः विशो मनुष्यान् प्रति मनुष्यलोकम् आजभार आहृतवान् तत्ते तव द्वितीयं जन्म ।

अस्यामृचि वसिष्ठस्य द्वे जन्मनी उक्ते । ते ‘उत’ शब्देन लक्ष्येते

उतासि अपि चासि मैत्रावरुणः हे वसिष्ठ । कथं पुनर्मैत्रावरुणः मित्रावरुणयोरुत्पन्नोऽसि । किं संघर्षेण । नेत्युच्यते । उर्वश्याः सकाशात् हे ब्रह्मन् मनसोऽधिजातो न संघर्षेण । किंच । निर्बीज एवासि मनोभिध्यानमात्रादुत्पन्नः । नेत्युच्यते । किं तर्हि । द्रप्सं शुक्रमुर्वशीदर्शनात् स्कन्नं मित्रावरुणयोः । ब्रह्मणा दैव्येन देवानां स्वभूतेन ऋग्यजुःसामाख्येन स्तुवन्तो विश्वे देवा मा एतद्भूमौ पतेदिति कुम्भस्योपरि पुष्करे उदके अन्तरिक्षे वा त्वां तेन शुक्रेण सहैकतामुपगतम् अददन्त । अधारयन्तेत्यर्थः । एवमेतस्मिन् ‘द्रप्सं स्कन्नम् ’ इत्येवमादिना संबन्धेन ‘ उर्वशी ’ शब्देन अप्सरा उच्यत इत्युपपद्यते ।

उर्वश्या दर्शनान्मित्रावरुणयो रेतश्चस्कन्द । तस्माद्रेतसो वसिष्ठो जातः

---

१ क. ख. २ (१४)· छ त. १६; द २. ग. ज. पुनरित्ययमृक् (ग मृक् । ५६ ।) . ३ ग. ज. ज्योतिः परि संजिहानं । विद्यु°; च. ट. ज्योतिः० जभार. ४ क. ख. घ. झ. ट. ठ. ड. °विद्युतो विशेषेण द्योतते देदीप्यते इति विद्युदुर्वशी तस्या ज्योतिः प्रकाशः°; च. विद्युतः ज्योतिषः° विशेषेण० ज्योतिः. ५ ठ. ड. संघर्षणेन.

२१

रौद्रेण किल तेजसा निर्दग्धो वसिष्ठो मित्रपरिगृहीतायामुर्वश्यामुत्पन्नो वरुणगतेजसो जात इति पुराणे[1] श्रूयते । तदप्युपेक्षितव्यम् । अनेकविधो हि मन्त्राणां विषयः । वसिष्ठस्येयमार्षं युष्मदश्चात्र प्रयोग 'उतासि' इति । तदेतद्विरुद्धार्थमिव[2] लक्ष्यते । नैतद्विरुद्धं नित्यत्वान्मन्त्राणाम् ।

वसिष्ठस्यार्षं वसिष्ठश्च संबोध्यत इति कथम्

आह । रेतः कस्मात् 'द्रप्सः' इत्युच्यते । स हि रेतःसंज्ञको रसः पुरुषस्याङ्गादङ्गात् संभृतः[3] स्त्रीयोनेः[4] 'प्सानीयो भवति' भक्षणीयो भरणीयश्च । एवं प्सातेर्भरतेश्च यथासंभवं 'द्रप्स' इत्येष शब्दो द्रष्टव्यः । पुष्करशब्दोऽनेकार्थः। तमिह प्रसक्तं व्याचष्टे। 'पुष्करमन्तरिक्षम्'। तद्धि 'पुष्णाति भूतानि' अवकाशदानेनोपकुर्वत् । 'उदकम्' अपि 'पुष्करम्' । तेन हि पूजा क्रियते देवादिभ्यः । तत्पूजाकारकत्वात्पुष्करम्[5] । अथवा 'पूजयितव्यं' पूजनार्हमात्मन एवेति पुष्करम् । 'इदमपीतरत्पुष्करम्[6]' पद्मम् 'एतस्मादेव' कारणात् 'पुष्करम्' इत्युच्यते । तदपि हि पूजाकरणं[7] पूजयितव्यं च शोभनत्वात्तस्य । अथ 'वा पुष्करं' तदिति 'वपुष्करम्[8]' । आबद्धे हि तस्मिन् वपुष्मान् भवति । पद्मप्रसङ्गात्पुष्पशब्दं निराह । 'पुष्पं पुष्पतेः' इति । पुष्पतिर्विकसनार्थः (धा० ४ । १६) । तद्धि विकसितं भवति ।

पुष्करशब्दस्यार्थो निर्वचनं च

'वयुनम्' [४८] अनेकार्थमनवगतं च । 'वेतेः' इति धातुनिर्देशः । 'वेनम्' इति व्याख्यम् । 'कान्तिर्वा' अभिधेया 'प्रज्ञा वा' ॥१४[10]॥

---

१ क. ख. घ. झ. ट. ठ. ड. पुराणात्. २ क. ख. घ. झ. ट. ठ. ड. °र्थमुपलक्ष्य; च. °र्थमिवमुपल.° ३ घ. झ. ट. ठ. ड संभूतः. ४ च. °योनेः° नेः. ५ क. ख. घ. झ. ट. ठ. ड. °जाकरत्वा°; च. °जाक (का) रत्वा° क (ण?). ६ क. ख. घ. झ. ट. ठ. ड. 'पुष्करं' नास्ति; च. पुष्करं. ७ क. ख. घ. झ. ट. ठ. ड. °जाकरं; च. °जाकारणं क. ८ घ. झ. ट. ठ. ड. वपुष्करं; च. पुष्करं° वपु. ९ घ. झ. ट. ठ. ड. पुष्करं; च. वपुष्करं. १० क. ख. २ (१४); ग. ५७/१६; ठ. ड. १४ । इति निरुक्तटीकायां पञ्चमाध्याये चतुर्दशः खण्डः; इतरेष्वङ्को नास्ति. २१

स इत्तमोऽवयुनं ततन्वत्सूर्येण वयुनवच्चकार। स तमोऽप्रज्ञानं ततन्वत्स तं सूर्येण प्रज्ञानवच्चकार[1] वाजपस्त्यं वाजपतनम्। सनेम वाजपस्त्यमित्यपि निगमो भवति[1] वाजगन्ध्यं गध्यत्युत्तरपदम्। अश्याम वाजगन्ध्यमित्यपि निगमो भवति[1] गध्यं गृह्णातेः। ऋज्रा वाजं न गध्यं युयूषन्नित्यपि निगमो भवति[1] गध्यतिर्मिश्रीभावकर्मा। आगधिता परिगधितेत्यपि निगमो भवति[1] कौरयाणः कृतयानः। पाकस्थामा कौरयाण इत्यपि निगमो भवति[1] तौरयाणस्तूर्णयानः। स तौरयाण[2] उप याहि यज्ञम्[3]। मरुद्भिरिन्द्र सखिभिः सजोषा इत्यपि निगमो भवत्यह्रयाणो[4] ह्रीतयानः। अनुष्टुया कृणुह्यह्रयाणेत्यपि निगमो भवति[1] हरयाणो हरमाणयानः। रजतं हरयाण इत्यपि निगमो भवति। य आरितः कर्मणिकर्मणि स्थिरः। प्रत्यृतः स्तोमान् व्रन्दी व्रन्दतेर्मृदूभावकर्मणः॥ १५[5])॥

वयुनशब्दस्य प्रयोगोऽर्थश्च

'स इत्तमोऽवयुनं ततन्वत्[6]सूर्येण वयुनवच्चकार। कदा ते मर्ता अमृतस्य धामेयक्षन्तो न मिनन्ति स्वधावः' (ऋ० सं० ६।२१।३)॥ भरद्वाजस्यार्षम्। त्रिष्टुप्। ऐन्द्रे सूक्ते। व्यूढस्य[7] दशरात्रस्य नवमेऽहनि मरुत्वतीये शस्त्रे शस्यते (आश्व० श्रौ० ८।७)। त्वमेवंगुणविशिष्टो हे भगवन्निन्द्र। यथागुणं त्वामवोचाम। स त्वमेतच्छार्वरं तमः अवयुनम् अप्रज्ञानलक्षणं ततन्वत्। सर्वमेवैनं[8] लोकं स्वेन प्रकाशाख्येन रूपेण[9] संतनोति। सूर्येण वयुनवत्। प्राणो हीन्द्रस्तस्मात्सूर्य उदेति। 'प्राणाद्वा एष उदेति प्राणेऽस्तमेति' (बृ० उ० १।५।२३) इति[10] ह्युक्तम्। तस्मा-

---

१ क. ख. छ. त. द. अत्र विरामो वर्तते. २ त. तूर° तौ; द. तूर°. ३ क. ख. छ. त. द. विरामो नास्ति. ४ छ. त. भवति। अह्र°. ५ क. ख. ३ (१५); छ. त. १७; द. ३. ६ ग. ज. ततन्वत्। भर°; घ. ट. ततन्वत्०न मिन°. ७ ठ. ड. व्यूळ्हस्य. ८ ग. ज. स एवमेवैतं लोकं. ९ क. ख. घ. झ. ट. ठ. ड. 'रूपेण' नास्ति; च. रूपेणं. १० घ. ट. 'इति' नास्ति.

त्प्राण इन्द्रः सूर्यस्योदयहेतुः। स तं सूर्यमुद्गमयंस्तेन[1] सूर्येण वयुनवच्चकार । एतज्जगज्ज्ञानवत् करोति । तस्मात्स एवेन्द्र एवमुच्यते । सूर्येण त्वमेत[2]ज्जगद्वयुनवत्प्रज्ञावच्चकार । कृतवानसीत्यर्थः । यस्त्वमेवंप्रभावस्तस्य तव कदा कस्मिन् काले मर्ता मरणधर्माणो मनुष्या अमृतस्य अमरणधर्मिणो धाम स्थानं इयक्षन्तो यष्टुमिच्छन्तो न मिनन्ति न श्रयन्ति हे स्वधावः अन्नवन् । सर्वदैव तवापरिक्लिष्टं स्थानम् । कृतावकाशस्त्वं यज्ञेष्वित्यभिप्रायः । एवमिह 'तमस्ततन्वत्सूर्येण वयुनवच्चकार' इत्यनेन संबन्धात् 'वयुन' शब्देन प्रज्ञानमुच्यत इत्युपपत्तिः । कान्त्यर्थत्वमपि क्वचिदुपेक्ष्यम् । इहैव वा पक्षेण योज्यम् ।

'वाजपस्त्यम्' इत्यस्य

'वाजपस्त्यम्' [४९] इत्यनवगतम् । 'वाजपतनम्' इत्यवगमः[3] । 'तं सखायः पुरोरुचं[4] यूयं वयं च सूरयः । अश्याम वाजगन्ध्यं सनेम वाजपस्त्यम्' (ऋ० सं० ९ । ९८ । १२) ॥ पावमानी सौमी । अम्बरीषर्ध्वे ऋजिश्वा च सूक्तं ददृशतुस्तत्रैषा । तमेनं सोमं हे सखाय ऋत्विज पुरोरुचम् अग्रतोदीप्तिम्[6] यूयं वयं च[5] संपृक्ताः सन्तो हे सूरयो मेधाविनः अश्याम व्याप्नुयाम वयं वाजगन्ध्यं प्रतिविशिष्टान्नसमानगन्धम् । अथवा वाजग्रहीतारम् । अथवा वाजसंमिश्रयितारम् । किंच । सनेम संभजेमहि[8] वाजपस्त्यम् । अन्नमेतदस्माकमिति मन्यमानाः सन्तो[7] यमाभिमुख्येन देवाः पतन्ति गच्छन्ति स वाजपस्त्यः सोमस्तं नित्यकालमेव वयं भजेमहि । एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च 'वाजपस्त्य' शब्देन सोम उक्तः ।

'वाजगन्ध्यम्' तस्मिन्नेव निगमे

'वाजगन्ध्यम्' (५०) इत्येतदपि पदमेकस्मिन्नेव निगमे निरुक्तम् । केवलं समाम्नायानुक्रमविपर्यासः । 'वाजपस्त्यं वाजगन्ध्यम्' (निघ० ४ । २) इत्येष समाम्नायानुक्रमः । निगमे पुनः 'अश्याम वाजगन्ध्यं सनेम वाजपस्त्यम्' इति[9] ।

---

१ क. ख. घ. ट. ठ. ड. °द्गमयत् ते°. २ ग. ज. त्वमेतद्वयुनवच्चकार°. ३ ग. °गमः । ५८ । तं. ४ ग. ज. पुरोरुचं । पाव°; घ. ट. पुरोरुचं०वाजपस्त्यम्. ५ क. ख. घ. झ. ट. ठ. ड. 'च' नास्ति. ६ क. ख. घ. झ. ट. ठ. ड. °दीप्तम्. ७ घ. झ. ट. ठ. ड. 'सन्तो' नास्ति; च. सन्तो. ८ घ. झ. ट. ठ. ड. संभजे°; च. ˇभजे° सं. ९ ग. ज. 'वाजगन्ध्यं' नास्ति; च. °पर्यासो वाजपस्त्यं । वाजगन्ध्यं सनेम° इत्येष समाम्नायानुक्रमः । निगमे पुनः अश्याम वाजगन्ध्यं.

'गव्यम्'[1] (५१) इत्यनवगतम्। 'ग्रहणीयम्' इत्यर्थप्रतीतिः[2]।
'यासि कुत्सेन सरथमवस्युस्तोदो[3] वातस्य हर्योरीशानः। ऋज्रा वाजं न गध्यं युयूषन्कविर्यदहन्पार्याय भूषात्' [ऋ० सं० ४। १६। ११]॥

'गध्यम्' इत्यस्य वामदेवस्यार्षम्। ऐन्द्री। त्रिष्टुप्। अहीनसूक्ते[4] चतुर्विंशे उक्थे माध्यन्दिने सवने मैत्रावरुणस्येयं शंस्त्रे[5] [आश्व० श्रौ० ७। ४।] हे भगवन्निन्द्र यासि कुत्सेन ऋषिणा स्तूयमानः अथवा कुत्सेन वज्रेणाभ्युद्यतेन सरथं समानगमनमभिवर्हनं[6] रथमारुह्य[7] अथवा सरथे रथसंयुक्तं परानीकम् अवस्युः रिरक्षिषुरात्मीयान् मिमर्दिषुश्च परकीयान् तोदः तुन्न इव केनचित् वातस्य जवेन यासि। तथापि च गच्छन् हर्योः अश्वयोः ईशानः ईश्वरः। न धावति त्वय्यन्यत एव त्वामूहतुः। स त्वं ऋज्रा ऋजुनैव मार्गेण न कांचिदन्यां गतिं धावमानः वाजं न गध्यं[8] वाजमिव ग्रहणार्हं भोक्तुमाभिमुख्येन युयूषन् पुनःपुनः संमिश्रयिष्यन्नात्मानं शत्रुभिर्युद्धे कविः क्रान्तदर्शनोऽसंमूढो यदहन् यस्मिन्नहनि पार्याय पारणाय शत्रूणामुपरि चेतः करोषि पारयितव्या मयैत इति तस्मिन्नेवाहनि तान् सर्वान् भूषात्। अतिक्रम्य वर्तस इत्यर्थः। पर्यगृह्णात्पर्यरक्षदत्यक्रामदित्येते भूषतेरर्थाः। एवमस्मिन्[9] शब्दसारूप्यादर्थोपपत्तेश्च 'गध्यम्' इत्येष शब्दो 'गृह्णातेः' इत्युपपद्यते।

'गध्यतिः' [५२] अप्रतीतार्थः। स पुनरेष 'मिश्रीभावकर्मा[10]'।
'आगधिता परिगधिता[11] या कशीकेव जङ्गहे। ददाति मह्यं यादुरी याशूनां भोज्या शता' [ऋ० सं० १। १२६। ६]॥

'गध्यतिः' इत्यस्य भावयव्यस्यार्षम्। आगधिता आगृहीता आमिश्रिता[12] च। परिगधिता च परिमिश्रीकृता। बाहुभ्यां मया परिष्वक्तेत्यर्थः। या कशीकेव। प्रतिकशं

१ क. ख. च. गन्व्यम्. २ ग. °तीतिः। ५१। यासि°. ३ ग. ज. सरथं। वाम°; घ. ट. सरथमवस्युः पार्याय भूषात्. ४ ग. च. ज. °सूक्ते च चतु. ५ क. ख. घ. झ. ढ. ठ. ड. शस्त्रे शस्यते. ६ ग. ज. समानमभिवह°. ७ क. ख. घ. झ. ट. ट. ड. °वहनरथ°. ८ ग. ज. °न गध्यं [ज. गंध्यं] गन्ध्यं वाजं°. ९ क. ख. घ. [illegible] ट. ठ. ड. °एवमेतस्मिन्; च. °एवमस्मि° मेत. १० ग. ज. °कर्मा। ६[illegible] आग°. ११ ग. ज. परिगविता। भाव°; घ. ढ. परिग० याशूनां°. १२ [illegible] झ. ट. ठ. ड. आमिश्रीकृता; च. आभिश्रिता° श्रीकृ.

कर्शीकेव । सा हि नकुलजातिः कांचिद्दिवे कशामिति श्रूयतेऽश्वमेधे [मैत्रा० सं० ३ । १४ । ७ । वा० सं० २४ । २६] । सा यथा मदकाले प्रतिकशमतितरां परिष्वजति । स हि तस्याः परिष्वजनस्वभावः । एवं या मां जङ्घहे परिगृह्णाति बाहुभ्यां परिगृह्य च ददाति । यादुरी या आदरवती । अथवा यादसा रेतःसेकेन तद्वती । 'यादः' इत्युदकनामसु पठितम् [निघ० १ । १२ । ४८ ।] । किं च ददाति मह्यमिति । उच्यते । याशूनां मैथुनाख्यानां शता शतानि । बहुश इत्यर्थः । या एवंप्रकारा सा मम भोज्या । पत्नीत्यभिप्रायः । एवमत्र मैथुनसंबन्धाच्छब्दसारूप्याच्च 'गध्यतिर्मिश्रीभावकर्मा' इत्युपपद्यते ।

'कौरयाणः' [५३] इत्यनवगतम् । 'कृतयानः' इत्यवगमः ।

'कौरयाणः' इत्यस्य

'यं मे दुरिन्द्रो मरुतः पाकस्थामा कौरयाणः । विश्वेषां त्मना शोभिष्ठमुपेव दिवि धावमानम्' [ऋ० सं० ८ । ३ । २१] ॥ मेध्यातिथेः काण्वस्यार्षम् । यानमनया प्रशस्यते । यन्मम दत्तवन्तो मरुत इन्द्रश्च पाकस्थामा विपक्वप्राणः कौरयाणः संस्कृतयानः विश्वेषां त्मना सर्वेषामपि यानानामन्यप्रतिग्रहीतृसत्कानां मध्य आत्मना तदेव शोभिष्ठं शोभनतममनेकरत्नविचित्रत्वात् दिवीव ज्योतिश्चक्रम् उपधावमानं दृश्यते । एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च 'कौरयाणः कृतयानः' इत्युपपद्यते ।

'तौरयाणः' (५४) इत्यनवगतम् । 'तूर्णयानः' इत्यवगमः ।

'तौरयाणः' इत्यस्य

'जातं यत्त्वा परि देवा अभूषन्महे भराय पुरुहूत विश्वे । स तौरयाण उप याहि यज्ञं मरुद्भिरिन्द्र सखिभिः सजोषाः' ॥ जातं जातमात्रं विश्वे देवा यत्त्वां पर्यभूषन् परिगृहीतवन्तः महे महते भराय रणाय महान्तमसुरैः सह संग्रामं करिष्यतीत्यनेनाभिप्रायेण स

---

१ घ. झ. ट. ठ. ड. काश्चित् काचिद्दिवे°; च. कांचिद्दिवे° का. २ ग. ज. एव; च. °भावः । ^या मे° एवं. ३ क. ख. घ. झ. ट. ठ. ड. आह । किं दद्दा°; च. किं चँ. ४ ग. °गमः । ६१ । यं°. ५ ग. ज. मरुतः । मेधाति°; घ. ट. मरुतः०दिवि°. ६ ग. च. ज. मेधाति°. ७ घ. झ. ट. °र्षम् । अनुष्टुप् । या°; च. °र्षम् ^ । या° अनुष्टुप्. ८ घ. झ. ट. ठ. ड. °यानो महाराजः । विश्वे°; च. °यानः ^विश्वे° महाराजः. ९ ग. च. ज. °प्रतिगृही°; ठ. प्रतिगृहितु सक्का°; ड. प्रतिगृहीतसक्का°. १० ग. ज. °सत्कानां; ट. °सक्कानां° त्ताकां. ११ ग. °गमः । ६२ । जातं. १२ क. ख. घ. झ. ट. ठ. ड. भरणाय; च. °राय^रणा° भ.

त्वं हे पुरुहूत इन्द्र तौरयाणः त्वरितयानो भूत्वा उपयाहि उपगच्छ एनं यज्ञं मरुद्भिः सखिभिः सह संप्रीयमाणः। उपागत्य चास्माकमाशिषः समर्धयेत्यभिप्रायः। एवमत्रागमनसंबन्धात् 'तौरयाणस्तूर्णयानः' इत्युपपद्यते।

'अह्रयाणः' [५५] इत्यनवगतम्। 'अह्रीतयानः' इत्यवगमः[1]।

'अह्रयाणः' इत्यस्य — 'त्वया वयं सधन्य स्त्वोतास्तव[2] प्रणीत्यश्याम वाजान्। उभा शंसा सूदय सत्यतातेऽनुष्ठुया कृणुह्यह्रयाण' [ऋ० सं० ४। ४। १४]॥ वामदेवस्यार्षम्। त्रिष्टुप्। अग्नये रक्षोघ्नेऽष्टाकपालः। तत्र स्विष्टकृतः पुरोनुवाक्यैषा मैत्रायणीयके[3] [मैत्रा० सं० २। १। ११॥ ४। ११। ५]। हे भगवन्नग्ने त्वया वयं सधन्यः समानधनिनः। यदेतदस्मद्गृहे धनमेतदावयोः सहेत्यभिप्रायः। यत एवमतो ब्रूमः। त्वोताः त्वयैव रक्षिताः सन्तः तव प्रणीत्या तवैव प्रणयेन[4] अश्याम वाजान् प्राप्नुयामोऽन्नानि। किंच। उभा शंसा उभावपि शंसितारौ यश्चाग्रतो नः पापानि शंसति यश्च पृष्ठतस्तावुभावपि सूदय सुष्ठु जहि हे सत्यताते यज्ञतनितः। किंच। अनुष्ठुया अनुष्ठानेन कृणुहि कुरु। कर्मणैतत्संपादय यदहं ब्रवीमि। हे अह्रयाण[5]। अलज्जितयानेत्यर्थः। एवमत्र 'अह्रयाणः' इत्यनेन अह्रीतयानं[6] उच्यते देवतेति[7]। उपपद्यते हि देवताया अलज्जितयानत्वम्।

'हरयाणः' [५६] इत्यनवगतम्। 'हरमाणयानः' इत्यवगमः[8]।

'हरयाणः' इत्यस्य — 'ऋज्रमुक्षण्यायने[9] रजतं हरयाणे। रथं युक्तमसनाम सुषामणि[10]' [ऋ० सं० ८। २५। २२]॥ विश्वमनसो वैयश्वस्येयमार्षम्[11]। यानमनया प्रशस्यते[12]। ऋज्रम् ऋजुगामिनं रथं रजतं रजतमयं रजतविकृतं वा युक्तम् अश्वैः असनाम लब्धवन्तो वयम्।

---

१ ग. °गमः। ६३। त्वया°. २ ग. ज. °स्त्वोता। वाम°; घ. ट. स्त्वोताः० ऽनुष्टुया°. ३ ग. च. ज. मैत्रावरुणीयके. ४ ग. ज. प्रणयनेन. ५ ग. च. ज. °याणो अलज्जितयान इत्य°. ६ क. ख. घ. झ. ट. ठ. ड. °यानोऽग्निरुच्य°. ७ क. ख. घ. झ. ट. ठ. ड. 'देवतेति' नास्ति; च. देवेतेति. ८ ग. °गमः।६४। ऋज्र°. ९ ग. ज. °ण्यायने। विश्व°; घ. ट. °ण्यायने० महनाम सुषामणि. १० क. ख. च. °मणि। इति विश्व°. ११ क. ख. घ. झ. ट. ठ. ड. °मार्षम्। उष्णिक्। या°; च. °मार्ष ०। या° उष्णिक्. १२ क. ख. घ. झ. ट. ठ. ड. स्तूयते.

क पुनर्लब्धवन्तः । उक्षण्यायने । उक्षण्यायन इति यजमानः[1] कश्चिदासीत् । तस्मिन्[2] हरयाणे हरमाणयाने नित्यकालमेवाभिप्रस्थितयाने सुषामणि शोभनं सामास्यै[3] सुषामा तस्मिन् यजमाने । तादृशः स महादक्षो दातेत्यभिप्रायः । एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च 'हरयाणो हरमाणयानः' इत्युपपद्यते ।

'आरितः' [५७] इत्यनवगतम् । प्रतीत्यस्य स्थाने आङ् ।

'आरितः' इत्यस्य

'प्रत्यृतः' इत्यर्थप्रतीतिः[4] । 'यो अश्वानां यो गवां[5] गोपतिर्वशी य आरितः कर्मणिकर्मणि स्थिरः । वीळोश्चिदिन्द्रो[6] यो असुन्वतो वधो मरुत्वन्तं सख्याय हवामहे' [ऋ० सं० १ । १०१ । ४] ॥ कुत्सस्येयमार्षम् । व्यूढस्य दशरात्रस्य नवमेऽहनि मरुत्वतीये शस्त्रे निविद्धानीये सूक्ते शस्यते [आश्व० श्रौ० ८ । ७] । य इन्द्रः अश्वानां गवां च गोपतिः । किंच । य आरितः कर्मणिकर्मणि स्थिरः । आरितः सर्वान् स्तोमान् प्रति योऽवस्थितः । केन । देवतारूपेण । सर्वेषु स्तोमेषु[7] व्यवस्थानात्[8] । यः कर्मणिकर्मणि अग्निहोत्रादौ स्थिरो नित्यः । यमृते न किंचन कर्म प्रवर्तत इत्यभिप्रायः । किंच[9] । वीळोश्चित्[10] संस्तब्धस्यापि दर्पितस्यापि य इन्द्रः असुन्वतः अभिषवमकुर्वाणस्य वधः वधयिता । तमेवंगुणैर्युक्तं[11] मरुत्वन्तं मरुत्सहितमिन्द्रं सख्याय सखिभावाय एतस्मिन् कर्मणि हवामहे । आह्वयाम इत्यर्थः । एवमयम् 'आरित' शब्दोऽर्थोपपत्त्या 'प्रत्यृतः' इत्येवम्[12] उपपद्यते ।

---

१ क. ख. घ. झ. ट. ड. 'यजमानः' नास्ति; ग. ज. °ण्यायनिरिति । न कश्चि°; च. यजमानः. २ क. ख. घ. झ. ट. ठ. ड. तस्मिन् यजमाने हर°; ग. ज. तस्मिन् यजमानहरणे हरमाणयाने; च. तस्मिन् हर° यजमाने. ३ ग. ज. सामास्येति सु°. ४ ग. °तीतिः । ६५ । यो°. ५ ग. मवां० हे । कुत्स°; ज. मवां० कुत्स°; घ. ट. गवां गोपतिर्वशी० सख्याय. ६ क. ख. च. वीडोश्चि°; ग. ज. घ. झ. वीलोश्चि°. ७ घ. झ. ट. ठ ड. सोमेषु. ८ क. ख. घ. झ. ट. ठ. ड. चावस्थानात् । यः°; च. वाँव° चा. ९ क. ख. घ. झ. ट. 'किंच' नास्ति. १० ग. च. ज. घ. झ. वीलोश्चि°. ११ च. °गुणसंयुक्तं. १२ क. ख. घ. झ. ट. ठ. ड. 'एवं' नास्ति.

' व्रन्दी ' [५८] इत्यनवगतम् । ' व्रन्दतेर्मृदूभावार्थस्य ' । धातुरेवायमप्रतीतः । एष एवा[1]नवगमः ॥ १५ ॥[2]

नि यद्वृणक्षि श्वसनस्य मूर्धनि शुष्णस्य चिद् व्रन्दिनो रोरुवद्वना । निवृणक्षि यच्छ्वसनस्य मूर्धनि शब्दकारिणः शुष्णस्यादित्यस्य च[3] शोषयितू रोरूयमाणो वनानीति वा [4]वधेनेति वा । अव्रदन्त वी[5]ळितेत्यपि निगमो भवति वीळ[6]यतिश्च व्रीडयतिश्च संस्तम्भकर्माणौ पूर्वेण संप्रयुज्येते निष्ष[7]पी स्त्रीकामो भवति विनिर्गतपसाः [8]पसः सपतेः स्पृशतिकर्मणः । मा नो मघेव निष्ष[9]पी परा दाः । स यथा धनानि विनाशयति मा नस्त्वं तथा परादा[10]स्तूर्णाशमुदकं भवति तूर्णमश्नुते । तूर्णाशं न गिरेरधी[11]त्यपि निगमो भवति । क्षुम्पमहिच्छत्रकं भवति यत्क्षुभ्यते ॥ १६ ॥

' व्रन्दी ' इत्यस्य नि यद्वृणक्षि श्व[12]सनस्य मूर्धनि शुष्णस्य चिद्व्रन्दिनो रोरुवद्वना । प्राचीनेन मनसा बर्हणावता यदद्या चित्कृणवः कस्त्वा परि' [ऋ० सं० १ । ५४ । ५] ॥ सव्यस्येयमार्षमाङ्गिरसस्य[13] । जगती । ऐन्द्री । स पुनरिन्द्र एवाङ्गिरसः पुत्रत्वमापन्नः । निवृणक्षि निवर्जयसि यत् यस्त्वं हे भगवन्निन्द्र मेवं हत्वा श्वसनस्य शब्दकारिणो वायोः मूर्धनि उपरि शुष्णस्य चित् शोषयितुरपि भगवत आदित्यस्य व्रन्दिनो मृदू[14]भावकर्तुः ।

---

१ ग. ज. एव निगमः. २ क. ख. ३ (१५); ग. ६६/१७; ठ. °गमः । इति नैरुक्तटीकायां पञ्चमाध्याये पञ्चदशः खण्डः; इतरेष्वङ्को नास्ति. ३ छ. त. द. ' च ' नास्ति. ४ ' धनानीति ' सायणभाष्यपाठः. ५ क. ख. छ. त. द. वीलिते° ६ क. ख. छ. त. द. वीलयतिश्च व्रीलय°. ७ ड. मिःषपी. ८ छ. स्पसः स्पशतेः; त. स्पसः स्पसतेः° श; द. स्पसः स्पसतेः. ९ छ. निःषपी. १० क. ख. छ. त. द. परादाः । तूर्णा०. ११ क. ख. ४ (१६); छ. त. १८; द. ४. १२ ग. ज. श्वसनस्य मूर्धनि । सव्य°; व. ट. श्वसन० कस्त्वा परि. १३ क. ख. व. झ. ट. ठ. ड. °ङ्गिरसस्येयं । जग°; च. °ङ्गिरस्य । जग°. १४ क. ख. ग. मृदुभा°; च. मुदुभा° दू.

आदित्येन हि परिपच्यमानं संस्तब्धमपि बदरतिन्दुकादि मृदु भवति तस्मादसौ व्रन्दी । तस्याप्येवंकर्मकारिणो मण्डलं प्रत्यूर्ध्वं रोरुवत् स्तनयित्नुशब्दं कुर्वाणो वना वनानि विक्षिपसि । ऊर्ध्वमधश्च वनानि उदकानि विक्षिपतो न ते शक्तिप्रतीघातोऽस्तीत्यभिप्रायः । यस्मिंस्तु पक्षे ' वधेन ' इति निर्वचनं तस्मिन् पक्षे ' वना ' इत्येष शब्दो मेघवधेनेति योज्यः । उदकशब्दश्चैतस्मिन् पक्षेऽध्याहार्यो निवर्जनसंबन्धात् । प्राचीनेन प्रागञ्चितेन अदीनेन तस्मिन् कर्मण्यभिमुखेन मनसा बर्हणावता हिंसावता यदद्यत्वेऽपि कर्म कृणवः करोष्येवासुकरमन्यैस्तस्माद्ब्रवीमि कस्त्वा पारि । कोऽन्यस्त्वामुपरि वर्तते । त्वमेव सर्वभूतानि परिगृह्य वर्तस इत्यभिप्रायः । एवमत्र 'व्रन्दि'-शब्देनादित्य उक्तः । तत्पुनरेतदस्पष्टं मृदुभावकरणादादित्यस्य व्रन्दित्वमिति । यतो व्रन्दिशब्दस्य मृदुभावार्थोपपादयिषया व्रीडयतिना संस्तम्भार्थवाचिना सह संबद्धो यत्र व्रन्दतेः प्रयोगस्ततो निगमाद् व्रन्दतेर्हि मृदुभावार्थता स्पष्टतरेति दर्शयति । ' अव्रदन्त वीळितेत्यपि निगमो भवति ' । अपि पूर्वोऽप्ययं स्पष्टतर इत्यपिशब्दः । ' वीडयतिश्च व्रीडयतिश्च ' एतौ द्वावपि ' संस्तम्भकर्माणौ पूर्वेण ' अनेनैवानन्तरेण व्रन्दिना यस्मात्समानवाक्यतामुपगतौ ' प्रयुज्येते ' तस्माद् व्रन्दिशब्दस्य मृदुभावार्थत्वमुपपद्यते ।

---

१ ग. प्रत्युर्द्ध्वरोभवन् स्त° ; ज. प्रत्युद्धरोभवन् स्त° ; च. प्रत्युद्धरोभूवन् स्त° ध्द्वं रोरु. २ क. ख. ग. ज. स्तनयित्नुशब्दं. ३ ग. ज. 'वनानि' नास्ति; च. वना॰ विक्षि° घनानि. ४ ग. ज. तत्पक्षे. ५ क. ख. घ. झ. ट. ठ. ड. °शब्दश्च तस्मिन्. ६ घ. ट. ठ. ड. 'प्रागञ्चितेन' नास्ति. ७ ग. ज. कर्मण्यभिमुख्येन; च. कर्मण्या-(ण्य) भिमुख्येन° खे. ८ घ. झ. ट. ठ. ड. यद्यापि त्वं कर्म° ; च. यदद्यत्वेऽपि° द्यापि त्वं. ९ क. ख. घ. झ. ट. ठ. ड. इत्यर्थः. १० ग. ज. मृदूभा°. ११ क. ख. घ. झ. ट. अतो; च. यतो° अ. १२ ग. ज. संस्तब्धार्थ° ; घ. संस्तब्धार्थ° स्तंभा. १३ ग. ज. ततो निनयेति निग° १४ क. ख. च. वीडिते ; ग. ज. व्रीडिते; घ. झ. वीळिते°. १५ ग. ज. स्फुटतर°. १६ ग. व्रीडयतिश्च व्रीळय° ; ज. व्रीडय°. १७ ग. °पद्यते । ६७। तद्दे°.

'तद्देवानां देवतमाय कर्त्वमश्रथ्नन्दृळ्हाव्रदन्त वीळिता । उद्गा आजदभिनद्ब्रह्मणा वलमगूहत्तमो व्यचक्षयत्स्वः ' [ऋ० सं० २ । २४ । ३] ॥

अस्मिन्निगमे व्रन्दतेः स्पष्टतरोऽर्थः

गृत्समदस्यार्षम् । जगती । ब्राह्मणस्पत्ये लिङ्गतो बार्हस्पत्येऽपि सूक्ते । तत्कर्त्वं तत्कर्म देवानां देवतमाय देवतमस्य बृहस्पतेर्येत् अश्रथ्नन् येत् श्लथान्यभवन् दृळ्हा दृढान्यपि सन्ति मेघवृन्दानि । किंच । अव्रदन्त मृदून्यभवन् । कानि पुनस्तानि मृदून्यभवन्निति । उच्यते । वीळिता यानि वीळितानि व्रीडितानि संनद्धानि दर्पितान्यसुरकुलान्यन्यानि वा कानिचित्तानि मृदून्यभवन्निति । किंच । उद्गाः आजत् उदाजद्गाः उदगमयदपः । अभिनद्वलं मेघं ब्रह्मणा स्तूयमानः । किंच । अगूहत् अनाशयत्तमो वैद्युतात्मना । किंच । व्यचक्षयत् व्यदर्शयत् स्वः स्वर् आदित्यमव्यवधानकरणेन नभसः । एवमत्र 'अव्रदन्त वीळिता' इति व्रन्दतेर्वीळयतिना सह प्रयोगाद् व्रीडतेरर्थवैपरीत्येन व्रन्दतेर्मृदुभावार्थत्वमुपपद्यते । व्रीडयतेस्तु व्रन्दिना सह प्रयोगोऽन्यत्र कचिद् द्रष्टव्यः ।

'निष्षपी' (५९) इत्यनवगतम् । 'विनिर्गतपसाः' इति शब्दसमाधिः । 'स्त्रीकामः' पुंश्चलोऽभिधेयः । स हि नित्यं निर्गतशेपः एव भवति । 'पसः सपतेः' स्पृशत्यर्थे वर्तमानस्य शेपः । तेन हि स्त्री स्पृश्यते । 'प्रति

---

१ ग. ज. °तमाय । गृत्स°; घ. ट. °तमाय कर्त्व० चक्षयत्स्वः. २ क. ख. च. दृढाव्रदन्त व्रीडिता°. ३ क. ख. ग. ज. 'ब्राह्मणस्पत्ये लिङ्गतो' 'अपि' नास्ति; च. ‹बार्हस्पत्ये (त्येऽपि) सूक्ते° ब्राह्मणस्पत्ये लिङ्गतो. ४ ग. ज. देवतमस्पतेः यदश्र°; च. °तेः यदश्र° य; ट. बृहस्पतेः य° ब्रह्मण; ठ. ड. तमस्य ब्रह्मणा यद्°. ५ क. ख. घ. झ. ट. ठ. ड. 'यत्' नास्ति. ६ क. ख. घ. झ. ट. दृढा; ग. ज. 'दृळहा' नास्ति; च. °वन्‹दृढान्य° दृढा. ७ क. ख. च. वीडिता; घ. झ. वीलिता. ८ ग. च. ज. घ. झ. वीलिता°. ९ क. ख. घ. झ. ट. ठ. ड. °वा यानि कानि°. १० क. ख. ग. ज. °नद्वलं; च. °षद्वलं° न. ११ घ. झ. ट. ठ. ड. 'स्वः' सकृदेव. १२ क. ख. च. वीडिता; ग. ज. व्रीडिता; घ. झ. वीलिता. १३ क. ख. ग. ज. व्रीडय°; च. वीडय°; घ. झ. व्रीलय°; ट. व्रीळय°. १४ घ. झ. ट. 'व्रीडयते°. १५ च. ज. घ. झ. ड. निष्पपी°. १६ ग. ज. °शेष एव°; च. शेषो भ°. प एव. १७ क. ख. ग. स्पशः; ठ. पसः पसतेः स्पृ°; च. स्प (प) सः स्पर्श (पस) तेः. १८ ग. ज. शेषः; च. शेषः° प. १९ ग. °ते । ६८ । प्रति°.

यस्या नीथादर्शि दस्योरोको नाच्छा सदनं जानती गात् । अध स्मा नो मघवञ्चर्कृतादिन्मा नो मघेव निष्षपी परा दाः ॥

'निष्षपी' इत्यस्य [ऋ० सं० १ । १०४ । ५] ॥ कुत्सस्यार्षम् । ऐन्द्री । हे भगवन्निन्द्र यस्मात् प्रत्यदर्शि प्रतिपश्यतीव स्या सा नीथा स्तुतिः । 'नीथाविदो जरितारः' [ऋ० सं० ३। १२ । ५] इत्येतस्मान्निगमात्स्तुतिर्नीथेति प्रतीयते । दस्योः शत्रोर्दासयितुस्तव ओको न ओक इव निवासमिव अच्छ आभिमुख्येन हृदयमनुप्रविश्य सदनं स्थानं यत्र तया नीथया स्तुत्या सर्तव्यम् । यस्तवाभिमतो गुणोऽनेन यदि नाम मामेष स्तोता स्तुयात्साधु स्यादिति तमर्थमनुप्रविश्यैव भवतो हृद्गतं तेनार्थेनात्मानमभिसंबन्धयित्वैतन्मम सदनमित्येवं जानतीव तदेव आगात् नित्यकालमेवागच्छति । यत एवमतः स्तुत्युदीरयितारो वयं भवतः । अथ एतस्मात्कारणाद्वयं ब्रूमः । हे मघवन् चर्कृतात्पुनःपुनः क्रियमाणादेतस्मात्कर्मण आत्मस्तुत्याश्रयभूतान्मा नो मास्मान् परा दाः पराङ्मुखान् दधीथाः । उपनामय तत्कर्मसाधनानि । कथं च पुनर्मा परा दाः । मघेव निष्षपी । स यथा धनानि नित्यं निर्गतशेपो विनाशयत्येवमस्मांस्त्वं मावसादयिष्ठाः । धनभूतास्तव वयमतो रक्षस्वेत्यभिप्रायः । एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च धननामसंबन्धात् 'निष्षपी' विनिर्गतपसाः स्त्रीकाम इत्युपपद्यते ।

'तूर्णाशम्' (६०) इत्यनवगतम् । 'उदकं भवति' इत्यभिधेयवचनम् । तूर्णं हि क्षिप्रं तद्व्याप्नोति । तूर्णाशनमिति न्याय्यम् । अपठितं चैतदुदकना-

---

१ ग. ज. दस्योः । कुत्स°; च. ट. दस्योः० निष्षपी°. २ घ. च. झ. ठ. ड. निष्पपी. ३ क. ख. घ. झ. ट. ऐन्द्री । त्रिष्टुप् । हे°; च ऐन्द्री । हे° त्रिष्टुप्. ४ घ. झ. ट. ठ. ड. सत्तव्यं; च. सर्तव्यं° त्त. ५ क. ख. घ. झ. ट. ड. स्तूया°. ६ ग. ज. जानातीव; च. जानातीव° न. ७ ग. अगात; च. अगात्° आ. ८ क. ख. घ. झ. ट. ठ. ड. °दीरितारो°. ९ च. प्राङ्मु° परा. १० घ. झ. ट. ठ. ड. ददीथाः; च. दधीथाः° दी. ११ क. ख. घ. झ. ट. ठ. ड. °नानि । कथं च पुनः कर्मसाधनानि । कथं च पुनर्मा°; च. °नानि । कथं° कथं च पुनः कर्मसाधनानि. १२ ग. ज. घ. झ. निष्पपी; च. निष्पपी° ष्ष. १३ क. ख. घ. झ. ट. ठ. ड. नित्यविनिर्ग°; ग. ज. नित्यं निर्गतशेषो. १४ घ. झ. च. ज. निष्पपी. १५ क. ख. घ. झ. ट. ठ. ड. 'वि' नास्ति. १६ घ. ट. ठ. ड. तूर्णासन.

मस्तु तेनाप्रतीतार्थम्[1]। 'प्रति श्रुताय वो धृषत्तूर्णाशं न गिरेरधि। ह्वे सुशिप्रमूतये' [ऋ० सं० ८।३२।४]॥

'तूर्णाशम्' इत्यस्य मेधातिथेरार्षम्[3]। रात्रिपर्याये शस्यते। मैत्रावरुणस्य प्रथमे शस्त्रे विनियुक्ता [आश्व० श्रौ० ६।४]। हे ऋत्विग्यजमाना यन्मया प्रतिश्रुतमार्त्विज्यमुपगच्छताहमिन्द्रं स्तुतिभिराह्वयिष्यामीति तस्मै प्रतिश्रुताय युष्माकमुपाकरणार्थमेतस्मिन् कर्मणि धृषत् धृष्टं प्रगल्भं ह्वे आह्वये सुशिप्रं सुहनुं सुनासं च इन्द्रमहम् ऊतये तर्पणाय तर्पयामह इति। अथवा भवतामात्मनश्च रक्षणायेति स्यात्। कथं पुनराह्वयामि। तूर्णाशं न गिरेरधि। यथा तूर्णाशम् उदकं मेघस्योपरि वर्तमानमाह्वयन्ति वर्षार्थिनो जना एवमाह्वयामीति। एवमत्र गिरिसंबन्धात् 'तूर्णाशम्' उदकमित्युपपत्तिः।

'क्षुम्पम्' (६१) इत्यनवगतम्। 'अहिच्छत्रकं भवति' इत्यभिधेयवचनम्। यस्मात्तत्धृष्टमात्रं 'क्षुम्पते' चलति तस्मात् क्षुम्पं क्षोभणमिति न्याय्यम्॥ १६॥

कदा मर्तमराधसं पदा क्षुम्पमिव स्फुरत्। कदा नः शुश्रवद्गिर इन्द्रो अङ्ग [ऋ० सं० १।८४।८]॥ कदा मर्तमनाराधयन्तं पादेन क्षुम्पमिवावस्फुरिष्यति कदा नः श्रोष्यति च गिर इन्द्रो अङ्गाङ्गेति क्षिप्रनामाञ्चितमेवाङ्क्तिं भवति निचुम्पुणः सोमो निचान्तपृणो निचमनेन प्रीणाति॥ १७॥

---

१ ग. °र्थम्। ६१। प्रति.° २ ग. ज. धृषत्। मेधा; घ. ट. धृषत्० सीप्रमूतये. ३ क. ख. °रार्षम्। गायत्री। ऐन्द्री। रात्रि°; घ. झ. द. ठ. ड. °रार्षम्। बृहत्यैन्द्री। रात्रि°; च. °रार्ष-रात्रि° बृहत्यैन्द्री. ४ क. ख. घ. झ. ट. ठ. ड. वो युष्माकमुपकर°; च. °ताय (वो)युष्माकमुपाक° प. ५ घ. द. सुसीप्रसुह°. ६ क. ख. घ. झ. ट. ठ. ड. सुनसं चेन्द्र°; च. सुनासं च °न ७ क. ख. घ. झ. ट. ड. 'तर्पयामह इति' नास्ति; च. तर्पयामह इति. ८ च. अहिसत्रकं° छ. ६ च. सृष्ट° स्पृ. ९ घ. ट. क्षुभंते; ठ. ड. क्षुंभते. १० ग. ज. घ. द. क्षुम्पं. ११ क. ख. ४ (१६); ग. ७/१८; ठ. ड. °न्याय्यम्। इति निरुक्तटीकायां पञ्चमाध्याये षोडशः खण्डः; इतरेष्वङ्को नास्ति. १२ छ. °रफुरति; त. °स्फुरसि कदा° ति; द. स्फुरसि. १३ क. ख. छ. त. द. शृणोति. १४ क. ख. ५ (१७); छ. त. १९. द. ५.

'कदा मर्तमराधसम्' इति[1]। गोतमस्येयमार्षम्। उष्णिक्[2]। ऐन्द्री। तार्तीयसवनिकेषूक्थपर्यायेषु ब्राह्मणाच्छंसिनः शस्त्रे 'क्षुम्पम्' इत्यस्य विनियुक्ता [आश्व० श्रौ० ७।८]। कदा कस्मिन् काले मर्तं मनुष्यम् अना[3]राधयन्तं यस्तमिन्द्रं नाराधयति स्तुत्या हविषा च तं कदा[4] पादेन अवस्फुरत्[5] अवस्फुरिष्यति अभिहिंसिष्यति स इन्द्रः। 'स्फुरति[6] स्फुलति' इति वधकर्मसु पठितम् [निघ० २।१९]। किंच। कदा नः कदास्माकं परिचरमाणानां स्तुतिभिर्हविर्भिश्च शु[7]श्रवत् श्रोष्यति गिरः स इन्द्रः अङ्ग। क्षिप्रमित्यर्थः। कदास्माकं परिचरितॄणामिन्द्रः श्रोष्यति गिरः श्रुत्वा च समर्धयिष्यत्याशिषः। अनाराधयितॄं[8]श्च कदा पादेनाभिहनिष्यति। कदानाराधयित्राराधयित्रोर्विशेषं ज्ञास्यतीत्यभिप्रायः। स्वरूपेण तावदेषोऽस्य मन्त्रस्यार्थो मया लक्ष्यते। भाष्यं पुनरत्र 'लोकः पादेन क्षुम्पमिवावस्फु[9]रसि' इत्येवमधीते। तथाच 'कदा नः शृणोति गिरः' इति। तदेतत् 'क्षुम्पमिवावस्फु[10]रसि' 'शृणोति गिरः' इत्यनयोर्भाष्यवाक्ययोः पुरुषवैलक्षण्याद्दुर्योज्यो[11] मन्त्रार्थ इति। 'अवस्फुरसि' इति मध्यमपुरुषयोगः प्रत्यक्षकृतलक्षणाभिसंबन्धी मन्त्रस्य। 'कदा नः शृणोति गिर[12]ः इन्द्रः' इत्येतत्परोक्षकृतलक्षणम्[13]। एवमेतद्भाष्यं दुर्योज्यं यद्येष भाष्यस्य सम्यक्पाठः। अथ पुनरसम्यक्पाठस्ततः[14] सम्यक्पाठोऽत्रा[15]न्वेष्टव्यः। अहं तु लक्षये। यथैष मया मन्त्रो व्याख्यातः स एव सम्यक्पाठः स्यात् 'पादेन क्षुम्पमिवावस्फु[16]रिष्यति' 'श्रोष्यति च गिरः' इति। तथाहि मन्त्रार्थस्याविरोधो लक्ष्यते। सूक्तेऽपि चास्मिन् काश्चित्परोक्षकृता ऋचः काश्चित्प्रत्यक्षकृताः। अतोऽपि दुरवधारोऽस्य भाष्य-

---

१ क. ख. घ. झ. ट. °धसं० इन्द्रो अङ्ग। गोत°; ठ. ड. कदा मर्तमिति. २ च. उष्णिक्^तार्ती° ऐन्द्री. ३ क. ख. घ. झ. ट. ठ. ड. °ध्यं अराधसमनारा°; च. °ध्यं^अनारा° अराधसं. ४ क. ख. घ. झ. पदा; ट. पदा° क. ५ ग. ज. °वस्फुरत् स्फुरि°; च. °वस्फरत्^स्फरि° अव. ६ घ. ट. ठ. ड. स्फुरयति. ७ च. सुश्र°. ८ घ. झ. अनाराद्धृंश्च; ट. अनाराद्धृंश्च धयितॄं; ठ. ड. अनाराद्धृंश्च. ९ च. °वस्फर°; ठ. ड. °वस्फुरिष्यति. १० च. ज. °वस्फर°. ११ क. ख. घ. झ. ट. ठ. ड. दुर्योज्यो; च. दुर्योजो° ज्यो. १२ क. ख. घ. झ. ट. ठ. ड. °ति च गिर इत्ये°. १३ घ. झ. ठ. ठ. ड. लक्षणः; च. लक्षणम्°:. १४ क. ख. घ. झ. ट. ठ. ड. 'ततः' नास्ति; च. ततः. १५ क. ख. घ. झ. ट. ठ. ड. 'अत्र' नास्ति. १६ च. °वस्फरि°.

कारस्याभिप्रायः। अहिच्छत्रकं हि पादेन स्पृष्टमात्रं शीर्यते। तथात्रानाराधयितुर्विनाशोऽभीष्ट इति ‘क्षुम्प’ शब्देनाहिच्छत्र[1]कमभिधीयत इत्यु[2]पपद्यते।

‘निचुम्पुणः’ (६२) इत्यनवगतमनेकार्थम्[3]। ‘निचुम्पुणः सोमो भवति’ इत्यभिधेयवचनम्। ‘निचान्तपृणः’ इति शब्दसमाधिः। स हि निचान्तो भक्षितः ‘प्रीणाति’॥ १७[4]॥

पत्नीवन्तः सुता इम उशन्तो यन्ति वीतये। अपां जग्मिर्निचुम्पुणः (ऋ० सं० ८। ९३। २२)॥ पत्नीवन्तः सुता इमेऽद्भिः सोमाः कामयमाना यन्ति वीतये पानायापां गन्ता निचुम्पुणः समुद्रोऽपि निचुम्पुण उच्यते निचमनेन पूर्यतेऽवभृथोऽपि निचुम्पुण उच्यते नीचैरस्मिन् क्वणन्ति नीचैर्दधतीति वा। अवभृथ निचुम्पुणेत्यपि निगमो भवति। निचुम्पुण निचुङ्कुणेति च। पदिर्गन्तुर्भवति यत्पद्यते॥ १८[5]॥

‘पत्नीवन्तः सुता इमे’ इति[6]। सु[7]कक्षो नाम आङ्गिरसस्तस्येयमार्षम्[8]। इत्यस्य रात्रिपर्यायेषु मध्यमे पर्याये होतुः शस्त्रे विनियुक्ता ‘निचुम्पुणः’ (आश्व० श्रौ० ६। ४)। पत्नीवन्तः पत्नीभिरद्भिस्तद्वन्तः सुता अभिषुता इमे सोमा उशन्तः कामयमाना इव यन्ति देवान् प्रति वीतये[9]। पानार्थं[10] कामयमानाः। कथं नामास्मान् देवाः पिबेयुरित्येत[11]मर्थं कामयमाना इव यन्ति। किमेतदेव। नेत्युच्यते। पुनः पुनरेष निचुम्पुणः सोमो हि[12] अपां वीर्येण सहितस्तासु तासु क्रियासु प्रदीयमानोऽस्माभिर्देवान् प्रति

---

१ क. ख. घ. झ. ट. ठ. ड. °छत्रमभि°; च °छत्रकंम°. २ क. ख. घ. झ. ट. ठ. ड. ‘इत्युपपद्यते’ नास्ति; च. इत्युपपद्यते. ३ क. ख. घ. झ. ट. ठ. ड. °कार्थं च. ४ क. ख. ५ (१७); ग. ३१; ठ. ड. °प्रीणाति। इति निरुक्तटीकायां पञ्चमाध्याये सप्तदशः खण्डः. ५ क. ख. ६ (१८); छ. त. २१; द. ६. ६ क. ख. घ. झ. ट. °इमे०० निचुम्पुणः; ग. ज. ‘इति’ नास्ति; ठ. ड. पत्नीवन्त इति. ७ घ. झ. ठ. ड. श्रुतकक्षो; ट. श्रुतकक्षो° सु. ८ क. ख. घ. झ. ट. ठ. ड. °मार्षम्। गायत्री। ऐन्द्री। रा°; च. °मार्षम्। रां° गायत्री ऐन्द्री. ९ घ. झ. ट. ठ. ड. पीतये. १० घ. झ. ट. ठ. ड. पानाय यन्ति कथं°; च. पानाय कामयमानाः° यन्ति; ग. ज. ‘पानाय’ नास्ति. ११ क. ख. घ. झ. ट. ठ. ड. °त्येवम°. १२ क. ख. घ. झ. ट. ठ. ड. ‘हि’ नास्ति; च. °हि°.

जग्मि: एव भवति गन्तैव भविष्यति । एवमिह सोमाधिकारात् 'निचुम्पुण'-शब्देन सोम उच्यत इत्युपपद्यते ।

'समुद्रोऽपि निचुम्पुण उच्यते' । स हि 'निचमनेन' उदकेन 'पूर्यते' । उदकं हि निचम्यत इति निचमनम् । ऋग्योऽत्र निगम: ।

'अवभृथोऽपि निचुम्पुण उच्यते' । नीचैरस्मिन् 'क्वणन्ति' शब्दं कुर्वन्ति । तत्र ह्युक्तम् 'अवभृथेष्टौ उपांश्वेव चरन्ति' इति निचुम्पुण: । अथ 'वा नीचै:' अस्मिन्यज्ञपात्राणि 'दधतीति' निचुम्पुण: । तानि हि तत्राप्सु निधीयन्ते । 'अवभृथ निचुम्पुण निचेरुरसि निचुम्पुणो गृहे गृहेऽव नो देवैर्देवकृतमेनो यक्ष्यव मर्तैर्मर्त्यकृतं चिकित्वानुरोरा नो देव रिषस्पाहि' । अनेनाभिसाद्याप्सु प्रह्रियन्ते सोमपात्राणि ।

अवभृथार्थे निचुम्पुणशब्द:

हे अवभृथदेवते वरुण नीचक्वणन निचेरुरसि नीचैश्चरणशीलोऽसि । निचुम्पुणो नीचक्वणनो भूत्वा गृहे गृहे यज्ञगृहेऽवतिष्ठसे । स त्वमेवंगुणविशिष्ट: अव नो देवैर्देवकृतमेनो यक्षि । अवयक्षि नो देवै: सहितो देवकृतं देवनिमित्तं देवापराधजमेन: । अवयक्षि मर्त्यै: सहितो मर्त्यकृतं मनुष्यकृतमेन: । उरोर्महतोऽपि देवरोषणादस्मान्पाहि । एवमत्र 'निचुम्पुण' शब्देनावभृथ उच्यते । निचुङ्कुणोऽप्यनेनैव व्याख्यात: ।

'पदि:' (६३) इत्यनवगतम् । 'गन्तु:' एष निर्देश: कृतो 'भवति' । 'यत्पद्यते' यस्मादसौ पद्यते । गच्छतीत्यर्थ: । अभिधेय: पक्षी । स हि नित्यकालमेव पतितो भवति ॥ १८ ॥

सुगुरसत्सुहिरण्य: स्वश्वो बृहदस्मै वय इन्द्रो दधाति ।
यस्त्वायन्तं वसुना प्रातरित्वो मुक्षीजयेव पदिमुत्सिनाति (ऋ०

---

१ ग. ज. निवस्यत इ°; च. निवस्यत° चम्य. २ ग. ज. °स्मिन् कस्मिन् क्व°. ३ ग. ज. भृष्टौ ध्वानेन भवतीति नि°; च. °भृथेष्टौ उपांश्वेव चरं ध्वानेतीति नि°. ४ ग. च. ज. घ. झ. ट. ठ. ड. °रसीत्यनेन°. ५ क. ख. घ. झ. ट. ठ. ड. अवभृथ अवभृथदे°; च. हे अव° अवभृथ. ६ क. ख. घ. झ. ट. ठ. ड. पुरुराव्णो मह°; च. उरोर्म° पुरुराव्णो म. ७ क. ख. घ. झ. ट. ठ. ड. °दस्मात्पा°. ८ च. यस्मायसौ° द. ९ क. ख. ६ (१८); ग. ७२/२०; ठ. ड. °भवति । इति नैरुक्तटीकायां पञ्चमाध्याये अष्टादश: खण्ड:; इतरेष्वङ्को नास्ति. ५५ ३१

सं० १ । १२५ । २)॥ सुगुर्भवति सुहिरण्यः स्वश्वो महृ-द्वास्मै वय इन्द्रो दधाति यस्त्वायन्तमन्नेन प्रातरागामिन्नतिथे[1] । मुक्षीजयेव पदिमुत्सिनाति । कुमारो मुक्षीजा मोचनाच्च सयनाच्च ततनाच्च पादुः[2] पद्यतेः । आविः स्वः कृणुते गूहते बुसं स पादुरस्य निर्णिजो न मुच्यते । आविः[3] कुरुते भासमादित्यो गूहते बुसं बुसमित्युदकनाम ब्रवीतेः शब्दकर्मणो भ्रंसतेर्वा[4] यद्वर्षन्पातयत्युदकं रश्मिभिस्तत्प्रत्यादत्ते ॥ १९ ॥[5]

इति पञ्चमाध्यायस्य तृतीयः पादः[6] ।

सुगुरसत्सुहिरण्य[7] इति । कक्षीवत आर्षम्[8] । स एव सुगुर्भवति शोभनगुर्भवति[9] । स एव च[10] सुहिरण्यो भवति । स एव च[11] स्वश्वो भवति । बृहच्च महच्च अस्मै वयः अन्नम् इन्द्रो दधाति ददाति । आह । यस्य किमिति । उच्यते । यस्त्वा यन्तं वसुना प्रातरित्वः । प्रातरागामिन्नतिथे । स हि प्रातः-प्रातरन्यानि गृहाण्यभ्येति । तेनैवमामन्त्र्यते ‘ प्रातरित्वः ’ इति । यन्तम्[12] अध्वानं वसुना अन्नेन क्षुधा बिभ्रंस्यमानं[13] प्राणं मुक्षीजयेव पाश्ययेव कुमारः पदिं पतितारं पक्षिणम् उत्सिनाति उद्गम्य[14] सिनाति बध्नाति । प्राणांस्त्वयि संनियच्छतीत्यर्थः । यथा ह्यतिथिरध्वगो भवति स एवं[15] क्षुधि-

‘ पदिः इत्यस्य ’

---

१ छ. ‘तिथेर्मुक्षी°; त. °तिथेर्मुक्षी°: । मु. २ द. पादुर्ण्वद्य°: प. ३ त. द. आविष्कुरु°. ४ छ. त. द. ध. भ्रंशते°. ५ क. ख. ७ (१९); त. २१; द. ७. ६ ङ. थ. ध. ‘इति० पादः’ नास्ति; छ. तृतीयः पादः; त. पञ्चमाध्याये तृती°; द. इति नैरुक्तस्य पञ्च°. ७ घ. झ. ट. °रण्यः०० पदिमुत्सिनाति । कक्षी°. ८ घ. झ. ट. ठ. ड. °र्षम् । त्रिष्टुप् । स्वनयस्य दानस्तुतिः । स°; च. र्षं॰ स° त्रिष्टुप् स्वनयस्य दानस्तुतिः. ९ क. ख. घ. झ. ट. ठ. ड. ‘ भवति ’ नास्ति; च. भवति. १० क. ख. घ. झ. ट. ठ. ड. ‘ च ’ नास्ति. ११ क. ख. घ. झ. ट. ठ. ड. ‘ च ’ नास्ति; च. च. १२ क. ख. घ. झ. ट. ठ. ड. आयन्तम्°; च. ॰यन्तम्° आ. १३ क. ख. घ. झ. ट. ठ. ड. क्षुदाविप्रशमनेन प्राणरक्षणेन मुक्षी°; ग. ज. क्षुधा बिभ्रण्यमा°; च. क्षुधा बिभ्रंस्यमानं प्राणं मुक्षी° विप्रशमनेन प्राणरक्षणेन. १४ घ. ट. उद्गमृतिनातिबध्ना°. १५ क. ख. घ. झ. ट. ठ. ड. पतन्; च. एवं° पतन्.

तोऽन्नसङ्गेन[1] कस्यचिद्गृहिणो गृहेऽवातिष्ठत एवमेतत्स्यात् । एवमत्र पक्षी ‘पदि’ शब्देनोच्यते । स ह्यभिक्रममाणः पाशया बध्यत इत्युपपद्यते[2] ।

‘मुक्षीजा मोचनाच्च’ । सा ह्येवं[3] मुच्यते पक्षिणः पादे । ‘सयनाच्च’ । सीयते बध्यते[4] हि तया पक्षी । ‘ततनाच्च’ । सा हि पक्षिणो बन्धार्थं[5] तन्यते । एताभ्यः क्रियाभ्यो यथासंभवं मुक्षीजा इत्येतदभिधानं भवति ।

‘पादुः’ (६४) इत्यनवगतम् । ‘पद्यतेः’ इत्यर्थप्रतीतिः[6] । ‘सा ते जीवातुरुत तस्य विद्धि[7] मा स्मैतादृगप गूहः

‘पादुः’ इत्यस्य समर्ये । आविः स्वः कृणुते गूहते बुसं स पादुरस्य निर्णिजो न मुच्यते’ (ऋ० सं० १० । २७ । २४)[8] ॥ वसुक्रस्यैन्द्रस्यार्षम्[9] । महाव्रते मरुत्वतीये शस्त्रे[10] शस्यते (ऐ० आ० ५ । १ । १) । हे यजमान सा ते तव जीवातुः जीविका यास्य भगवतः सूर्यस्य तापप्रकाशवृष्ट्युदयास्तमयरसादानादिलक्षणा[11] प्रवृत्तिः । अनेन सौर्येण कर्मणा सर्वभूतानि त्वं च जीवसि[12] इत्यभिप्रायः । यत एवमथैतस्मात्कारणाद्ब्रवीमि । तस्य सूर्यस्य विद्धि विजानीहि यस्त्वया स्तुतिहविर्दानादिलक्षणैः[13] प्रत्युपकारः कर्तव्यः । मा त्वम् अस्मै सूर्याय ऐतादृक्[14] तादृशमुपकारम् अपगूहः[15] मा संवृतं कार्षीः । प्रत्युपकारायास्मै त्वमभ्युद्यच्छस्वेत्यभिप्रायः । अपि च समर्ये संग्रामे एतस्मिंस्ते मृत्युना सह वर्तमाने सर्वभूतानाम् । कोऽद्य वा म्रियेथाः । को हि तद्वेद कदा[16] कस्य मृत्युरिति । स त्वं तत्कृतानि शोभनानि कार्याणि मन्यमानः शीघ्रं प्रत्युपकुरुष्वास्मै सूर्यायेत्यभिप्रायः । आह । का पुनः सूर्यस्य प्रवृत्तिर्या जीवातु-

---

१ क. ख. घ. झ. ट. ठ. ड. °संयोगेन; च. °संगे° यो. २ क. ख. घ. झ. ट. द्यति°. ३ क. ख. घ. झ. ट. ह्यसु°; च. ह्येवम् ‘ह्य; ठ. ड. °सा हि पक्षिणो बधार्थं तन्य°. ४ घ. बध्यते । बध्यते हि°; च. बध्यते° हि° बध्यते; झ. बध्यते । बध्यते हि°; ट. बध्यते । बध्यते हि°. ५ क. ख. घ. झ. बधार्थं°; ट. बंधार्थं° सं. ६ ग. °तीतिः ।७३। सा°. ७ ग. ज. विद्धि । वसु°; घ. ट. विद्धि० न मुच्यते. ८ च. °च्यते । इति वसु°. ९ क. ख. घ. झ. ट. ठ. ड. कस्येयमार्षं । ऐन्द्री । त्रिष्टुप् । महा°; ग. °क्रस्येन्द्र°; च. °क्रस्येन्द्रस्यार्षं । ० महा° ऐन्द्री । त्रिष्टुप्. १० क. ख. घ. झ. ट. ठ. ड. ‘शस्त्रे’ नास्ति. ११ च. °वृष्ट्युद° इयु. १२ क. ख. घ. झ. ट. ठ. ड. जीवसीत्य°; च. जीवसि इ° सि. १३ ग. ज. °लक्षणं. १४ क. ख. घ. झ. ट. ठ. ड. एतादृक् एता°; च. तौ (एता) दृक् तौ (एता). १५ ग. ज. °कारं मागूहः; च. °कारं मागूहः° र. १६ क. ख. घ. झ. ट. ठ. ड. कस्य कदा. च. कदा कस्य.

रिति । आविः स्वः कृणुते गूहते बुसम् । आविः[1]कुरुते प्रकाशीकरोति स्वभासा । सर्वमिदमुपभासितं व्यवहाराय कल्पते । स्वः आदित्यः गूहते संवृणोति रश्मिभिः बुसमुदकम् । किंच । स पादुः तत्पदनं तद्गमनमवभासनेन[2] च रसादानादिकर्तुः अस्य सूर्यस्य निर्णिजः[3] उपनिर्णेजयितुः । तमःपङ्कदिग्धानि हि[4] रूपाणि स्वेन प्रकाशोदकेन धौतानीव करोतीति निर्णिक् सूर्यः । तस्य निर्णिजो[5] न मुच्यते[6] । नोपरमते[7] इत्यर्थः । यत एवमयमद्य च श्वश्चोपकारे प्रवृत्तोऽतः प्रत्युपकुरुष्वास्मा इत्यभिप्रायः । एवमत्र शब्दार्थोपपत्तेः ' पादुः पदनम् ' इत्युपपद्यते । ' बुसमित्युदकनाम ब्रवीतेः ' शब्दार्थस्य । तद्धि शब्दवद्भवति । ' भ्रंसतेर्वा ' । तद्धि भ्रस्यते मेघात् । ' यद्वर्षन्पातयत्युदकम् ' आदित्यः 'तद्रश्मिभिः प्रत्यादत्ते ' इति समासतो भाष्यकारेणायमस्यार्धर्चस्यार्थ उक्तः ॥ १९[8] ॥

दशमस्या[9]ध्यायस्य तृतीयः पादः समाप्तः ।

वृकश्चन्द्रमा भवति विवृतज्योतिष्को वा विकृतज्योतिष्को वा विक्रान्तज्योतिष्को वा ॥२०[10]॥

' वृकः ' (६५) इत्यनवगतमनेकार्थं च । ' वृकः[11] ' तावत् ' चन्द्रमा भवति ' । स हि ' विवृतज्योतिष्कः ' प्रकाश[12]ज्योतिष्को भवति । तस्मात् वृकः । अथ ' वा विकृतज्योतिष्कः ' इति वृकः । तद्धि तस्य विकृतं ज्योतिः [13]शीतत्वात् इतराण्युष्णानि ज्योतींषि सूर्यादीन्यपेक्ष्य । अथ ' वा

---

१ क. ख. व. झ. ट. आविष्कु॰. २ च. तद्गमन॰. ३ ग. ज. ॰निर्णिज॰. ४ क. ख. घ. झ. ट. ठ. ड. ॰ग्धानि स्वरूपा॰; च. हि॰ स्व. ५ च. निर्निजो. ६ व. झ. ट. ठ. ड. मुच्यते । अयं नकारो निषेधार्थीयः । लोकानामुपकारार्थं गमनं न मुच्यते । नोप॰; च. मुच्यते । ॰नोप॰ अथं न ०००० न मुच्यते. ७ क. ख. घ. झ. ट. ठ. ड. ॰रमतीत्यर्थः; च. ॰रमते इ॰ ति. ८ क. ख. ७ (१९); ग. २१; इतरेष्वङ्को नास्ति. ९ क. ख. इति निरुक्तवृत्तौ दश॰; व. झ. ट. दुर्गवृत्तौ दशमस्य तृतीयः पादः; ठ. ड. इति दशमाध्यायस्य तृतीयः पादः । इति निरुक्तटीकायां पञ्चमाध्याये एकोनविंशतिः खण्डः. १० क. ख. १ (२०); छ. त. २२; द १. ११ ठ. ड. वृकश्चन्द्रमा भवतीति । वृकः. १२ क. ख. व. झ. ट. प्रकाशितज्यो॰. १३ ग. ज. सीत॰; च. सीत॰ शी.

विक्रान्तज्योतिष्कः' वृकः। तस्य हि विक्रान्तं ज्योतिरितरेभ्यो ग्रहनक्षत्रतारकादिभ्यो ज्योतिर्भ्यः सकाशात्। ऐते[1] शब्दसमाधयः ॥ २०[2] ॥

अरुणो मासकृद्वृकः पथा यन्तं ददर्श हि। उज्जिहीते निचाय्या तष्टेव पृष्ठ्यामयी वित्तं मे अस्य रोदसी (ऋ० सं० १।१०५।१८)॥ अरुण आरोचनो मासकृन्मासानां चार्धमासानां च कर्ता भवति चन्द्रमा वृकः[8] पथा यन्तं ददर्श नक्षत्रगणमभिजिहीते निचाय्य येन येन योक्ष्यमाणो भवति चन्द्रमास्तक्ष्णुवन्निव पृष्ठरोगी जानीतं मेऽस्य द्यावापृथिव्यावित्यादित्योऽपि वृक उच्यते यदावृङ्क्ते[3]। अजोहवीदश्विना वर्त्तिका वामास्नो यत्सीममुञ्चतं वृकस्य। आह्वयदुषा[4] अश्विनावादित्येनाभिग्रस्ता तामश्विनौ प्रमुमुचतुरित्याख्यानं श्वापि वृक उच्यते विकर्तनात्। वृकश्चिदस्य वारण उरामथिः। उरणमथिः। उरण ऊर्णावान् भवत्यूर्णा[5] पुनर्वृणोतेरूर्णोतेर्वा वृद्धवाशिन्यपि[6] वृक्युच्यते। शतं मेषान्वृक्ये चक्षदानमृज्राश्वं तं पितान्धं चकारेत्यपि निगमो भवति जोषवाकमित्यविज्ञातनामधेयं[7] जोषयितव्यं भवति ॥ २१ ॥

'अरुणो मासकृद्वृकः' इति। त्रितस्येयमाप्त्यस्य कूपे पतितस्य कुत्सस्य वा[9]र्षम्। पङ्क्ति[10]ः। अरुणः आरोचनः आभिमुख्येन सर्वस्य जगतो रोचयिता स्वया ज्योत्स्नया 'मासकृन्मासानामर्धमासानां च कर्ता'। मासशब्दसंबन्धादर्धमासशब्दो[11]ऽध्याहृतस्तानपि ह्यसौ निर्मिमीत इति। चन्द्रमा

'वृकः' इत्यस्य

---

१ घ. झ. ट. ठ. ड. एताः; च. एते° ताः २ क. ख. १ (२०); ग. ७४/२२; ठ. ड. °धयः। इति निरुक्तटीकायां पञ्चमाध्याये विंशतिः खण्डः; इतरेष्वङ्को नास्ति. ३ क. ख. द. °वृङ्क्ते। २। अजो°; छ. त. °वृङ्क्ते। २३। अजो°. ४ छ. ऑह्व° अ; त. द. अव्ह°. ५ त. द. °त्यूर्णाः पु°. ६ ध. °वासिन्य°. ७ क. ख. ३ (२१); छ. त. २४; द. ३. ८ घ. झ. ट. °द्वृकः ००० रोदसी। त्रि°. ९ ग. ज. वा पङ्क्तिरार्षम्। अरु°; च. वा पङ्क्तिरार्षम्। अरु°. १० क. ख. घ. झ. ट. ठ. ड. पङ्क्तिः। वैश्वदेवी। अरु°. ११ घ. झ. ट. °शब्दोऽन्वाख्या°; च. शब्दोऽन्वाख्या° त्रा.

वृकः । आह । किं करोतीति । उच्यते । पथा यन्तं ददर्श हि । नक्षत्रमण्डलस्याधोऽवस्थितः पथा स्वेन मार्गेण यन्तं ददर्श पश्यति नक्षत्रगणम् । न मामधः कूपे पतितं पश्यति । यदि नाम पश्येत्कथंचिदवश्यमस्यास्त्रायेतापदो मामित्यभिप्रायः । किंच । उज्जिहीत निचाय्या तष्टेव पृष्ट्यामयी । यथा कश्चित्तष्टा तक्षा पृष्ठरोगी कंचिद्वृक्षं[1] तक्ष्णुवन् उच्छिन्दन्[2] स्यादयं योग्यो न वेत्यनेनोत्कीर्णो[3] भूत्वा निचाययति पश्यत्येवं चन्द्रमा अभ्युज्जिहीते येन[4] येन नक्षत्रेण योक्ष्यमाणो भवति । अमुना मयाद्य योक्तव्यमित्येवं निचाय्य दृष्ट्वा स्वेन दर्शनेन ततस्तदेवाभिजिहीते । तेनैव सहोदेतीत्यर्थः । एवमस्य येनार्थस्तमप्यादरेणोर्ध्वज्योत्स्नो[5] हि भूत्वा पश्यति । मया त्वस्यार्थो[6] नास्तीति मां न पश्यत्यधोऽपि वर्तमानम् । यत एवमतो ब्रवीमि । युवामपि तावत् हे रोदसी वित्तं विजानीतम् अस्यार्तिप्रलापस्य योऽर्थः । विदित्वा चोद्धरतं[7] मामस्मात्कूपादित्यभिप्रायः । एवमत्रारुणशब्दान्मासकृच्छब्दाच्च 'वृकश्चन्द्रमाः' । चन्द्रमःशब्दाच्च नक्षत्रगणोऽध्याहृतस्तथार्थोपपत्त्यविरोधात् । येषां तु शाखिनां 'मा सकृत्' इत्येतत्पदद्वयं भवति तेषां सकृन्मां ददर्श चन्द्रमाः । यदि पुनःपुनः पश्येदवश्यं मोचयेदस्या आपदः । पथा तु यन्ते नक्षत्रगणं पुनःपुनः पश्यति न मामित्येवमादि योज्यम् ।

'मा सकृत्' इति पदद्वये ऋचोऽर्थः

'आदित्योऽपि वृक उच्यते यदावृङ्क्ते' । यस्मादसौ तम आवृङ्क्ते तस्माद्वृकः[11] ।

---

१ घ. झ. ट. ठ. ड. कंचिद्वृक्षं. २ ग. ज. °छिन्दन्स्य (ग. स्प) देयं यो°; घ. ड. °छिन्दनास्यदेवयं यो°; झ. °छिदन् स्यरेछयं यो°; ठ. °छिन्दन् पर्णोद्वयं योग्यो°. ३ क. ख. घ. झ. ट. ड. °नोत्कटो भू°; ट. °नोत्कटो° र्णो; ग. ज. °नोत्करणो. ४ क. ख. घ. झ. ट. ठ. ड. 'येन' सकृदेव. ५ क. ख. घ. झ. ट. ठ. ड. °र्ध्वकायो हि°; ग. ज. °र्ध्वयायो हि°; च. र्ध्वज्योत्स्नो° कायो. ६ घ. झ. ट. ठ. ड. त्वस्यार्थो. ७ क. ख. ग. ज. मा. ८ क. ख. घ. झ. ठ. ठ. ड. अस्य त्रितस्यार्तिप्रला°; च. °अस्यार्तिप्र° त्रितस्यार्ति. ९ घ. झ. ट. ठ. ड. चाभ्युद्धरतं. १० घ. झ. ट. ठ. ड. किंतु यः पथानुयन्तं°. ११ क. ख. °वृकः । ५ । अजोह°; ग. °वृकः । ३३ । अजोह°.

'अजोहवीदश्विना वर्तिका वामास्नो यत्सीममुञ्चतं वृकस्य । वि जयुषा ययथुः सान्वद्रेर्जातं विष्वाचो अहतं विषेण' (ऋ० सं० १ । ११७ । १६)॥ कक्षीवत आर्षम् । प्रातरनुवाकाश्विनयोः शस्यते (आश्व० श्रौ० ४।१५)। अजोहवीत् आह्वयत् आहूतवती उषाः हे अश्विनौ युवां वर्तनशीला वर्तिका । कदा पुनराह्वयदिति । उच्यते । आस्नः आस्यादेनां यदा युवाममुञ्चतं वृकस्य आदित्यस्य । 'उषाः' किल 'आदित्येनाभिग्रस्ताश्विनौ' आहूतवती । तामश्विनौ प्रमोचितवन्तौ 'इत्याख्यानम्' एतस्मिन्नर्थे वेदयन्ते निदानविदो बह्वृचास्तदप्युपेक्षितव्यं मन्त्रार्थनिर्णयाय । एतच्च युवयोर्महाभाग्यम् । किंचान्यत् । वि जयुषा ययथुः सान्वद्रेः । विजयुषा विजयमिच्छन्तौ युवां ययथुः गच्छथः सानु समुच्छ्रितम् अद्रेः मेघस्य शिखरमारुह्य । किंच । युवामेव जातमुपद्रवं दुर्भिक्षाख्यं कृत्स्नस्य जगतो विश्वाचो विश्वगञ्चनौ सर्वतोगती भूत्वा मेघजालेनेदं सर्वमभिप्रच्छाद्य ततः अहतं हतवन्तौ स्थः विषेण । उदकेनेत्यर्थः। यथास्मिन् वृकशब्देनादित्य उच्यते तथाख्यानादुपेक्षितव्यम् ।

आदित्यार्थे वृकशब्दः

'श्वापि वृक उच्यते विकर्तनात्'। विविधमसौ कृन्तति तस्माद् वृकः ।

'वृकश्चिदस्य वारण उरामथिरा वयुनेषु भूषति । सेमं नः स्तोमं जुजुषाण आ गहीन्द्र प्र चित्रया धिया' (ऋ० सं० ८ । ६६ । ८)॥

श्वन्नर्थे वृकशब्दः

प्रगाथपुत्रस्य कलेरार्षम् । सतोबृहती । महाव्रते तृचाशीतिषु विनियुक्ता (ऐ० आ० ५ । २ । ४)। वृकश्चित् वृकोऽपि श्वा सारमेयः अस्य इन्द्रस्य विद्यत एव वारणो वारयिता शत्रूणाम् । किमुतान्यान्युपकरणानि । उरामथिः उरणमथिः उरान् मेषान् यो मथ्नाति स उरामथिः । स पुनरस्येन्द्रस्य आभूषति वयुनेषु प्रज्ञानेषु । यदैवासौ विजानीत आभूर्षत्वयं

---

१ ग. च. ज. °वामिति । कक्षी°; ध. झ. ट. °वां००अहतं विषेण. २ क. ख. घ. झ. ट. ठ. ड. आर्षम् । आश्विनी । त्रिष्टुप् । प्रात°; चं. आर्षं॰ प्रात° आश्विनी त्रिष्टुप्. ३ च. °योर्महा°. ४ ग. बृकः । ७६ । वृक°. ५ ग. ज. वारण इति । प्रगा°; घ. झ. ट. वारण उरामथिः०० चित्रया धिया. ६ घ. झ. ट. ठ. ड. °हती । ऐन्द्री । महा°; च. °हती । महा° ऐन्द्री. ७ च. ऊरान्° ऊर्णावतो. ८ ग. च. ज. भूषयत्व°.

शत्रूनिति तदैवासावाभूषति । यस्य चैवं[1] सर्वोपकरणसंपत्स[2] त्वं हे इन्द्र इमम् अस्माकं स्तोमम् उपश्रुत्य आगहि आगच्छ इमं यज्ञं प्रकर्षेण चित्रया चायनीयया धियौ[3] कमनीयया बुद्धया । सरमा हि देवशुनी श्रूयते । तत्पुत्रनप्तृभिश्च देवानां भवितव्यम् । तस्माच्छ्वापि वृक उच्यत इत्युपपद्यत इतरेषामारण्यकानां परिग्रहाभावात् । अस्य मन्त्रस्य पूर्वोऽर्धर्चः परोक्षकृतो वृकश्चिदस्येत्यस्मात्षष्ठीयोगात् । उत्तरैः[4] प्रत्यक्षकृतः ‘ आगहीन्द्र ’ इत्यस्मान्मध्यमपुरुषयोगात्संबोधनाच्च । देवता किल परोक्षा स्तूयमाना प्रत्यक्षीभवति । प्रत्यक्षापि च स्तूयमाना परोक्षीभवति । तदेतत्सर्वेष्वेवंलक्षणेषु मन्त्रेषूपेक्षितव्यम् ।

निगमप्रसक्तमुच्यते । ‘ उरण ऊर्णावान् ’ । ऊर्णया तद्वान्[5] । ‘ ऊर्णा पुनर्वृणोतेः ’ इति विग्रहप्रसक्तम् । ता अपि शीत[6]त्राणार्थं त्रियन्ते[7] । ‘ ऊर्णोतेर्वा ’ आच्छादनार्थस्य । ताभिराच्छन्न उरणो भवति ।

‘ वृद्धवाशिन्यपि[8] वृक्युच्यते ’ । यैषा वृद्धं वाशते[9] शिवा सापि वृक्युच्यते विकर्तनादेवैं[10] ।

वृद्धवाशिन्यर्थे वृक्याः प्रयोगः

‘ शतं मेषान्वृक्ये[11] चक्षदानमृज्राश्वं तं पितान्धं चकार । तस्मा अक्षी नासत्या विचक्ष आधत्तं दस्रा भिषजावनर्वन् ’ (ऋ० सं० १ । ११६ । १६) ॥

अजोहवीदित्यनया समानार्षेयम् । शतं मेषान् वृक्ये शिवायै वाशिते[12] सति परितुष्टः चक्षत् व्यादिष्टवान् दानम् । येयमेवं शोभनमभिप्रस्थितानामस्माकमर्थसिद्धये वाशते[13] तस्यै शतं मेषाणां दीयतामित्येवमाज्ञप्तवान्[14] ऋज्राश्वो नाम राजपुत्रः । तं च पुनरेवं व्यादिष्टवन्तमतिसाहसिकोऽयमिति पिता कुपितोऽभिशापेन अन्धं चकार ।

---

१ क. ख. घ. झ. ट. ठ. ड. तवैवं; च. चैवं° तवै. २ क. ख. घ. झ. ट. ठ. ड. °संपन्नस्त्वं हे इन्द्र स त्वं; च. संपत् (न्न) स्तवन् स त्वं हे इन्द्र ^इम° स त्वं. ३ क. ख. घ. झ. ट. ठ. ड. कमनीयया धिया. ४ क. ख. घ. झ. ट. ठ. ड. उतरस्तु; च. उतर ^प्रत्य° स्तु. ५ क. ख. घ. झ. ट. ठ. ड. तद्वान् भवति । ऊर्णा°; च. तद्वान् ^ऊर्णा° भवति. ६ च. सीत° शी. ७ क. ख. घ. झ. ट. ठ. विव्रियन्ते; च. °र्थं ^ व्रिय° त्रि. ८ ग. ज. °वासिन्य°; च. °वासिन्य° शि. ९ ग. ज. वासते; च. वासते° श. १० ग. °देव । ५७ । शतं°. ११ ग. ज. वृक्य इति; घ. झ. ट. वृक्ये च १० भिषजावनर्वन्. १२ ग. ज. वासिते. १३ ग. ज. वासते. १४ क. ख. घ. झ. ट. ठ. ड. °माज्ञापितवा°.

कृतवानित्यर्थः । तस्मा एवमन्धीभूताय पितुरभिशापेन अक्षी अक्षिणी नासत्यौ अश्विनौ देवौ विचक्षे विगतदर्शनाय आधत्तं[1] दस्रौ दर्शनीयावश्विनौ भिषजौ देवभिषजौ भयसादयितारौ । अनर्वन् चक्षुराधत्तम् अनाश्रितमन्यत्र क्वचित् । स्वप्रधानमित्यर्थः । एवमत्र मेषसंबन्धादाख्याने च तथार्थतोपपत्तिदर्शनात् 'वृद्धवाशिनी[2] वृक्युच्यते' इत्युपपद्यते ।

'जोषवाकम्[3]' (६६) इत्यनवगतम् । अविज्ञातनामधेयवचनम्[4] । 'जोषयितव्यं भवति' इति[6] शब्दसमाधिः । जोषयितव्यं ज्ञापयितव्यं परस्मै तद्भवत्यस्पष्टत्वात् ॥ २१ ॥

य इन्द्राग्नी सुतेषु वां स्तवत्तेष्वृतावृधा । जोषवाकं वदतः पज्रहोषिणा न देवा भसथश्चन (ऋ० सं० ६ । ५९ । ४) ॥

य इन्द्राग्नी सुतेषु वां सोमेषु स्तौति[7] तस्याश्नीथोऽथ योऽयं जोषवाकं वदति विजञ्जपः प्रार्जितहोषिणौ न देवौ तस्याश्नीथः कृत्तिः कृन्ततेर्यशो वान्नं[8] वा । महीव कृत्तिः शरणा त इन्द्र । सुमहत्त इन्द्र शरणमन्तरिक्षे[9] कृत्तिरिवेतीयमपीतरा कृत्तिरेतस्मादेव सूत्रमय्युपमार्थे[10] वा । कृत्तिवासाः[11] पिनाकहस्तोऽवततधन्वेत्यपि निगमो भवति । श्वघ्नी कितवो भवति स्वं हन्ति स्वं पुनराश्रितं[12] भवति । कृतं न श्वघ्नी वि चिनोति देवने । कृतमिव श्वघ्नी विचिनोति देवने कितवः किं तवास्तीति शब्दानुकृतिः कृतवान्[13]वाशीनामिकः सममिति परिग्रहार्थीयं सर्वनामानुदात्तम् ॥ २२ ॥

---

१ क. ख. घ. झ. ट. ठ. ड. °नाय धत्तं; च. °नायाधत्तं° य. २ ग. ज. °वासिनी; च. 'वासिनी° शि. ३ क. ख. घ. झ. ट. ठ. ड. जोष इत्यन°. ४ क. ख. घ. झ. ट. ठ. ड. °नामधेयमित्यभिधेयवचनम् ; च. नामधेय॰व° मित्यभिधेय. ५ क. ख. घ. झ. ट. ठ. ड. विज्ञाप°; ग. ज. 'ज्ञापयितव्यं' नास्ति; च. °तव्यं॰ ज्ञाप° वि. ६ क. ख. ३ (२२); ग. २४; ठ. ड. इति निरुक्तटीकायां पञ्चमाध्याये एकविंशतिः खण्डः; इतरेष्वङ्को नास्ति. ७ स्तौति तेष्वृतस्य वर्धयितारौ न तस्या° इति सायणगृहीतपाठः. ८ क. ख. छ. त. द. वा अन्नं. ९ छ. त. द. °न्तरिक्षं. १० क. ख. °मप्युप°; त. द. °मप्युप° ख्यु. ११ ड. थ. ध. कृत्तिं वसान आचर पिनाक बिभ्रदा गहीत्यपि°. १२ छं. त. °राशृतं; द. °राशृतं °शृ. १३ क. ख. ४ (२२); छ. त. २५; द. ४.

य इन्द्राग्नी सुतेषु वामिति । भरद्वाजस्येयमार्षम् । बृहती । हे इन्द्राग्नी यो यजमानः सुतेषु अभिषुतेषु सोमेषु युवां स्तवत् स्तौति तेषु तेषु कर्मसु ऋतावृधा सत्यवर्धयितारौ यज्ञवर्धयितारौ उदकवर्धयितारौ वा तस्य युवामश्नीथः । स युवयोर्बहुमत इत्यभिप्रायः । अथ पुनर्योऽयं जोषवाकम् अविज्ञातं किमपि उपांशु वदति विजंजपः केवलमुदकतीरेऽवस्थितोऽन्यत्र वा । जपनशील एव न कर्मकारीत्यभिप्रायः । तस्य जोषवाकं वदतः हे प्रार्जितहोषिणौ प्रभूतयागौ । 'यदिन्द्रश्चाग्निश्च भूयिष्ठभाजौ देवतानां तस्माद्ब्राह्मणश्च राजा च भूयिष्ठभाजौ मनुष्याणाम्' (मैत्रा० सं० ४ । ७ । ८) इति ह विज्ञायते । हे देवौ न भसथश्चन न कदाचिदपि तस्य हवींषि भक्षयथः । तेन युवयोर्नासौ बहुमत इत्यभिप्रायः । अत्र 'जोषवाकं वदतो न भसथः' इत्येतद् दृष्ट्वा 'यः सुतेषु सोमेषु स्तौति तस्य' भसथ इत्येतदध्याहृतं भाष्यकारेण । एवमत्र विजञ्जपस्य भक्षयितव्याभावाज्जपस्य चोपांशुस्वाभाव्यात् 'जोषवाक'-शब्दोऽविज्ञातनामधेयमित्युच्यते ।

'जोषवाकम्' इत्यस्य

'कृत्तिः' (६७) इत्यनवगतमनेकार्थं च । 'कृन्ततेः' इति धातुनिर्देशः । 'यशोऽन्नं वा' इत्यर्थवचनम् । कर्तनमिति न्याय्यम् । यशो हि द्विषतां मर्माणि कृन्तति । अन्नमप्यसम्यगुपयुक्तमायुरेव कृन्तति । 'तमु त्वा नूनमसुर प्रचेतसं राधो भागमिवेमहे । महीव कृत्तिः शरणा त इन्द्र प्र ते सुम्ना नो अश्नवन्' (ऋ० सं० ८ । ९० । ६) ॥ नृमेधसः प्रियमेधसश्चेयमार्षम् । चतुर्विंशादिषु सौत्रिकेष्वहःसु माध्यन्दिने ब्राह्मणाच्छंसिनः शस्त्रे स्तोत्रियानुरूपवर्गे विनियुक्ता । तमु त्वा हे असुर प्रज्ञावन् प्रचेतसं विवृद्धप्रज्ञानं

'कृत्तिः' इत्यस्य

---

१ क. ख. घ. झ. ट. वां० भसथश्चन भर°; ठ. ड. य इन्द्राग्नी इति. २ क. ख. ग. ज. 'तेषु' सकृदेव. ३ ग. ज. 'यज्ञवर्धयितारौ' नास्ति; च. यज्ञस्य व°. ४ ग. ज. विविजञ्जपः; च. विविंजञ्जपः. ५ ग. ज. प्रातर्जित°. ६ क. ख. घ. झ. ट. ठ. ड. °त्युपपद्यते. ७ ग. ज. द्विषमर्मा°. ८ ग. °ति । ७८ । तमु°. ९ ग. ज. प्रचेतसम् । नृमे°; घ. ट. प्र०सुम्ना मो अश्नवन्. १० च सुम्नानो अश्नवम्° न्वा. ११ क. ख. घ. झ. ट. ठ. ड. °मार्षम् । सतोबृहती । ऐन्द्री । चतु.° ११ च. सावित्रेष्व° त्रिके.

राधः धनं स्वमिव पित्र्यं भागम् उत्पन्नं[1] प्रणयित्वादीमहे याचामहे । तं नो[2] देहि । स्थिरशरीराणां तदेतदस्तु नः । किंच । महीव कृत्तिः महदिव यशो महद्वा अन्नं शरणा शरणं गृहं ते तव हे इन्द्र यत् अन्तरिक्षलोके तदहं प्राश्नवम्[3] । तदहं सोमं सुन्वानस्तस्याभिषवकर्मणो माहाभाग्येन[4] येन त्वत्सायुज्यमश्नुयां देहपातोत्तरकालम् । इह चामुत्र चेत्येवं[5] नः फलद्वयमस्तु त्वत्त इत्यभिप्रायः । यशो हि विस्तीर्णं भवति । तेन हि गृहस्योपमानमुपपद्यते । यदनुप्रविष्टानामशनापिपासे[6] न स्तस्तदहं तव गृहं प्राश्नुयामित्येवमन्त्रेणो-[7]पपद्यते[8] ।

'इयमपीतरा कृत्तिरेतस्मादेव' सूत्रमयी । कन्थेति या प्रसिद्धा साप्येतस्मादेव कृन्ततेः । सा हि वस्त्रावयवैः कृत्तैर्ग्रथिता भवति । 'उपमार्थे वा' । चर्मापि कृत्तिरित्युच्यते । तयेतरा सूत्रमय्युपमीयते विकर्तनसामान्यात् । कृत्तिरिव कृत्तिः कन्था । 'कृत्तिवासाः पिनाकहस्तोऽवततधन्वा' इति । व्याख्यातोऽयमर्थ[9]मे निगमः (निरु० ३ । ८) ।

'महीव कृत्तिः' इत्यत्र कृत्तिरुपमार्थे स्यात्

'श्वघ्नी' (६८) इत्यनवगतम् । 'कितवो भवति' इत्यभिधेयवचनम् । 'स्वं हन्ति' इति शब्दव्युत्पत्तिः । स्वैहा[10] इति न्याय्यम् । विग्रहप्रसक्तमुच्यते । 'स्वं पुनराश्रितं[11] भवति' तद्धि स्वामिनमाभिमुख्येन श्रितं[12] भवति स्वत्वेन[13] । 'कृतं न श्वघ्नी वि चिनोति[14] देवने संवर्गं यन्म-

'श्वघ्नी' इत्यस्य

१ घ. झ. ट. ठ. ड. °त्पन्नप्रण°; च. °पन्नं प्रण° ब. २ घ. झ. ट. तन्नो; ब °तंनो० तन्नो; ठ. ड. तेनो० ३ क. ख. घ. झ. ट. ठ. ड. ०श्नवम् (घ. झ. ट. ठ. ड. ०श्नवन्)। किंच। ते तव सुम्ना सुम्नानि त्वत्संबन्धीनि सुखानि । त्वद्भोग्यानीत्यर्थः। यद्वा सुम्नानि सुखसाधनान्यप्सरःप्रभृतीनि प्राश्नु (ठ.ड. प्राप्नु)यामहम् । तदहं०; ब ०श्नवं॰ तदहं० किंच००० प्राश्नुयामहम्. ४ च. महा°. ५ क. ख. ब. झ. ट. ठ. ड. चैतन्नः°. ६ ब. झ. ट. ठ. ड. °शनायापि°; ब. °शनाऽपे° था. ७ क. ख. घ. झ. ट. प्राश्नु°; च. वाश्नु° पा; ठ. ड. प्राप्नुया°. ८ घ. झ. ट. ठ. ड. °मन्त्रेणाप्युप°. ९ क. ख. ब. झ. ट. ठ. ड. °र्थमेऽध्याये नि°. १० ब. स्वैहा° स्व; ज. स्वाहा. ११ ग. ज. °राशृतं; च. °राश्रितं° श्रि. १२ ग. ज. शृतं. १३ ग. °न । ८० । कृतं°. १४ ग. ज. °नोतीति । कृष्ण°; ब. ट. °नोति देवने० नोत नूतनः.

घवा सूर्यं जयत् । न तत्ते अन्यो अनु वीर्यं शकन्न पुराणो मघवन्नोत नूतनः ’ (ऋ० सं० १० । ४३ । ५] ॥ कृष्णस्याङ्गिरसस्येयमार्षम्[१] । ऐन्द्री । जगती । तार्त्तीयसवनिके[२] विनियुक्ता (आश्व० श्रौ० ६ । १) । उक्थपर्याये ब्राह्मणाच्छंसिनः शस्त्रे[३] (आश्व० श्रौ० ८ । ३) । यथा[४] कृतादीनां दायानां मध्ये कितवः कृतं विचिनोति देवने आस्फारे[५]ऽपि नामात्र कृतं स्यात्ततो[६] जयेयमहमित्येवं मघवा इन्द्रः संवर्गम् उदकं[७]संवर्जयितारमन्तरिक्षे बहूनां मेघानां मध्ये विचिनोति कतमस्त्वेषां मेघानामुदकदाने समर्थ इति । तं[८] विज्ञाय यदजयत् यदपः[९] सूर्यं सुष्ठु ईरयितारमपां न तत्ते नं[१०] चान्यः कश्चित् अनु वीर्यं शकत् । तत्र[११] वीरकर्म भावत्कमन्यः[१२] कश्चिदनुकर्तुमप्यशक्तः । नापि पुराणो नापि नूतनः । नव इत्यर्थः । न पूर्वे चक्रुर्नापरे करिष्यन्तीत्यभिप्रायः । कृतसंबन्धाद्देवनसंबन्धाच्च ‘ श्वघ्नी कितवः ’ इत्युपपद्यते । अस्य मन्त्रस्य पूर्वोऽर्धर्चः परोक्षकृतः । स एवं[१३] विपरिणमयितव्यः । अत्र चोक्तः समाधिः ।

निगमप्रसक्तमुच्यते । ‘ कितवः ’ इत्यस्य शब्दस्य ‘ किं तवास्तीति ’

कितवशब्दस्य व्युत्पत्तिः

एषा ‘ शब्दानुकृतिः ’ । स हि नित्यकालमेव दिदेविषुः प्रतिदेवितृभिः कितवैः पृच्छ्यते किं तवास्तीति । तस्माच्छब्दानुकरणात्कितव एव स बभूव । अथवा ‘ कृतवान् ’ अयं यथा स्यादित्येवमसावाशास्यते सुहृद्भिरन्यैः कितवैः सह[१४] । तस्मादेवमाशासनात् ‘ आशीः ’ निमित्त ‘ नामकः ’ कितव एवासौ बभूव ।

---

१ ग. ज. ‘ ऐन्द्री ’ नास्ति; च. °मार्षं । ˅ जग °ऐन्द्री. २ क. ख. घ. झ. ट. ठ. ड. °निकेषु उक्थपर्यायेषु ब्रा°. ३ क. ख. घ. झ. ट. ठ. ड. °शस्त्रे विनियुक्ता । यथा° च. शस्त्रे˅ । यथा°; च. ४ क. ख. घ. झ. ट. ठ. ड. यथात्र कृ°; च. यथात्रेता° कृ° त्रकृ. ५ क. ख. घ. झ. ठ. ड. आस्तारे; ग. आस्युरे°; ज. आस्फरे; ट. आस्तारे° स्फा. ६ घ. झ. ट. ठ. ड. कृतं यत्स्यात्त°; च. कृतं˅स्या° यत्. ७ ग. ज. °दकं सं°; च. दकं स° कं. ८ ग. ज. ‘ तं ’ नास्ति. ९ क. ख. घ. झ. ट. ठ. ड. ‘ यदपः ’ नास्ति;. च. °जयत् यदपः सू°. १० क. ख. घ. झ. ट. ठ. ड. तवान्यः; च. नं चा° तवा. ११ क. ख. घ. झ. ट. ठ. ड. तद्वीर°; च. तत्र वी° त्. १२ क. ख. घ. झ. ट. ठ. ड. तावकमन्यः; ग. ज. भावात्क°; च. भावत्क° व. १३ घ. झ. ट. ठ. ड. एवं. १४ क. ख. घ. झ. ट. ठ. ड. °तवैः । स हि तस्मा; च. °तवैः सह । तस्मा° । स हि.

'समम्' (६८.) इत्येतत् 'परिग्रहार्थीयं सर्वनाम'। तत्पुनरेतत् 'अनुदात्तम्'।'त्वत्वनेमसमसिमेत्यनुच्चानि' इति ह्युक्तम् (निरु० १। ७.)। विप्रतिपन्नस्वरत्वादत्र स्वरो भाष्यकारेणावधृतोऽनेकार्थताप्यस्य भवतीत्येतत्प्रदर्शितम्[3] ॥ २२[4] ॥

मा नः समस्य दूढ्यः [5]परिद्वेषसो अंहतिः। ऊर्मिर्न नावमा वधीत् (ऋ० सं० ८। ७५। ९)॥ मा नः सर्वस्य दुर्धियः पापधियः सर्वतो द्वेषसोंऽहतिरूर्मिरिव नावमावधीदूर्मिरूर्णोतेर्नौः प्रणोत्तव्या[6] भवति नमतेर्वा तत्कथमनुदात्तप्रकृति नाम स्याद् दृष्ट[7]व्ययं तु भवत्युतो[8] समस्मिन्नाशिशीहि नो वसो इति सप्तम्यां शिशीतिर्दानकर्मा[9]। उरुष्या णो अघायतः समस्मादिति पञ्चम्यामुरुष्यती रक्षाकर्माथापि प्रथमाबहुवचने । नभन्तामन्यके समे ॥ २३[10] ॥

मा नः समस्य दूढ्य[11] इति। विरूप आङ्गिरस एतामाग्नेये सूक्ते ददर्श[12]। दशरात्रस्य तृतीयेऽहनि प्रातःसवन आज्ये[13] सूक्ते विनियुक्ता (आश्व० श्रौ० ७। १०)। हे भगवन्नग्ने युष्मत्प्रसादात् मा नो मास्मान् समस्य सर्वस्यैव दूढ्यः दुर्धियः पापधियः परिद्वेषसः

'समस्य' इत्यस्य

---

१ ग ज. अशीतिनत्वसमसिमेत्यनुच्चानीत्युक्तं। मसिमेत्दनुर्वानीतिह्युक्तं। विप्र°; च. श्री त्वत्वं(त्वन्नेम)समसिमनेभेत्यनुच्चानीत्युक्तं । विप्र°. २ क. ख. घ. झ. ट. ठ. ड. °दत्र भाष्यकारेण स्वरोऽवधृतः। पक्षेण चाप्यनेका°; ग. ज. °दत्र स्वरो भाष्यकारेण वानेकार्थ°; च. °दत्र स्वरो भाष्यकारेण ऽनेकार्थ° स्वरोऽवधृतः। पक्षेण चा. ३ क. ख. ग. ज. घ. झ. ठ. ट. ड. °दर्शितं भाष्यकारेण; च. °दर्शितं भाष्यकारेण. ४ क. ख. ४ (२२); ग. ६/२५; ट. ड. ॥२२॥ इति निरुक्तटीकायां पञ्चमाध्याये द्वाविंशतिः खण्डः; इतरेष्वङ्को नास्ति. ५ क. ख. छ. त. द. द्वेषसो अंह°. ६ ठ. ड. प्रणोतव्या. ७ क. ख. द. दृष्ट°. ८ क. ख. छ. त. द. भवति। उतो°. ९ क. ख. छ. त. द. °ष्यतिरकर्मकः। अथा°. १० क. ख. ५ (२३); छ. त. २६; द. ५. ११ क. ख. घ. झ. ट. दूढयः ८मावधीत्। विरू°; ग. ज. दूढ्यः परिद्वेषस इति । विरू°. १२ क. ख. घ. झ. ट. ठ. ड. ददर्श। गायत्री। आग्नेयी। दश°; च. ददर्श। ४दश° गायत्री आग्नेयी. १३ क. ख. घ. झ. ट. ठ. ड. आद्ये; ग. ज. आज्यसूक्ते°; च. आज्ये° द्वे.

सर्वतो द्वेष्टुः स्वभूतिः[1] : अंहतिः । वध इत्यर्थः । ऊर्मिर्न ऊर्मिरिव । यथोर्मिर्नावमाभिमुख्येन गत्वा वधयत्येवमंहतिरस्मान्[2] द्वेष्यप्रहितो मा वधीदिति[3] । एवमत्र सर्वस्मादेव द्वेष्टुर्वधस्यानभीष्टत्वात्[4] 'समस्य' इत्येतत्सर्वनामेत्युपपद्यते । 'ऊर्मिरूर्णोतेः' आच्छादनार्थस्य (धा० २ । २९) । सा ह्याच्छादयति तीरमुदकमध्ये वा यदन्यद्भवति । 'नौः प्रणोत्तव्या भवति' पारगमनाय । 'नमतेर्वा' स्यात् । सा हि प्रह्वीभूतेव भवति पारगमनाय ।

'समम्' अनुदात्तप्रकृति सदपि नामैव

आह । यदेतत्सममिति शब्दरूपम् 'अनुदात्तप्रकृति' अनुदात्तस्वभावं सत् कथं नाम स्यात् । अनुदात्तप्रकृतयो हि निपाता उदात्तप्रकृतीनि नामानि भवन्तीति । उच्यते । 'द्रष्टव्ययं[5] तु' एतद्यस्मादनुदात्तप्रकृतित्वेऽपि सति तस्मान्नामैवैतत् भवति । आह । क पुनरस्य व्ययो दृष्ट[6] इति । उच्यते । 'उतो समस्मिन्ना शिशीहि नो वसो इति सप्तम्यां' व्ययो दृष्टः[7] ।

यस्मात्तस्य व्ययो दृष्टः

'विद्मा सखित्वमुत[8] शूर भोज्य[9] मा ते ता वज्रिन्नीमहे । उतो समस्मिन्ना शिशीहि नो वसो वाजे सुशिप्र गोमति (ऋ० सं० ८ । २१ । ८) ॥

सौभरेरार्षम्[10] । सतोबृहती[11] । आख्यानसूक्ते विनियुक्ता । विद्म विजानीमो[12] वयं सखित्वं सखिभावम् । उत अपि च हे शूर वज्रिन्निन्द्र भोज्यं भोग्यतां[13] सोमजीव्यत्वं मित्राणाम् । यतो वयं आ ईमहे आभिमुख्येन स्थित्वा याचामहे ते तव यानि धनानि । किंच ।

'समस्मिन्' इति सप्तम्याम्

उतो अपि च समस्मिन्ना[14] शिशीहि नः । देह्यस्माकं

१ क. ख. ग. ज. घ. झ. ठ. ठ. ड. स्वभूतः. २ क. ख. घ. झ. ट. ठ. ड. °यति मैवमं°. ३ ग. ज. स्माद्दे°; च. स्मा॒न्द्वे° न्. ४ क. ख. घ. झ. ट. ठ. ड. °हितोऽवधी°. ५ क. ख. घ. झ. ट. ठ. ड. द्वेष्टुर्वधानभीष्ट°; ग. ज. द्विष्टुर्वधायानभी°; च. द्विष्टु° द्वे. ६ क. ख. घ. झ. ट. दृष्ट°; च. द्रष्ट° दृ. ७ च. द्रष्टः. ८ ग. दृष्टः ।८२। विद्मा°; च. द्रष्टः° दृ. ९ ग. ज. °मुत शूर भोज्यमिति; घ. ट. °मुत० सुशिप्र गोमति. १० च. इति सौभ°. ११ क. ख. घ. झ. ट. ठ. ड. °हती । ऐन्द्री । आख्या°; च. °हती ५ । आख्या° ऐन्द्री. १२ घ. झ. ट. ठ. ड. 'वि' नास्ति. १३ क. ख. घ. झ. ट. ठ. ड. भोग्यमंशोपजीव्य°; ग. ज. भोग्यतां सोपजी°; च. भोग्यतां सोमे° मंशोप. १४ क. ख. घ. झ. ट. ठ. ड. समस्मिन् सर्वस्मिन्नाशि°; च. समस्मिन् ५ आशि° सर्वस्मिन्.

हे वसो वसुमन्निन्द्र । क पुनराशिशीहि न इति । वाजे । अन्न इत्यर्थः । हे सुशिप्र हे सुनस अथवा हे सुहनो गोमति गोभिस्तद्वति । अन्नेऽस्मान् प्रतिष्ठापयेत्यर्थः । एवमत्र समस्मिन्निति सप्तम्यां व्ययो दृष्टः ।

'उरुष्या णो अघायतः समस्मादिति पञ्चम्यां' व्ययो दृष्टः । 'स नो बोधि श्रुधी हवमुरुष्या णो अघायतः समस्मात्'

'समस्मात्' इति पञ्चम्याम्

(ऋ० सं० ५ । २४ । ३) । श्रुतबन्धोरार्षम् । आग्नेयी । द्विपदा । अग्न्युपस्थाने विनियुक्ता (मैत्रा० सं० १ । ५ । ३) । यस्त्वमेवंप्रभावः । यथाप्रभावं त्वां वयमवोचाम । स त्वं हे भगवन्नग्ने बोधि बुध्यस्वास्माकमभिप्रायम् । श्रृणु चाह्वानमिदम् । आहूतश्च उरुष्या णः उपगम्यास्मान् अघायतः पापमिच्छतः समस्मात्सर्वस्मात्पाहि । एवमत्र समस्मादिति पञ्चम्यां व्ययो दृष्टः । तस्माद्व्ययदर्शनात् 'दृष्टानुविधिश्छन्दसि' भवतीति कृत्वानुदात्तप्रकृतित्वेऽपि सति नामैतद्भवतीत्युपपद्यते ॥ २३ ॥

हविषा जारो अपां पिपर्ति पपुरिर्नरा । पिता कुटस्य चर्षणिः [ऋ० सं० १ । ४६ । ४] ॥ हविषापां जरयिता पिपर्ति पपुरिरिति पृणातिनिगमौ वा प्रीणातिनिगमौ वा पिता कृतस्य कर्मणश्चायितादित्यः शम्ब इति वज्रनाम शमयतेर्वा शातयतेर्वा । उग्रो यः शम्बः पुरुहूत तेनेत्यपि निगमो भवति । केपयः कपूया भवन्ति कपूयमिति पुनाति कर्म कुत्सितं दुष्पूयं भवति ॥ २४ ॥

'कुटस्य'(७०) 'चर्षणिः' (७१) इत्येते अनवगते । 'कृतस्य' 'चायिता' इत्येतौ शब्दसमाधी । एक एव निगमः । हविषा जारो अपामिति । प्रस्कण्वस्येयमार्षम् । आश्विनी । प्रातरनुवाकाश्विनयोः शस्यते [आश्व० श्रौ० ४ । १५] । हे नरौ अश्विनौ युवामेष आदित्यः

'कुटस्य चर्षणिः' इत्यस्य

१ ग. दृष्टः । ८३ । स°. २ व. ट. श्रुधी० समस्मात् ३ च. 'स्थाप्ने° प. ४ क. ख. ५ (२३); ग. ८४/२६; इतरेष्वङ्को नास्ति. ५ क. ख. ६ (२४); छ. त. २७; द. ६. ६ व. झ. ट. अपां०००चर्षणिः प्रस्क°. ७ क. ख. घ. झ. ट. ठ. ड. 'इयं' नास्ति. ८ ग. ज. नराश्विनौ; च. नराऽश्विनौ.

पिता पाता कृत्स्नस्य जगतः कुटस्य च[1] कृतस्य कर्मणः सार्वभौमस्य साध्व-साधुनः चर्षणिः चायिता द्रष्टा बुद्ध्यधिदेवताभावेनावस्थितः सर्वभूतानाम् । अपां जारः अपां सर्वभूतान्तर्गतानां प्राणभावेनावस्थितो जरयिता शोषयिता[2] पपुरिः च पूरयिता च । प्राप्ते काले हविषा उदकेन पिपर्ति पूरयति वा प्रीणयति वा । यौ युवामेवंगुणयुक्तेनादित्येन पूर्येथे प्रीण्येथे वा तौ युवामिमां[3] नामास्माकमाशिषं समर्धयत[4]मित्येवमाशीर्योज्या । एवमत्र 'कुटस्य चर्षणिः' इत्येते 'कृतस्य चायिता' इत्येवमुपपद्येते । नरौ अत्र द्यावा-पृथिव्यावभिप्रेते । तयोश्चोदकेनादित्यः पूरयिता । तस्मादादित्यविषयता चर्षणिशब्दस्य । तस्य च बुद्ध्यधिदेवताभावेन कृतस्य कर्मणो द्रष्टृत्वमुपपद्यते । 'पिपर्ति पपुरिः' इत्येवमेतौ निगमस्थौ[5] शब्दौ पूरयत्यर्थौ वा प्रीणयत्यर्थौ[6] वा ।

'शम्बः' (७२) इत्यनवगतम् । 'वज्रनाम' इत्यभिधेयवचनम् । 'शमयिता वा शातयिता वा' इति शब्दसमाधी[7] ।

'शम्बः' इत्यस्य 'आराच्छत्रुमप बाधस्व दूरमुग्रो यः शम्बः पुरुहूत तेन । अस्मे धेहि यवमद्गोमदिन्द्र कृधी धियं जरित्रे वाजरत्नाम्' [ऋ० सं० १० । ४२ । ७]॥[8] कृष्णस्याङ्गिरसस्यार्षम् । त्रिष्टुप् । माध्यन्दिने सवने स्तोमातिशंसने ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्ता [आश्व० श्रौ० ७ । ९] । हे पुरुहूत बहुभिराहूत य एष आरात्समीपेऽस्माकं वर्तते शत्रुस्तं दूरम् अपबाधस्व । नाशयस्वेत्यर्थः । आराच्छब्दो ह्यत्र समीपार्थवाची । अन्यत्रापि चोक्तम् 'आरात्प्राग्वंशादुदयास्तमयौ' इति । केन पुनरपबाधस्व । उग्रो यः शम्बः । उद्गूर्णो यो वज्रस्तेनापबाधस्व[9]त्यर्थः[10] । किंच । तं दूरमपबाध्य ततः अस्मे[11] अस्मभ्यं धेहि देहि यवमत् यवैस्तद्वत् व्रीहिगोधूमाद्यन्नम्[12] । अपि च । गोमत् गोभिस्तद्व-

---

१ क. ख. घ. झ. ट. ठ. ड. 'च' नास्ति. २ ग. ज. 'शोषयिता' नास्ति. ३ ग. ज. °मिमान्नामा°; च. °मिमान्नामा° मां ना. ४ ग. ज. समर्थय°; च. समर्थय°र्ध. ५ च. °मस्थौ॰पूर° शब्दौ. ६ क. ख. घ. झ. ट. ठ. ड. पृणात्यर्थौ वा प्रीण°. ७ ग. °माधी । ८५ । आरा°. ८ ग. ज. दूरमिति । कृष्ण°; घ. ट. दूरं०जरित्रे°. ९ च. °बाधयस्वे°; ज. °बाधयस्वे°. १० क. ख. घ. झ. ट. ठ. ड. 'इत्यर्थः' नास्ति. ११ ग. ज. असमै. १२ घ. झ. ट. ठ. ड. °माद्यन्नैः; च °माद्यन्नं °न्नैः.

त्पश्वादिभिः । किंच । स त्वमेतदेवंगुणकमस्मभ्यमन्नं[1] ददत् कृधि कुरुष्व इमां धियम् एतत्कर्म वाजरत्नां वाजरमणीयाम् । प्रचुरेणान्नेन यथैतस्मिन्[2]कर्मणि वर्तमाना रमेमहि तथा कुरुष्वेत्यभिप्रायः । धीरिति कर्मनामसु पठितं 'धीः शची' [निघ० २ । १ । २१] इति । एवमत्रापबाधनसंबन्धात् 'शम्बः' इत्येतद्वज्रनामेत्युपपद्यते । अपठितमेतद्वज्रनामास्त्वित्यतोऽप्रसिद्धार्थम् । तस्यैवं प्रकरणादर्थसिद्धिर्भवति ।

'केपयः' (७३) इत्यनवगतम् । 'कपूयाः' ह्येते सन्तः केपय इत्युच्यते । आह । 'कपूयमिति' किमुक्तं भवति । उच्यते । यदेतत्पापकारी प्रायश्चित्तेन 'पुनाति कर्म कुत्सितम्' यच्च तत्[4] 'दुःपूयं' दुष्पावं[3] 'भवति' पूयमानमप्येतत् 'कपूयम्' इत्युच्यते ॥ २४ ॥

पृथक्प्रायन्प्रथमा देवहूतयोऽकृण्वत श्रवस्यानि दुष्टरा । न ये शेकुर्यज्ञियां नावमारुहमीर्मैव ते न्यविशन्त केपयः (ऋ० सं० १० । ४४ । ६) ॥ पृथक्प्रायन्पृथक्प्रथतेः प्रथमा देवहूतयो ये देवानाह्वयन्ताकुर्वत श्रवणीयानि यशांसि दुरनुकराण्यन्यैर्येऽशक्नुवन्याज्ञियां नावमारोढुं[5]मथ ये नाशक्नुवन्याज्ञियां नावमारोढुमीर्मैव ते न्यविशन्तेहैव ते न्यविशन्त ऋणे[6] हैव ते न्यविशन्तास्मिन्नेव लोक इति वेर्म[7] इति बाहुनाम समीरिततरो भवति । एता विश्वा सवना तूतुमा कृषे स्वयं सूनो सहसो यानि दधिषे । एतानि सर्वाणि स्थानानि तूर्णमुपाकुरुषे स्वयं बलस्य पुत्र यानि धत्स्वांसत्रमहसत्त्राणं[8] धनुर्वा कवचं वा कवचं कु[9] अश्चितं भवति काश्चितं भवति कायेऽश्चितं भवतीति वा ॥ २५ ॥

---

१ घ. झ. ट. ठ. ड. °स्मभ्यं जरित्रे स्तोत्रे अन्नं; च. °स्मभ्यमन्नं° भ्यं जरित्रे स्तोत्रे अ. २ घ. झ. ट. ठ. ड. यथैतत्कर्मणि. ३ ग. च. ज. दुःष्पावं. ४ क. ख. ६ (२४); ग. $\frac{८६}{२४}$; ठ. ड. २४ । इति निरुक्तटीकायां पञ्चमाध्याये चतुर्विंशतिः खण्डः. ५ छ. त. द. °रोल्हुम°; थ. °रोळ्हुम°. ६ छ. त. द. ऋणेनैव ते°. ७ ठ. ड. वा ईर्म. ८ त. ध. °सत्राणं. ९ क. ख. ७ (२५); छ. त. २८; द. ७.

'पृथक् प्रायन् प्रथमा देवहूतयः' इति। पूर्वयैव समानार्षविनियोगा।

'केपयः' इत्यस्य

इयं तु जगती। पृथक् प्रायन् पृथग्भूता एव प्रायन् प्रागच्छन्। के पुनस्त इति। उच्यते। प्रथमा देवहूतयो ये देवानाह्वयन्ते यज्ञेषु कर्मसु। किंच। अकृण्वत अकुर्वत च श्रवणीयानि श्रवणार्हाणि यशांसि दुष्टरा दुरनुकराण्यन्यैरयज्वभिः। एवं तावद्ये मनुष्या अशक्नुवन् शकितवन्तो यज्ञियां नावमारोढुं यजनकर्ममयीं नावमारोढुम्। एवं ते पृथग्भूता एव विद्याकर्मानुरूप्येण देवयानेन पथा पितृयानेन वा प्रायन्। अथ पुनर्ये नाशक्नुवन्यज्ञियां नावमारोढुम्। किं तर्हि। विषयप्रधानाः कपूयमेव दुःपूयमेव कर्म चक्रिरे ते तेनैव कपूयेन कर्मणा प्रेर्यमाणा इहैव लोके यथाकर्मानुरूपायां योनौ न्यविशन्त। तदुक्तम् 'अथ य इह कपूयचरणा अभ्याशो ह यत्ते कपूयां योनिमापद्येरञ्श्वयोनिं वा सूकरयोनिं वा चण्डालयोनिं वा' (छा० ५।१०।७) इत्येवमादि। एवमत्र न ये शेकुर्यज्ञियां नावमारोढुमित्येतेन संबन्धात् 'केपयः कपूयाः' इत्युपपद्यते।

शब्दसारूप्यप्रसङ्गादुच्यते। 'ईर्मे इति बाहुनाम' इति। स हि 'समीरिततरो भवति' अन्येभ्योऽङ्गेभ्यः।

'तूतुमाकृषे' इत्येते अनवगते। 'तूतुम्' इत्यस्य 'तूर्णम्' इति शब्दसमाधिः। 'आकृषे' इत्यस्य 'उपाकुरुषे' इति शब्दसमाधिः[11]। एता विश्वा सवना तूतुमा कृषे[12] स्वयं सूनो सहसो यानि दधिषे। वराय ते पात्रं धर्मणे तना यज्ञो मन्त्रो

'तूतुमाकृषे' इत्यस्य

---

१ ठ. ड. प्रायन्निति। पूर्व°. २ घ. झ. ट. °हूतयः०० न्यविशन्त केपयः पूर्व°. ३ घ. झ. ट. ठ. ड. °ह्वयन्त या°. ४ घ. झ. ट. ठ. ड. अत्र शवनु°. ५ क. ख. घ. झ. ठ. ड. °रूपेण; ट. °रूपेग° प्ये. ६ ग. ज. विषये प्रधानाः; च. विषये प्र° य. ७ क. ख. घ. झ. ट. ठ. ड. दुष्पूयं. ८ घ. झ. ट. ठ. ड. °शन्त। ऋणेनैव (ट. ऋणेनैव° है; ठ. ड. ऋणे हैव) वा न्यविशन्त। नीचैराविशन्त। अधोगतिं प्राप्ता इत्यर्थः। तदु°; च. °शन्त। तदु° ऋणेने०० इत्यर्थः. ९ ग. ज. °चरणा अन्यशो ह यत्ते; घ. झ. ट. ठ. ड. अभ्यशोभयन् ते; च. °चरणा अशुभरुचयः अभ्या (भ्य) शोहयन्ते° भयन् ते. १० ग. च. ज. °रोढुमि°. ११ ग. °माधिः। ८७। एता°. १२ ग. ज. कृषे। इन्द्र°; घ. ट. कृषे० ब्रह्मोद्यतं वचः.

ब्रह्मोद्यतं वचः [ऋ० सं० १० । ५० । ६] ॥ इन्द्रस्य[1] वैकुण्ठस्येयमार्षम्[2] । ऐन्द्रे सूक्ते निविद्धानीये महाव्रते महदुक्थे शस्यते [ऐ० आ० । ५ । ३ । १] । एता एतानि विश्वा[3] विश्वानि सर्वाणि स्थानानि त्वमुपागम्योपगम्य[4] तेन तेन देवतात्मना कुरुष्व । निर्वर्तयेत्यर्थः । आह । कतमानि पुनः स्थानानि । उच्यते । स्वयं सूनो सहसो यानि दधिषे । हे सूनो सहसो बलस्य पुत्र यान्येतानि स्वयम् एव दधिषे धारयसि तानि त्वमेव कुरुषे । यत एवं[5] त्वमेव धारयिता स्रष्टा चास्य जगतोऽत एतस्मात्कारणात् वराय वरयितव्याय ते तव पात्रम् एतत्सोमपूर्णं प्रदिशामो धर्मणे धारयित्रे । तत्त्वा च धनं च सर्वं तवैव । यज्ञश्च कृत्स्नस्तवैव । मन्त्रश्च कर्मकरणस्तवैव । ब्रह्म चान्नं तवैव । उद्यतं चैतदनेकप्रकारमपि स्तुतिलक्षणं वचः तवैव । एवमत्र शब्दसारूप्यात् ' तुतुम् ' इत्येष शब्दः ' तूर्णम् ' इत्येवमुपपद्यते । करणसंबन्धाच्च । यद्धि[6] कर्तव्यं भवति तस्य तूर्णमेव करणमिष्यते कर्तृभिः । तस्मादुपपद्यते । ' आक्षुषे ' इत्यत्रापि यद्धि क्रियते तदुपगम्याभिमुख्येनैव स्थित्वा क्रियत इति ' उप ' शब्दोऽत्र भाष्यकारेणाध्याहृतः ।

अत्र ' सूनो सहसः ' इत्येतस्माद्विशेषलिङ्गादाग्नेयीमेतामृचं कृत्वा केचिद्व्याचक्षतेऽग्निर्हि बलेन मथ्यमानो जायत इति । तथाहि प्रकरणविरोधो भवति । सूक्तं ह्येतदैन्द्रम् । ऐन्द्रत्वेऽस्यां[7] ' सूनो सहसः ' इत्यनयोः पदयोरर्थयोजना । अधिदेवताभावेन प्राण इन्द्रो व्यवस्थितः । तस्येतरो यः प्रज्ञासु[8] व्याविष्टः प्राणः[9] स पुत्र इत्येवमुपपद्यते पितृपुत्रभावः । तदुक्तं ' प्राणो वा अहमस्म्यृषे[10] प्राणस्त्वं प्राणः[11] सर्वाणि भूतानि ' [ऐ० आ० २ । २ । ३] इति ।

---

१ ग. ज. इन्द्रवैकु°; च. इन्द्र॰वै° स्य. २ घ. झ. ट. °मार्षम् । जगती । ऐन्द्रे°; च. मार्षं ।॰ऐन्द्रे° जगती. ३ घ. झ. ' विश्वा ' नास्ति; ट. एतानि ॰विश्वानि° विश्व. ४ ग. ज. °म्योपगम्य; च. °म्योगम्य° पा. ५ क. ख. घ. झ. ट. ठ. ड. एवं कुरुषे अत एव त्वमे°; च. एवं॰त्वमे° कुरुषेऽत एव. ६ क. ख. घ. झ. यद्धि कर्म तस्य°; ट. यद्धि कर्म° कर्तव्यं भवति; ठ. ड. यद्धि कर्म कर्तव्यं°. ७ क. ख. घ. झ. ट. ठ. ड. °त्वे त्वस्य. ८ क. ख. घ. झ. ट. ठ. ड. प्रजासु; ग. ज. प्रज्ञामुत्पाद्याविष्टः°. ९ क. ख. घ. झ. ठ ड. प्राणस्तु पुत्र°; ट. प्राणस्तु पुत्रः° स. १० ग. ज. °हमस्म (ज. स्य) ष्टे प्राण°; च. °हमस्म्यस्त्वं प्राण° स्म्यृषे. ११ ग. च. ज. प्राणाः.

'अंसत्रम्' [७'१] इत्यनवगतम् । विकल्पतश्चानेकार्थम् । 'अंहसस्त्राणम्' इत्यर्थप्रतीतिः । 'धनुर्वा कवचं वा' इत्यभिधेयवचनम् । ताभ्यां हि पुरुषाः सांग्रामिकादंहसस्त्रायन्ते । आख्यानप्रसक्तमुच्यते । 'कवचं कु अञ्चितं भवति' कुटिलमञ्चितम् । स हि तस्य स्वभावः । अथवा 'काञ्चितम्' ईषदञ्चितं कुटिलीकृतं[1] 'भवति' । अथवा 'कायेऽञ्चितं' तद्गतं 'भवति' ॥ २५ ॥

प्राणाताश्वान्हितं जयाथ स्वस्तिवाहं रथमित्कृणुध्वम् । द्रोणाहावमवतमश्मचक्रमंसत्रकोशं[2]सिञ्चता नृपाणम् (ऋ० सं० १० । १०१ । ७) ॥ प्रीणीताश्वान् सुहितं जयथ जयनं वो हितमस्तु स्वस्तिवाहनं रथं कुरुध्वं द्रोणाहावं द्रोणं द्रुममयं भवत्याहाव आह्वानादावह आवहनादवतोऽवातितो महान् भवत्यश्मचक्रमशनचक्रमसनचक्रमिति वांसत्रकोशमंसत्राणि वः कोशस्थानीयानि सन्तु कोशः कुष्णातेर्विकुषितो भवत्ययमपीतरः कोश एतस्मादेव संचय आचितमात्रो महान् भवति सिञ्चत नृपाणं नरपाणं कूपकर्मणा संग्राममुपमिमीते काकुदं तात्वित्याचक्षते जिह्वा कोकुवा सास्मिन् धीयते जिह्वा कोकुवा कोकूयमाना वर्णान्नुदतीति वा कोकूयतेर्वा स्याच्छब्दकर्मणो जिह्वा जोहुवा तालु तर्तेस्[3]तीर्णतममङ्गं लततेर्वा स्यो[4]द्विपरीताद्यथा तलं लतेत्यविपर्ययः ॥ २६[5] ॥

प्रीणीताश्वान्हितमिति[6] । बुधस्य सोमपुत्रस्येयमार्षम्[7] । वैश्वदेवे सूक्ते । प्रीणीत प्रीणयत यवसोदकादिना एतान् अश्वान् । 'अंसत्रम्' इत्यस्य उपस्थितोऽयं संग्राम इत्यभिप्रायः । प्रीणयित्वैतानश्वानेभिरश्वैरुपजातवीर्यैः सुहितं जयथ । जयनं वो हितमस्तु । अहितोऽपि जयः कश्चिद्भवत्येव यत्र सुहृद्भ्रातृपुत्रा-

---

१ क. ख. ७ (२'१); ग. ८८/२८; ठ. ड. २५ । इति निरुक्तटीकायां पञ्चमाध्याये पञ्चविंशतिः खण्डः. २ छ. त. द. एनां नुद'. ३ ठ. त. तलते°. ४ छ. त. द. स्यालम्बकर्मणो विप°. ५ क. ख. ८ (२६); छ. त. २९; द. ८. ६ व. झ. ट. °न्हितं जयाथ०० सिञ्चता नृपाणम् । बु°; ठ. ड. °ताश्वानिति । बुध°. ७ व. झ. ट. ठ. ड. °मार्षं । त्रिष्टुप् । वैश्व°.

दयो हन्यन्ते । स्वस्तिवाहम् अभिपूजितवाहं रथं कृणुध्वं कुरुध्वं[1] हे देवाः । एवमेतां सांग्रामिकीमितिकर्तव्यतां कृत्वा द्रुममयमेतम् आहावम् आहावस्थानीयं रथं कृत्वा अवतम् एतं संग्रामकूपम् अश्मचक्रम् अशनचक्रं व्यापनचक्रम् । व्यापयन्ति हि तत्र क्षिप्तानि चक्राणि शत्रूणाम् । अथवा असनचक्रम् । अस्यन्ते हि तत्र चक्राणि । अंसत्रकोशम् । अंसत्राणि वो धनूंषि कवचानि वा कोशस्थानीयानि तत्र सन्तु । तैः सिञ्चत उत्सिञ्चत एनं संग्रामकूपं नृपाणं[2] नरपाणम् । नरा एव तत्रोदकस्थानीयाः । त एवोत्सिच्यन्ते[3] । एवमत्र 'कूपकर्मणा' अस्मिन्नुत्तरेऽर्धर्चे किंचित्साधर्म्येण 'संग्राममुपमिमीते' मन्त्रदृक् । एवमत्र संग्रामोपमाधिकारादुत्सेचनसंबन्धाच्च[4] 'अंसत्र' शब्देन 'धनुः कवचं वा' उच्यत इत्युपपद्यते ।

ततः[5] 'आहाव आह्वानात्' इत्येतद्यथावस्थितस्यैव मन्त्रपदस्य निर्[6]वचनम् । आहूयतेऽस्मिन्नित्याहावः । इदं त्वन्यत् 'आवह[7] आवहनात्' इत्यस्यैव विपरिणतस्य[7] । उह्यतेऽस्मिन्नुदकमित्यावहः[8] । 'अवतः' कूपः । स हि खन्यमानो महान् 'अवातितः' अवाङ् अतितो 'भवति' । गत इत्यर्थः । अंसत्रकोशम् इति कोशशब्दो विग्रहप्रसक्तः । 'कोशः कुष्णातेः' इति । स हि विविधं कुषितो 'भवति' चर्मकोशः शुषिरत्वात्[9] । 'अयमपीतरो' द्रव्य 'कोशः' एतस्मादेव कुष्णातेः संचयकोशः[10] । स हि मात्राभिः आचितो भवति महत्त्वात् ।

'काकुदम्' इत्यस्य व्युत्पत्तिः

'काकुदम्' (७६) इत्यनवगतम् । 'तालु इत्याचक्षते' इत्यभिधेयवचनम् । 'जिह्वा कोकुवा' इत्युच्यते । 'सा[11]' कोकुवाख्या जिह्वा एतस्मिंस्तालुनि वर्णाभिव्यक्त्यर्थं मुहुर्मुहुः 'धीयते' । तदेतत्कोकुवाधानं सत् काकुदमित्यभिधीयते । 'जिह्वा कोकुवा' कस्मादिति । उच्यते । शब्दानुकरणनिमित्तं जिह्वायाः कोकुवात्वम् । तथा-

---

१ ग. च. ज. 'कुरुध्वं' नास्ति. २ ग. ज. °कूपं नरपाणां । नरा°; च. °कूपं । नृपाणां नरपाणां । नरा° णं. ३ क. ख. घ. झ. ट. ठ. ड. एवोच्यन्ते. ४ क. ख. घ. झ. ट. ठ. ठ. °पमासंबन्धादुत्से°. ५ ज. तत्र; ठ. ड. 'ततः' नास्ति. ६ घ. ट. 'आहव आ°; झ. आहव आहवना°. ७ क. ख. घ. झ. ट. ठ. ड. °रिणम्यते । उह्य°. ८ क. ख. घ. झ. ट. °त्याहवः; च. °त्यावहः. ९ ग. ज. घ. झ. ट. ठ. ड. सुषि°. १० घ. झ. ट. ठ. ड. संचयः कोशः. ११ क. ख. घ. झ. ट. ठ. ड. सा हि को°; च. सा ^ को° हि.

विधं हि सा कुर्वाणा शब्दं तालुनि ‘वर्णानुदति’। तस्माद्वा कोकुवानुदनात् काकुदं स्यात्। आह। जिह्वैव तावत्कस्माज्जिह्वेत्यभिधीयत इति। उच्यते। सा हि ‘जोहुवा’ सती जिह्वेत्युच्यते। तया प्राणिनोऽन्नमाम-न्येव जुह्वति अथवा तयाह्वयन्तीति जोहुवा। अथ ‘तालु’ कस्मात्। उच्यते। तद्धि ‘तीर्णतरम्’ इतरेभ्योऽङ्गेभ्यो विस्तीर्णत्वेन भवति। ‘लततेर्वा स्यात्’ आद्यन्तविपर्ययेण ‘यथा तलम्’ इति। समानजातीयशब्दोपप्रदर्शनं दृष्टप्रतीत्यर्थम्। अस्यैव लततेर्लम्बनार्थस्य ‘लता’ इत्येतच्छब्दरूपमविपर्ययेण भवति ॥ २६ ॥

सुदेवो असि वरुण यस्य ते सप्त सिन्धवः। अनुक्षरन्ति काकुदं सूर्म्यं सुषिरामिव (ऋ० सं० ८।६९।१२)॥ सुदेवस्त्वं कल्याणदेवः कमनीयदेवो वा भवसि वरुण यस्य ते सप्त सिन्धवः सिन्धुः स्रवणाद्यस्य ते सप्त स्रोतांसि तानि ते काकुदमनुक्षरन्ति सूर्मि कल्याणोर्मिं स्रोतः सुषिरमनु यथा बीरिटं तैटीकिरन्तरिक्षमेवमाह पूर्वं वयतेरुत्तरमिरतेर्वयांसीरन्त्यस्मिन् भांसि वा तदेतस्यामृच्युदाहरन्त्यपि निगमो भवति ॥ २७ ॥

---

१ ग. च. ज. तालुवर्णा°. २ क. ख. घ. झ. ट. ठ. ड. ‘अथवा’ नास्ति. ३ क. ख. ग. ज. °ह्वयतीति वा (ग. ज. ‘वा’ नास्ति) जोहु°; घ. झ. ट. ठ. ड. °ह्वयन्तीति वा जोहु°. ४ क. ख. घ. झ. °च्यते। तरतेर्धातोः। तद्धि°; च. °च्यते ५। तद्धि° तरतेर्धातोः; ट. °च्यते। तरतेर्धातोः। तद्धि° ल; ठ. ड. °च्यते। तलतेर्धातोः। तद्धि°. ५ घ. झ. ठ. ड. तस्यैव; ट. तस्यैव° अ. ६ क. ख. घ. °ऽवना°. ७ क. ख. ८ (२६); ग. ९; ठ. °वति। षड्विंशतिः खण्डः; इतरेष्वङ्को नास्ति. ८ क. ख. सुदेवस्त्वं कल्याणदानो यस्य तव देव सप्त सिन्धवः प्राणायानुक्षरन्ति काकुदं सूर्म्यं सुषिरामिवेत्यपि निगमो भवति। सुदेवस्त्वं कल्याणदेवः°; छ. त. द. सुदेवस्त्वं कल्याणदानो००न्त्यपि निगमो भवति। प्रश्ना°; छ. त. द. ‘सुदेवस्त्वं कल्याणदेवः ००हरन्त्यपि निगमो भवति’ नास्ति. ९ ङ. ठ. ड. कल्याणोर्मिः. १० क. ख. ९ (२७); छ. त. २७; द. ९.

सुदेवो असि वरुणेति[1] । प्रियमेधस आर्षम् । अनुष्टुप् । हे वरुण

'काकुदम्' इत्यस्य प्रयोगः

शोभनस्त्वमसि देवो यस्य तव एताः सप्त सिन्धवः अन्तरिक्षनद्यो वा[2] बहुलाह्वेत्येवमाद्याः । 'अश्वा नामासि नितुन्ना[3] नामासि अभ्रपत्नी[4] नामासि नामासि मेघपत्नी नामासि वर्षयन्ती[5] नामासि पुरस्तादरुन्धा[6] नामासि ' इति[7] सिन्धुशब्देन नद्य उच्यन्ते सप्तैताः । समुद्रा एव वा सप्त सिन्धुशब्देनोच्येरन् । काकुदं तालु अनुक्षरन्ति सूर्मिं सुषिरां[8] नगरोदकानिःसरणभूमिम्[9] इव । सर्वतः समवस्रुत्येत्यभिप्रायः[10] । एवमत्र सिन्ध्वनुक्षरणसंबन्धात् 'तालु[11]' इत्युपपद्यते । दुर्वचनं[12] सर्वस्य मन्त्रस्य कृत्स्नाध्ययने प्रयोजनम् । अन्यासु हि ऋक्षु या[13] एतस्मिन् प्रकरणे कृत्स्ना[14] अधीतास्तासु समाम्नातेभ्यः पदेभ्योऽन्यान्यप्यनवगतसंस्काराण्यनेकार्थानि वा सन्तीति तदुपप्रदर्शनार्थं[15] कृत्स्नाध्ययनम् । अस्यां पुनस्तदपि नास्तीत्येवं दुर्वाच्यत्वम् । अथवा काकुदशब्दस्य प्रयत्नान्वेष्यत्वात्कृत्स्नेयमृगधीता स्यात् ।

'बीरिटम्[16]' (७७) इत्यनवगतं पक्षेण चानेकार्थम् । भीरस्मिंस्तन्यत इति भीतननम् अन्तरिक्षम् । निरालम्बनत्वात्सर्व एव बिभेति । तदेवं 'भीतननं' सत् 'बीरिटम्[16]' इत्युच्यते । अथवा भासोऽत्र[17] नक्षत्रादीनां तन्यन्ते । तदेतत् भास्तननं[18] सत् 'बीरिटम्' इत्युच्यते । गणाभिधानपक्षेऽपि यथासंभवं योज्यम्[19] ॥ २७ ॥

---

१ घ. झ. ट वरुण००सुषिरमिव । प्रिय°. २ ग. ज. वा चहुलात्येव ; च. वाचहुलावेत्येव° व्हे; घ. झ. ट. वा. वहुलाव्हे°. ३ क. ख. तितुन्ना; ग. ज. नितुन्नी; च. नितुन्नी° ना. ४ ग. ज. 'अभ्रपत्नी नामासि' नास्ति. ५ घ. ट. ठ. ड. वर्षती; झ. वर्षयती. ६ ग. ज. °दरंधा°. ७ ग. ज. इति सप्तेन काम उपधी सप्तैषा समुद्रा°; च. °सीति तत्येन कामं उपधा तसैवा समुद्रा° सिन्धुशब्देन नद्य उच्यन्ते सप्तैताः. ८ ग. ज. शूर्मिं शुषि°. ९ क. ख. घ. झ. ट. ठ. ड. °रणभूमिमिव; ग. ज. °रणभ्रमामिव; च. °रणभ्रमि° भू. १० क. ख. घ. झ. ट. समश्रुवतेत्य°; ग. ज. समवश्रुत्येत्यभि°; च. समवश्रुतेत्य° श्रुवे; ठ. ड. समश्रुवे इत्य°. ११ क. ख. घ. झ. ट. ठ. ड. °धात्काकुदं तालिव°; च. °धात्तालिव° त्काकुदं ता. १२ क. ख. घ. झ. ट. ठ. ड. दुर्वचनत्वं. १३ ग. ज. यान्यकरणे°. १४ क. ख. घ. झ. ठ. ड. 'कृत्स्ना' नास्ति; ट. °रणेऽधीता°: कृत्स्ना अ. १५ क. ख. घ. झ. ट. ठ. ड. 'तद्' नास्ति. १६ ग. च. ज. °रिट इ°. १७ ग. ज. 'अत्र' नास्ति. १८ च. भास्ननं. १९ क. ख. ९ (२७); ग. १०/३०; ठ. योज्यम् । इति निरुक्तटीकायां सप्तविंशतिः खण्डः; ड. २७ खण्डः २७; इतरेष्वङ्को नास्ति.

प्र वा॑वृजे सुप्रया ब॒र्हिरे॑षामा वि॒श्पती॑व बीरि॑ट इयाते। वि॒शा॒मक्तो॒रु॒षसः॑ पू॒र्वहू॑तौ वा॒युः पू॒षा स्व॒स्तये॑ नि॒युत्वा॑न् (ऋ० सं० ७ । ३९ । २)॥ प्रवृज्यते सुप्रायणं बर्हिरेषामेयाते सर्वस्य पातारौ वा पालयितारौ वा बीरिटमन्तरिक्षं भियो वा भासो वा ततिरपि वोपमार्थे स्यात्सर्वपती इव राजानौ बीरिटे गणे मनुष्याणां राज्या विवासे पूर्वस्यामभिहूतौ वायुश्च नियुत्वान् पूषा च स्वस्त्ययनाय नियुत्वान् नियुतोऽस्याश्वा नियुतो नियमनाद्वा नियोजनाद्वाच्छाभेराप्तुमिति शाकपूणिः परीं सीमिति व्याख्यातौ[1] एनमेनामस्या अस्येत्येतेन व्याख्यातं सृणिरङ्कुशो भवति सरणादङ्कुशोऽञ्चतेराकुचितो भवतीति वा। नेदीय इत्सृण्यः पक्कमेयादित्यपि निगमो भवत्यन्तिकतममङ्कुशादायात्पक्कमौषधमागच्छत्विति त्यागच्छत्विति ॥ २८[2] ॥

इति[3] पञ्चमाध्यायस्य चतुर्थः पादः।

प्रवावृजे सुप्रया[4] इति । वसिष्ठस्यार्षम्[5] । त्रिष्टुप् । प्रवावृजे प्रवृज्यते । प्रस्तीर्यत इत्यर्थः । सुप्रयाः सुप्रायणं[6] सुप्रगमनं यत्सुखमभिगच्छन्ति देवताः । प्रस्तीर्णे[7] तस्मिन् आविश्पतीव बीरिट इयाते । एयाते विश्पती सर्वस्य जगतः पातारौ वा पालयितारौ वा । धात्वन्यत्वमर्थैकत्वम् । इवः पादपूरणः । एवेत्येतस्यार्थे वा । क्व पुनरवस्थितौ एयाते इति । उच्यते । बीरिटे । अन्तरिक्ष इत्यर्थः । 'अपि वा'। अयमिव-

'बीरिटम्' इत्यस्य

---

१ क. ख. छ. त. द. व्याख्यातमेनमे°. २ क. ख. १० (२८); छ. त. ३१; द. १७. ३ ङ. थ. ध. 'इति० पादः' नास्ति; छ. इति पञ्चमोऽध्यायः; त. इति पञ्चमोऽध्यायः समाप्तः; द. इति नैरुक्तस्य पञ्चमाध्यायस्य चतुर्थः पादः। पञ्चमोऽध्यायः समाप्तः. ४ ग. ज. °प्रया बर्हिरेषामिति; घ. झ. ट. °प्रया बर्हिरेषां० स्वस्तये नियुत्वान्। वसि°; ठ. ड. प्रवावृजे इति. ५ घ. झ. ट. ठ. ङ. °ष्टुप्। ऊर्ध्वो अग्निरिति वैश्वदेवे सूक्ते वायुपूषदेवताकोऽयम् । प्रवृज्यते°; च. °ष्टुप्। प्रवावृजे प्रवृ° ऊर्ध्वो अग्नि० देवताकोऽयम्. ६ क. ख. घ. झ. ठ. ड. सुप्रयाणं; ट. सुप्रयाणं° प्राय, ७ क. ख. घ. झ. ट. ट. ड. प्रास्तीर्णे; च. प्रस्तीर्णे' प्रा.

शब्द 'उपमार्थे' एव 'स्यात्' विश्पती[1] इवेति । 'सर्वपती इव राजानौ बीरिटे गणे' अवस्थितौ । आह । कस्य पुनरेयाते कस्मिन्काल एयाते कौ वा एयाते कं[2] वार्थं पुरस्कृत्य एयाते इति । उच्यते । एषां मनुष्याणां विशां तासु तासु क्रियास्वाहूयमानौ अक्तोः रात्र्याः अपगमे सति उषसश्चागमनकाले पूर्वस्याम् एव अभिहूतौ प्रथम एवाह्वानकाले वायुश्च नियुत्वान् पूषा च स्वस्त्ययनार्थमेयाते यजमानस्य । अन्तरिक्षेणैव हि देवता आगच्छन्तीति 'बीरिटमन्तरिक्षम्' इत्युपपद्यते । यस्मिन्नपि पक्षे गणो बीरिटशब्देनोच्यते तस्मिन्नपि पक्षे विश्पती राजानौ सर्वदा गणमध्यगतावेवागच्छत इत्युपपद्यत एव ।

आह । 'नियुत्वान्' कस्मादिति । उच्यते । 'नियुतोऽस्याश्वाः' । अथ 'नियुतः' कस्मात् । उच्यते । 'नियमनात्'[3] । नीचैर्हि[4] ते यम्यन्ते । 'नियोजनाद्वा' । नियुज्यन्ते[5] हि ते[6] रथे । 'नियुतो वायोः' (निघ० १।१५) इत्येतस्मात्कारणाद्विप्रकृष्टोऽपि नियुत्वच्छब्दो वायुशब्देनैव संयोजितो भाष्यकारेण । न हि पूष्णो नियुद्भिः संबन्धोऽस्ति ।

'अच्छ' 'परी'
'ईम्' 'सीम्'
'एनम्' 'एनाम्'
इत्येतेषाम्

'अच्छ' (७८) इत्येष शब्दः 'अभेः' अर्थे भवति । 'आप्तुम् इति' योऽर्थ उक्तः स्यात्स एवार्थोऽच्छेत्यनेनोक्तो भवति । एवं 'शाकपूणिः' आचार्यो मन्यते । परि (७९) (निरु० १ । ३) ईं (८०) (निरु० १ । ७) सीम् (८१) (निरु० १ । ९) इति[7] एते 'व्याख्याताः' षष्ठा[8]ध्याये निपातोपसर्गप्रकरणे । 'एनम्' (८२) 'एनाम्' (८३) इत्येतत्[9]पदद्वयम् 'अस्याः अस्येत्यनेन' पदद्वयेन 'व्याख्यातं' नवमेऽध्याये [निरु० ४ । २५] । निगमाश्चात्र मृग्याः ।

---

१ क. ख. घ. झ. ट. ठ. ड. विष्पतीव सर्व°; ग. ज. दिष्पती इवेति सर्वपती इवेति सर्वपती इव बीरि°; च. विष्पती ईवेति व. २ ग. ज. चार्थं. ३ ग. ज. नियमात्; च. नियमनात्° मना. ४ क. ख. घ. झ. ठ. ड. °र्हि नियम्य°; च. °र्हि ते य° नि. ५ ग. ज. नियुज्यन्ति; च. नियुज्यन्ति° न्ते. ६ क. ख. घ. झ. ट. ठ. ड. 'ते' नास्ति. ७ घ. झ. ट. ठ. ड. 'इति' नास्ति. ८ क. ख. घ. झ. ट. ठ. ड. षष्ठेऽध्याये. ९ क. ख. घ. झ. ट. ठ. ड. 'एतत्' नास्ति.

'सृणिः' (८४) इत्यनवगतम् । 'अङ्कुशो भवति' इत्यभिधेयवचनम् । 'सरणात्' इति व्युत्पत्तिः । 'सरणैः'[1] इति न्याय्यम् । सरति[2] गच्छति ह्यसौ[3] हस्तिशिरासि । 'अङ्कुशोऽञ्चतेः' इति पर्यायप्रसक्तम् । अञ्चति ह्यतो[3] गच्छति हस्तिशिरासि । 'आकुचितो भवतीति वा' । स ह्याभिमुख्येन कुटिलीभूतो भवति[4] ।

'युनक्त सीरा वि युगा तनुध्वं[5] कृते योनौ वपतेह बीजम् । गिरा च
श्रुष्टिः सभरा असन्नो नेदीय इत्सृण्यः पक्वमेयात्'
'सृणिः इत्यस्य' [ऋ०सं०१०।१०१।३ वा०स०१२।६८]॥

बुधस्येयमार्षम्[6] । अग्नौ मध्यमदान्तयोजने सीरानुमन्त्रणे विनियुक्ता [मान० श्रौ० २ । ७ । १२ ॥ ३ । २ । ४] । युनक्त योजयत हे योजयितारः सीराणि । वितनुत चैतानि युगानि । कृते कृष्टेऽस्मिन्योनौ क्षेत्रे बीजं वपत[7] यथा गिरा वाचा यत्प्रार्थयामस्तत्क्षिप्रमेव[8] असत् भवेत् सभराश्चातिफलभारवत्य एताः स्युरोषधयो नोऽस्माकम् । किंच । नेदीय इत्सृण्यः । सृणिरङ्कुशो[9] यावति प्रदेशेऽवस्थितमाक्रष्टुं शक्नोति ततोऽपि नेदीयोऽन्नं[10] पक्वम् औषधं प्रचुरत्वादोषधीनाम् एयात् आगच्छेदस्मान् प्रति । तथा शीघ्रं बहु[11] वपतेत्यभिप्रायः[12] । एवमत्र नेदीय इत्यनेन संबन्धात् 'सृणिरङ्कुशो भवति' इत्युपपद्यते । अन्ये तु ब्रुवते । तथा वपत यथा प्राग्दात्राकर्षणान्मुष्टिः पूर्येतेति दात्रे[13]णेवास्मिन्पक्षेऽङ्कुशशब्देनोच्यते तदाकृष्टसस्यस्याङ्कुशाभावात्[14] । दात्राकर्षणात्प्राक्

---

१ घ. झ. ट. ठ. ड. सरणं. २ ग. ज. सर इति ग°. ३ क. ख. घ. झ. ट. ठ. ड. 'हि' नास्ति. ४ ग. भवति । ९१ । युन°; घ. झ. ट. ठ. ड. भवतीति युन°. ५ ग. च. ज. तनुध्वमिति; घ. झ. ट. तनुध्वं० सृण्यः पक्वमेयात्. ६ क. ख. घ. झ. ट. ठ. ड. °मार्षम् । त्रिष्टुप् । वैश्वदेवी ऋत्विक्स्तुतिर्वा । अग्नौ°; च. °मार्षं˅। अग्नौ° त्रिष्टुप्०ऽक्स्तुतिर्वा. ७ क. ख. घ. झ. ट. ठ. ड. °वपत । तथा वपत यथा°; च. वपत˅ यथा° तथा वपत. ८ क. ख. घ. झ. ट. ठ. ड. °स्तत् श्रुष्टिः क्षिप्र°. ९ क. ख. घ. झ. ट. ठ. ड. °ङ्कुशो भवति याव°. १० क. ख. घ. झ. ट. ठ. ड. नेदीयोऽत्र प°. ११ क. ख. घ. झ. ट. ठ. ड. बहु च वप°; च. सी (शी) घ्रं बहु˅ वप° च. १२ क. ख. घ. झ. ट. ठ. ड. °तेत्यर्थः. १३ ट क्षेत्र° दा. १४ ग. ज. °कृष्टसस्यकुशाभा°.

अन्तिकतमं संनिकृष्टतममौषधं पक्कमागच्छेदिति युष्माभिरेवमुक्तं[1] भवत्विति । एतद्वयमाशास्महे[2] पक्कमौषधमागच्छत्विति ।

अध्यायसमाप्त्युपप्रदर्शनार्थाय द्विरभ्यास इति ।

[3]जम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ ऋज्वर्थायां निरुक्तवृत्तौ दशमो[4]ऽध्यायः समाप्तः ।

---

*संस्निमसश्चन्तीनयस्थवरांहोगायन्नित्वापवित्रंपुरुत्वाकिमिच्चेमवच्चेऽग्निंनरएकयापान्तंमन्युरुवंश्यप्सराउतांसिसंइन्नियत्कदामितपस्वीविन्तःसुगुरंसद्धकश्चन्द्रमाअरुणोमायइन्द्राग्नीमानःसमस्यहविषांजारःपृथक्प्रायन्प्रीणीतसुदेवःप्रवावृजेऽष्टाविंशतिः ।

इति निरुक्ते पूर्वषट्के पञ्चमोऽध्यायः ।

---

* छ. त. द. खण्डशृङ्खला नास्ति.

१. क. ख. घ. झ. °रेवमुक्ते सति एत°; ग ञ. °रेवमुक्तं भ°; च. °रेवमुक्तं भवत्विति' तु; ट. °रेवमुक्ते सति एत° सं भवतु; ठ. ड. °रेव संभवतु । एत°. २ ग. °स्महे । ३१ । पक्क°. ३ घ. झ. ट. इति श्रीमद्भगवद्दुर्गकृत (घ. ट. °दुर्गवृत) वृत्तौ दशमस्याध्यायस्य चतुर्थः पादोऽध्यायश्च समाप्तः; च. दशमोऽध्यायः समाप्तः; ठ. ड. इति जम्बू°. ४ ठ. ड. निवण्टुपञ्चमाध्यायसहदशमोऽध्यायः समाप्तः १८ खण्डः.

अथ षष्ठाध्यायस्य

प्रथमः पादः ।

ॐ३म् । त्वमग्ने द्युभिस्त्वमाशुशुक्षणिस्त्वमद्भ्यस्त्वमश्मनस्परि । त्वं वनेभ्यस्त्वमोषधीभ्यस्त्वं नृणां नृपते जायसे शुचिः [ऋ० सं० २ । १ । १]॥ त्वमग्ने द्युभिरहोभिस्त्वमाशुशुक्षणिराशु इति च शु इति च क्षिप्रनामनी भवतः क्षणिरुत्तरः क्षणोतेराशु शुचा क्षणोतीति वा सनोतीति वा शुक् शोचतेः पञ्चम्यर्थे वा प्रथमा तथाहि वाक्यसंयोग आ इत्याकार उपसर्गः पुरस्ताच्चिकीर्षितज उत्तर आशुशोचयिषुरिति शुचिः शोचतेर्ज्वलतिकर्मणोऽयमपीतरः शुचिरेतस्मादेव निःषिक्तमस्मात्पापकमिति नैरुक्ताः । इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत् । आशा दिशो भवन्त्यासदनादाशा उपदिशो भवन्त्यभ्यशनात्काशिर्मुष्टिः प्रकाशनान्मुष्टिर्मोचनाद्वा मोषणाद्वा मोहनाद्वा । इमे चिदिन्द्र रोदसी अपारे यत्संगृभ्णा मघवन्काशिरित्ते । इमे चिदिन्द्र रोदसी रोधसी द्यावापृथिव्यौ विरोधनाद्रोधः कूलं निरुणद्धि स्रोतः कूलं रुजतेर्विपरीताल्लोष्टोऽविपर्ययेणापारे दूरपारे यत्संगृभ्णासि मघवन्काशिस्ते महान् । अहस्तमिन्द्र सं पिणक्कुणारुम् । अहस्तमिन्द्र कृत्वा संपिण्ढि परिक्वणनं मेघम् ॥ १ ॥

'आशुशुक्षणिः' इत्यस्य प्रयोगोऽर्थश्च — 'आशुशुक्षाणिः' (निघ० ४ । ३ । १) इत्यनवगतम् । 'आशु शुक्सनिता वा' स्यात् 'आशु शुक्क्षणिता वा' । त्वमग्ने द्युभिः । गृत्समदस्येयमार्षम् । प्रातरनुवाकाश्विनयोः शस्यते । (आश्व० श्रौ० ४ । १३]। हे भगवन्नग्ने त्वं द्युभिः अहोभिर्निमित्त-

---

१ क. ख. द. निष्शिक्तं°; त. निष्शिक्त°. २ क ख. छ. त. द. °रुक्ताः ।१। इन्द्र°. ३ क. ख. २ (१); छ. त. द. २. ४ क. ख. व. झ. शुचा संनिता; ट. शुचाँ सनिता° क्. ५ क. ख. झ. शुचा क्षणिता; व. शुचा क्षिता; ट. शुचाँ क्षिता° क्. ६ क.ख. व. झ.ट. द्युभिस्त्वमाशुशुक्षणिः० जायसे शुचिः । गृत्स°; ठ. ड. द्युभिरिति । गृत्स°. ७ क. ख. व. झ. ट. °स्यते । जगत्याग्नेयी । हे°; च. °स्यते० । हे °जगत्याग्नेयी.

भूतेः पौर्णमास्यादिरेषां मथ्यमानो नृणां जायसे । ' पौर्णमास्याममावस्यायां वादधीत ' इत्युक्तम् (मान० श्रौ० १ । ५ । १ । ८) । किंच । त्वमाशुशुक्षणिः । ' आशु इति च शु इति च ' एते ' क्षिप्रनामनी भवतः ' । ' शु ' इत्येतदत्र प्रासङ्गिकमन्यत्रोपकारं करिष्यतीति । तद्यथा । ' शुनो वायुः शु एत्यन्तरिक्षे ' (नि० ९ । ४०) इत्येवमादौ । ' आशुशुक्षणिः ' इत्येतेषां पञ्चानामक्षराणामाद्यं तावदक्षरद्वयम् ' आशु ' इत्येतत्क्षिप्रनाम । अधुना ' शु ' इत्येतत्तृतीयमक्षरमतिक्रम्योत्तरमक्षरद्वयं निराह । ' क्षणिः ' इत्येष द्व्यक्षरः शब्दः ' क्षणोतेः ' धातोर्हिंसार्थस्य [धा० ८ । ३] ' सनोतेः ' वा संभजनार्थस्य । मध्यमं तु ' शु ' इत्येतदक्षरं शुचेर्दीप्त्यर्थस्य । अथ कोऽस्यः सर्वैरप्येतैरक्षरैरभिधीयत इति । उच्यते । ' आशु शुचा ' दीप्त्या ' क्षणोति ' हिनस्ति ' इति ' आशुशुक्षणिरग्निः । अथवा ' आशु शुचा सनोति ' संभजत ' इति ' आशुशुक्षणिरग्निः । क्षणिः क्षणोतेः सनोतेश्च विकल्पः । ' शुक् शोचतेः ' इति पञ्चानामक्षराणामाशुशुक्षणिशब्दे तृतीयमक्षरं 'शु' इति तस्यैतन्निर्वचनम् । एवं तावदयमेको निर्वचनप्रकार आशुशुक्षणिशब्दस्य । अथ ' वा ' एवमन्यथा स्यात् । ' पञ्चम्यर्थे प्रथमा ' इयं विभक्तिः । ' आशुशुक्षणेः ' इति यदुक्तं स्यादेतदुक्तं भवति ' आशुशुक्षणिः' इति । आह । किं पुनः कारणं प्रथमैषा सती पञ्चमीत्वेन विपरिणम्यत इति । उच्यते । ' तथाहि वाक्यसंयोगः ' । तेन प्रकारेण पञ्चमीत्वेन विपरिणतस्यास्य शब्दस्यानेन वाक्येन संयोगोऽर्थसंगतिर्भवति न यथावस्थितस्य । आह । कथं कृत्वेति । उच्यते । ' त्वमद्भ्यस्त्वमश्मनस्परि त्वं वनेभ्यस्त्वमोषधीभ्यः ' इत्येतान्युत्तराणि बहूनि पदानि पञ्चम्यन्तानि । तस्मादनेनापि पञ्चम्यन्तेनैव भवितव्यमित्युपपद्यते पञ्चमीत्वेन विपरिणाम इति । आशुशुक्षणिरित्यस्याक्षरपञ्चकस्य य एष

तस्यैव विविधा व्युत्पत्तिः

---

१ च. °क्रम्येमुत्त° म्यो. २ कं. ख. घ. झ. ट. ठ. ड. 'क्षणिः' नास्ति; ग. ज. क्षणः. ३ ग. ज. क्षणिरि°; च. °क्षणिरि° णे. ४ क. ख. घ. झ. ट. ठ. ड. °रेण पञ्चमीत्वेन विपरिणामे पञ्चमी°; च. °रेण पञ्चमी° पञ्चमीत्वेन विपरिणामे. ५ क. ख. घ. झ. ट. ठ. ड. 'अस्य' नास्ति; च. अस्य. ६ क. ख. °तान्यक्षराणि; घ. झ. ट. °न्युक्षराणि. ७ क. ख. घ. झ. ट. ठ. ड. °रित्येतस्या°.

पुरस्तात् ‘ आकारः ’ एष तावत् ‘ उपसर्गः ’ । यः पुनरे ‘ शुशुक्षणिः ’ इत्यनन्तरश्चतुरक्षरः शब्द एष ‘ चिकीर्षितजः ’ । चिकीर्षितादर्थाजातः । सन्नन्तादित्यभिप्रायः । अथ पुनः समस्तस्य कोऽर्थ इति । उच्यते । यः कश्चित् ‘ आशुशोचयिषुः ’ आदिदीपयिषुर्भवति स आशुशुक्षणिः । तस्मादाशुशुक्षणेस्त्वं हे भगवन्नग्ने जायसे । किमेतावदेव । नेत्युच्यते । त्वमद्भ्यो जायसे वैद्युतात्मना । त्वमेवाश्मनः परितः सर्वतः इतरेतराभिघाताज्जायसे । त्वं वनेभ्यो दारुभ्यः । त्वमोषधीभ्यः शरादिभ्यः । त्वं नृणां मनुष्याणां हे नृपते मनुष्यपते जायसे अभिव्यज्यसे शुचिः । दीप्त इत्यर्थः ।

‘शुचिः शोचतेः’ ज्वलत्यर्थस्य । ‘ अयमन्तरः शुचिः ’ लौकिकः ‘एतस्मादेव’ इति वैयाकारणा मन्यन्ते । नैरुक्ताः पुनर्निःपूर्वात्सिञ्चतेरितरः शुचिरित्येवं मन्यन्ते । निष्कृष्य हि तस्मात् ‘ पापकम् ’ अशुचित्वमन्यस्मिन् ‘ सिक्तं ’ भवतीत्येवम् । अत्राग्निर्वाशुशुक्षणिरन्यो वा यः कश्चिदग्निं मथित्वा तेन किंचिदादिदीपयिषुर्भवति स वाशुशुक्षणिरिति ।

आशुशुक्षणिरग्निर्यजमानादिर्वा

‘आशाभ्यः’ (२) इत्यनवगतमनेकार्थं च । आसदनादित्यवगमः ।

‘इन्द्र आशाभ्यस्परि सर्वाभ्यो अभयं करत् । जेता शत्रून्वि चर्षणिः ’

‘ आशाभ्यः ’ इत्यस्य

(ऋ० सं० २ । ४१ । १२)॥ गृत्समदस्येयमार्षम् । अभिप्लवस्य द्वितीयेऽहनि प्रउगे शस्यते (आ० श्रौ० ७ । ६) । इन्द्र आशाभ्यो दिग्भ्यो हि यद्भयमुत्पद्यते जगतां दिङ्निवासिभ्यो भूतेभ्यः तत् अभयं करत् । करोत्वित्यर्थः । आह । किंलक्षणः पुनरसाविन्द्र इति । जेता शत्रून्वि चर्षणिः । अधिद्रष्टा सार्वभौतिकानां कर्मणाम् । ‘ आशा दिशो भवन्ति आसदनात् ’ । आभिमुख्येन हि ताः सर्वत्र सन्ना इव भवन्ति । ‘ आशा उपदिशो भवन्त्यभ्यशनात् ’ । अभ्यश्नुवते हि ताः परस्परेणैव ।

---

१ ग. ज. आशुशु°; च. आशुशु°. २ घ. ट. ठ. ड. ‘चिकीर्षितजः’ नास्ति. ३ क. ख. घ. ट. °र्वाच्य आशु°; झ. °र्वा स्म आशु°. ४ क. ख. °रिति । १ । आशा°. ५ ड. °मम: । १ । इन्द्र°. ६ ग. ज. °स्परि (ग. स्परि । २ ।) । गृत्स°; घ. झ. ट. °स्परि० वि चर्षणिः । गृत्स°. ७ क. ख. घ. झ. ट. ठ. ड. °मार्षम् । गायत्री । ऐन्द्री । अभि°; च. °मार्षम् । अभि° गायत्री ऐन्द्री. ८ क. ख. घ. झ. ट. ठ. ड. जगतां नानादिङ्नि°. ९ क. ख. घ. झ. ट. ठ. ड. ‘तत्’
१२ नास्ति. १० ग. ज. आशाति. ११ ग. ज. सर्वे°.

'काशिः' (३) इत्यनवगतम् । 'काशयितव्यः' इत्यवगमः ।

'काशिः' इत्यस्य

'मुष्टिः' इत्यभिधेयवचनम् । '[1]प्रकाशनात्' इति निर्वचनम् । 'मुष्टिः' इत्येतत्पर्यायप्रसक्तं निरुच्यते । 'मोचनाद्वा' । मुच्यते ह्यसौ । मोषणाद्वा' । तेन हि मुष्यते । 'मोहनाद्वा' । तत्र हि मुह्यति परः [2]किमप्येतस्मिन्मुष्टाविति । 'उताभये पुरुहूत[3] श्रवोभिरेको दृ[4]ळ्हमवदो वृत्रहा सन् । इमे चिदिन्द्र रोदसी अपारे यत्संगृभ्णा मघवन्काशिरित्ते' (ऋ० सं० ३ । ३० । ५) ॥ विश्वामित्रस्यार्षम् । त्रिष्टुप्[5] । पृष्ठ्याभिप्लवयोर्द्वितीयपञ्चमयोरह्नोः संपातसूक्तं नाम तत्रेयं शस्यतेऽच्छावाकेन माध्यन्दिने सवने (आ० श्रौ० ७ । ५) । 'सहदानुमलातृण उद्वृह रक्षः' इत्येताश्च (ऋ० सं० ३ । ३० । ८-१०-१७) तत्रैव । अपि भयवति संग्रामे अभये इव हे पुरुहूत एकः अपि सन् असहायः श्रवोभिः श्रवणीयैः शब्दैः अन्नैर्वा हविर्भि[6]स्तृप्तः सन् दृढं समर्थम् अवदः वृत्रहा । शत्रुहेत्यर्थः । किमेतावदेव [7]माहाभाग्यम् । नेत्युच्यते । इदं चान्यत् । इमे चित् इमे अपि रोदसी द्यावापृथिव्यौ एवमपि अपारे दूरपारे सती यत्संगृभ्णासि त्वम् अहो काशिस्ते महान् । एवमत्र संग्रहणसंबन्धात्काशिशब्दो मुष्ट्यभिधायक इत्युपपद्यते ।

प्रसक्तानुप्रसक्तमुच्यते । ये एते 'रोदसी' एते 'रोधसी' । किं कारणम् ।

रोदसीशब्दव्युत्पत्तिः

'विरोधनात्' । विविधानि हि भूतान्येते रुन्द्धः । 'कूलम्' अपि 'रोधः' [8]इत्युच्यते । तदपि ह्युदक[9]स्रोतांसि 'निरुणद्धि' । 'कूलं रुजतेः' धातोः । तत्पुनर्वैपरीत्येन । 'लोष्टः' पुनरस्यैव धातोः 'अविपर्ययेण' ।

'कुणारुम्' (४) इत्यनवगतम् । मेघोऽभिधेयः । 'क्वणनम्'

---

१ ठ. ड. 'प्र' नास्ति. २ क. ख. किमेतन्मृष्टा°; घ. झ. ट. ठ. ड. 'अपि' नास्ति. ३ ग. °हूते। विश्वा°; ज. °हूत। विश्वा°; घ. झ. ट. °हूत० काशिरित्ते। विश्वा°. ४ क. ख. च. दृढम°. ५ क. ख. घ. झ. ट. त्रिष्टुप् । ऐन्द्री पृष्ठ्या°; च. त्रिष्टुप् । पृष्ठ्या° ऐन्द्री. ६ क. ख. घ. झ. ट. ठ. ड. हविर्भिर्वा तृ°. ७ ग. च. महा°. ८ क. ख. घ. झ. ट. ठ. ड. 'इति' नास्ति. ९ च. स्रोतांसि° स्रो.

'कुणारुम्' इत्यस्य

इति शब्दसमाधिः[1]। 'सहदानुं पुरुहूत[2] क्षियन्तमहस्तमिन्द्र सं पिणक्कुणारुम्। अभि वृत्रं वर्धमानं पियारुमपादमिन्द्र तवसा जवन्थ' (ऋ० सं० ३ । ३० । ८) ॥ 'सह' इत्युदकनाम (निघ० १ । १२ । ४०) । उदकदातारं मेघं हे पुरुहूत इन्द्र क्षियन्तम् अन्तरिक्षलोके निवसन्तं गच्छन्तं वापि[3] अहस्तम् अप्रतीकारसमर्थं कृत्वा तत[4] एनं संपिणक् संपिण्ढि[5] चूर्णय[6] कुणारुं परिक्कणनम्। शब्दकारिणमित्यर्थः। एवं तावदेनं कुरु। अथ पुनर्योऽयमपरो वृत्रः वर्तिता मेघः एनमप्युपरि[7] वर्धमानं पियारुं हिंसनशीलम् अपादं गमनहीनं कृत्वा तत एनं तवसा बलेन जवन्थ। जहीत्यर्थः। एवमत्र वधाधिकारान्मेघाधिकाराच्च 'कुणारुं क्वणनशीलम्' इत्युपपद्यते।

'अलातृणः' (५) इत्यनवगतम्। 'अलमातर्दनः' इत्यवगमः ॥ १[8] ॥

अलातृणो वल इन्द्र व्रजो गोः पुरा हन्तोर्भयमानो व्यार। सुगान्पथो अकृणोन्निरजे गाः प्रावन्वाणीः पुरुहूतं धमन्तीः (ऋ० सं० ३ । ३० । १०) ॥ अलातृणोऽलमातर्दनो मेघो वलो वृणोतेर्व्रजो व्रजत्यन्तरिक्षे गोरेतस्या माध्यमिकाया वाचः पुरा हननाद्भयमानो व्यार। सुगान्पथो अकृणोन्निरजे गाः। सुगमनान् पथो[9]ऽकरोन्निर्गमनाय[10] गवाम्। प्रावन्वाणीः पुरुहूतं धमन्तीः। आपो वा वहनाद्वाचो वा वदनाद्बहुभिराहूतमुदकं भवति धमतिर्गतिकर्मा ॥ २[11] ॥

---

१ ग. °माधिः । ४ । सह°. २ ग. ज. च. °हूत । सह°; घ. झ. ट. °हूत॰ तवसा जवन्थ । सह°; ठ. ड. °हूत द्युमन्तमह°. ३ क. ख. घ. झ. ट. ठ. ड. 'अपि' नास्ति. ४ क. ख. घ. झ. ठ. ड. ततः पुनः सं°; ट. ततः पुनः सं° एनं. ५ घ. ज. ठ. ड. संपिणि. ६ क. ख. घ. ट. संचूर्णय; च. ~चूर्णय° सं. ७ ग. ज. एतम°. ८ क. ख. २ (१); ग ५/२; घ. झ. ट. च. ज. अङ्को नास्ति. ९ क. ख. छ. त. द. पथो अक°. १० क. ख. छ. त. द. °करोन्निरजनाय गवाम्; ङ. ठ. ड. °करोन्निर्ग°. ११ क. ख. ३ (२); छ. त. द. ३.

'अलातृणः' इत्यस्य

अलातृणो वेळः[१] । हे इन्द्र योऽयम् अलमातर्दनः पर्याप्त आतर्दयितुमुदकपूर्णो वेलो[२] मेघः । स ह्यावृणोत्युदकम् । व्रजश्च स एव 'अन्तरिक्षे व्रजति' इति । गुणान्तरत्वादजामि । आह । किं तस्येति । उच्यते[३] । एष गोः एतस्या माध्यमिकाया वाचो भावत्कायाः शब्दमुपश्रुत्य पुरा एव हननात् भवतो वधात् भयमानो बिभ्यत् असह्योऽयमस्य वध इति मन्यमानो व्यार । विश्लथीभवतीत्यर्थः । स त्वमनेनैव प्रकारेणैनं मेघं विदारयन् सुगान् सुगमनान् पथो मार्गान् अकृणोत् करोषि वा निर्गमनाय एतासां मेघोदरान्तर्गतानां[४] गवाम् अपाम् । विदीर्णे हि[६] तस्मिन्मेघे सुखं[७] तास्तस्मान्मेघोदरान्निर्गच्छन्ति । किंच । निर्गताः सत्यस्ता[८] वाणीः आपः प्रावन् प्रकर्षेणावन् रक्षन्ति धमन्तीः गच्छन्त्यो यथानिम्नमभिसरमाणाः पुरुहूतम् उदकम् । यदेतदुदपानं[९] तडागनद्यादि तत्प्रति धमन्तीस्तदेव रक्षन्ति । तद्ध्युपदस्येद्यदि न पतेरंस्ता आपः । एवमापो वाणीशब्देनोक्ताः । ता हि 'वहनात्' वाणीरित्युच्यन्ते । 'वाचो वा वदनात्' वाणीशब्देनोच्यन्ते[१०] । यदा विदीर्णान्मेघान्निर्गतमुदकं पुरुहूतं भवति वर्षभावेनाथ तदा तेषामेव प्राणिनामहो वृष्टमित्येवमाद्या वाणीर्वाचो धमन्तीमुखेभ्यो[११] निर्गच्छमानास्तदेवोदकं प्रावन् । प्रागच्छन्नित्यर्थः । एवमत्र 'पुरा हननाद्भयमानो व्यार' इत्यनेन संबन्धात् 'अलातृणो मेव' इत्युपपद्यते ।

'बहुभिः' प्राणिभिराहूयते ममेदं ममेदमिति तस्मात्पुरुहूतम् 'उदकं भवति' । 'धमतिः' एष 'गतिकर्मा' एव अत्र[१२] न स्तुतिकर्मेत्यभिप्रायः । स्तुतिकर्मस्वपि हि धमतिः पठितो 'धमति नदति सरति' इति (निघ० ३।१४) ।

'निरजे गाः' इत्यत्र केचित् 'पशुगव्य एताः' इति व्याचक्षते । तासां हीन्द्रेण विदारितेषु मेघेषु सुगमनाः पन्थानो निर्गमनाय भवन्ति

---

१ क. ख. च. ज. वलः; घ. झ. ट. वल इन्द्र० पुरुहूतं धमन्तीः । हे°; ठ. ड. अलातृण इति । हे°. २ क. ख. ग. च. ज. ठ. वलो. ३ क. ख. घ. झ. ठ. ट. ड. 'उच्यते' नास्ति. ४ ग. ज. मेघोनरा°; च. मेघान्तरा° द्. ५ च. °तानां च गवा°. ६ ग. ज. 'हि' नास्ति ७ च. सुखं° खं. ८ घ. ट. ठ. ड. सत्याः स्ता वा°; झ. सत्यः स्ता वा°. ९ क. ख. °मुदकस्थानं; घ. झ. ट. ठ. ड. °मुदकपानं. १० क. ख. घ. झ. ट. ठ. ड. °ह्वाणीरित्युच्यन्ते. ११ ग. ज. °मुख्येभ्यो; च. °मुख्येभ्यो° खे. १२ क. ख. घ. झ. ट. ठ. ड. °एव नात्र स्तुति°.

सुयवसत्वान्नीरजस्कत्वाच्च । 'प्रावन् वाणी' इत्यत आरभ्य समानमेत्र पूर्वेण । 'सल्लूकम्' (६) इत्यनवगतम् । 'संलुब्धम्'[1] इति शब्दसमाधिः 'सररूकम्' इति वा । [2] २ ।

उद्वृह[3] रक्षः सहमूलमिन्द्र वृश्चा मध्यं प्रत्यग्रं शृणीहि । आ कीवतः सललूकं चकर्थ ब्रह्मद्विषे तपुषिं हेतिमस्य (ऋ० सं० ३ । ३० । १७)॥ उद्धर रक्षः सहमूलमिन्द्र मूलं मोचनाद्वा मोषणाद्वा मोहनाद्वा वृश्च मध्यं प्रतिशृणीह्यग्रमग्रमागतं भवत्या कियतो[4] देशात्सललूकं संलुब्धं[5] भवति पापकमिति नैरुक्ताः सररूकं वा स्यात्सर्त्तेरभ्यस्तात्तपुषिस्तपतेर्हेतिर्हन्तेः । त्यं चिदित्था कत्पयं शयानम् । सुखपयसं सुखमस्य पयः । विस्रुह आपो भवन्ति विस्रवणात् । वया इव रुरुहुः सप्त विस्रुह इत्यपि निगमो भवति वीरुध ओषधयो भवन्ति विरोहणात् । वीरुधः पारयिष्णु[6] इत्यपि निगमो भवति नक्षद्दाभमश्नुवानदाभमभ्यशनेन दभ्नोतीति । नक्षद्दाभं ततुरिं पर्वतेष्ठामित्यपि निगमो भवत्यस्कृधोयुरकृध्वायुः कृध्विति ह्रस्वनाम निकृत्तं भवति । यो अस्कृधोयुरजरः स्ववानित्यपि निगमो भवति निशृम्भा[7] निश्रथ्यहारिणः ॥३॥[8]

उद्वृह रक्षः[9] । उद्धर एतत् रक्षः सहमूलं हे इन्द्र । वृश्चा अस्य छिन्धि मध्यम् । अग्रं चास्य प्रतिशृणीहि । प्रतिजहीत्यर्थः । किंच । आ कीवतः[10] आ कस्मात् देशात् एतदुद्धर । यस्माद्वितर्कयमाणा अपि न[11] शक्नुयुर्वितर्कयितुं कियतोऽपि प्रदेशादेतदुद्धृ-

'सल्लूकम्' इत्यस्य

---

१ ठ. ड सल्लुब्धम्. २ क. ख. २ (३); ग. ३; ठ. ड. °मिति वा । इति निरुक्तटीकायां षष्ठाध्याये द्वितीयः खण्डः. ३ क. ख. छ. त. ठ. उद्वृइ. ४ त. द. °त्या कीयतो° कि. ५ ठ. ड. सल्लुब्धं. ६ क. ख. छ. त. द. °यिष्णव १ इत्य°. ७ छ. त. द. 'निशृम्भा निश्रथ्यहारिणः' नास्ति. ८ क. ख. ४ (३); छ. त. द ४. ९ ग. रक्षः ६ । उद्ध°; घ. झ. ट. रक्षः सहमूल० हेतिमस्य । उद्ध°; ठ. ड. रक्ष इति । उद्ध°. १० घ. झ. ट. ठ. ड. °वतः । आ कि (झ. की) यत इति पाठांतरं । आ क°; च. °वतः ~ आक° आ किंयत इति पाठांतरं. ११ ग. ज. 'न' नास्ति.

तमिति । यथा न किंचिदप्यस्यावशिष्यते तथैतदुद्धरेत्यभिप्रायः । तथा चैतदुद्धृत्य सल्लूकं संलुब्धं संमूढम् अप्रतिपक्षं कुरु । अथवा ‘ पापकं ’ पापतरम् अस्मत्तः कुरु एतद् ‘ इति ’ नैरुक्तपक्षेण । अथवा सररूकं सरणशीलं नाशनशीलं प्रच्युतं स्वदेशात् एतत्कुरु । तत एनदुन्मूलं कृत्वा स्थानप्रच्युतायास्मै रक्षसे ब्रह्मद्विषे ब्राह्मणद्वेष्ट्रे तपुर्षिं तापयित्रीं हेतिं हन्त्रीम् आयुधजातिं मध्याग्रच्छेदनाय पुनः पुनः अस्य । क्षिपेत्यर्थः । एवमत्र ‘ सल्लूकम् ’ इति लुभेर्मोहनार्थस्य शब्दसारूप्यात् ‘ संलुब्धम् ’ इत्युपपद्यते । ‘ सर्तेः ’ अप्यत्र सारूप्यमस्तीति ‘ सररूकं वा स्यात् ’ इत्युक्तं भाष्यकारेण । रक्षोविशेषणं चैतत्तस्य हि संमोहो वा नाशनं वाभीष्टमिति ।

‘ कत्पयम् ’ (७) इत्यनवगतम् । ‘ कपयम् ’ इत्यवगमः । ‘ सुखपयसम् ’ इति पर्यायेणाभिधेयवचनम् । मधुरोदको यो मेघः सोऽभिधेयः । किं कारणम् । ‘ सुखं ’ हि सुखोत्पादनम् ‘ अस्य पयः ’ मधुरत्वात् ।

‘ कत्पयम् ’ इत्यस्य

‘ त्यं चिदित्था कत्पयं शयानमसूर्ये तमसि वावृधानम् । तं चिन्मन्दानो वृषभः सुतस्योच्चैरिन्द्रो अपगूर्या जघान ’ (ऋ०सं० ५ । ३२ । ६)॥

गातुर्नामात्रेयस्तस्येयमार्षम् । त्यं तं मेघम् इत्था अमुना प्रकारेण अथवा अमुष्मिन्नन्तरिक्षलोके कत्पयं सुखोदकं शयानम् असूर्यं च तमः कृत्वा वावृधानं वर्धमानं मन्दानः मन्दमानो वृषभो वर्षिता इन्द्रः सुतस्य अभिषुतस्य सोमस्य स्वमंशं पीत्वा तत उच्चैः वज्रम् अवगूर्य जघान । य एवंगुणविशिष्ट इन्द्रः सोऽस्माकमिदं नाम करोत्वित्येवमा-

१ ठ. ड. सल्लुब्धं. २ ग. ज •निरुक्त°. ३ व. झ. ट. ठ. ड. क्षरण°. ४ क. ख. व. झ. ट. ठ. ड. वाशन°; ग. ज. ‘नाशनशीलं’ नास्ति; च. नैशनैशीलं °नाशन. ५ ग. ज. °देशादेन कुरु. ६ क. ख. व झ. ट. ठ. ड. °जातिं मूलम· ध्याग्र°. ७ क. ख. घ. झ. ट. ठ. ड. °गमः । कपयमित्यवगमे सुख°; च. °गमः° मे. ८ ग. °त्वात् । ७ । त्यं°. ९ ग. ज. कत्पयं । गातु°; घ. झ. ट. कत्पयं शयानं० अपगूर्या जघान । गातु°. १० क. ख. घ. झ. ट ठ. ड. °सूर्यं तम– (व. ट. तप–) श्च कृ°; च. चं. ११ ग. ज. व. झ. ट ठ. ड. ‘ मन्दानः ’ नास्ति. १२ ग. ज. करोतीत्येव°; च. करोत्येव° त्वे.

शीर्योज्या । एवमत्र 'इन्द्रो जघान' इत्यनेन संबन्धात् ' कत्पयः सुखपयो मेघः ' इत्युपपद्यते तस्याभीष्टत्वात् ।

'विस्रुहः' (८) इत्यनवगतम् । ' विस्रवः ' इत्यवगमः । ' आपो भवन्ति ' इत्यभिधेयवचनम् । ' विस्रवणात् ' इति हेतुनिर्देशः । ' वैश्वानरस्य विमितानि चक्षसा सानूनि दिवो अमृतस्य केतुना । तस्येदु विश्वा भुवनाधि मूर्धनि वया इव रुरुहुः सप्त विस्रुहः' (ऋ० सं० ६ । ७ । ६) ॥ भरद्वाजस्येयमार्षम् । प्रातरनुवाकाश्विनयोः शस्यते (आ० श्रौ० ४ । १३) । वैश्वानरस्य भगवतोऽग्नेः अमृतस्य अमरणधर्मिणः केतुना कर्मणा चक्षसा चक्षुषा दर्शनेन दिवः अपि यानि सानूनि समुच्छ्रितानि स्थानानि तानि विमितानि । विनिर्मितानीत्यर्थः । अग्निप्रकाश्यमानविषयो हि लोकः कर्मणि प्रवर्तते । साधुभ्यः साधुना च पापेभ्यश्च पापेन च सार्वलौकिकेन कर्मणा स्वकर्मफलभोगायेदं सर्वं विनिर्मीयत इत्यनयापेक्षयोक्तं वैश्वानरस्य चक्षुषा केतुना च दिवोऽपि सानूनि निर्मितानीति । अग्निरेव हि वाच्यधिदेवताभावेनावस्थितः सर्वमिदं ख्यापयति ततः कर्म प्रतायते । तदुक्तम् ' अग्निर्वाग्भूत्वा मुखं प्राविशत् ' (ऐतरे० उप० १ ।२। ४) इति । किंच । तस्येदु विश्वा । तस्यैव वैश्वानरस्य पृथिवीभावेनावस्थितस्य । ' इयं वा अग्निर्वैश्वानरः' (मैत्रा० सं० १ । ४ । १३ ॥ २ । १ । २) इत्युक्तम् । विश्वानि भुवनानि सर्वभूतभावयितृण्युदकानि । ' भुवनम् ' इति ह्युदकनामसु पठितम् (निघ० १ । १२ । ५०) । मूर्धनि उपरि वया इव शाखा इव रुरुहुः सप्त विस्रुहः । सप्त सर्पणाः विस्रुहो विविधस्रवणा भूत्वा ततः शाखा इव रुरुहुः अस्यां पृथिव्यां नद्यादिभावेन । शाखा इव ह्येताः पृथिव्या उपरि यथानिम्नं विस्रवमाणा आपो लक्ष्यन्त इत्येतद्

---

१ क. ख. घ. झ. ट. ठ. ड. तस्य वचस्याभी°; च. तस्याभी° स्य वच. २ ग. °र्देशः । ८ । वैश्वा°. ३ ग ज. °तानि । भर°; व. झ. ट. °तानि - सप्त विस्रुहः । भर°. ४ क. ख. व. झ ट. ठ ड. °र्तते साधुन्यसाधुनि वा । साधु°; च. °र्तते । साधु° साधुन्यसाधुनि वा. ५ क. ख. घ. झ. ट. ठ. ड. ' च ' नास्ति; च. चं. ६ च. कर्मणा स्वकर्मणा स्वकर्मफल°. ७ ग ज. स्माप°. ८ ग. ज. वाग्नि°.

दृष्ट्वैवमवोचत् ' तस्येदु विश्वा भुवनाधि मूर्धनि वया इव रुरुहुः सप्त विस्रुहः' इति । एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च ' विस्रुह आपो भवन्ति ' इत्युपपद्यते । 'भुवन-' शब्देन भूतान्येवोच्यन्त इति केचिद्वर्णयन्ति । चतुर्विधश्च भूतग्रामो विस्रुहश्च वया इव रुरुहुः पृथिव्या उपरीति । ' सप्त ' शब्देनापि समुद्रानेव केचिद्वर्णयन्ति । ते हि पृथिव्याः शाखा इव लक्ष्यन्ते विस्रवन्ति च ।

भुवनशब्दस्य भूतानीति सप्तशब्दस्य च समुद्रा इत्यर्थ इति केचित्

' वीरुधः ' (९) इत्यनवगतम् । ' विरोहणाः ' इत्यवगमः । ' ओषधयो भवन्ति ' इत्यभिधेयवचनम् । ' विरोहणात् ' इति हेतुनिर्देशः । ' ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः । अश्वा इव सजित्वरीर्वीरुधः पारयिष्ण्वः ' (ऋ० सं० १० । ९७ । ३) ॥ भिषज आथर्वणस्येयमार्षम् । ओषधिसूक्ते । याश्च पुष्पवत्यो याश्च फलवत्यो याश्चाफलास्ताः सर्वा अश्वा इव वडवा इव सजित्वरीः सहजैत्र्यो वीरुधः सर्वरोगान् जित्वा अस्माकमायुषः पारयिष्ण्वः पारयित्र्यः सन्तु । एवमत्र ' पुष्पवतीः प्रसूवरीः ' इत्येतस्माद्विशेषलिङ्गात् ' वीरुध ओषधयो भवन्ति ' इत्युपपद्यते ।

' वीरुधः ' इत्यस्य

' नक्षद्दाभम् ' (१०) इत्यनवगतम् । ' नक्षणदाभम् ' इत्यवगमः । ' अश्नुवानदाभम् ' इति पर्यायेणाभिधेयवचनम् । अभ्यशनेन अभिव्यापनेन यो दभ्नोति हिनस्ति स नक्षद्दाभः । ' तमु नः पूर्वे पितरो नवग्वाः सप्त विप्रासो अभि वाजयन्तः । नक्षद्दाभं ततुरिं पर्वतेष्ठामद्रोघवाचं मतिभिः शविष्ठम् ' (ऋ० सं० ६ । २२ । २) ॥

' नक्षद्दाभम् ' इत्यस्य

---

१ घ. झ. ट ठ. ड. भुवना॰सप्त°. २ क. ख. ग ज. घ. झ. ट. ठ. ड. विरोहणात्; च. विरोहणात्. ३ ग. 'र्देशः ।१। ओष°. ४ ग. च. ज. मोदध्वं । भिष°; घ. झ. ट. मोदध्वं॰ वीरुधः पारयिष्ण्वः । भिष°. ५ क. ख. घ. झ. ट. ठ ड. 'सूक्ते । अनुष्टुप् । हे ओषधीः ओषधयः प्रतिमोदध्वम् । इमं रुग्णं प्रत्यस्मा-प्रति वा मुदिता हृष्टा भवन्तु । कीदृश्यो यूयम् । पुष्पवतीः पुष्पवत्यः प्रसूवरीः । प्रकर्षेण सूयन्ते उपभोगायेति प्रसूवरीः । याश्च°; च. 'सूक्ते । याश्च° हे ओषधीः ॰॰॰ कीदृश्यो यूयं. ६ क. ख. घ. झ. ट. ठ. ड. °फला याश्चापुष्पास्ताः°; च. °फला॰स्ताः° याश्चापुष्पा. ७ ग. 'द्दाभः । ६ । तमु°. ८ ग. ज. पितरः । भर°; घ. झ. ट. पितरो॰ मतिभिः शविष्ठं । भर°.

भरद्वाजस्या[1]र्षम् । ऐन्द्री[2] । संपातसूक्ते माध्यन्दिने सवने[3] ब्राह्मणाच्छंसिनः शस्त्रे[4] (आश्व० श्रौ० ७ । ५) । ‘ तमीमहे ’ (ऋ० सं० ६ । २२ । ३) इतीयं च तत्रैवै[5] । तम् इन्द्रम् अस्माकं ये पूर्वे पितृगणाः सप्तसंख्या[6] ये पुराणे पठ्यन्ते । अथवा सप्त सृप्ताः पूर्वतरमस्माल्लोकादमुं लोकम् । ते[7] नवग्वाः नवगतयः । अभिनवा हि तेषां गतिरर्धमासेऽर्धमासे भवति पितृयज्ञं प्रत्यागन्तुम् । अथवा नवनीतगतयो नवगतयः । नवनीते हि तेषां मनसो गतिर्भवतीदमस्माकं स्यादिति । ‘स्वयं विलीनं पितृणाम्’ (मैत्रा० सं० ३ । ६ । २) इत्युक्तम् । विप्रास इति विप्रा[8]: प्राप्तप्रज्ञाः पितृलोकेऽवस्थिताः मतिभिरभिवाजयन्तः स्तुवन्त आसते । किंलक्षणं पुनरिन्द्रं मतिभिरभिवाजयन्त आसत इति । उच्यते । नक्षद्दाभम् । योऽभिव्यापनमात्रेणापि दभ्नोति किमुत वेधेन । यश्च ततुरिः त्वरणशीलः । यश्च पर्वतेष्ठा मेघस्थायी । यस्य चाद्रोग्धव्या वाक् । अनतिक्रमणीये[9]त्यर्थः । यश्च शविष्ठो बलिष्ठः । य एवंगुणविशिष्ट इन्द्रस्तं मतिभिरभिवाजयन्त आसते । सोऽस्माकमिदं नाम करोत्वित्येवमाशीर्योज्या । एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च योऽभ्यशनेन दभ्नोति स नक्षद्दाभ इत्युच्यते ।

‘ अस्क्रुधोयुः ’ (११) इत्यनवगतम् । ‘ अक्रुध्वायुः ’ इत्यवगमः । ‘ क्रुध्विति ’ एतत्[10] ‘ ह्रस्वनाम ’ । तद्धि ‘ निकृत्तम् ’ इव ‘ भवति ’ ह्रस्वत्वात् । तस्याकारेण प्रतिषेधे कृते ‘ अक्रुधु ’ इति भवति[11] । ‘ तमीमह इन्द्रमस्य रा[12]यः पुरुवीरस्य नृवतः पुरुक्षोः । यो

अस्क्रुधोयुरजरः स्वर्वान्तमा भर हरिवो मादयध्यै ’

‘ अस्क्रुधोयुः ’ इत्यस्य

(ऋ० सं० ६ । २२ । ३) ॥ तं वयमात्मनः पुत्रम् ईमहे याचामहे हरिवः त्वाम् इन्द्रम् ईश्वरम् । आह । यः किंलक्षणः पुत्र इति ।

---

१ क. ख. घ. झ. ट ठ. ड. °जस्येयमार्षम्. २ क. ख. घ. झ. ट. ठ. ड. ऐन्द्री । त्रिष्टुप् । सं°; च. ऐन्द्री । ^ सं° त्रिष्टुप्. ३ क. ख. घ. झ. ट. ठ. ड. ‘ सवने ’ नास्ति. ४ क. ख. घ. झ. ट. ठ. ड. शस्त्रे शस्यते । तमी°. ५ ठ. ड. तत्रैव शस्यते. ६ क. ख. घ. झ. ट. ठ. ड. °संख्याका ये. ७ क. ख. घ. झ. ट. ते च नव°. ८ ग. ज. दिप्र सप्रज्ञाः. ९ क. ख. घ. झ. ट. ठ. ड. ‘ इत्यर्थः ’ नास्ति. १० क. ख. घ. झ. ट. ठ. ड. ‘एतत्’ नास्ति. ११ ग. °ति । ११ । तमी°. १२ ग. ज. रायः । तं°; घ. झ. ट. राय.० हरिवो मादयध्यै । तं°.

उच्यते । यः अस्य रायो धनस्य परिपालने भोगे च समर्थः । किंलक्षणस्य पुनर्धनस्येति । पुरुवीरस्य बहुवीरैस्तद्वतः । नृवतश्च दासैस्तद्वतः । पुरुक्षोश्च बहुनिवासस्य । अनेकप्रकारस्येत्यर्थः । न च परिपालनसमर्थ एव यः केवलमल्पकालस्तमीमहे । किं तर्हि । यश्चास्कृधोयुः अकृध्वायुः । दीर्घायुरित्यर्थः । अजरश्च । यो दृढशरीर इत्यर्थः । स्ववाँश्च यः सुष्ठु शत्रूणामीरयिता । य एवंगुणविशिष्टः पुत्रस्तम् आभर आहर हरिवो मादयध्यै अस्माकमात्मनश्च मदनाय । तर्पणायेत्यर्थः । एवमत्र 'अस्कृधोयुः' इत्यनेन दीर्घायुरुच्यते तस्याभीष्टत्वाच्छन्दसारूप्याच्च[1] ।

'निश्रृम्भाः' (१२) इत्यनवगतम् । 'निश्रथ्यहारिणः'[2] इत्यवगमः । निश्लथया दृढया गत्या हरन्तः ॥ ३ ॥[3]

आजासः पूषणं रथे निश्रृम्भास्ते जनश्रियम् । देवं वहन्तु बिभ्रतः (ऋ० सं० ६ । ५५ । ६) ॥ आवहन्त्वजाः पूषणं रथं निश्रथ्यहारिणस्ते[4] जनश्रियं जातश्रियं बृबदुक्थो महदुक्थो वक्तव्यमस्मा उक्थमिति बृबदुक्थो वा । बृबदुक्थं हवामह इत्यपि निगमो भवत्यृदूदरः[5] सोमो मृदूदरो मृदुरुदरेष्विति वा । ऋदूदरेण सख्या सचेयेत्यपि निगमो भवत्यृदूपे[6] इत्युपरिष्टाद् व्याख्यास्यामः पुलुकामः पुरुकामः । पुलुकामो हि मर्त्य इत्यपि निगमो भवत्यसिन्वती[7] असंखादन्त्यौ । असिन्वती बप्सती भूर्यत्त इत्यपि निगमो भवति कपनाः कम्पनाः क्रिमयो[8] भवन्ति । मोषथा वृक्षं कपनेव वेधस इत्यपि निगमो भवति भाऋजीकः प्रसिद्धभाः । धूमकेतुः समिधा भाऋजीक इत्यपि निगमो भवति रुजाना नद्यो भवन्ति रुजन्ति कूलानि । संरुजानाः पिपिष इन्द्रशत्रुरित्यपि निगमो भवति जूर्णिर्जवतेर्वा द्रवतेर्वा दूनोतेर्वा ।

---

१ ठ. ह. °प्याच्च । इति निरुक्तटीकायां षष्ठाध्याये तृतीयः खण्डः । निशृ°. २ ठ. निश्रथ्यौहा° थ्य. ३ क. ख. ४ (३); ग $\frac{१२}{१}$; इतरेष्वङ्को नास्ति. ४ क. ख. त. निश्रथ्यहा°; छ. निशृथ्यहा°; द. निश्रिथ्यहा° शृ. ५ क. ख. छ. द. °वति । ऋदू°; त. °वत्यृदू° ति । ऋ. ६ क. ख. छ. द. °वति । ऋदू°. ७ क. ख. छ. द. °वति । असि°. ८ क. ख. छ. त द. क्रिमयो.

क्षिप्ता जूर्णिर्न वक्षतीत्यपि निगमो भवति । परि[2] घ्रंसमोमना वां वयो गात् । पर्यगाद्वां घ्रंसमहरवनीयान्नम्[1] ॥ ४ ॥

इति[3] षष्ठाध्यायस्य प्रथमः पादः ।

'निशृम्भाः' इत्यस्य

'आजासः पूषर्णम्' । भरद्वाजस्यार्षम् । आवहन्तु अजा अश्वा निशृम्भा निश्रर्थ्य[5]हारिणः । य एवंलक्षणा अश्वास्ते आवहन्तु पूषणं देवं रथे व्यवस्थितं[4] बिभ्रतः धारयमाणा जनश्रियं जातश्रियम् । उद्भूतश्रियमित्यर्थः । एवमत्र समानविभक्त्यन्त[6]त्वात् 'आजासः' इत्यनेन 'निशृम्भा' इत्येतदश्वविशेषणम् । सति चाश्वविशेषणत्वे 'निश्रृथ्य[7]हारिणः' शीघ्रहारिणः । स्तथा[8]भीष्टत्वादागमनस्य ।

'बृबदुक्थः' इत्यस्य

'बृबदुक्थः' (१३) इत्यनवगतम् । 'महदुक्थः' इति वा 'वक्तव्योक्थ इति वा' शब्दसमाधी[9] । 'बृबदुक्थं हवामहे[10] सृप्रकरस्नमूतये । साधु कृण्वन्तमवसे' (ऋ० सं० ८ । ३२ । १०) ॥ कश्यपस्यार्षम्[11] । प्रथमे पर्याये[12] मैत्रावरुणस्य शस्त्रे (आ० श्रौ० ६ । ४) तृचाशीतिषु च महाव्रते (ऐ० आ० ५ । २ । ३) शस्यते । 'उक्थम्' इति शस्त्रमुच्यते । तद्यस्य बृहत् महत् स बृबदुक्थः । अथवा तद्यस्य वक्तव्यं स बृबदुक्थः । तं बृबदुक्थम् इन्द्रं हवामहे वयमाह्वयामह एतस्मिन् कर्मणि सृप्रकरस्नं सृप्रबाहुं दीर्घबाहुम् ऊतये अवनाय रक्षणायात्मनः साधु कृण्वन्तं साधुकारिणं नित्यकालमेवास्य

---

१ क. ख. छ. त. द. °रवनेनान्नम्. २ क. ख. ५ (४); छ त. द. ५. ३ ङ. थ. ध. 'इति०पादः' नास्ति; छ 'इति षष्ठध्यायस्य' नास्ति; त. इति षष्ठाध्याये प्र°; द. इति नैरुक्तस्य षष्ठा°, ४ व. झ. ट. पूषणं रथे०बिभ्रतः । भर°; ठ. ड. आजास इति । भर°. ५ ठ. ड. निश्रथ्यहा°. ६ क. ख. घ. झ. ट. °भक्त्यन्तत्वादजा°; ग. ज. °विभक्तत्वादाजा°. ७ ग. च. ज. निश्लथ्य°. ८ क. ख. घ. झ. तस्याभी°; ट. तस्याभी° था. ९ ग. °माधी । १३ । बृब°. १० ग. ज. °महे । कश्य°; घ. झ. ट. °महे० मवसे । कश्य°. ११ च. ट. कैश्यपस्या° मेधातिथेः. १२ ग. ज. 'पर्याये' नास्ति; च. प्रथमे मैत्रा° पर्याये.

जगतः साधु करिष्यामीत्यभिप्रायम् अवसे तस्यैव तर्पणाय । तमागतं सन्तमेतस्मिन् कर्मणि तर्पयिष्याम इत्येतेनाभिप्रायेणाह्वयामहे । एवमत्र 'हवामहे' इत्यनेन संबन्धात् 'वृबदुक्थो महदुक्थो वक्तव्योक्थो वा' इत्युपपद्यते । य एव हि महदुक्थो भवति वक्तव्योक्थो वा स एव सुतरामाहूयत इति ।

'ऋदूदरः' इत्यस्य

'ऋदूदरः' (१४) इत्यनवगतम् । 'मृदूदरः' इत्यवगमः । 'सोमः' अभिधेयः । 'ऋदूदरेण सख्या सचेय यो मा न रिष्येद्धर्यश्व पीतः । अयं यः सोमो न्यधाय्यस्मे तस्मा इन्द्रं प्रतिरमेम्यायुः' (ऋ० सं० ८ । ४८ । १०) ॥ प्रगाथस्यार्षम् । सौमेन्द्रस्य श्यामाकस्य चरोर्याज्यैषा सोमवामिप्रायश्चित्तेष्टौ (मैत्रा० सं० २ । २ । १३ ॥ ४ । ११ । २) । ऋदूदरेण मृदूदरेण सोमेन । मृदु हि सोमस्योदरं सुषिरत्वात् । अथवा मृदुरयमुदरे स्यादित्येवमाशास्यते पातृभिर्वमनाशङ्कया । तस्मान्मृदूदरः सोमः । स पुनरेष मृदूदरः सन्नृदूदर इत्युच्यते । तेन मृदूदरेण सख्या समानख्यानेनेव केनचित्पुरुषेण मित्रेण सचेय संसेवेयं । पुवरागामिषु क्रत्वन्तरेषु सोमो यः मां न रिष्येत् न हिंस्यात् पीतः सन् यथाहमनेन सोमेनाहिंसितः तेन सचेयं । हे हर्यश्व इन्द्र एतदस्तु नः । किंच । अयं यः सोमो न्यधाय्यस्मे निहितोऽस्मास्वासीत् येनेमामापदमापादिताः स्मो वमनद्वारेण तस्मै तदर्थं तेनास्माकमायुषो यदवखण्डनं कृतं तत्प्रतिपूरणाय इन्द्रं प्रतिरं प्रतीर्णम् अनवखण्डितं सर्वम्

१ घ. ट. ठ. ड. 'वक्तव्योक्थो वा' नास्ति. २ ग. °धेयः ।१४। ऋदू°. ३ ग. ज. सख्या । प्रगा°; व. झ. ट. सख्या० प्रतिरमेम्यायुः । प्रगा°. ४ क. ख. घ. झ. ञ. ठ. ड. °थस्येयमार्षम् । त्रिष्टुप् । सौमी । सोमे° (ठ. ड. सौमे°). ५ व. झ. ट. ठ. ड. सोमवासिनः प्राय°; च. सोमवामि॰प्राय° नः. ६ क. ख. घ. झ. ट. ठ. ड. सचेय संसचेयं संसे°; च. सचेय॰संसे° संसचेयं. ७ क. ख. घ. झ. ट ठ. ड. संसेवेयम्; च. संसेवेय° यम्. ८ च. °रागामि° गा. ९ क. ख. व. झ. ट. ठ. ड. मा मां; च सोमो॰मां° मा. १० क. ख व. झ ट. ठ. ड सचेयं; च. सचेय° यं. ११ क. ख. व. झ. ट ठ. ड. इन्द्र सोमस्वामिन् एत°; च. इन्द्र॰एत° सोमस्वामिन् १२ च. °तीर्णं अवख°.

आयुः एमि । याचामीत्यर्थः । सोमवमनवैगुण्यादायुषश्छेदमाशङ्कमान इन्द्रं दीर्घमायुर्थयाच यजमानाय । एवमस्मिन् 'ऋदूदरः सोमः' प्रकरणाच्छन्दसारूप्याच्च ।

'ऋदूपे' (१५) इत्युपरिष्टाद् व्याख्यास्यामः । 'ऋदूपे चिदृदूवृधा' (निरु० ६ । ३३) इत्यत्र ।

'पुलुकामः' (१६) इत्यनवगतम् । 'पुरुकामः' इत्यवगमः[1] । 'इमं नु सोममन्तितो[2] हृत्सु पीतमुप ब्रुवे । यत्सीमागश्चकृमा तत्सु मृळतु[3] पुलुकामो हि मर्त्यः' (ऋ० सं० १ । १७९ । ५) ॥ अगस्त्यलोपामुद्रासंवादे[4] ।

'पुलुकामः' इत्यस्य

इमम् अहं सोमम् अन्तितः अन्तिकेऽवस्थितम् उपगम्य चेतसा ब्रुवे । न च बहिरन्तिकेऽवस्थितमुपब्रुवे । किं तर्हि । पीतं सन्तं हृत्स्वेव स्व एव हृदयेऽवस्थितमुपब्रुवे । यत्सीमागश्चकृमा यत्सर्वतः सर्वप्रकारमागश्चकृम पापं कृतवन्तो वयं तदयं सोमः सुमृळतु[5] सुष्ठु सुखविधिपरिणामं[6] करोतु । किं कारणम् । इतो यस्मात् पुलुकामो हि बहुकामो हि मर्त्यः । स बहुकामत्वान्मनुष्यस्वाभाव्यादवश्यमागः करोति । तदयं पीतः सोमः शमयत्वित्यभिप्रायः । एवमत्र पुलुकामशब्देन पुरुकामो बहुकाम उच्यते मर्त्यशब्दसामानाधिकरण्यात्सारूप्याच्च ।

'असिन्वती' (१७) इत्यनवगतम् । 'असंखादन्त्यौ' इत्यर्थप्रतीतिः[7] । 'अपश्यमस्य महतो महित्वममर्त्यस्य[8] मर्त्यासु विक्षु । नाना हनू विभृते सं भरेते असिन्वती बप्सती भूर्यत्तः' [ऋ० सं० १० । ७९ । १] ॥ वैश्वानरस्याग्नेः सौचीकस्य वा[9] वाजम्भ-

'असिन्वती' इत्यस्य

---

१ ग. °गमः । १५ । इमं°. २ ग. ज. °न्तितः । अग°; घ. झ. ट. °न्तितो० कामो हि मर्त्यः । अग°. ३ क. ख. च. मृडतु. ४ क. ख. घ. झ. ट. ठ. ड. °वादे अन्तेवासी ब्रह्मचारी इमां सौमीं बृहतीमपश्यत् । इम°; च. °वादे~। इम° अन्ते०००पश्यत्. ५ ग. ज. घ. झ. सुमृलतु. ६ क. ख. घ. झ. ट. ठ. ड. °विधिपरि°. ७ ग. °तीतिः ।१६। अप°. ८ ग. ज. °मस्य । वैश्वा°; घ. झ. ट. °मस्य०भूर्यत्तः । वैश्वा°. ९ ग, ज. 'वा' नास्ति; च. °कस्य~वाज° वा.

रस्य वा[1] सप्तेरार्षम् । अपश्यमहं भगवतोऽग्नेर्महतो महित्वं माहाभाग्यम्[2] अमर्त्यस्य अमरणधर्मिणो[3] मर्त्यासु मरणधर्मिणीषु विक्षु । मनुष्येष्वित्यर्थः । आह । किंपुनस्तन्माहाभाग्यमिति । उच्यते । नानाभावेनैते हनू हननसमर्थे[4] ज्वाले अवस्थिते विभृते[5] विविधमत्रभृते[6] सत्यौ संभरेते एव[7] एकत्र हरेते हवींषि[8] दारूणि वा । संभृत्य च असिन्वती असंखादन्त्यौ असंखादन्त्याविव अथवा संचूर्णयन्त्याविव । अनेन प्रकारेण शीघ्रं[9] बप्सती भक्षयन्त्यौ भूरि अपि दारुजातं हविर्जातं वा यदत्तो भक्षयतो न च श्राम्यतः एतदस्य माहाभाग्यमहमपश्य-मस्मिन्मनुष्यलोक इति । हनुरूपकसंबन्धाद्बह्वीष्वपि ज्वालासु द्विवचनमेव कृतम् । एवमत्र हनुसंबन्धात्[10] 'असिन्वती असंखादन्त्यौ' इत्युपपद्यते ।

'कपनाः' इत्यस्य

' कपनाः ' (१८) इत्यनवगतम् । 'कम्पनाः' इति शब्दसमाधिः । 'क्रिमयो[11] भवन्ति' इत्यभिधेयवचनम्[12] । 'अभ्राजि शर्धो[13] मरुतो यदर्णसं मोषथा वृक्षं कपनेव वेधसः । अध स्मा नो अरमतिं सजोषसश्चक्षुरिव यन्तमनु नेषथा सुगम्' [ऋ० सं० ५ । ५४ । ६] ॥ श्यावाश्वस्यात्रेयस्येयमार्षम्[14] । भ्राजते वो हे मरुतः तत् शर्धः तद्बलं येन बलेन मेघं वृद्धमुदकपूर्णम् अनुप्रविश्य मोषथ मुष्णीथ यूयम् । निरुदकं कुरुथेत्यभिप्रायः[15] । कथं पुन-र्मोषथेति । वृक्षं कपनेव वेधसः । कम्पनाः क्रमय इव वेद्धारः । यथा वृक्षमनुप्रविश्य क्रिमयोऽन्तर्गतं[16] दारुचूर्णं रसं वा मुष्णन्त्येवं यूयमुदकं

---

१ क. ख. घ. झ. ट. ठ. ड. वा सप्तेरियमार्षम् । त्रिष्टुबाग्नेयी । अप°; ग. ज. 'वा' नास्ति; च. °रस्य सप्तेरार्षं । ⌄अप° त्रिष्टुप् । आग्नेयी. २ ग. ज. महा°; च. महा° मा. ३ ग. ज. °धर्मणः; घ. ट. °स्यामरधर्मिणीषु विक्षु; झ. °स्यामरधर्मि-णधर्मिणीषु विक्षु. ४ च. हननसामर्थ्ये. ५ झ. ट. बिभृते. ६ क. ख. घ. झ. ट. ठ. ड. विविधमिव धृ. ७ क. ख. घ. झ. ट. ठ. ड. 'एव' नास्ति; च. एवं. ८ च. हविषि दारुणि वा. ९ च. सीघ्रं° शी. १० घ. झ. ट. ठ. ड. हनूसं°. ११ क. ख. घ. झ. ट. ठ. ड. क्रिमयो°; च. कृमयो° कि. १२ ग. °चनम् । १७ । अभ्रा°. १३ ग. ज. शर्धः । श्या°; घ. झ. ट. शर्धो० नेषथा सुगम् । श्या°. १४ क. ख. घ. झ. ट. ठ. ड. °मार्षम् । मारुती । जगती । दाशरात्रिके त्रिवृत्स्तोमे प्रथमेहन्याग्निमारुते विनि-युक्ता । प्रशर्धायेत्याग्निमा (घ. ट. °ग्निना) रुत इति सूत्रणात् (ठ. ड. °मारुते सूत्रत्वात्)। अभ्राजि भ्राजते°; च. °मार्षम् ⌄ । भ्राजते° मारुती० ० सूत्रणात् । अभ्राजि. १५ क. ख. घ. झ. ट. ठ. ड. कुरुतेत्य°; ग. ज. कुरुथ्येत्य°. १६ क. ख. घ. झ. ट. क्रिमयो°.

मुष्णीथ । अथवा । हे वेधसो मेधाविन इति मरुद्विषयमेतत्संबोधनं स्यात् । यस्माद्यूयमेवमादिना प्रभावेन युक्ता अथैतस्मात्कारणादस्माकमेव[1] अरमतिम् अलमतिं पर्याप्तमतिं परिसमाप्तविद्यं यजमानं स्वकृतेनैव कर्मणा विद्यया वा यन्तम् इतो लोकादमुं लोकं सुगं शोभनगमनं[2]स्थानं यूयमपि अनुनेषथ हे सजोषसः सहप्रीताः । गमनानुग्रहेऽस्य वर्तध्वमित्यभिप्रायः । कथं[3] पुनरनुनेषथ । चक्षुरिव । यथा गच्छतः पुरुषस्य चक्षुर्गमनानुग्रहे वर्तत एवमनुनेषथैनं सुगमिति । एवमत्र वृक्षसंबन्धात् 'क्रमयः[4] कम्पनाः' । ते हि वृक्षं मुष्णन्ति मोषयन्ति[5] कम्पयन्ति च यं खादन्ति स्वयमेव वा कम्पन्ते चलनस्वाभाव्यात् ।

'भाऋजीकः' (१९) इत्यनवगतम् । 'ऋजुभाः[6]' इत्यवगमः ।
'प्रसिद्धभाः' इति पर्यायशब्देन निर्वचनम्[7] ।

'भाऋजीकः' इत्यस्य
'देवो देवान्परिभूर्[8]ऋतेन वहा नो हव्यं प्रथमश्चिकित्वान् । धूमकेतुः समिधा भाऋजीको मन्द्रो होता नित्यो वाचा यजीयान्'

(ऋ० सं० १० । १२ । २) इति ॥ आङ्गस्य[9] हविर्धानस्यार्षम् । त्रिष्टुप् । देवः त्वं दानादिगुणयुक्तो[10] हे भगवन्नग्ने देवान् परिभूः सर्वतो भवसि ऋतेन यज्ञेन सहितः । तदुक्तम् 'अराँ[11] इवाग्ने नेमिर्[12]देवांस्त्वं परिभूरसि' (ऋ० सं० ५।१३।६) इति[13] । यस्त्वमेवंप्रभावस्तं त्वां ब्रवीमि । वह प्रापय नो हव्यं देवान् प्रति । प्रथमो यस्मात्त्वं मनुष्यहोतारमपेक्ष्य तस्मादेतत्कुरु । चिकित्वान् । स्वाधिकार[14]मेतं जानान इत्यभिप्रायः । धूमकेतुः धूमप्रज्ञानो धूमध्वजो वा समिधा समिन्धनेन भाऋजीकः प्रसिद्धभाः मन्द्रः मदनः तर्पयिता देवानां होता आह्वाता नित्यः । इतरं मनुष्यहोतारमनित्यमपेक्ष्याग्निरेव नित्यो होता । वाचा वागधिदेवताभावेनावस्थितः । यजी-

---

१ ग. ज. °कमेतामर°; च. °कमेतॉंपर° यॉं (रा). २ क. ख. घ. झ. ट. ठ. ड. °गमनं स्थानं° ३ क. ख. घ. झ. ट. ठ. ड. कथं च पुनर्नेषथ; च. कथं पुन० च. ४ क. ख. घ. झ. ट. ठ. ड. क्रिमयः. ५ क. ख. घ. झ. ट. ठ. ड. °यन्ति च कम्प°. ६ ग. ज. ऋज्रभाः; च. ऋज्रभाः°जु. ७ ग. °नम् । १८ । देवो°. ८ ग. ज. °रिभूः । आङ्ग°; घ. झ. ट. °रिभूः०वाचा यजीयान् । आङ्ग°. ९ ग. ज. अङ्गस्य; च. अङ्गस्य° आंग. १० ठ. ड. °युक्त हे°. ११ ग. च. ज. अरां इवा°. १२ ग. च. ज. निमि°. १३ घ. झ. ट. ठ. ड. 'इति' नास्ति. १४ क. ख. घ. झ. ट. ठ. ड. स्वमधि°.

यान् यष्टृतरो मनुष्यहोतारमपेक्ष्य । एवमत्र ‘ भाऋजीको प्रसिद्धभाः ’ इत्युपपद्यते ।

‘रुजानाः’ इत्यस्य

‘ रुजानः ’ (२०) इत्येतदेकैपदमनवगतम् । ‘ रुजैत्यः ’ इत्यवगमः । ‘ नद्यो भवन्ति ’ इत्यभिधेयवचनम् । ‘ रुजन्ति कूलानि ’ इति हेतुनिर्देशैः । ‘ अयोद्धेव दुर्मदँ आ हि जुह्वे महावीरं तुविबाधमृजीषम् । नातारीदस्य समृतिं वधानाँ सं रुजानाः पिपिष इन्द्रशत्रुः ’ (ऋ० सं० १ । ३२ । ६) ॥ हिरण्यस्तूपस्यार्षम् । अग्निष्टोमे निष्केवल्ये शस्यते (आ० श्रौ० ५ । १५) । अयोद्धेव । यथा कैश्चिदयोद्धा दुर्मदो दुर्मत्तो वाङ्मात्रसारः । आह । स यथा । किं करोतीति । उच्यते । आ हि जुह्वे । आह्वयतीत्यर्थः । कमाह्वयति । महावीरं महाविक्रान्तं तुविबाधं बहूनां शत्रूणां बाधितारम् ऋजीषम् । ऋजीषिणमित्यर्थः । तदुक्तम् ‘ऋजीषी वज्री’ (ऋ० सं० ५ । ४० । ४) इति । तमेवंप्रभावमिन्द्रमाहूय मेघो नातारीत् इतरवद्दुर्मदो न तर्तुं शक्नोति अस्य इन्द्रस्य समृतिं समागमं वधानां प्रहाराणाम् । अतरमाणो या एता नद्यः संरुजाना ऊर्मिभिः कूलानि वहन्त्यो रुजन्ति ताः प्रति विशीर्यमाणः पिपिषे इन्द्रशत्रुः । इन्द्रस्य शातयितव्य इत्यर्थः । एवमत्र शब्दार्थोपपत्तेः ‘ नद्यो रुजानाः ’ इत्युपपद्यते ।

‘ जूर्णिः ’ इत्यस्य

‘ जूर्णिः ’ (२१) इत्यनवगतम् । ‘ जवनाद्वा द्रवणाद्वा दैवनाद्वा ’ इति शब्दसमाश्रयः । शक्तिरभिधेया । ‘ जवतेः ’ गत्यर्थस्य जूर्णिः । ‘द्रवतेर्वा’ गत्यर्थस्यैव जूर्णिः । ‘दुनोतेर्वा’ हिंसार्थस्यँ । ‘ प्रप्रा वो अस्मे स्वयंशोभिरूती परिवर्ग इन्द्रो दुर्मतीनां दरीमन्दुर्मतीनाम् ।

---

१ क. ख. घ. झ. ट. ठ.ड. °देकं प°; ग. °देकनवगतं; ज. °देव पद°. २ ग. रुजन्त इ°; च. रुजन्तै इ° त्य; ज. रुजन्त्य इ०; ठ. ड. रुजइत्य°. ३ ग. °र्देशः । १९ । अयो°. ४ ग. ज. °र्मदः । हिर°; घ. झ. ट. °र्मदः० इन्द्रशत्रुः । हिर°. ५ ग. ज दूनन द्वा; च. दूनैदवनैनाद्वा. ६ क. ख. घ. झ. ट. ठ. ड. जवतेर्वा ग°. ७ ग. °र्थस्य । २० । प्रप्रा°. ८ ग. ज. अस्मे । परु°; घ. झ. ट. अस्मे स्व० क्षिप्ता जूर्णिर्न वक्षति । परु°. ९ च. दरीमं दु°.

स्वयं सा रिषयध्यै या न उपेषे अत्रैः । हतेमसन्न वक्षति क्षिप्ता जूर्णिर्न वक्षति' (ऋ० सं० १ । १२९ । ८) ॥ परुच्छेपस्यार्षम् । अतिच्छन्दाः । पृष्ठ्यस्य षष्ठेऽहनि निष्केवल्ये शस्यते (आ० श्रौ० ८ । १)॥ प्रब्रवीमि हे स्तोतारः प्रब्रूत अस्मै स्वयशोभिः आत्मीयैर्यशोभिः संयुक्ताः स्तुतीः । किं कारणम् । यस्मादेषः इन्द्रः स्तुत ऊती अविता रक्षिता पारिवर्गे संग्रामे । यत्र हि प्राणाः परिवृज्यन्ते वियुज्यन्ते तत्रायमस्माकं रक्षिता भविष्यति । दुर्मतीनां च पापमतीनामस्मच्छत्रूणां हन्ता भविष्यति । तमेतमेवंगुणविशिष्टमिन्द्रं दरीमन् दारयितृतमं दुर्मतीनां पुनः पुनः स्तुत । आह । कथं पुनरसावस्माकं रक्षिता भविष्यतीति । उच्यते । स्वयं सा रिषयध्यै रेषणाय भविष्यति । किंचिदप्यज्ञात्वास्माकमिन्द्रप्रभावात्स्वयमेव विनङ्क्ष्यतीत्यभिप्रायः । का पुनरसाविति । या न उपेषे अत्रैः । या अस्मान् उपागच्छति अत्रैः अदनैः रक्षोभिः प्रहिता सा । हतेमसन्न वक्षति । 'ईम्' इत्यनर्थकः । हता सती इन्द्रेण न वक्ष्यति अस्मान् प्रति । क्षिप्ता अपि च तैः पुनरादरेणापि रक्षोभिः जूर्णिः जवसंपन्नापि सती शक्तिर्न वक्ष्यत्यस्मान् प्रति । न प्राप्स्यतीत्यर्थः । एवमत्र क्षेपणसंबन्धात् 'जूर्णिः शक्तिः' इत्युपपद्यते ।

'ओमना' इत्यस्य

'ओमना' (२२) इत्यनवगतम् । 'अवनाय' इत्यवगमः । 'युवोः श्रियं परि योषा वृणीत सूरो दुहिता परितक्म्यायाम् । यद्देवयन्तमवथः शचीभिः परि घ्रंसमोमना वां वयो गात्' इति (ऋ० सं० ७ । ६९ । ४) ॥ वासिष्ठस्यार्षम् । प्रातरनुवाकाश्विनयोः शस्यते (आ० श्रौ० ५ । १५) । हे अश्विनौ युवोः श्रियं युवयोर्याश्रीस्तां परिवृणीत

---

१ क. ख. घ. झ. ठ. ड. अतिशक्वर्यति°; च. °स्यार्षम् । ~ अति° अतिशक्वरी. २ ग. ज. प्रवोचत. ३ क. ख. घ. झ. ट. ठ. ड. भवति. ४ क. ख. घ. झ. ट. 'च' नास्ति. ५ ग. च. ज. दरीमं. ६ क. ख. च. स्तुतः. ७ क. ख. घ. झ. ट. ठ. ड. °प्यकृत्वा°; च. °प्यज्ञात्वा° कृ. ८ म. °गमः । २१ । युवोः° ९ ग. ज. योषा । वसि°; घ. झ. ट. योषा० ओमना वां वयो गात् । वसि°. १० क. ख. घ. झ. ट. ठ. ड. °ष्ठस्येयमार्षम् । त्रिष्टुप् । आश्विनी । प्रात°; च. °ष्ठस्यार्षम् । ~ प्रात° त्रिष्टुप् । आश्विनी. ११ क. ख. घ. झ. ट. ठ. ड. परि अवृणीत.

सर्वत: संभजते योषा । अह । कतमेति । उच्यते । सूरो दुहिता सूर्यस्य दुहिता ।[1]येयमुष:संज्ञिकेयमवृणीत। परितक्म्यायां रात्र्याम् ऊर्ध्वमर्धरात्रात् । स ह्यश्विनो: काल: । किंच । यद्देवयन्तमवथ: शचीभि: । यस्मात् देवयन्तं देवान्यष्टुमिच्छन्तं यजमानम् अवथ: शचीभि: स्वै: कर्मभि: तेन कारणेन वां पर्यगात् परिगच्छति सर्वासु दिक्षु यजमानैर्दीयमानं युवां प्रति वय: अन्नं हविर्लक्षणं [2]घ्रंसं प्रति अह: प्रति । अहनि प्राप्त इत्यर्थ: । [3]पूर्वाह्णे ह्यश्विनोर्यागकाल: । तदुक्तं 'प्रातर्यावाणा प्रथमा यजध्वम्' (ऋ० सं० ५ । ७७ । १) इति । कमर्थं पुरस्कृत्य वयोऽन्नं गच्छति । [4]अवनाय । तर्पणायेत्यर्थ: । एवमत्राश्विनोर्हवि:संप्रदानसंबन्धात् 'ओमना' इत्यस्य शब्दस्य 'अवनाय' इत्येष विपरिणाम उपपद्यते ।

केचिदत्र 'अवनेनान्नम्' इत्येवमधीयते भाष्यम् । तेषां योजना ।

'अवनेनान्नम्' इति भाष्यपाठेऽर्थ: 'अवनेन' तर्पणेन भवतोर्निमित्तभूतेन 'पर्यगादन्नम्' इति ।

केचित् 'अनेनान्नम्' इत्येवमधीयते भाष्यम् । तेषाम् 'अनेन' 'अनेनान्नम्' इति पाठे च मन्त्रेण 'अन्नं' परिगच्छतीति योजना [5]स्यादिति ॥ ४ ॥

एकादशस्य[6] प्रथम: पाद: ।

उपलप्रक्षिण्युपलेषु प्रक्षिणात्युपलप्रक्षेपिणी वेन्द्र[7] ऋषीन्पप्रच्छ दुर्भिक्षे केन जीवतीति तेषामेक: प्र युवाच । शकट: शाकिनी गावो जालमस्यन्दनं वनम् । उदधि: पर्वतो राजा दुर्भिक्षे नव वृत्तय इति । सा निगदव्याख्याता ॥ [8]५ ॥

---

१ क. ख. घ. झ. ट. ठ. ड. दुहिता । कदा तां श्रियमुष:संज्ञि°. २ क. ख. घ. झ. ट. ठ. ड. घ्रंसं परि प्रति अहनि°. ३ घ. झ. ट. ठ. ड. पूर्वाह्णे. ४ क. ख. घ. झ. ट. ठ. ड. ओमना अवना°. ५ क. ख. ५ (४); ग. ५; इतरेष्वङ्को नास्ति. ६ क. ख. घ. झ. ट. °दशाध्यायस्य प्रथ°; ठ. ड. इति ऋज्वर्थायां निरुक्तटीकायां षष्ठाध्याये चतुर्थ: खण्ड: । गुर्जरपाठे निघण्टसह एकादशाध्याये प्रथम: पाद:. ७ छ. त. द. 'इन्द्र००निगदव्याख्याता' नास्ति; ठ. ड. वा ॥ ४ ॥ अत्र महाराष्ट्रवैदिकपाठ: । इन्द्र° (ड. पुस्तके '४' नास्ति). ८ क. ख. द्द. १; छ. त. ६.

'उपलप्रक्षिणी' इत्यस्य व्युत्पत्तिः

'उपलप्रक्षिणी' (२३) इत्यनवगतम् । 'सक्तुकारिका' अभिधेया । सा हि 'उपलेषु' यवान् 'प्रक्षिणोति' हिनस्ति । एवमस्योपलप्रक्षिणीशब्दस्याप्रतीयमानार्थस्य विग्रहेणार्थ[1]प्रतीतिरवगमः । अथ 'वा उपलेषु प्रक्षेपिणी' स्यात् । उपलेषु तप्तेषु भर्जनार्थं यवान् प्रक्षिपति । सा हि गौडेषु प्रसिद्धिः । उपलान् वा यवेभ्यः प्रक्षिपति । विचिनोतीत्यर्थः । सेयम् 'उपलप्रक्षेपिणी[2]' सती 'उपलप्रक्षिणी' इत्युच्यते ॥ ५[3] ॥

कारुरहं ततो भिषगुपलप्रक्षिणी नना । नानाधियो वसूयवोऽनु गा इव तस्थिमेन्द्रायेन्दो परि स्रव (ऋ० सं० ९ । ११२ । ३)॥ कारुरहमस्मि कर्ता स्तोमानां ततो भिषक्तत इति संताननाम पितुर्वा पुत्रस्य वोपलप्रक्षिणी सक्तुकारिका नना नमतेर्माता वा दुहिता वा नानाधियो नानाकर्माणो वसूयवो वसुकामा अन्वास्थिता स्मो गाव इव लोके[4]मिन्द्रायेन्दो परिस्रवेत्यध्येषणा । आसीन ऊर्ध्वामुपासि क्षिणाति[5] उपस्थे मकलविद्वाणिग्भवाति कलाश्च वेद मकलाश्च । दुर्मित्रासः मकलविन्मिमाना इत्यपि निगमो भवत्य[6]भ्यर्धयज्वाभ्यर्धयन्यजाति । सिषक्ति पूषा अभ्यर्धयज्वेत्यपि निगमो भवतीक्ष ईशिषे । ईक्षे हि वस्व उभयस्य राजन्नित्यपि निगमो भवति । क्षोणस्य क्षयणस्य । महः क्षोणस्याश्विना कण्वायेत्यपि निगमो भवति ॥ ६[7] ॥

'कारुरहं [8]ततः' । शिशुराङ्गिरसस्तस्यार्षम् । पङ्क्तिः[9] । [10]स्वदुष्कृ-

---

१ च. °हेणार्थस्य प्र°. २ ग. ज. °प्रक्षिपीणी. ३ क. ख. १ (५); ग. ११/६; ठ. ड. °च्यते । इति निरुक्तटीकायां षष्ठाध्याये चतुर्थः खण्डः. ४ ठ. ड. लोक इन्द्रा°. ५ क. ख. छ. त. द. क्षिणाति । उप°. ६ त. °वति । अभ्य°. ७ क. ख. २ (६): छ. त. ७; द २. ८ घ. झ. ट. ततो भि० येन्द्रो परि स्रव (झ. स्रव । १२) । शिशु°; ठ. ड. °रहमिति । शिशु°. ९ क. ख. घ. झ. ट. पङ्क्तिः । ऐन्द्री । स्वदु°; च. पङ्क्तिः । स्वदु° ऐन्द्री. १० ग. ज. स्वादुःकृ°; च. स्वदुःकृ°.

ताशङ्कया किलापरिस्रवति सोमे पापकीर्तनादात्मशुद्धिर्भविष्यतीति मन्यमान आत्मानमेव निर्दिशन्नाह । अहं तावत्कस्मिंश्चिदनाकाले परेषां स्तोमकर्ता स्तुतीनां प्रयोक्ता यज्ञकर्मणि होतृत्वेनावस्थितो वहिर्वा यज्ञात्प्रियवक्ता लौकिकीभिर्वाचोयुक्तिभिर्जीविकापरतया आसम् । ततो मम पिता पुत्रो वा भिषक् आसीद्ब्रह्मा । स हि प्रायश्चित्तरोग उत्पन्ने यज्ञस्य भैषजं करोति । यदुक्तं ' भेषजकृतो ह वा एष यज्ञो यत्रैवंविद्ब्रह्मा भवति ' (छा० उ० ४ । १७ । ८) । इतरो लौकिको वा भिषक् । '' तत इति संताननाम पितुर्वा पुत्रस्य वा ' । पितुर्हि सकाशात्पुत्रस्तन्यते । एवमपादाने कारके ' ततः ' पिता । पुत्रैस्तन्यते । अयं 'ततः ' कर्मणि कारके । उपलप्रक्षिणी सवनीयानां पेष्ट्री । ' दासी पिनष्टि ' (आप० श्रौ० १ । २१ । ८) इति ह्युक्तम् । इतरेषां लौकिकानां सक्तूनां पेष्ट्री नना माता ममासीत् । सा हि स्तनसंप्रदानाद्युपकारार्थमपत्यं प्रति नता भवति । ' दुहिता वा ' नना स्यात् । सापि हि परिचर्यार्थं पितुः प्रह्वीभवति । यस्मिन् पक्षे पिता भिषक् तस्मिन् पक्षे ननाशब्देन मातोच्यते । यस्मिन् पुनः पक्षे पुत्रो भिषक् तस्मिन् पक्षे ननाशब्देन दुहितोच्यते । ते वयमेवमनाकाले कस्मिंश्चिज्जीविकाप्रधानाः सन्तो नानाधियो नानाकर्माणो यथोक्तेन क्रमेण कारुरहमित्येवमादिना वसूयवो वसुकामाः । कथं नाम वसु लभेमहि येन प्राणधारणं स्यादित्यनेनाभिप्रायेण । अनु गा इव तस्थिम । अन्वास्थिताः स्मो लोकमिमम् । कथं पुनरन्वास्थिताः स्म इति । गाव इव । यथानेकैरुपकारप्रकारैर्लोकमन्वास्थिता गाव एवमन्वास्थिताः स्मो वयमपीमं लोकम् । स त्वम् इन्दो विज्ञायैतदनेन स्वदुरितानुकीर्तनेन क्षपि-

प्रयोगश्च

' ततः ' इत्यस्य द्वावर्थौ

' नना ' इत्यस्य च

---

१ क. ख. घ. झ. ट. ट. ड. पापसंकीर्त°; च. पाप॰ कीर्त° सं. २ क. ख. घ. झ. ट. ठ. ड. °तया । ततो; च. °तयासम्. ३ क. ख. घ. झ. ट. ठ. ड. भेषजं; च. भैषज° ज्यं. ४ क. ख. घ. झ. ट. ठ. ड. पुत्रः पुनस्तन्यते. ५ घ. झ. ट. ठ. ड. तदासीत् । दासी पिन°; ग. ज. पेष्ट्री । सदासीत् । पिन°; च. पेष्ट्री । ॰ सदासीत् पिन° तदासीत्. ६ ग. ज. समासीत्. ७ क. ख. घ. झ. ट. ठ. ड. °दित्येतेनाभि°. ८ ग. ज. स्वादु°.

तकल्मषाः स्म इति मन्यमान एतस्माद्दशापवित्रात् इन्द्राय इन्द्रार्थं परिस्रव । अस्माभिरेवमध्येष्यमाणः कथं वा न परिस्रविष्यसीत्यभिप्रायः । एवमत्र ' उपलप्रक्षिणी सक्तुकारिका ' शब्दार्थोपपत्तेरित्युपपद्यते ।

' उपसि ' (२६) इत्यनवगतम् । ' उपस्थे ' इत्यवगमः । ' पत्तो जगार प्रत्यञ्चमत्ति शीर्ष्णा शिरः प्रति दधौ वरूथम् । आसीन ऊर्ध्वामुपसि क्षिणाति । न्यङ्ङुत्तानामन्वेति ' उपसि ' इत्यस्य भूमिम् ' (ऋ० सं० १० । २७ । १३)॥

वसुक्रस्येन्द्रपुत्रस्यार्षम् । ऐन्द्री । त्रिष्टुप् । महाव्रते मरुत्वतीये शस्त्रे शस्यते (ऐ० आ० ५ । १ । १) । पत्तः पादतो रश्मिभिरितो लोकाद्यदादित्यो जगार गृह्णात्युदकं । तदिन्द्रो मध्यस्थान आसीनः आत्मानं प्रत्यञ्चितं प्राप्तं तेन भगवतादित्येन शीर्ष्णा उत्सृष्टम् अत्ति । स्वीकरोतीत्यर्थः । तदेवमसौ स्वीकृत्य चतुर्षु वार्षिकेषु मासेषु पृथिवीलोकनिवासिनां जनानां शिरः प्रति दधौ शिरस उपरि दधाति वरूथं वरतमेमुदकम् । एवमयमिन्द्रो जगदुपकाराय प्रतिसंवत्सरमेतां द्युलोकाख्यां गाम् आदित्योपसंस्तब्धाम् ऊर्ध्वाम् उपर्यवस्थिताम् अन्तरिक्षलोके आसीन उपसि आत्मन उपस्थे उपस्थाने अन्तरिक्षलोके क्षिणाति प्रक्षारयति । यच्च प्रक्षारयति तदिमं लोकं प्रति पुनरुत्सृजति । तत्तेनोत्सृष्टं न्यक् नीचैर्वर्षभावेनागच्छति । तत उत्तानां भूमिं यथानिम्नम् अन्वेति । एवमत्र ' उपसि ' इत्यस्य शब्दसारूप्यादर्थोपपत्तेश्च ' उपस्थे ' इत्येवं प्रतीतिः । ' अपि वा शिर आदित्यो भवति ' इत्युक्तम् (निरु० ४ । १३) । तस्मात् 'शीर्ष्णा ' इत्यत्रोपपद्यते शिरस्त्वमादित्यस्य ।

---

१ ग. ज. स्थ इति. २ ग. °गमः । २३ । पत्तो°. ३ ग. ज. जगार । वसु°; घ. झ. ट. जगार प्रत्यञ्चमत्ति० मन्वेति भूमिम् । वसु°. ४ ग. ज. ' आसीनः ' नास्ति. ५ क. ख. घ. झ. ट. ठ. ड. वरतरमु°; ग. ज. वरतरममु°; च. वरतमेमु°र. ६ क. ख. घ. झ. ठ. ठ. ड. °त्योपसृष्टामूर्ध्वा°; ग. ज. °त्योपसंमूर्च्छामूर्ध्वा°; च. °त्योपसंस्तब्धाम्° सृष्टा. ७ क. ख. घ. झ. ट. ठ. ड. उपस्थे आत्मनः; च. आत्मन उपस्थे. ८ ग. २४ सा; ज. उसा. ९ घ. झ. ट. ठ. ड. इत्येवं.

'प्रकलवित्' (२५) इत्यनवगतम् । 'प्रकलावित्' इत्यवगमः । 'वणिग्भवति' इत्यभिधेयवचनम् । स हि 'प्रकलवित्' 'कलाश्च वेद प्रकलाश्च' । कलासंबन्धेनैवेह इत्यस्य प्रकला उच्यन्ते कला एव ह्यपेक्ष्य प्रकला भवन्तीति । यथाधिष्ठानमपेक्ष्य प्रत्यधिष्ठानमिति[3] । 'इन्द्रेणैते तृत्सवो वेविषाणा आपो न सृष्टा अधवन्त नीचीः । दुर्मित्रासः प्रकलविन्मिमाना जहुर्विश्वानि भोजना सुदासे' (ऋ० सं० ७ । १८ । १५) ॥ वसिष्ठस्यार्षम् । त्रिष्टुप् । महाव्रते निष्केवल्ये दक्षिणे पक्षे शस्यते (ऐ० आ० ५ । २ । २) । इन्द्रेण एते तृत्सवो दारयितव्या मेघा वेविषाणाः पुनः पुनर्व्याप्यमाना आपो न आप इव सृष्टाः केनचित् अधवन्त अगच्छन् नीचीः । नीचैरित्यर्थः । उच्चैर्गतय एते सन्ति । इन्द्रबलादेषां नीचैर्गतयः संवृत्ता इत्यभिप्रायः । किंच । दुर्मित्रासः । सुमित्राण्यपि सन्तो येऽतिसन्धानपरास्ते दुर्मित्राः । के पुनस्त इति । प्रकलविदः । वणिज इत्यर्थः । ते यथाभिद्रोहबुद्ध्या किंचिद् द्रव्यमल्पं ददत्येवमेते मेघाः पूर्वमल्पोदकदातारो भूत्वाधुनेन्द्रबलोद्यताः सन्तः जहुः विश्वानि सर्वाण्यशेषाणि भोजनानि उदकानि सुदासे राजनि यजमाने वा कल्याणदाने । एवमत्रोदकाल्पदानोपमासंबन्धात् 'प्रकलविद्वणिक्' इत्युपपद्यते । अवयवप्रत्यवयवा हि कलाः प्रकलाशब्देनोच्यन्ते । तेषु च वणिगेव निपुणो भवति गणितकुशलत्वान्न तथान्य इति ।

'अभ्यर्धयज्वा' (२६) इत्यनवगतम् । 'अभ्यर्धयन्' अभिवर्धयन् यो 'यजति' । यँजातिरत्र[11] दानार्थः [धा० १ । १०२७] ।

---

१ ग. ज. प्रलयविदि°; च. प्रकलवादि°. २ ग. ज. केवलाश्च प्र°. ३ ग. °मिति । २५ । इन्द्रे°. ४ ग. ज. तृत्सवः । वसि°; च. झ. ट. तृत्सवो० भोजना सुदासे । वसि°. ५ क. ख. घ. झ. ट. ठ. ड. त्रिष्टुबैन्द्री । महा°; च. त्रिष्टुप् । महा° ऐन्द्री. ६ क. ख. घ. झ. ट. ठ. ड. सन्तः. ७ क. ख. घ. झ. ट. ठ. ड. 'एषां' नास्ति. ८ क. ख. घ. झ. ट. ठ. ड. °स्ते पुनर्दुर्मित्राः; च. °स्तेऽन्दु° पुनः. ९ क. ख. घ. झ. ट. ठ. ड. °एव त्वेदं का°. १० क. ख. घ. झ. ट. ठ. ड. अभ्यर्धयतिरत्र; च. यँजातिरत्र° अभ्यर्धयजति. ११ ग. °र्थः । २६ । मिम्य°.

‘अभ्यर्धयज्वा’ इत्यस्य

‘[1]मिम्यक्ष येषु रोदसी नु देवी सिषक्ति पूषा अभ्यर्धयज्वा। श्रुत्वा हवं मरुतो यद्ध याथ भूमा रेजन्ते अध्वनि प्रविक्ते’ (ऋ० सं० ६ । ५० । ५] ॥ ऋजिश्वा नाम [2]तस्यार्षम्। वैश्वदेवे सूक्ते[3]। हे मरुतो येषु युष्मासु रोदसी देवी रुद्रस्य पत्नी मिम्यक्ष पुनः पुनरेकतां गच्छति। ‘[4]म्यक्षति मियक्षति’ इति गतिकर्मसु [5]पठति [निघ० २ । १४]। यश्च युष्माकं मध्येऽवस्थितः सिषक्ति सेवते पूषा सूर्यो रश्मिभिः अभ्यर्धयज्वा अभिवृद्धदानः ते यूयमेवंगुणयुक्ता उच्यध्वे। श्रुत्वा हवम् आह्वानं यद्ध याथ यदा यूयमायाथ अस्मान् प्रति [6]तदा भूमा बहूनि बलानि ध्वजाग्राणि वा रेजन्ते कम्पन्ते एतस्मिन् अध्वनि अन्तरिक्षे प्रविक्ते विविक्ते[8]। विस्तीर्ण इत्यर्थः। एवमत्र ‘पूषा अभ्यर्धयज्वा’। स हि स्वरश्मिपोषं पुष्यन् भूतान्याभिमु[10]ख्येन वृष्ट्या योजयन्नभिमतानर्थान् भूतेभ्यो ददाति।

‘ईक्षे’ (२७) इत्यनवगतम्। ‘ईशिषे’ इत्यव[11]गमः। ‘नृवत्त इन्द्र[12] नृतमाभिरूती वंसीमहि वामं श्रोमतेभिः। ईक्षे हि वस्व उभयस्य राजन्धा रत्नं महि स्थूरं बृहन्तम्’ (ऋ० सं० ६ । १९ । १०) ॥ भरद्वाजस्या[13]र्षम्। व्यूढस्य दशरात्रस्याष्टमेऽहनि मरुत्वतीये शस्त्रे शस्यते (आश्व० श्रौ० ८ । ७)। नृवत्ते। यथा मनुष्याः केचिदुत्पन्नप्रणयाः कंचिदीश्वरं मनुष्यं स्तुतिभिः संभजेरन्नेवं वयं त्वां नृतमाभिः मनुष्यतमयोग्याभिः ऊती अवन्तीभिस्तर्पयन्तीभिः स्तुतिभिः वंसीमहि संभजेमहि

‘ईक्षे’ इत्यस्य

---

१ ग. ज. रोदसी। ऋजि°; घ. झ. ट. रोदसी० अध्वनि प्रविक्ते। ऋजि°. २ क. ख. घ. झ. ट. ठ. ड. नाम भारद्वाजस्यार्षम्;। च. नाम तस्या° भारद्वाजः. ३ क. ख. घ. झ. ट. ठ. ड. सूक्ते। त्रिष्टुप्। हे; च. सूक्ते हे° त्रिष्टुप्. ४ क. ख. घ. झ. ट. ठ. ड. इयक्षन्ति; च. म्यिक्षति° इय; ज म्यक्षिति. ६ क. ख. घ. झ. ट. ठ. ड. पठितम्; च पठति° ठितं. ७ ग. ज. दाता; च. तदा° तदा. ८ घ. झ. ट. ठ. ड. भूम. ९ ग. ज. ‘विविक्ते००० योजयन्नभि’ नास्ति. १० च. भूतान्यं (न्या) भिमुखेन° ख्ये. ११ ग. °गमः। २७। नृव°. १२ ग. ज. इन्द्र। भर°; घ. झ. ट. इन्द्र नृतमाभिः० महि स्थूरं बृहन्तम्। भर°. १३ क. ख. घ. झ. ट. ठ. ड. °स्यार्षम्। त्रिष्टुप्। व्यूढ°; च. °स्यार्षम्। व्यूढ° त्रिष्टुप्.

वामं पार्थिवं[1] वननीयं[2] श्रोमतोभिः श्रवणीयतमैः शब्दैः[3] । केन पुनरर्थेन वंसीमहि । इतो यस्मात् ईक्षे ईशिषे त्वं वस्वः वसुनो धनस्य[4] उभयलक्षणस्य दिव्यस्य पार्थिवस्य च वसुनस्त्वं हे राजन् धा रत्नं देहि धनम् । कीदृशं पुनर्देहि । महि महत् वस्तुभूतं[5] स्थूरं बहु बृहन्तं च बहुकालं यत्स्यात्तद्देहि । एवमत्र वसुसंबन्धात् 'ईक्षे' इत्येष शब्दः 'ईशिषे' इत्येवमुपपद्यते ।

'क्षोणस्य' (२८) इत्यनवगतम् । 'क्षयणस्य[6]' इत्यवगमः[7] ।

'क्षोणस्य' इत्यस्य

'युवं[8] श्यावाय रुशतीमदत्तं महः क्षोणस्याश्विना कण्वाय । प्रवाच्यं तद्वृषणा कृतं वां यन्नार्षदाय[9] श्रवो अध्यधत्तम्' (ऋ० सं० १ । ११७ । ८) ॥ कक्षीवत आर्षम्[10] । त्रिष्टुप् । प्रातरनुवाकाश्विनयोः शस्यते (आश्व० श्रौ० ४ । १९) । युवं युवां हे अश्विनौ श्यावाय राज्ञे रुशतीं ज्वलितरूपां श्रियम् अदत्तम् । युवामेव च महतः क्षोणस्य क्षयणस्य निवासस्य दातारौ कण्वाय ऋषये । किंच । प्रवाच्यं प्रकर्षेण वचनीयं श्रोतव्यं तद्युवाभ्यां कृतं हे वृषणौ वर्षितारौ यत् नार्षदाय ऋषये बधिरीभूताय श्रवः श्रोत्रम् अध्यधत्तम् अधिकं दत्तवन्तौ स्थः । एवमत्र दानसंबन्धाधिकाराच्छब्दसारूप्याच्च 'क्षोणस्य गृहस्य' इति प्रतीयते ।

'क्षीणस्य' (२८) इत्येवमेके मन्यन्ते । तत्पुनरनुपपन्नम् । 'क्षयणस्य' इति भाष्यकारो निराह ।

'अस्मे' (२९) इत्येतत्पदं सर्वविभक्त्यन्तं तस्मादनेकार्थम् । एकमेवं ह्येतच्छब्दरूपं सप्तस्वपि विभक्त्यर्थेषु वर्तते । प्रकरणादिवशात्तस्य नियमो भवति । तद्यथा । प्रथमायास्तावत् 'अस्मे[11] ते बन्धुः । वयमित्यर्थः' ॥६॥

---

१ च. पार्थिवं. २ क. ख. घ. झ. ट. ठ. ड. °नीयं धनं श्रो°; च. °नीयं श्रो° धनं. ३ घ. झ. ट. ठ. ड. शब्दः । केन तु पुन°. ४ क. ख. घ. झ. ट. ठ. ड. धनस्योभयस्य उभय°. ५ ग. ज. वसुभूतं; च. वसुभूतं° स्तु, ६ ग. ज. क्षणस्येत्य°. ७ ग. °गमः । २८ । युवं°. ८ ग. ज. रुशतीं । कक्षी°; घ. झ. ट. रुश० अध्यधत्तं । कक्षी°. ९ च यन्नारिषदाय. १० क. ख. घ. झ. ट. आर्षम् । आश्विनी । त्रिष्टुप् ; च. आर्षं° । त्रिष्टुप्° आश्विनी. ११ क. ख. २ (६); ग. २९; इतरेष्वङ्को नास्ति.

अस्मे ते बन्धुः । वयमित्यर्थः । अस्मे यातं नासत्या सजोषाः । अस्मानित्यर्थः । अस्मे समानेभिर्वृषभ पौंस्येभिः । अस्माभिरित्यर्थः । अस्मे प्र यन्धि मघवन्नृजीषिन् । अस्मभ्यमित्यर्थः । अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु । अस्मादित्यर्थः । ऊर्व इव पप्रथे कामो अस्मे । अस्माकमित्यर्थः । अस्मे धत्त वसवो वसूनि । अस्मास्वित्यर्थः । पाथोऽन्तरिक्षं पथा व्याख्यातम् । श्येनो न दीयन्नन्वेति[1] पाथ इत्यपि निगमो भवत्युदकमपि पाथ उच्यते पानात् । आ चष्ट आसां पाथो नदीनामित्यपि निगमो भवत्यन्नमपि पाथ उच्यते पानादेव । देवानां पाथ उपवक्षि विद्वानित्यपि निगमो भवति सवीमनि प्रसवे । देवस्य वयं सवितुः सवीमनीत्यपि निगमो भवति सप्रथाः सर्वतः पृथुः । त्वमग्ने सप्रथा असीत्यपि निगमो भवति विदथानि वेदनानि । विदथानि प्रचोदयन्नित्यपि निगमो भवति ॥ ७ ॥[2]

'तपसस्तनूरसि प्रजापतेर्वर्णः परमेण पशुना क्रीयसे सहस्रपोषं पुष्यन्ती । अस्मे ते बन्धुः पुषेयम्' इति । सोमक्रयणे द्रव्यापाकरणमन्त्रेष्वजाया[3] एषोऽपाकरणमन्त्रः ।[4] सोच्यते । हे अजे । तपसः अग्नेः त्वं तनूः शरीरम् असि । 'आग्नेय्येषा[5] अजा' इति ह्युक्तम् । 'स एवा[6] एभ्यः प्ररोचयत्' इति च । तस्मादुपपद्यतेऽग्नेस्तनुत्वमजायाः । प्रजापतेर्वर्णः वरणीया त्वं सहस्रपोषम् अस्माकं पुष्यन्ती एतस्मिन् कर्मण्यङ्गभावमुपेहि । एवमजामभिष्टुत्याधुना सोमं ब्रवीति । हे सोम अनेन परमेण श्रेष्ठेन पशुना क्रीयसे । किं कारणम् । अस्मे वयं

'अस्मे' इत्यस्य प्रथमार्थे प्रयोगः

---

१ ङ. थ. दीयंनन्वे°. २ क ख. ३ (७); छ. त. ८; द. ३. ३ क. ख. °क्रयणस्य द्रव्या°; घ. झ. ट. 'क्रयणद्रव्या°; ठ. ह. 'क्रदण द्रव्या°. ४ ग. ज. °मन्त्रः । सोच्यते: च. °करणे(णा) मन्त्रे(ऽ)ष्व°. ५ क. ख. घ. झ. ट. ठ. ङ. अग्नेर्ह्येषा; च. आग्नेय्येषा° ह्यें. ६ क. ख. घ. ङ. एता; च एवा; ठ एता° वा; ड. ड. एता ह्येभ्यः°

ते[1] तव बन्धवः । विनियोक्तार इत्यभिप्रायः । एवमत्र प्रथमान्तेन 'बन्धु'-शब्देन सामानाधिकरण्यात् 'अस्मे' इत्यस्य 'वयम्' इत्येवं प्रथमया विपरिणाम उपपद्यते[2] ।

'आ श्येनस्य जवसा[3] नूतनेनास्मे यातं नासत्या सजोषाः । हवे हि वामश्विना रातहव्यः[4] शश्वत्तमाया उषसो व्युष्टौ'

तस्यैव द्वितीयार्थे (ऋ० सं० १ । ११८ । ११) ॥ कक्षीवत आर्षम् । त्रिष्टुप्[5] । प्रातरनुवाकाश्विनयोः शस्यते (आश्व० श्रौ० ४ । १५) । आयातम अस्मे अस्मान् प्रति हे नासत्यौ अश्विनौ । कथं च पुनरायातम् । श्येनस्य पक्षिणः जवसा जवेन वेगेन नूतनेन नवतमेन । परिश्रान्तस्य हि श्येनस्यापि मन्दतरो जवो भवति । सजोषाः मया सह प्रीयमाणौ परस्परेण वा युवाम्[6] । कस्मात्पुनरेवं ब्रवीमि । इतो यस्मात् हवे हि वाम् आह्वयामि युवाम् । न चैव[7]मेवाह्वयामि । किं तर्हि । रातहव्यः दत्तहव्यः । युवामुद्दिश्योत्सृष्टमेतद्धव्यं मया । तौ युवामेतद्विज्ञाय शश्वत्तमायाः शाश्वतिकतमाया अस्या उषसो व्युष्टौ व्युच्छेदे[8]काले आहूयमानावागच्छतम् । एवमत्र 'आयातम्' इत्यनेन संबन्धात् 'अस्मे' इत्यस्य 'अस्मान्' इत्येवं द्वितीयया विपरिणाम उपपद्यते[9] ।

'भूरि चकर्थ युज्येभिरस्मे[10] समानेभिर्वृषभ पौंस्येभिः । भूरीणि हि कृणवामा शविष्ठेन्द्र क्रत्वा मरुतो यद्वशाम' (ऋ० सं० १ । १६५ । ७) ॥ इन्द्रमरुत्संवादे

तृतीयार्थे

मरुतामार्षम्[11] । महाव्रते[12] (ऐ० आ० ५ । १ । १)

१ च. 'ते' नास्ति. २ ग. °द्यते । ३-। आ श्ये°. ३ ग. ज. जवसा । कक्षी°; घ. झ. ट. जवसा० उषसो व्युष्टौ । कक्षी°. ४ च. रातहव्यः° हव्यः. ५ क. ख. घ. झ. ट. ठ. ड. त्रिष्टुप् । आश्विनी । प्रात°; च. त्रिष्टुप्^ । प्रात° आश्विनी. ६ क. ख. घ. झ. ट. ठ. ड. वा वां युवाम्; च. वा^ युवाम्° वां. ७ क. ख. घ. झ. ट. ठ. ड. न वृथैवाह्व°; च. न चैवमेव ह्व° वृथै. ८ क. ख. घ. झ. ट. ठ. ड. व्युच्छेदनकाले; च. व्युच्छेद^ काले° न. ९ ग. °द्यते । ३१ । भूरि°. १० ग. ज. युज्येभिरस्मे । इन्द्र°; घ. झ. ट. युज्येभिः ०यद्वशाम । इन्द्र°. ११ क. ख. घ. झ. ट. °मार्षम् ऐन्द्री । त्रिष्टुप् । महा°; च. °मार्षम् ^ । महा° ऐन्द्री त्रिष्टुप्; ठ. ड. मार्षम् । त्रिष्टुप् । महा°. १२ क. ख. घ. झ. ट. ठ. ड. °व्रते च व्यू°.

व्यूढस्य दशरात्रस्य च[1] सप्तमेऽहनि मरुत्वतीये शस्त्रे[2] (आश्व० श्रौ० ७।३) शस्यते । इन्द्र उच्यते । सं[3] त्वं भूरि बहु चकर्थ कृतवानसि कर्म तस्मिंस्तस्मिन् संग्रामे। तत्पुनः युज्येभिः[4] अस्मे अस्माभिः एव संयुक्तः समानेभिः समानैः पौंस्येभिः बलैः हे वृषभ वर्षितः। नैकाकीत्यभिप्रायः। किंच। वयमपि भूरीणि बहूनि कर्माणि कृणवाम तस्मिंस्तस्मिन् संग्रामे हे शविष्ठ बलिष्ठ इन्द्र। न च केवलं वाङ्मात्रेणैतद्ब्रूमः। किं तर्हि। कृत्वा एव कर्मणैव एतत्संपादयामो यद्वद्[6] वशाम यत्[7] कामयामह इत्यर्थः । एवमत्र ‘ युज्येभिः ’ इत्यनेन संबन्धात् ‘अस्मे’ इत्यस्य ‘अस्माभिः’ इति तृतीयया विपरिणाम उपपद्यते[8]।

‘ अस्मे प्र यन्धि[9] मघवन्नृजीषिन्निन्द्र रायो विश्ववारस्य भूरेः। अस्मे शतं शरदो जीवसे धा अस्मे वीराञ्छश्वत इन्द्र शिप्रिन्’

चतुर्थ्यर्थे (ऋ०सं०३।३६।१०)॥ घोरस्याङ्गिरसस्येयमार्षम् । त्रिष्टुप्[10] । जातकर्मणि विनियुक्ता (आश्व० गृ०१।१५) । अस्मे अस्मभ्यं प्रयन्धि देहि हे मघवन् धनवन्निन्द्र ऋजीषिन् रायो धनस्य विश्ववारस्य सर्वा आपदो यद्धनं वारयति तस्य भूरेः बहुनो यस्याधिपतिस्त्वं तस्य अभिलषितां मात्रां देहि। किंच। अस्मे अस्मभ्यं शतं शरदः शतं वर्षाणि जीवनाय धाः देहि । अस्मे अस्मभ्यं वीरान् पुत्रान् शश्वतो दीर्घायुषो देहि हे[11] शिप्रिन्। एवमे[12] ‘ अस्मे प्र यन्धि ’ इत्यनेन याथार्थ्येन[13] संबन्धात् ‘ अस्मे ’ इत्यस्य ‘ अस्मभ्यम् ’ इति चतुर्थ्या विपरिणाम उपपद्यते[14] ।

---

१ क. ख. ष. झ. ट. ठ. ड. ‘च’ नास्ति. २ क. ख. ष. झ. ट. ठ. ड. ‘शस्त्रे’ नास्ति. ३ ष. झ. ट. ठ. ड. सन्त्यं भूरि°. ४ क. ख. ष. झ. ट. ठ. ड. युज्येभिरेवास्मे. ५ ष. झ. ट. ठ. ड. ‘स्मिन्त्संग्रा°. ६ क. ख. ष. झ. ट. ठ. ड. यद्वशाम. ग. यद्वद्°. ७ क. ख. ष. झ. ठ. ड. यत्काम°; ट. यत्काम °द्य. ८ ग. °द्यते ।३२। अस्मे. ९ ग. ज. यन्धि। घोर ; ष. झ. ट. यन्धि मघवन्० इन्द्र शिप्रिन्। घोर°. १० क. ख. ष. झ. ट. ठ. ड. त्रिष्टुबैन्द्री; च. त्रिष्टुप्। जात° ऐन्द्री. ११ च. देहि शि° हे. १२ क. ख. ष. झ. ठ. ट. ड. एवमत्रास्मे. १३ ग. याथार्थ्येन; च. याज्ञार्थेन; ज. याथार्थेन. १४ ग. °द्यते ।३३। तस्य°.

'तस्य वयं सुमतौ यज्ञियस्यापि भद्रे सौमनसे स्याम। स सुत्रामा स्ववाँ इन्द्रो अस्मे आराच्चिद् द्वेषः सनुतर्युयोतु' (ऋ० सं० ६। ४७। १३)॥ गर्गस्य भारद्वाजस्यार्षं षष्ठे मण्डले। ऐन्द्री। त्रिष्टुप्। पुनरपि चेयमेव कौक्षीवतः सुकीर्तिर्नाम तेन दशमे मण्डले दृष्टा। षष्ठे चाहनि पृष्ठ्यस्य विश्वजिति चेयं तृतीये सवने ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्ता (आश्व० श्रौ० ८। ४)। तस्य इन्द्रस्य यज्ञियस्य यज्ञार्हस्य वयं सुमतौ शोभनेऽध्यवसाये स्याम। अपि चास्य भद्रे भन्दनीये स्तुत्ये सौमनसे शोभनसंकल्पे मनसि नित्यमेव स्याम। स सुत्रामा इन्द्रः स्ववान् धनवान् अस्मे अस्मत्तः आराच्चित् दूरतरमपनीय द्वेषः द्वेष्यं पापं ततः सनुतः स्वन्तर्हितं कृतं यथा तं न पश्येम तथा युयोतु। नाशयत्वित्यर्थः। एवमत्र 'द्वेषः' इत्यनेन संबन्धात् 'अस्मे' इत्येतस्य 'अस्मत्' इत्येवं पञ्चम्या विपरिणाम उपपद्यते।

पञ्चम्यर्थे

'आ नो भर भगमिन्द्र द्युमन्तं नि ते देष्णस्य धीमहि प्ररेके। ऊर्व इव पप्रथे कामो अस्मे तमा पृण वसुपते वसूनाम्' (ऋ० सं० ३। ३०। १९)॥ 'उद्वृह रक्षः' इत्यस्या एवानन्तरा। आभर नः हे इन्द्र भगं भजनीयं धनराशिं द्युमन्तं दीप्तिमन्तम्। आहृत्य चास्मभ्यं देहि। तथा प्रभूतं देहि यथा सुकृशेषस्य प्ररेके अतिरेके सति निदधीमहि ते तव स्वभूतस्य देष्णस्य दानस्येत्यर्थः। कस्मात्पुनरेवं ब्रवीमि प्रभूतं देहीति। इतो यस्मात् ऊर्व इव यथा वडवामुखेऽवस्थित ऊर्वोऽग्निः अपः पिबन्

षष्ठ्यर्थे

१ ग. च. ज. सुमतौ (इति प्रतीकमेव) २ ग. ज. शंयोर्बार्हस्पत्यस्यार्षं षष्ठे मण्डले। पुनरपि°; च. शंयोर्बार्हस्पत्य (गर्गस्य भारद्वाज) स्यार्षं षष्ठे° ऐन्द्री त्रिष्टुप्. ३ ट. मण्डळे. ४ ग. ज 'काक्षीवतः' नास्ति; च. °मेव॰ सुकी° काक्षीवतः. ५ घ. झ. ट. ठ. ड. °र्नामा. ६ च. °ध्यगाये ७ ग. च. ज. वास्य. ८ ग. °द्यते। ३४। आ नो°. ९ ग. ज. °मिन्द्र। उद्वृ°; घ. झ. ट. °मिन्द्र॰ वसूनाम्। उद्वृ°. १० ज. उद्वृह°. ११ क. ख. ङ. झ. ट. ठ. ड. आभर आहर नोऽस्मभ्यं हे°; च. आभर नः हे° आहर नोऽस्मभ्यं. १२ ग. ज. 'नि' नास्ति. १३ च. यथा वा वड°.

पप्रथे प्रथते एवमयम् अस्मे अस्माकं कामः प्रथते विस्तीर्यते । तम् आभिमुख्येन पृण पूरय वसूनां हे वसुपते । एवमत्र ' कामः पप्रथे ' इत्यनेन संबन्धादात्मविषयत्वादाशिषः ' अस्मे ' इत्यस्य ' अस्माकम् ' इत्येवं षष्ठया विपरिणाम उपपद्यते ।

सप्तम्यर्थे

' अस्मे धत्त वसवो वसूनि ' । अत्र ' धत्त ' इत्यनेन संबन्धात् ' अस्मे ' इत्यस्य ' अस्मासु ' इत्येवं सप्तम्या विपरिणाम उपपद्यते । सप्तदशेऽध्याये ' सुगावो देवाः सुपथाः ' इति शेषो वक्ष्यत एव (निरु० १२ । ४२) ।

अन्तरिक्षार्थे पाथः-शब्दः

' पाथः ' (३०) इत्यनवगतमनेकार्थं च । ' अन्तरिक्षं तावत्पाथ उच्यते ' । तत्पुनरेतत् ' पथा व्याख्यातं ' ' पन्थाः पततेर्वा ' इत्यत्र (निरु०२।२८)। ' यत्रा चक्रुरमृता गातुमस्मै श्येनो न दीयन्नन्वेति पाथः । प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः ' (ऋ० सं० ७ । ६३ । ५) ॥ वसिष्ठस्यार्षम् । अस्याः प्रथमोऽर्धर्चः सौर्य इति प्रतिजज्ञे शौनको मैत्रावरुणो द्वितीय इति । एवं ह्याह ' ऋचः सौर्यो हि गीयन्त उद्दृतीत्यर्धपञ्चमाः ' इति । यत्र यदा चक्रुः कृतवन्तः अमृता देवा गातुं गमनमार्गम् उदयादारभ्य यावदस्तमय इति यदा चायमारब्धः सूर्यः श्येनो न श्येन इव दीयन्नन्वेति दीयमानो गच्छन् पाथः अन्तरिक्षं तेन मार्गेणाथ तदा प्रारभ्य प्रतिविधेम वाम् । प्रतीत्य चेतसा युवाम् उदिते सूर्ये विधेम परिचरेम वयं हे मित्रावरुणौ नमोभिः नमस्कारैः अपि च हव्यैः । एवमत्र ' श्येनो न दीयन्नन्वेति पाथः ' इत्यनेन संबन्धात् ' पाथोऽन्तरिक्षम् ' इत्युपपद्यते । अपठितमेतदन्तरिक्षनामस्वित्यप्रतीतार्थम् । अथवैवमन्यथा स्यात्प्रथमस्यार्ध-

---

१ च. इत्यस्माक°स्या. २ ग. ज. 'कामित्येवं षष्ठया ०००इत्यस्यास्मा' नास्ति. ३ ग. च. ज. सुपथानीति°. ४ क. ख. ग. ज. व. झ. ट. ठ. ड. उच्यत; च. उच्यते° वक्ष्य. ५ ग ज. पथते°; च. पथेरे° त. ६ ग. °त्यत्र । ३५ । यत्रा°. ७ ग. ज. °मृता । वसि°; घ. झ. ट. °मृता गातुं० मित्रावरुणोत हव्यैः । वसि°. ८ ग. ज. °ह्याह सूर्याय गीयन्त उद्दृ°; च. सौर्यः ऋचः गीयन्त उद्दृ°. ऋचः सूर्याय (सौर्यो हि) ९ क. ख. व. झ. ट ठ. ड. यत्रा अस्मै सूर्याय चक्रु; च. यदा चक्रुः° अस्मै सूर्याय.

र्चस्यार्थः सूर्यप्रधानत्वात् । उत्तरार्धर्चो निराकाङ्क्ष एव । यत्र

अथवा प्रथमार्धस्य सूर्यप्रधानत्वादन्योऽर्थः

यस्मिन्नभसः प्रदेशे गातुं कृतवन्तः अमृता देवाः सूर्यस्य तेनैव प्रदेशेन श्येन इव दीयन्नन्वेति अनुगच्छति पाथः । न तां मर्यादामीश्वरोऽपि सन्नतिक्रामतीत्यर्थः ।

'उदकमपि पाथ उच्यते पानात्' । 'अभि वो देवीं धियं दधिध्वं प्र वो देवत्रा वाचं कृणुध्वम्' (ऋ० सं० । ७ । ३४ । ९) । 'आ चष्ट

उदकार्थे

आसां पाथो नदीनां वरुण उग्रः सहस्रचक्षाः' (ऋ० सं० ७ । ३४ । १०) ॥ वासिष्ठस्यार्षम् । व्यूढस्य दशरात्रस्य चतुर्थेऽहनि तृतीयसवने वैश्वदेवशस्त्रे शस्यते (आश्व० श्रौ० ८ । ८) । हे ऋत्विजः अभिवदामि वः । एतां देवीं धियं यूयमेतान् विश्वान् देवान् प्रति दधिध्वम् धारयध्वम् । किंच । प्र वो देवत्रा वाचं कृणुध्वम् । प्रब्रवीमि चैतत् । देवत्रा देवगामिनीमेतां वाचं स्तुतिलक्षणां कृणुध्वम् । किंच । आ चष्ट आसां पाथो नदीनां वरुणः । वरुणोऽपि देव आदित्य आचष्ट इव प्रकथयतीव जनानां वर्षमुत्सृजन् आसां रश्मिनदीनां स्वभूतमुदकं पाथः । किंलक्षणः पुनर्वरुण आचष्टे । उग्र उद्गूर्णः सहस्रचक्षाः । बहुदर्शन इत्यर्थः । एवमत्र 'पाथः'शब्देन 'उदकम्' उच्यते नदीसंबन्धात् ।

'अन्नमपि पाथ उच्यते पानादेव' । 'वनस्पते रशनया नियूया देवानां पाथ उप वक्षि विद्वान् । स्वदाति देवः कृणवद्धवींष्यवतां द्यावापृथिवी हवं मे' (ऋ० सं० १० । ७० । १० ।) ॥ आप्रीसूक्ते सुमित्रस्येयमार्षम् । हे वनस्पते रशनया नियूय निबध्य

अन्नार्थे

देवानाम् एतत्स्वभूतं पाथः अन्नं हविर्लक्षणम् उपवक्षि समीपं वहसि विद्वान्

१ क. ख. घ. झ. ट. सूर्यश्च. २ ग. पानात् । ३६ । अभि.° ३ ग. ज. धियं । वसि°; घ. झ. ट. धियं० उग्रः सहस्रचक्षाः । वसि°. ४ क. ख. घ. झ. ट. ठ. ड. व्यूढस्य. ५ क. ख. घ. झ. ट. तृतीये स°. ६ क. ख. घ. झ. ट. ठ. ड. एनां; च. एतां देवा° नां. ७ ग. देव । ३७ । वन°. ८ ग. ज. नियूय । आप्री°; घ. झ. ट. नियूय । देवानां पाथ० द्यावापृ°. ९ क. ख. घ. झ. ट. °सूक्ते वाध्र्यश्वस्य सुमि°; च. °सूक्ते॰ सुमि° वाध्र्यश्वस्य. ३१

जानानः । कस्मात्पुनरेवं ब्रवीमि । इतो यस्मात् स्वदाति स्वादयति स स देवः त्वयोढान्येतानि हवींषि यानि कृगवत् अकरोत् एष यजमानः । वनस्पतिमेवमुक्त्वा पुनर्द्यावापृथिव्यावाह । हे द्यावापृथिव्यौ युवम[1]पि अवताम् अवगच्छताम् एनं हवम् आह्वानं मम । एवमत्र ह[2]वनसंबन्धादन्नं पाथ इत्युपपद्यते ।

'सवीमनि' (३१) इत्यनवगतम् । 'प्रसवे' इत्यवगमः[3] । 'देवस्य वयं सवितुः[4] सवीमनि श्रेष्ठे स्याम वसुनश्च दावने । यो विश्वस्य द्विपदो यश्चतुष्पदो निवेशने प्रसवे चासि भूमनः' (ऋ० सं० ६ । ७१ । २) ॥

'सवीमनि' इत्यस्य

भरद्वाजस्यार्षम् । जगती । गवामयने चतुर्विंशं नाम द्वितीयमहः । तत्रेयं तृतीयसवने वैश्वदेवे[5] शस्यते (आश्व० श्रौ० ७ । ४) । देवस्य सवितुः सर्वार्थप्रसवितुः । तस्य वयं सवीमनि श्रेष्ठे प्रसवे सर्वार्थाभ्यनुज्ञाने नित्यकालं वयमेव स्याम । वसुनश्च धनस्य च दावने दाने श्रेष्ठे प्रवृत्ते वयमेव लब्धारः स्याम । हे स[6]वितः यस्त्वं विश्वस्य सर्वस्यास्य द्विपदो मनुष्यादेः यश्चतुष्पदो गवादेः भूमनो भूम्नो निवेशने च[7] स्थितौ प्रसवे च सृष्टौ प्रभुः[8] तस्य तवैवंगुणविशिष्टस्य प्रसवे च दाने च वयमेवाङ्गभूताः स्यामेति । एवमत्र 'सवितुः' इत्यनेन संबन्धात् 'सवीमनि' इत्यस्य 'प्रसवे' इत्येवं विपरिणाम उपपद्यते ।

'सप्रथाः' (३२) इत्यनवगतम् । 'सर्वतः पृथुः' इत्यवगमः[9] । 'त्वमग्ने सप्रथा[10] असि जुष्टो होता वरेण्यः । त्वया यज्ञं वि तन्वते' (ऋ० सं० ५ । १३ । ४) ॥

सप्रथाः इत्यस्य

सुतम्भरस्येयमार्षम्[11] । प्रातरनुवाकाश्विनयोः शस्यते (आश्व० श्रौ० ४ । १३) । हे अग्ने त्वमेव सप्रथाः सर्वतः

१ क. ख. घ. झ. ट. ठ. ड. वां युवा°; च. पृथिव्यौ ˇ युवा° वां. २ घ. ट. ठ. ड. वहनसं°. ३ ग. °गमः । ३८ । देव°; घ. ट. °गमः । ३७ । देव°. ४ ग. ज. सवितुः । भर°; घ. झ. ट. सवितुः सवीमनि० प्रसवे चासि भूमनः । भर°. ५ क. ख. घ. झ. ट. ठ. ड. °दैवशस्त्रे शस्यते. ६ च. प्रसवि°. ७ च. °शने-वास्थितौ° च. ८ क. ख. घ. झ. ट. ठ. ड. प्रभुरसि तस्य; च. प्रभुः तस्य° भुरसि. ९ ग. गमः । ३९ । त्वम°. १० ग. ज सप्रथाः । सुत°; घ. झ ट. सप्रथा० वितन्वते । सुत°. ११ क. ख. घ. झ. ट. °मार्षम् । गायत्र्याग्नेयी । प्रात°; च. °मार्षम् ˇ प्रात° गायत्री आग्नेयी.

पृथुः विस्तीर्णो जुष्टश्च आसेवितो यजमानैः होता आह्वाता देवानां भवसि । वरेण्यो वरणीयः सर्वथापि । किं बहुना । त्वयैव हेतुभूतेनैते यजमाना एतं यज्ञं वितन्वते विविधं तन्वते विस्तारयन्ति । एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च ' सप्रथाः सर्वतः पृथुः ' इत्युपपद्यते[1] ।

'विदथानि'[2] (३३) इत्यनवगतम् । 'वेदनानि' इत्यवगमः[3] ।

'विदथानि' इत्यस्य

'होता देवो अमर्त्यः[4] पुरस्तादेति मायया । विदथानि प्रचोदयन्' (ऋ० सं० ३ । २७ । ७) ॥ विश्वामित्रस्यार्षम्[5] । प्रातरनुवाकाश्विनयोः शस्यते (आश्व० श्रौ० ४ । १३) । अग्नीषोमप्रणयने विनियुक्ता (आश्व० श्रौ० ४ । १०) । होता आह्वाता देवः अग्निः अमर्त्यः अमरणधर्मा पुरस्तात् अस्य यज्ञकर्मणः सोमस्य वा प्रणीयमानस्य एति गच्छति मायया स्वया प्रज्ञया एषामृत्विजां विदथानि विज्ञानानि प्रकर्षेण चोदयन् । अनुगृह्णन्नित्यर्थः । एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च ' विदथानि वेदनानि' इत्युपपद्यते[6] ।

'श्रायन्तः' (३४) इत्यनवगतम् । 'समाश्रिताः' इत्येवमर्थप्रतीतिः[7] ॥७॥

श्रायन्त इव सूर्यं विश्वेदिन्द्रस्य भक्षत । वसूनि जाते जनमान ओजसा प्रति भागं न दीधिम (ऋ० सं० ८ । ९९ । ३) ॥ समाश्रिताः सूर्यमुपतिष्ठन्तेऽपि वोपमार्थे स्यात्सूर्यमिवेन्द्रमुपतिष्ठन्त इति सर्वाणीन्द्रस्य धनानि विभक्ष्यमाणाः स यथा धनानि विभजति जाते च जनिष्यमाणे च तं वयं भागमनुध्यायामौजसा बलेनौज ओजतेर्वौब्जतेर्वाशीराश्रयणाद्वाश्रपणाद्वाथेयमितराशीराशास्तेः । इन्द्राय गाव आशिरमित्यपि निगमो भवति । सा मे सत्याशीर्देवेष्विति च[8] (तैं० सं० ३ । २ । ७) । यदा ते मर्तो

---

१ ग. ज. इत्येतदुपप°. २ क. ख. ग. विद्थानि. ३ ग. °गमः । ४० । होता. ४ ग. ज. °मर्त्यः । विश्वा°; घ. झ. ट. °मर्त्यः० प्रचोदयन् । विश्वा°. ५ क. ख. घ. झ. ट. ठ. ड. स्यार्षम् । गायत्री । आग्नेयी । प्रात°; च. °स्यार्षम् ४, प्रात° गायत्री आग्नेयी. ६ क. ख. °द्यते । ३ (७) । श्राय°; ग. ४१; ठ. °प्रतीतिः । इति निरुक्तव्याख्यायां षष्ठाध्याये सप्तमः खण्डः ७ ड. वर्जमितरेष्वङ्को नास्ति. ८ क. ख. च । ४ । यदा°; छ. त. च । ९ । यदा°; द. च । ४ । यदा°.

अनु भोगमानळाँदिद्रसिंष्ठ[1] ओषधीरजीगः । यदा ते मर्तो भोगमन्वापदथ ग्रसितृतम ओषधीरगारीर्जिगर्तिर्गिरतिकर्मा वा गृणातिकर्मा वा गृह्णातिकर्मा वा । मूरा अमूर न वयं चिकित्वो महित्वमग्ने त्वमङ्ग वित्से । मूढो[2] वयं स्मोऽमूढ[3]स्त्वमसि न वयं विद्मो महत्त्वमग्ने त्वं तु वेत्थ शशमानः शंसमानः । यो वां यज्ञैः शशमानो ह दाशतीत्यपि निगमो भवति । देवो देवाच्या कृपा । देवो देवान् प्रत्यक्तया कृपा कृप् कृपतेर्वा कल्पतेर्वा ॥ ८[4] ॥

'आयन्तः इत्यस्य'

'आयन्त इव सूर्यम्' । बृहती । नृमेधस्याङ्गि[6]रसस्येयमार्षम् । 'अनर्शरातिम्' (ऋ० सं० ८ । ९९ । ४) इतीयमनन्तरैतस्याः[7] । महाव्रते बृहतीसहस्रे विनियोगः (ऐ० आ० ५ । २ । ४ ।) । आयन्त इव सूर्यम् । इवोऽनर्थक एतस्मिन् प्रथमेऽर्थे । समाश्रिताः समन्तादाश्रिताः सूर्यम् उपतिष्ठन्ते रश्मयः । किमिति । विश्वेदिन्द्रस्य भक्षत । 'इत्' इत्यनर्थक एव । विश्वानि सर्वाणि इन्द्रस्य धनानि सूर्यस्य स्वभूतान्युदकानि तेन प्रत्तानि[8] विभक्ष्यमाणा विभक्तुमिच्छन्तः । अथ 'वा' 'इव'इत्ययम् 'उपमार्थे स्यात्' नानर्थकः । आह । कथमिति । उच्यते । सूर्यमिवेन्द्रमुपतिष्ठन्ते । यथा सूर्यमहन्यहनि रश्मय उपतिष्ठन्त एवं मध्यस्थानमिन्द्रमुदकेश्वरमुपतिष्ठन्ते तस्य इन्द्रस्य स्वभूतानि धनानि उदकानि तेन प्रत्तानि[9] आत्मनो जनानां वा विभक्तुमिच्छमाना[10]: । किंच । वसूनि जाते जनमान ओजसा । यथेन्द्र आदित्यो वा वसूनि धनानि जाते च उत्पन्ने च[11] जनमाने जनिष्यमाणे च स्वेन ओजसा ऐश्वर्यबलेन विभजति तथैव यथा विभक्तस्तेन तं भागं भूतानि उपजीवन्ति तदैश्वर्यानुप्रवृत्त्यैव । यत एवमतो वयमपि तमेव भागं प्रति न दीधिम । अत्र ' न ' इत्ययमनर्थकः ।

---

१ क. ख. छ. त. द. °नलादि°. २ छ. त. द. मूल्हा. ३ छ. त. द. °मूल्हस्त्व°. ४ क. ख. ५ (८); छ. त. १०; द. ५. ५ घ. झ. ट. सूर्य० भागं न दीधिम । बृ°; ठ. ड. सूर्यमिति । बृ°. ६ ग. च. ज. नृमेधस आङ्गि°. ७ क. ख. घ. झ. ट. °नन्तरा चास्याः. ८ क. ख. ग. ज. घ. झ. ट. ठ. ड. प्रवृत्तानि; च. प्रवृत्तानि. ९ क. ख. घ. झ. ट. ठ. ड. प्रवृत्तानि; च. प्रवृत्तानि °वृ. १० ग. ज. °मिच्छतामानाः. ११ घ. ट. ठ. ड. 'च' नास्ति.

अनोर्वा स्थाने । 'तं वयं भागमनुध्यायाम' इति भाष्यकारो निराह । एवमत्र 'श्रायन्त इव सूर्यम्' इति सूर्यसंबन्धाद्रश्मयोऽध्याहृताः । रश्मिसंबन्धाच्च 'श्रायन्तः' इत्येष शब्दः समाङावुपसर्गावध्याहृत्य 'समाश्रिताः' इत्येवमुपमार्थो भवतीत्युपपद्यते ।

'ओजः ओजतेर्वा' वृद्ध्यर्थस्य । 'उब्जतेर्वा' न्यग्भावार्थस्य ।

'आशीः' (३५) इत्यनवगतमनेकार्थञ्च । 'आशिरम्' इत्येवमर्थप्रतीतिः ।

'आशीः' इत्यस्य व्युत्पत्तिः

या यजमानस्य व्रतधुक् तामाशिरं दुहन्ति । एतस्मिन्पक्षे दध्यभिधेयम् । तेन हि सोम उपरि श्रीयते । तस्मात्तदाशिरमित्युच्यते । अथ 'वा श्रपणात्' । ईषद्धि तच्छृतं भवति दधिभावात् । 'अथ' पुनर्या 'इयमितराशीः' इयम् 'आशास्तेः' । आङ्पूर्वस्य शास्तेरभिलाषार्थस्य (धा० १ । ६३०) ।

'इन्द्राय गाव आशिरं दुदुह्रे वज्रिणे मधु । यत्सीमुपह्वरे विदत्' (ऋ० सं० ८ । ६९ । ६) ॥

प्रयोगश्च

प्रियमेधसं आङ्गिरसस्येयमार्षम् । मध्यमे रात्रिपर्याये ब्राह्मणाच्छंसिनः शस्त्रे विनियुक्ता (आश्व० ६ । ४) । इन्द्राय वज्रिणे अर्थाय गावः आशिरं श्रपणार्थं पयो यज्ञे च पुनः पुनः दुदुह्रे मधु मध्वास्वादं यत्सीं सर्वत उपह्वरे उपगूढे ऊधःप्रदेशे दोग्धा अविदत् । स्तनैर्दुदुह्रे । एवमत्र गोसंबन्धात् 'आशीः'शब्देन 'आशिरम्' उच्यत इत्युपपद्यते ।

---

१ क. ख. घ. झ. ट. ड. 'मुपमार्थे भव°; ग. ज. °त्येवमयमर्थो भव°; च. 'मुपमार्थो भव° र्थे. २ क. ख. घ. झ. ट. °मित्यर्थप्र°. ३ क. ख. घ. झ. ट. उपश्रीय°; ठ. ड.° उपमीयते. ४ घ. च. झ. ठ. ड. श्रयणात्. ५ ग. °र्थस्य । ४२ । इन्द्रा°. ६ ग. ज. गावः । प्रिय°; घ. झ. ट. गाव आशिरं ० विदत् । प्रिय°. ७ ग. ज. °मेधसस्येयमार्षम्; च. 'मेधस आङ्गिरस्ये°. ८ क. ख. श्रयणा°. ९ क. ख. घ. झ. ट. ठ. ड. 'च' नास्ति; च. चँ. १० घ. ट. ठ. ड. दुह्रे. ११ क. ख. घ. झ. ट. ठ. ड. उपगूहे. १२ क. ख. घ. झ. ट. ठ. ड. तत्स्तनै°; च. °विदत् । स्तनै °तत्.

'अथेयमितराशीराशास्ते:' इति यदुक्तं तत्रेदमुदाहरणम्[1]। 'सा मे सत्याशीर्देवान् गम्यात्। श्रृण्वन्तु[2] ते समर्धयन्तु। जुष्टाज्जुष्टतरा पण्यात्पण्यतरा। अहेडता[3] मनसानुगच्छ यज्ञो देवान्गच्छतु'। प्रस्तरे प्रह्रियमाणे यजमानो जपत्येनम् (मैत्रा० सं० १।४।५॥ मान० श्रौ० १।४।२।१७)। सा मे मम आशी: सत्या यथाप्रार्थितैव देवान् गम्यात् प्राप्नोतु। श्रृण्वन्तु ते देवा:। श्रुत्वा च समर्धयन्तु। जुष्टात् अपि जुष्टतरा प्रियादपि प्रियतरा पण्यात् अपि पण्यतरा स्तुतादपि स्तुततरा। किंच। अहेडता[4] मनसा अक्रोधवता मनसा प्रहितोऽस्माभिर्हे प्रस्तर त्वमपि देवान्गच्छ। यज्ञ: अपि देवान्गच्छतु। त्वमपि चान्यं यज्ञम्। तद्याचामो[5]ऽसावपि देवान्गम्यात्। एवमत्राशीरेव 'आशी:' शब्देनाभिधीयते आशिषो हि देवान्प्रति गमनमभीष्टमिति[6]।

आशीर्वादार्थे आशी:शब्दस्य

'अजीग:' (३६) इत्यनवगतम्। 'अगारी:[7]' इत्यवगमः। 'अत्रा ते रूपमुत्तमम[9]पश्यं जिगीषमाणमिष आ पदे गो:। यदा ते मर्तो अनु भोगमानळादिद्ग्रसिष्ठ ओषधीरजीग:' (ऋ० सं० १।१६३।७)॥ दीर्घतमस इयमार्षम्। अश्वमेधेऽश्वस्तुतौ विनियुक्ता (आश्व० श्रौ० १०।८)। अत्र एतस्मिन्काले ते तव हे अश्व रूपम् अहम् उत्तमम् उत्कृष्टम् अपश्यं जिगीषमाणं जेतुमिच्छमानम् इषे अन्ने जेतव्ये निमित्तभूते आ पदे गो: उपरि भूम्या: शरपथे[10] वेद्यां वा। यज्ञेनापि ह्यन्नमेवामुष्मिँल्लोके जीयते। तस्माद्वेद्यामित्येवमुपपद्यते। किंच। यदा यस्मिन्काले ते तव मर्तो मनुष्य: अनु भोगम् आनट प्राप्नोति वाहयन्वा[11] अथ परिश्रान्तस्त्वम् ओषधीरगारी: ओषधीर्गृह्णासि गिरसि वा। अन्ये हि प्राणिन: परिश्रान्ताश्चरितुं न शक्नुवन्ति। त्वं तु सुतरामोषधीर्भक्षयसीत्येतदधिकं तव।

'अजीग:' इत्यस्य

---

१ ग. °रणम्।४३।सा°. २ ग. ज. 'शृण्वन्तु ते समर्धयन्तु' नास्ति; च. गम्यात्ˇ। जुष्टा° शृण्वन्तु ते समर्धयन्तु. ३ ग. ज. अरेडता; च. अहेड° रे; ठ. ड. अहेळता. ४ ग. ज. अरेडता; ठ. ड. अहेळता. ५ क. ख. व. झ. ट. तद्दयं याचा°; च. तद्या° द्दयं या. ६ क. ख. °मिति।४।अजी°. ७ ग. ज. अञगारी:; च. अजगारी:. ८ ग. °गम:। ४४/१। अत्रा°. ९ ग. च. ज. °मुत्तमं। दीर्व°; घ. झ. ट, °मुत्तम० ओषधीरजीग: दीर्व°. १० ग. ज. सर°; च. सर° श. ११ ग. ज °ह्यत्वाऽप्यपरि°.

एवमत्रौषध्यग्निसंबन्धात् 'जिगर्तिर्गिरतिकर्मा वा गृह्णातिकर्मा वा' इत्युपपद्यते ।

'अमूरः' (३७) इत्यनवगतम् । 'अमूढः' इत्यवगमः । 'मूरा

'अमूरः' इत्यस्य

अमूर न वयं चिकित्वो महित्वमग्ने त्वमङ्ग वित्से । शये वव्रिश्चरति जिह्वयादन्रेरिह्यते युवतिं विश्पतिः सन्' (ऋ० सं० १० । ४ । ४) ॥ त्रितस्याप्यस्यार्षम् । त्रिष्टुप् । प्रातरनुवाकाश्विनयोः शस्यते (आश्व० श्रौ० ४ । १३) । हे भगवन्नग्ने अमूर अमूढ मूरा मूढा वयं स्मो भवतो माहाभाग्यपरिज्ञानं प्रति । मन्दबुद्धित्वात् न वयं चिकित्वः न वयं भवतः प्रभावस्यान्तं विजानीमः । हे अग्ने त्वम् एव आत्मनो महिमानं महित्त्वं माहाभाग्यं वेत्सि । कस्त्वदन्यो महाभागस्यान्तं वेत्तुमर्हतीत्यभिप्रायः । किंच । शये शयपरिमाणे प्रदेशे उत्तरवेद्याख्ये वव्रिः विशेषात्मा तव रूपाख्यः चरति । समिद्धत्वान्मुहुर्मुहुश्चरति । स त्वमनेन रूपेणोत्तरवेद्यामवस्थितो जिह्वया ज्वालया तानि तानि हवींषि अदन् भक्षयन् रेरिह्यते युवतिं तां तामाहुतिं पुनः पुनरास्वादयसि विश्पतिः विश्वस्य सर्वस्य पतिः मनुष्यपतिर्वा सन् । यस्त्वमेवं करोषि हितैषित्वाद्यजमानानां सोऽस्माकं त्वमिदं नाम कुर्वित्यभिप्रायः । एवमत्र 'मूराः'इत्यात्मनिन्दाद्वारेणाग्निः 'अमूढः' इत्यनेन स्तूयत इत्यस्य 'अमूरशब्दस्य' 'अमूढः' इत्येष विपरिणाम उपपद्यते ।

'शशमानः' (३८) इत्यनवगतम् । 'शंसमानः' इत्यवगमः ।

'शशमानः' इत्यस्य

'यो वां यज्ञैः शशमानो ह दाशति कविर्होता यजति मन्मसाधनः । उपाह तं गच्छथो वीथो अध्वरमच्छा गिरः सुमतिं गन्तमस्मयू' (ऋ० सं० १ । १५१ । ७) ॥ दीर्घतमस आर्षम् । जगती । यः अयं यजमानो युवां हे मित्रावरुणौ यज्ञैः निमित्तभूतैः शशमानः

---

१ ग. °गमः । ४५ । मूरा°. २ ग. ज. वयं । त्रित°; घ. झ. ट. वयं० विश्पतिः सन् । त्रित.° ३ च. महा° ४ क. घ. झ. ट. माहाभाग्यस्यान्तं; ग. ज. माहाभागस्यान्तं; च. महाभागस्यान्तं°ग्य. ५ घ. चरति शति समि°; ट. चरति समिति समि°; ठ. ड. चरति समिति समि°. ६ क. ख. ग. ज. घ. झ. ट. 'त्वं' नास्ति. ७ ग. °गमः । ४६ । यो°. ८ ग. ज. शशमानः । दीर्घ°; घ. झ. ट. शशमा० गन्तमस्मयू । दीर्घ°. ९ क. ख. घ. झ. ट. ठ. ड. जगतीच्छन्दः. १० क. ख. घ. झ. ट. ठ. ड. 'अयं' नास्ति.

शंस[1]मानः स्तुवन् दाशति ददाति हवींषि वां[2] युवाभ्यां कविः क्रान्तदर्शनो होता आह्वाता यजति मन्मसाधनो मननसाधनः। विज्ञानसाधन इत्यर्थः। आह। तस्य किमिति। उच्यते। उपाह तं प्रत्युपागच्छथो युवां वीथः च तस्य अध्वरं अध्वराश्रितानि हवींषि। वयमपि चैवंगुणाविशिष्टा एव यतो ब्रूमः।[3]अच्छा गिर एता अस्मद्गिरः आभिमुख्येन आगन्तुमिच्छथो युवाम्। युवाम् अस्मयू। अस्मान्कामयमानावित्यर्थः। एवमत्र 'यज्ञैः शशमानः' इति यज्ञसंबन्धाच्छब्दसारूप्याच्च 'शशमानः शंसमानः' इत्येवमुपपद्यते।

'देवो देवाच्या कृपा' (३९) इत्येते अनवगते। देवशब्दोऽनयोरेवोपलक्षणार्थोऽत्र समाम्नातः। 'देवः देवाच्या कृपा' इति त्रीण्येतानि पदानि। 'देवाच्या' इत्यस्य 'देवान्प्रत्यञ्चितया' इत्यर्थप्रतीतिः। 'कृपा' इत्यस्यापि 'कल्पितया' इत्येवमर्थप्रतीतिः[4]।

'देवो देवाच्या कृपा' इत्यस्य व्युत्पत्तिः

'अग्निं होतारं मन्ये[5] दास्वन्तं वसुं सूनुं सहसो जातवेदसं विप्रं न जातवेदसम्। य ऊर्ध्वया स्वध्वरो देवो देवाच्या कृपा। घृतस्य विभ्राष्टिमनु वष्टि शोचिषाजुह्वानस्य सर्पिषः' (ऋ० सं० १। १२७। १)॥ परुच्छेपस्यार्षम्। अति[6]च्छन्दाः। अग्निचयन इष्टकोपधाने विनियुक्ता (मैत्रा० सं० २। १३। ८)।

प्रयोगश्च

अग्निम् अ[7]हम् होतारम् आह्वातारं देवानां मन्ये दास्वन्तं दानवन्तं दातृतमं वसुं वासयितारं सर्वस्य जगतः सूनुं सहसो बलस्य पुत्रं जातवेदसं जातप्रज्ञानं विप्रं न जातवेदसं विप्रमिव जातप्रज्ञानम्।[8] यथा हि कश्चित्कंचिन्म-

---

१ ग. ज. शसमानः; च. °शशमानः^ स्तुवन्° शंसमानः. २ क. ख. घ. झ. ट. ठ. ड. 'वां' नास्ति. ३ क. ख. घ. झ. ट. ठ. ड. °ब्रूमः। सुमतिं शोभनप्रज्ञं यजमानमनुलक्ष्य अच्छा°; च. ब्रूमः। ^अच्छा° सुमतिं शोभनप्रज्ञं यजमानमनुलक्ष्य. ४ ग. °तीतिः। ४७। अग्निं°. ५ ग. च. ख. मन्ये। सर्पिष इति परुच्छे°; घ. झ. ठ. मन्ये० सर्पिषः। परुच्छे°. ६ क. ख. घ. ट. ठ. ड. अतिच्छन्दा अत्यष्टिः; च. °छन्दाः ^। अग्नि° अत्यष्टिः. ७ क. ख. घ. झ. ट. ठ. ड. 'अहं' नास्ति. ८ ग. ज. °प्रज्ञानं यथा यावज्जानीयादेव°.

नुष्यं समानपृष्ठोदरपाणिपादं विप्रास्तंज्ञानं यथावज्जानीयादेवमहमग्निं यथावज्जाने । यः अग्निः स्वध्वरः शोभनयज्ञो देव ऊर्ध्वया कृपा सामर्थ्योच्छ्रयया कल्पितया देवाच्या देवान्प्रत्यञ्चितया गत्या घृतस्य विभ्राष्टिं विभ्रंसनम् अनुवष्टि आहुतिप्रक्षेपम् अनुकामयते । 'वाञ्छति वष्टि' इति कान्तिकर्मसु पठितम् (नि० घ० २ । ६) । आजुह्वानस्य उपरि हूयमानस्य सर्पिषः सर्पणशीलस्य । यमग्निमहमेवं जाने यश्चैवंगुणयुक्तः स इदं नामास्माकं करोत्वित्यभिप्रायः । एवमत्र ' देवाच्या कृपा ' इत्येतौ शब्दौ ' देवान्प्रत्यक्तया ' कल्पनया इत्येवमुपपद्येते शब्दसारूप्यादर्थोपपत्तेश्च ।

' विजामातुः ' (४०) इत्यनवगतम् । उपसर्गस्यापरिसमाप्त्यर्थे वृत्तिरत्रानवगमः । ' असुसमाप्त इव वरोऽभिप्रेतः ' इति हि भाष्यकारो निराह । विगतजामातृभाव इव यो ह्यपर्याप्तजामातृभावः स विजामातेत्युच्यते । स हि दाक्षिणात्येषु प्रसिद्धः ॥ ८ ॥

अश्रवं हि भूरिदावत्तरा वां विजामातुरुत वा घा स्यालात् । अथा सोमस्य प्रयती युवभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यम् (ऋ० सं० १ । १०९ । २) ॥ **अश्रौषं हि बहुदातृतरौ वां विजामातुरसुसमाप्ताज्जामातुर्विजामातेति शश्वद्दाक्षिणाजाः क्रीतापतिमाचक्षतेऽसुसमाप्त इव वरोऽभिप्रेतो जामाता जा अपत्यं तन्निर्मातोत वा घा स्यालादपि च स्यालात्स्याल आसन्नः संयोगेनेति नैदानाः स्याल्लाजानावपतीति वा लाजा लाजतेः स्यं शूर्पं स्यतेः शूर्पमशनपवनं शृणातेर्वाथ सोमस्य प्रदानेन**

---

१ च. विप्रास्तंप्र° प्त. २ क. ख. कृपा कृपया; घ. झ. ट. ठ. ड. कृपया. ३ च. गत्या ~ घृत° शोचिषा ज्वालया. ४ क. ख. घ. झ. ट. ठ. ड. विभ्रंशम्. ५ क. ख. घ. झ. ट. ठ. ड. क्षेपं शोचिषा ज्वालया अनुका°. ६ क. ख. °पत्तेश्च । ५ (८) । विजा. ७ क. ख. घ. झ. ट. ट. ड. ' हि ' नास्ति. ८ क. ख. घ. झ. ट. इव च यो; च. इव ~ यो° च. ९ क. ख. घ. झ. ठ. ड. ह्यप्राप्तजा°; ट. ह्यप्राप्त° पर्या. १० ग. ज. °भावं. ११ ग. ४८/१०; ठ. °प्रसिद्धः । इति निरुक्तव्याख्यायां षष्ठाध्यायेऽष्टमः खण्डः; ड. °प्रसिद्धः । इति भाष्ये ८ खण्डः; इतरेष्वङ्को नास्ति. १२ छ. बहुदायैततरौ; त. द. बहुदायितरौ; ध. बहुधातृतरौ. १३ छ. त. द. राजतेः.

युवाभ्यामिन्द्राग्नी स्तोमं जनयामि नव्यं नवतरमोमास इत्युपरिष्टाद्व्याख्यास्यामः (निरु० १२ । ४०) ॥ ९ ॥

इति षष्ठाध्यायस्य द्वितीयः पादः ।

'अश्रवं हि' । कुत्सस्यार्षम् । त्रिष्टुप् । अश्रौषम् अहं युवां हे इन्द्राग्नी भूरिदावत्तरा भूरिदातारौ । कुतः । विजामातुः असुसमाप्ताज्जामातुः । यो ह्यसमाप्तजामातृभावो भवति स जामातृगुणहीनत्वाद्बहुदानेन कन्यापितॄनाराध्य तेभ्य आत्मानं रोचयति । ततोऽपि बहुतरस्य धनस्य दातारौ अहमश्रौषं भवन्तौ । उत वा घा स्यालात् । 'घा' इत्यनर्थकः । स्यालादपि बहुदातारौ युवामहमश्रौषं भवन्तौ । स्यालोऽपि हि भगिनीप्रियचिकीर्षया बह्वेव ददाति । यत एवमहमश्रौषं भवन्तावेतस्मात्कारणात्सोमस्य प्रयती प्रदानेन अहं युवाभ्यां स्तोमं जनयामि उच्चारयामि नव्यं नवतरमन्येभ्यः स्तोमेभ्यः । एवमत्र 'विजामातृ'शब्देन 'असुसमाप्तजामातृभावः' उच्यते तस्य बहुदातृत्वादित्युपपत्तिः ।

'विजामातुः' इत्यस्य

'विजामातेति शश्वत्' । प्रसिद्धमेतत् । 'दक्षिणाजाः क्रीतापतिमाचक्षते' । स हि विगुणत्वादात्मनः क्रीणाति कन्यामात्मनो भार्यार्थे । तस्मात् 'असुसमाप्त इव' असौ 'वरोऽभिप्रेतः' । 'जा अपत्यं तन्निर्माता' जामाता । स्त्रीत्वं हि मैथुनेन व्यवहारेणासौ निर्मिणोति । तेनासौ दुहितुः पतिर्जामाता भवति । 'स्याल आसन्नः संयोगेनेति' निदानविदो मन्यन्ते । अथ 'वा स्यम्' इति 'शूर्पम्' उच्यते । तस्मादसौ गृहीत्वा विवाहे 'लाजानावपति' । तस्मात्स्याल इत्युच्यते । 'स्यं शूर्पं स्यतेः' धातोः क्षेपणार्थस्य (धा० ४।४१) ।

विजामातादिशब्दानां व्युत्पत्तिः

---

१ क. ख. ६ (९); छ. त. ११; द. ६. २ ङ. थ. ध. छ. त. 'इति० पादः' नास्ति; द. इति नैरुक्तस्य षष्ठा°. ३ घ. झ. ट. हि भूरिदावत्तरा वां० जनयामि नव्यम् । कु°. ४ ग. ज. °दाइतरौ; च. °दायितरौ; ट. °दातारौ° यित. ५ क. ख. घ. ट. °नेन हे इन्द्राग्नी युवा°. ६ क. ख. घ. झ. दाक्षिणात्याः; ट. दाक्षिणात्याः° जाः; ठ. ड. दाक्षिणात्याः । जाः ७ क. ख. घ. झ. ठ ड. तस्य विगु°; ट. तस्य° स हि. ८ क. ख. घ. झ. ट. ठ. ड. जामाता जा अप°; च.
१२ °प्रेतः ᵛ जा° जामाता. ९ क. ख. घ. झ. ट. ठ. ड. प्रक्षेप°.

तेन हि तुषाः क्षिप्यन्ते । 'शूर्पमशनपवनम्' । तेन ह्यशनं पूयते । 'शॄ[1]णातेर्वा' । तद्धि शरमयं भवति ।

'ओमासः (४१) इति' एतत्पदम् 'उपरिष्टाद्व्याख्यास्या[2]मः' 'ओमासश्चर्षणीधृतः' इत्यत्र सप्त[3]दशेऽध्याये । (निरु० १२।४०) ॥९॥[4]

एकादशस्य[5] द्वितीयः पादः ।

तृतीयः पादः ।

सोमानं स्वरणं कृणुहि ब्रह्मणस्पते । कक्षीवन्तं य औशिजः (ऋ०सं० १।१८।१)॥ सोमा[6]नं सोतारं प्रकाशनवन्तं कुरु ब्रह्मणस्पते कक्षीवन्तमिव य औशिजः कक्षीवान् कक्ष्या[7]वानौशिज उशिजः पुत्र उशिग्वष्टेः कान्तिकर्मणोऽपि त्वयं मनुष्यकक्ष एवाभिप्रेतः स्यात्तं सोमा[8]नं सोतारं मां प्रकाशनवन्तं कुरु ब्रह्मणस्पते ॥ १०[9] ॥

'सोमानम्' (४२) इत्यनवगतम् । 'सोता[10]रम्' इत्यवगमः ।

'सोमानं स्व[11]रणम्' । मेधातिथेः काण्वस्यार्षम् । 'सोमानम्' इत्यस्य अग्न्युपस्थाने विनियुक्ता । (मैत्रा० सं० १।५।४।) । 'सोमानं स्वरणमिति ब्राह्मणस्पत्ययोपतिष्ठेत' इति ह्युक्तम् (मैत्रा० सं० १।५।११) । सो[12]मानम् अनेकेषां सोमानां सोतारम् अभिषोतारं

---

१ ग. ज. श्रीणा°; च. श्रिणा° शृ. २ क. ख. घ. झ. ट. ठ. ड. °स्यामः सप्तदशेऽध्याये ओमा°. ३ क. ख. घ. झ. ट. ठ. ड. 'सप्तदशेऽध्याये' नास्ति. ४ क. ख. ६ (९); ग. ४१/११; इतरेष्वङ्को नास्ति. ५ क. ख. घ. झ. ट. °दशाध्यायस्य; ठ. ड. इत्येकादशाध्यायस्य द्वितीयः पादः। इति निरुक्तटीकायां निघण्टसहैकादशाध्याये नवमः खण्डः समाप्तः. ६ क. ख. छ. त. ध. सोमानां. ७ छ. त. कक्षावा°. ८ क. ख. छ. त. द. ध. सोमानां. ९ क. ख. १ (१०); छ. त. १२; द. १. १० ग. ज. सोमानामित्य°. ११ क. ख. ट. स्वरणं० य औशिजः । मेधा°; च. सोमानां स्वरणं० मेधा° औशिजः; ठ. ड. स्वरणमिति । मेधा°. १२ ग. ज. सोमानामनेकेषां स्वरणं स्तोता°; च. सोमानामनेकेषां स्वरणं सोता° सोमानां.

मां स्वरणं शब्दयितारं स्तुवन्तं यशस्विनं कुरु हे ब्रह्मणस्पते । कथं च पुनः प्रकाशनवन्तं कुर्विति । कक्षीवन्तं य औशिजः । लुप्तोपममेतत् । य औशिजः कक्षीवांस्तमिव । अत्र करोतिसंबन्धात् ' प्रकाशनवन्तम् ' इत्येतदध्याहृतं भाष्यकारेण ।

'कक्षीवान्' कक्षया तद्वान् । 'अपि त्वयं मनुष्यकक्ष्ये एवाभिप्रेतः स्यात्' । स हि कक्ष उत्पन्नः । तदुत्पत्तिसंयोगात्तु कक्षीवान् । 'औशिज उशिजः पुत्रः ' । ' उशिक् ' पुनः ' वष्टेः ' कान्त्यर्थस्य । एवमत्र ' सोमानम् ' इत्यस्य शब्दसारूप्यात् ' सोतारं सोमानाम् ' इत्येष विपरिणाम उपपद्यते । अपि वैवमन्यथा स्यात् । योऽहं सोमानां सोता कक्षीवानौशिजस्तमेवंगुणविशिष्टं मां प्रकाशनवन्तं कुरु हे ब्रह्मणस्पते ।

' अनवार्यं ' ' किमीदिने ' इत्यनयोः

' अनवार्यं ' (४३) 'किमीदिने ' (४४) इत्येते अनवगते । ' अनवायम् ' इत्यस्य ' अनवयवम् ' इत्यवगमः । ' किमीदिने ' इत्यस्य 'किमिदं किमिदमित्येवंकारी पिशुनः '॥ १० ॥

इन्द्रासोमा समघशंसमभ्य१घं तपुर्ययस्तु चरुरग्निवाँ इव । ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने (ऋ० सं० ७ । १०४ । २) ॥ इन्द्रासोमावघस्य शंसितारमघं हन्तेर्निर्ह्रसितोपसर्ग आहन्तीति तपुस्तपतेश्चरुर्मृच्चयो भवति चरतेर्वा समुच्चरन्त्यस्मादापो ब्रह्मद्विषे ब्राह्मणद्वेष्ट्रे क्रव्यादे क्रव्यमदते घोरचक्षसे घोरख्यानाय क्रव्यं विकृत्ताज्जायत इति नैरुक्ता द्वेषो धत्तमनवायमनवयवं यदन्ये न व्यवेयुरद्वेषस इति वा किमीदिने किमिदानीमिति चरते किमिदं किमिदमिति वा पिशुनाय चरते पिशुनः पिंशतेर्विपिंशतीति ॥ ११ ॥

---

१ ग. ज. मा; च. °षोतारं स्वरणमा° मां. २ क. ख. घ. झ. ट. ठ. ड. सुयरु°. ३ ग. ज. °कक्ष्य एवा°; च. °कक्ष्य इवा°. ४ घ. ठ. ठ. ड. ' उशिजः ' नास्ति. ५ च. °त्यस्य स्थाने शब्द°. ६ क. ख. १ (१०); ग. ५३; इतरेष्वङ्को नास्ति. ७ क. ख. ' क्रव्यादे ' नास्ति; छ. त. द. 'द्वेष्ट्रे क्रव्यमदने घोरख्यानाय°. ८ छ. त. द. °मव्यवेयमन°. ९ क. ख. २ (११); छ. १३ । द्वितीयःपादः; त. १३; द. २.

'इन्द्रासोमा समघशंसे' । वसिष्ठस्यार्षम् । हे इन्द्रासोमौ संतापयंतं भवन्तौ अघशंसं पापस्य शंसितारम्[३] अभ्यघं पापमेव कर्तुमाभिमुख्येन नित्यकालमेव योऽवस्थितस्तं संतापयतम् । स चैं युवाभ्यां संताप्यमानः चरुरग्निवाँ इव चरुरिवाग्निसंयुक्तो ययस्तु । क्षयं यात्वित्यर्थः । किंच । ब्रह्मद्विषे ब्राह्मणद्वेष्ट्रे क्रव्यादे क्रव्यमदते[५] पृष्ठमांसं[६] भक्षयित्रे घोरचक्षसे घोरदर्शनाय द्वेषः सर्वलोकद्वेष्यतां धत्तं युवाम् अनवायम् अनवयवम् । सकलमित्यर्थः । अथ 'वा यदन्ये' तत्सुहृदः 'अद्वेषसः' अद्वेष्टारो 'न व्यवेयुः' व्यवयवितुं वियोजयितुं घटमाना अपि न शक्नुयुः तादृशं द्वेषो धत्तं किमीदिने । पिशुनायेत्यर्थः । एवमत्र 'अनवायम्' इत्यस्य 'अनवयवम्' अवियोजनीयं वेत्यर्थप्रतीतिस्तथाभीष्टत्वात् ।

किमीदीत्यादीनां व्युत्पत्तिः

किमीदी च पिशुनः । स हि 'किमिदानीं' वर्तते 'इति' एवमन्वेषमाणः 'चरति' । अथ 'वा किमिदं[१०]' वर्तते 'इति' एवमन्वेषमाणः 'चरति' । स हि तस्य स्वभावः । 'चरुर्मृच्चयो भवति' । मृदादिसंचितो भवति । 'चरतेर्वा' । 'समुच्चरन्ति' हि 'अस्मादापः' । 'क्रव्यं' मांसम् । तद्धि 'विकृताज्जायते' । 'पिशुनः पिंशतेः[११]' धातोः । स हि स्वल्पमपि पापं 'विपिंशति' । विपुष्यतीत्यर्थः । अमवानित्यनवगतमनेकार्थं च ॥ ११[१२] ॥

कृणुष्व पाजः प्रसितिं न पृथ्वीं याहि राजेवामवाँ इभेन । तृष्वीमनु प्रसितिं द्रूणानोऽस्तासि विध्य रक्षसस्तपिष्ठैः (ऋ० सं० ४ । ४ । १) ॥ कृणुष्व पाजः पाजः पालनात्प्रसितिमिव

१ घ. झ. ट. शंसं० मनवार्यं किमीदिने । वसि°. २ क. ख. झ. ट. ठ. ड. संतापयंतं. ३ ग. ज. शंसयितारं; च. शंसयितारं°सि. ४ क. ख. घ. झ. ट. ठ. ड. च . तपुः यु°; घ. च.यु° तपुः. ५ ग. ज. °मदने; च. °मदने° ते. ६ क. ख. घ. झ. ट. ठ. ड. °मांसभ°. ७ क. ख. घ. झ. अतद्द्रुहः; ट. अतद्द्रुहः °तत्सुहृदः; ठ. ड. अतद्द्रुहः सुहृदः. ८ क. ख. घ. झ. ट. ठ. ड. व्यवेतुं; ग. ज. नावयवितुं; च. °व्यवेयुः यैः नैवियितुं° व्यवे. ९ च. किमीदिने पि०दी च. १० घ. झ. ट. ठ. किमिदं किमिदं. ११ च. पिंसतेः° श. १२ क. ख. २ (११); ग. ५१/१३; इतरेष्वङ्को नास्ति.

पृथ्वीं प्रसितिः प्रस[1]र्थनात्तन्तुर्वा जालं वा याहि राजेवामात्यवानभ्यम[2]नवान्त्स्ववान्वेराभृता गणेन गतभयेन हस्तिनेति वा तृष्व्यानु प्रसित्या द्रूणानस्तृष्वीति क्षिप्रनाम तरतेर्वा त्वरतेर्वासितासि विध्य रक्षसस्तपिष्ठैस्त[3]तमैस्तृप्ततमैः प्रपिष्ठ[4]तमैरिति वा । यस्ते गर्भममीवा दुर्णामा योनिमाशये । अमीवाभ्यमनेन व्याख्यातो दुर्णामा[5] क्रिमिर्भवति पापनामा क्रिमिः क्रव्ये मेद्यति क्रमतेर्वा स्यात्सरणकर्मणः क्रामतेर्वा । अतिक्रामन्तो दुरितानि विश्वा । अतिक्रममाणा दुर्गतिगमनानि सर्वाण्यप्वा यदेनया विद्धोऽपवीयते व्याधिर्वा भयं वा । अप्वे परेहीत्यपि निगमो भवत्यमतिरमामयी मतिरात्ममयी । ऊर्ध्वा यस्यामतिर्भा अदिद्युतदित्यपि निगमो भवति । श्रुष्टीति क्षिप्रनामाशु अष्टीति ॥ १२ ॥[6]

'कृणुष्व पाजः[7]' । वामदेवस्यार्षम् । अग्निचयने पुरुषव्याघारणे विनियुक्ता (मैत्रा० सं० २ । ७ । १५) ।

'अमवान्' इत्यस्य 'रक्षोघ्नेन[8] व्याघारयेत्' इति हि[9] युक्तम् (मैत्रा० सं० ३ । २ । ६ ॥ मान० श्रौ० ६ । १ । ७) ।

हे भगवन्नग्ने कृणुष्व एतदात्मीयं पाजो[10] बलं प्रसितिं न प्रसितिमिव वागुरातन्तुमिव जालमिव वा[11] पृथ्वीं[12] विस्तीर्णाम् । तत एवमेतद्विस्तीर्णं कृत्वा याहि त्वं रक्षांस्यभिमुखैः[13] । कथं च पुनर्याहि । राजेव । यथा राजा यायात् अमवान् अमात्यवान् नीतियुक्तो विजयाय तथा[14] याहि । अथवा यथा अभ्यमनवान् रोगभृतः परेभ्यो भयदाता यायात्तथा याहि । अथवा यथा स्ववान् आत्मवित्तवान् सुभृतसैन्यो यायाद्विजयाय तथा याहि । इभेन इराभृता अन्नभृतेन

---

१ छ. त. द. प्रसहनात्. २ त. °भ्यवनवा°; द. °भ्यमन्वान्त्स्व°. ३ सायणभाष्यस्थनिरुक्तमूले '°स्तप्ततमैस्तपिष्ठतमैरिति'. ४ ध. प्रपिष्ठतमै°. ५ क. ख. छ. दुर्नामा; त. दुर्णामा °र्ना; द. दुर्नामा° र्णा. ६ क. ख. ३ (१२); छ. त. १४; द. ३. ७ घ. झ. ट. पाजः प्रसितिं न० रक्षसस्तपिष्ठैः । वाम°; ठ. ड. पाज इति । वाम°. ८ ग. च. ज. रक्षो'. ९ ग. च. ज. 'हि' नास्ति. १० ग. च. ज. बलं पाजः. ११ ग. ज. 'वा' नास्ति; च. °मिव^ पृ० वा. १२ घ. झ. ट. पृथिवीं; च. पृथिवीं पृथ्वीं. १३ च. °मुखैः° खः. १४ क. ख. घ. झ. तथा त्वं याहि; च. तथा^ हि° त्वं या.

गणेन सुपुष्टेन युक्तो यथा राजा यायात्तथा याहि । अथवा । इभेन गतभयेन शूरेण हस्तिना यथा यायात्तथा याहि । किंच । तृष्वीमनु प्रसितिं द्रूणानः । क्षिप्रमनुप्रसितया गत्या संततया गत्या द्रूणानो रक्षांसि हिंसन् याहि । कस्मात्पुनरेवमुच्यसे । इतो यस्मात् अस्तासि असिता क्षेप्ता त्वं रक्षांसि प्रति दीप्तौ अर्चिषः । स त्वमेवमागत्य विध्य एतान् रक्षसः अस्मच्छत्रून् तपिष्ठैः तप्ततमैः अर्चिभिः । एवमत्र राजोपमानसंबन्धात् 'अमवान् अमात्यवान्' इत्येवमाद्युपपद्यते ।

'पाजः' इति बलनाम । तेन हि पाल्यते । 'प्रसितिः' प्रसर्हनात् । तन्तुर्वा जालं वा । उभाभ्यामपि ताभ्यामभिभूयन्ते मृगाश्च मत्स्याश्च ।

'अमीवा' (४६) इत्यनवगतम् । 'अभ्यमनवान्' इति यदुक्तमाधस्त्ये मन्त्रेऽनेनैव तत् 'व्याख्यातम्' ।

'अमीवा' इत्यस्य

'यस्ते गर्भममीवा दुर्णामा योनिमाशये । अग्निष्टं ब्रह्मणा सह निष्क्रव्यादमनीनशत्' (ऋ० सं० १० । १६२ । २) ॥ रक्षोहा नाम ब्राह्मणस्तस्येयमार्षम् । पुत्रकामस्य षडाहुतो नाम स्थालीपाकस्तत्रेयं विनियुक्ता (मान० गृ० २ । १८ । २) । यः ते तव हे स्त्रि गर्भम् अमीवा रोगभूतो दुर्णामा पापनामा क्रिमिः पापप्रदेशे नतः परिणतः उत्पन्नो योनिम् आगत्य शये शेते गर्भहिंसिता तम् अग्निः ब्रह्मणा सह निरनीनशत् नाशयतु क्रव्यादं मांसभक्षयितारम् । एवमत्र 'अमीवा' इत्यस्य 'क्रिमिः' अभिधेयः । क्रिम्युपहते हि योनौ गर्भो न संभवतीत्युपपत्तिः ।

'दुरितम्' (४७) इत्यनवगतम् । 'दुर्गतिगमनम्' इत्यर्थप्रतिपत्तिः । 'वैश्वदेवीं सूनृतामारभध्वं शुद्धा भवन्तो यज्ञियासः पावकाः ।

'दुरितानि' इत्यस्य

अतिक्रामन्तो दुरितानि विश्वा शतं हिमाः सर्ववीरा मदेम' ॥ वैश्वदेवीं वाचं सूनृतां सत्याम् आरभध्वम् उपक्रमध्वं वक्तुम् । तयैवंलक्षणया वाचा शुद्धा इहानभिशस्ताः पूताश्च परलोके भवथ यज्ञियाः यज्ञसं-

१ क. ख घ. झ. ट. ठ. ड. °प्रसृतया २ क. ख. घ. झ. ट. ठ. ड. °च्यते. ३ क. ख. घ. झ. ट. ठ. ड. दीप्तायाः; च. दीताऽअ° याः. ४ च. ट. प्रसर्हनात्° य. ५ ग. °ख्यातम् । ५२ । यस्ते°. ६ म. ज. °मीवा रक्षो°; घ. झ. ट. °मीवाऽमनीनशत् । रक्षो°. ७ घ. झ. ट. ठ ड. दुर्नामा. ८ च मांसं भक्ष° स. ९ क. ख. घ. झ. ट. ठ. ड. °प्रतीतिः; ग. °पत्तिः । । ५३ । वैश्व°.

पादिनः । किंच । अतिक्रममाणा वयं तस्या वाचो माहाभाग्येन दुरितानि दुर्गति[1]प्रापकाणि कर्माणि विश्वा विश्वानि शतं हिमाः शतं हेमन्तानां सर्ववीरा अनवखण्डितपुत्रपौत्रा मदेम । हृष्येमेत्यर्थः । एवमत्रातिक्रमणसंबन्धात् ‘ दुरितं दु[2]ष्कृतम्’ इत्युपपद्यते तस्य ह्यतिक्रमणमभीष्टमिति ।

‘ अप्वा ’ (४८) इत्यनवगतम् । ‘अपव्ययति’ इत्यवगमः । रोगजातिर्वाभिधेया भयजातिर्वा । तथा हि ‘ विद्धोऽपवीयते ’ अपचेष्टयै[3]ते वा प्राणैः । ‘अमीषां चित्तम्’ इत्युपरिष्टाच्छेषः (निरु० ९ । ३३) ।

‘ अमतिः ’ (४९) इत्यनवगतम् । ‘ अमामयी मतिः ’ अमतिः । एवमपि न प्रतीयत इत्यत आह । ‘आत्ममयी यस्य मतिः असौ अमतिः इत्युच्यते । कश्चासौ । आदित्यः । तस्य ह्यात्मप्रकाशमयी म[4]तिः । ‘ अभि त्यं

‘अमतिः’ इत्यस्य देवं[5] सवितार[6]मोण्योः कविक्रतुमर्चामि सत्यसवं रत्नधामभि प्रियं मति[7]म् । ऊर्ध्वा यस्यामतिर्भा अदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपा स्वः[8]’ (कपि. सं. १ । १९) ॥ नकुलस्यार्षम् । अतिच्छन्दाः[9] । प्रवर्ग्ये[10] शस्यते । सोम[11]संमाने चाध्वर्यवे विनियुक्ता (मैत्रा० सं० १ । २ । ५ ॥ कपि० सं० ३७ । ६ ॥ मान० श्रौ० १ । ४ । ३) । अभ्यर्चामि त्यं तम् अहं देवं सवितारम् ओण्योः द्यावापृथिव्योः यान्यन्तरा भूतानि वर्तन्ते तेभ्यः सर्वेभ्यः सकाशात् कविक्रतुं क्रान्तप्रज्ञानं सत्यसवं सत्याभ्यनुज्ञं रत्नधां रमणीयानां धनानां दातारम् अभिमातिम् अभिमन्तारं सर्वार्थानामीश्वरत्वात् प्रियं च सर्वभूताना[12]म् । ऊर्ध्वा यस्य सवितुः[13] अमतिः आत्मप्रकाशमयी मतिः । आह । कतमा पुनरसावूर्ध्वेति भाः या अदिद्युतत् अद्योत[14]त ।

---

१ ग. ज दुर्गतिपापकर्माणि विश्वा. २ ग. च. ज. दुःकृतं°. ३ क. ख. घ. झ. ट. ठ. ड. °पवेष्ट्यते प्राणैः; च. °पचे(वे)ष्यते वा°. ४ ग. मतिः । ५४ । अभि°. ५ ग. च. ज. देवं० कृपा स्वः । नकु°; घ. झ. ट देवं सवितार० कृपा स्वः । इति नकु°. ६ ठ. °तारमूण्यो°. ७ ठ. ड. मतिं कविम् । ऊर्ध्वा°. ८ ठ. ड. स्वारिति । नकु°. ९ क. ख. घ. ट. ठ. ड. °च्छन्दा अष्टिः । प्र°; च. °च्छन्दाः॰ । प्र° अष्टिः १० ग च. ज. ठ. प्रवर्गे. ११ ग. ज. °स्यते । संमाने. १२ च. °भूतानाम् ॰ ऊ° कविं क्रान्तदर्शनं. १३ ग ज. सवितुः भाः अमति°. १४ च. झ. ट. ठ. अद्योतत; च. अद्योतत°त्.

तमभ्यर्चयामि । किंच । सवीमनि प्रसवे यस्य सर्वमिदं प्रवर्तते हिरण्यपाणिः रश्मिपाणिः सर्वमिदं जगत् अमिमीत निर्मितवान् सुक्रतुः सुकर्मा कृपा स्वया सामर्थ्यकल्पनया स्वः आदित्यः । सु अरण इत्यर्थः । एवमत्र 'अमति'शब्देन आत्मप्रकाशगतमादित्यस्य विज्ञानमुच्यते । स हि प्रकाशसतत्त्व एव नान्यत्प्रकाशान्तरमपेक्षत इत्युपपत्तिः ।

'श्रुष्टी' (५०) इत्यनवगतं 'पुरन्धिः' (५१) इति च । श्रुष्टीत्यस्य 'श्वशनम्' इत्यवगमः । 'पुरन्धिः' इत्यस्यापि 'पुरन्धीः' इत्यवगमः ॥ १२ ॥

ताँ अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं नासत्या पुरन्धिम् ।
तानध्वरे यज्ञ उशतः कामयमानान्यजाग्ने[4] श्रुष्टी भगं नासत्यौ चाश्विनौ सत्यावेव नासत्यावित्यौर्णवाभः सत्यस्य प्रणेतारावित्याग्रायणो नासिकाप्रभवौ बभूवतुरिति वा पुरन्धिर्बहुधीस्तत्कः पुरन्धिर्भगः पुरस्तात्तस्यान्वादेश इत्येकमिन्द्र इत्यपरं स बहुकर्मतमः पुरां च दारयितृतमो वरुण इत्यपरं तं प्रज्ञया स्तौति । इमामू नु कवितमस्य मायामित्यपि निगमो भवति रुशदिति वर्णनाम रोचतेर्ज्वलतिकर्मणः[6] । समिद्धस्य रुशददर्शि पाज इत्यपि निगमो भवति ॥ १३ ॥

'श्रुष्टी' 'पुरन्धिः' इत्यनयोः 'ते हि यज्ञेषु यज्ञियास ऊमाः सधस्थं विश्वे अभि सन्ति देवाः । ताँ अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं नासत्या पुरन्धिम्' (ऋ० सं० ७ । ३९ । ४) ॥ वसिष्ठस्यार्षम् । वैश्वदेवी । ते ये विश्वेदेवाः यज्ञेषु यज्ञियासो यज्ञसंपादिन ऊमा अवितारो रक्षितारः अवनीया

---

१ क. ख. व. झ. ट. ह. ठ. °भ्यर्चामि; च. °भ्यर्चयामि° चा. २ ग. ज. पुरंधीत्यव°; च पुरंधीत्यव° रु. ३ क. ख. ३ (१२); ग. ५५/३४; व. ट. च. ज. अङ्को नास्ति. ४ ङ. थ. ध. °जाग्नेः श्रुष्टी°. ५ छ. द. °र्बहुभिस्त°; त. °र्बहुधिस्त° भि. ६ क. ख. ४ (१३); छ. त. १५; द. ४. ७ ग. ज. यज्ञेषु । वसि°; ट. ताँ अध्वर उशतः ते हि यज्ञियेषु य० वसि; झ. ताँऽ अध्वर उशत० ते हि यज्ञियेषु य० वसि°. ८ क. ख. झ. ट. ठ. ड. °देवी । त्रिष्टुप् । ते°.

वा[1] तर्पणीयाः सधस्थं वैश्वदेवं समानं स्थानम्[2] अभिसंतिष्ठन्ते । किं तेषामिति । तान् विश्वान्देवान् हे अग्ने एतस्मिन् अध्वरे यज्ञे उशतः स्वमंशं कामयमानान् श्रुष्टी क्षिप्रम् अविलम्बमानो याक्षि यज भगं च यज नासत्यौ चाश्विनौ यज पुरन्धि[3] च यज । एवमत्र यागस्य विघ्नभयात्क्षिप्रस्येष्टत्वात् 'श्रुष्टीति क्षिप्रनाम' इत्युपपद्यते[4] । अन्यत्र हि वक्ष्यति 'श्रुष्टीवरीः सुखवरीः' इति (निरु० ६ । २२) । तस्मादेतदनेकार्थमपि भवति ।

'नासत्यौ' इत्यस्य व्युत्पत्तिः

'सत्यावेव नासत्यावित्यौर्णवाभः' आचार्यो मन्यते । तौ हि सत्यमेव ब्रूतो न कदाचिदप्यसत्यम् । तस्मान्नासत्यावित्युच्यते । द्विः प्रतिषेधः प्रकृतिमापादयति । अथवा 'सत्यस्य' उदकस्य यज्ञस्य वा 'प्रणेतारौ[5]' नासत्यौ । तथाहि 'आग्रायणः[6]' आचार्यो मन्यते । अथ 'वा' ऐतिहासिकपक्षेण 'नासिकाप्रभवौ हि[7] तौ बभूवतुरिति' । पुरन्धिशब्दोऽत्र गुणपदत्वात्संदिह्यत इति विचार्यते

'पुरन्धिः' इत्यस्य च

'तत्कः पुरन्धिः' इति । 'भगः' अत्र 'पुरस्तात्' 'श्रुष्टी भगम्' इति 'तस्य' अयम् 'अन्वादेश इत्येकम्' आचार्यमतम् । नासत्यावनन्तरावपि सन्तौ न संदिह्येते द्विवचनवाच्यत्वात्तयोरेकवचनान्तत्वाच्च[8] पुरन्धिशब्दस्य[9] । 'इन्द्रः' उक्तः स्यात्पुरन्धिशब्देन 'इत्यपरं' मतम् । किं कारणम् । 'स' हीन्द्रो 'बहुकर्मतमः' अन्येभ्यो देवेभ्यः । 'धीः' इति कर्मनामसु पठितम् (निघ० २ । १) । तद्यस्य पुरु बहु स पुरन्धिः । स चेन्द्रः । तस्मात्पुरन्धिरिन्द्र इत्युपपद्यते । अथवा । अन्येन पुरन्धित्वमिन्द्रस्य स्यात् । 'पुरां च दारयितृतमः' । मेघपुरो ह्यसावेव दारयति । 'वरुणः' पुरन्धिशब्देनोच्यते 'इत्यपरं' मतम् । किं कारणम् ।

---

१ ग. ज. 'वा' नास्ति. २ क. ख. घ. झ. ट. ठ. ड. स्थानं अभिसन्ति अभितिष्ठन्ते; ग. स्थानमभिसं तिष्ठ° ति; च. स्थानमभि सं सन्ति अभि. ३ घ. ट. ठ. ड. 'पुरंधिं च यज' नास्ति. ४ ग. ज. °त्युपपेद्दे; च. °त्युपपेद्दे पद्यते. ५ क. ख. घ. झ. ट. ठ. ड. वा नेतारौ; ग. ज. प्राणे; च. प्राणे° प्र. ६ ग. च. ज. आग्रय. ७ क. ख. घ. झ. ट. ठ. ड. 'हि तौ' नास्ति. ८ क. ख. घ. झ. ट. ठ. ड. 'च' नास्ति. ९ क. ख. घ. झ. ट. ठ. ड. °शब्दस्य च.

'तं' ह्यन्यत्रापि मन्त्रदृक् 'प्रज्ञया' बुद्ध्या 'स्तौति' । तद्यथा । इमामू नु कविंतमस्य मायां महीं देवस्य नकिरा दंधर्ष । एकं यदुद्रा न पृणन्त्ये-नीरासिञ्चन्तीरवनयः समुद्रम्' (ऋ० सं० ५। ८५ । ६) ॥ अत्रेरार्षम् । इमां मायां प्रज्ञां कवितमस्य मेधाविंतमस्यं महीं महतीं मायां न किरा दधर्ष न कश्चिदप्याधर्षयितुं शक्नोति । कतमां मायामिति । एकम् एतं सन्तं वरुणम् आदित्यं यत् एता उद्रा उदकेन रश्मिनद्यः एनीः गमनशीलाः । सततमुदकमादायादित्यमण्डलं गच्छन्ति । एवं नामाहर्निशमेता गच्छन्त्यः अवनयो नद्य इव समुद्रं सिञ्चन्त्यो नं पृणन्ति न प्रीणयन्ति । तेषां रश्मीनां च मायामेवंलक्षणां भगवतो वरुणस्य आधर्षयितुम् अभिभवितुं विज्ञातुं न शक्नोति कश्चिदपि कथयितुं कथमप्ययं न संपूर्यत इति । एवमत्र वरुणः प्रज्ञया स्तूयते । धीरिति च प्रज्ञानाम (निघ० ३।९) । सा यस्य पुर्वी बह्वी स पुरन्धिः । वरुणश्च प्रज्ञया स्तूयते । तस्मात् 'वरुणः पुरन्धिः' इत्युपपद्यते ।

अस्यामृचि वरुणस्य प्रज्ञा स्तूयते

तस्माद्वरुणोऽपि पुरन्धिः स्यात्

'रुशत्' (५२) इत्यनवगतम् । 'रोचतेर्ज्वलतिकर्मणः' इति निर्वचनम् । 'रोचनम्' इत्यवगमः । 'अबोधि होता यजथाय देवानूर्ध्वो अग्निः सुमनाः प्रातरस्थात् । समिद्धस्य रुशदंदर्शि पाजो महान्देवस्तमसो निरमोचि' (ऋ० सं० ५ १ । २) ॥ गविष्ठिरबुधयोरार्षम् ।

'रुशत्' इत्यस्य

---

१ ग. तद्यथा । ५६ । इमा.° २ ग. ज. कवितमस्य । अत्रे°; घ. झ. ट. कवित० नयः समुद्रम् । अत्रे°. ३ क. ख. घ. झ. ट. ठ. ड. °रार्षम् । वारुणी । त्रिष्टुप् । इमां°; च. °रार्षम् ᵛ । इमां° वारुणी । त्रिष्टुप्. ४ क. ख. घ. झ. ट. ठ. ड. °तमस्य देवस्य द्योतमानस्य महीं°; च. °तमस्य ᵛ महीं° देवस्य द्योतमानस्य. ५ ग. ज. 'न पृणन्ति' नास्ति°. ६ ग. ज. °तेषां माया एवंलक्षणा भग°. ७ च. स्तूयत इति । धी°. ८ ग. °गमः । ५७ । अबो°. ९ ग. ज. होता यजथाय । गवि°; घ. झ. ट. होता० स्तमसो निरमोचि गवि°. १० क. ख. घ. झ. ट. ठ. ड. °रार्षम् । आग्नेयी । त्रिष्टुप् । अग्नि°; च. °रार्षम् ᵛ ।

अग्निचयन इष्टकोपधाने विनियुक्ता (मैत्रा० २ । १३ । ७) । अबोधि होता बुध्यते होता अग्निः यजथाय यजनाय यष्टव्यतया देवान् । ऊर्ध्वो ज्वलनक्रियायोगात् प्रातरस्थात् । अग्निहोतॄणां[1] गृहेषु योऽवतिष्ठते सुमनाश्च शोभनमनाः । समिद्धस्य च यस्य रुशत् रोचिष्णुर्वर्णः अदर्शि दृश्यते । पाजश्च बलं यस्याप्रतिमं[2] यश्च प्रभावतो महान् तमसश्च[3] सर्वमिदं निरमोचि निर्मोचयति । बुध्यते देवान् यष्टव्यतया । एवमग्न्यधिकारादत्र शब्दसारूप्याच्च ' रुशत् इति ' एतत् ' वर्णनाम ' इत्युपपद्यते ।

'रिशादसः' (५३) इत्यनवगतम् । 'रेशयदासिनः'[4] इत्यवगमः ॥ १३[5] ॥

अस्ति हि वः सजात्यं रिशादसो देवासो अस्त्याप्यम् । अस्ति हि वः समानजातिता रेशयदारिणो देवा अस्त्याप्यमाप्यमाप्नोतेः सुदत्रः कल्याणदानः । त्वष्टा सुदत्रो विदधातु राय इत्यपि निगमो भवति सुविदत्रः कल्याणविद्यः । आग्ने याहि सुविदत्रेभिरर्वाङित्यपि निगमो भवत्यानुषगिति नामानुपूर्वस्यानुषक्तं भवति । स्तृणन्ति बर्हिरानुषगित्यपि निगमो भवति तुर्वणिस्तूर्णवनिः । स तुर्वणिर्महाँ अरेणु पौंस्य इत्यपि निगमो भवति गिर्वणा देवो भवति गीर्भिरेनं वनयन्ति । जुष्टं गिर्वणसे बृहदित्यपि निगमो भवति ॥ १४[6] ॥

' अस्ति हि वः सजात्यं[7] रिशादसो देवासो अस्त्याप्यम् । प्र णः पूर्वस्मै सुवितार्य वोचत मक्षू सुम्नाय नव्यसे '

' रिशादसः ' इत्यस्य (ऋ० सं० ८ । २७ । १०) ॥ मनुर्वैवस्वतस्तस्येयमार्षम्[8] । सतोबृहती । वैश्वदेवे सूक्ते (ऋ० सं० ८ । २७)। हे रिशादसो रेशयदासिनो[9] देवाः । यो हि रेशयति हिंसावान् भवति तस्मै त आयुधान्य-

---

१ क. ख. घ. झ. ट. ठ. ड. °होत्रिणां; च. होतॄणां° त्रि. २ क. ख. घ. झ. ट. ठ. ड. °प्रमितं. ३ ठ. ड. तमश्च. ४ च. रेशाय° श. ५ क. ख. ४ (१३); ग. ५८; इतरेष्वङ्को नास्ति. ६ क. ख. ५ (१४); छ. त. १६; द ५. ७ ग. ज. वः सजात्यम् । मनु°; घ. झ. ट. वः सजातं ० व नव्यसे । मनोर्वै'. ८ क. ख. घ झ. ट. ट. ड मनोर्वैवस्वतस्ये°. ९ ग. ज. रिशयदासिनो देवाः; च. रिशाद॰ सिनो° सो रेशयदा.

स्यन्ति । 'रेशयदारिणः' इति केचिदधीयते निर्वचनम् । तेषां रेशयन्तं हिंसन्तं दारयन्तीत्यर्थः[1] । अस्ति युष्माकं सजात्यं समानजातिता देवत्वम् । अस्ति च युष्माकम् आप्यम् आप्तव्यं मनुष्यैः । ईश्वरा यूयमित्यभिप्रायः । यत एवमतो ब्रवीमि प्रवोचत यूयमनुजानीत[2] सुविताय सुगताय सुभोगाय स्थानाय सुम्नाय सुखाय च पूर्वस्मै स्वभूताय नव्यसे नवतराय[3] । कथं च पुनः प्रवोचतेति । मक्षु । क्षिप्रमित्यर्थः । एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च 'रिशादसो रेशयदासिनो वा रेशयदारिणो वा' इत्युपपद्यते ।

'सुदत्रः' (५४) इत्यनवगतम् । 'सुदानः' इत्यवगमः[4] ।

'सुदत्रः' इत्यस्य 'ता नो रासन्रातिषाचो[5] वसून्या रोदसी वरुणानी शृणोतु । वरूत्रीभिः सुशरणो नो अस्तु त्वष्टा सुदत्रो वि दधातु रायः' (ऋ० सं० ७ । ३४ । २२) ॥ वसिष्ठस्यार्षम् । दशरात्रस्य चतुर्थेऽहनि तृतीये[6] सवने वैश्वदेवशस्त्रे द्विपदा एताः शस्यन्ते (आश्व० ८ । ८) । ताः देव्यः अस्मभ्यं रासन् वसूनि । ददत्वित्यर्थः । किंलक्षणा देव्यः । रातिषाचः हविर्दानं[7] याः सचन्ते सेवन्ते । किं च आभिमुख्येन[8] स्थित्वा रोदसी रुद्रस्य पत्नी शृणोतु वरुणानी च । किंच । वरूत्रीभिः वरयितव्याभिः सहितः सुशरणः स्वाश्रयणः अस्माकम् अस्तु त्वष्टा सुदत्रः कल्याणदानो विदधातु चास्माकं रायः । धनमित्यर्थः । एवमत्र 'रायः' संबन्धात् 'सुदत्रः कल्याणदानः' इत्युपपद्यते ।

'सुविदत्रः' (५५) इत्यनवगतम् । 'सुविद्यः' इत्यवगमः ।

'सुविदत्रः' इत्यस्य 'कल्याणविद्यः' इत्यभिवेयत्रचनम्[9] । 'ये तातृषुर्देवत्रा[10] जेहमाना होत्राविदः स्तोमतष्टासो अर्कैः । आग्ने याहि सुविदत्रेभिरर्वाङ् सत्यैः कव्यैः पितृभिर्घर्मसद्भिः' (ऋ० सं० १० । १५ । ९) । शङ्खस्य

१ घ. झ. ट. ठ. ड. दारयती°. २ क. ख. घ. झ. ट. यूयमस्मभ्यमनु°. ३ च. °तराय । कथं° च. ४ ग. °गमः । ५९ । ता°. ५ ग. ज. °षाचः । वसि°; घ. झ. ट. °षाचो० वि दधातु रायः । वसि°. ६ च. तृतीये स°. ७ घ. झ. ट. हविर्द्धानं; ज. हविर्द्दनं; ठ. ड. हविर्धानं. ८ ग. च. ज. °मुख्येन याः स्थित्वा . ९ ग. °चनम् । ६० । ये°. १० ग. ज. देवत्रा । शङ्ख°; घ. झ.

यामायनस्यार्षम्। पितृयज्ञे स्विष्टकृद्याज्यैषा (आश्व० श्रौ० २ । १९)। ये तातृषुः स्तीर्णवन्तो देवत्रा देवान् प्रति जेहमाना गच्छन्तो होत्राविदः स्तुतिविदः स्तोमतष्टासः स्तोमकर्तारः अर्कैः मन्त्रैः । स्तोमकर्तारो ये एवं-लक्षणाः पितरस्तैः साकम् आयाहि हे अग्ने सुविदत्रेभिः कल्याणविद्यैः अर्वाङ् अस्मानाभिमुख्येन । तैश्च साकमेवंगुणयुक्तैः पितृभिरागत्य सत्यैः एतैर्यथावत्संस्कृतैः कव्यैः पितृदेवत्यैर्हविर्भिस्तृप्तिमुपयाहि । अथवा । सत्य-वादिभिः पितृभिः कव्यवाहैः साकमायाहीति । एवं पितृविशेषणत्वेनैव योज्यमेतदपि पदद्वयम् । एवमत्र शब्दसारूप्यात् 'सुविदत्र'शब्दः कल्याणविद्यवाचीत्युपपद्यते ।

'आनुषक्' (५६) इत्यनवगतम् । 'अनुषक्तम्' इत्यवगमः । 'नामानुपूर्वस्य' इत्यर्थवचनम् । 'आ घा ये अग्निमिन्धते स्तृणन्ति बर्हिरानुषक् । येषामिन्द्रो युवा सखा' (ऋ० सं० ८ । ४५ । १)॥

'आनुषक्' इत्यस्य

त्रिशोकस्यार्षम् । बृहतीसहस्रे तृचाशीतिषु विनि-युक्ता (ऐ० आ० ५ । २ । ३] । य एव नित्यमग्निम् आभिमुख्येना-वस्थिता इन्धते यज्वानो य एव यज्ञेषु बर्हिः अनुषक्तं स्तृणन्ति तेषामेव इन्द्रो युवा समानख्यानो याज्ञे कर्मणि भवति नेतरेषामयज्वनाम् । बर्हिः-संबन्धात् 'आनुषक्' इति 'नाम' एतत् 'आनुपूर्वस्य' इत्युप-पद्यते ।

'तुर्वणिः' (५७) इत्यनवगतम् । 'तूर्णवनिः' इत्यर्थवचनम् ।

---

१ क. ख. घ. झ. ट. ठ. ड. °रार्षम् । त्रिष्टुप् । पैत्री । पितृ°. २ ग. ज. 'ये' नास्ति. ३ च. संपत्कृतै.° स्कृ. ४ क. ख. °वत्यैः घर्मसद्भिर्यज्ञसादिभिर्हवि°; घ. झ. ट. ठ. ड. 'वत्यैः घर्मसद्भिर्यज्ञस्यादितिहवि°; च. °वत्यैः ^हवि °घर्मसद्भि-र्यज्ञसादिभिः. ५ ग. °चनम् । ६१/४ । आ०. ६ ग. च. ज. अग्निं । त्रिशो°; घ. झ. ट. अग्निमि०युवा सखा । त्रिशो°. ७ क. ख. घ. झ. ट. ठ. ड. युवा नित्यः सखा समा०; च. युवा^समा °नित्यः सखा.

तूर्णं हि यः संभजते स तूर्णवनिता[1] सन् तूर्णवनिरित्युक्तः[2] । ‘स तुर्वणिर्महाँ[3] अरेणु पौंस्ये गिरेर्भृष्टिर्न भ्राजते तुजा शवः । येन शुष्णं मायिनमायसो मदे दुध्र आभूषु रामयन्नि दामनि’ (ऋ० सं० १ । ५६ । ३) ॥

‘तुर्वणिः’ इत्यस्य

इन्द्रस्य सव्यत्वमापन्नस्येयमार्षम्[4] । वैषुवतेऽहनि निष्केवल्ये शस्त्रे शस्यते (आश्व० श्रौ० ८ । ६) । स इन्द्रः तूर्णवनिता । इन्द्रो हि स्तोतारं तूर्णं संभजते । महान् प्रभावतः । अरेणुपौंस्ये । अन्तारिक्षे हि[5] यद्बलं भवति तत्र न रेणवः सन्ति तस्मादरेणुपौंस्यमित्युच्यते । ‘पौंस्यम्’ इति बलनामसु पठितम् (निघ० २ । ९ । २४)। तस्मिन्नरेणुपौंस्ये बले अन्तारिक्षे संग्रामे वा गिरेः भृष्टिः[6] गिरिशृङ्गमिवोच्छ्रितो भ्राजते तुजा वज्रेण प्रगृहीतेन शवः शविष्ठो बलिष्ठ इन्द्रः । येन वज्रेण[7] शुष्णं शोषयितारम् असुरं मेघं मायिनं प्रज्ञावन्तं आयसो देवान् प्रति अयनशीलस्य सोमस्य मदे प्राप्ते दुध्रो दुर्धरः शत्रूणाम् आभूषु[8] उपर्युपर्यात्मनो भवनमिच्छन् रामयन्नि दामानि दाम्नीव न्यरमयत् । सुप्राव[9]भ्रादित्यर्थः । एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च ‘तुर्वणिस्तूर्णवनिः’ इत्युपपद्यते ।

‘गिर्वणसे’ (५८) इत्यनवगतम् । ‘गीर्वननीयः’ इत्यवगमः । ‘गीर्भिः’ स्तुतिभिः ‘एनं वनयन्ति’ इत्यर्थवचनम्[10] । ‘आमासु पक्वमैरय[11] आ सूर्यं रोहयो दिवि । घर्मं न सामन्तपता सुवृक्तिभिर्जुष्टं गिर्वणसे बृहत्’ (ऋ० सं० ८ । ८९ । ७) ॥ नृमेधसः प्रियमेधसो वा[12]र्षम् । ऐन्द्रे सूक्ते (ऋ० सं० ८ । ८९) । आमासु अपक्वासु गोषु

‘गिर्वणसे’ इत्यस्य

१ ग. ज. °वनितः सं तूर्णं°; च. ‘वनितः सं तूर्णं’ ता सन्. २ ग. °त्युक्तः । ६२ । स°. ३ ग. ज. महान् । इन्द्र°; घ. झ. ठ मही अरेणु० रामयन्नि दामनि । इन्द्र°. ४ क. ख. घ. झ. ट. ठ. ड. °मार्षम् । जगती । ऐन्द्री । वैषु°; च. °मार्षम् ~ । वैषु° जगत्यैन्द्री. ५ च. °रिक्षे कियद्ब° हि. ६ ग. ज. भृष्टिं गिरि°. ७ ग ज. वज्रेण नित्यशुष्णं; च. वज्रेग अहिं नित्यं (त्यं). ८ ग. ज. °भूषुरुपर्यु°. ९ क. ख. घ. झ. ट. ठ. ड. °मयत् सुबभ्रा°; च. °मयन् स्वबभ्रात् सु. १० ग. °चनम् । ६३ । आमा°. ११ ग. ज. °रयः । नृमे°; घ. झ. ट. °रयः ० गिर्वणसे बृहत् । नृमे°. १२ क. ख. घ. झ. ठ. ठ. ड. वा इयमार्षम् । बृहती । ऐन्द्रे°; च. वार्षम् ~ । ऐन्द्रे° बृहती.

क्षीरं पक्वम् ऐरयः त्वमिन्द्र । ‘ तस्मादामा सती पक्वं दुहे[1] ’ [मैत्रा० सं० ४ । ६ । ९] इति ह विज्ञायते । तदिदमामायां सत्यां गवि शृतं पय इति । किंच । आ सूर्यं रोहयो दिवि । आरोहयः सूर्यं दिवि । द्युलोक इत्यर्थः । एवमिन्द्रमुक्त्वा स्तोतृनाह । अस्मा इन्द्रायैवंगुणविशिष्टाय घर्मं न घर्ममिव सुतसं सुष्टु[2] सुगुणं सामन्[3] तपत । स्थानकरणानुप्रदानवदुच्चारयतेत्यर्थः । सुवृक्तिभिः शोभनाभिः स्तुतिभिः जुष्टं प्रियं गिर्वणसे इन्द्राय स्तुतिसंभक्त्रे । कतमत्पुनस्तत्सामेति । बृहत् । तद्धि प्रियमिन्द्रस्य । एवमत्र ‘ गिर्वणा देव ’ उच्यते शब्दसारूप्यादित्युपपद्यते ।

‘अमूर्ते सूर्ते’ (५९)[4] इत्येते अनवगते । ‘असुसमीरिताः सुसमीरिते’ इत्यवगमः ॥ १४ ॥

असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ।[6] असुसमीरिताः सुसमीरिते वातसमीरिता माध्यमका देवगणा ये रसेन पृथिवीं तर्पयन्तो भूतानि च कुर्वन्ति त आयजन्तेत्यतिक्रान्तं प्रतिवचनम् । अम्यक्सा त इन्द्र ऋष्टिः । अमाक्तेति वाभ्यक्तेति वा । यादृश्मिन्धायि तमपस्ययाविदत् । यादृशेऽधायि तमपस्ययाविदत् । उस्रः पितेव जारयायि यज्ञैः । उस्र इव गोपिताजायि यज्ञैः ॥ १५ ॥

‘ त आयजन्त द्रविणं सम॑स्मा ऋषयः पूर्वे जरितारो न भूना ।

‘ असूर्ते सूर्ते ’ इत्यनयोः असूर्ते सूर्ते रजसि निषत्ते ये भूतानि समकृण्वन्निमानि ’ (ऋ० सं० १० । ८२ । ४)॥ विश्वकर्मणो भौवनस्येयमार्षम् । ‘ वैश्वकर्मणाभ्यां जुहोति ’ इति ह्युक्तमग्निप्रणयने (मैत्रा० सं० ३ । ३ । ७) । तत्र

---

१ क. ख. घ. झ. ट. ठ. ड. दुह्र; च. दुहे° ह्र. २ ग. सुष्टं; च सुष्टं' ष्टु. ३ क. ख. घ. झ. ठ. सामन् साम तप°. ४ क. ख. ५ (१४); ग. १४; ठ. ड. ‘पद्यते । इति निरुक्तटीकायां षष्ठाध्याये चतुर्दशः खण्डः; इतरेष्वङ्को नास्ति. ५ छ. वाजसमी°; त. वाजसमी° त; द वातसमी° ज. ६ क. ख छ त. द. °गणास्ते रसे°. ७ क. ख. ६ (१५); छ. त. १७; द. ६. ८ ग. च. ज. द्रविणं । विश्व°; घ. झ. ट. °विणं०समकृण्वन्निमानि । विश्व°. ९ क. ख. ग. ज विश्वकर्मणीभ्यां; च. विश्वकर्मणाभ्यां’ वै.

विनियोगः । असूर्ताः । असुः प्राणः प्राणश्च वायुः । 'योऽयं वायुः पवेन[1] एष प्राणः' इति ह्युक्तम् । तेन समस्ता ईरिता असुसमीरिताः । वातसमीरिता इत्यर्थः । के पुनस्त इति । माध्यमका देवगणा मेघा इतरे च मरुदादयः । ते[2] हि वातेन समीर्यन्ते । वात एव हि तान्वहति । क्व पुनरव[3]-स्थिताः समीरिता इति । सूर्ते सुसमीरिते विक्षिप्ते । विस्तीर्ण इत्यर्थः । रजसि अन्तरिक्षलोके निषत्ते । निषण्ण इत्यर्थः । ये[4] किं कुर्वन्तीति । ये भूतानि समकृण्वन् समस्तानि कृतवन्त इमानि । तेषां किमिति । त आयजन्तेति । अतिक्रान्तं प्रतिवचनम् । प्रतिनिर्देशः प्रतिवचनमुच्यते । स एव पूर्वकाले प्रयोगार्हो यच्छब्दः पश्चात्प्रयुक्तः पश्चात्प्रयोगार्हश्च तच्छब्दः पूर्वं[5] प्रयुक्तो मन्त्रपाठक्रमेण । तदेतद्भाष्ये[6] क्रमेण प्रदर्शितमस्मिन्मन्त्रे 'त आयजन्तेत्यतिक्रान्तं प्रतिवचनम्' इति । त आयजन्तेत्यस्य पादस्य समासेनैतद्भाष्यकारेण निर्वचनमुक्तं 'ते रसेन पृथिवीं तर्पयन्तो भूतानि च कुर्वन्ति' । ते मेघा रसेन उदकेन पृथिवीं तर्पयन्तो भूतानि सर्वाण्युत्पादयन्ति स्थितिं चैषां[7] कुर्वन्ति । आयजन्त द्रविणम् उदकम् । आभिमुख्येन ददति सर्वमुदकम् । समस्मै सर्वस्मिन् भूतजाते । एवं भूतान्युदकेन कुर्वन्त्यनुगृह्णन्ति च । अधुना दृष्टान्तमाह । ऋषयः पूर्वे विश्वसृजो जरितारो न भूना भूम्ना कर्मणा वार्षसाहस्रिकेण[8] सत्रेण । तर्हि सर्वो भूतग्रामः[9] पूर्वं सृष्टोऽनुगृहीतश्च । एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च 'असूर्ते सूर्ते' इत्येतयोः 'असुसमीरिताः सुसमीरिते' इत्येते शब्दसमाधी उपपद्येते ।

'अम्यक्' (६०) इत्यनवगतम् । 'अमाक्तेति वाभ्यक्तेति वा' शब्दसमाधी । 'ऋष्टिः' अभिधेया । तां हि संग्रामे शत्रवो मन्यन्ते मामेवाँ[10] प्रत्यञ्चिता क्षिप्ता मामेवाँ[11] प्रत्यञ्चितेति । अथवा 'अभ्यक्तेति वा' । अभिगतैव

---

१ क. ख. ठ. ड. पवत; ग. ज. पचन. २ घ. झ. ट. तेन वाते°. ३ क. ख. घ. झ. ट. ठ. ड. पुनरेतेऽवस्थि°. ४ क. ख. झ. °त्यर्थः । समीरिताः किं°; ग. ज. ये कुर्वन्तीति; घ. ट. ठ. ड. ये समीरिता किं°; च. ये^कु° किं. ५ ग. ज. पूर्वप्रयु°. ६ क. ख. घ. झ. ट. ठ. ड. °द्भाष्यकारेण प्र°. ७ ग. ज. च तेषां. ८ क. ख. घ. ट. ठ. ड. वार्षसह°. ९ च. भूतः ग्रा°. १० क. ख. ग. ज. घ. झ. ट. ठ. ड. मामेषा प्रत्य°. ११ क. ख. ग. ज. मामेषा प्रत्य°.

नित्यकालं शत्रून्प्रति भवतीत्यभ्यगित्युच्यते[1] । ‘ अभ्यक्सा ते[2] इन्द्र ऋष्टि-

‘ अभ्यक्’ इत्यस्य

रस्मे सनेम्यभ्वं मरुतो जुनन्ति । अग्निश्चिद्धि ष्मातसे शुशुक्वानापो न द्वीपं दधति प्रयांसि’ (ऋ० सं० १ । १६९ । ३ ।) ॥ अगस्त्य-स्यार्षम् । त्रिष्टुप् । ऐन्द्री । छन्दोमेषु द्वितीयेऽहनि मरुत्वतीये शस्त्रे शस्यते (आश्व० श्रौ० ८ । ७) । अभ्यक्सा ते । यदा एवंलक्षणा रेषणा[3] शक्तिः आभिमुख्येन मेघम् अञ्चिता त्वया[4] क्षिप्ता भवति आत्मनस्तव या स्वभूता अथ तदा मरुतोऽपि तदनुविवृत्सयैव हे इन्द्र अस्मे अस्मदर्थं सनेमि चिरंतनम् अभ्वं बहूदकमिह पातयितव्यमिति स्वान्यायुधानि मेघविदारणाय जुनन्ति गमयन्ति । किंच । सर्वेषामेवायुधानां मध्ये भावत्कैव[5] शक्तिः अग्निश्चित् अग्निरिव अतसे काष्ठे शुशुक्वान् देदीप्यमान एतस्मिन्मेघ आस्ते । किंच । आपो न द्वीपं यथा नादेया[6] आपो द्वीपं परिवार्यात्मानं[7] धारयन्त्येवमेतानि मेध्यानि[8] प्रयांसि उदकानि महत्त्वादृष्टेः तानि मज्जयितुमशक्नुवन्ति द्वीपमिव परिवार्य धारयन्ति । एवमत्राञ्चतेर्गत्यर्थस्य ‘ अभ्यक् ’ इत्येतदृष्टिसंबन्धादित्युपपद्यते ।

‘ यादृश्मिन् ’ (६१) इत्यनवगतम् । ‘ यादृशे ’ इत्यवगमः[9] ।

‘यादृश्मिन्’ इत्यस्य

‘ ज्यायांसमस्य[10] यतुनस्य केतुन ऋषिस्वरं चरति यासु नाम ते । यादृश्मिन्धायि तमपस्यया विदद्य उ स्वयं वहते सो अरं करत् ’ (ऋ० सं० ५ । ४४ । ८) ॥ अवत्सारस्येयमार्षम् । जगती । आग्नेयी । ‘तं प्रत्नथा’ इत्येतस्मिन्सूक्ते (ऋ० सं० ५।४४) । उपहव्ये तृतीयसवने वैश्वदेवे शस्यते (आश्व० श्रौ० ९।१०) । ज्यायांसं महत्तरम् । अस्य यतुनस्य[11]

---

१ ग. °च्यते । ६५ । अभ्य°. २ ग. तेति । अग°; च. त इन्द्र प्रयांसि । अग°; घ. झ. ट. त इन्द्र० दधति प्रयांसि । अग°; ज. त । अग°. ३ ग. ज. रेषा श°. ४ च. त्वामाक्षिप्ता. ५ ग. ज. भावशक्ति°. ६ क. ख. घ. झ. न द्वैप्या आपो°; ट. न द्वैप्या° नादेया. ७ ग. ज. परिचार्य; च. परिमर्य. ८ ग. ज. मेघानि. ९ ग. °गमः । ६६ । ज्याया°. १० ग. ज. °मस्य । अव°; घ. झ. ट. °मस्य यतुनस्य० सो अरं करत् । अव°; च. °मस्य यतुनस्य केतुन० रं करत् ।
२१ अव°. ११ क. ख. घ. झ. ट. °नस्य कर्मणि षष्ठ्यौ वा यतन°.

यतनशीलस्य भगवतः सूर्यस्य केतुना कर्मणा प्रज्ञया वा ऋषिस्वरम् । ऋषिभिः स्वर्यते स्तूयते इत्यृषिस्वरस्तमृषिस्वरं स्तुवन् चरति प्रचरति क्रियासु यासु[1] नाम ते । यासु क्रियासु[2] नाम नमनं ते तव हे भगवन्नग्ने । स एवं चरंस्तासु[3] क्रियासु यादृश्मिन् यादृशे कामे[4] धायि मनो धत्ते तादृशं कामं तया अपस्यया क्रियया[5] हविःस्तुत्यादिलक्षणया तव प्रसादात् अविदत् । अलभतेत्यर्थः । किंच । य उ स्वयं वहते त्वां प्रति आदरवान् प्रापयति स्तुतीः स एव अरं करत् पर्याप्तमात्मनोऽभिप्रेतमर्थं करोति । एवमत्र शब्दसारूप्यात् ' यादृश्मिन् ' इत्यस्य ' यादृशे ' इत्येवं विपरिणाम उपपद्यते ।

' जारयायि ' (६२) इत्यनवगतम् । ' अजायि ' इत्यवगमः[6] ।

'जारयायि' इत्यस्य — ' सास्माकेभिरेतरी न शूषैरग्निः ष्टवे दम आ जातवेदाः । द्रन्नो वन्वन् क्रत्वा नार्वोस्रः पितेव जारयायि यज्ञैः ' (ऋ० सं० ६ । १२ । ४)॥[7] भरद्वाजस्यार्षम् । आग्नेयी । त्रिष्टुप् । प्रातरनुवाकाश्विनयोः शस्यते (आश्व० श्रौ० ४ । १३) । ' सास्माकेभिः ' इति छान्दसमात्वम् । सः अग्निः अस्माकेभिः[8] शूषैः सुखैः स्तोत्रैः स्तवे स्तूयते एतरी न अतिथिरिव दमे यज्ञगृहे[9] आभिमुख्येनावस्थितैः स्तूयते जातवेदाः जातविद्यो वा जातधनो वा । द्रन्नः द्रुमान्नः वन्वन् क्रत्वा वननीयकर्मा वननीयप्रज्ञानो वा अनार्वा अनर्वा अनाश्रितः कंचिदन्यम् उस्रः पितेव साण्ड इव गोपिता गवां पिता अजायि । यथा साण्डः पुत्रपौत्रादिभिरनेकधा प्रजायत एवं यज्ञेषु विह्रियमाणोऽनेकधा जायतेऽग्निः । एवमत्र ' जारजायि ' इत्यस्य ' अजायि ' इत्यर्थप्रतीतिः ।

---

१ ख. ठ. 'यासु' नास्ति. २ ग. ज. 'क्रियासु' नास्ति. ३ ग. स्वरंस्ता°; ज. स्वरंस्ता°. ४ ग. ज. अर्थे मनो धायि धारयति तदर्थं तया अप°. ५ ग. ज. क्रियया तव प्रसा°. ६ ग. °गमः । ६७ । सास्मा°. ७ ग. ज. न । भर°; घ. झ. ट. न शू० जारयायि यज्ञैः । भर°. ८ ख. अस्मा° अ. ९ क. ख. घ. झ. ट. ठ. ड. °गृहे यज्ञे आभि°; ग. ज. यज्ञे गृहे.

'अग्रिया' (६३) इत्यनवगतम् । 'अग्रगमनेन' अग्रियाः[1] अग्रगाः । ते ह्यग्रे देवसैन्यस्य गच्छन्ति । अथवा । अग्रमात्मानं संपादयन्तीत्यग्रियाः । अथवा । अग्रमेव अग्रियाः[2] । अनर्थक एवाग्रि[3]शब्देन 'इया-' कार उपबन्ध उपात्तः । 'अपि वाग्रमित्येतदनर्थकमुपबन्धमाददीत' इति ह्युक्तं[4] भाष्यकारेण ॥ १५ ॥[5]

'अग्रिया' इत्यस्य व्युत्पत्तिः

प्र वोऽच्छा जुजुषाणासो अस्थुरभूत विश्वे अग्रियोत वाजाः । प्रास्थुर्वो जोषयमाणा अभवत सर्वेऽग्रगमनेनेति वाग्रगरणेनेति[6] वाग्रसंपादिन इति वापि वाग्रमित्येतदनर्थकमुपबन्धमाददीत । अद्धीदिन्द्र प्रस्थितेमा हवींषि चनो दधिष्व पचतोत सोमम् । अद्धीन्द्र प्रस्थितानीमानि हवींषि चनो दधिष्व चन इत्यन्ननाम पचतिर्नामीभूतस्तं[7] मेदस्तः प्रति पचताग्रभीष्टामित्यपि निगमो भवत्यपि[8] वा मेदसश्च पशोश्च सात्त्वं द्विवचनं स्याद्यत्र ह्येक-वचनार्थः प्रसिद्धं तद्भवति । पुरोळा[9] अग्ने पचत इति यथा शुरुध आपो भवन्ति शुचं संरुन्धन्ति । ऋतस्य हि शुरुधः सन्ति पूर्वीरित्यपि निगमो भवत्यमिनो[10]ऽमितमात्रो महान् भवत्यभ्य-मितो वा । अमिनः सहोभिरित्यपि निगमो भवति जज्झतीरापो भवन्ति शब्दकारिण्यः । मरुतो[11] जज्झतीरिवेत्यपि निगमो भवत्य-प्रतिष्कुतोऽप्रतिष्कृतो[12]ऽप्रतिस्खलितो वा । अस्मभ्यमप्रतिष्कुत इत्यपि निगमो भवति शाशदानः शाशाद्यमानः । प्र स्वां मति-मतिरच्छाशदान इत्यपि निगमो भवति ॥ १६[13] ॥

इति[14] षष्ठाध्यायस्य तृतीयः पादः ॥

---

१ ग. ज. °ग्रियोऽग्रगाः; च. °ग्रियोग्राः° योऽ (यः अ). २ ग. ज. अग्रिया अन°; च. आग्रियाँ अन° याः ३ ग. ज. एवाग्रिश°; च. एवाग्रि (ग्र) शब्दे॰ याका° ने. ४ क. ख. घ. झ. ट. ठ. ड. 'हि' नास्ति. ५ क. ख. ६(१५); ग. १६ (६८); ठ. ड. १५ । इति निरुक्तटीकायां षष्ठाध्याये पञ्चदशः खण्डः; इतरेष्वङ्को नास्ति. ६ छ. त. द. 'वाग्रगरणेनेति' नास्ति. ७ क. ख. छ. त. °भूतः । तं; द. °भूतः स्तं°. ८ त. °वत्यपि° ति । अ. ९ क. ख. छ. त. द. पुरोला. १० त. °वत्यमि° ति । अ. ११ क. ख. मदिवो ज°. १२ क. ख. °प्रतिस्कृतो; द. °प्रतिष्कुतो° स्कृ. १३ क. ख. ७ (१६); छ. त. १८; द. ७. १४ छ. थ. ध. 'इति° पादः' नास्ति; छ. 'इति षष्ठाध्यायस्य' नास्ति; त. इति षष्ठाध्याये तृ°; द. इति नैरुक्तस्य पूर्वषट्के षष्ठा°.

'अयं वो यज्ञ ऋभवोऽकारि[1] यमा मनुष्वत्प्रदिवो दधिध्वे । प्र वोऽच्छा जुजुषाणासो अस्थुरभूत विश्वे अग्रियोत वाजाः' (ऋ० सं० ४ । ३४ । ३)॥ वामदेवस्यार्षम्[2] । व्यूढस्य दशरात्रस्य पञ्चमेऽहनि तृतीयसवने वैश्वदेवे शस्यते (आश्व० श्रौ० ८ । ८) । हे ऋभवो युष्माकम् अयं यज्ञो यम् अहमकार्षं तम् आगम्य मनुष्वत् मनुष्यवत्[3] दधिध्वे धारयध्वे । एतद्वः प्रब्रवीमि । किंच । प्र वोऽच्छा जुजुषाणासोः अस्थुः[4] । प्रस्थितानि यान्येतानि हवींषि तानि यूयं जोषयमाणा देवैः सेव्यमाना वा आत्मना अग्रिया भवत । उत वाजाः । अपि च हे वाजा यूयमप्येवमेव भवत । एवमत्र[5] 'अग्रगामिनोऽग्रसंपादिनो वाग्रमेव वाग्रिया' तथार्थोपपत्तेः शब्दसारूप्याच्च ।

प्रयोगश्च

'चनः (६४) इत्यन्ननाम । पचता' (६५) इत्यनवगतम् । एतध्येकवचनं द्विवचनं वा[6] भवति प्रकरणविशेषात् । आख्यातस्वरूपं चैतन्नाम । 'पचतिर्नामीभूतः' इति भाष्यकारो ब्रवीति[7] । 'अद्धीदिन्द्र प्रस्थितेमा[8] हवींषि चनो दधिष्व पचतोत सोमम् । प्रयस्वन्तः प्रति हर्यामसि त्वा सत्याः सन्तु यजमानस्य कामाः' (ऋ० सं० १० । ११६ । ८) ॥ इयमग्नियुतस्य वाग्नियूपस्य वार्षम्[9] । अद्धि भक्षय हे इन्द्र प्रस्थितानि इमानि हवींषि । चनः अन्नमेतद्धविर्लक्षणं दधिष्व प्रक्षिप जठरे । पचता पक्वानि[10] इमानि हवींषि । अत एवं ब्रवीमि दधिष्वेति ।

'चनः' 'पचता' इत्यनयोः

---

१ ग. ज. °कारि । वाम°; घ. झ. ट. 'कारि० अग्रियोत वाजाः । वाम°. २ क. ख. घ. झ. ट. ठ. ड. °स्यार्षम् । आर्भवी । त्रिष्टुप् । व्यू°; च. °स्यार्षम्ˇ । व्यू° आर्भवी । त्रिष्टुप्. ३ क. ख. घ. झ. ट. ठ. ड. °वत् प्रदिवः प्रकर्षेण द्योतमानाः सन्त आदधि°. ४ ग. °णासो अस्थुःˇ । प्र° प्रास्थुः; च. ज. °णासः प्रास्थुः प्रस्थि°; घ. ट. °णासः प्रास्थुः । प्र°; ठ. ड. °णासः । प्रास्थुः प्रस्थि. ५ क. ख. घ. झ. ट. ठ. ड. 'अत्र' नास्ति. ६ घ. झ. ट. ह. वा बहुवचनं वा भ°; च. °चनंˇवा° बहुवचनं. ७ ग. °ति । ६९ । अद्धि°. ८ ग. °दिन्द्र प्रस्थितेमेति इय°; ज. 'दिन्द्र प्रस्थितेमा । इय°; घ. झ. ट. दिन्द्र ० यजमानस्य कामाः । इय°. ९ क. ख. घ. झ. ट. ठ. ड. °वार्षम् । त्रिष्टुप् । ऐन्द्री । अद्धि°; च. °वार्षम्ˇ । अद्धि° त्रिष्टुबैन्द्री. १० च. °इमालीमानी ह° नि.

उत सोमम् अपि च सोमं दधिष्व । प्रयस्वन्तः अन्नवन्तो वयं हवींषि कामयमानं त्वां प्रतिहर्यामसि प्रतिकामयामहे सत्याः सन्तु यजमानस्य कामाः इत्यभिप्रायेण । इह 'हवींषि' इत्यनेन संबन्धात् 'पचता' इत्येतदन्नविषयं बहुवचनम् । 'पचतिर्नामीभूतः' इति धातुनिर्देशः ।

अत्र 'पचता' बहुवचने

द्वितीयमुदाहरणं ब्रवीत्यर्थवैशेष्यदर्शनादस्येति 'तं मेदस्तः प्रति पचताग्रभीष्टाम्' (मैत्रा० सं० ४ । १३ । ९) इति । तं पशुं मेदस्तः यतस्तस्य मेदो वपासहयोगि ततस्तेन प्रदेशेन प्रत्यग्रभीष्टाम् इन्द्राग्नी पचता । पक्वमित्यर्थः । एवमेतदेकवचनं भवति । अपि वा मेदसश्च वपासहयोगिनः पश्ववदानस्याभिधायकमेतत् 'सात्त्वं' सत्त्वविषयं 'द्विवचनं स्यात्' । सन्ति ह्येवंरूपाणि द्विवचनान्यपि । तद्यथा । 'दैव्या होतारा भिषजा' (मैत्रा० सं० ३ । ११ । ११) ।

अत्रैकवचनम्

अथवा द्विवचनम्

किं कारणमुच्यते 'द्विवचनम्' एतत् 'स्यात्' इति । यतो यस्मात् 'यत्र ह्येकवचनार्थः प्रसिद्धम्' एव निःसंदेहमेव 'तद्भवति' । 'पुरोळाँ अग्ने पचतस्तुभ्यं वा घा परिष्कृतः । तं जुषस्व यविष्ठ्य' (ऋ० सं० ३ । २८ । २) ॥ विश्वामित्रस्यार्षम् । आश्विनस्य द्विकपालस्यातिरात्रे यदि स्विष्टकृद्भवति तस्येयं पुरोनुवाक्या भवति (आश्व० श्रौ० ६ । ९) ।

अत्रैकवचनमेव

---

१ क. ख. घ. झ. ट. ठ. ड. प्रतिहर्यामः काम°; च. प्रति॰काम° हर्यामः. २ क. ख. घ. झ. ट. ठ. ड. °चनमुपपद्यते. ३ क. ख. घ. झ. ट. ठ. ड. °र्थविशेषदर्श°; ग. र्थविशेष्याद्दर्श° वै; ज. °र्थवैशेष्याद्दर्श°. ४ क. ख. °नस्य चाभि°; घ. झ. ट. ठ. ड. °नस्य वाभि°; च. °नस्या (स्य) चाभिधेयक° धा; ग. ज. °नस्याभिधेयकतत्°. ५ ग. °वति । ७० । पुरो°. ६ क. ख. ग. घ. ज. ध. ट. पुरोला. ७ ग. पचतस्तुभ्यामिति । विश्वा°; ज. पचतस्तुभ्यं । विश्वा°; घ. झ. ट. पचतः॰ यविष्ठ्य । विश्वा°. ८ क. ख. घ. झ. ट. ठ. ड. °स्यार्षम् । गायत्री । आग्नेयी । आश्वि°; च. स्यार्षम् ॰ । आश्वि° गायत्र्याग्नेयी.

पुरोळाः पुरोडाशः पचतः । पक्व इत्यर्थः । तुभ्यं त्वदर्थं भगवन्नग्ने । 'वा घा' इत्यनर्थकौ । न केवलं पक्वः । किं तर्हि । परिष्कृतः । सुसंस्कृत इत्यर्थः । तं जुषस्व सेवस्व हे यविष्ठ्य युवतम । अथवा । मिश्रयितृतम । 'एवमत्र परिष्कृतः' इत्येतस्मादेकवचनसंबन्धात् 'पचतः' इत्येकवचनमिति सिध्यति ।

'शुरुधः' इत्यस्य व्युत्पत्तिः

'शुरुधः' (६६) इत्यनवगतम् । 'आपो भवन्ति' इत्यभिधेयवचनम् । 'शुचं संरुन्धन्ति' इति निर्वचनम् । 'शुग्रुधः इति न्याय्यम् । 'ऋतस्य हि शुरुधः' इति । दैवते शेषः (निरु० १० । ४१) ।

'अमिनः' इत्यस्य

'अमिनः' (६७) इत्यनवगतम् । 'अमितमात्रः' इत्यवगमः । न यस्य मात्राणां मानमस्ति सोऽमिन इत्युच्यते । 'अभ्यमितो वा' । अनभिहिंसितो यः केनचित्सोऽमिनः । 'महाँ इन्द्रो नृवदा चर्षणिप्रा उत द्विबर्हा अमिनः सहोभिः । अस्मद्र्यग्वावृधे वीर्यायोरुः पृथुः सुकृतः कर्तृभिर्भूत्' [ऋ० सं० ६ । १९ । १) ॥ भरद्वाजस्यार्षम् । दशरात्रस्याष्टमेऽहनि मरुत्वतीये शस्त्रे शस्यते [आश्व० श्रौ० ८ । ७] । माहेन्द्रश्च ग्रहोऽनयैव गृह्यते [मैत्रा० सं० १ । ३ । २५] । महान् प्रभावतः इन्द्रो नृवत् मनुष्यवत् आचर्षणिप्राः आपूरयिता चर्षणीनां मनुष्याणां कामैः । यथा हि मनुष्य ईश्वरः परितुष्टः कामैर्वश्यं भृत्यमापूरयत्येवमिन्द्रोऽपि स्तोतारम् । उत द्विबर्हाः । अपि च द्वयोः

---

१ क. ख. ग. च. ज. पुरोडाः; घ. झ. पुरोलाः पुरोलाशः; ट. पुरोळाः पुरोळाशः. २ ठ. ड. °त्यर्थः । भृमृदृशीत्यादिना कर्मण्यच् । पच्यतेऽसौ पचतः । तुभ्यं°. ३ च. केवलः. ४ ग. च. युवतम यविष्ठ्य; ज. युवतम यविष्ठ्य. ५ क. ख. घ. झ. ट. ठ. ड. °चनमेव सि°. ६ ग. ज. अनभ्यमि°; च. अनभ्यमि°. ७ क. ख. घ. झ. ट. ठ. ड. °चिदसौ अमि°; ग. ज. त्सोऽमिनः । ७१ । महा°; च. °चित्सोमि° दसौ अ. ८ ग. वदेति । भर°; घ. झ. ट. °वत् ० कर्तृभिर्भूत् । भर°; ज. °वदा । भर°. ९ क. ख. घ. झ. ट. ठ. ड. °स्यार्षम् । त्रिष्टुप् । ऐन्द्री । दश°; च. °स्यार्षम् ७। दश° त्रिष्टुबैन्द्री.

स्थानयोर्मध्यमोत्तमयोः परिवृद्धः[1] अमिनश्च अमितमात्रः । अथवा । अनभिहिंसितः केनचित् । केन पुनरमिन इति । उच्यते । सहोभिः । बलैरित्यर्थः । न हीन्द्रस्य बलमात्राः केनचिन्मितपूर्वा इत्यर्थः । अनभिहिंसितपूर्वो वा केनचिदिन्द्रः । अस्मद्र्यक् अस्मदनुग्रहाय अस्मद्दर्शनाय वावृधे[2] वर्धते । वीर्याय वीरकर्मणे वर्षार्थम् उरुः महान् परिमाणतः पृथुश्च विस्तीर्णो यः सोऽस्माकं प्रत्यभिमुखो दानायाभिप्रेतानामर्थानां सुकृतः स्तुतिभिरेतैः कर्तृभिः ऋत्विग्भिः भूत् । भूयादित्यर्थः । एवमत्र 'अमिन'शब्देन 'अमितमात्रः' अनभिहिंसितमात्रो वोच्यते[3] शब्दसारूप्यादर्थोपपत्तेश्च ।

'जज्झतीः' इत्यस्य

'जज्झतीः' (६८) इत्यनवगतम् । शब्दानुकरणात् 'आपः' इति प्रतीयन्ते[4] । 'आ रुक्मैरा युधा[5] नरं ऋष्वा ऋष्टीरसृक्षत । अन्वेनाँ अहं विद्युतो मरुतो जज्झतीरिव भानुरर्त त्मना दिवः' [ऋ० सं० ५।९२।६] ॥ यावाश्वस्यार्षम्[6] । आभिमुख्येन शत्रून् शातयितव्यान् मेघान् प्रति एतान्यायुधानि रुक्मैः विकृतानि एताश्च ऋष्टीः शक्तीः असृक्षत असृजन्त हे नरः मरुतः । किंच । अनु एनान् प्रहारान् विद्युतो भानुः आदित्य इव आत्मना दिवो द्युलोकादपगच्छन्तु[7] । मेघेभ्यो हन्यमानेभ्यस्तदन्वेव चापोऽपि आर्त आगच्छन्तु । कथमिति । जज्झतीरिव शब्दकारिण्य इव स्रोतस्या आप ऋष्वाः । प्रभूता[8] इत्यर्थः । एवमत्र शब्दानुकरणात् 'आपो जज्झतीः' इत्युपपद्यते ।

'अप्रतिष्कुतः' इत्यस्य

'अप्रतिष्कुतः' (६९) इत्यनवगतम् । 'अप्रतिष्कृतोऽप्रतिस्खलितो वा' इति शब्दसमाधी[9] । 'स नो वृषन्नमुं चरुं[10] सत्रादावन्नपा वृधि । अस्मभ्यमप्रतिष्कुतः[11]' (ऋ० सं० १।७।६) ॥ मधुच्छन्दस आर्षम्[12] । पृष्ठ्याभिप्लवयोः प्रातःसवनिके आवापे विनियुक्ता ब्राह्मणाच्छंसिनः शस्त्रे

१ क. ख. घ. झ. ट. ठ. ड. परिवृढः. २ ग. ज. घ. झ. ट. ठ. ड. वकृधे. ३ क. ख. घ. झ. ट. ठ. ड. वेत्युच्यते. ४ ग. °यते । ७२ । आ°; ज. °यते । आ°. ५ ग. युधेति । श्या°; घ. झ. ट. युधा नरः० भानुरर्त त्मना दिवः । श्या°. ६ क. ख. घ. झ. ट. ठ. ड. °स्यार्षम् । मारुती । पङ्क्तिः । आभि°; च. °स्यार्षम् । आभि° मारुती पङ्क्तिः. ७ क. ख. घ. झ. ट. ठ. ड. °कादार्तापगच्छ°; ग. ज. °कादागच्छ°; च. °कात् अप° आर्त. ८ घ. झ. प्रसूताः; ट. प्रसूताः °भू. ९ ग. मार्गी । ७३ । स°. १० ग. ज. चरुं । मधु°; घ. झ. ट. चरुं० मप्रतिष्कुतः । मधु°. ११ च. °तिस्कुतः. १२ क. ख. घ. झ. ट. ठ. ड. आर्षम् । गायत्री । ऐन्द्री । पृ°.

(आश्व० श्रौ० ७ । ५) । हे वृषन् इन्द्र वर्षितः यस्त्वमनुग्रहीतास्माकं स त्वं शृणु यत्कुरुष्व । अमुं चरुम् अमुं मेघं हे सत्रादावन् सततदान अपावृधि अपावृणु उदकदानार्थमस्मभ्यम् । अप्रतिष्कुतः । न हीन्द्रः प्रतिष्कुतः परान् प्रति पराङ्मुखः कृतपूर्वः केनचित् । अथवा । ' अप्रतिस्खलितः ' संग्रामेषु । एवमत्र ' अप्रतिष्कुत ' शब्दः ' अप्रतिष्कृत '-वाची अथवा ' अप्रतिस्खलित' वाची । तथार्थाविरोधः ।

' शाशदानः ' (७०) इत्यनवगतम् । ' शाशाद्यमानः ' इत्यवगमः । ' अभि सिध्मो अजिगादस्य शत्रून्वि तिग्मेन वृषभेणा पुरोऽभेत् । सं वज्रेणासृजद्वृत्रमिन्द्रः प्र स्वां मतिमतिरच्छाशदानः' (ऋ० सं० १ । ३३ । १३) ॥ हिरण्यस्तूपस्यार्षम् । गोसवविवधयोर्निष्केवल्ये शस्यते इत्यस्य (आश्व० श्रौ० ९ । ८) । अभ्यजिगात् अभ्यगच्छत् अस्य इन्द्रस्य स्वभूतः तिग्मः उत्साहवान् वज्रः शत्रून् प्रति सिध्मः साधयिता शत्रूणां वितिग्मेन तीक्ष्णेन वृषभेण वर्षप्रवर्तकेन पुरः मेघपुरः असुरपुरो वा अभेत् । किंच । समसृजद्वज्रेण वृत्रमिन्द्रः । स च भिद्यमानः प्रातिरत् स्वां मतिं न दातव्यमुदकमेषामित्येतां मतिं स्वां प्रातिरत् । प्राजहादित्यर्थः । शाशदानः पुनः पुनः शाशाद्यमानः इन्द्रेण । एवमत्र ' शाशदानः शाशाद्यमानः ' इत्युपपद्यते शब्दसारूप्यादर्थाविरोधाच्चेति ॥ १६ ॥

एकादशस्य तृतीयः पादः ॥

---

१ क. ख. घ. झ. ट. ठ. ड. °ममुमन्तरिक्षे चरणशीलं मेघं°; च. °ममुं ~ मेघं °अन्तरिक्षेण चरणशीलं. २ च. °दान अपा° नः; ट. °दान अपा° ता. ३ ग. ज. हेऽप्रतिष्कृतः. ४ च. °वाची वा; ज. वाची वा. ५ ग. °गमः । ७४ । अभि°. ६ ग. ज. °जिगात् । हिर°; घ. झ. ट. °जिगादस्य॰ प्र स्वां मतिमतिरच्छाशदानः । हिर°. ७ च. मेघः पु°. ८ क. ख. ७ (१६); ग. १८; इतरेष्वङ्को नास्ति. ९ ठ. ड. °च्चेति । इति गुर्जरपाठे निघण्टपञ्चकेन सह एकादशाध्यायस्य तृतीयः पादः । इति निरुक्तटीकायां षष्ठाध्याये षोडशः खण्डः.

७०

चतुर्थः पादः ।

सृप्रः सर्पणादिदमपीतरत्सृप्रमेतस्मादेव सर्पिर्वा तैलं वा । सृप्रकरस्नमूतय इत्यपि निगमो भवति करस्नौ बाहू कर्मणां प्रस्नातारौ सुशिप्रमेतेन व्याख्यातम् । वाजे सुशिप्र गोमतीत्यपि निगमो भवति शिप्रे हनू नासिके वा हनुर्हन्तेर्नासिका नसतेः । वि ष्यस्व शिप्रे विसृजस्व धेने इत्यपि निगमो भवति धेना दधातेः रंसु रमणात् । स चित्रेण चिकिते रंसु भासेत्यपि निगमो भवति द्विबर्हा द्वयोः स्थानयोः परिवृढो[1] मध्यमे च स्थान उत्तमे च । उत द्विबर्हा अमिनः सहोभिरित्यपि निगमो भवत्यक्र[2] आक्रमणात् । अक्रो न बभ्रिः समिथे महीनामित्यपि निगमो भवत्युराण उरु कुर्वाणः । दूत ईयसे प्रदिव उराण इत्यपि निगमो भवति[3] । स्तिया आपो भवन्ति स्त्यायनात् । वृषा सिन्धूनां वृषभः स्तियानामित्यपि निगमो भवति स्तिपा स्तियापालन[4] उपस्थितान् पालयतीति वा[5] । स नः स्तिपा उत भवा तनूपा इत्यपि निगमो भवति जवारु जवमानरोहि[6] जरमाणरोहि गरमाणरोहीति वा । अग्रे रूप आरुपितं जबार्वित्यपि निगमो भवति जरूथं गरूथं गृणातेः । जरूथं हन्यक्षि राये पुरन्धिमित्यपि निगमो भवति कुलिश इति वज्रनाम कूलशातनो भवति । स्कन्धांसीव कुलिशेना विवृक्णाहिः शयत उपपृक्पृथिव्याः । स्कन्धो वृक्षस्य समास्कन्नो भवत्ययमपीतरस्कन्ध[7] एतस्मादेवास्कन्नं कायेऽहिः शयत उपपर्चनः पृथिव्यास्तुञ्जस्तुञ्जतेर्दानकर्मणः ॥ १७[8] ॥

'सृप्र' (७१) इत्यनवगतम् । 'सर्पः' इत्यवगमः । 'सर्पणात्' 'सृप्रः' इत्यस्य इति निर्वचनम् । 'इदमपीतरत्सृप्रमेतस्मादेव' सर्पणात् । यदेतत् 'सर्पिर्वा तैलं वा' तदपि हि सर्पति । 'सृप्रकरस्नमूतये' इति निगमः । 'बृबदुक्थं हवामहे' इति व्याख्यातः शेषः (निरु० ६ । ४) । 'करस्नौ बाहू कर्मणां प्रस्नातारौ' । निर्वर्तयितारावित्यर्थः ।

---

१ छ. त. द. परिवृल्हो. २ ठ. ड. त. °वति । अक्र°. ३ क. ख. द. °वति । १ । स्तिया ; छ. त. °वति । १९ । स्तिया°. ४ छ. त. द. स्तृणां पाल°. ५ छ. त. द. 'वा' नास्ति. ६ क. ख. छ. त. द. जवमा°; 'जवारु जरमाणरोहीति वा जवमानरोहीति वा' इति सायणपाठः. ७ छ. त. द. भवतीदमपीतरत्स्कन्ध° (द. °रस्कन्न). ८ क. ख. २ (१७); छ. त. २०; द. २.

'सुशिप्रः' इत्यस्य

'सुशिप्रः' (७२) इत्यनवगतम् । तत्पुनरेतत् 'एतेन' एव सृप्रशब्देन 'व्याख्यातम्' । सर्पतेरेवैतदपि । 'शिप्रे हनू नासिके वा' । ते यस्य शस्ते स सुशिप्रः । 'वाजे सुशिप्र गोमति' इति निगमो 'विद्मा सखित्वम्' इति व्याख्यातेः (निरु० ५ । २३) । नास्मिन्मन्त्रे नासिकयोर्हन्वोर्वा शिप्रशब्दवाच्यत्वे विशेषलिङ्गमस्तीति यतः 'शिप्रे हनू नासिके वा' इत्युक्त्वा विशिष्टतरं[3]लिङ्गमन्यदुदाहरणं ब्रवीति 'वि ष्यस्व शिप्रे' इति[4] ।

शिप्रे' इत्यस्य

'मादयस्व हरिभिर्ये त इन्द्र वि ष्यस्व शिप्रे वि सृजस्व धेने । आ त्वा सुशिप्र हरयो वहन्तूशन्हव्यानि प्रति नो जुषस्व' (ऋ० सं० १ । १०१ । १०) ॥

कुत्सस्येयमार्षम् । ऐन्द्री[6] । जगती । दशरात्रस्य नवमेऽहनि मरुत्वतीये शस्त्रे शस्यते (आश्व० श्रौ० ८ । ७) । मादयस्व हर्षयस्व त्वम् आत्मानं हे इन्द्र हरिभिः अश्वैः ये ते तव स्वभूताः तैः सह । कथं च पुनर्मादयस्वेति । विष्यस्व विमुञ्चस्व शिप्रे सृप्रे दीर्घे हनू हविर्भक्षणाय । नासिके वा । ते अपि हि गन्धाघ्राणाय सर्पत इव । भक्ष्यं द्रव्यं ह्यास्वादयतो वा जिघ्रतो वा हर्ष उत्पद्यते । अत इदमुक्तं विमुञ्चस्व हनू हविर्भक्षणाय नासिके वा गन्धा[7]घ्राणाय । एवं मादयस्वात्मानमिति । विसृजस्व धेने आवरत्ये दंष्ट्रे वा । 'जिह्वोपजिह्विके[8] वा' इत्येके । तयोर्ह्यन्नं धीयते । किंच । आ त्वा वहन्तु हरयः[9] । हृष्टाः सन्त आवहन्तु त्वां हरयोऽस्मान्प्रति हे सुशिप्र । उशन् कामयमानो हव्यानि हवींषि एतानि अस्मत्प्रत्तानि स्तुतिभिरस्माभिरासेवितः प्रतिजुषस्व नः । प्रतिसंसेवस्व[10] नः कामैरित्यभिप्रायः । एवमत्र मादनसंबन्धाद्धविःसंप्रदानसंबन्धाच्च 'शिप्रे हनू नासिके वा' इत्युपपद्यते ।

यत्तदुक्तं 'शिप्रे इत्युपरिष्टाद् व्याख्यास्यामः' (निरु० ४ । १०) इति एतद् व्याख्यातं 'शिप्रे हनू नासिके वा' इति ।

'हनुर्हन्तेः' धातोः । 'नासिका नसतेः' । 'नसतिराप्नोतिकर्मा वा नमतिकर्मा वा' इति हि[11] वक्ष्यति (निरु० ७ । १७) ।

१ च. सिप्रे. २ घ. °ख्यात । जास्मिन्मन्त्रे°; ट. °ख्यात । ना° शेषः; ठ. ड. °ख्यातशेषः । अस्मिन्मन्त्रे°. ३ क. ख. घ. झ. ट. ठ. ड. तल्लिङ्ग°. ४ ग. इति । ७५ । माद°. ५ ग. ज. हरिभिः । कुत्स°; घ झ. ट हरिभिर्ये त० प्रति नो जुषस्व । कुत्स°. ६ ग. ज. 'ऐन्द्री' नास्ति. ७ ग. ज. गन्धघ्रा°. ८ ग. ज. °जिव्हके. ९ ग. ज. 'हरयः' नास्ति. १० च. °सेवयस्व. ११ ग. ज. 'हि' नास्ति.

'रंसु' इत्यस्य

'रंसु' (७३) इत्यनवगतम् । रमणीयेषु इत्यवगमः । 'रमणात्' इति निर्वचनम् । 'आ यन्मे अभ्वं वनदः पनन्तोशिग्भ्यो नामिमीत वर्णम् । स चित्रेण चिकिते रंसु भासा जुजुर्वाँ यो मुहुरा युवा भूत्' (ऋ० सं० २ । ४ । ५) ॥ सोमाहुतेर्भार्गवस्यार्षम् । त्रिष्टुप् । आग्नेयी । प्रातरनुवाकाश्विनयोः शस्यते (आश्व० श्रौ० ४ । १३) । आपनन्त आभिमुख्येन पनन्त आस्तुवत मे मम स्वभूते कर्मणि अभ्वं महान्तम् अग्निम् । वनदो वननीयस्य हविषो दातार ऋत्विजो यं वर्णं वरं वृण्वन्ति अस्मदर्थं तेभ्यः उशिग्भ्यः मेधाविभ्यः तमसौ वर्णं वरणं प्रार्थनां नामिमीत न हिनस्ति । किं तर्हि । यथाप्रार्थितमेव समर्धयतीत्यर्थः । किंच । सः अग्निः चित्रेण चायनीयेन भासा युक्तो रंसु रमणीयेषु स्थानेषु द्युलोकादिषु अग्निहोत्रेषु वा चिकिते । किंलक्षणो योऽग्निरिति । जुजुर्वान् पुनः पुनर्जरावान् अपि भूत्वा इन्धनक्षयात्पुनरिन्धनं प्राप्य तस्योपरि दीप्यमानो मुहुर्मुहुर्युवैव भवति । एवमत्र शब्दसारूप्यादर्थाविरोधाच्च 'रंसु' इत्यस्य 'रमणीयेषु' इति विपरिणाम उपपद्यते ।

'द्विबर्हाः' इत्यस्य

'द्विबर्हाः' (७४) इत्यनवगतम् । 'द्विपरिवृढः' इति न्याय्यम् । मध्यमे च स्थाने वैद्युतात्मना उत्तमे च सूर्यात्मना । 'उत द्विबर्हाः' इति निगमः । 'महाँ इन्द्रः' इति व्याख्यातः शेषः (निरु० ६ । १६) ।

'अक्रः' इत्यस्य

'अक्रः' (७५) इत्यनवगतम् । 'आक्रमणः' इति न्याय्यम् । 'आक्रमणात्' इति निर्वचनम् । प्राकारोऽभिधेयः । 'अक्रो न बभ्रिः समिथे महीनां दिदृक्षेयः सूनवे भाऋजीकः । उदुस्रिया जनिता यो जजानापां गर्भो नृतमो यह्वो अग्निः' (ऋ० सं० ३ । १ । १२) ॥ विश्वामित्रस्यार्षम् । त्रिष्टुप् । आग्नेयी । प्रातरनुवाकाश्विनयोः शस्यते

१ ग. ज. °णीयमित्यव°; च. °णीयेष्वित्यनवगमः. २ ग. °चनम् । ७६ । आ°. ३ ग. ज. वनदः पनन्त इति । गृत्समदस्यार्षम् । प्रात°; घ. झ. ट. वनदः० मुहुरा युवा भूत् । सोमा°. ४ क. ख. घ. झ. ट. ठ. ड. अस्तु°; ग. ज. असुवत. ५ च. तथा°. ६ ग. °धेयः । ७७ । अक्रो°. ७ ग. बभ्रिः समिथ इति । विश्वा°; ज. बभ्रिः समिथे विश्वा°; घ. झ. ट. बभ्रिः स० यह्वो अग्निः । विश्वा°. ८ ग. ज. 'त्रिष्टुप् । आग्नेयी' नास्ति.

(आश्व० श्रौ० ४ । १३)। अक्रो न अक्र इव प्राकार इव बभ्रिः भर्ता धारयिता । क्व । समिथे संग्रामे । कस्य । महीनां महतीनां शत्रुसेनानाम् । एवंलक्षणो योऽग्निः । किंच । दिदृक्षे यः दृश्यते यः सूनवे सोमाभिषवकर्त्रे यजमानाय नित्यकालमेव भाऋजीकः प्रसिद्धभाः प्रसिद्धदीप्तिः । नित्यो ज्वलित इत्यर्थः । किंच । [1]सर्वस्य लोकस्य जनयिता उस्रिया उज्जजान उस्रिया आहुतीः आत्मनि प्रक्षिप्ताः [2]सतीः देवतातृप्तिसमर्थेन[3] रूपेण ऊर्ध्वा यो जनयति । अथवा । गाव एव वोस्रियाः स्युः । ता अपि ह्यसौ पशुकामकर्मण्यङ्गभावं गच्छन् जनयति । यश्च अपां गर्भो यश्च नृतमो मनुष्यतमो यश्च यह्वो महान् अग्निः स इदं नामास्माकं करोत्विति । एवमत्र शब्दसारूप्यादर्थाविरोधाच्च 'अक्रः प्राकारः' इत्युपपद्यते । असौ ह्याक्रम्यते जनैः ।

'उराणः' (७६) इत्यनवगतम् । 'उरु कुर्वाणः' इत्यवगमः[4] ।

'उराणः इत्यस्य'　'वेरध्वरस्य दूत्यानि[5] विद्वानुभे अन्ता रोदसी संचिकित्वान् । दूत ईयसे प्रदिव उराणो विदुष्टरो दिव आरोधनानि' (ऋ० सं० ४ । ७ । ८)॥

वामदेवस्यार्षम् । त्रिष्टुप्[6] । आग्नेयी । प्रातरनुवाकाश्विनयोः शस्यते (आश्व० श्रौ० ४ । १३) । हे भगवन्नग्ने वेः त्वं जानीषे । किम् । अध्वरस्य यज्ञस्य दूत्यानि दूतकर्माणि यानि दूतेन कर्तव्यानि । किंच । उभौ अपि अन्तौ रोदस्योः[7] विद्वान् असि विजानीषे । किंच । समस्तमप्येतज्जगत् चिकित्वान् असि । न ते विज्ञानप्रतीघातोऽस्ति कृत्स्नेऽपि जगति । विजानीषे सर्वाणि देवतास्थानानि । प्रदिव एवासि दूतः चिरंतनः सर्वेषां यजमानानाम् । यतोऽस्माभिस्त्वमेतस्मिन्कर्मणि दूतो दूतत्वेन ईयसे याच्यसे । स त्वम् उराणः अल्पमपि हुतं हविर्देवतातृप्तिसमर्थं बहु कुर्वाणो विदुष्टरो विद्वत्तरो[8] मनुष्यहोतुः सकाशात् दिव आरोधनानि[9] आरोढव्यानि देवतास्थानानि प्रति । वहैतानि हवींषीत्यभिप्रायः । एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च 'उराणः' इत्यस्य 'उरु कुर्वाणः' इत्येष विपरिणाम उपपद्यते[10] ।

---

१ ग. ज. °किंच । उदुस्रिया उज्जजानोसृया आहुती°. २ ग. च. ज. सती दे°. ३ ट. °समर्थेन० सामर्थ्ये; ठ. ढ. तृप्तिसामर्थ्येन. ४ ग. °गमः । ७८ । वे°. ५ ग. ज. दूत्यानि विद्वान् । वाम°; घ. झ. ट. दूत्यानि० दिव आरोधनानि । वाम°. ६ ग. ज. 'त्रिष्टुप् । आग्नेयी' नास्ति. ७ ग. च. ज. रोदस्यो वि°. ८ ग. ज. 'विद्वत्तरः' नास्ति; च. विदुत्तर० द्व. ९ घ. ट. ठ. ड. °नानि आनानि आरो°. १० क. ख. °द्यते । १ । स्त्रियाः°.

'स्तियाः' (७७) इत्यनवगतम् । 'स्त्यायनाः' इति न्याय्यम् ।

'स्तियाः' इत्यस्य व्युत्पत्तिः

'आपो भवन्ति' इत्यभिधेयवचनम् । 'स्त्यायनात्' संहननात् इत्यर्थः । आप एव हि पार्थिवानामवयवानां संहनने हेतुभूता भवन्ति । अथवा । हिमभावेन ता आत्मनैव संहता भवन्ति ।

प्रयोगश्च

वृषासि दिवो वृषभः पृथिव्या वृषा सिन्धूनां वृषभः स्तियानाम् । वृष्णे त इन्दुर्वृषभ पीपाय स्वादू रसो मधुपेयो वराय' (ऋ० सं० ६ । ४४ । २१) ॥

शंयोर्बार्हस्पत्यस्येयमार्षम् । ऐन्द्री । हे इन्द्र वृषासि । दिवो वर्षितासि । पृथिव्याश्च वर्षिता । सिन्धूनां स्यन्दमानानामपां च वर्षिता । स्तियानां संहन्त्रीणामपाम् । अथवा । संहतानामात्मनैव हिमभावेन । यावत्किंचित्सेचनकर्म तत्सर्वं त्वदधीनमित्यभिप्रायः । तस्मै ते एवंगुणविशिष्टाय वृष्णे वर्षित्रे तुभ्यम् एष इन्दुः सोमो हे वृषभ वर्षितः पीपाय पुनः पुनराप्याय्यते । अथवा । पानाय संस्कृतः । स्वादू रसः स्वादुरससंयुक्तो मधुपेयो मधुरपेयो वराय तुभ्यम् । श्रेष्ठायेत्यर्थः । एवमत्र 'स्तिया' शब्देन 'संहन्त्र्यः संहता वा आप' उच्यन्ते शब्दसारूप्यात् 'स्त्यै शब्दसंघातयोः' (धा० १ । ९३५) इत्यस्य ।

'स्तिपाः' (७८) इत्यनवगतम् । 'स्तियापालनः' इत्यवगमः ।

'स्तिपाः' इत्यस्य

'कूपः' अभिधेयः । स हि 'उपस्थितान्' पातृन् 'पालयति' । 'यं त्वां पूर्वमीळितो वध्र्यश्वः समीधे अग्ने स इदं जुषस्व । स नः स्तिपा उत भवा तनूपा दात्रं रक्षस्व यदिदं ते अस्मे' (ऋ० सं०

---

१ क. ख. घ. झ. ट. स्त्यायजाः; ठ. ड. स्तियजाः. २ ग. ज. सहनेने; च. अथवा हसनेन° संहनने. ३ ग. ज. 'अथवा' नास्ति; च. °न्ति । हिम° अथवा. ४ क. ख. ग. ज. घ. झ. ट. ठ. ड. °भावन च ता°; च. °भावेन च ता°. ५ ग. °वन्ति ।. वृषा° ७१ । ६ ग. ज. °षभः । शं°; घ. झ. ट. °षभः ०मधुपेयो वराय । शं°. ७ घ. झ. ट. ठ. ड. ऐन्द्री । त्रिष्टुप् । हे°. ८ ग. ज. स्यन्द°. ९ ग. ज. स्तिप इ°; च. स्तिपं इ° पा. १० ग. ज. स्तिपाल°; च. स्तिपपाल° या. ११ ग. °यति । ८० । यं°. १२ ग. ज. °मीलितः । वाध्र्य°; च. °मीलितो; घ. झ. ट. °मीलितो वध्र्यश्वः ०दात्रं रक्षस्व यदिदं ते अस्मे । वाध्र्य°.

१० । ६९ । ४)॥ वाध्र्यश्वस्य सुमित्रस्येयमार्षम् । त्रिष्टुप्[1] । हे अग्ने यं त्वां वध्र्यश्वः ईडितः[2] अपि सर्वैर्महर्षिभिः पूर्वं समीधे समेधितवान् उपचीर्णवान् तं त्वामहमपि समिन्धे । को हि नाम त्वां न समिन्ध्यात् । स त्वं समिध्यमानोऽस्माभिः इदं हविः जुषस्व संसेवस्व । किंच । य एवमस्माभिरीडयसे त्वं स नः स्तिपा कूप इव तनूपाः भव । कूपो हि तृष्णया आर्तान् पातॄन् पात्युदकसंप्रदानेन । किंच । दात्रं दानं रक्षस्व । कतमत् । यदिदं ते अस्मे अस्मासु । वर्तत इत्यर्थः । एवमत्राविरोधाच्छब्दसारूप्याच्च ‘ स्तिपाः कूपः ’ इत्युपपद्यते ।

‘जवारु’ इत्यस्य

‘जबारु’[3] (७९) इत्यनवगतम् । ‘जवमानरोहि’[4] इत्येवमाद्याः शब्दसमाधेयः[5] । ‘ तमिन्वे[6] ३व समना[7] समानमभि क्रत्वा पुनती धीतिरश्याः । ससस्य चर्मन्नधि चारु पृश्नेरग्रे रुप आरुपितं जबारु[8] ’ (ऋ० सं० ४ । ५ । ७)॥ वामदेवस्यार्षम् ।‘वैश्वानराय मीह्ळुषे सजोषाः’ इत्येतस्मिन् वैश्वानरीये सूक्ते (ऋ० सं० ४ । ५) । तम् एव हे यजमान त्वम् अभ्यश्याः प्राप्नुयाः वैश्वानरं सूर्यं समना समानयैव तदनुरूपयैव स्तुत्या समानम् । केन पुनरभ्यश्याः । क्रत्वा पुनती स्वात्मपवनसमर्थेन कर्मणा प्रज्ञानेन[9] वा । किंलक्षणः पुनर्यो वैश्वानरस्तमभ्यश्या इति[10] । ससस्य पृश्नेः स्वपनस्य द्युलोकस्य पृश्नेः प्राष्टवर्णस्य अधि उपरि । स्वपितीव हि द्युलोको निश्चलत्वात् । चर्मन् चरणार्थम् । कथं नाम सौर्येण प्रकाशेन जनाश्चरेयुरित्यनेनाभिप्रायेण । चारु दीप्तिमत् । अग्रे पूर्वसर्गादौ रुप आरुपितम् । ‘ रिपः ’ इति विपरिणामः । भूम्या इत्यर्थः । आरुपितम् आरोपितं देवैः जबारु मण्डलं यस्य तं त्वमभ्यश्याः । ‘इह वा आदित्य आसीत्तमाभ्यां परिगृह्योपरिष्टाच्चासां प्रजानां न्यदधुः’ (मैत्रा० सं० २ । २ । २) इति[11] विज्ञायते । एवमत्र ‘ जबारु आदित्यमण्डलम् ’ उच्यते । तद्धि जवमानं गच्छन्नभसो

---

१ क. ख. घ. झ. ठ ढ. ड. त्रिष्टुप् । आग्नेयी । हे°; च. त्रिष्टुप् । हे° आग्नेयी. २ ग. ज. ईरित; च. ईरित° डि. ३ घ. च. ट. ठ. जवारु. ४ ङ. जवमा°. ५ ग. °धयः । ८१ । तमि°. ६ ट. °न्वे १ व; ठ. ड. °न्वे २ व. ७ ग. समना समानं० जबारु । वाम°; घ. झ. ट. समना० रुप आरुपितं जबारु । वाम°. ८ घ. झ. ट. ठ. जवारु. ९ घ. झ. ट. ठ. ड प्रज्ञातेन. १० क. ख. घ. झ. ट. ठ. ड. ‘ इति ’ नास्ति; च. इति. ११ ग. ज. °इति ह विज्ञा°.

मध्यमारोहति जायते वा । उदेतीत्यर्थः । जवमानमेव हि तत्र तत्रोदेति । ‘जरमाणरोहि[1]’ वा स्यात् । तद्धि जरयमाणं सर्वभूतानि रोहति । ‘गरमाणरोहि वा’ । तद्धि गरमाणं रसानारोहति ।

‘जरूथम्’ (८०) इत्यनवगतम् । ‘गरूथम्’ इत्यवगमः । ‘गृणातेः’ इति धातुनिर्देशः[2] । ‘त्वाम॑ग्ने समि॒धा॒नो व॑सि॒ष्ठो[3] जरू॑थं हन्यक्षि॒ रा॒ये पुर॑न्धिम् । पु॒रु॒णी॒था जा॑तवेदो जरस्व यू॒यं पा॑त स्व॒स्तिभिः॒ सदा॑ नः’ (ऋ० सं० ७ । ९ । ६) ॥ वसिष्ठस्यार्षम्[4] । प्रातरनुवाकाश्विनयोः

‘जरूथम्’ इत्यस्य

शस्यते (आश्व० श्रौ० ४ । १३) । हे भगवन्नग्ने वसिष्ठः त्वां समिधानः संदीपयन् जरूथं स्तोत्रं हन् गमयन् त्वां प्रति । ‘हन्ति सेर्धति’ (निघ० २ । १४ । १०९–११०) इति गतिकर्मसु पठितम् । यक्षि यजति राये धनप्राप्त्यर्थम् । पुरन्धि बहुकर्मतमम् । धनसंबन्धाद्वा बहुदातृतममिति स्यात् । यस्त्वं वसिष्ठेनैवमिज्यसे तं त्वां वयमपि यजाम एव । स त्वं पुरुनीथ[5] बहुस्तुत जातवेदः अस्माभिरिज्यमानो जरस्व जुषस्व एतद्धविरस्मत्प्रत्तम् । किंच । यूयम् अस्मान् पात रक्षत । एकस्यैव पूजनार्थे बहुवचनम् । स्वस्तिभिः स्वस्त्ययनैराशीःप्रयोगैः पात नः सदा । नित्यमेवेत्यर्थः । एवमत्र जरतेः स्तुत्यर्थस्य शब्दसारूप्यादर्थाविरोधाच्च ‘जरूथं स्तोत्रम्’ उपपद्यते ।

‘कुलिशम्’ (८१) इत्यनवगतम् । ‘वज्रनाम’ इत्यभिधेयवचनम् । ‘कूलशातनः’ इति शब्दसमाधिः[6] । अह॒न्वृत्रं वृ॑त्र॒तरं[7] व्यं॑स॒मिन्द्रो॒ वज्रे॑ण मह॒ता व॒धेन॑ । स्कन्धां॑सीव॒ कुलि॑शेना॒ विवृ॑क्णाहिः॑ शयत उप॒पृक्पृ॑थि॒व्याः’ (ऋ० सं० १ । ३२ । ५) ॥ ऐन्द्री[8] । त्रिष्टुप् । हिरण्यस्तूपस्यार्षम् । अग्निष्टोमे निष्केवल्ये शस्यते (आश्व० श्रौ० ५ । १५) । अहन् हतवान् हन्ति

‘कुलिशम्’ इत्यस्य

---

१ च. °रोहि तैत् ना°. २ ग. °र्देशः । ८२ । त्वा°. ३ ग. ज. वसिष्ठः । वसि°; घ. झ. ट. वसिष्ठो जरूथं० सदा नः । वसि°. ४ क. ख. घ. झ. ट. ठ. ड. °स्यार्षम् । आग्नेयी । त्रिष्टुप् । प्रात°; च. °स्यार्षम् । प्रात° आग्नेयी । त्रिष्टुप्. ५ घ. झ. ट. ठ. ड. °नीथा. ६ ग. °माधिः ।८३ अह°. ७ ग. ज. °तरं व्यंसं । हिर°; च. °तरं० पपृक्पृथिव्याः । ऐन्द्री; घ. झ. ट. °तरं व्यंसं० उपपृक्पृथिव्याः । ऐन्द्री. ८ ग. ज. ‘ऐन्द्री । त्रिष्टुप्’ नास्ति.

वा इन्द्रः वृत्रं मेघम् । 'वृत्रतरम्' इति तस्यैव वा विशेषणम् । अन्यो वा वृत्रतरो यस्तमपि हन्ति । कथं पुनर्हन्तीति । व्यंसं विच्छिन्नसंधिबन्धनं कृत्वा । केन पुनर्हन्तीति । वज्रेण महता प्रहारेण । किंच । स्कन्धांसीव वृक्षशाखा इव कुलिशेन कूलशातनेन वज्रेण विवृक्णानि । स एवम् अहिः अगमनो मेघः छिद्यमानः अस्याः पृथिव्याः उपपृक् उपपर्चनः संपर्कस्य कर्ता भूत्वोदकभावेनास्यामेव पृथिव्याम् अहिः शयते अगमयत् । अवस्थानमात्रमेव स्वप्नोऽभिमतः । एवमत्र वधसंबन्धात् 'कुलिशो वज्रः' इत्युपपद्यते[२] ।

'तुञ्जे' (८२) इत्यनवगतम् । 'तुञ्जतेः' दानार्थस्येति निर्वचनम् । 'तुञ्जनम्' इति [३] स्यात्[४] ॥ १७ ॥

तुञ्जेतुञ्जे य उत्तरे स्तोमा इन्द्रस्य वज्रिणः । न विन्धे अस्य सुष्टुतिम् (ऋ० सं० १ । ७ । ७) ॥ दाने दाने य उत्तरे स्तोमा इन्द्रस्य वज्रिणो नास्य तैर्विन्दामि समाप्तिं स्तुतेर्बर्हणा परिबर्हणा । बृहच्छ्रवा असुरो बर्हणा कृत इत्यपि निगमो भवति ॥ १८ ॥

'तुञ्जेतुञ्जे य उत्तरे' । मधुच्छन्दस आर्षम् । ऐन्द्री । गायत्री । प्रातःसवने ब्राह्मणाच्छंसिन आवापे विनियुक्ता । 'तुञ्जे' इत्यस्य तुञ्जे तुञ्जे दाने दाने उत्तरोत्तरे दानपरितुष्टेन मया स्तोमा इन्द्रस्य वज्रिणः चिन्त्यन्त एतैः स्तोमैरसौ योग्यः स्तोतुमिति । किं तेषाम् । न विन्धे न अस्य सर्वैरपि तैर्विन्दामि सुष्टुतिं समाप्तिं स्तुतेरित्यर्थः । यावत्य एव स्तुतय उपादीयन्ते ताः सर्वा एवेन्द्रं प्राप्य न्यूना भवन्तीत्यभिप्रायः । एवमत्र स्तोमसंबन्धात् 'तुञ्जे'शब्दो दानपर्यायवचनस्तुञ्जतेश्च दानार्थस्य (धा० १० । ३३) दर्शनात् ।

---

१ ग. ज. 'हिरदनो'. २ ठ. ड. °यते । इति निरुक्तटीकायां निघण्टुपञ्चकेन सह निरुक्तैकादशाध्याये सप्तदशः खण्डः । तुञ्जे'. ३ च यावत्. ४ क. ख. (२) १७, ग २० । ८४; इत्तरेष्वङ्को नास्ति. ५ क ख. ३ (१८); छ. त. २१; द. ३. ६ घ झ. ट. °तुञ्जे य उत्तरे० सुष्टुतिम् । मधु'; च. °तुञ्जे सुष्टुतिं । इति मधु°; ठ. ड. तुञ्जेतुञ्ज इति. ७ ग. ज. 'ऐन्द्री । गायत्री' नास्ति. ८ ड. उदीर्यन्ते.

‘ बर्हणा ’ (८३) इत्यनवगतम् । ‘ परिबर्हणा ’ इत्युपसर्गाध्याहारेणार्थप्रतीतिः । परिबर्हणा परिवृद्धिः परिहिंसा वा । ‘ अर्चा दिवे बृहते शूष्यं वचः स्वक्षत्रं यस्य धृषतो धृषन्मनः । बृहच्छ्रवा असुरो बर्हणा कृतः पुरो हरिभ्यां वृषभो रथो हि षः ’ (ऋ० सं० १ । ५४ । ३) ॥ सव्यस्त्रमापन्नस्यैवास्येन्द्रस्यार्षम् । जगती । ऐन्द्री । चतुर्थे पादे रथः हि सः इति पदानि । हे स्तोतः अर्च प्रोच्चारय इन्द्राय दिवे द्योतनवते बृहते च महते शूष्यं धनसंयुक्तं बलकृतिसंयुक्तं वा वचः । किंलक्षणायेन्द्रायार्चेति । स्वक्षत्रं यस्य स्वमेव क्षत्रं धनं बलं वा यस्य । न कदाचिदपि यः परकीयमाकाङ्क्षतीत्यभिप्रायः । किंच । यस्य धृषतो धर्षयतः शत्रून् धृषत् एव धृष्टं मनो भवति । तदर्थमर्चेति । किंच । येनेन्द्रेण बृहच्छ्रवाः बृहद्घोषः असुरः मेघो वा बर्हणा परिवृध्या परिवृद्धेन वधेन परिहिंसया वा पुरः अर्वाक् हरिभ्यां प्राप्तेः । नैव तावदश्वौ हरी रथे युक्तौ तमसुरं प्राप्नुतः अथेन्द्रेण शीघ्रास्त्रत्वात् दूरपातित्वाच्च वृषभः वर्षिता कृतः । अथ च तावत् रथो हि षः । रंहणो हि शीघ्रः स मेघः । तथा हि येनेन्द्रेण पुरैव हरिभ्यां प्राप्तेः प्रहारैर्जर्जरीकृत्य वर्षिता कृतो मेघस्तमभ्यर्च । एवमत्र शब्दसारूप्यादसुरसंबन्धाच्च ‘ बर्हणा परिबर्हणा ’ इत्युपपद्यते ।

‘बर्हणा’ इत्यस्य

‘ ततनुष्टिः ’ (८४) इत्यनवगतम् । ‘तितनिषुः’ अयं स्यात् ॥ १८ ॥

यो अस्मै घ्रंस उत वा य ऊधनि सोमं सुनोति भवति द्युमाँ अह । अपाप शक्रस्ततनुष्टिमूहति तनूशुभ्रं मघवा यः कवासखः (ऋ० सं० ५ । ३४ । ३) ॥ घ्रंस इत्यहर्नाम

---

१ ग. वा । ८५ । अर्चा°. २ ग. ज. वचः । सव्य°; च. झ. ट. वचः० वृषभो रथो हि षः । सव्य°. ३ ग. ज. °वस्येन्द्रमार्षम्. ४ ग. ज. ‘ऐन्द्री’ नास्ति. ५ ग. ज. पदै रथं हिं स°; च. पादे रथः हिं स°. ६ च. ज. °युक्तं० वा ‘बलकृतिसंयुक्तं. ७ ग. ज. ‘ परिवृध्या ’ नास्ति. ८ च. प्रहारै°. ९ क. ख. ३ (१८); ग. २१ । ८६; ठ. ड. °स्यात् । इति निरुक्तटीकायां षष्ठाध्याये अष्टादशः खण्डः; इतरेष्वङ्को नास्ति.

ग्रस्यन्तेऽस्मिन्नसा गोरूध उद्धततरं भवत्युपोन्नद्धमिति वा स्नेहानुप्रदानसामान्याद्रात्रिरप्यूध उच्यते स योऽस्मा अहन्यपि वा रात्रौ सोमं सुनोति भवति ह द्योतनवानपोहत्यपोहति शक्रस्तितनिषुं धर्मसंतानादपेतमलंकारिष्णुमयज्वानं तनूशुभ्रं तनूशोभयितारं मघवा यः कवासखो यस्य कपूयाः सखायः ।
यो विध्यद्दिलीबिशस्य दृह्ळा[1] वि शृङ्गिणमभिनच्छुष्णमिन्द्रः ।
नैरविध्यद्दिलाबिलशयस्य दृह्ळानि[2] व्यभिनच्छृङ्गिणं शुष्णमेन्द्रः ॥ १९ ॥[3]

‘ यो अस्मै घ्रंस० उत वा यः[4] ’ । प्राजापत्यस्य[5] संवरणस्यार्षम् । ऐन्द्री[6] । जगती । यो अस्मै इन्द्राय घ्रंसे अहनि अपि वा य ऊधनि रात्रौ सोमं सुनोति अभिषुणोति । नित्यकालमेव यः सोमाभिषवे प्रयतत इत्यर्थः । तस्य किमिति । स एव निश्चयेन द्युमान् द्योतनवान् भवति । अथ पुनरितो[7] यो विपरीतो भवति पूर्वैश्च पूर्वतरैश्च धर्मसंतानात् अनुष्ठितात् अपेतः तमलं कर्मभिरित्येवं वादिनम् अलंकारिष्णुम् अयज्वानम् अयजनशीलम् आत्ममण्डनपरं वा विषयोपभोगपरतया प्रवित्ततितनिषुम् अनेकैः प्रकारैर्यो वित्तानि तनितुमिच्छति तम् अश्रद्दधानं धर्मे शक्रः शक्त इन्द्रः अपोहत्यपोहति । उपसर्गाभ्यासदर्शनादूहतेरप्यभ्यास आदरार्थं कृतः । पुनःपुनरपोहति नाशयतीत्यर्थः । तनूशुभ्रं[8] शरीरशोभयितारम् । ततनुष्टेरेवैतद्विशेषणम् । यश्चान्योऽपि कवासखः कपूयसखो भवति तमप्यपोहति मघवा धनस्वामी इन्द्रः । अवश्यंभावी तस्य हि विनाश इत्यभिप्रायः । केचित्तु कवासखशब्दं तनूशुभ्रविशेषणमेव वर्णयन्ति । इतरो विषयप्रधानोऽपि भूत्वा साधुसंपर्कात्कदाचित्प्रपद्येत[9] । इतरस्त्वसाधुसंपर्कादत्यन्तनष्ट एवेत्यनेनाभिप्रायेण । एवमत्र ‘ ततनुष्टि ’ शब्देन विषयोपभोगप्रधान उच्यते शब्दार्थाविरोधादित्युपपत्तिः ।

‘ ततनुष्टिः ’ …त्यस्य

---

१ छ. त. द. दृल्हा. २ छ. त. द. न. भ. दृल्हानि. ३ क. ख. ४ (१९); ॐ. त. २२; द. ४. ४ घ. झ. ट. यः० कवासखः । प्रा°; च. ठ. ड. यः कवासख इति सर्वा ऋग्दीयते. ५ च. इति प्राजा°. ६ ग. ‘ऐन्द्री जगती’ नास्ति. ७ ग. ज. पुनरतो. ८ क. ख. °शुभ्रं वि°; च. °शुभ्रं वि° भ्र. ९ ग. ज. °त्यमत्यापद्येत.

‘ ग्रंस इत्यहर्नाम । ग्रस्यन्तेऽस्मिन्रसाः ’ सूर्येण । ‘ गोरूव उद्धततरम् ’ इति शब्दसारूप्यप्रसक्तम् । तध्द्यन्येभ्योऽङ्गेभ्यः ‘ उद्धततरं भवति ’ । ‘ उपोन्नद्धमिति वा ’ । तद्धि विज्ञायते केनचिदुपश्लिष्य गोरुदरे नद्धमिति[1] । तत्सामान्यात् ‘ रात्रिरप्यूध उच्यते ’ । सापि ह्यवश्यायानोषधिवनस्पतिस्नेहकान् दधाति ।

‘ इलीबिशस्य ’ इलस्य

‘ इलीबिशः ’ (८५) इत्येतदेकपदमनवगतम् । ‘ इलाबिलशयः[2] ’ इत्यवगमः । ‘मेघः’ अभिधेयः । स हि इलाहेतोरु[3]दकस्यात्मीयानि निर्गमनबिलानि[4] संरुध्य शेते । तस्यैव वा बिलेष्विलाहेतुरुदकं[5] शेत इति इलीबिशः[6] । ‘ न्याविध्यदिलीबिशस्य[7] दृह्ळा वि शृङ्गिणमभिनच्छुष्णमिन्द्रः । यावत्तरो मघवन्यावदोजो वज्रेण शत्रुमवधीः पृतन्युम् ’ (ऋ० सं० १ । ३३ । १२) ॥ हिरण्यस्तूपस्यार्षम् । ऐन्द्री । त्रिष्टुप्[8] । गोसवविवधयोर्निष्केवल्ये शस्यते (आश्व० श्रौ० ९ । ८) । न्यविध्यत्[9] निरताडयत् इलीबिशस्य[10] मेघस्य दृह्ळानि[11] दृढानि दुर्भेदानि उदकसंरोधक्षमाणि स्थानानि । न च केवलमेताडयदेव[12] । किं तर्हि । वि शृङ्गिणमभिनत् शृङ्गिणं शिखरवन्तं दीप्तिमन्तं वा विद्युद्भिः शुष्णं बलवन्तं मेघम्[13] । इन्द्रः एवं स्तूयमानः प्रत्यक्षीभूतः । प्रत्यक्षकृतः उत्तरोऽर्धर्चः । हे मघवन् यावत्तरः यावद्बलमेतस्मिन्मेघेऽस्ति तावदेनं जहि । यावच्च तव व्यथनसमर्थम् ओजो बलमस्ति या ते शक्तिस्तयैनं वज्रेण शत्रुं शातयितव्यम् अवधीः ।

---

१ ग. ज. नद्धं भवति. २ क. ख. ट. °बिशस्येत्ये°; घ. च. झ. ठ. ड. °विशस्येत्ये°. ३ घ. झ. °विलश°; ठ. इळाबिळशं°; ड. इळाबिल°. ४ च. ठ. ड. इळाहे°. ५ घ. झ. °नविलानि. ६ घ. झ. विले°; ठ. ड. बिलेष्विळाहे°. ७ ग. बिशः।८। न्या°; घ. झ. ट. ड. °विशः. ८ ग. ज. °बिशस्य। हिर°; घ. झ. ट. °विशस्य० मवधीः पृतन्युम् । हिर°; च. ठ. ड. °दिलीविशस्य (ठ. ड. °दिळी वि°) दृह्ळेत्यादि सर्वा ऋग्दीयते. ९ ग. ज. ‘ ऐन्द्री त्रिष्टुप् ’ नास्ति. १० क. ख. ग. ज. न्यावि°. ११ घ. झ. ट. ठ. ड. °विशस्य. १२ क. ख. च. दृढा; ग. ज. ‘ दृळ्हा ’ नास्ति; घ. झ. दृल्हा. १३ क. ख. घ. झ. ट. ठ. ड. केवलमेतावदेव. १४ क. ख. घ. झ. ट. ड. मेवम् इन्द्र°; ग. च. ज. मेघमिन्द्र°.

जहीत्यर्थः । पृतन्युं पृतनामिच्छन्तम् । एवमत्र 'इळीबिशो[1] मेघः' शब्दसारूप्यादर्थाविरोधाच्च ।

'कियेधाः' (८६) इत्यनवगतम् । 'कियद्धाः क्रममाणधा[2] वा' इत्यवगमः । कियदप्युदकमपरिमाणं धाः धारयतीति कियद्धा मेघः । क्रममाणो वा धारयतीति क्रममाणधा मेघ एव[3] ॥ १९ ॥

'कियेधा' इत्यस्य व्युत्पत्तिः

अस्मा इदु प्र भरा तूतुजानो वृत्राय वज्रमीशानः कियेधाः । गोर्न पर्व वि रदा तिरश्चेष्यन्नर्णांस्यपां चरध्यै (ऋ० सं० १ । ६१ । १२) ॥ अस्मै प्रहर तूर्णं त्वरमाणो वृत्राय वज्रमीशानः कियेधाः कियद्धा इति वा क्रममाणधा इति वा गोरिव पर्वाणि विरद मेघस्येष्यन्नर्णांस्यपां चरणाय भृमिश्चाम्यतेः । भृमिरस्यृषिकृन्मर्त्यानामित्यपि निगमो भवति विष्पितो विप्राप्तः । पारं नो अस्य विष्पितस्य पर्षन्नित्यपि निगमो भवति[4] ॥ २० ॥

अस्मा इदु प्र भरा[5] । नोधा नाम गौतमस्तस्यार्षम् । त्रिष्टुप्[6] । ऐन्द्री । आहीनिकेष्वहःस्वहीनसूक्ते विनियुक्ता । (आश्व० श्रौ० ७ । ४) । हे इन्द्र यः[7] एष वृत्रः कियदप्युदकमपरिमाणं धारयति क्रममाणो वा धारयति अस्मै त्वं तूतुजानः त्वरमाणो वज्रं प्रभर । ईशानः ईश्वरो यस्मात्त्वमस्माकं तस्मादेवमुच्यसे । किंच । प्रहृत्य[8] वज्रं वज्रप्रहारसंमूढस्यास्य मेघस्य गोर्न पर्व गोरिव पर्वाणि विरद विदारय । यथा गोविकर्ता गोः पर्वाणि विरदेत् विच्छिन्द्यात्[10] एवं त्वमप्येतं मेघमवयवशो विरद विच्छिन्द्धि । कथं च पुनर्विरदेति । तिरश्चा वज्रेण तिर्यग्गामिना । केन पुनरर्थेन विरदेति । इष्यन्नर्णांसि उदकानीच्छन् चरध्यै चरणाय अपां प्रजाभ्यो दातुम् । एवमस्माद्विशकलीकृतादापो निश्चरिष्यन्तीत्यनेनार्थेन विरद । एवमत्र 'कियेधाः मेघः' शब्दसारूप्यादर्थाविरोधाच्च ।

व्युत्पत्तिश्च

---

१ घ. झ. ट. ठ ड. 'विशो. २ क. ख. झ. 'धाः' नास्ति. ३ क. ख. ४ (१९); ग. ८८/२२; च. ५; ठ. ड. 'एव । इति निरुक्तटीकायां षष्ठाध्याये एकोनविंशतिः खण्डः; इतरेष्वङ्को नास्ति. ४ क. ख. ५ (२०); छ. त. २३; द. ५. ५ घ. झ. ट. भरा तू० चरध्यै । नोधा°; च. सर्वा ऋक् पठ्यते; ठ. ड. भरेति । नोधा. ६ ग. ज. 'त्रिष्टुप् । ऐन्द्री' नास्ति. ७ क. ख. घ. झ. ट. ठ. ड. 'यः' नास्ति. ८ ठ. ड. प्रभर प्रहर. ९ च. °प्रहर°. १० ग. ज. 'वि' नास्ति.

'कियेधाः' इत्यस्येन्द्रार्थे ऋचोऽन्योऽर्थः

'कियेधा इन्द्रः' इत्येवमेके मन्यन्ते । स हि यदपि न ज्ञायते कियत्परिमाणमेतद्बलमिति तदपि धारयति । क्रममाणो वा शत्रुबलं धारयतीति कियेधाः । एवं सतीयं योजना । यस्मादीशानस्त्वं कियेधाश्च तस्मात्प्रहर वज्रमिति ।

'भृमिः' इत्यस्य

'भूमिः' (८७) इत्यनवगतम् । 'भ्रमणम्' इत्यवगमः । 'भ्राम्यतेः' इति निर्वचनम् । 'अग्निः' अभिधेयः[1] । 'इमामग्ने शरणिं[2] मीमृषो न इममध्वानं यमगाम दूरात् । आपिः पिता प्रमतिः सोम्यानां भृमिरस्यृषिकृन्मर्त्यानाम्' (ऋ० सं० १ । ३१ । १६) ॥ हिरण्यस्तूपस्यार्षम् । प्रातरनुवाकाश्विनयोः शस्यते (आश्व० श्रौ० ४ । १३) । हे भगवन्नग्ने इमां शरणिं[3] मरणलक्षणां हिंसाम् इमां संसृतिं वा मीमृषो नः मार्जयस्व नाशयस्व नः । कतमां शरणिम् । इममध्वानं यमेतं संसाराध्वानम् अगाम[4] गतवन्तो वयममुष्माल्लोकादिमं लोकम् । अस्मास्वेतां संसारहिंसामेतां वा संसारसृतिमेतम् आजवं जैवीभावं[5] त्वमस्माकं मार्जयस्व । कस्मात्पुनरेवमुच्यसे । इतो यस्मात् आपिः त्वमस्माकम् आप्तः । अथवा व्यापयिता कृत्स्नस्य जगतो महिम्ना । पिता च रक्षिता सोम्यानां सोमसंपादिनां मनुष्याणाम् । प्रमतिश्च प्रकृष्टमतिः भृमिश्च त्वमेव संसारे भ्रामयिता । पञ्चाग्निविद्योक्तेन प्रक्रमेण त्वदधीन एव संसारो मोक्षश्च । ऋषिकृच्च दर्शनकर्तासि त्वम् । त्वदधीनमेव दर्शनं मर्त्यानां मनुष्याणाम् । सर्वविज्ञानप्रकाशेनानुगृह्यास्मान्मोचयस्वास्मात्संसारादित्यभिप्रायः । देवयानेनैव पथा गमय मा पितृयाणेनेति[6] । एवमत्र 'भूमिः अग्निः' अर्थाविरोधात् ।

---

१ ग. °धेयः । ८९ । इमा°. २ ग. ज. शरणिं । हिर°; घ. झ. ट. शरणिं मीमृ० स्यृषिकृन्मर्त्यानाम् । हिर°. ३ ग. ज. शरणिमिमां स्मृतिं वा मी°. ४ ग. ज. आगाम. ५ च. जीवी° ज. ६ ग. ज. घ. झ. ट. ठ. ड. °याणेनेति.

'विष्पितः' इत्यस्य

' विष्पितः ' (८८) इत्यनवगतम् । विस्तीर्ण इतश्चेतश्च सर्वतो यः प्राप्तः स विष्पितः । ' इमे दिवो अनिमिषा पृथिव्याश्चिकित्वांसो अचेतसं नयन्ति । प्रव्राजे चिन्नद्यो गाधमस्ति पारं नो अस्य विष्पितस्य पर्षन् ' (ऋ० सं० ७ । ६० । ७) ॥ ' यदद्य सूर्य ब्रवोऽनागाः ' इत्येतस्मिन् सूक्ते (ऋ० सं० ७ । ६०) । अस्य पुनः सूक्तस्य प्रथमा सौरीति प्रतिजज्ञे शौनकोऽन्याः सर्वा मैत्रावरुण्य इति । ' इमे ' इति द्वयोरेव मित्रावरुणयोः पूजनार्थे बहुवचनम् । अर्यमा वा तृतीयः स्यात् । असावपि ह्यस्मिन् सूक्ते श्रूयते । शौनकाभिप्रायस्त्वेवं सति परीक्ष्यः । इमे मित्रावरुणार्यमाणो दिव एत्य अनिमिषाः आदरवन्तः पृथिव्याः । पृथिवीलोकादित्यर्थः । चिकित्वांसः सुकृतदुष्कृतानि कर्माणि प्राणिनां जानन्तः अचेतसम् अचेतयमानं प्राणिनं कर्मानुरूपेणामुं लोकं नयन्ति । यत एवमतस्तानहं ब्रवीमि । प्रव्राजे प्रकृष्टे एतस्मिन् व्रजने मरणाख्ये मृत्युकाले उपस्थिते यदि गाधं संसारगाहनसमर्थं कर्म विज्ञानं वा अस्त्यस्माकं ततोऽस्य विष्पितस्य विप्राप्तस्य संसाराध्वनो नद्या इव पारं पर्षन् । पारयन्त्वित्यर्थः । एवमत्र शब्दसारूप्यादर्थाविरोधाच्च ' विष्पितो विप्राप्तः' संसाराध्वेत्युपपद्यते ।

' तुरीपम् ' (८९) इत्यनवगतम् । ' तूर्णापि ' इत्यवगमः । ' उदकम् ' ईत्यभिधेयम् । तद्धि तूर्णमाप्नोति ॥ २० ॥

तन्नस्तुरीपमद्भुतं पुरु वारं पुरु त्मना । त्वष्टा पोषाय वि ष्यतु राये नाभा नो अस्मयुः (ऋ० सं० १ । १४२ । १०)॥

तन्नस्तूर्णापि महत्संभृतमात्मना त्वष्टा धनस्य पोषाय विष्यत्वि-

---

१ क. ख. °धात् विशेष्यते । विष्पित°; च. °धात् । विशिष्यते विष्पित°. २ ग. °ष्पितः । २३ । इमे°. ३ ग. ज. अनिमिषा । यदद्य°; घ. झ. ट. अनिमि० तस्य पर्षन् । यदद्य°. ४ क. ख. घ. झ. ट. ठ. ड पूजार्थे. ५ ग. च. ज. °दुःकृ°. ६ च. प्राणिनां. ७ ठ. ड. °द्यते । २० । इति निरुक्तटीकायां षष्ठाध्याये विंशतिः खण्डः । तुरी°. ८ क. ख. घ. झ. ट. ठ. ड. 'इति' नास्ति. ९ क. ख. ५ (२०); ग. २४ । ११; इतरेष्वङ्को नास्ति.

त्यस्मयुरस्मान् कामयमानो रास्पिनो रास्पी रपतेर्वा रसतेर्वा । रास्पिनस्यायोरित्यपि निगमो भवत्यृ[1]ञ्जतिः प्रसाधनकर्मा[2] । आ व ऋञ्जस ऊर्जां व्युष्टिष्वित्यपि भवत्यृजुरित्यप्यस्य भवति । ऋजनीती नो वरुण इत्यपि निगमो भवति प्रतद्वसू प्राप्तवसू[3] । हरी इन्द्र प्रतद्वसू अभि स्वरेत्यपि निगमो भवति ॥ २१ ॥

'तुरीपम्' इत्यस्य

तन्नस्तु[4]रीपमद्भुतं पुरुवारमिति निगमः । दीर्घतमस आर्षम्[5] । आप्रीसूक्ते । तन्नस्तुरीपं तदस्माकं तुरीपमुदकम् अद्भुतं च । महत् इत्यर्थः । ' अद्भुतः बर्हिष्ठः ' इति महन्नामसु पठितम् (निघ० ३ । ३) । पुरु वारं च बहु देशान्तरमावृणोत्युदकम् । पुरु त्मना बहु[6] आत्मना । यदेवंलक्षणमुदकं तदस्माकं नाभा नाभौ मध्ये त्वष्टा विष्यतु विमुञ्चतु वर्षभावेन अस्मयुः अस्माननुग्रहीतुं कामयमानो राये पोषाय । धनपोषायेत्यर्थः । वर्षे हि सति पशवः पुष्यन्ति । अथवा ' नाभानः ' इत्येतं[7]त्त्वष्टुरेव विशेषणं स्यात् । ' नाभानः ' न अदीप्यमानः । किं तर्हि । दीप्यमान एव विष्यतु । एवमत्र माध्यमिकस्त्वष्टेति विष्यत्वित्यनेन संबन्धात् ' तुरीपमुदकम् ' इत्युपपद्यते ।

' रा[8]स्पी ' (९०) इत्यनवगतम् । ' रा[9]पी ' इति वा स्यात् ' रासी ' इति वा । ' रपतेर्वा ' शब्दा[10]र्थस्य ' रसतेर्वा ' शब्दार्थस्यैव । रपणशीलो वा रसनशीलो वा यः स रा[11]स्पी । ' उत त्या मे यशसा[12]

१ त. °वति । ऋज°. २ छ. त. द. °कर्म ऋजुरित्य°. ३ क. ख. ६ (२१); छ. त. २४; द. ६. ४ घ. झ. ट. °रीपमद्भुतं ० नाभा नो अस्मयुः । दीर्घ°; ठ. ड. तुरीपमिति । दीर्घ°. ५ क. ख. घ. झ. ट. ठ. ड. आर्षम् । त्वाष्ट्री । अनुष्टुप् । आ°; च. आर्षम् । आ° त्वाष्ट्री । अनुष्टुप्. ६ ग. ज. ' बहु आत्मना ' नास्ति. ७ घ. झ. ट. ठ. ड. इत्येवं त्व°. ८ क. ख. घ. झ. ट. ठ. ड. रास्पिन इत्यन°. ९ घ. झ. ट. ठ ड. रास्पीति. १० ग. ज. 'शब्दार्थस्य रसतेर्वा' नास्ति; च. रपतेर्वा शब्दा° शब्दार्थस्य रसतेर्वा. ११ ग. रासी । १२ । उत°.

२८ १२ ग. ज. यशसा । कक्षी°; घ. झ. ट. यशसा० रास्पिनस्यायोः । कक्षी°.

श्वेतनायै व्यन्ता पान्तौशिजो हुवध्यै । प्र वो नपातमपां कृणुध्वं प्र मातरा रास्पिनस्यायोः ' (ऋ० सं० १ । १२२ । ४) ॥ कक्षीवत आर्षम्[1] । वैश्वदेवे सूक्ते । उत त्यौ अपि तौ अश्विनौ मे मम यशसा हविर्लक्षणेन धनेन तर्प्यमाणौ श्वेतनाया उषसः काले प्राते व्यन्ता पान्ता वीतां भक्षयेतां पुरोडाशं पिबेतां सोमम् । यतो ब्रवीमि । हे औशिजो मेधाविन ऋत्विज आह्वयध्वं तावश्विनौ । किंच । ब्रवीमि वः । कृणुध्वमपां नपातम् अप्येतास्मिन् कर्मणि भागिनम् । किंच । प्र मातरौ द्यावापृथिव्यावपि सर्वभूतनिर्मात्र्यौ कृणुतैव एतस्मिन् कर्मणि भागिन्यावित्येतच्च वः प्रब्रवीमि[2] । कं च पुनरर्थं[3] पुरस्कृत्यैतकुरुध्वमिति । रास्पिनस्य आयोः । रपणे-[4]शीलस्य वा रसनशीलस्य वा शब्दकारिणो वर्षभूतस्योदकस्य प्राप्त्यर्थम् । अथवा । स्तोतुः पुत्रस्य प्राप्त्यर्थम् । ' आयवः ' इति हि[5] मनुष्यनाम । (निघ० २ । ३ । १७) । एवमत्र ' रास्पि[6] 'शब्देनोदकं स्तोता वाभिधीयते शब्दसारूप्यादर्थाविरोधाच्च ।

' रास्पी ' इत्यस्य

' ऋञ्जतिः (९१) प्रसाधनकर्मा ' । ' भाऋजीकः ' इत्यनेन गतार्थतामस्य मन्यमानो भाष्यकारो निगमं नाधीते । केचित्त्वत्रैतं शेषमधीयते[7] । ' दूतं वो विश्ववेदसं हव्यवाहममर्त्यम् । यजिष्ठमृञ्जसे गिरा ' (ऋ० सं० ४ । ८ । १) ॥ वामदेवस्यार्षम्[8] । प्रातरनुवाकाश्विनयोः शस्यते (आश्व० श्रौ० ४ । १३) । ' वः ' इत्येतस्य ' त्वम् ' इति विपरिणामः । हे यजमान त्वं दूतं विश्ववेदसं सर्वप्रज्ञानं हव्यवाहं हविषां वोढारम् अमर्त्यम् अमरणधर्माणं याजिष्ठं यष्टृतमम् ऋञ्जसे प्रसाधयसि गिरा । स्तुत्येत्यर्थः । एवमत्र ' ऋञ्जतिः प्रसाधनकर्मा ' । दूतसंबन्धाच्च ।

ऋञ्जसे

---

१ क. ख. घ. झ. ट. आर्षम् । त्रिष्टुप् । वै°; च आर्षम् । ^ वै° त्रिष्टुप्. २ क. ख. घ. झ. ट. ठ. ड. प्रब्रवीमि. ३ क. ख. घ. झ. ट. ठ. ड. ' प्र ' नास्ति. ४ च. रपनशी°ण. ५ क. ख. घ. झ. ट. ठ. ड. 'हि' नास्ति. ६ क. ख. घ. झ. ट. ठ. ड. रास्पिनशब्दे°. ७ ग. °यते। ९३ । दूतं°. ८ ग. ज. °वेदसं । वाम°; घ. झ. ट. °वेदसं० मृञ्जसे गिरा । वाम°. ९ क. ख. घ. झ. ट. ठ. ड. °स्यार्षम् । गायत्री । आग्नेयी । प्रात°; च. °स्यार्षम् । ^ प्रात° गायत्र्याग्नेयी. २१

'ऋजुः (९२) इत्यप्यस्य' एव ऋञ्जतेः 'भवति'।

ऋजुः — 'ऋजुनीती नो वरुणो मित्रो नयतु विद्वान्। अर्यमा देवैः सजोषाः' (ऋ० सं० १। ९०। १)॥ गोतमस्यार्षम्। वैश्वदेवसूक्ते। गवामयनस्य द्वितीयेऽहनि शस्यते मैत्रावरुणस्य शस्त्रे (आश्व० श्रौ० ७। २)। ऋजुनीती ऋजुनयनः ऋजुप्रज्ञो वा वरुणः अस्मानितो लोकादमुं लोकं कर्मफलप्राप्त्यर्थं नयतु। मित्रश्च विद्वान्नयतु। अर्यमा देवैः सह प्रीयमाणो नयतु। एवमत्र 'ऋजु' शब्देन प्रसिद्धं नयनं प्रसिद्धा वा मतिरुच्यते।

'प्रतद्वसू' (९३) इत्यनवगतम्। 'प्राप्तवसू' इत्यवगमः। 'अश्वौ' अभिधेयौ।

प्रतद्वसू — 'इह त्या सधमाद्या युजानः सोमपीतये। हरी इन्द्र प्रतद्वसू अभि स्वर' (ऋ० सं० ८। १३। २७)॥ नारदस्येयमार्षम्। उष्णिक्। महाव्रते औष्णिही तृचाशीतिस्तस्यां शस्यते (ऐ० आ० ५। २। ५)। हे इन्द्र इह कर्मणि त्या तावश्वौ हरी प्रतद्वसू प्राप्तवसू प्राप्तधनौ। तयोर्हि ऋजीषं धानाश्च धनम्। स हि ताभ्यां यज्ञे भागः प्राप्तः। सधमाद्या सहमदनौ युंजानो युक्त्वा रथे ततः सोमपीतये सोमपानार्थम् अभिस्वर अभ्यागच्छास्मान् प्रति। एवमत्र 'हरी' इत्यनेन संबन्धात् 'प्रतद्वसू प्राप्तवसू' अश्वावित्युपपद्यते।

'हिनोत' (९४) इत्यनवगतम्। 'प्रहिणुत' इत्यवगमः॥ २१॥

हिनोता नो अध्वरं देवयज्या हिनोत ब्रह्म सनये धनानाम्। ऋतस्य योगे वि ष्यध्वमूधः श्रुष्टीवरीर्भूतनास्मभ्यमापः (ऋ० सं० १०। ३०। ११)॥ प्रहिणुत नोऽध्वरं देवयज्यायै प्रहिणुत ब्रह्म

---

१ ग. ज. नः। गोत°; घ. झ. ट. नः० देवैः सजोषाः। गोत°. २ क. ख. घ. झ. ट. ठ. ड. °सूक्ते। गायत्री। गवा°; च. सूक्ते। ᵛ गवा° गायत्री. ३ ग. °धेयौ। ९४ ॥ इह°. ४ ग. ज. °माद्या। नार°; घ. झ. ट. °माद्या युजानः सो० प्रतद्वसू अभि स्वर। नार°. ५ च. युंजानो. ६ घ. झ. ट. ठ. ड. अस्मान्प्रत्यभ्यागच्छ। एव°. ७ ठ. ड. °यज्ञे। इति निरुक्तटीकायां षष्ठाध्याये एकविंशतिः खण्डः। हिनो°. ८ क. ख. ६ (२१); ग. २५ (९५); इतरेष्वङ्को नास्ति.

धनस्य सननाय ऋतस्य योगे यज्ञस्य योगे याज्ञे शकट इति वा शकटं शकृदितं[1] भवति शनकैस्तकतीति वा शब्देन तकतीति वा । श्रुष्टीवरी[2]र्भूतनास्मभ्यमापः । सुखवत्यो[3] भवतास्मभ्यमापः । चोष्कूयमाण इन्द्र भूरि वामम् । ददादिन्द्र बहु वननीयम् । एधमानद्विळु[4]भयस्य राजा चोष्कूयते विश इन्द्रो मनुष्यान् । व्युदस्यत्येधमानानहर्द्वेष्टृ्यसुन्वतः सुन्वतोऽभ्यादधात्युभयस्य राजा दिव्यस्य च पार्थिवस्य च चोष्कूयमाण इति चोष्कूयते-श्चर्करीतवृत्तं सुमत्स्वयमित्यर्थः । उप प्रागात्सुमन्मेऽधायि मन्म । उपप्रैतु मां[5] स्वयं यन्मे मनोऽध्यायि यज्ञेनेत्याश्वमेधिको मन्त्रो दिविष्टिषु दिव एषणेषु[6] । स्थूरं राधः शताश्वं कुरुङ्गस्य दिविष्टिषु । स्थूरः समाश्रितमात्रो महान् भवत्यणुरनु स्थवीयांसमुपसर्गो[7] लुप्तनामकरणो यथा संप्रति कुरुङ्गो राजा बभूव कुरुगमनाद्वा कुलगमनाद्वा कुरुः कृन्ततेः क्रूरमित्यप्यस्य भवति कुलं कुष्णातेर्विकुषितं भवति दूतो व्याख्यातो जिन्वतिः प्रीतिकर्मा । भूमिं पर्जन्या जिन्वन्ति दिवं जिन्वन्त्यग्नय इत्यपि निगमो भवति ॥ २२ ॥[8]

इति षष्ठाध्यायस्य चतुर्थः पादः ॥[9]

हिनोता नो अध्वरम्[10] । कवषस्येयमार्षम् । अपोनप्त्रीयास्वृक्षु[11] शस्यते (आश्व० श्रौ० ५ । १) । हे ऋत्विजो हिनोत

'हिनोत' प्रहिणुत प्रगमयत प्रोत्सर्पयत एतम् अध्वरं यज्ञं देवयजनार्थम् । किंच । प्रहिणुत ब्रह्म स्तुत्याख्यं यथाशास्त्रदृष्टक्रमेण सनये लब्धये अस्माकं धनानाम् । किंच । ऋतस्य

---

१ त. सँ(श)कृद्दिटं (दितं); द. शकृदटं. २ छ. त. द. सुखवतीर्भूत°. ३ छ. त. द. 'सुखवत्यो भवतास्मभ्यमापः' नास्ति. ४ क. ख. छ. त. द. °द्विलुभ°. ५ छ. त. द. मां यन्मम मनो°. ६ क. ख. द. 'णेषु । ७ । स्थूरं°; छ. त. 'णेषु । २५ । स्थूरं. ७ छ. °सर्गो लुप्तो (प्त) नाम°; त. सर्ग्र (र्गो) लुप्तो (प्त) नाम°; द. °सर्गलुप्तो नाम°. ८ क. ख. ८ (२२); छ. त. २६; द. ८; ठ. अङ्को नास्ति. ९ ड. थ. ध. 'इति०० पादः' नास्ति. १० क. ख. घ. झ. ट. °ध्वरं० र्भूतनास्मभ्यमापः । कव°; ठ. ड. हिनोता न इति । कव°. ११ ग. ज. आपोनप्त्री-स्वृक्षु; च. अपोनाप्त्रियाष्वृक्षु° स्वृ.

यज्ञस्य योगे संयोगे यदेतत् ऊधः इव सोमपूर्णमधिषवणचर्म वर्तते । अथवा । योगसंबन्धाच्छकटं योगः । तद्धि तर्हि युज्यते । तेनाधिषवणचर्मणा ऊधसेवाधस्तादेवस्थितेनेति मन्यमानो भाष्यकारो ब्रवीति । ' याज्ञे शकटे इति ' । यदेतद्यज्ञशकटस्याधस्तादुपरि वाधिषवणचर्म एतत् विष्यध्वं विमुञ्चध्वम् । ग्रहचमसस्थाल्यादिषु यो निषेकः सोमस्यैतद्विमोचनमधिषवणचर्मोधसः । तद्धि सोम उत्सिच्यमाने श्लथीभवति यथेतरद्गोरूधो दुह्यमानायां गवि । एवमृत्विज उक्त्वाधुना ता एव सोमसंमिश्रा अपो ब्रवीति । यूयमपि हे आप एभिर्ऋत्विग्भिरुत्सिच्यमानाः श्रुष्टीवरीः सुखवत्यो भूतन भवत अस्मभ्यम् । एवमत्र 'प्र'शब्देनार्थस्य सुतरां प्रकटता भवतीति भाष्यकारेण 'प्र'शब्दोऽध्याहृतः । 'अध्वरम्' इत्यनेन संबन्धाद्धिनोतेर्गत्यर्थत्वमुपपद्यते । प्रहिणुतेत्याप उच्यन्त इति केचित् ।

' शकटं शकृदितं भवति ' । यदानड्वान्युक्तः शकृन्मुञ्चति तेन तदेति । ' शनकैस्तकतीति वा ' । तद्धि भाराक्रान्तं शनकैर्गच्छति । ' शब्देन तकतीति वा ' । तद्धि शब्देन गच्छति ।

' चोष्कूयमाणः (९५) चोष्कूयते (९६) ' इत्येते अनवगते । धातुरेवायमप्रतीतः । एते सुबन्ततिङन्ते । तदनयोः पूर्वं सुबन्तमुत्तरं तिङन्तं दानार्थे वर्तमानस्य । चोष्कूयमाण इन्द्र भूरीति निगममुक्त्वा ' ददादिन्द्र ' इति हि पूर्वस्य निर्वचनं चकार भाष्यकारः । व्युदसने वर्तमानस्योत्तरस्य ' चोष्कूयते विश इन्द्रो मनुष्यान् ' इति निगममुक्त्वा ' चोष्कूयते ' इत्यस्य शब्दस्य ' व्युदस्यति ' इति निर्वचनमाह भाष्यकारः । उभयत्रापि तु चोष्कूयतिशब्दश्चर्करीतवृत्तेन द्रष्टव्यः ।

---

१ च. संयोगे; ठ. ड. 'संयोगे' नास्ति. २ घ. झ. ट. ठ. ड. °यदेनदूध इव°. ३ क. ख. घ. झ. ट. ठ. ड. तत्र; च. तर्हि ञ. ४ च. °धस्तादेव स्थि°. ५ ग. ज. °तरं गोरू°; च. तरं गोरू° रत्. ६ ग. ज. 'ताः' नास्ति; च. एताः ७ क. ख. घ. झ. ट. ठ. ड. °तेनेतामिति. ८ ग. ज. ' एते ' नास्ति; च. °तीतः । सु° एते.

‘ चोष्कूयमाण इन्द्र भूरि वामम् ’ इत्यस्य शेषः[1] । ‘ नि सर्वसेन इषुधीँरसक्त समर्यो गा अजति यस्य वष्टि ।

‘चोष्कूयमाणः’ चोष्कूयमाण इन्द्र भूरि वामं मा पणिर्भूरस्मदधि प्रवृद्ध[3] ’ (ऋ० सं० १ । ३३ । ३) ॥

हिरण्यस्तूपस्यार्षम्[4] । उद्भिद्बलभिदोर्निष्केवल्ये शस्यते । न्यसक्त न्यबध्नात् इषुधीन् तूणान् पृष्ठे रथस्य सर्वसेनः समग्रसेन इन्द्रः । एवं तूणान् संनह्य बद्ध्वा गोधाङ्गुलित्रवान् भूत्वा समर्यो गा अजति । इषुभिर्मेघांश्छिन्दन् समजति समस्ताः क्षिपति गा अपः अर्य ईश्वर इन्द्रः । कस्मै समजति । यस्य वष्टि । यस्य राज्ञो देशे कुटुम्बिनो वा क्षेत्रे कामयते क्षेप्तुं तस्यैव क्षिपति । वर्षं प्रवर्तयत इत्यर्थः । एवं स्तूयमानः स इन्द्रः प्रत्यक्षीभूतः । यतः प्रत्यक्षकृत उत्तरोऽर्धर्चः । हे इन्द्र चोष्कूयमाणस्त्वं ददत्[5] एतदुक्तं जनेभ्यो भूरि बहु वामं वननीयं सस्यसंपत्करं शृणु दत्कुरुष्व । मा पणिर्भूः । मा वणिक्शीलोऽस्मान् प्रति मन्दोदकदाता कृपणो भूः । किं तर्हि । प्रवृद्धोदक[6] उन्नतचित्तोऽस्मान् प्रति बहूदकदाता भव । एवमत्र ‘ मा पणिर्भूर्भूरि[7] वामम् ’ इत्येभिः पदैः संबन्धात् ‘ चोष्कूयमाणः ’ इत्यस्य ‘ ददत् ’ इत्येवमर्थ उपपद्यते । एवमत्र दानार्थश्चोष्कूयतिः ।

‘ एधमानद्विळ्ळुभयस्य[8] ’ इत्यत्र व्युदसनार्थः । अस्य शेषः[9] । ‘ शृण्वे वीर उग्रमुग्रं[10] दमायन्नन्यमन्यमतिनेनीयमानः ।

‘चोष्कूयते’ एधमानद्विळ्ळुभयस्य[11] राजा चोष्कूयते विश इन्द्रो मनुष्यान् ’ (ऋ० सं० ६ । ४७ । १६) ॥

गर्गस्य बार्हस्पत्यस्येयमार्षम्[12] । ‘ दमायन् ’ इत्येकं पदम् । शृण्वे वीरः ।

---

१ ग. शेषः । ९६ । नि सर्व°. २ ग. ज. इषुधीन् । हिर°; व. झ. ट. इषुधीरसक्त०रस्मदधि प्रवृद्धः । हिर°. ३ क. ख. घ. झ. ट. च. प्रवृद्धः°. ४ क. ख. घ. झ. ट. ठ. ड. °स्यार्षम् । ऐन्द्री । त्रिष्टुप् । उद्भि°; च. °स्यार्षम् ।४ उद्भि-०ऐन्द्री । त्रिष्टुप् ।५ क. ख. घ. झ. ट. ठ. ड. दद्दुदकं ज°; च. दददेतदुक्तं ज° दुदकं. ६ ग. ज. प्रवृद्धो दक्ष उन्न°. ७ ग. च. ज. पणिर्भूरि. ८ क. ख. ग. च. ज. व. झ. °द्विलुभ°. ९ ग. शेषः । ९७ । शृण्वे°. १० ग. ज. °मुग्रं । शंयोर्बार्ह°; घ. झ. ट. °मुग्रं०इन्द्रो मनुष्यान् । गर्ग°. ११ क. ख. °द्विलुभ°; च. °द्विडुभ°. १२ क. ख. घ. झ. ट. ठ. ड. °मार्षम् । त्रिष्टुप् । ऐन्द्री । दमा°; च. मार्षम् । ४ दमा० त्रिष्टुप् । ऐन्द्री ।

अश्रौषमहं वीरमिन्द्रम् उग्रम् उद्गूर्णवज्रम् । आदरार्थो द्विरभ्यासः । आदरे चार्थभूयस्त्वम् । ‘ अभ्यासे भूयांसमर्थं मन्यन्ते[1] ’ (निरु० १० । ४२ ।) इति हि वक्ष्यति । अथवा । उग्रं शत्रुं प्रत्युद्गूर्णवज्रं दमायन् दमयितारं शत्रूणाम् । कथं पुनरश्रौषमिति । अन्यमन्यं देवताविशेषमतिशायेन स्वाभीष्टेनैव कामेन तुष्टूषया अमुष्मात्सु[2]तात्कामान् प्राप्स्यथेत्येवं पुनः पुनर्निर्णी[3]यमानः । किंलक्षणं पुनर्वीरमश्रौषमिति । एधमानद्विट् । एधमानान् दीप्यमानानपि द्वेष्टि असुन्वतः सोमाभिषवमकुर्वाणान् । अयज्वन इत्यर्थः। अत एवं वैपरीत्येन ‘ सुन्वतोऽभ्यादधाति ’ इत्यध्याजहार भाष्यकारः । क्व पुनरादधाति । ‘ सुकृतस्य लोके ’ इति सामर्थ्याद्गम्यते । ये हि सुन्वते त इष्टा इन्द्रस्य ये न सुन्वन्ति ते द्वेष्या इत्यभिप्रायः । उभयस्य राजा दिव्यस्य च धनस्येश्वरो मानुषस्य च । किंच । चोष्कूयते व्युदस्यति यो विशः एधमानानसुन्वत इ[4]तरांश्च सुन्वतो[5] मनुष्यानादधाति सुकृतलोक इति । एवमत्र ‘ एधमानद्विट् ’ इत्यनेन संबन्धात् चोष्कूयतिः व्युदसनार्थ उपपद्यते ।

‘ सुमत् ’ (९७) इत्यनवगतम् । ‘ स्वयम् ’ इत्यवगमः[6] । ‘ उप [7]प्रागात्सुमन्मेऽधायि मन्म देवानामाशा उप वीतपृष्ठः । अन्वेनं विप्रा ऋषयो मदन्ति देवानां पुष्टे चकृमा सुबन्धुम् ’ (ऋ० सं० १ । १६२ । ७) ॥

सुमत्

दीर्घतमस आर्षम्[8] । अश्वमेधेऽश्वस्तोमीयेन षोडशाहुतयो[9] हूयन्ते तत्रेयं विनियुक्ता (मैत्रा० सं० ३ । १६ । १) । [10]उपप्रैतु मां प्रकर्षेण एतु सुमत् स्वयमेव यद[11]नेन यज्ञेन प्राप्नुयामिति मे मम मनः अप्यध्यायि[12] । अहं मनसा ध्यातवानित्यर्थः । किं पुनस्तत् । मन्म मननीयमर्थजातम् ।

---

१ ग. ज. मन्यत इति वक्ष्यति. २ ग. ज. ‘मुष्मात्सुतानुकामा’; च. °मुष्मात्सु (त्स्तु) तान्का (त्का) मा°. ३ क. ख. घ. झ. ठ. ड. पुनर्नयमानः; ट. पुनर्नय° निर्णी. ४ ग. ज. सुतरांश्च; च. सुतरां च° इतरांश्च. ५ क. ख. घ. झ. ट. ट. ड. °ष्यानभ्यादधाति सुकृतस्य लोक°. ६ ग. °गमः । ९८ । उप°. ७ ग. ज. प्रागात्सुमत् । दीर्घ°; च. प्रागात् । दीर्घ°; घ. झ. ट. प्रागात्सुमन्मे० चकृमा सुबन्धुम् । दीर्घ°. ८ क. ख. घ. झ. ट. ठ. ड. आर्षम् । त्रिष्टुप् । अश्वदेवताका । अश्व°; च. आर्षम् । ~ अश्व° त्रिष्टुप् । अश्वदेवताका ।. ९ घ. ट. ठ. ड. षोडशतपथे हुतयो°. १० ग. ज. उपैतु. ११ क. ख. घ. झ. ट. यत् यदनेन. १२ क. ख. घ. झ. ट. ठ. ड. °ध्यायि । अनेकविधान् संकल्पान् (क. ख. झ. संकल्पविकल्पान्) चकार तत्तदहमेव । अहं°; ग. ज. ध्यायि ध्यातवानित्यर्थः.

किंच । अयमपि वीतपृष्ठः कान्तपृष्ठः अश्वः उपैतु उपगच्छतु देवानामाशाः यमेतं वयं देवानां पुष्टे पोषणाय चक्रम कृतवन्तः सुबन्धुं शोभनयूपबन्धनम् । तमेतमुपगच्छन्तम् अनुमदन्ति अनुमन्यन्तां विप्रा ऋषयो मेधाविनः । एवमत्र शब्दसारूप्यादर्थोपपत्तेश्च 'सुमत्' इत्यस्य 'स्वयम्' इत्येष विपरिणाम उपपद्यते । 'आश्वमेधिको मन्त्रः' इति प्रकरणोपप्रदर्शनार्थमाह। मन्त्रार्थं निर्ब्रुवता प्रकरणमप्युपेक्षितव्यमित्येतदनेन[1] प्रदर्शितं भवति।

'दिविष्टिषु' (९८) इत्यनवगतम् । 'दिव एषणेषु' इत्यवगमः । याभिः क्रियाभिर्दिवमिच्छन्ति[2] गन्तुं ता दिविष्टयः[3] ।

'स्थूरं राधः शताश्वं[4] कुरुङ्गस्य दिविष्टिषु । राज्ञस्त्वेषस्य सुभगस्य रातिषु तुर्वशेष्वमन्महि' (ऋ० सं० ८ । ४ । १९) ॥

'दिविष्टिषु' मेधातिथेरार्षम् । बृहती । दानमनया प्रशस्यते । स्थूरं स्थूलं महत् राधो धनं शताश्वं बह्वश्वसंयुक्तं कुरुङ्गस्य राज्ञस्त्वेषस्य महतः सुभगस्य शोभनस्य दिविष्टिषु क्रियासु दक्षिणाभूतं सर्वेष्वपि तुर्वशेषु मनुष्येषु या रातयो दत्तयस्तासु चैतदेव स्थूलमित्येवं वयम् अमन्महि । मन्यामह इत्यर्थः । एवमत्र 'दिविष्टि' शब्देन 'क्रिया' उच्यन्ते । ताभिर्हि द्युलोकमिष्यते गन्तुम् ।

'स्थूरः समाश्रितमात्रो महान् भवति' । समस्ता हि तत्र मात्रा आश्रिता भवन्ति । स्थूलप्रसङ्गेनैव अणुशब्दो निरुच्यते । 'स्थवीयांसमनु' यो वर्तते सः 'अणुः' इत्युच्यते । अन्वित्ययम् उपसर्गो लुप्तनामकरणः । येन प्रत्ययेन न्याय्यमेतन्नाम स्यात्सोऽत्र लुप्तः । न श्रूयत इत्यर्थः। कथं लुप्त इति । 'यथा संप्रति' इति । अस्मिन्नामकरणलोपेन प्रयोगप्रसिद्धिः[6]। सांप्रतमिति न्याय्यम् । तथापि संप्रतीत्येवमपि वर्तमानकालविषयः[7] प्रयोगः प्रसिद्धः । एवमिहाप्यनुशब्दे । 'कुरुङ्गो नाम राजा बभूव' । कुरुगमनाद्वा कुरुङ्गः । स हि कुरून् प्रति पुत्रत्वेन गतो जेतुं वा । 'कुलगमनाद्वा' । शत्रुकुलानि हि स नित्यमेव याति विजेतुम् । 'कुरुः कृन्ततेः' ।

---

१ घ. झ. ट. ठ. ड. तदनेन. २ ग. ज. °भिर्दिवमि°. ३ क. ख. °ष्टयः ।७। स्थूरं°; म. °ष्टयः । २६ (१९) स्थूरं°. ५ ग. ज. शताश्वं । मेधा°; घ. झ. ट. शताश्वं० तुर्दशेष्वमन्महि । मेधा°. ६ क. ख. घ. झ. ट. ठ. ड. °गसिद्धिः. ७ क. ख. घ. झ. ट. ठ. ड. °विषयप्रयोगः.

स हि शत्रून् कृन्तति । ‘ क्रूरमिति ’ एतत् ‘ अप्यस्य ’ एव कृतेर्न्तेः ‘ भवति ’ । ‘ कुलं कुष्णातेः ’ । तद्धि ‘ विकुषितम् ’ इव ‘ भवति ’ विस्तीर्णत्वात् ।

‘ दूतः ’ (९९) इत्यनवगतम् । ‘ जूतः ’ इति न्याय्यम् ।

‘दूतः’ ‘ जवतेर्वा द्रवतेर्वा ’ इति व्याख्यातम् (निरु० ५ । १) ।

‘ जिन्वतिः (१००) प्रीतिकर्मा ’ इत्यर्थवचनमप्रतीतार्थत्वात् ।

‘जिन्वतिः’ ‘ समानमेतत् ’ इत्यत्र उपरिष्टाद् व्याख्यास्यामः (निरु० ७ । २३) ॥ २२ ॥

इति निरुक्तटीकायामेकादशाध्यायस्य चतुर्थः पादः ।

पञ्चमः पादः ।

अमत्रोऽमात्रो महान् भवत्यभ्यमितो वा । महाँ अमत्रो वृजने विरप्शीत्यपि निगमो भवति । स्तवे वज्र्यृचीषमः । स्तूयते वज्र्यृचा समोऽनर्शरातिमनश्लीलदानमश्लीलं पापकमश्रिमद्विषमम् । अनर्शरातिं वसुदामुपस्तुहीत्यपि निगमो भवत्यनर्वाप्रत्यृतोऽन्यस्मिन् । अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः । अनर्वमप्रत्यृतमन्यस्मिन् वृषभं मन्द्रजिह्वं मन्दनजिह्वं मोदनजिह्वमिति वा बृहस्पतिं वर्धय नव्यमर्कैरर्चनीयैः स्तोमैरसामि सामिप्रतिषिद्धं सामि स्यतेः । असाम्योजो बिभृथा सुदानवः । असुसमाप्तं बलं बिभृथ कल्याणदानाः ॥ २३ ॥

---

१ ग. ज. कृन्तेर्भ°; च. कृऽन्तेर्भ° त. २ क. ख. घ. झ. ट. ड. ठ. °स्यामो द्वादशेऽध्याये (ठ. ड. द्वादशाध्याये). ३ क. ख. ८(२३); ग. २७; इतरेष्वङ्को नास्ति. ४ ग. च. ज. एकादशस्य चतुर्थः; ठ. ड. इति निरुक्तटीकायां निघण्टपञ्चकेन सह एकादशाध्यायस्य चतुर्थः पादः। इति त्रयोविंशतिः खण्डः. ५ च. पादः समाप्तः. ६ छ. द. °मश्लिमाद्वि°; त. °मश्रिमद्वि° श्लि. ७ छ. त. द. °वाति । अन°. ८ क. ख. १ (२३); छ. त. २७; द. १.

'अमत्रः' (१०१) इत्यनवगतम् । 'अमात्रः' इति शब्दसमाधिः । 'महान् भवति' इत्यर्थवचनम् । यो हि महान् भवति न तस्य मात्राः प्रमातुं शक्यन्ते । अतोऽसौ 'अमत्रः' इत्युच्यते । 'अभ्यमितो वा' स्यादनभिहिंसितः केनचित् । 'महाँ अमत्रो वृजने विरप्श्यु१ग्रं शवः पत्यते धृष्ण्वोजः । नाह विव्याच पृथिवी चनैनं यत्सोमासो हर्यश्वममन्दन्' (ऋ० सं० ३ । ३६ । ४) ॥ विश्वामित्रस्यार्षम् । पृष्ठ्यस्य चतुर्थपञ्चमयोरह्नोर्माध्यन्दिने सवनेऽच्छावाकस्य शस्त्रे संपातसूक्तं नाम तत्रेयं विनियुक्ता (आश्व० श्रौ० ७ । ५) । महान् प्रभावतः अमत्रश्च अपरिमाणमात्रः इन्द्रो वृजने संग्रामे विरप्शी विरावणशीलः उग्रम् उद्गूर्णम् अभ्युद्यतं शवः शत्रुबलं पत्यते पातयते । धृष्णु ओजः धर्षयितृ यस्य बलम् ओजः तत् पत्यते । किंच । नाह विव्याच नैनं व्याप्नोति पृथिवी नापि द्यौरुपमानत्वेन । कदा पुनरेवं भवति । यत्सोमासः यदा सोमाः हर्यश्वम् इन्द्रम् अमन्दन् । अतर्पयन्नित्यर्थः । एवमत्र 'शवः पत्यते वृजने' इत्यनेन संबन्धात् 'अमत्रो महान्' इत्युपपद्यते ।

'अमत्रः'

'ऋचीषमः' (१०२) इत्यनवगतम् । ईकारोऽत्रानवगतः । 'ऋचा समः' इत्यवगमः । 'इह श्रुत इन्द्रो अस्मे अद्य स्तवे वज्र्यृचीषमः । मित्रो न यो जनेष्वा यशश्चक्रे असाम्या' (ऋ० सं० १० । २२ । २) ॥ विमदस्यार्षम् । आस्तारपङ्क्तिः । स पुनरैन्द्रो वा प्राजापत्यो वा । वासुक्रस्य वा वसुकृतः । पृष्ठ्यस्य चतुर्थेऽहनि निष्केवल्ये शस्यते (आश्व० श्रौ० ७ । ११) । श्रुतो विख्यातः सर्वासु दिक्षु इह एतस्मिन् कर्मणि अद्य स्तवे विजेतुं स्तूयतेऽस्माभिः वज्री । किंलक्षणः ।

'ऋचीषमः'

---

१ ग. °चित् । १०० । महाँ°. २ ग. ज. वृजने । विश्वा°; घ. झ. ट. वृजने विर० हर्यश्वममन्दन् । विश्वा°. ३ क. ख. घ. झ. ट. ठ. ड. °स्यार्षम् । त्रिष्टुप् । ऐन्द्री । पृ°; च. °स्यार्षम् । ४ पृ° त्रिष्टुप् । ऐन्द्री '. ४ क. ख. घ. झ. ट. ठ. ड. संपातं नाम सूक्तं. ५ ग. °गमः । १०१ । इह°. ६ ग. ज. अद्य । वि°; घ. झ. ट. अद्य० चक्रे असाम्या । वि°. ७ क. ख. घ. झ. ट. ठ. ड. °पङ्क्तिः । ऐन्द्री । स°; च. पङ्क्तिः । ८ स० ऐन्द्री ।

ऋचीषम ऋचा समः । यावतैवार्थेन युक्तोच्चार्यते ऋक् स्तुत्यभिप्रायेण तावानेवासौ भवत्यैश्वर्ययोगात् । किंच । मित्रो न मित्र इव । यथा हि कश्चिदाप्तो मित्रो जनेषु यशः कुर्यादेवं य इन्द्रो यश आचक्रे आभिमुख्येन सर्वासु दिक्षु करोति । किंलक्षणं पुनर्यशः करोति । असामि असमाप्तम् । अनन्तमित्यर्थः । य एवंगुणयुक्त इन्द्रोऽस्माभिरिह स्तूयते । एवमत्र स्तुतिसंबन्धाच्छब्दसारूप्याच्च 'ऋचीषम ऋचा समः' इत्युपपद्यते ।

'अनर्शरातिम्' (१०३) इत्यनवगतम् । 'अनश्लीलदानम्' इत्यवगमः । विग्रहप्रसक्तस्याश्लीलशब्दस्यार्थमाह ।

'अनर्शरातिम्'

'अश्लीलं पापकम्' इति । न यस्याश्लीला रातिर्दानं सोऽनर्शरातिः । शब्दसारूप्यप्रसक्तमाह 'अश्लीलम् अश्रिमद् विषमम्' । तत्सारूप्योपपत्तितोऽश्लीलमित्युच्यते । 'अनर्शरातिं वसुदामुप स्तुहि भद्रा इन्द्रस्य रातयः । सो अस्य कामं विधतो न रोषति मनो दानाय चोदयन्' (ऋ० सं० ८ । ९९ । ४) ॥ 'श्रायन्त इव सूर्यम्' इत्यस्या अनन्तरैव । सतोबृहती । हे स्तोतः अनर्शरातिम् अपापदानम् एतमिन्द्रं वसुदां वसुदातारम् उपगम्योपगम्य चेतसा स्तुहि । किंकारणम् । यस्मात् भद्राः भन्दनीयाः इन्द्रस्य रातयो दत्तयः । किंच । सः अस्य कामम् अभिप्रायं विधतो दधतः कामिनां कामान् रोषति न पीडयति । मनश्च इन्द्रस्य आत्मनो दानाय चोदयन् भवति य एवं स्तुत्वा याचते । एवमत्र शब्दसारूप्यादर्थाविरोधाच्च 'अनर्शरातिम् अनश्लीलदानम्' इत्युपपद्यते ।

'अनर्वा' (१०४) इत्यनवगतम् । 'अप्रत्यृतः' इत्यवगमः ।

अनर्वा

यः 'अन्यस्मिन्' नाश्रितो भवति स्वप्रधान एव सः 'अनर्वा' इत्युच्यते । ' 'अनर्वाणं वृषभं मन्द्रजिह्वं बृहस्पतिं वर्धया नव्यमर्कैः । गाथान्यः सुरुचो यस्य देवा आशृण्वन्ति नवमानस्य मर्ताः (ऋ० सं०

---

१ ग. °च्यते । २ । अनर्श°. २ ग. वसुदामुप स्तुहि भद्रा० चोदयन् । श्राय°; घ. झ. ट. वसुदां० दानाय चोदयन् । श्राय°. ३ क. ख. घ. झ. ट. ° रैव । नेमस्यार्षम् । ऐन्द्री । सतो°; च. °रैव । ~ सतो° नेमस्यार्षम् । ऐन्द्री ।; ठ. ड. °रैव । भार्गवो नेमस्यार्षम् । ऐन्द्री । सतो°. ४ क. ख. घ. झ. ट. ठ. ड. °मेनामि°; च. °मेतामि° न. ५ ग. °च्यते । २ । अन°. ६ ग. ज. वृषभं । अम°; घ. झ. ट. वृषभं० नवमानस्य मर्ताः । अग°.

१ । १९० । १) ॥ [1]अगस्त्यस्यार्षम् ॥ त्रिष्टुप् । हे स्तोतः अनर्वाणं स्वेन महिम्ना युक्तम् अप्रातिगतं कंचिदन्यं प्रति अधीनत्वेन वृषभं वर्षितारं मन्द्रजिह्वं [2]मन्दनजिह्वम् । हर्षकरो हि तस्य जनानां स्तनयित्नुघोषः । ‘ जिह्वा घोषः ’ (निघ० १ । ११) इति हि वाङ्नामसु पठितम् । बृहस्पतिं वर्धय नव्यं स्तुत्यम् अर्कैः [3]मन्त्रैः । किंलक्षणं बृहस्पतिमिति । गाथान्यः स्तुतिप्रापणार्हा देवाः सुरुचो [4]दीप्तिमन्तो यस्य शुष्णम् आभिमुख्येन स्थित्वा शृण्वन्ति आदरेण मर्ताश्च । नवमानस्य । नवो हि मानस्तस्याहन्यहन्यनया [5]स्तुत्या स्तुत्यस्य भवति । तेनासौ [6]नवमानः । अथवा । नवमानस्य प्रशासत इत्यर्थः । अथवा । अयमन्यो मन्त्रार्थः [7]स्यादैतिहासिकपक्षेण । मन्द्रजिह्वः । हर्षकरी हि जिह्वा तस्य स्तुतिः । गाथानीः । स एव पौरोहित्येन गाथाः स्तुतीर्नयति प्रापयति देवान् प्रति । स एव च सुरोचनः । तस्यैव च नवमानस्य स्तुवतो देवा आशृण्वन्ति मर्ताश्च । ‘ बृहस्पतिर्वै देवानां पुरोहितः ’ (मैत्रा० सं० १ । ११ । ५ ॥ शत० ब्रा० ५ । ३ । १ । २) [8]इति ह विज्ञायते । तस्मादेवमप्युपपद्यते । एवं मन्त्रार्थाविरोधात् ‘ अनर्वा अप्रत्यृतः ’ इत्युपपद्यते ।

असामि

‘असामि’ (१०५) इत्यनवगतम् । सामीति समाप्तमुच्यते । तस्य प्रतिषेधः [9]असामि । ‘असाम्योजो [10]बिभृथा सुदानवोऽसामि धूतयः शवः । ऋषिद्विषे मरुतः परिमन्यव इषुं न सृजत द्विषम्’ (ऋ० सं० १ । ३९ । १०) ॥ कण्वस्यार्षम् । [11]सतोबृहती । हे सुदानवः कल्याणदानाः मरुतो

---

१ ग. ज. अगस्त्यमार्षम्; घ. झ. ट. ठ. ड. आ (ठ. ड. अ) गस्त्यस्यार्षम् । बार्हस्पत्या । त्रि°; च. अगस्त्यार्षम् ।ᵛ त्रि°बार्हस्पत्या । . २ ग. ज. मदन°. ३ ठ. ड. °अर्कैःस्तुत्यैर्मन्त्रैः. ४ क. ख. घ. झ. ट. ठ. ड. सुदीप्ति°. ५ घ. ट. ठ. ड. ‘ स्तुत्या ’ नास्ति. ६ क. ख. घ. झ. ट. ठ. ड. °मानस्तस्य; च. °मानः ᵛ । अथ° तस्य. ७ ग. ज. स्यादिति°. ८ ठ. ड. इति ब्राह्मणे श्रूयते. ९ ग. °सामि । ४ । असा°. १० ग. ज. बिभृथः सुदानवः । कण्व°; घ. झ. ट. बिभृ० सृजत द्विषम् । कण्व°. ११ क. ख. घ. झ. ट. ठ. ड. °हती । मारुती । हे°; च °हती ।ᵛ हे °मारुती।.

यूयम् असामि अपरिसमाप्तम् अनन्तम् ओजो बलं[1] बिभृथ धारयथ। असामिधूतयः असमाप्तगतयः। धवनं धूतिः। 'धवति धावति' (निघ० २। १४।) इति गतिकर्मसु पठितम्। एतत्कुरुध्वे। य एष ऋषिद्वेष्टा स्तोतृद्वेष्टा तस्मै हे मरुतः परिमन्यवे प्रकृष्टक्रोधाय इषुमिव[2] सर्वलोकद्वेष्यतां सृजत क्षिपत। एवमत्र 'असामि असुसमाप्तम्' इत्युपपद्यतेऽर्थाविरोधात्।

'गल्दया' (१०६) इत्यनवगतम्। 'गलितधानी स्यात्'। गलितं हि तस्यां धीयते। 'धमनिर्भवति' इत्यभिधेयवचनम्। नाडीत्यर्थः। २३[3]।

मा त्वा सोमस्य गल्दया सदा याचन्नहं गिरा। भूर्णिं मृगं न सवनेषु चुक्रुधं क ईशानं न याचिषत् (ऋ० सं० ८। १। २०)॥ मा चुक्रुधं त्वा सोमस्य गालनेन सदा याचन्नहं गिरा गीत्या स्तुत्या भूर्णिमिव मृगं न सवनेषु चुक्रुधं क ईशानं न याचिष्यते[4] इति गल्दा धमनयो भवन्ति गलनमासु धीयते। आ त्वा विशन्त्विन्दव आगल्दा धमनीनाम्। नानाविभक्तीत्येते[5] भवतं[6] आगलना धमनीनामित्यत्रार्थः॥ २४[7]॥

मा त्वा सोमस्य गल्दया[8]। मेधातिथेरार्षम्[9]। बृहती। महाव्रते बृहतीसहस्रे विनियुक्ता (ऐ० आ० ५। २। ४)। हे

गल्दया

इन्द्र मा चुक्रुधं त्वा मा क्रोधयेयम् अहं सोमस्य गल्दया गलनेन[10] धमनिपूरणेन सोमस्य सदा नित्यकालमपि याचन् गिरा च[11] गीत्या स्तुत्या च सवनेषु यज्ञेषु। कथं च

---

१ क. ख. घ. झ. ट. ठ.ड. बलं शवःअभिवृद्धिरूपं च बलं बिभृ°; च. बलं^ बिभृ° शवः अभिवृद्धिरूपं च बलं. २ क. ख. घ.झ. ट. ठ. ड. °मिव द्विषं सर्व°; च. °मिव^सर्व° द्विषं. ३ क. ख. १ (२३); ग. ५/२७; ठ. ड. °त्यर्थः। इति नैरुक्तटीकायां षष्ठाध्याये त्रयोविंशतिः खण्डः; इतरेष्वङ्को नास्ति. ४ छ. त. द. याचिष्यतीति. ५ त. °भक्तीत्वेते°. ६ छ. त. द. भवतो गल°. ७ क. ख. २ (२४); छ. त. द. अङ्को नास्ति. ८ घ. झ. ट. सोमस्य गल्दया० न याचिषत्। मेधा°; ठ. ड. सोमस्येति। मेधा°. ९ क. ख. घ. झ. ट. ठ. ड. °रार्षम्।ऐन्द्री। बृ°; च. °रार्षम्।^ बृ° ऐन्द्री।. १० क.ख.घ. झ. ट.ठ.ड. °नेन धमनेन पूर°; ग. ज. °नेन च धमनिर्मनिपूरणेन; च. °नेन धमनिपूर° नेन. ११ क. ख. घ. झ. ट. ठ. ड. 'च' नास्ति.

पुनर्मा चुक्रुधमिति । भूर्णिमिव मृगम् । भ्रमणशीलो भूर्णिः । कः पुनरसौ । व्याघ्रो वा सिंहो वा । स हि भ्रमणशीलो बिभर्ति च शृगालादीन् । तेनेन्द्र उपमीयते । यथा शृगालादयो लाङ्गूलचालनादिनोपचारेणोपसर्पमाणास्तं न क्रोधयन्त्येवमहं सोमसंप्रदानपूर्विकया स्तुत्योपसर्पमाणो मा चुक्रुधं भवन्तमिति । अथ मतं यदि[1] क्रोधाद्बिभेषि मास्मान्याचिष्ठा[2] इति । क ईशानं न याचिषत्[3] । को हि नाम सोऽस्ति लोके य ईशानमीश्वरं न याचिष्यति । न ह्ययाचतां वृत्तिः सिध्यति । एवमत्रेन्द्रस्य या गलेधमनिर्यया[4] सोम आगल्यते[5] सा तेनैवागलनेनोपलक्ष्यमाणा 'गल्दा' इत्युच्यते । न ह्येवमर्थविरोधोऽस्ति ।

तस्यैवान्यदुदाहरणम्

'गल्दा धमनिर्भवति' इत्यस्य भाष्यकारवाक्यस्य मन्त्रे नात्र धमनिलिङ्गं विशिष्टमस्तीत्यतो विशिष्टलिङ्गमन्यदुदाहरणं[6] ब्रवीति[7] । 'आ त्वा विशन्त्विन्दवः' इति । हे इन्द्र आविशन्तु त्वा त्वाम् इन्दवः सोमाः । कथं च पुनराविशन्तु[8] । आगल्दा धमनीनाम् । याः[9] आगलनाः धमनयो याभिरनुप्रविष्टाः[10] सन्तो नवं मदमुत्पादयन्ति अधोवाहिन्यो याः ताभिराविशन्तु । शेषो मृग्यः । एवमिह 'धमनी'शब्दसहयोगी 'गल्दा'शब्द इति कृत्वा 'आगल्दा धमनिः' इति उपपद्यते ।

'नानाविभक्ती त्वेते[11]' पदे 'भवतो' गल्द्या गल्दा' इति न तु नानार्थे । आह कोऽभिप्राय इति । उच्यते । पूर्वस्मिन्मन्त्रे यद्यपि धमनिशब्दो नास्ति तथापि[12] 'गल्दाशब्देन' धमनिरेवोच्यते । तत्र 'आगल्दा धमनीनाम्' इत्येतदेव ज्ञापकमित्यभिप्रायः । 'गल्द्या' इति तृतीयान्तं

---

१ क. ख. घ. झ. ट. ठ. ड. यदि मम क्रो°; च. °यदि ˅ क्रो° मम. २ क. ख. घ. झ. ट. °न्याचेथा इ°; ठ. ड. न्याचेथा इ°; च. °न्याचिष्ठा° चेथा. ३ क. ख. घ. झ. ट. ठ. ड. याचिष्यते; च. याचिष्यति° ते. ४ क. ख. घ. झ. ट. ठ. ड. गलना धम°; च. गल˅ध° ना. ५ ग. ज. आगाल्यते. ६ च. विशिष्टमन्यदु°. ७ ग. ब्रवीति । ६ । आ त्वा°. ८ क. ख. घ. झ. ट. ठ. ड. °शन्तु त्वामिन्दवः । आग°; च. °शन्तु˅ । आग° त्वामिन्द्रवः. ९ ग. ज. 'याः' नास्ति. १० ग. ज. याचि धनतुप्रवि°. ११ क. ख. घ. झ. ट. ठ. ड. °भक्तीत्येते;° च. °भक्ती त्वेते° त्ये. १२ क. ख. घ. झ. ट. ठ. ड. तथापि निगमे गल्दा°; च. तथापि˅ गल्दा° निगमे.

'गल्दाः' इति प्रथमाबहुवचनान्तम् । एतदनयोर्नानाविभक्तित्वम् । 'जल्हवः' (१०७) इत्यनवगतम् । 'ज्वलनहीनाः' इत्यवगमः । २४ ।

न पापासो मनामहे नारायासो न जल्हवः । न पापा मन्यामहे नाधना न ज्वलनेन हीना अस्त्यस्मासु ब्रह्मचर्यमध्ययनं तपो दानकर्मेत्यृषिरबोचद्भकुरो भास्करो भयंकरो भासमानो द्रवतीति वा ॥ २५ ॥

जल्हवः — 'न पापासो मनामहे नारायासो न जल्हवः । यदिन्न्विन्द्रं वृषणं सचा सुते सखायं कृणवामहै' (ऋ० सं० ८ । ६१ । ११) ॥ भर्गो नाम प्रगाथपुत्रस्तस्येयमार्षम् । बृहती । तस्यामेव तृचाशीत्यां विनियुक्ता (ऐ०आ०५ । २ । ४) । न वयं पापाः इत्येवं मन्यामहे । किंकारणम् । अस्त्यस्मास्वपापत्वहेतुः ब्रह्मचर्यम् अध्ययनं तपो दानकर्म च । अथ मतमेतैरपि युक्तो यो निर्धनः स पाप एवेति । तच्च न । किंकारणम् । नारायासः । न वयमधनाः । अथापि स्याद्धनवत्त्वेऽपि सत्यनाहिताग्नित्वाज्ज्वलनहीनत्वेन पापत्वमिति । तदपि न । किंकारणम् । न जल्हवः । न वयं ज्वलनहीनाः । किं तर्हि । आहिताग्नयो वयम् । तदेतदध्ययनादि अपापत्वहेतुभूतं सर्वमस्मास्वस्ति । किं च । यदिन्न्विन्द्रं यस्माद्वयम् इन्द्रं वृषणं वर्षितारम् एतस्मिन्यज्ञकर्मणि सखायं सहभूतस्य सोमपानस्य ख्यापयितारम् अभीभिः सह मया सोमः पीत इत्येवं वक्तारं कृणवामहै तस्मान्न वयं पापा नापि वयमरायासो नापि जल्हव इत्येवमात्मानं मन्यामहे । न हि पापानामधनानामनाहिताग्नीनां चेन्द्रः सखा भवतीत्यभिप्रायः । एवमत्र 'जल्हवो ज्वलनहीनाः' शब्दसारूप्यादर्थाविरोधाच्च ।

---

१ क. ख. °क्तित्वम् । २ (२४) जल्ह°. २ ग. ७; ठ. ड. °गमः । इति निरुक्तटीकायां षष्ठाध्याये चतुर्विंशतिः खण्डः; इतरेष्वङ्को नास्ति. ३ क. ख. २ (२५); छ. त. २८; द. २. ४ ग. ज. °महे । भर्गो°; व. झ. ट. °महे० कृणवामहै । भर्गो°. ५ क. ख. घ. झ. ट. ठ. ड. °मार्षम् । ऐन्द्री । बृ°; च. °मार्षम् ।~ बृ° ऐन्द्री ।. ६ क. ख. घ. झ. ट. ठ. ड. °पापत्वे हे°; ग. ज. °पापत्वहेतु ब्र.° ७ ग. ज. 'दानकर्म' नास्ति; च. तपश्च~। अथ° दानकर्म च. ८ ग. ज. °द्धनमत्त्वे°. ९ क. ख. घ. झ. ट. ठ. ड. पापवत्त्व°. १० ग. ज. ज्वलहीनाः; च. ज्वल~हीनाः° न. ११ घ. ज. °पापानामनाहि°; च. °पापाना~ मनाहि° मधनाना.

बकुरेण जलसमूहेन ज्योतिःसमूहेन वा[1] । मध्यस्थानो ह्युदकसमूहेन द्युस्थानो ज्योतिषा सस्यमनुगृह्णाति ततो दुर्भिक्षं ध्वस्यते जगच्च पुष्यति । किंच । युवामेव उरु ज्योतिश्चक्रथुः । विस्तीर्णमविकलं चक्षुः चक्रथुः आर्याय ईश्वरपुत्राय ऋज्राश्वाय । स हि युवाभ्यामन्धीभूतश्चक्षुष्मान् कृत इत्यभिप्रायः । एवमत्र ज्योतिःसमूह उदकसमूहश्च ' बकुर'शब्देनोच्यते शब्दार्थाविरोधात् । ' ज्योतिषा वोदकेन वा ' इति भाष्यपाठः[2] ।

' बेकनाटान् ' (१०९) इत्यनवगतम् । ' द्विगुणकारिणो वा द्विगुणदायिनो वा द्विगुणकामिनो वा ' इति शब्दसमाधयः[3] । ' इन्द्रो[4] विश्वान् बेकनाटाँ अहर्दृश उत क्रत्वा पणीँरभि । कदू महीरधृष्टा अस्य तविषीः कदु वृत्रघ्नो अस्तृतम् ' (ऋ० सं० ८ । ६६ । १०) ॥ प्रागाथः कलिर्नाम तस्यार्षम्[5] । बृहती । महाव्रते बार्हस्पत्यां तृचाशीत्यां विनियुक्ता (ऐ० आ० ५ । २ । ४) । इन्द्रः सर्वान् बेकनाटान् कुसीदिनो वृद्धिजीवनान् अहर्दृशः । यैरिहैव जन्मनि सूर्यो दृष्टः । न पुनर्द्रक्ष्यन्तीत्यर्थः । अथवा । य इमानि एव अहानि पश्यन्ति विषयभोगप्रधाना नास्तिकतया न पारलौकिकेष्वहःस्वस्य दुष्कृतस्य[6] कर्मणः कोऽपि फलपरिणामो भविष्यतीत्येवंभाविनः पश्यन्ति । तानभिभवति क्रत्वा स्वेन कर्मणा । उत पणीन् अपि च पणीन्[7] । ' पणिर्वणिग्भवति ' (निरु० २ । १७) । न हि ते विशुद्धेन कर्मणा व्यवहरन्ति । याभिरेतत्कर्म करोति याभिः पुनरेवमादीन् दुष्कृतकारिणोऽभिभवति कदु महीः क ता महत्यः सेना इन्द्रस्य अधृष्टाः अनाधर्षितपूर्वाः परैः तविषीः याश्च महत्यः । कदु वृत्रघ्नः । क[8] च वृत्रघ्नः इन्द्रस्य तत् अस्तृतम् अनुपहतं बलं येनैतान् हन्तीति । एवमत्र ' बेकनाटाः कुसीदिनः ' अर्थाविरोधादित्युपपद्यते[10] ।

' अभिधेतन ' (११०) इत्यनवगतम् । ' अभिधावत ' इत्यवगमः । २६[9] ।

---

१ क. ख. घ. झ. ट. च; च. वा° च. २ च. भाष्यपाठः° कारः. ३ ग. °धयः । ९ । इन्द्रो°. ४ ग. ज. °नाटान् । कदू महीरधृष्टा० स्तृतम् । प्रागा°; ठ. ड. द्वयोरधर्चयोर्विपर्यासोऽत्र. ५ क. ख. घ. झ. ट. ठ. ड. तस्यार्षम् । ऐन्द्री । बृ°. ६ ग. च. ज. दुःकृ°. ७ घ. झ. ट. ठ. ड. 'अपि च पणीन् ' नास्ति. ८ ग. ज. च इन्द्र वृत्रस्य घ्न तत्°. ९ क. ख. ३ (२६); ग. १० । २९; ठ. ड. °पद्यते । इति निरुक्तटीकायां षष्ठाध्याये षड्विंशतिः खण्डः.

जीवान्नो अभि धेतनादित्यासः पुरा हथात् । कद्ध स्थ हवनश्रुतः (ऋ० सं० ८ । ६७ । ५) ॥ जीवतो नोऽभिधावतादित्याः पुरा हननात्क नु स्थ ह्वानश्रुत इति मत्स्यानां जालमापन्नानामेतदार्षं वेदयन्ते मत्स्या मधा उदके स्यन्दन्ते माद्यन्तेऽन्योन्यं भक्षणायेति वा जालं जलचरं भवति जलेभवं वा जलेशयं वांहुरोऽहस्वानंहूरणमित्यप्यस्य भवति । कृण्वन्नंहूरणादुर्वित्यपि निगमो भवति । सप्त मर्यादाः कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात् । सप्तैव[1] मर्यादाः कवयश्चक्रुस्तासामेकामप्यधिगच्छन्नंहस्वान् भवति स्तेयं[2] तल्पारोहणं ब्रह्महत्यां भ्रूणहत्यां सुरापानं[3] दुष्कृतस्य[4] कर्मणः पुनः पुनः सेवां[5] पातके नृतोद्यमिति बत इति निपातः खेदानुकम्पयोः ॥ २७ ॥

---

[6] जीवान्नो अभिधेतन । उक्तमार्षं भाष्यकारेणैवात्रोपप्रदर्शनार्थमेवं सर्वत्र परिज्ञेयमार्षमिति[7] । हे आदित्याः जीवान्नः जीवतः अस्मान् अभिधावत यूयं पुरा हथात् पुरा हननात् । अहतानस्मान् संभावयतेत्यभिप्रायः । [8]क्व नु स्थ ।

'अभिधेतन'

क्व नु स्थिता[9] यूयं येन न शृणुत क्षिप्रं नो[10]ऽभिधावत हे हवनश्रुतः । ते ह्यार्तानामाह्वानं शृण्वन्ति । एवमत्र 'पुरा हथात्' इत्यनेन संबन्धात् 'अभिधेतन' इत्यस्य 'अभिधावत' इत्येष विपरिणाम उपपद्यते ।

ऋषेर्वा मत्स्यवधकारुण्याभिभूतस्यैतदार्षम् । मत्स्यानां[11] केचिन्मन्यन्ते । 'मत्स्या मधौ उदके स्यन्दन्ते[12]' । मध्वित्युदकनाम (नि० १ । १२) । तत्र हि ते स्यन्दन्ते गच्छन्ति । 'स्यन्दति[12] कसति' इति गतिकर्मसु पठि-

---

१ क. ख. छ. त. द. 'एव' नास्ति. २ ङ थ. ध. स्तेयमतल्पा°; त. स्तेयंमतल्पा० यं. ३ थ. °पाणं. ४ छ. दुष्कृतकर्मणः; त. दुष्कृतस्य क°; द. दुष्कृतक° स्य. ५ क. ख. ४ (२७); छ. त. ३०; द. ४. ६ घ. झ. ट. जीवान्नो अभिधेतना० हवनश्रुतः । उक्त°; ठ. ड. जीवान्न इति । उक्त°. ७ क. ख घ. झ. ट. ठ. ड. °मिति । गायत्री । आदितेयी । हे°; च. °मिति । हे° गायत्री । आदितेयी । . ८ क ख. घ. झ. कद्ध स्थ क्व नु स्थ यूयं°; ट कद्ध स्थ क्व नु स्थं यूयं° ; ठ. ड. कद्ध स्थ क्व नु स्थ स्थिता यूयं°. ९ ग. ज. 'स्थिताः' नास्ति. स्थिता; १० ठ. ड वाभि°. ११ क. ख. घ. झ. ट. ठ ड °नां वा केचि°; च. °नां केचि° वा. १२ ग. च. ज. स्यन्द°.

तम् (निघ० २ । १४) । 'माद्यन्ते ' हृष्यन्ति ' अन्योन्यं भक्षणाय इति वा ' मत्स्याः । ते हीतरेतरभक्षजीविनः । ' जालं जलचरं भवति ' । तद्धि जले चरति । जले वा भवति । जले वा शेते इति जालम् ।

'अंहुरः' (१११) इत्यनवगतम् । 'अंहस्वान्' इत्यवगमः । रो मत्वर्थे । 'अंहूरणमित्यप्यस्य भवति' इति प्रासङ्गिकम् । एवमपि हि प्रयोगो

'अंहुरः'

भवतीति[1] । ' त्रितः कूपेऽवहितो[2] देवान्हवत ऊतये' । तच्छुश्राव बृहस्पतिः कृण्वन्नंहूरणादुरु वित्तं मे' अस्य रोदसी' (ऋ० सं० १ । १०५ । १७) ॥ 'सप्त मर्यादा' इत्येते त्रितस्यैव कूपे पतितस्यार्षम्[3] । एतयोः पूर्वा कुत्सस्य वा[4] । प्रातरनुवाकाश्विनयोर्विनियोगः[5] । त्रितः कूपे अवहितः पतितो देवान् हवते आह्वयते ऊतये रक्षणायात्मनः । तस्याह्वानं बृहस्पतिः शुश्राव । 'वित्तं मे अस्य रोदसी' इत्येतत्पुनःपुनरुच्यमानं द्यावापृथिव्यौ शुश्रुवतुः । किमित्येतदसौ श्रावयांचकारेति । कृण्वन्नंहूरणात् अंहस्वतः कूपादात्मन उरु विस्तीर्णं त्राणं[6] कुर्वन् । एवमत्र ' अन्धकूपोऽहूरणः ' इत्युपपद्यते प्रकरणाविरोधात्[7] ।

'सप्त मर्यादाः[8] कवयस्ततक्षुस्तासामेकामिदभ्यंहुरो गात् । आयोर्ह स्कम्भ उपमस्य नीळे[9] पथां विसर्गे धरुणेषु तस्थौ ' (ऋ० सं० १० । ५ । ६) ॥ सप्त मर्यादाः सप्त स्थितीः[10] कवयो मेधाविनो हिरण्यगर्भमनुप्रभृतयः ततक्षुः कृतवन्तः । नित्या एव हि ताः । तैस्तु तत्प्रत्याख्यायकानुस्मरणार्थं[11] निराकरणार्थं ग्रन्थसंदर्भोऽभिव्यञ्जितः । एतदेव करणमित्युपचर्यते । तासामेकामिदभ्यंहुरो गात् ।

स्पष्टार्थाय तस्यैव द्वितीयमुदाहरणम्

१ ग. °तीति । ११ । त्रितः°; ठ. ड. 'इति' नास्ति. २ ग. ज. °हितः । सप्त°; घ. झ. ट. °हितो० अस्य रोदसी । सप्त°. ३ क. ख. घ. झ. ट. ठ. ड. °स्यार्षं; च. °त्रितस्यैवार्षम्° स्या. ४ क. ख. घ. झ. ठ. ठ. ड. °वा । वैश्वदेवी । पङ्क्तिः । प्रात°; च. °वा । ~ प्रात° वैश्वदेवी । पङ्क्तिः. ५ क. ख. घ. झ. ट. ठ. ड. °नियुक्ता. ६ ग. ज. 'त्राणं' नास्ति. ७ ग. °धात् । १२ । सप्त°. ८ ग. ज. मर्यादा । सप्त°; घ. झ. ट. मर्यादाः कवयः० धरुणेषु तस्थौ । सप्त°. ९ क. ख. नीळे; च. नीले. १० ग. ज. स्थितयः; च. स्थितयः° तीः. ११ क. ख. घ. झ. ट. ठ. ड. तत्प्रख्यापकोऽनुस्मरणार्थो ग्रन्थ°; ग. ज. तत्प्रत्याख्यायकानिराकरणार्थं नुस्म-
११ रणार्थं ग्रन्थ°; च. तत्प्रत्याख्यायकाः(पकोऽ)नुस्मरणार्थं निराकरणार्थं(र्थो)ग्रन्थ°.

'इत्' इत्यनर्थकोऽप्यर्थे वा । तासां मर्यादानाम् एकामभिगच्छन् अतिक्रामन् अंहस्वान् भवति । 'आगात्'[1] इत्येतत् अभेः समीपमाकृष्य 'एकामप्यभिगच्छन्' इति । कतमाः पुनस्ता मर्यादा इति । स्तेयं तल्पारोहणमित्येवमाद्याः । यः पुनरेता नाभिगच्छति तस्य किमिति । स आयोः अयनस्य सूर्यस्य स्कम्भे स्कम्भने मण्डले उपमस्य सर्वभूतोपनिर्मातुरादित्यान्तरपुरुषस्य नीडे निलये[2] स्थाने यानि धरुणानि धारयितृणि स्थानानि अप्रध्वंसीनि आभूत[3]संप्लवस्थायीनि तेषु तस्थौ तिष्ठति । आह । कस्मिन् काले[4] इति । उच्यते । पथां विसर्गे विषयानुप्रवेशमार्गभूतानामिन्द्रियाणां विसर्गे विसर्जने[5]काले प्राप्ते । मृत्युकाल इत्यर्थः । मर्यादासंबन्धात्स्पष्टतर एष निगम इत्यतो[6] द्वितीय उपात्तः । स्मृतिसमाचारश्चानेन प्रतिविशिष्ट उपदर्शितो भविष्यति[7] । एवं मन्त्रेभ्य एवोपश्रुत्य सर्व एव समाचारो विशिष्टैः स्मृतिकारैः संदृष्टो न स्वतन्त्रैरिति[8] ॥

'बत इति निपातः खेदानुकम्पयोः' । 'बत' (११२) । इत्यनवगतमनेकार्थं च । 'निपातः' इति पदजात्यवधारणम् । 'खेदानुकम्पयोः' इत्यर्थवचनम् ॥ २७[9] ॥

बतो बतासि यम नैव ते मनो हृदयं चाविदाम । अन्या किल त्वां कक्ष्येव युक्तं परिष्वजाते लिबुजेव वृक्षम् (ऋ० सं० १० । १० । १३) ॥ बतो बलादतीतो[10] भवति दुर्बलो बतासि यम नैव ते मनो हृदयं च विजानीमोऽन्या किल त्वां परिष्वङ्क्ष्यते कक्ष्येव युक्तं लिबुजेव वृक्षं लिबुजा व्रततिर्भवति लीयते विभजन्तीति[11] व्रततिर्वरणाच्च संयनाच्च[12] ततनाच्च वाताप्यमुदकं भवति वात एतदाप्याययति । पुनानो वाताप्यं विश्वश्चन्द्रामित्यपि निगमो

---

१ घ. झ. ट. ठ. ड. अगात्. २ क. ख. घ. झ. ट. ठ. ड. निलयने. ३ म. ज. °भीम्याहूतत°; च. °सीन्याहूतसं° भू. ४ च. काले । उच्यते इति. ५ च. ज. विसर्जने काले. ६ ग. ज. °त्यतोहुरशद्वद्विती°. ७ क. ख. घ. झ. ट. ठ. ड. °ष्यतीत्येवं; च. °ष्य॰त्येवं° ती. ८ क. ख. घ. झ. ट. स्वतन्त्र इति; ठ. स्वतन्त्र इति निरुक्तटीकायां षष्ठाध्याये सप्तविंशतिः खण्ड; ड. स्वतन्त्र इति । २७ खण्डः ।. ९ क. ख. ४ (२७); ग. १३ (३०); इतरेष्वङ्को नास्ति. १० छ. त. द. बलादतितो. ११ छ. त. °भजतीति. १२ क. ख. छ. शयना°; त. संयना° सं.

भवति । वने न वायो न्यधायि चाकन् । वन इव वायो वेः पुत्रश्चायन्निति वा कामयमान इति वा वेति च य इति च चकार शाकल्य उदात्तं त्वेवमाख्यातमभविष्यदसुसमाप्तश्चार्थो रथर्यतीति सिद्धस्तत्प्रेप्सू रथं कामयत इति वा । एष देवो रथर्यतीत्यपि निगमो भवति ॥ २८ ॥

इति षष्ठाध्यायस्य पञ्चमः पादः ॥

'बत'

बतो बतासि । यमी यमं ब्रवीति । दुर्बलो बत दुर्बलहृदयस्त्वम् । अवर्मभीरुर्मोहमयस्त्वमेवमसकृन्मया प्रार्थ्यमानः खेदमुपयासि नेच्छसि मया संभोक्तुम् । स त्वं सर्वथा ह्यनुकम्प्यः । शोच्य इत्यर्थः । अथवा । नैव ते तव मनः संकल्पं हृदयं हृद्गतं हृद्गतमध्यवसायं च विजानीमः । अथवा । लब्धस्ते मयाभिप्रायः । अन्या किल त्वां मत्तो विशिष्टतरा योषित् परिष्वङ्क्ष्यते । ततः किल त्वं मां तयापहृतचेतस्त्वान्नेच्छसि परिष्वक्तुम् । कथं च पुनरन्या त्वां परिष्वङ्क्ष्यते । कक्ष्येव युक्तं लिबुजेव वृक्षम् । कक्षजातेव सुवृद्धा लिबुजा वल्ली यथा युक्तम् आत्मना संयुक्तं समीपजं परिष्वजेत्परिवेष्टयेदेवं किल त्वामन्या परिष्वङ्क्ष्यत इति । एवमत्र प्रकरणाविरोधाद् बत इत्येष निपातः खेदानुकम्पयोः । अत्र 'कक्ष्येव युक्तं लिबुजेव वृक्षम्' इत्येक 'इव'शब्दोऽनर्थकः । अथवा । उपमानद्वयमेव स्यात्कक्ष्येव च लिबुजेव च । यथा कक्ष्या च लिबुजा च परिष्वजनीयौ वस्त्रवृक्षौ परिष्वजेते एवं परिष्वङ्क्ष्यत इति ।

'वाताप्यम्'

'वाताप्यम्' (११३) इत्यनवगतम् । 'उदकं भवति' इत्यभिधेयवचनम् । वातो ह्युदकम् आप्याययति शीती करोति । अथवा आप्यायतिर्वृद्ध्यर्थः स्यात् । पुरोवातेन हि वृष्टिभूतमुदकं संवर्धते । 'नू नो रयिमुप मास्व नृवन्तं पुनानो वाताप्यं विश्वश्चन्द्रम् । प्र वन्दितुरिन्दो

---

१ छ. त. द. भवति । धेनुं न°. २ ड. थ. ध. 'इति०० पादः' नास्ति. ३ घ. झ. ट. बतासि यम० जेव वृक्षम् । यमी°, ठ. ड. बतासीति । यमी°. ४ ग. ज. संकल्पा हृद°. ५ घ. झ. ट. ठ. ड. कक्षं कक्षजा°. ६ ग. ज. °नीयाश्ववृक्षौ. ७ ग. च. ज. अप्या°. ८ ग. संवर्धयते । १४ । नू°; ज. संवर्धयते. ९ ग. मास्व नृवन्तं पु । नोध°; ज. मास्व । नोध°; घ. झ. ट. मास्व० वसुर्जगम्यात् । नोध°.

तार्यायुः प्रातर्मक्षू धियावसुर्जगम्यात्' (ऋ० सं० ९ । ९३ । ५) ॥ नोधसो गौतमस्येयमार्षम् । पावमानी सौमी । हे सोम नु नः क्षिप्रम-स्माकं रयिं धनम् उपमास्व उपनिर्मिनुहि नृवन्तं पुत्रपौत्रैः सहितं पुनानः पूयमानो वाताप्यम् उदकं प्राप्य द्रवीभूतः चन्द्रं चायनीयमुदकं विश्वः च सर्वः पूयमानः । किंच । प्रतारि प्रतीर्णं दीर्वं कुरु हे इन्दो सोम वन्दितुः स्तोतुः आयुः । किंच । तथोपमीस्व यथा प्रातः नित्यमेव धियावसुः कर्मवसुः इन्द्रः त्वां पातुमस्माकम् आजगम्यात् । आगच्छेदित्यर्थः । एव-मत्र 'वाताप्यमुदकम्' अर्थाविरोधाच्छन्दोपपत्तेश्च ॥

'चाकन्' (११४) इत्यनवगतम् । 'चायन्निति वा कामयमान इति वा इति शब्दसमाधी । 'वने न वायो न्यधायि चाकञ्छुचिर्वां स्तोमो भुरणावजीगः । यस्येदिन्द्रः पुरुदिनेषु होता नृणां नर्यो नृतमः क्षपावान्' (ऋ० सं० १० । २९ । १) ॥

'चाकन्'

वसुक्रस्येयमार्षम् । वने न वने इव वृक्षे इव शकुनिः स्वे नीडे वायम् आत्मीयं पुत्रं न्यधायि निद-धाति शिशुकम् अजातपक्षम् । स यथा तत्र निहितः चाकन् पश्यन् भयाद्दिशो निरीक्षमाणः आसीदथवा कामयमानः तदुत्सुकमना आसीत् एवमयमस्मासु वृक्षस्य नीडभूतेषु शकुनिपुत्रभूतः शुचिः व्यपगतसर्वदोषः युवयोः स्वभूतः स्तोमः हे भुरणौ भर्तारावश्विनौ शीघ्रौ वा । भुरण्युरिति क्षिप्रनाम (निघ० २ । १५) इति । किंच । यस्य स्तोमस्य पुरुदिनेषु बहुष्वहःसु इन्द्रो होता इन्द्रोऽप्याह्वाता भवति ममायं स्तोमः स्यादिति । किंलक्षणः पुनरिन्द्र आह्वाता । यो नृणां नृतमो मनुष्याणामपि मनुष्य-तमः । शूराणामपि मध्ये शूरतम इत्यर्थः । नर्यश्च नृभ्यो हितः । यः क्षपावान् च रात्रिपर्यायेषु सोमभागी । एवंगुणयुक्तेन यः स्तोम इन्द्रे-णापि प्रार्थ्यते अस्मासु वर्तमानः स युवां प्रति अजीगः । नित्यकालमेव गच्छतीत्यर्थः ।

---

१ क. ख. घ. झ. ट. ठ. ड. 'इयं' नास्ति. २ ग. ज. तथा जुषस्व. ३ क. ख. घ. झ. ट. ठ. ड. 'वा' नास्ति; च. वां. ४ क. ख. घ. झ. ट. ठ. ड. 'वा इति' नास्ति. ५ ग. °माधी । १५ । वने°. ६ ग. ज. चाक्रन् । वसु°; घ. झ. ट. चाकन्° नृतमः क्षपावान् । वसु°. ७ क. ख. घ. झ. ट. ठ. ड. °मार्षम् । ऐन्द्री । त्रिष्टुप् । वने°; च. मार्षम् । ˇ वने° ऐन्द्री । त्रिष्टुप् । .

एवं तावदेतामृचमाश्विनीमिति कृत्वा व्याचक्षते । तदसाधु । ऐन्द्रे हि सूक्ते प्रथमैवेयं[1] भवति । तच्च पुनः पृष्ठ्यस्य षष्ठेऽहनि स्तोमे वर्धमाने माध्यन्दिने सवने ब्राह्मणाच्छंसिनः शस्त्रे विनियुज्यते (आश्व० श्रौ० ७ । १२) । हे भुरण्यौ भर्तारौ देवतानां पती य एष स्तोमोऽस्मासु निहितः शुचिः व्यपगतदोषः शकुनिपुत्र इव वने वनावयवे वृक्षे चाकन् पश्यन्निव कामयमान इव वा ईन्द्रम्[2] आस्ते । यस्य स्तोमस्य[3] किमिति । यस्येन्द्रः पुरुदिनेषु बहुष्वहःसु आह्वाता अभूदपि नाम मामनेन स्तोमेन स्तुयुरिति । किंलक्षणः पुनराह्वाता यस्येन्द्र इति । नृणां नृतमः नर्यश्च क्षपावांश्च । समानमेतत्पूर्वेणार्थेन[4] । येमेवमिन्द्रः[5] प्रार्थयते स एष स्तोमस्तं प्रत्यजीगः । गच्छतीत्यर्थः । अथवा । स एष स्तोमोऽस्माभिरुदीर्यमाणस्तस्येन्द्रस्य गुणान् गृह्णातीति स्यात् । ' जिगर्तिर्गृह्णातिकर्मा[6] ' इति ह्युक्तम् (निरु० ६ । ८) । एवमत्र ' चाकन् ' इत्यस्य ' चायन् इति कामयमानः इति वा ' इत्येतौ विपरिणामावुपपद्येते शब्दसारूप्यादर्थाविरोधाच्च ।

प्राकृतविवरणस्यासाधुत्वे कारणम्

एतस्मिन्निगमे पदविभागतः कश्चिद्विचारोऽस्ति । तमाह भाष्यकारो ' वेति च य इति च चकार शाकल्यः ' इति । वा इति य इति च पदे चकार शाकल्यः पदकारः । तदेतद्विचार्यमाणं न साधु भवति । किंकारणम् । ' उदात्तं त्वेवमाख्यातमभविष्यत् ' । एवम् एतस्मिन् पदद्वये सति यदेतत् आख्यातं 'न्यधायि' इत्येतत् उदात्तमभविष्यत् । यद्वृत्तात्परस्य नित्यमाख्यातस्य निघातो[7] न भवतीति लक्षणविदो मन्यन्ते । न चेदमुदात्तम् । तस्मात् ' यः ' इति नेदं यद्वृत्तम् । किं तर्हि । ' वायः ' इत्येकमेव पदम् । किंच । ' असुसमाप्तश्चार्थः ' अपुष्कलः । एवमेतस्मिन् पदद्वये सति मन्त्रार्थो[8]ऽसुसमाप्तो भवति । कथम् । द्विपदत्वे हि सति वाशब्दस्यार्थेन केनचिद्भवितव्यम् । न चेह विकल्पः

अस्यामृचि 'वायम्' इति यत्पदं तत्संबद्धो विचारः

१ क. ख. घ. झ. ट. ठ. ड. °वेर मृाभवति. २ ग. ज. इन्द्रनाम्ने. ३ क. ख. घ. झ. ट. ठ. ड. यः स्तोमस्तस्य कि°. ४ क. ख. घ. झ. ट. ठ. ड. पूर्वेणैवार्थेन; च. पूर्वेणार्थेन °णैवा. ५ घ. ट. यजेवार्तिद्रः प्रा°; ठ. ड. यजेवतेर्नेन्द्रः प्रा°. ६ ग. च. ज. जिगर्ति गृण्हा°. ७ ग. ज. विघातो. ८ क. ख. घ. झ. ट. ठ. ड. मन्त्रस्यार्थो.

समुच्चयो वा[2] कश्चिदर्थोऽस्ति[1] । स्यादेतदुपमार्थो भविष्यतीति । तदपि न संभवति नकारेणोपमार्थस्य कृतत्वात् । 'वः' इत्यस्यापि पृथग्भूतस्य न कश्चिदर्थोऽस्ति । तस्मादाख्यातस्यानुदात्तत्वादर्थासंभवाच्च द्विपदत्वे 'वायः' इत्येतदेकपदमेव । 'शकुनिपुत्रः' एव चास्याभिधेय उपपद्यते ।

'रथर्यति' (११५) इत्यनवगतम् । 'रथं[3] हर्यति' इत्यवगमः । हर्यतिशब्दो हि प्रेप्सायाम् (निघ० २ । ६) ।

'रथर्यति' 'रथं' हि यः 'कामयते' स 'रथहर्यति[4]' ।

'एष देवो रथर्यति[5] पवमानो दशस्यति[6] । आविष्कृणोति वग्वनुम्' (ऋ० सं० ९ । ३ । ५) ॥ शुनःशेपस्यार्षम् । पवमानी सौमी[7] । ग्रावस्तुत आवापे (आश्व० श्रौ० ५ । १२) । एष सोमो देवो रथर्यति रंहणमात्मनो गमनमिच्छति । पवमानो दशस्यति दानमात्मन इच्छति कथं नाम मां देवेभ्यो दद्युरिति । किंच । आविष्कृणोति प्रकाशीकरोति वग्वनुं वाचो वननीयं दत्त मां देवेभ्य इति । एवमत्र 'रथर्यति[8] रथप्रेप्सुः' शब्दसारूप्यादित्युपपद्यते[10] ॥ २८ ॥

एकादशस्य[11] पञ्चमः पादः ॥

षष्ठः पादः ।

धेनुं न इषं पिन्वतमसंक्राम् । असंक्रमणीम्[12] । आधव आधवनात् । मतीनां च साधनं विप्राणां चाधवमित्यपि निगमो भवत्यनवब्रवोऽनवक्षिप्तवचनः । विजेषकृदिन्द्र इवानवब्रव इत्यपि निगमो भवति[13] ॥ २९ ॥

---

१ घ. झ. ट. ठ. ड. 'मार्थे. २ घ. झ. ट. ठ. ड. °वतीति नका°. ३ ग. ज. रथहर्ये°. ४ क. ख. ज. घ. झ. ट. रथर्यति; ग. रथर्यति । १६ । एष°; ठ. ड. रथयति. ५ घ. झ. ट. °र्यति॰ वग्वनुम् । शुन°. ६ ग. न. स्याति । शुन°. ७ क. ख. घ. झ ट. सौमी । गायत्री । ग्राव°. ८ च. °र्यति॰ रथ°ः. ९ क. ख. घ. झ. ट. ठ. ड. °रूप्यादेतदुप°. १० ग. २१; इतरेष्वङ्को न विद्यते. ११ क. ख. °वते । असक्रामि°; ठ. ड. °वते । इति निरुक्तभाष्ये निघण्टपञ्चाध्यायेन सह एकादशाध्याये पञ्चमः पादः । इत्यष्टाविंशतिः खण्डः. १२ क. ख. द. °मणीम् । ५ । इति (द. इति नैरुक्तस्य) षष्ठाध्यायस्य पञ्चमः पादः; छ. त. °मणीम् । २१ । पञ्चमः पादः (त. 'चतुर्थः पादः' इति प्रान्ते लिखितम्). १३ क. ख. १ (२२). छ. त. ३२; द. १.

‘ असक्राम् ’

‘ असक्राम् ’ (११९) इत्यनवगतम् । ‘ असंक्रमणीम्[1] ’ इति शब्दसमाधिः[2] । ‘ पुरु हि वां पुरुभुजौ[3] देष्णं धेनुं न इषं पिन्वतमसक्राम् । स्तुतश्च वां माध्वी सुष्टुतिश्च रसाश्च ये वामनु रातिमग्मन् ’(ऋ० सं० ६ । ६३ । ८)॥ भरद्वाजस्यार्षम्[4] । प्रातरनुवाकाश्विनयोः शस्यते (आश्व० श्रौ० ४ । १५) । पुरु हि वां बहु देष्णं दानं युवाभ्यां यज्ञे यस्मात् हे पुरुभुजा बहुभोजिनौ अश्विनौ तस्माद्युवां ब्रूमः[5] । धेनुं नः तर्पयन्तीमस्मभ्यम्[6] इषम् अन्नलक्षणं पिन्वतं प्रक्षारयतम्[7] असक्राम् असंक्रमणशीलाम् अनपायिनीमस्मत्तः । अथवा । असंक्रमणशीलां धाम् इव[8] इषम् इषो हेतूदकमस्मदर्थं[9] प्रक्षारयतमिति स्यात् । किं पुनः तद्युवयोर्बहुदानमिति । स्तुतश्च स्तुतशस्त्रवांश्च[10] सोमो युवयोरन्नं हे माध्वी मधुपौ । सुष्टुतिश्च शोभनाभिः स्तुतिभिः सुष्टु स्तुतः । रसाश्चाज्यादयः य एते रातिं पुरोडाशस्यानुगच्छन्ति[11] । सर्व एते युवयोरेव । तस्माद्युवां ब्रवीमि पिन्वतमिति । एवमत्र शब्दसारूप्यादर्थाविरोधाच्च ‘ असक्राम् ’ इत्यस्य शब्दस्य ‘ असंक्रमणीम् ’ इत्येष विपरिणाम उपपद्यते । इडाभिधेया द्यौर्वा[12] ।

‘ आधवः ’

‘ आधवः ’ (११७) इत्यनवगतम् । ‘आधवनात् ’ इत्यवगमः । आकम्पनादित्यर्थः[13] । मंसीमहि त्वा वयमस्माकं[14] देव पूषन् । मतीनां च साधनं विप्राणां चाधवम् ’ (ऋ० सं० १० । २६ । ४)॥ विमदस्यार्षम्[15][16] । मंसीमहि त्वा

---

१ ग. ज. असंक्रानिणी°; च. असंक्राम °क्र. २ ग. °माधिः । १७ । पुरु°. ३ ग. ज. °भुजा । भर°; घ. झ. ट. °भुजा देष्णं० मनु रातिमग्मन् । भर°. ४ क. ख. घ. झ. ट. ठ. ड. °स्यार्षम् । त्रिष्टुप् । आश्विनी । प्रात°; °स्यार्षम् ᵕ प्रात° त्रिष्टुप् । आश्विनी ।. ५ ग. ज. ब्रूम; च. ब्रूं°मः. ६ क. ख. घ झ. ट. तर्पयित्रीम°; ग. तर्पयाति तर्पयितीत्रीम°; ज. तर्पयितर्पयतीत्रीम°; च. तर्पयन्ती° यित्री; ठ. ड. तर्पयित्री अस्म°. ७ क. ख. ग. ज. °यन्तम्°. ८ च. इवं; इतरेषु ‘ इव ’ नास्ति. ९ ग. ज. °मिषहेतू°. १० ग. ज. °शत्रवां°; च. °शस्त्रवां° स्त्र. ११ क. ख. घ. झ. ट. ठ. ड. °च्छाति. १२ क. ख. °द्यौर्वा ॥ ५ ॥ इति निरुक्तवृत्तौ एकादशाध्यायस्य (षष्ठाध्यायस्य) पञ्चमः पादः. १३ ग. °त्यर्थः । १८ । मंसी°. १४ ग. ज. वयं । विम°; घ. झ. ट. वयं० णां चाधवम् । ऐन्द्रस्य विम°. १५ क. ख. घ. झ. ट. ठ. ड. ऐन्द्रस्य विम°; च. ᵕ विम° ऐन्द्रस्य. १६ क. ख. घ. झ. ट. ठ. ड. °स्यार्षम् । अनुष्टुप् पौष्णी । मं°; च. °स्यार्षम् । ᵕ मं° अनुष्टुप् । पौष्णी ।.

हे पूषन् देव मतीनां च प्रज्ञानामस्माकं साधयितारम् । आदित्येन हि प्राणिनां प्रज्ञा अभिव्यज्यन्ते । किंच । ये चान्येऽपि विप्राः प्राप्तप्रज्ञा मेधाविनः तेषाम् आधवम् आकम्पयितारम् । स्वयमेव तथा त्वमात्मनो गुणवत्तां दर्शयसि यथा प्रोत्कम्पमानहृदयास्ते त्वां स्तुवते । एवमत्र शब्द-सारूप्यादर्थाविरोधाच्च ' आधवः आकम्पयिता ' इत्युपपद्यते ।

' अनवब्रवः ' (११८) इत्यनवगतम् । ' अनवक्षिप्तवचनः ' इत्यवगमः । ' विजेषकृदिन्द्र इवानवब्रवो ३ऽस्माकं मन्यो अधिपा भवेह । प्रियं ते नाम सहुरे गृणीमसि विद्मा तमुत्सं यत आबभूथ (ऋ० सं० १० । ८४ । ५) ॥ मन्योरार्षम् । मान्यवे सूक्ते । श्येनादिषु निष्केवल्ये शस्यते (आश्व० श्रौ० ९ । ७) । विजेषकृत् विजयकृत् इन्द्रः इव अनवब्रवः इन्द्र इवानवक्षिप्तवचनः । न हीन्द्रस्य केनचिदाक्षिप्यते वचः । हे मन्यो यस्त्वमनवक्षिप्तवचन इन्द्र इव स त्वमस्माकम् अधिपाः अधिष्ठाय पाता भव । किंच । हे सहुरे शत्रूणां सहनशील प्रियं ते यत् नाम तेन त्वां गृणीमसि । नित्यमेव स्तुम इत्यर्थः । किंच । विद्म जानीमो वयं तमुत्सम् उत्स्यन्दनं यतः त्वम् आबभूथ । आभवसीत्यर्थः । एवमत्र शब्दसारूप्यादर्थाविरोधाच्च ' अनवब्रवोऽनवक्षिप्तवचनः ' इत्युपपद्यते ।

' अनवब्रवः '

' सदान्वे ' (११९) इत्यनवगतम् । ' सदानोनुवे ' इति शब्द-समाधिः ॥ २९ ॥

अरायि काणे विकटे गिरिं गच्छ सदान्वे । शिरिम्बिठस्य सत्वभिस्तेभिष्ट्वा चातयामसि (ऋ० सं० १० । १५५ । १)॥

---

१ क. ख. घ. झ. ट. ठ. ड. 'अपि' नास्ति; ग. ज. °न्येऽपि विप्राप्तप्रज्ञाः. २ ग. °गमः । १९ । विजे°. ३ ग. ज. इव । मन्यो°; च. झ. ट. इवा ० यत आबभूथ । मन्यो°. ४ क. ख. घ. झ. ट. ठ. ड. °रार्षम् त्रिष्टुप् । मान्य°; च. °रार्षम्° । ४ मान्य° त्रिष्टुप् ।. ५ च. झ. ट. ठ. ड. °वल्ये सूक्ते श°; च. °वल्ये ४ श° सूक्ते. ६ ग. ज. ' हे सहुरे शत्रूणां सहनशील ' नास्ति; च. ' किंच ४ प्रियं° हे सहुरे शत्रूणां सहनशील. ७ क. ख. °द्यते । १ (२३) । सद्दा°; ठ. ड. °द्यते । इति निरुक्तटीकायां षष्ठाध्याये एकोनत्रिंशत्खण्डः. ८ ग. २० । ३२; इतोऽग्रेऽङ्को नास्ति.

अदायिनि काणे विकटे काणोऽविक्रान्तदर्शन इत्यौपमन्यवः कणतेर्वा स्यादणूभावकर्मणः कणतिः शब्दाणूभावे भाष्यतेऽनुकणतीति[1] मात्राणूभावात्काणो[2] दर्शनाणूभावात्काणो विकटो विक्रान्तगतिरित्यौपमन्यवः कुटतेर्वा स्याद्विपरीतस्य[3] विकुटितो भवति गिरिं गच्छ सदानोनुवे शब्दकारिके। शिरिम्बिठस्य सत्वभिः। शिरिम्बिठो मेघः शीर्यते बिठे बिठमन्तरिक्षं[4] बिठं बीरिटेन व्याख्यातं तस्य सत्त्वैरुदकैरिति स्यात्तैष्ट्वा चातयामोऽपि वा शिरिम्बिठो भारद्वाजः कालकर्णोपेतोऽलक्ष्मीर्निर्नाशयांचकार[5] तस्य सत्त्वैः कर्मभिरिति स्यात्तैष्ट्वा चातयामश्चातयतिर्नाशने पराशरः पराशीर्णस्य वसिष्ठस्य स्थविरस्य जज्ञे। पराशरः शतयातुर्वसिष्ठ इत्यपि निगमो भवतीन्द्रोऽपि पराशर उच्यते पराशातयिता[6] यातूनाम्। इन्द्रो यातूनामभवत्पराशर इत्यपि निगमो भवति क्रिविर्दती विकर्तनदन्ती। यत्रा वो दिद्युद्रदति क्रिविर्दतीत्यपि निगमो भवति करूळती[7] कृत्तदती। अपि वा[8] देवं कंचित्कृत्तदन्तं दृष्ट्वैवमवक्ष्यत्॥ ३०॥[9]

अरायि काणे[10] विकटे। शिरिम्बिठस्य भारद्वाजस्यार्षम्[11]। दुर्भिक्षाधिदेवतोच्यते कालकर्णी[12] वा अलक्ष्मीः। हे अरायि

'सदान्वे' अदायिनि दुर्भिक्षाधिदेवते। अथवा। हे अलक्ष्मि। दुर्भिक्षोपनिपीडितानां[13] न दाने मतिः प्रभवति नाप्यलक्ष्म्याभिभूतानाम्। काणे। दुर्भिक्षेण ह्यभिभूतानां[14] मान्द्यं चक्षुषो-

---

१ त. °ष्यतेणूक° नु. २ क. ख. छ त. द. °भावात्कणो°. ३ छ. त. द. 'विपरीतस्य' नास्ति. ४ छ. त. द. 'बिठमन्तरिक्षं' नास्ति. ५ क. ख. त. द. °लक्ष्मीर्निर्णाश°; छ. °लक्ष्मी निर्णाश°. ६ छ. त. द. 'परा' नास्ति. ७ क. ख. छ. त. द. करूलती. ८ छ. त. द. 'अपि वा० वक्ष्यत्' नास्ति. ९ क. ख. २ (३०); छ. त. ३३; द. २. १० क. ख. काणे० चातयामसि। शिरि°; घ. झ. ट. काणे विकटे० चातयामसि। शिरि°; ठ. ड. काण इति। शिरि°. ११ क. ख. घ. झ. ट. ठ. ड. °स्यार्षम्। अनुष्टुप्। दु°. १२ ग. ज. कालवर्णी. १३ क. ख. घ. झ. ट. ठ. ड. दुर्भिक्षेण पीडि°; च. दुर्भिक्षोपनिपी° क्षेम. १४ ग. ज. ह्यतिभू°.

भवत्यन्नाभावात् । अलक्ष्मीपक्षेऽपि तद्रूपा अलक्ष्मीरिति प्रतीयते । लोकेऽपि[1] या विरूपा भवति अलक्ष्मीरिति सोच्यते । विकटे । दुर्भिक्षे दुर्बलत्वाद्वि- कटेव प्राणिनां गतिर्भवति । अलक्ष्मीरपि तद्रूपा । गिरिं गच्छ । मात्रास्थानं कार्षीः । सदान्वे सदानोनुवे शब्दकारिके । दुर्भिक्षे हि क्षुत्पीडिताः प्राणिनो निःश्वसन्तः[2] सदैव शब्दं कुर्वन्ति । अलक्ष्मीरपि तद्रूपा । पिशाचादीनि नित्यमव्यक्तं शब्दं कुर्वन्ति । पिशाचाद्या हि शृणु नसुनायन्तस्थेति लोके[3] वक्तारो भवन्ति । एतत्प्रसिद्धम् । शिरिम्बिठस्य मेघस्य स्वभूतैः सत्त्वभिः उदकैः । ' सत्त्वम् ' इति ह्युदकनामसु पठितम् (निघ० १ । १२)। तैरुदकैर्वयं त्वां चातयामः । चातयतिर्नाशने[4] प्रसिद्धः । प्रचातित इति हि लोके श्रूयते । चतति पततीति गतिकर्मसु पठितम् (निघ० २ । १४)। मेघोत्थैरेव ह्युदकैर्दुर्भिक्षं नाश्यते । ' अथ वा शिरिम्बिठो भारद्वाजः । तस्य सत्त्वैर्नामभिः ' । तेन यानि दृष्टानि नामानि संभवनसमर्थानि स्तुति- संयुक्तानि तैर्वयं त्वां नाशयामः । एवमत्र शब्दार्थाविरोधात् ' सदान्वे ' इत्यस्य ' सदानोनुवे ' इत्येव विपरिणाम उपपद्यते ।

निगमप्रसक्तान्यधुनोच्यन्ते । रातीति दातीति[5] दानकर्मसु पठितः[6] (निघ० ३ । २०) । तस्य प्रतिषेधपूर्वस्य ' अरायि ' इति भवति । 'कणतिः शब्दाणूभावे भाष्यतेऽनुकणतीति । मात्राणूभावात्कणः ' श्यामाकादिः । तत्सामान्यात् ' दर्शनाणूभावात्काणः[7] ' । अथवा ' काणो विक्रान्तदर्शनः इत्यौपमन्यवः ' । विक्रान्तं हि तस्य दर्शनं भवत्येकीभूतत्वात्[8] । ' अवि- क्रान्तदर्शनः ' इति वा मन्दचक्षुष्ट्वात् । ' विकटो विक्रान्तगतिः ' । विकृतगतिरित्यर्थः । ' अथवा कुटतेः धातोः स्यात् ' । असौ हि ' विकुटितो भवति ' । कुब्जीभूत[9] इत्यर्थः । ' बिठम् ' इत्यपठितमन्त- रिक्षनाम[10] । तत्पुनरेतत् ' बीरिटेन व्याख्यातम् ' । तत्र[11] ह्युक्तम् ' बीरिट- मन्तरिक्षं भियो वा भासो वा ततिः ' (निरु० ५ । २८) । तस्मिन्[12]

---

१ क. ख. घ. ट. 'पि च या; च. °पि॰ या° च. २ ग. ज. निः स्वमन्तः; च. निःस्वसन्तः° श्व. ३ ग. ज. पिशाचो सुणुन् सुनायंतस्था (ग. स्थ) ति लोके; च. पिंशाचोणन् सुनायंतस्थति लोके. ४ ग. च. ज. °यतिर्णाशने. ५ घ. झ. ट. ठ. ड. अतती°. ६ क. ख. 'राति रासति इति°; घ. ट. ठ. ड. 'दातीति' नास्ति. ७ च. पठितैः° तं. ८ ट. 'त्कोणः त्क°. ९ घ ट. ठ. ड. °त्येकभू°. १० क. ख. घ. झ. कुत्सीभू°; ट. कुत्सीभू° ब्जी. ११ क. ख. घ. झ. ट. ठ. ड. °नामसु. १२ क. ख. झ. अत्र; घ. ट. ठ. ड. अतत्र.

'बिठे' यः 'शीर्यते' सः 'शिरिम्बिठो (१२०) मेघः'। 'अपि वा शिरिम्बिठो भारद्वाजः'। सोऽनेन सूक्तेन 'अलक्ष्मीर्निर्नाशयांचकार' इति निदानमन्वाख्यातम्। अद्यापि योऽलक्ष्म्याभिभूतो भवति स आस्यदघ्न उदकेऽवतीर्य सूक्तमेतज्जपति। तस्याऽलक्ष्मीर्निर्नश्यति।

'पराशरः' (१२१) इत्यनवगतमनेकार्थं च। 'पराशीर्णजः' इत्यवगमः। 'प्र ये गृहादममदुस्त्वाया पराशरः शतयातुर्वसिष्ठः। न ते भोजस्य सख्यं मृषन्ताधा सूरिभ्यः सुदिना व्युच्छान्' (ऋ० सं० ७।१८।२१)॥ वसिष्ठस्यार्षम्। ऐन्द्रे सूक्ते। प्रकर्षेण ये अममदुः तृप्तवन्तः सोमेन हृष्टवन्तो वा यज्ञेषु हे इन्द्र त्वाया त्वया सह पराशरः च शतयातुः बहूनां रक्षसां यातयिता। तेन हि रक्षोघ्नं सत्रमाहृतमासीदिति भारते श्रूयते। वसिष्ठश्चेत्येवमादयः। किं तेषामिति। न ते भोजस्य भोगिनः तव सख्यं सखिभावं मृषन्त मार्जयन्ते। नाशयन्तीत्यर्थः। अथैवंगुणयुक्तेभ्यः सुदिना शोभनानि दिनानि व्युच्छान्। विभान्तीत्यर्थः। तेषामेव सुप्रभाता रात्रय इत्यभिप्रायः। एवमत्र 'ऋषिः पराशरो' वसिष्ठसंबन्धात्।

'इन्द्रोऽपि पराशर उच्यते'। स हि परितः 'शातयिता यातूनां' यातयितव्यानामसुरादीनामिति। 'इन्द्रो यातूनामभवत्पराशरः' (ऋ० सं० ७।१०४।२१) इति। व्याख्यातः शेषः (निरु० ३।२०)।

'क्रिविर्दती' (१२२) इत्यनवगतम्। 'विकर्तनदन्ती' इत्यवगमः। 'यूयं न उग्रा मरुतः सुचेतुनारिष्टग्रामाः सुमतिं पिपर्तन। यत्रा वो दिद्युद्रदति क्रिविर्दती रिणाति पश्वः सुधितेव बर्हणा' (ऋ० सं० १।१६६।६)॥ अगस्त्यस्यार्षम्। जगती। हे मरुतः। उद्गूर्णाः

१ ग. °लक्ष्मी निर्नाश°; च. लक्ष्मी निर्नाश°; ज. लक्ष्मीर्निनाश°. २ क. ख. झ. °शीर्ण इत्य° ३ ग. °मगः। २१। प्र°. ४ ग. ज. गृहाद्ममदुः। वसि°; घ. झ. ट. गृहात्॰ व्युच्छान्। वसि°. ५ क. ख. घ. झ. ट. ठ. ड. सूक्ते। त्रिष्टुप्। प्रक°; च सूक्ते। ॰प्रक° त्रिष्टुप्. ६ क. ख. घ. झ. ट. ठ. ड. °केभ्यस्तेभ्यः सूरिभ्यः सुदि°; च. °केभ्यः ॰ सुदि° तेभ्यः सूरिभ्य. ७ म. °गमः।२२। यूयं°. ८ ग. ज. मरुतः। अग°; घ. झ. ट. मरुतः ॰ बर्हणा। अग°.

अरिष्टग्रामाः अनुपहिंसितसंघाता यूयमस्माकं सुचेतुना शोभनेन प्रज्ञानेन एतां सुमतिं शोभनां मतिं पिपर्तन पूरयत प्रीणयत वा । केन पुनः पूरयत कुतो वा पूरयतेति । यत्रा वो दिद्युत् यत्र यस्मिन् मेघे दिद्युद् आयुधं क्षिप्तं युष्माभिस्तमेव मेघं रदति विलिखति विदारयति वर्षार्थम् । किंलक्षणा पुनर्दिद्युदिति । क्रिविर्दती विकर्तनसमर्थैर्दन्तैर्या रदति । कथं पुनर्या रदति । रिणाति पश्वः सुधितेवेति । यथा पशोरङ्गानि निरिणाति पृथक्करोति सुधिता स्वधित्या बर्हणा परिवृद्धया हिंसया । एवं यस्मिन् मेघे दिद्युदस्ता रदति ततः प्रभ्रष्टेनोदकेन सुमतिमस्माकं पिपर्तन । एवमत्रार्थाविरोधादायुधं क्रिविर्दतीशब्देनोच्यत इत्युपपद्यते ।

• ‘करूळती’ (१२१) इत्यनवगतम्। ‘कृत्तदती’ इत्यवगमः ॥३०॥

• वामंवामं त आदुरे देवो ददात्वर्यमा । वामं पूषा वामं भगो वामं देवः करूळती (ऋ० सं० ४ । ३० । २४)॥ वामं वननीयं भवत्यादुरिरादरणात्तत्कः करूळती भगः पुरस्तात्तस्यान्वादेश इत्येकं पूषेत्यपरं सोऽदन्तकोऽदन्तकः पूषेति च ब्राह्मणम् । दनो विश इन्द्र मृध्रवाचः । दानमनसो नो मनुष्यानिन्द्र मुदु वाचः कुरु । अवीरामिव मामयं शरारुरभि मन्यते । अबलामिव मामयं बालोऽभिमन्यते संशिशरिषुरिदंयुरिदं कामयमानोऽथापि तद्वदर्थे भाष्यते । वसूयुरिन्द्रो वसुमानित्यत्रार्थः। अश्वयुर्गव्यूरथयुर्वसूयुरिन्द्र इत्यपि निगमो भवति ॥ ३१ ॥

‘वामं वामं ते’ । वामदेवस्यार्षम् । ऐन्द्रे सूक्ते । रात्रिपर्याये प्रशास्तुः शस्त्रे विनियुक्ता (आश्व० श्रौ० ६ । ४) ।

‘करूळती’ वामं वामं त इति भूयस्त्वार्थेऽभ्यासः । ‘अभ्यासे भूयांसमर्थं मन्यन्ते’ इति हि वक्ष्यति (निरु० १० । ४२) । यद्यत्सुष्ठु वननीयम् इष्टं च तव धनं तत्तत् हे आदुरे

---

१ क. ख. घ. झ. ट. ठ. ड. पालयत वा; च. प्रीणय° पाल. २ क. ख. ग च. ज. घ. ट. करूलती. ३ क. ख. २ (३०); ग. २३ । ३३; ठ. ड. °गमः इति निरुक्तभाष्ये षष्ठाध्याये त्रिंशत् खण्डः. ४ क. ख. छ. त. द. करूलती. ५ ड. थ. ध. तद्वर्थे; छ. तद्व्र्थे° द. ६ क. ख. छ त. द. ‘ इन्द्रः ’ नास्ति. ७ क ख. ३ (३१), छ त. ३४; द. ३. ८ घ. झ. ट. त आदुरे• देवः करूल (ट. ळ) ती । वाम°; ठ. ड. वामं त इति । वाम°. ९ क. ख. घ. झ. ट. ठ. ड. सूक्ते । अनुष्टुप् । रा°; च. सूक्ते । ०रा° अनुष्टुप् । • २३

आदरवन् यजमान । स हि यागं प्रति नित्यमादृतो भवतीत्यत एवं संबोध्यते । हे आदुरे वामं ददात्वर्यमा । यदर्यम्णो वामं वननीयम् इष्टमात्मनो धनं तदसौ तुभ्यं ददातु । किंच । वामं पूषा ददातु । वामं भगो ददातु । वामं देवः करूळेती[1] ददात्वित्येतदेवानुवर्तते । 'करूळेती[2]' इत्येतद्गुणपदत्वात्संदिह्यते । 'तत्' एतद्विचार्यते । 'कः करूळेती' ईति[3] । भगः पुर-

कः करूळती

स्तात्' करूळेतीशब्दस्य । 'तस्य' ऐषोऽयम्[4] 'अन्वादेशः' संनिधानसामर्थ्यात् । 'इत्येकम्' आचार्यमतम् । 'पूषेत्यपरम्' । किं कारणम् । 'सः' हि पूषा 'अदन्तकः' । आह । कुत एतदिति । उच्यते । 'अदन्तकः पूषेति च ब्राह्मणम्' । प्राशित्रभागब्राह्मणे हि श्रूयते । 'तत्पूष्णे पर्याजह्रुस्तत्पूषा प्राश्नात्तस्य दतो निर्जघान तस्मादाहुरदन्तकः पूषा' (शत० ब्रा० १ । ७ । ४ । ६)। इति । यत् पुनरेतदुक्तं संनिधिसामर्थ्याद्भगः करूळेती स्यादित्यकारणमेतत् । 'यस्य येनार्थसंबन्धो दूरस्थमपि तस्य तत् । अर्थतो ह्यसमर्थानामानन्तर्यमकारणम्' इति न्यायविदः पठन्ति । तस्मात्पूषैव करूळेती इत्युच्यते शब्दसारूप्यादर्थोपपत्तेश्चेति ।

'दनः'

'दनः[5]' (१२४) इत्यनवगतम् । 'दानमनसः' इत्यवगमः । 'दनो विश इन्द्र[6] मृध्रवाचः सप्त यत्पुरः शर्म शारदीर्दर्त् । ऋणोरपो अनवद्यार्णा यूने वृत्रं पुरुकुत्साय रन्धीः' (ऋ० सं० १ । १७४ । २) ॥ अगस्त्यस्यार्षम् । हे इन्द्र दनो दानमनसः एनैतान् अस्मभ्यं विशो मनुष्यान् कुरु मृदुँवाचः[7] । कस्मात्पुनरेवमुच्यते । इतो यस्मात्त्वं सप्त सृप्ताः पुरः मेघपुरः शारदीः शरत्कालोत्थाः संवत्सरोत्था वा । संवत्सरोऽपि शरदित्युच्यते 'स जीव शरदः शतम्' इति लिङ्गात् । शर्म सुखमिच्छन् जनानां दर्त् त्वं[8] दारयासि चँ[9] । किंच । अनवद्यार्णा अनवद्योदकाः ताः

---

१ क. ख. ग. च. ज. घ. झ. करूलती. २ क. ख. घ. झ. करूलती; ग. च. ज. करूहती. ३ म. ज. 'इति' नास्ति; च. करूडती । भगः° इति. ४ क. ख. घ. झ. ट. ठ. ड एवायं°. ५ ग. °गमः । २४ । दनो°. ६ ग. ज. इन्द्र । अग°; घ. झ ट. इन्द्र० कुत्साय रन्धीः । अग°. ७ क. ख. घ. झ. ट. ठ. ड. कुरू मृध्रवाचो मृदु°; च. कुरु मृदु° मृध्रवाचः. ८ क. ख. घ. झ. ट. ठ. ड. 'त्वं' नास्ति. ९ क. ख. घ. झ. ट. ठ. ड. 'च' नास्ति; च. चँ.

पुरः ऋणोरपेः गमितवानसीमं लोकं प्रति अपः । स्वभाव एवैष तव लोकाननुग्रहीतुमित्यभिप्रायः । किंच यूने वृत्रम् । यौतिः स्तुत्यर्थः । स्तोत्रे यजमानाय पुरुकुत्साय बहुस्तुतिकर्त्रे वृत्रं धनं रन्धीः । संपादितवानसी-त्यर्थः । यत एवमुपकारप्रवृत्तो भवान् स्तोतृणामन्येषां च जनानां तस्मा-दब्रूमोऽस्माकमप्येतान् मृदुवाचः कुरु मनुष्यानिति । एवमत्र 'दनः' इत्ये-तस्मिन् पदे दकारे 'दानमनसः' इत्येतान्यक्षराण्यध्याहृतानि भाष्यकारेण नकारश्चास्मद्योगे विभज्योदाहृतस्तथार्थोपपत्तिदर्शनात् । 'कुरु' इत्ये-तद्वाक्यपरिसमाप्त्यर्थमध्याहृतम् । उत्तरास्त्रयः पादा हेतुभावेन 'सप्त यत्पुरः' इत्येतस्मात्सर्वनामसंबन्धात् ।

'शरारुः' (१२५) इत्यनवगतम् । 'संशिशारिषुः' इत्यवगमः ।

'शरारुः'

'अवीरामिव मामयं शरारुरभि मन्यते । उताहमस्मि वीरिणीन्द्रपत्नी मरुत्सखा विश्वस्मादिन्द्र उत्तरः (ऋ० सं० १० । ८६ । ९) ॥ इन्द्रपत्न्येवं ब्रवीति । अवी-रामिव अपरिग्रहामिव अबलामिव मामयं शरारुः बालो मूर्खः संशिशारिषुः संशातुमिच्छन् । शरीरं तित्यक्षुरित्यर्थः । अभिमन्यते । अभिभविष्याम्ये-तामित्येवमभिमन्यते क्षुद्रया बुद्ध्या नहुषोऽन्यो वा कश्चित् । नहुषेण हीन्द्रा-ण्यभिभवितुमारब्धासीदित्याख्यानं श्रूयते । उताहमस्मि वीरिणी । अथ च तावदस्मि वीरिण्येव । केन च पुनर्वीरेण वीरिणी । इन्द्रपत्नी इन्द्रस्याहं पत्नी । मरुत्सखा य इन्द्रः सर्वस्माद्य उत्तरो जगत उद्गततरः प्रभावेण स मम वीरः । तदयं बालो न बुध्यते येन मामभिभवितुमिच्छतीत्यभिप्रायः । एवमत्र 'शरारुः संशिशारिषुः' शब्दसारूप्यादर्थोपपत्तेश्च ।

'इदंयुः' (१२६) इत्यनवगतमनेकार्थं च । इदमिति यत्किंचिद-

'इदंयुः'

भिप्रेतं निर्दिश्यते । तद्यः कामयते स इदंयुरि-त्युच्यते । 'युः' इत्येष शब्दोऽप्रसिद्धः काम-यतेरर्थे । तेनानवगतमेतत् । 'नानाधियो वसूयवः' (निरु० ६ । ६)

१ क. ख. घ. झ. ट. ठ. ड. 'रपगामि°. २ क. ख. ग. च. ज. घ. झ. ट. ठ. ड. °नुगृहीतु°. ३ क. ख. घ. झ. ट. ठ. ड. °कारे प्र°. ४ क. ख. घ. झ. ढ. ठ. ठ. इत्यस्मिन्. ५ ग. °गमः । २५ । अवी°. ६ ग. ज. मां । इन्द्रप°; घ. झ. ट. मामयं॰ दिन्द्रः उत्तरः । पङ्क्तिरैन्द्री । इन्द्रप°. ७ च. उत्तरः । ४ इन्द्रप° पङ्क्तिरैन्द्री ; ठ. ढ. उत्तरः । पङ्क्तिरैन्द्री । इन्द्रप°. ८ क. ख. घ. झ. ट. ठ. ड. °पत्न्येवं ब्र°. ९ च. मूर्खः °र्खः. १० क. ख. घ. झ. ट. ठ. ड. मे. ११ क. ख. घ. झ. मन्यते; ट. मन्यते बुध्य; ठ. ड. मन्यते बुध्यते.

इत्यनेन गतार्थं मन्यमानो भाष्यकारो निगमं न ब्रवीति । वार्तिककारेणाप्युक्तम् । ' निगमवशाद्ध्यर्थं भवति पदं तद्धितस्तथा धातुः । उपसर्गगुणनिपातौ मन्त्रगताः सर्वथा लक्ष्याः ' ।

' अथापि यु इत्येष तद्वदर्थे मत्वर्थे भाष्यते' । आह । किमुदाहरणम् ।

तद्वदर्थे युः

' वसूयुरिन्द्रः ' इति । वसुमानित्यर्थः[3]। ' इन्द्रो अश्मायि सुध्यो निरेके पज्रेषु स्तोमो दुर्यो न यूपः । अश्वयुर्गव्यू रथयुर्वसूयुरिन्द्र इद्रायः क्षयति प्रयन्ता (ऋ० सं० १ । ५१ । १४) ॥ सव्यत्वमापन्नस्येन्द्रस्येयमार्षम् । दशरात्रस्य सप्तमेऽहनि मरुत्वतीये शस्यते । यः इन्द्रः अश्मानि शृणाति । हिनस्तीत्यर्थः । सुध्यः शुद्धविक्रमः अजिह्मयोधी । अथवा । शोधयिता योधानां प्रहारैः । सुधीर्वा स्यात् । क पुनः शृणाति । निरेके संग्रामे । यत्रैकोऽप्यन्यः सहायो नास्ति तत्रैक एव शत्रून् हन्ति । पज्रेषु प्रार्जितायुधेष्वपि पदेषु संग्रामेषु । किंच । स्तोमो न स्तोम इव यः प्रधानः । त्रिवृत्स्तोमः पञ्चदश इति हि व्यपदेशः सोमे प्रभवति स्तोमेन तस्य प्राधान्यात् । किंच । य इन्द्रो दुर्यो न दुर्य इव यूपः यः प्रधानः । तस्य किमिति । स इन्द्रः अश्वयुः अश्वैस्तद्वान् गव्युः गोभिस्तद्वान् रथयुः रथैस्तद्वान् वसूयुः इत्यन्यैर्वसुभिस्तद्वान् । एवंगुणविशिष्टो य इन्द्रः स रायेषु धनेषु जनानां दातव्येषु क्षयति ईष्टे । प्रयन्ता । प्रकर्षेण दातेत्यर्थः । एवमत्र ' वसूयुः ' इत्ययं युशब्दः ' तद्वदर्थे ' । किं कारणम् । न हीन्द्रो वसु कामयते संपूर्णत्वात् । परिशेषादयं ' तद्वदर्थे ' दृश्यत इत्युपपद्यते ।

' कीकटेषु ' (१२७) इत्यनवगतम् । ' किंकृताः ' इति शब्दसमाधिः । ' किं क्रियाभिः ' इति वा[16] ॥ ३१ ॥

---

१ घ. ठ. ड. पदं न तद्धित°. २ घ. ट. ठ. ड. °निपातमन्त्र°. ३ ग. °त्यर्थः । २६ । इन्द्रो°. ४ ग. ज सुध्यः । सव्य°; घ. झ. ट. सु (घ. शु; ट. शुं°सु) ध्यो० क्षयति प्रयन्ता । सव्य°. ५ क. ख. घ. झ. ट. ठ. ड. °मार्षम् । ऐन्द्री । त्रिष्टुप् । दश°; च. °मार्षम् । दश° ऐन्द्री । त्रिष्टुप् । ६ क. ख. घ झ. ट. ठ. ड. °शुध्यः; च. सुध्यः° शु. ७ ग. ज. योद्धानां; च. योद्धानां° धा. ८ च. सुर्वा°र्गी° धीर्वा. ९ ग. ज. प्रधानस्त्रिवृ°; च. प्रधानस्त्रिवृ° स्त्रि १० च. गव्यूः. ११ च. तद्वदर्थे° द १२ क. ख. घ. झ. ट. ठ. ड. सुपूर्ण°. १३ ग. च. ज. तत्वदर्थे. १४ क. ख. °पद्यते । ३ (३१) । कीक°; ठ. ड. °पद्यते । ३१ । कीक°. १५ ग. ज. इति च. १६ ग. २७ । ३४; इतरेष्वङ्को नास्ति.

किं ते कृण्वन्ति कीकटेषु गावो नाशिरं दुह्रे न तपन्ति घर्मम् । आ नो भर प्रमगन्दस्य वेदो नैचाशाखं मघवन्रन्धया नः (ऋ० सं० ३ । ५३ । १४)॥ किं ते कुर्वन्ति कीकटेषु गावः कीकटा नाम देशोऽनार्यनिवासः । कीकटाः किंकृताः किं क्रियाभिरिति प्रेप्सा वा[1] नैव चाशिरं दुह्रे न तपन्ति घर्मं[2] हर्म्यमाहर नः प्रमगन्दस्य धनानि मगंदः कुसीदी मांगदो[3] मामागमिष्यतीति च ददाति तदपत्यं प्रमगन्दोऽत्यन्तकुसीदिकुलीनः[4] प्रमदको वा योऽयमेवास्ति लोको न पर इति प्रेप्सुः पण्डको[5] वा पण्डकः पण्डगः प्रार्दको वा प्रार्दयत्याण्डावाण्डावाणी इव व्रीडयति[6] तत्स्थं नैचाशाखं नीचाशाखो नीचैःशाखः शाखाः शक्नोतेराणिररणात्तन्नो मघवन्रन्धयेति रध्यतिर्वशगमने बुन्द इषुर्भवति बुन्दो[7] वा भिन्दो वा भयदो वा भासमानो द्रवतीति वा ॥ ३२[8] ॥

'किं ते कृण्वन्ति'[9] । विश्वामित्रस्यार्षम्[10] । हे इन्द्र याः कीकटेषु अनार्यदेशनिवासिषु मनुष्येषु गावः ताः तव कमुपकारं कुर्वन्ति । न कंचिदपीत्यभिप्रायः[11] । किं पुनः कारणं न कुर्वन्तीति । नाशिरं दुह्रे न तपन्ति घर्मम् ।

'कीकटेषु'

नाप्याशिरार्थं दुह्यन्ते नापि घर्मे तप्यमानेऽङ्गभावं गच्छन्ति नाप्यग्निहोत्रादिषु कर्मसु । अन्यास्वपि क्रियास्वित्यभिप्रायः । यत एवमतो ब्रूमः । आहर नः ता गाः । वयं तव ताभिराशिरादिविनियोगेनोपकारं करिष्याम इत्यभिपायः । किंच । यदप्येतत्[12] प्रमगन्दस्य वृद्धिजीविनो धनमेतच्चास्मभ्यमाहर । तदपि न क्रियासु तत्स्थं विनियुज्यते । वयं तद्विनियोक्ष्याम

---

१ छ. त द. 'वा' नास्ति. २ 'घर्मं घरणम् । आ हर' इति सायणभाष्ये. ३ छ त. मां गमिष्यन्तीति; द मां गमिष्यतीति. ४ छ. त द °कुसीदः कुली°. ५ द. पण्डगः. ६ छ. त. द व्रीलयाति. ७ छ. त. द. 'बुन्दो वा' नास्ति. ८ क. ख. ४ (३२); छ. त २५; द. ४. ९ घ. झ. ट. °ण्वन्ति ० रन्धया नः. १० क. ख. घ झ. ट ठ. ड. °स्यार्षम् । ऐन्द्री । त्रिष्टुप् हे°; च. °स्यार्षम् । ४ हे° ऐन्द्री । त्रिष्टुप् । . ११ ग. ज. किंचि°; च. किंचि° कं. १२ ग. ज. यद्राप्ये°; च. यद्राप्ये° द.

इत्यभिप्रायः । ‘ प्रमदको वा ’ । नित्यप्रमुदितोऽपि विषयपरः प्रमगन्दः स्यात् । ‘ पण्डको वा ’ । नपुंसकः प्रमगन्दः स्यात् । तयोर्वा[1]पि धनानि क्रियासु न विनियुज्यन्ते । शब्दसारूप्यं च प्रमगन्दशब्द उभयोरस्ति तस्मात्तावप्युपपद्येते । नैचाशाखं मघवन्रन्धया नः । यदेतेषामन्यतमस्य नीचोशाखाप्रसूतस्य नीचवंशप्रसूतस्य [2]हीनकुलस्य धनं तत् हे मघवन् शीघ्रं रन्धय [4]संसाधय । अस्मद्वशं कुर्वित्यर्थः । एवमत्र ‘ कीकटाः किं कृताः ’ किमेते कृता इत्येवमभिव्याहारमर्हन्ति न तैः कश्चिदर्थोऽस्ति । न ते देवपितृमनुष्याणामुपकारं कुर्वन्तीत्यर्थः । अथ ‘ वा । किं क्रियाभिरिति ’ एवं ‘ प्रेप्साः ’ । ते नास्तिका एवमभिप्राया इत्यर्थः । एतस्माच्छब्दसारूप्यादर्थोपपत्तेश्च ‘ कीकटा ’ अनार्यदेशनिवासिन इत्युपपद्यते ।

‘ मगन्दः कुसीदी ’ इत्युच्यते । स हि ‘ माम् ’ इत्यादयतनोऽर्थोऽयं श्व आगमिष्यतीत्येवमनुचिन्त्य परेभ्यो धनानि ‘ ददाति ’ । ‘तदपत्यं प्रमगन्दः । अत्यन्तकुसीदि[6]कुलीनः ’ । तद्धितार्थे[7] प्रमगन्दः ‘प्रस्कण्वस्य’ इति यथा (निरु० ३ । १७) । ‘ प्रमदकः ’ प्रमादशीलः । ‘ अयमेव ’ एको ‘ लोकोऽस्ति न पर इति ’ एवं प्रेप्सुः । नास्तिकः । ‘ पण्डकः ’ तृतीयाप्रकृतिः । स हि पण्डं गच्छति स्त्रीरूपत्वात् । ‘ प्रार्दकः ’ इति ‘ वा ’ स्यात् । प्रकर्षेण ह्यसौ ‘ अर्दयत्याण्डौ ’ । अज्ञा[11]तेः स्त्रीत्वेन गच्छति । ‘ आण्डौ ’ कस्मात् । तौ ‘ आण्डौ आणी इव व्रीडयति ’ । तौ ह्यसौ पण्डको मुखेन मैथुने कर्मणि वर्तमान आणी इव व्रीडयति । संस्तभ्नातीत्यर्थः[13] ।

‘बुन्दः ’ (१२८) इत्यनवगतम् । ‘ इषुर्भवति ’ इत्यभिधेयवचनम् । ‘भिन्दो वा भयदो वा भासमानो द्रवतीति वा’ इति शब्दसमाश्रयः ॥३२॥[14]

---

१ क. ख घ. झ. ट. ठ. ड. ‘अपि ’ नास्ति. २ क. ख. घ. झ. ट. ठ. ड. नीचशा°. ३ च हीनस्य कुल°. ४ च. संसाधय. ५ ग. च. ज. एवमे°. ६ घ. झ. ट. ठ. ड. °कुसीदकु°; च. °कुसीदिकु° इ. ७ क. ख. घ. झ. ट. ठ. ड. °तार्थे प्रः प्रम°. ८ ग. ज. प्रमद°. ९ ग. ज. पण्डि. १० क. ख. ग. ज. ‘आण्डौ’ नास्ति; च. °यति । अज्ञा° आण्डौ. ११ क. ख. घ. झ. ट. ठ. ड. °ज्ञातेः सह स्त्री°; च. °ज्ञातेः स्त्री° सह १२ च तौ आणी° आण्डौ. १३ ठ. त्यर्थः । इति नैरुक्ते षष्ठाध्याये द्वात्रिंशत्खण्डः ३२ । बुन्द°; ड. °त्यर्थः । इति निरुक्तटीकायां षष्ठाध्याये ३२ खण्डः । बुन्दः°. १४ क. ख. ४ (१२); ग.
३२ २४ (३५); इतरेष्वङ्को नास्ति.

तुविक्षं ते सुकृतं सूमयं धनुः साधुर्बुन्दो हिरण्ययः । उभा ते बाहू रण्या सुसंस्कृत ऋदूपे चिदृदूवृधा (ऋ०सं०८।७७।११)॥ तुविक्षं बहुविक्षेपं महाविक्षेपं वा ते सुकृतं सूमयं सुसुखं धनुः साधयिता ते बुन्दो हिरण्मय उभौ ते बाहू रण्यौ[2] रमणीयौ सांग्राम्यौ[3] वर्दूपे अर्दनपातिनौ गमनपातिनौ शब्दपातिनौ[4] दूरपातिनौ वा मर्मण्य[5]र्दनवेधिनौ गमनवेधिनौ शब्दवेधिनौ दूरवेधिनौ[6] ॥ ३३ ॥

'तुविक्षं ते सुकृतं' 'निराविध्यद्गिरिभ्यः' इति कुरुस्तुतेरार्षमेतदृग्द्वयम्[7] । हे इन्द्र तुविक्षं ते बहुविक्षेपं बहूनां त्रिक्षेपाणां सोढृं[9] । सुकृतम् । शोभनानि हि तेन[10] कर्माणि क्रियन्ते । तदेव वा शोभनं

'बुन्दः'

कृतम् । सूमयं च सुखकरं सुहृदाम् । किं पुनस्तदिति । धनुः । किंच । साधुर्बुन्दो हिरण्ययः । साधयिता स्तोमानां शत्रुसंघातानां वा । बुन्दः इषुः । हिरण्[11]मयः । हिरण्यविकृत इत्यर्थः । किंच । उभा ते बाहू उभावपि ते बाहू रण्या रमणीयौ स्वायतौ पीनौ च । अथवा । रणयोग्यौ रण्यौ[12] । सुसंस्कृतौ समलंकृतौ । ऋदूपे अर्दनपातिनौ । अर्दनेन हि गमनेन क्षेपणेनेषूणां तौ शत्रून् पातयतः । ऋदूवृधा । 'ऋदु' इति मर्मोच्यते । तत्र यौ विन्[13]धनौ तौ ऋदूवृधौ । मर्मवेधिनावित्यर्थः । भाष्यमत्र न सम्यगिव लक्ष्यते । तस्य सम्यक् पाठोऽन्वेष्यः । ततो योज्यम्[15] । एवमत्र धनुःसंबन्धात् 'बुन्दः इषुः[14]' । इदं त्वन्यत्स्फुटतरमुदाहरणम् ॥ ३३ ॥

---

१ छ. त. द. बहुविक्षं. २ छ. त. द. 'रण्यौ' नास्ति. ३ छ. त. द. 'ग्राम्यावर्दू°. ४ छ. त. द सायणश्च 'शब्दपातिनौ दूरपातिनौ' नास्ति ५ छ. त. द. सायणश्च 'शब्दपातिनौ दूरवेधिनौ' नास्ति. ६ क. ख ५ (३३); छ त. ३६; द. ५. ७ घ. झ. ट. कृतं । चिदृदूवृधा । निराविध्यदिति च कुरु°; ठ. ड. °कृतमिति । निराविध्यदिति च कुरु°. ८ क ख. घ. झ. ट. ठ. ड. °ग्द्वयम् । ऐन्द्री । सतोबृहती पूर्वा गायत्र्युत्तरा । हे°. ९ ग. च ज. °क्षेपणं सोढृ (च. सोढृं दृ). १० क. ख. घ. झ. ट. ठ. ड. येन. ११ घ. ट. ठ. ड. 'हिरण्ययः' नास्ति. १२ क. ख. घ. झ. ट. ठ. ड. 'रण्यौ' नास्ति. १३ घ. झ. ट. ठ. ड. विध्यतः. १४ क. ख. इषुः । ५ (३३) । इदं°; ठ ड. इषुः । इति निरुक्तभाष्ये षष्ठाध्याये त्रयस्त्रिंशत्खण्डः (ड. °त्खण्डः ३३) । इदं°. १५ ग. २९ (३६); इतरेष्वङ्को नास्ति. २१

निरविध्यद्गिरिभ्य आ धारयत्पक्वमोदनम् । इन्द्रो बुन्दं स्वाततम् (ऋ० सं० ८ । ७७ । ६) ॥ निरविध्यद्गिरिभ्य आधारयत्पक्वमोदनमुदकदानं मेघम्।[1] इन्द्रो बुन्दं स्वाततम्। वृन्दं बुन्देन व्याख्यातं वृन्दारकश्च ॥ ३४ ॥

———

निराविध्यत्[2] । बहूनां[3] मेघानां मध्ये यः पक्वो मेघः उदकदाने[4]-समर्थः तम् इन्द्रः निराविध्यत्[5] । विद्ध्वा च

तस्यैवान्यदुदाहरणम् — तावत् आधारयत्[6] अदारयत् यावन्निरुदकः संवृत्त इति । कथं पुनर्निरविध्यदिति । बुन्दं स्वाततं स्वाकृष्टम् आकर्णाकृत्वा। एवमत्राकर्षणसंबन्धात् 'इषुर्बुन्दः' इत्युपपद्यते ।

'वृन्दम्' — 'वृन्दम्' (१२९) इत्येतत्पदं 'बुन्देन' एव 'व्याख्यातम्' । अस्यापि हि ता एव व्युत्पत्तयो या बुन्दशब्दस्य ।

'वृन्दारकः' — 'वृन्दारकश्च' बुन्देनैव 'व्याख्यातः' । हस्ती वृन्दारकः प्रकरणवशाद्वान्यः कश्चित्[7] ।

'किः' (१३०) इत्यनवगतम् । 'कर्ता' इत्यवगमः ॥ ३४[8] ॥

———

अयं यो होता किरु स यमस्य कमप्यूहे यत्समञ्जन्ति देवाः। अहरहर्जायते मासिमास्यथा देवा दधिरे हव्यवाहम् (ऋ० सं० १० । ५२ । ३) ॥ अयं यो होता कर्ता स यमस्य कमप्यूहेऽन्नमभिवहति यत्समश्नुवन्ति देवा अहरहर्जायते मासे मासेऽर्धमासेऽर्धमासे वाथ देवा निदधिरे हव्यवाहमुल्बमूर्णोतेर्वृणोतेर्वा ।

---

१ क. ख. ६ (३४) ; छ. त. ३७; द. ६. २ घ. झ. ट. °ध्यद्गिरि० बुन्दं स्वाततम् । ऐन्द्री गायत्री । बहू°; ठ. ड. °ध्यादिति । ऐन्द्री । गायत्री । बहू°. ३ ग. ज. बहुनो. ४ क. ख. घ. झ. ट. ठ. ड. °दाने सम°. ५ क. ख. घ. झ. ट. ठ. ड. निरवि°. ६ घ. झ. ट. ठ. ड. °तावद्राधारयत् । आ अदार°. ७ क. ख. °श्चित् । ६ (३४) । कि.°; ठ. ड. °श्चित् । इति निरुक्तभाष्ये षष्ठाध्याये चतुस्त्रिंश खण्डः (ठ. खण्डः ३४) । अयं यो°. ८ ग. ३७ । ३०; इतरेष्वङ्को नास्ति. ९ क. ख. छ. त. द. कमप्यन्नमभि°.

महत्तदुल्बं स्थविरं तदासीदित्यपि निगमो भवत्यूर्बीसमपगतभा[1]समपहृतभासमन्तर्हितभासं[2] गतभासं वा ॥ ३५ ॥

अयं यो होता[3]। सौचीकस्याग्नेर्विश्वेषां देवानां संवादसूक्तं तत्रेयं त्रिष्टु[4]-देवानामार्षं महत्तदुल्बम् (ऋ० सं० (१०।५१।१)।

' किः '

इतीयं चै[5]। योऽयम् अग्निः आह्वाता देवानां पृथिवीस्थानः। किं तस्येति। किरु स यमस्य। कर्ता[6] यमस्य भगवत आदित्यस्य। अग्नेर्हि सकाशात्प्रातरादित्यः प्रसूयते। तदुक्तम् ' एष प्रातः प्रसुवति तस्मात्प्रातर्नोपतिष्ठन्ते ' (मैत्रा० सं० १।५।७) इति। ' यस्मिन् वृक्षे सुपलाशे ' इत्यस्यामृचि यमत्वमादित्यस्य वक्ष्यति (निरु० १२।२९)। किंच। कमभ्यूहे। कमप्यन्नमभिवहति। कमित्यन्ननाम। अन्नमपि चायमेवाभिवहति। कतमत्। यत् एतद्धविर्लक्षणं समश्न[7]न्ति समश्नन्ति देवाः। अश्नातिरत्र प्रकरणवशाद्भोजनार्थः। किंच। अयमेव अहरहः अहन्यहन्यग्निहोत्रिणां गृहेषु उद्बोध्यमानो महान् जायते। मासि मासि जायते पितृयज्ञेषु अर्धमासे[8] चार्धमासे च दर्शपूर्णमासेषु[9]। यस्मादेवंगुणविशिष्टोऽयमग्निः अ[10]थ एतस्मात्कारणादेतमग्निं सर्वे देवा निदधिरे हव्यवाहम्। हविषां वोढारमित्यर्थः। एवमत्र शब्दसारूप्यात् ' यमस्य ' इत्येतस्माच्च षष्ठीयोगात् ' किः ' इत्यस्य ' कर्ता ' इत्येष विपरिणाम उपपद्यते।

' उल्बम् ' (१३१) इत्यनवगतम्। ' ऊर्णोतेः ' इति धातुनिर्देशः। ' ऊर्णम् ' इति त[11]त्स्यात्। ' वृणोतेर्वा ' स्यात्। तेन हि गर्भ आवृतो भ[12]वति। ' महत्त[13]दुल्बं स्थविरं तदासीद्येनाविष्टितः प्रविवे[14]शिथापः। विश्वा अपश्यद्बहुधा ते अग्ने जातवेदस्तन्वो देव एकः ' (ऋ० सं० १०।५१।१) ॥ म[15]हत्परिमाणतः तदुल्बं जरायु आसीत्। स्थविरं

' उल्बम् '

---

१ ' भासमपचितभासमप॰ ' सायणभाष्ये. २ सायणभाष्ये ' अन्तर्हितभासं ' नास्ति. ३ क. ख. ७ (३५); छ. त ३८; द. ७. ४ क. ख. घ. झ. ट. होता ० हव्यवाहम्। सौ°; च होता किः। सौ°; ठ. ड होतेति। सौ°. ५ घ. झ. ट. ठ. ड. च। त्रिष्टुभावाग्नेय्यौ। यो°. ६ घ. झ ट. ठ. ड. स एव कर्ता°. ७ ग. ज. अश्नन्ति°; घ. ट. ठ. ड. अजाति°. ८ ग. ज. झ. ' अर्धमासे ' सकृदेव. ९ क. ख. घ. झ. ट ठ. ड °सेषु च. १० ग. च ज. °ग्निः तथैत°. ११ क. ख. घ. झ. ट. ' तत् ' नास्ति. १२ ग. भवति।३१। मह°. १३ ग. ज. °दुल्बं स्थविरम्। मह°; घ. झ. ट. °दुल्बं स्थविरं तदासीत् ० जातवेदस्तन्वो देव एकः। मह°; ठ. ड °दुल्बमिति मह°. १४ च. प्रविविशिथा° वे. १५ च. बृहत्.

चिरंतनं च तदासीत् येन त्वम् आवेष्टितः आवृतो हे भगवन्नग्ने प्रविवेशिथ[1] प्रविष्टवानसि पूर्वम् आदिसर्गे अपः। किंच। विश्वाः सर्वाः तन्वः तव हे जातवेदो बहुधा अनेकेष्वभिधानेषु वर्तमानाः अपश्यत् एको देवः प्रजापतिः। कोऽन्यस्तव[2] तनूनामन्तं वेत्तुमर्हतीत्यभिप्रायः। एवमत्र जरायु 'उल्ब'-शब्देनोच्यत आवेष्टनसंबन्धादित्युपपद्यते[3]।

'ऋबीसम्' (१३२) इत्यनवगतम्। 'अपगतभासम्' इत्येवमाद्याः शब्दसमाधयः। 'पृथिवी' अभिधेया। सा हि कृष्णच्छाया। तस्मादपगतभासमित्येवमाद्याः शब्दसमाधय उपपद्यन्ते ॥ ३५[4] ॥

हिमेनाग्निं घ्रंसमवारयेथां पितुमतीमूर्जमस्मा अधत्तम्। ऋबीसे अत्रिमश्विनावनीतमुन्निन्यथुः सर्वगणं स्वस्ति (ऋ० सं० १। ११६। ८) ॥ हिमेनोदकेन ग्रीष्मान्तेऽग्निं घ्रंसमहरवारयेथामन्नवतीं चास्मा ऊर्जमधत्तमग्नये योऽयमृबीसे पृथिव्यामग्निरन्तरोषधिवनस्पतिष्वप्सु तमुन्निन्यथुः सर्वगणं सर्वनामानं गणो गणनाद्गुणश्च यद्दृष्ट ओषधय उद्यन्ति प्राणिनश्च पृथिव्यां तदश्विनो रूपं तेनैनौ स्तौति स्तौति[5] ॥ ३६ ॥

इति[6] षष्ठाध्यायस्य षष्ठः पादः[7] ॥

'ऋबीसम्' हिमेनाग्निं घ्रंसमवारयेथाम्[8]। कक्षीवत आर्षम्[9]। प्रातरनुवाकाश्विनयोः शस्यते (आश्व० श्रौ० ४। १५)। हे अश्विनौ हिमेन उदकेन[10] अभिप्रवृद्धं ग्रीष्मान्ते अग्निं घ्रंसम् अहर्लक्षणम् इमाँल्लोकान् दिधक्षन्तमिव युवाम् अवारयेथाम्। वारयित्वा च पितुमतीम् अन्नवतीं पुरोडाशाद्यन्नसहिताम् ऊर्जम् आज्यलक्षणां युवाम् अधत्तम् अस्मै अग्नये हविर्भाजे वर्षानुग्रहपूर्विकयौषधि-

---

१ च. प्रविविशि' वे; थ. ट ठ ड. प्रविवेशि प्रविष्ट°. २ क. ख. घ. झ. ट. ठ. ड. कोऽन्यस्तनस्तव. ३ ठ ड. 'यते। ३५ (ठ. '३५' नास्ति)। इति निरुक्तभाष्ये षष्ठाध्याये पञ्चत्रिंशत खण्डः। ऋबी°. ४ क. ख. ७ (३५); ग. ३८। ३२; इतरेष्वङ्को नास्ति. ५ क. ख. ८ (३६), छ. त. ३; द. ८। ४३. ६ द. इति नैरुक्ते षष्ठा°; ड. थ ध. छ. त. 'इति० पादः' नास्ति. ७ द पादः समाप्तः. ८ घ. झ. ट. °नाग्निं घ्रंसम० सर्वगणं स्वस्ति। कक्षी°; ठ. ड. °नाग्निमिति। कक्षी°. ९ क. ख. ध. झ. ट. ठ. ड आर्षम्। त्रिष्टुप्। आश्विनी। प्रात°. १० क. ख. झ. 'केनाभिप्र°; घ. ट. ठ. ड. °केनाभिप्रवृद्धं.

निष्पत्त्या । किंच । ऋबीसे अत्रिमश्विनावनीतम् । युवामेव हे अश्विनौ योऽयम् ऋबीसे पृथिव्याम् अग्निरनुप्रविष्टोऽन्तर्येनेमानि पृथिवीगर्भेपूर्निहितानि तिन्दुकादीनि पच्यन्ते यमवेक्ष्योक्तम् ' ऋबीसपक्वं नाश्नीयात् ' (मान० श्रौ० १ । ५ । ६ । १४) इति तमुन्निन्यथुः युवामोषध्याद्यन्तर्वर्तिनमोषध्यादिरूपेणैव सर्वगणं सर्वनामानम् । अग्निरेव ह्ययमनेनौषध्यादिरूपेणावस्थितः सर्वैर्नामभिरभिधीयते अग्नेः सर्वत्रोपपत्तिदर्शनात् । ओषध्याद्यभावे पुनरर्थं पुरोधायोन्निन्यथुरिति । स्वस्त्ययनायास्य जगतः । ओषध्याद्यभावेन हि सर्वमेव जगद्विनङ्क्ष्यति । एवमत्र ' ऋबीस 'शब्देन पृथिव्युच्यते ।

' गणो गणनात् ' । स हि गण्यते बहुसंयोगात् । ' गुणश्च ' । गुणोऽपि गणनादेव । असावपि हि गण्यत एव द्विगुणस्त्रिगुण इति । निगमप्रसक्तमेतदुक्तम् । अधुनास्य मन्त्रस्य भाष्यकारः समस्तार्थमाह । ' यद्दृष्ट ओषधय उद्यन्ति प्राणिनश्च पृथिव्यां तदश्विनो रूपम् ' । सोऽश्विनोरधिकारस्तदश्विनोर्माहाभाग्यम् । ' तेन ' माहाभाग्यलक्षणेन रूपेण ' एतौ ' अश्विनौ मन्त्रदृक् स्तौति ' ॥ ३६ ॥

एकादशस्य षष्ठः पादः ॥

इति श्रीजम्बूमार्गाश्रमवासिन आचार्यभगवद्दुर्गस्य कृतौ ऋज्वर्थायां निरुक्तवृत्तावेकादशोऽध्यायः ॥

त्वमग्नेऽलातृणउदेवृहाजासउपलप्रक्षिणीकारुरहमस्मेतेश्चार्यन्तइवाश्वेचंहिसोमानस्वरणमिन्द्रासोमाकृणुष्वपाजस्ताअध्वरेऽस्तिहि-

---

१ घ. झ. ट. ड. सर्वत्रोपत्तिद° ; ट. सर्वत्रोत्पत्तिद° पप. २ च. किं पु° कं. ३ क. ख. घ. झ. जगद्भङ्क्ष्यत; ट. जगद्भिङ्क्ष्यते द्विङ्क्ष्यति; ठ. ड. जगद्भक्ष्यत. ४ च. महाभा°. ५ व. झ. ट. ठ. ड. स्तौति स्तोति. ६ क. ख. ८ (२६); ग. ३९; इतरेष्वङ्को नास्ति. ७ ठ ड. इति निघण्टुपञ्चाध्यायेन सह एकादशाध्यायः । इति जम्बू°; च. ध्यायस्य षष्ठः पादः । इति श्री°. ८ ग °पादः । षष्ठेऽध्यायः । इति जम्बू°; च. ज. °पादः । समाप्तश्चैकादशोऽध्यायः । ग्रन्थसंख्या १५५६ । अस्मिन्नध्याये व्याख्यातऋचः १७० । एवमध्यायषट्के ऋचः ४६० पूर्वार्धे ऋक्संख्या । इति नैरुक्तकाण्डपूर्वार्धः समाप्तः (ज. ' इति० समाप्तः ' नास्ति) । इति जम्बू°. ९ ग. निरुक्तदीपिकायामेका°; च. ज. निरुक्तटीकायामेका°. १० क. ख. च. ज. °ध्यायः समाप्तः.

वोऽसूर्तेसूर्तेमर्त्वोच्छासृमस्तु अेर्तु अ यो अ स्मा अस्मा इदुतत्रैस्तुरीपंहि-
नोतामेत्रोमात्वानपापासोयेवंत्रूकेणजीवांन्नोवतोर्वेनासिधेनुनोऽरो-
यिकाणेवामंवामंकिंतेतुंविक्षंतेनिरोनिध्यदयंयोहिमेनाग्निं षट्त्रिंशत् ॥ ।

इति निरुक्ते पूर्वषट्के षष्ठोऽध्यायः ॥ ६ ॥

इति नैरुक्तपूर्वार्धः समाप्तः ॥

शुद्धिपत्रकम् ।

पङ्क्तीनामङ्काः (१) (३-८) (३८) (१०२) (२१२) (२५०) (३९७) (४०९) (४६१) (६०७) एषु पत्रेषु प्रामादिकाः । ते शुद्धीकर्तव्याः ।

कोणेषु लिखिताः खण्डाङ्काः कदा कदा खण्डाक्षराण्यपि प्रामादिकानि कदा कदा अध्यायाक्षराण्यपि । यथा—

	अशुद्धम्		शुद्धम्	
६३		३		१०
९५		१५		१६
९९	षोडशः	१६	सप्तदशः	१७
१२०	प्रथमा		द्वितीया	
१२७	प्रथमः	१	द्वितीयः	२
२२९	नवमः	९	अष्टमः	८
२६५	सप्तदशः	१७	अष्टादशः	१८
२६७ } २६९ }	सप्तदशः	१७	एकोनविंशः	१९
२७१	सप्तदशः	१७	विंशतितमः	२०
३४५		१०		१९
३६१	विंशतितमः	२०	त्रयोविंशः	२३
३६३	एकविंशः	२१	चतुर्विंशः	२४
३६५	एकविंशः	१९	पञ्चविंशः	२५
३६७	एकविंशः	—	पञ्चविंशः	

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं	
		२१		२५
३६९ }	षट्		पञ्च	
३७१ }		२६		२५
३७३	षट्		पञ्च	
३८३		२०		२७

४६० पत्रे पाठभेदानाम् अष्टमाङ्कादनन्तरम् अङ्काः प्रामादिकाः ।

३७८ पत्रं ७७८ इत्यङ्कितम् ।

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं
१	६	च प्रवृत्तानि	चं प्रवृत्तानि
	१२	स्वरसौष्ठव	स्वरसौष्ठव
	१७	मतएवा	मत एवा
	१९	(ग. च)	(ग. ˚नीयं च)
	२०	कल्पः	कल्प
३	२८	ख्यात	˚ख्यात
	३०	याज्ञिकोप	याज्ञिकोप˚ क
५	२६	द. न.	द.
६	२४	क. ब.	क. ख. ब.
	२६	क. घ.	क. ख. घ.
	३०	˘	˘
१०	१३	भाववचनकर्म	कर्मवचनभाव
	१९	सर्ग निपा	सर्गनिपा
	२४	नामा	‘ नामा
	२५	भवन्ति	भवन्ति ’
११	५	क्षी क्रि	क्षीक्रि
	१५	तत्रै	‘ तत्रै
		प्रदिशन्ति	प्रदिशन्ति ’
	२६	शब्देर्न	शब्दैर्न
	३०	ठ.	ट.
१२	७	ह्रुप	ह्रुप
		प्रसज्येत	प्रसज्येत
१३	२७	ङ. च.	ग. च.
	२८	ध. ज.	च. झ.
		व. ज.	व. झ.

शुद्धिपत्रकम् ।

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं
१४	२९	तत्तत्	तत्
१९	१६	चाँवि	चाँवि
	१७	त्रिधाँ	त्रिधा
	२१	तेया	तथा
	२३	मानो	माँना
	२५	थाँनि.	थाँनि;
	२९	६	७
		७	८
		८	९
	३०	९	१०
१८	२	क्रियामिर्नि	क्रियामिनि
	३	१४-४	१ । ४४
	१०	१-४	१ । ४५
	२७	गो	गौ
२२	२२	वविषय	वविषयं
२६	२७	परिक्लप्तः	परिक्लिप्तः
		परिक्लृप्तः°	परिक्लिप्तः°
२७	१५	शक्तिवात्	शक्तित्वात्
२८	२१	°वत्किंचित्क°	°वत्किंचि° त्कं.
२९	२८	°वधारणार्थो	°वधारणार्थं । व°
३०	१४	चष्टेर्था	चष्टेऽर्था
	२८	जायेतैतस्मिन्	जायेतैतस्मि°
३६	९	दधिश्चिदि	दधि श्चिदि
	२९	आहँ	आह
३८	२४	संदष्ट	संदष्ट्वा
	२७	मन्त्र ष्टादि°	मन्त्र° ष्टादि
३९	८	अभित्वा	अभि त्वा
४३	९	यस्याय	यस्याय—
४४	१४	मरुम्यः	मरुद्भ्यः
४६	२१	प्रत्यक्ष	प्रत्यक्ष

पं०	पङ्क्तिः	अशुद्धं	शुद्धं
४९	२८	ष्वङ्कोनास्ति	ष्वङ्को नास्ति
५०	९	विसीमतः	वि सीमतः
५२	१५	विसीम	वि सीम
५४	१७	स्याद्दृष्ट	स्यार्दृष्ट
	३०	चिन्तन°.	चिन्तन°. ८ छ. त. ञ. थ. ध. ठ. ड. स्याद्दृष्ट°.
५५	१२	४।२	९।८
५६	२१	दृष्ट	दृष्ट
	३०	स्मरणाद्य°.	स्मरणाद्य°. १४ ग. ज. दृष्ट°.
५७	४	तन्वं,	तन्वं.
	२५	नामैव	नामैव
६२	२६	मध्येन्तेः	मध्येन्ते
६३	९	निष्ट्वक्रास	निष्ट्वक्रास
	१०	बिभ्यस्यन्तो	बिभ्यस्यन्तो
	११	निष्ट्वक्रा	निष्ट्वक्रा
६४	२२	वोदाह	वोदाह
६५	२६	निर्वित्सन्.	निर्वित्सन्;
६६	४	सुविदु	सु विदु
६७	२८	न्तेत्येवदे	न्तेत्येतदे
६८	१७	१ । १	१ । १–११
७१	२९	व्याख्यातं तव्यम्°	व्याख्यातं° तव्यम्
७२	११	तत्रैव	तत्रैवं
७३	१९	पुरि शय	पुरिशय
७५	२२	अस्	अस
		नकारिता	न कारिता
	२६	घ. झ. ठ.	घ. झ. ट.
	३०	ग. च. ण.	ग. च. ज.
७६	२२	घ.	घ. ट.
		रस्माच्चतर	रस्माच्च (ट. च्चे) तर

शुद्धिपत्रकम् ।

पत्रं	पङ्क्तिः	अशुद्ध	शुद्धं
		रादि वेति	रादि वेति (ट. रादि चेति इति रस्माचेत)
	२२–२४	ट. पाठस्त्याज्यः	
७८	१	वार्थे	वार्थ
	१६	लक्षणैक	लक्षणैकैक
	२८–२९	धाविधिः तुः	धाविधिः तुः
७९	४	कर्मकृत—' नाम	कर्मकृत'नाम
	८	कश्चिन्न । न	कश्चिन्न । नं
८१	२६	त्यादीनिः	त्यादीनि
	२९	कथं वानु°	वानु°
८३	५	तदेतद्द्वये	तदेतद्द्वय
८७	२८	निष्ठानुपू॰र्वापदप्र	निष्ठानु॰ पूर्वापरभेदं
८८	१५	ष्वथः	ष्वर्थः
८९	१२	पृतासु स्पर्धनायेषु	पृतनासु स्पर्धनीयेषु
९०	१३	सवोद्य	सर्वोद्य
९२	२६	३ ड.	३ ङ.
		४ ड.	४ ङ.
	२८	८ ड.	८ ङ.
९३	२	तद्यथापि	तद्यथा पि
	९	२२	२।२
	२४	झ. ठ.	झ. ट.
	२६	झ. ट.	झ. ठ.
९४	६	युक्तित्वा	युक्तित्वा
	२८	६ घ.	६ घ.
९५	२८	झ. ठ.	झ. ट.
९६	२६	प्रवादा	प्रवादां
९७	२८	वादोऽ	वादोऽ
९८	२५	विज्ञाता स	विज्ञाता प्र
	२६	विज्ञेतां स	विज्ञेतां प्र

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं
१००	१२	स्यासो	स्यासो
	२८	ट. मयोभूः० रुद्र मृळ	मयोभूः० रुद्र मृळ
	३०	गोतमः °श	गोतमः° श
१०१	२६	योनिष्ट प्रपित्वे०	योनिष्टे० प्रपित्वे
	३१	१६ ७	१६
१०२	३०	शं चतुः°	शं चतु°
१०३	१७	चार्थ	चार्थे
	२९	तावत्सपाठः	तावत्स पाठः
	३०	रूढार्णां °ना	रूढार्णां° नां
१०४	२६	ठ. कृति	ट. कृति
१०५	१८	तेचेद्ध	ते चेद्ध
	२७	त्कांम्यैयु°.	त्कांम्यैयु°
१०६	२४	कृतिभिस्तु	कृतिभिः स्तु
११०	१५	पुनर्बिर्बृ	पुनर्विबृ
	२८	७ घ. झ.	७ ब. झ. ट.
१११	२०	नामप्राधा	नाम प्राधा
	२१	देवते	देवते
		तत्	तत्
	३०	ङ. वारवन्तं	ङ. वारवन्तं. ९ क. ख. ङ. त. द. °न्यदेव°.
११३	२९	६ क. ख. घ.	६ क. ख. घ.
११४	२३	घ. झ.	घ. झ.
	२८	°शेन° ज.	शेन ज°
११५	२७	५ घ.	५ व.
११८	२२	प्रीणातेर्वां	प्रीणातेर्वा
११९	३	मेघा	मेघो
	१५	छान्द्या	छाद्व्या
	२८	ग. च. ट.	ग. च. ब. ट.
		तदैक	तदै (घ. दे) क.

शुद्धिपत्रकम् ।

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं
१२०	२८	शङ्खुला	शृङ्खला
१२४	१७	(नि०	(निरु०
१२५	२०	[	| पा०
१२६	१७	उत्तरकाण्ड	उत्तरकाण्डं
१२७	२७	; ढ.	; ठ.
	२८	; ढ.	; ढ
	२९	४	४ घ.
	३०	(ढ. ये)	(ड. ये)
१२८	७	क्रूरो	क्रूरो
	२७	निरुक्ते	निरुक्ते
१३५	२	दध्यादि ।	दध्यादि द्रव्यम् ।
१३६	२३	१ ढ.	१ ठ. ढ.
१३७	३	शरीरं	पु: शरीरं
	३०	कद्रातीतिद्रा	कद्रातीति द्रा
१४६	२६	षर्वणे	षर्गवे
	२७	८ ट	८ ठ
१४७	५	त्रैक्षनाद् वृत्वा	त्रक्षनाद् वृत्वा
	२५	पर्ववती'	पर्ववती
१४८	१६	न आदि	' आदि
१५४	२६	सत्तत्वं	सँतत्त्वं
	२९	'नुविद्धां'	'नुविद्धां'
१५६	२४	द्विलिङ्गौ स्त्रीपुंलिङ्गा	द्विलिङ्गौ स्त्रीपुंलिङ्गा
१५८	१५	रादत्ते	रादत्ते ।
	२५	प्यर्म्यूह्य	प्यर्म्युह्य
	२८	ग. ज.	क. ख. घ. झ. ट. च.
१६२	४	शंतनुः—	शंतनु-
१६७	१६	१४२	१४
	२८	द्वये	द्वय
१६८	१०	ता	ता
	११	संम्राजा	सम्राजा

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं
१६९	१२	नचैनं	न चैनं
१७०	२६	वाहि॰	बाहि॰
१७१	२८	१० ङ.	१० ङ
१७८	२६	घ. ट.	घ.
		यावद्वर्णं॰	यावद्वर्णं॰
१८०	३०	१२ ध.	१२ घ.
१८२	२९	शस्यते	शस्येते
		च	च । इद॰
	३०	चँ	च । इद॰
१८७	३१	१६ ङ. थ. घ.	ङ. थ. घ.
१८८	१८	समुद्रानु	समुद्रान्
१९०	२०	त्तव्या	त्तद्या
१९१	२०	उतस्यान:	उत स्या न:
१९५	७	प्रसिन्धु	प्र सिन्धु
१९६	२९	अघ्नन्	अघ्नन्मे॰
		अहन्	अहन्मे॰
	३२	२२	३२
२०५	२५	रायां	रायो
२०६	२७	२	३
२०७	१७	न्त्संशग्म्ये	न्त्सं शग्म्ये
	१८	११	१
	२७	इत्यपि॰	इत्यवि॰
२१०	२९	यथैवंव॰	यथैवं॰व
२१२	२६	॰देने	॰दने
२१६	१६	आरो	आ रो
	२५	क्तंनि	क्तं नि
२२५	९	त्येवं	त्येवं
२२६	२१	रवल	खल
२२९	१६	हेलते	हेळते
२३०	७	सक्षि	सन् क्षि

शुद्धिपत्रकम् ।

पत्रे	पङ्क्तिः	अशुद्धं	शुद्धं
२३०	८	सा	सं
२३२	३०	मलान्	मूलान्
२३३	१०	द्विंदशतः	द्विंदशतः
	२६	६ क. ख. घ. ङ.	६ क. ख. घ.
२४०	२५	पाकः	पाकं
२४३	२	रिह्हं	रिल्हं
	२२	[14]ईर्ज्याति	[13]ईर्ज्याति
	२४	१ क. ख. रिहं; ग. च. ज. रिहं;	१ क. ख. रिहं;
२४६	२४	[10]पमिमी	पमिमी
२४९	१६	यवां	युवां
२५८	३०	१२ ध	१२ घ
२५९	२८	ठ. अपा	ड. अपा
	२८	१२ ध	१२ घ
२६०	१०	४७	४४
	१५	९।११	९
२६३	७	१३।७	१३
२६४	१५	णाव्या	णाव्यां
२६५	२४	पमार्थ	पमार्थं
	२८	ङ.	ड.
२६७	२५	पमादर्श	पमाप्रदर्श
२६८	२६	अथ वा तीति यज्ञः	अथ ' वा तीति ' यज्ञः
२७०	११	यत्संबा	संबा
२७३	२९	धन्वसु	धन्वसु
२७४	१३	प्रति षिद्धः	प्रतिषिद्धः
२७५	२९	°दानवृत्तौ°	°दानिवृत्तौ
	३०	मम°	मम श्रुतं°
२७६	२५	नुष्ठौती	[4]नुष्ठैती

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं
२७८	२८	एवं	एव
२८०	२४	ग. च.	ग. ज.
२८२	१४	स्तोतॄनूज	स्तोतॄन् ऊ
२८३	१३	दात्ददा	दात् ददा
२९४	२६	' मर्यै	' मर्यादा मर्यै
२९५	१८	दत्तं	दत्त
२९७	२०	नोधमानाः°	नोधमानाःस्तं आ°
२९८	८	कल्प नेतिनि	कल्पनेति नि
३०२	३०	स्योपरिन	स्योपरितन
३०४	८	निसते	निसते
३०७	२६	भर्तारं°	भर्तारं°
३०८	३०	ज. सू.	च. सू
३१०	२६	यांती°प्रता	यांती प्रता°
	२८	विवोसृतानि°	वि॰सृतानि° वा
३११	१०	सखीर	सखीर
३१२	२४	जठरे ये म	जठरे म
	२६	३ ड.	३ड.
३१४	४	भाद्वालक्ष	भाद्वा लक्ष
	१०	तता	तता
३१९	३०	विसृताः	विसृताः
३२४	२३	दारू	दारूरु
	२६	द. ७.	द. ७. ७
	३२	गंत	गंतः
३२६	४	नसन्ते	नंसन्ते
३२९	९	शुचिर्भ	शुचि भ
	२२	तिकर्त	ति कर्त
३३१	१४	स्तोमः	स्तोम
३३२	१७	चिन्नु	चिन्नु
	१८	नूच.	नू च

शुद्धिपत्रकम् ।

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं
३३३	२७	च. सृज्य	च. °सृजाना सृज्य
३४०	१०	न्यरेवा	न्यैरेवा
३४७	२९	लोकं	लोकं°
३४९	२४	पदं दव	पदं देव
३५४	१२	प्रतिषेधे	प्रतिनिषेधे
३६४	२९	°मन्यत्रे	°मन्यत्र
३७१	२६	६	६ क. ख. °निष्ठाः प्रव्राजन्त्व मुंप याहि विद्वान्;
३७२	२९	ऋषेध	ऋषेध
३७४	७	‘ अस्य ’	‘ अस्याः ’
३७७	१९	नाभिचक्रं	नाभि चक्रं
	२७	मृत-	च. मृत-
३७९	१९	हर्तुसं	हर्तुसं
	२७	तीन् । हि° प्रकिरति.	°तीन् ९ हि° प्रकिरति.
३८२	२०	अग्ने	अग्नेः
	१	गोपायत्यं	गोपयत्यं
३८९	२९	जैघ्न	जैघ्न
	३१	जिघांसति	जिघांसति
३९३	२६	°यते;	°यते
	२७	१० घ	१० घ
३९५	२८	। (तीः)	(तीः) ।
	५	शाग्नेः	शांग्नेः
३९६	२६	तदनैसतेः सं०	तदनैसतः सं° तदर्सतेः सं°
	१९	कार्मं	कार्मं
३९७	२१	८२	८९
३९९	२०	प्रति-	प्रति
४००	२०	त्यरंस्था	त्वरं स्था
४०१	२५	च;	च.
४०५	४	चं	चं

शुद्धिपत्रकम् ।

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं
४०५	१४	ब्रा	ब्रा
	२७	द्वे॰	द्वै
	३०	१३ क. ख. ध.	१३ क. ख. घ
४०८	२९	यज्ञसेद्धि	यज्ञसद्धि
४१२	२९	व. ॰वत:	द. ॰वत:
४१३	१५	नाद्वौ	नाद्वौ
४१४	८	वसथें	वसथें
	१४	स वा	सं॰ वा
४१५	३०	स्यर्यम्	स्येयम्
४१६	३१	;षसौ	;च. षसौ
४१७	३०	कात्मि॰	कात्प्रि॰
४२०	२७	३ ड	३ ङ
	३०	पावनेन चा॰;	पावने॰ चा॰ न;
	३२	क. ख. ध.	क. ख. घ.
४२२	४	१३	३ दैवीर्दे
	६	दैवो दे	दैवीर्दे
४२३	६	बहुदा	बहु दा
	९	शरणो	शरणे
४२५	२१	भूत्प्रय	भूत्प्र य
४३१	१५	र्षर्मू	र्धर्म्
४३३	९	र्निरू	र्निरु
४३४	१९	मेध्यादुर	मेध्या दुर
	३१	मेघं नेद्व	मेधं नेद्व
४३५	३०	॰मुखिद॰तं॰ ता	॰मुखिदतं उ॰ तात
४३६	२७	॰प्रस्या	॰मस्या
४३७	२६	स्यार्षम्	स्यार्षम्॰ .
४३८	२९	॰द्रव	॰न्द्रव
	३०	॰द्रव	॰न्द्रव
४४३	२०	सहहारि	सह हारि
	२५	च. उद्वंचं	उद्वंचं

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं
	२७	धानीं नाः	धानीं (नाः)
	३१	उद॑चं	उदचं
		उद॑चं	उद॑चं
४४६	२१	ड	ड
४५०	९	वर्त्यह	वर्त्यह
४५३	१	जातिः कां	जातिः । कां
	४	ऐवं	ऐवं
	१५	विश्वेषां	विश्वेषां
४५६	१४	प्रन्दि	व्रन्दि
	२४	मिःषपी	निःषपी
४५८	२०	स्त्ले	स्त्ये
	२५	°षड्वैलं° न	°नड्वैलं° व
४६०	२४	प्रसुह°	प्र सुह°
४६३	१७	देवरोष	देवरेष
४६८	४	उज्जिहीत	उज्जिहीते
४६९	२७	त्रिष्ठुप्	त्रिष्टुप्
	२२	;च.	च.
४७४	२७	ठ. ड.	ठ. ड.
	२८	तवान्यः	तवान्यः°
४७८	६	संमर्धं	समर्धं
	१३	समाधी	समाँधी
	२७	°मायी	°माधी
४८०	२३	५ क. ख.	५
४८१	२०	कर्मं°	कर्मं तस्य°
४८२	८	प्राणाता	प्रीणीता
४८५	३०	:कृत्स्ना	कृत्स्ना
४८६	१८	आविश्प	आ विश्प
४९१	१०	कोऽध्यः	कोऽर्थः
५०५	२०	आप्रे	आम्रे
५०९	२०	प्र युवाच	प्रत्युवाच

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं
५१२	१०	त्युदर्क ।	त्युदर्क
५१४	२५	ह.	ह.
	२८	९ च	९. च.
५२५	२८	॰ ।	। ॰
५२९	५	नि० घ	निघ
५२९	२२	विप्रास्तप्र॰	विप्रास्तप्रश्ना॰
५३२	३०	॰मन्व्यवेयमन॰	॰मन्व्यवेयमनन्वय॰
५३३	१६	विकृता	विकृत्ता
५३६	१३	धामामि	धामभि
५३९	५	मायां न	मायां न—
५४३	२४	मही	महाँ
५४५	२२	मामेबाँ	मामेवैं
	२३	मामेवा	मामेवैं
५४६	१३	ता निम	तानि म
५४७	१९	अनार्वा	नार्वा
५४९	२०	पक्वानि इमानि	पक्वानि इमानि
५५६	४	जुंजुत्राँ	जुंजुत्राँ
५५८	२५	॰भावन	॰भावेन
	२६	।॰ वृषा॰ ७९ ।	। ७९ । वृषा॰
५५९	१०	‘ जव रु ’	‘ जवारु ’
५६२	१२	वृहद्धोपः	बृहद्धोषः
५६३	२७	द. न. भ.	द.
५६५	१७	व्युत्पत्तिश्च	प्रयोगश्च
५६९	१०	त्वेतकुरु	त्वेतत्कुरु
५७२	१	संयोगे	संयोग
	३	प्रतीति ।	प्रतीति
५७५	२८	तुर्दशे	तुर्वशे
५८०	१४	भवंत आग	भवा अंग
	२०	गडनेन धमनि	गडनेन धमंति

शुद्धिपत्रकम् ।

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं
५८६		' अंहुरः '	' अंहूरणम् '
	१९	स्पष्टार्थाय तस्यैव द्वितीयमुदाहरणम्	' अंहुरः '
	६	शद्ध	शब्द
५८७	१२	संकेल्पं	संकल्पं
५८९	२१	८ घ	८ घ
५९७	२६	ज. घ	ज. घ
५९९	३०	ढ	ढ
	७	इन्द्र यः	इन्द्राय
६००	९	दुर्धम्	र्यम्
६०१	१३	बुंन्दः	बुन्दः
	५	षण्या—	षध्या—
६०७	२१	सोमानस्व	सोमानंस्व

टिप्पणी ।

टिपण्यां पङ्क्तीनामङ्का न मुद्रिताः । ते शुद्धीकरणे गणयितव्याः ।

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं
४	२७	तत्त्व°	तत्त्व०
९	१	१४	१३
१०	१	पत्रं	पत्रं
			१७
	७	प्रथमाद	प्रथमा
	१	सामध्य	सामर्थ्यं
११	१	' भूयः '	६ ' भूयः
१२	१	२७	२६
१३	२५	= विद्य	+ विद्य
१५	७	७	२७
१६	१५	३५	१६
२०	२७	९	५
२२	१४	त्वत्त्व	त्व त्वत्

शुद्धिपत्रकम् ।

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं
	१६	२०	२१
	१७	२२	२१
२८	२७	अर्थ	अर्थं
३०	१	तदेतं	तदेत
३२	१६	२–६	८४ २–६
३३	२६	याताः	यासां ताः
३४	२८	मध्वा ।	। मध्वा
	३१	कास्ते	कास्ते ।
३६	५	१०३ । १	१०३
३७	२	इति ऐ० ब्रा०	इति
४३	१०	– उच् –	+ उच् +
	१३	तदेने	तदेतेन
		९ । १०	९–१०
४६	१५	अरास्थो	अरणस्थो
	१७	तस्मान्	तस्मिन्
४८	८	एतमर्थ॰	एतमर्थं
४९	२	वदि	वेदि
५२	३१	ब्वर्तते	वर्तते
५६	११	किमस्ति	किमस्ति ,
	२४	मेवपद	मेव पदं
५७	२५	केषां चि	केषांचि
५८	१५	काम +	काम
		नै =	नै.
५९	१२	तथाच	तथा च
	१४	ठ.	ट.
६२	११	अस्य वा	अस्यवा
६३	४	शास्त्र	शास्त्रं
	२७	प्रथमार्थेन	प्रथमार्धेन
	३०	भिर्ह्वि	भिर्हि
६४	१९	अवतेः	(अवतेः)

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं
७१	२५	ष्टा ह	ष्टाह
७४	७	६ । १	६१
८१	१	२११	२१२
८३	१४	पत्याग्रा	पत्यग्रा
८५	२९	त्वा इ	त्वा ' इ
८६	२३	अगर	भर
	२४	। मध्ये	मध्ये
	२४	).	)।
९०	३	तळित	तळित्
९५	११	प्राकृत ह्रा	प्राक् तह्र
	१६	बोषा	' बोषा
९६	१	र्थ्यायां	थ्याथा
९८	८	आनि	आ नि
	२०	विवक्ति	विवाक्ति ।
	२१	त्वयि ।	त्वयि।
१००	१५	न्द्राया जु	न्द्रायाजु
	२९	तीक्ष	तीक्ष्ण
१०२	२९	। इति	इति
१०७	१८	सेर्न०	सेर्नं
१०८	१८	। १२	—१२
११०	६	ठ. ड.	ठ. ड. पुस्तकयोः
११२	१३	पुस्तकयो	पुस्तकयोः
	२७	=(	(=
११९	२८	अद्रि०=	अद्रि°
१२२	२	आत्थ्यां	आत्थ्या
१२३	२८	कानाशो	कीनाशो
१२४	२२	सिञ्चस्व ज	सिञ्च स्वज
१२८	२७	लेस्व	लेख
१३१	१०	इति क	इतिक
१३३	१५	मघया	मघ या

पत्रं	पङ्क्तिः	अशुद्धं	शुद्धं
१३६	१५	=’	’—
१५७	२५	ह्जिया	जिह्वया
१७५	२	णाद्ब	णाद्ब्र
१८८	११	सत्क	सत् क
१९७	३	सोतारम्	सो|तारम्
२००	१८	उषा°	उषाः
२०८	१८	मेघत्र	मेघव
२१६	२८	कुत्सश्च	कु:स श्च
२१८	३०	यद्व	‘ यत् ’ व
२२[illegible]	[illegible]	सव्यम्°	सव[illegible]म् ’